Digitized by Sarayu Trust Foundation, Delhi and eGangotri

Acc no 6083
891.237
H26B

हिरण्यकेशीयब्रह्मकर्मसमुच्चयस्थविषयानुक्रमणिका ।

रंगरंजितान्यन्यानिचमंडलानि ।

१ सर्वतोभद्रमंडलम्
२ द्वादशलिंगतोभद्रं(हरिहरमंडलम्)
३ अष्टलिंगतोभद्रम्
४ चतुर्लिंगतोभद्रम्
५ एकलिंगतोभद्रम्
६ ग्रहमंडलम्
७ गृहवास्तुमंडलं (अष्टाशीतिपदम्)
८ प्रतिष्ठावास्तुमंडलं (चतुःषष्टिपदम्)
९ रुद्रमंडलंस्कांदोक्तम्

विषयः			पत्रं.
आह्निकप्रकरणम् ।			
१ मंगलमुपोद्घातश्च	....	....	१
२ परिभाषा	....	....	१
३ प्रातःस्मरणम्	....	....	३
४ मूत्रपुरीषोत्सर्गविधिः		....	६
५ दंतधावनविधिः	....	....	६
६ स्नानविधिः	....	....	६
७ वस्त्रधारणविधिः	....	....	७
८ गंगाष्टकम्	....	....	७
९ आसनकल्पनम्	....	....	८
१० भस्मनिर्माणधारणादि		....	८
११ विभूतिधारणम्	....	....	९
१२ पवित्रप्रमाणंकुशग्रहणम्		....	९
१३ मालालक्षणंसंस्कारश्च		....	९
१४ पुरुषसूक्तम्	....	....	१०
१५ आचमनप्रकारः	....	....	१०
१६ संध्यासंबंधिनिर्णयः		....	११
१७ प्रातःसंध्या	....	....	१२
१८ औपासनकालः	....	....	१५
१९ द्वादशनमस्काराः		....	१५
२० तृचाकल्पनमस्काराः		....	१६
२१ नित्यदानम्	....	....	१६

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

Acc no 6083
891.237
H26B

हिरण्यकेशीयब्रह्मकर्मसमुच्चयस्थविषयानुक्रमणिका ।

रंगरंजितान्यन्यानिचमंडलानि ।

१ सर्वतोभद्रमंडलम्
२ द्वादशलिंगतोभद्रं(हरिहरमंडलम्)
३ अष्टलिंगतोभद्रम्
४ चतुर्लिंगतोभद्रम्
५ एकलिंगतोभद्रम्
६ ग्रहमंडलम्
७ गृहवास्तुमंडलं (अष्टाशीतिपदम्)
८ प्रतिष्ठावास्तुमंडलं (चतुःषष्टिपदम्)
९ रुद्रमंडलंस्कांदोक्तम्

आह्निकप्रकरणम् ।

विषयः			पत्रं.
१ मंगलमुपोद्घातश्च	....	....	१
२ परिभाषा	....	....	१
३ प्रातःस्मरणम्	....	....	३
४ मूत्रपुरीषोत्सर्गविधिः		....	६
५ दंतधावनविधिः	....	....	६
६ स्नानविधिः	....	....	६
७ वस्त्रधारणविधिः	....	....	७
८ गंगाष्टकम्	....	....	७
९ आसनकल्पनम्	....	....	८
१० भस्मनिर्माणधारणादि		....	८
११ विभूतिधारणम्	....	....	९
१२ पवित्रप्रमाणंकुशग्रहणम्		....	९
१३ मालालक्षणंसंस्कारश्च		....	९
१४ पुरुषसूक्तम्	....	....	१०
१५ आचमनप्रकारः	....	....	१०
१६ संध्यासंबंधिनिर्णयः		....	११
१७ प्रातःसंध्या	....	....	१२
१८ औपासनकालः	....	....	१५
१९ द्वादशनमस्काराः		....	१५
२० तृचाकल्पनमस्काराः		....	१६
२१ नित्यदानम्	....	....	१६

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः	पत्रं.
२२ दिनद्वितीयभागकृत्यम्	१७
२३ देवपूजाविचारः	१७
२४ शालग्रामशिलापरीक्षा	१७
२५ देवपूजायांपुष्पादिनिर्णयः	१८
२६ देवपूजा	१९
२७ पार्थिवलिंगपूजा	२५
२८ भूशुद्धिः (आसनविधिः)	२६
२९ भूतशुद्धिः	२७
३० प्राणप्रतिष्ठा	२८
३१ अंतर्मातृकान्यासः	२८
३२ बहिर्मातृकान्यासः	२९
३३ पवनपावनं	२९
३४ महान्यासः	३१
३५ लघुन्यासः	३६

विषयः	पत्रं.
३६ रुद्राध्यायः	३७
३७ सुवर्णघर्मानुवाकः ...	४१
३८ श्रीसूक्तं	४२
३९ नारायणाथर्वशीर्षम्	४३
४० शिवाथर्वशीर्षम्	४३
४१ गणपत्यथर्वशीर्षम्	४५
४२ सूर्याथर्वशीर्षम्	४६
४३ देव्यथर्वशीर्षम्	४७
४४ महापुरुषविद्या	४८
४५ देवेप्रारंभः	४९
४६ गायत्र्यःपुष्पमंत्राश्च ...	५१
४७ मध्याह्नसंध्या	५२
४८ ब्रह्मयज्ञः	५५
४९ वैश्वदेवः	५६

विषयः	पत्रं.
५० गोविप्रपूजनविधिः	५८
५१ परिवेषणविधिः	५९
५२ भोजनेविशेषविधिः	५९
५३ सायंसंध्या	६०
५४ उदकशांतिःसप्रयोगा	६२
५५ श्रावणीप्रयोगःहिरण्यकेशीयः	७६
५६ वेदोपाकर्म	८७
५७ पर्जन्यसूक्तानि	९०
५८ शांतिपाठः	९१
५९ महालयश्राद्धप्रयोगः	९४
६० अन्नसूक्तानि	१०३
६१ त्रिसुपर्णम्	१०४
६२ अभिश्रवणसूक्तानि	१०५
६३ दर्शश्राद्धपार्वणप्रयोगः	१०८

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः	पत्रं.
६४ श्राद्धदिनेवैश्वदेवनिर्णयः	११३
६५ सांकल्पिकश्राद्धविधिः	११३
६६ आमश्राद्धविधिः	११३
६७ हिरण्यश्राद्धम्	११४
६८ एकोद्दिष्टश्राद्धम्	११४
६९ अनुपनीतस्त्रीकर्तृकश्राद्धम्	११४
७० विधवाकर्तृकश्राद्धम्	११५
७१ अविधवानवमीश्राद्धम्	११५
७२ दौहित्रप्रतिपच्छ्राद्धम्	११६
७३ तीर्थश्राद्धम्	११६
७४ यात्रारंभेघृतश्राद्धम्	११६
७५ युगादिश्राद्धम्	११६
७६ अक्षय्यतृतीया	११७
७७ नित्यश्राद्धप्रयोगः	११७
७८ श्राद्धसंपातेतंत्रप्रयोगः	११७
७९ प्रोष्ठपदीश्राद्धप्रयोगः	११८
८० श्राद्धानुकल्पाः	११८
८१ यतेःसमाराधनप्रयोगः	११८
इति हिरण्यकेशीयब्रह्मकर्मसमुच्चये आह्निकप्रकरणम् ॥	
संस्कारप्रकरणम् ॥	
८२ षोडशसंस्काराः	१२१
८३ गणपतिपूजनम्	१२१
८४ पुण्याहवाचनेपृथग्देवताः	१२१
८५ पुण्याहवाचनम्	१२२
८६ मातृकापूजनम्	१२६
८७ नांदीश्राद्धम्	१२६
८८ नांदीश्राद्धेजीवत्पितृकनिर्णयः	१२७
८९ अंकुरारोपणम्	१२७
९० ग्रहयज्ञप्रयोगः (मात्स्यक्रमः)	१२८
९१ अग्निनामानि	१३२
९२ वसोर्धारानुवाकः	१३३
९३ अश्युपघातेप्रायश्चित्तानि	१३३
९४ पुनराधानप्रयोगः....	१३५
९५ ऋतुशांतिप्रयोगः....	१३६
९६ गर्भाधानम्	१४२
९७ नारायणबलिः	१४२
९८ नागबलिः	१४३
९९ दत्तपुत्रविधानम्	१४५
१०० पुंसवनप्रयोगः....	१४६
१०१ त्रिवृदन्नहोमः	१५२

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः		पत्रं.
१०२	गर्भस्रावेस्तंभनविधिः	१५३
१०३	सीमंतोन्नयनप्रयोगः	१५३
१०४	पुंसवनसीमंतयोस्तंत्रप्रयोगः	१५४
१०५	सुखप्रसवोपायः	१५४
१०६	जातकर्मप्रयोगः	१५५
१०७	मेधाजननम्	१५५
१०८	षष्ठीपूजा	१५६
१०९	नामकरणम्	१५७
११०	शिशोःपर्यंकारोहणम्	१५९
१११	दुग्धपानम्	१५९
११२	कर्णवेधः	१५९
११३	सूर्यावलोकनम्....	१५९
११४	उपवेशनम्	१६०
११५	अन्नप्राशनम्	१६०
११६	आयुर्वर्धापनविधिः	१६१
११७	प्रवासादागतस्यविधिः	१६१
११८	चूडाकरणम्	१६१
११९	अक्षरस्वीकारः	१६२
१२०	बालानांवाक्शुद्ध्युपायः	१६३
१२१	गर्भाधानाद्यंतरितसंस्कारनिर्णयः	१६३
१२२	संस्कारलोपप्रायश्चित्तहोमः	१६४
१२३	लुप्तसंस्कारप्रायश्चित्तम्	१६५
१२४	गर्भाधानाद्यंतरितसंस्काराणांतंत्रम्	१६५
१२५	नांदीश्राद्धोपयोगिविचारः	१६६
१२६	नांदीश्राद्धाधिकारिणः	१६७
१२७	नांदीश्राद्धप्रयोगः	१६८
१२८	उपनयनपूर्वदिनकृत्यम्	१७०
१२९	मंडपदेवताप्रतिष्ठा	१७१
१३०	उपनयनप्रयोगः	१७२
१३१	उपनयनमंत्राः	१७४
१३२	अग्निकार्यम्	१७७
१३३	चतुर्थदिवसकृत्यम्	१७८
१३४	मंडपदेवतोत्थापनम्	१७८
१३५	ब्रह्मचारिधर्माः	१७८
१३६	ब्रह्मचार्यग्निनाशप्रायश्चित्तम्	१७९
१३७	चतुर्वेदव्रतानिर्णयः ...	१७९
१३८	वेदव्रतोपाकरणप्रयोगः	१७९
१३९	वेदव्रतोत्सर्जनम् ...	१८१
१४०	शुक्रियव्रतोपाकरणम्	१८१
१४१	शुक्रियव्रतोत्सर्जनम्	१८२

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः	पत्रं.
१४२ गोदानप्रयोगः	१८२
१४३ ब्रह्मचारिणोवेदव्रतातिरिक्त-साधारणव्रतलोपेप्रायश्चित्तम्	१८३
१४४ वेदव्रतानांकालातिक्रमेप्राय-श्चित्तम्	१८४
१४५ समावर्तनम्	१८४
१४६ मधुपर्कः	१८७
१४७ विवाहविचारः	१८८
१४८ कन्यावरणम्	१८९
१४९ वाग्दानम्	१८९
१५० विवाहप्रयोगः....	१९०
१५१ लग्नघटीस्थापनम्	१९०
१५२ सीमांतपूजनम्	१९१
१५३ वरस्यवधूगृहगमनम्	१९१

विषयः	पत्रं.
१५४ मधुपर्केणवरस्यपूजा	१९१
१५५ मंगलाष्टकानिललितंच	१९१
१५६ विवाहमंत्राः	१९२
१५७ कन्यादानम्	१९३
१५८ विवाहहोमः	१९६
१५९ पाणिग्रहणम्	१९६
१६० गृहप्रवेशः	१९७
१६१ गृहप्रवेशस्थालीपाकप्रयोगः	१९८
१६२ औपासनहोमः....	१९९
१६३ आशौचेहोमविधिः	२००
१६४ चतुर्थदिनेऐरिणीपूजनम्	२००
१६५ चतुर्थीकर्म	२०१
१६६ देवकोत्थापनंमंडपोद्वासनचं	२०२
१६७ द्विभार्यस्याग्निसंसर्गविधिः	२०२

विषयः	पत्रं.
१६८ अन्वारंभणीयस्थालीपाक-प्रयोगः	२०३
१६९ दर्शपूर्णमासस्थालीपाकप्र-योगः	२०३
१७० आग्रयणस्थालीपाकः	२०४
१७१ सभार्यस्यप्रवासविधिः	२०४
१७२ अर्कविवाहः	२०५
१७३ मोटनंमेरुतंत्रे	२०६
१७४ कूष्मांडहोमः	२०७
१७५ बृहस्पतिशांतिः	२१०
१७६ विनायकशांतिःबौधायनतंत्रे	२११
१७७ विनायकशांतिः	२११
१७८ श्रीपूजनादिशांतिः	२१३
१७९ प्रतिकूलशांतिः	२१४

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः			पत्रं.
१८०	गोमुखप्रसवशांतिः	....	२१४
१८१	मूलनक्षत्रशांतिः	....	२१७
१८२	ज्येष्ठाशांतिः	....	२२०
१८३	आश्रेषाशांतिः	....	२२१
१८४	आश्लेषाशांतिः(स्फुटा)		२२१
१८५	कृष्णचतुर्दशीजननशांतिः		२२३
१८६	सिनीवालीकुहूशांतिः	....	२२४
१८७	दर्शजननशांतिः	....	२२५
१८८	व्यतीपातसंक्रमणजननशांतिः		२२६
१८९	वैधृतिजननशांतिः	....	२२७
१९०	भद्राजननशांतिः	....	२२७
१९१	अधोमुखजननशांतिः	....	२२८
१९२	एकनक्षत्रजननशांतिः		२२८
१९३	ग्रहणजननशांतिः	....	२२९
१९४	नक्षत्रगंडांतशांतिः	....	२२९
१९५	तिथ्यादिगंडांतशांतिः	....	२३०
१९६	विषनाडीशांतिः	....	२३०
१९७	यमलजननशांतिः	....	२३१
१९८	त्रिकप्रसवशांतिः	....	२३१
१९९	सदंतजननशांतिः	....	२३२
२००	सिंहादिप्रसूतगवादिशांतिः		२३२
२०१	प्रसववैकृतशांतिः	....	२३३
२०२	बालग्रहशांतिप्रयोगः	....	२३३

इति द्वितीयंसंस्कारशांत्यादिप्रकरणम्

व्रतोद्यापनादिमिश्रप्रकरणम् ।

२०३	सर्वव्रतसाधारणोद्यापनसंभाराः	....	२३५
२०४	सर्वतोभद्रमंडलम्	....	२३५
२०५	लिंगतोभद्राणि	....	२३५
२०६	व्रतोद्यापनप्रयोगः	....	२३६
२०७	ब्रह्मादिमंडलदेवताः	....	२३७
२०८	शुक्लैकादशीव्रतोद्यापनम्		२४०
२०९	कृष्णैकादश्युद्यापनम्	....	२४२
२१०	हरितालिकाव्रतम्	....	२४३
२११	परशुरामजयंतीव्रतम्	....	२४३
२१२	संकष्टचतुर्थीव्रतम्	....	२४४
२१३	शुक्लचतुर्थ्यांविनायकव्रतम्		२४४
२१४	ऋषिपंचमीव्रतम्	....	२४४
२१५	उपांगललिताव्रतम्	....	२४५
२१६	मुक्ताभरणसप्तमीव्रतम्		२४६
२१७	जन्माष्टमीव्रतम्	....	२४६

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः		पत्रं.
२१८ रामनवमीव्रतम्	....	२४७
२१९ रामनामलेखनव्रतम्	....	२४७
२२० अदुःखनवमीव्रतम्	....	२४८
२२१ गोपद्मव्रतम्	... .	२४८
२२२ श्रवणद्वादशीव्रतम्	....	२४८
२२३ प्रदोषव्रतम्	....	२४९
२२४ अनंतचतुर्दशीव्रतम्	....	२५०
२२५ वैकुंठचतुर्दशीव्रतम्	....	२५१
२२६ शिवरात्रिव्रतम्	....	२५१
२२७ वटसावित्रीव्रतम्	....	२५१
२२८ कोजागरव्रतम्	....	२५२
२२९ सोमवत्यमावास्याव्रतम्		२५२
२३० पिठोराव्रतम्	....	२५२
२३१ सूर्यव्रतम्	....	२५२
२३२ आशादित्यव्रतम्	....	२५३
२३३ सोमवारव्रतम्	....	२५३
२३४ शिवमुष्टिव्रतम्	....	२५३
२३५ मंगलागौरीव्रतम्	....	२५४
२३६ भौमवारव्रतम्	....	२५४
२३७ शनैश्चरव्रतम्	....	२५४
२३८ शिवलक्षपूजाव्रतम्	...	२५४
२३९ विष्णुलक्षपूजाव्रतम्	....	२५५
२४० लक्षप्रदक्षिणाव्रतम्	...	२५५
२४१ लक्षवर्तिव्रतम्	....	२५५
२४२ रुद्रलक्षवर्तिव्रतम्	....	२५६
२४३ कदलीव्रतोद्यापनम्	....	२५६
२४४ कर्कटीव्रतम्	....	२५६
२४५ कूष्मांडीव्रतम्	....	२५७
२४६ कूष्मांडाष्टकफलदानम्	....	२५७
२४७ दशहरात्रतविधिः	....	२५७
२४८ दशहरास्तोत्रंस्कांदे	....	२५८
२४९ मलमासव्रतम्	....	२५९
२५० कोकिलाव्रतम्	....	२५९
२५१ अर्धोदयव्रतम्	....	२५९
२५२ समुद्रस्नानविधिः	....	२६०
२५३ पार्थिवलिंगोद्यापनम्	...	२६०
२५४ प्रबोधोत्सवतुलसीविवाहौ		२६१
२५५ तुलसीविवाहःकौस्तुभीयः		२६१
२५६ अश्वत्थोद्यापनम्	....	२६३
२५७ अश्वत्थोपनयनम्	....	२६५
२५८ अश्वत्थविवाहः	....	२६६
२५९ यूपप्रकारः	....	२६६

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः	पत्रं.
२६० अश्वत्थोद्यापनंबौधायनीयं-पंचकुंडी	२६७
२६१ वटोद्यापनम्	२६८
२६२ शालाकरणप्रयोगः	२६९
२६३ वास्तुशमनप्रयोगः	२७०
२६४ स्मृत्युक्तवास्तुशांतिः	२७१
२६५ नूत्नगृहप्रवेशः....	२७४
२६६ ग्रहयज्ञविचारः संस्काररत्न-मालास्थोमहान्	२७५
२६७ ग्रहयज्ञप्रयोगः	२७७
२६८ पंचकुंडीमंडपप्रकारः	२८९
२६९ संकल्पोक्तऋत्विग्वरणंच	२८९
२७० मंडपपूजाचंडेश्वरोक्ता	२९०
२७१ शांतिहोमः	२९४
२७२ देवहस्तेकंकणबंधनेजलाधि-वासेचवासुदेव्यांविशेषः	२९४
२७३ पंचकुंडीपक्षेन्वाधानादि	२९५
२७४ पंचकुंडीहोममंत्रद्वारपालजप क्रमः	२९६
२७५ सप्रासाददेवस्थिरप्रतिष्ठाप्र०	२९७
२७६ अभ्युत्तारणम्	२९८
२७७ जलाधिवासः	२९८
२७८ प्रासादादिवास्तुप्रकारः	३००
२७९ कुंडसंस्कारादि	३०१
२८० देवस्थापनदिनकृत्यम्	३०३
२८१ प्राणप्रतिष्ठा	३०४
२८२ षोडशतत्वन्यासास्तद्धोमश्च	३०६
२८३ चलार्चाप्रयोगः	३०८
२८४ एकाध्वरचलप्रतिष्ठा	३१३
२८५ जीर्णोद्धारेअघोरहोमः....	३१३
२८६ प्रासादप्रतिमयोर्जीर्णोद्धारः	३१४
२८७ जीर्णप्रतिमापिंडिकाप्रतिष्ठावि.	३१५
२८८ प्रोक्षणविधिः	३१६
२८९ वापीकूपतडागाद्युत्सर्गः	३१६
२९० कूपतडागादौमृतदोषशांतिः	३१९
२९१ वनोपवनवृक्षोत्सर्गः	३१९
२९२ रुद्रविधिः	३२१
२९३ रुद्रजपादौन्यासविधिः	३२१
२९४ रुद्रस्यछंदर्ष्यादि	३२२
२९५ मंडपकुंडस्थंडिलादिप्रमाणम्	३२३
२९६ अथप्रयोगः	३२५
२९७ रुद्रयंत्रस्कांदोक्तम्	३२६

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः	पत्रः
२९८ हविर्द्रव्याणांनियमः	३२८
२९९ रुद्रमंत्रविभागःषोढा	३२९
३०० रुद्रस्वाहाकारः	३३३
३०१ तृचाकल्पपद्धतिः	३३८
३०२ अपामार्जनम्	३४३
३०३ शीतलाष्टकस्तोत्रम्	३४८
३०४ नवचंडीशतचंडीप्रयोगः	३४९
३०५ गोप्रदानप्रयोगः	३५४
३०६ वृषभदानप्रयोगः	३५५
३०७ महिषीदानप्रयोगः	३५६
३०८ मेषदानप्रयोगः	३५८
३०९ ग्रहणशांतिः	३५९
३१० ग्रहणेदानादि	३६०
३११ ग्रहणेपुरश्चरणविधिः	३६०
३१२ गायत्रीपुरश्चरणप्रयोगः	३६०
३१३ गणपत्यथर्वशीर्षपुरश्चरणम्	३६२
३१४ गणपत्यथर्वशीर्षहवनविधिः	३६२
३१५ संतानगोपालविधानम्	३६३
३१६ तत्रहोमविधिः	३६४
३१७ ज्वरशांतिप्रयोगः	३६६
३१८ मृत्युंजयजपविधिः	३६७
३१९ सर्वरोगनाशकानि	३६७
३२० अच्युतानंतगोविंदनामत्रयी जपविधिः	३६७
३२१ षड्ग्रहादियोगशांतिः	३६८
३२२ जनमारशांतिः....	३६८
३२३ सर्वाद्भुतशांतिः	३६९
३२४ दीपपतनशांतिः	३६९
३२५ पल्लीसरठशांतिः ...	३७०
३२६ काकमैथुनदर्शनादिशांतयः	३७१
३२७ षष्टितमाब्दपूर्तिशांतिः....	३७१
३२८ रोगोत्पत्तौनक्षत्रफलम्....	३७२
३२९ सर्वनक्षत्रसाधारणःशांति प्रयोगः	३७३
३३० द्वादशाब्दोत्तरमवलोकनविधिः	३७३
३३१ जीवतोमृतिवार्ताश्रवणेविधानम्	३७३
३३२ कृतौर्ध्वदेहिकस्यसंग्रहविधिः	३७४
इति मिश्रप्रकरणम्	

और्ध्वदेहिकाद्यंतिमप्रकरणम्।

३३३ हिरण्यकेशीअंत्येष्टिपद्धतिः	३७५

CC-0. In Public Domain Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः		पत्रं.
३३४	सर्वप्रायश्चित्तप्रयोगः	३७५
३३५	ब्रह्मकूर्चविधिः	३८०
३३६	प्रायश्चित्तोत्तरांगम् ...	३८१
३३७	मुमूर्षौमृतेचकृत्यम्	३८१
३३८	प्रेतोत्थापननिमित्तंहिरण्य-श्राद्धम्	३८२
३३९	दहनविधिः	३८२
३४०	पंचकपुत्तलविधिः	३८३
३४१	त्रिपादपुत्तलविधिः	३८४
३४२	अग्निप्रज्वलनादि	३८४
३४३	अस्थिसंचयनम्	३८५
३४४	उदकक्रियापिंडक्रिया	३८७
३४५	नग्नप्रच्छादनश्राद्धम्	३८८
३४६	नवश्राद्धानि	३८८
३४७	द्वितीयदिनादिविधिः	३८८
३४८	दशमदिनविधिः	३८९
३४९	एकादशाहेवृषोत्सर्गः	३८९
३५०	आद्यश्राद्धम्	३९१
३५१	रुद्रगणश्राद्धम् ...	३९१
३५२	वसुगणश्राद्धम्	३९२
३५३	पंचदशमासिकानि	३९२
३५४	दशदानानि	३९२
३५५	अष्टदानानि	३९३
३५६	उपदानानि	३९३
३५७	प्रायश्चित्तगोदानम्	३९४
३५८	पंचगोदानानि	३९४
३५९	अश्वदानम्	३९५
३६०	शय्यादानम्	३९५
३६१	भूमिदानम्	३९६
३६२	सपिंडीकरणम्	३९६
३६३	पाथेयश्राद्धम्	३९८
३६४	त्रयोदशाहकृत्यम्	३९८
३६५	उदकुंभश्राद्धम्	३९८
३६६	सहगमनविधिः	३९८
३६७	रजस्वलामरणेविधिः	३९९
३६८	सूतिकामरणेविधिः	४००
३६९	गर्भिणीमरणेविधिः	४००
३७०	ब्रह्मचारिमरणेविधिः	४००
३७१	ब्रह्मचारिमरणेऽर्कविवाहः	४०१
३७२	कुष्ठिमरणेविधिः	४०१
३७३	पालाशविधिः	४०१
३७४	पुनःसंस्कारेकालशुद्धिः	४०२

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विषयः	पत्रं.
३७५ और्ध्वदेहिकाधिकारिणः	४०२
३७६ आतुरसंन्यासः	४०३
३७७ संन्यासग्रहणविधिः	४०५
३७८ सावित्रीप्रवेशः	४०६
३७९ विरजाहोमः	४०७
३८० पर्यंकशौचप्रयोगः	४०८
३८१ योगपट्टः	४०९
३८२ ब्रह्मान्वाधानम्	४१०
३८३ मृतयतिसंस्कारः	४११
३८४ एकादशेहनिपार्वणश्राद्धम्	४११
३८५ द्वादशाहेनारायणबलिः	४१२
३८६ यतिधर्माः	४१२
३८७ यतिभोजनप्रकारः	४१३
३८८ त्रिंशच्छ्लोकी(आशौचनिर्णयः)	४१३
ग्रंथप्रशस्तिः	

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हिरण्यकेशीयब्रह्मकर्मसमुच्चयस्थमन्त्रानुवाककोशः ।

मंत्रः	पत्रं	मंत्रः	पत्रं	मंत्रः	पत्रं	मंत्रः	पत्रं
अ.		अग्निरैतुप्रथमो	१९६	अग्नेनयसुपथा	३६	अंतरिक्षꣳस	१८२
अकार्यकार्यव	७८	अग्निर्द्विहोता	३८६	अग्नेप्रायश्चित्तेत्वं	२०१	अतोदेवा अ.	२३
अक्षन्नमीमदंत	१००	अग्निर्नःपातुकृत्तिकाः....	७१	अग्नेभ्यावर्ति	१३५	अत्रिर्यद्वामव	२४४
अक्षीभ्यांते अ.	२१६	अग्निर्भूताना	८४	अग्नेरेतश्चंद्रꣳ ...	१२२	अत्रेर्यथानु	२४५
अंगादंगात्संभवसिं ...	२१५	अग्निर्मूर्धा	१२८	अग्नेर्मन्वे अ.	६७	अथपुरुषोहवैना. अ.	४३
अग्नआयाहिवीतये	५५	अग्निर्यजुर्भिः अ.	३०२	अग्नेव्रतपतेव्रतं	१७६	अथवायोरेका अ.	३९०
अग्नयेस्वाहाकृ	७४	अग्निर्होता	३८५	अग्नौपृथिव्यां	१७५	अदितेनुमन्यस्व	५६
अग्नयेसमिध	१७६	अग्नेरक्षाणो	१४४	अग्रमग्रचरंतीनां	७७	अदितेन्वमꣳस्थाः	५७
अग्निंदूतं वृणी	२७	अग्नेअंगिरः	१३५	अघोरचक्षुरप	१९६	अद्भ्यःसंभूतः अ.	३५
अग्निमीळे	५५	अग्नेतेजस्विन्ते अ.	१७४	अघोरेभ्यो	१३२	अधस्यायोषणा	२६४
अग्निरायुष्मान्	१७५	अग्नेत्वंपारया	३२	अंजंतित्वाम	२७८	अनाज्ञातंयदा	८६

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः	पत्रं
अनुनोद्यानुम	१५७
अनुमन्यताम	१५७
अनुमत्यैपुरोडाश अ.	८८
अनृक्षराऋ	१८९
अन्नपतेन्नस्य	५९
अन्नꣳसाम्राज्याना	८४
अपनःशोशुचद अ.	३१
अपेतवीतविच	३८३
अपैतुमृत्युरमृतं	७५
अपःप्रणयति अ.	६३
अप्रजस्तांपौत्र	१९६
अप्सरासुचया	१७७
अप्सरासुचयो	१८५
अप्सुमेसोमो	२७
अबोध्यग्निः	३३
अभित्यंदेवंस	२३७
अभित्वागोतमा	२४५
अभित्वादेव	१३०
अयंकुमारोजरां	१५६
अयंतइध्म	८२
अयंतेयोनिर्ऋ	२०४
अयंपुरो	६५
अयमग्निःस	१९९
अयाश्चाग्नेस्य	१३५
अवसृजपुनरग्ने	३८६
अश्मन्नूर्जपर्व अ.	१३७
अश्वक्रांतेरथ	७७
अश्वत्थेवोनिष	१२२
अषाढंयुत्सु अ.	१८०
असावादित्यो	१३
असुनीतेपुन	२८
असुन्वंतमय	३३
अस्मिन्राष्ट्रे	१८७
अस्मेरुद्रामेह	३३
अहमस्मिप्रथम	६९
अहिरिवभोगैः	२३
आ.	
आगावोअग्मन्	५८
आजिघ्रकलशं	१२२
आजुह्वानःसुप्र	२०४
आतिष्ठेममश्मा	१७३
आतूनइंद्र	२६४
आदित्यप्राय. ...	२०१
आदित्योवाएषए.	१५
आदित्योवैते	१५
आनोदिवोबृहतः	२२२
आनोनियुद्भिः	३३
आनोविश्वेअस्का अ.	१८०
आनःप्रजांजन	१९४
आपउंदंतुजीवसे अ.	८७
आपांतमन्यु	७७
आपोवाइदꣳ	६
आपोहिष्ठा ऋ. ३	३०
आपःपुनंतु	५२
आप्यायस्व	२२
आब्रह्मन्ब्राह्मणो अ.	१०३

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः		पत्रं
आभिर्गीर्भियदतो	....	८६
आमांमेधासुर	....	१७७
आमावाजस्य	....	१०२
आमासुपक्वमैरय	....	९९
आमूरजप्त्या	....	१२५
आयंगौःपृश्नि	....	१२९
आयातुवरदा	....	१२
आयुर्दाअग्ने	....	१७३
आयुर्दादेवजर	...	१७३
आयुष्टेवि अ.	....	२०९
आयुष्टेविश्व	....	१७५
आयुष्यंवर्चस्यꣳ अ.	....	१८९
आर्द्रज्वलति	....	७८
आवहंतीवित	....	३७८
आशुःशिशानो अ.		३५
आसत्येनरजसा	....	१२८
इ.		
इडादेवहूर्मनु	....	३१
इडामग्नेपुरु	....	१२६
इदंतएकंपर	....	१३४
इदंपितृभ्योनमो	....	९८
इदमून्नुश्रेयो	....	२७१
इदंविष्णुर्वि	....	६३
इंद्रस्यवृष्णो	....	२९४
इंद्राग्नीमेवर्चः	....	१८८
इंद्राणीमासु	....	१२९
इंद्रोज्येष्ठाना	....	८४
इंद्रोदधीचो अ.	....	६८
इंद्रंविश्वाअवी	....	६३
इंद्रंवोविश्वतः	....	१२९
इमꣳस्तोममर्हते	....	१८४
इमाआपःशिव	...	१२५
इमाआपोमधुम	....	३८५
इमामग्निस्त्रा	....	१९६
इमंमेगंगेयमुने	....	६
इमंमेवरुण	....	६१
इमंयमप्रस्तर	....	३६
इमांधियंशिक्ष	....	३१८
इमाँल्लाजानाव	....	१९७
इयमेवसायाग्र अ.	....	१७२
इयमोषधेत्राय	....	१८६
इयंनार्युपब्रूते	....	१९७
इषेत्वोर्जेत्वा अ.	....	८७
इहैवध्रुवाप्रतितिष्ठ	....	२७०
इहैवध्रुवांनिमिनो	....	२७०
इहैवैधिमाप	....	३०५
उ.		
उच्चादिविदक्षिणा	....	१२३
उतासिमैत्राव	....	२४५
उत्तमेशिखरे	....	१५
उत्तिष्ठप्रेहिप्रद्र	....	३८७
उत्तिष्ठब्रह्मण	....	१३२
उत्तिष्ठातस्तेनु	....	३८६
उदायुषास्वायुषो	....	१७६
उदुत्यंजातवे	....	५३
उद्गातेवशकुने	....	१२४

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः	पत्रं
उद्धन्यमानम ...	८०
उद्धृतासि	७७
उद्बुध्यस्वाग्ने	१२८
उद्वयंतमस	५३
उपश्वासय	३६
उपह्वयेसुदुघां अ.	१०३
उपावरोहजात ...	२५०
उपास्मैगाय	१२६
उशंतस्त्वानिधीमहि	९७
ऋ.	
ऋचांप्राची अ.	१३८
ऋतंचसत्यं	७८
ऋताषाड्ऋत	६५
ऋतुभिष्ट्वार्त	१८६
ऋतेनस्थूणा	२७०
ऋध्यामस्तोमं	१२४
ऋध्यास्महव्यैः	१२४
ऋषेमंत्रकृतां	२४४
ए.	
एकमिषेविष्णु	१९७
एतंयुवानंमं०	३९०
एवानस्पृधःसम	२४४
एवापित्रे	१९
एषहिदेवःप्र	८१
एषातेअग्नेसमि	१७७
ओ.	
ओजोसिसहो	१२
ओमासश्चर्षणी	२३७
ओषधयःसं	१२२
ओषधेत्रायस्वैनं	१६२
क.	
कइदंकस्मा अ, ...	१९४
कनिक्रदज्जनु अ.	१७१
कयानश्चित्र ऋ. ३ ...	३९१
कांडात्कांडात्	७७
कार्षिरस्यपापां	२३८
कितवासो	१४
कुर्वाणाचीरमा	१७२
कूष्मांडैर्जुहुयात् अ.	९५
कृणुष्वपाजः	६३
केतुंकृण्वन्न	१२८
क्षेमायवःशांत्यै	२७४
क्षेत्रस्यपतिना	१२९
क्षेत्रीयैत्वानिर्ऋत्यै	१५६
ग.	
गंधद्वारांदुरा	२२
गृणानाजमदग्नि	२४५
गृहानहꣳसुम	२७४
गृहामाबिभीत	२७४
गोमाꣳअग्नेविमाꣳ	२१५
गौरीमिमाय	१२६
घ.	
घृतंमिमिक्षिरे	२२
घृणिःसूर्य	१५
घृतंघृतपावानः	२७

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः	पत्रं
च.	
चतुःशिखंडा	१९०
चत्वारिश्रृंगात्रयो	५६
चरणंपवित्रं	७७
चंद्रमानक्षत्रा	८४
चित्तिःस्रुक्	२०३
चित्पतिर्मा	२९
चित्रंदेवाना	५३
चित्तिःस्रुगासीत्	३८३
चित्रावसो ...	१२९
ज.	
जज्ञानंसप्तमा	२५२
जातवेदसे	३२
जातवेदायदि	३४

मंत्रः	पत्रं
त.	
तंतुंतन्वन्त्र	१३५
तच्चक्षुर्देवहितं	५३
ततंमआपःस्त	१३३
तत्पुरुषस्यविश्व	५१
तत्त्वायामि	३३
तत्सवितुर्वरेण्यं	१०२
तदप्येषश्लोको	१२५
तदस्यप्रिय	१३९
तमीशानं	३३
तववायवृत ...	२९३
तवेमेलोकाः ...	१८०
तस्यतेपवित्रप	३१
तान्नःपूषन्छिव	१९६

मंत्रः	पत्रं
तामग्निवर्णा	२३८
तासूर्याचंद्रमसा	७०
तेजोसिशुक्रम	२९९
त्यांनुक्षत्रियाꣳ	२३७
त्रयस्त्रिꣳश	१३५
त्रातारमिंद्र	३३
त्रिर्देवःपृथिवी	१३९
त्रायंतामिह	१२५
त्र्यंबकंयजा	३१
त्वंनोअग्नआ	२९२
त्वन्नोअग्ने	३३
त्वमग्नेअया	१३३
त्वमग्नेरुद्रो अ.	३५
त्वयिमेधांत्वयि	१७४

मंत्रः	पत्रं
त्वष्टारूपाणाम.	८४
त्वामग्नेपुष्करा	१९९
त्वेक्रतुमपि	२२
द.	
दधिक्राव्णा	१३
दातारोनोभिवर्धतां	१०२
देवकृतंब्राह्मणं	१९६
देवस्यत्वा	१२५
देवानांनुवयं सू.	२६५
देवाहवैस्वर्गलोक शि. अ.	४३
देवावसव्या अ.	९०
देवीमहंनिर्ऋतिं	२३७
देवोवःसविता	३०
द्यौस्तेपृष्ठꣳ	१९६

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः		पत्रं
द्यौःसमित्	....	१८२
द्रप्सश्चस्कंद	...	१३४
द्रविणोदाद्रविण	....	१२३
द्रुपदादिवे	....	१३
द्वाविमौवातौ	....	२३८
ध.		
धातादददातुदाशुषे	....	१४९
धातादददातुनो	....	१४९
धाताप्रजाना	....	१४९
धातापुनातु	....	३८७
धामंतेविश्वंभु	....	२४०
धान्नोधान्नो	....	२३८
धूरसिधूर	....	२३
ध्रुवक्षितिर्ध्रुव अ.	....	१९८

मंत्रः		पत्रं
न.		
नमस्तेगणपतये ग. अ.		४५
नमोअस्तुसर्पे	....	१४४
नमोग्रहायचाभि	....	१८५
नमोब्रह्मणे	....	५५
नमोमह्द्भो	....	२६
नमोवःपितरो	....	१०१
नमःसोमाय अ.	....	२२
नर्यप्रजांमे	....	२३
नयेदैभ्योवृश्चये अ.	....	१९२
नवोनवोभवति	....	१२३
नाकेसुपर्ण	....	६३
नासदासीन्नो	....	७१
नीललोहितं	....	१९४

मंत्रः		पत्रं
नेष्टःपत्नीमुदान	....	१४२
प.		
पयस्वतीरोषधयः	....	३१
परंमृत्योअनु	....	७५
परिणोरुद्रस्यहेती अ.		१४०
परित्वागिर्वणो	....	१९४
परिलिखितꣳ	....	२७०
परीदंवासोधि	....	१७३
परेतपितरः	....	१०१
परोमात्रया	....	१३९
पवमानःसुवर्जनः	...	५३
पवित्रवंतः	....	९४
पाहिनोअग्न	....	१८३
पावीरवीकन्या	....	२२२

मंत्रः		पत्रं
पितरःपितामहाः	....	८५
पुनरग्निश्चक्षु	....	१३३
पुनरूर्जानिव	....	१३५
पुनस्त्वादित्या	....	१३३
पूर्णादर्विपरापत	....	१२२
पूर्णापश्चादुत	....	२०३
पूर्णाहुतिमुत्तमां	....	२१९
पृथिवीशांता अ.	....	१४१
पृतनाजितꣳ	....	३२
पृथिवीसमित्	....	१८२
पृथिवीहोतासीत्	....	३८३
प्रक्षोदसाधायसा	....	२६४
प्रजापतिर्जया	....	१४९
प्रजापतिंप्रथमं	....	१८०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

मंत्रः		पत्रं
प्रजापतेत्वंनिधि	....	१८०
प्रजापतेनत्व	....	५८
प्रजापतेरक्ष्यश्च अ.		२१८
प्रतद्विष्णुस्त	....	१३९
प्रमंदिनेपितु	....	१५४
प्रसूतोभक्ष	....	२४४
प्राच्यैदिशेया अ.	....	१४
प्राजापत्यामे	....	१८२
प्रातराग्निंप्रात	...	७१
प्रेतिचेतिचे	....	२०२
ब.		
बलिंगृह्णंत्विमे	....	२१३
बृहत्सामक्षत्रभृ	....	९८
बृहस्पतिःप्रथमं	....	२२२
बृहस्पतिर्ब्रह्मणो	....	८४
बृहस्पतिःसमजय	....	२२२
बृहस्पतेअतिय	....	१२८
बृहस्पतेजुषस्वनो	....	१२२
बृहस्पतेसवित	....	१९०
ब्रह्मजज्ञानं	....	३६
ब्रह्ममेतुमां त्रि.	....	१०४
ब्रह्मयज्ञेनयक्ष्यमाणः अ.		५५
ब्रह्मादेवानां	....	१२९
ब्रह्मात्मन्वदसृ अ.	....	३४
ब्राह्मणएकहोता ॥	....	३८६
भ.		
भद्रंकर्णेभिः	....	१२३
भद्राअग्नेर्वध्र्य	....	२२७
भद्रोभद्रया	....	२४७
भवतंनःसमनसौ	....	२०२
भीषास्माद्वातः अ.	....	११९
भूतंभव्यं	....	६८
भूःप्रपद्येभुवः	....	६२
भूरग्नयेचपृथिव्यै	....	१८३
भूरग्निंचपृथिवीं	....	८३
म.		
मधुवाता ऋ. ३		२२
मयिगृह्णाम्य	....	८१
मनोज्योति	....	३३
ममाग्नेवर्चो	....	६६
मयिमेधां	....	१७७
मयोभूर्वातो	....	३९०
मरुतोगणानां	....	८५
मरुतोयस्यहि	....	२३८
मर्माणिते	....	३४
महाꣳइंद्रोव.	....	७७
महाहविर्होता	....	३८३
महीद्यौःपृथिवी	....	३६
मातारुद्राणां	....	१८७
मातेगृहेनिशि	....	१९६
मातेपुत्रꣳरक्षो	....	१९६
मानोअरातिर	....	१९५
मानःसपत्नःश	....	२७०
मारुतमसि अ.	....	९०
मित्रःसत्यानाम	....	८४
मित्रस्यचक्षुर्ध	....	१७३

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः		पत्रं
मित्रस्यचर्षणी	....	१४
मित्रोजनान्	....	१४
मूर्धानंदिवो	....	३३
मृत्तिकेहनमे	....	७७
मेधांतइंद्रो	....	१७५
मेधांमइंद्रोददातु	....	१७७
मोषुणःपरा	....	२९२
य.		
यज्ञाग्रतोदूर ऋ.	६	३४
यज्ञनमस्तेयज्ञ	....	१५१
यज्ञस्यघोषदसि अ.	....	८७
यज्ञायज्ञावः	....	३०३
यज्ञोपवीतंप	....	१७३
यज्ञोभूत्वा	....	३६

मंत्रः		पत्रं
यत्क्षुरेणमर्च	....	१८५
यच्चिद्धितेवि	...	१४
यतइंद्रभया	....	७७
यत्किंचेदंवरुण	....	१४
यंतेअग्निमंथा	....	३८६
यत्तेअग्नेतेजस्ते	....	१७७
यत्तेकृष्णःशकु	....	३८६
यत्तेगात्रादग्निना	....	२३८
यत्तेदेवाअद	....	२०३
यत्पाकत्रा	....	१५१
यत्पुण्यंनक्षत्रं	....	१२४
यत्पृथिव्याःर	....	७८
यत्रपूषावृह	....	१६२
यत्रवेत्थवन	....	१३४

मंत्रः		पत्रं
यंतुनदयो	....	५८
यथाकूपःशतधारः	...	५७
यथाज्योक्सुम	....	१६२
यथाहतद्वसवो	....	८६
यदक्रंदः प्रथमं	....	१२९
यददःसंप्रय अ.	....	१३८
यदंतरिक्षंपृथिवी	....	१०१
यदह्नात्कुरुते	....	१२
यददीव्यंनृणम अ.	....	२०८
यदांजनंत्रैककुदं	....	१८६
यद्देवादेवहेळनं अ.	....	९५
यद्राज्यात्कुरुते	....	१२
यन्मआत्मनो	....	८६
यन्मधुनोमधव्यं	....	१८७

मंत्रः		पत्रं
यन्मेमनःपरागतं	....	१८६
यन्मयामनसा	....	२१०
यःप्राणतो	....	३९
यमःपृथिव्या	....	८४
यस्तेद्रप्सस्कं	....	३१७
यस्मैत्वंसुकृते	....	५७
यस्मिन्ब्रह्माभ्य	....	१२४
यस्मैत्वाकाम	....	२०६
यस्यतेप्रथमवास्यर	....	१७६
यस्यामिदं	....	१५७
यस्त्वाहृदा	....	५७
याअकृंतंनवय	....	१७३
यातिरश्वी	....	१४९
यातेअग्नेयज्ञिया	....	३६

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः		पत्रं
यादिव्याआपः	....	९६
यादुरितापरिवा	....	१७३
यादैवीश्चतस्रः	....	१५६
याःपुरस्तात्प्र	...	८१
याःफलिनीर्या	....	१२२
यावांकशामधु	...	१२९
याशतेनप्रत	....	७७
याश्सदासर्व	....	१४
युक्तोवहजातवेदः	....	१४९
युंजतेमनउत अ.	....	१०५
युंजानःप्रथमंमनःअ.	....	८८
युवासुवासाः	....	९७
येचेहपितरो	....	९९
येतेशतंवरुणये	....	१६४
येतेसहस्र	....	७५
येदेवादिव्येकादशस्थ		९९
येदेवाःपुरःसदः अ.	....	६५
येनपूषाबृह	....	१६२
येनावपत्सवि	....	१६२
येभूताःप्रच	....	५७
येभ्योमाता	....	१९
येसमानाःसम	....	३९७
योपांपुष्पंवेद	....	५१
योगेयोगेतवस्तरं	....	१७४
योब्रह्माब्रह्मण अ.	....	१४०
योमेदंडःपरापत	....	१८६
योरायईशेश	....	१८०
योरुद्रोअग्नौ	....	६३
योवैतांब्रह्मणोवेद	....	२४
र.		
रजोभूमिस्तमा	....	७८
रयीणांपतियज	....	१८०
रक्षोहणोवलगहनो	....	९८
राकामहꣳसु	....	१५३
राजात्वावरुणोन	....	१९४
राजाधिराजाय	....	२४
रुद्रःपशूनाम	....	८४
ल.		
लोकःसरस्वत्या अ.	....	११९
व.		
वनस्पतेशत	....	१९०
वयःसुपर्णाउपसे	....	१८२
वयꣳसोमव्रते	....	३३
वरुणोपामधिपतिः	....	८४
वषट्तेविष्ण	....	१५
वसिष्ठासःपितृ	....	१०२
वसुभ्योरुद्रे	....	१५१
वसोर्धारांजुहोति अ-		१३३
वाक्पतिर्मा	....	३०
वाचस्पतेवि अ.	....	३८४
वाजेवाजेवत	....	१०२
वातास्तेवांतु	....	३८४
वातंप्राणं अ.	....	७५
वायुरंतरिक्ष	....	८४
वायोप्रायश्चित्ते	....	२०१
वायोशतं	....	१२९

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः		पत्रं
वास्तोष्पते	....	१२५
वास्तोष्पतेध्रुवा	....	२६५
विचक्रमेपृथिवी	....	१३९
विराजंचस्वराजं	....	१८६
विश्वकर्मन्हवि	...	३१५
विश्वाउतत्वया	....	१९७
विश्वानिनो	....	३२
विश्वेत्तातें	....	१९४
विश्वेदेवाऋतावृध	....	९६
विष्णुःपर्वताना	....	८५
विष्णुमुखावै	....	७७
विष्णुर्योनिं अ.	....	१४२
विष्णोर्नुकं	....	१३९
विष्णोरराट	....	१२९

मंत्रः		पत्रं
वैश्वानरायप्र अ.	....	२०९
वैश्वानरस्यरूपं	....	१४७
श.		
शंडोमर्कउपवीरः	....	१५५
शतमिन्नुशरदो	...	१७४
शतायुषाय	....	६८
शंनोदेवीरभि	....	१२८
शंनोमातापृ	....	८०
शरीरंयज्ञ	....	७७
शांतापृथिवी	...	७५
शिरोमेश्रीः ॥	....	४०१
शिवस्त्वष्टरिहा	....	३५५
शुक्रमसि	....	७६
शुक्रंतेअन्यत्	....	१२८

मंत्रः		पत्रं
शुक्रेभिरंगैरज	....	१२४
शुभिकेशोभमा	....	१८६
शुचीवोहव्या	....	२०७
शुंधध्वंदैव्याय अं.	....	८७
श्रद्धायांप्राणेनिविष्टो	....	१००
श्रियेजात	....	२४
श्रीर्मेभजतु	....	७७
श्रद्धयाग्निःसमि	....	७०
ष.		
षट्स्वरारू सू. अ.	....	४६
स.		
सइज्जनेन	....	७६
सकृदाच्छिन्नं	....	१००
संगच्छस्व	....	३८६

मंत्रः		पत्रं
संगोभिरांगिर	....	२७६
सजोषाइंद्र	....	७७
सत्यासत्येभिर्म	....	२६४
सत्वन्नोअग्ने	....	१४९
सदसस्पतिमद्भुतं	....	१८०
सदसिसन्मे	....	१५१
सांदिव्येन	....	१९०
सप्ततेअग्ने	....	१३२
समानीवअकूतिः	....	१८९
समिद्धस्य	....	१९०
समीचीनामासि	....	६७
समुद्रज्येष्ठा	....	१२५
समुद्रंवःप्रहिणो	....	८६
समुद्रःस्रोत्याना	....	८४

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्रः		पत्रं
सरस्वतिप्रेद	....	१९६
सर्ववर्णेमहा	....	१२
सर्वेवैदेवा. दे. अ,	....	४७
सर्वेषुवाएषुलोके अ.	....	२१८
सवितापश्चातात्	....	१२३
सविताप्रसवाना	....	८४
सशिराजात	....	३२
सꣳसृष्टजित्	....	३२
सꣳस्रवंतुदिशो	....	५४
सहरय्यानिव	....	१३५
सहवैदेवानां अ,	....	८९
सहस्रपरमा	....	७७
सहस्रशीर्षा अ.	....	७
सिꣳहेव्याघ्रउ अ.	....	२०९
सुगन्नःपंथा	....	३३
सुभगायैविद्महे	....	२१२
सुमंगलीरियं	....	१९६
सुमित्र्यानआप	....	७७
सुवर्णघर्मपरि अ.	....	४१
सूयवसाद्भगवती	....	१५६
सूर्यतेचक्षुः	....	३८३
सूर्यश्चमाम	....	३१
सूर्योदिवो	....	८४
सेनेंद्रस्य	....	३८४
सोमओषधीना	....	८४
सोमस्यतनूरसि	....	१८५
सोमस्यत्वाद्युम्ने	....	१६१
सोमंराजानम	....	३०३
सोमानंस्व	....	७७
सोमोधेनुꣳ	....	१८०
स्तुतोमयावरदा	....	१५
स्योनापृथिवि	....	२७
स्वर्भानोरधय	....	२२९
स्वस्तयेवायुमुप	....	१२४
स्वस्तिदाावि	....	१५१
स्वस्तिनइंद्रो	....	७७
ह.		
हव्यवाहमभि	....	२०७
हꣳसःशुचिष	....	३१
हिरण्यगर्भः	....	३६
हिरण्यवर्णाःशु०अ.	....	३१
हिरण्यशृंगं	....	१७७
ह्रीश्चतेलक्ष्मीश्च	....	२९४
होतास्मएवास्मा	....	१०२

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अथाह्निकप्रकरणप्रथमम् ।

॥ १ ॥ मंगलमुपोद्घातश्च ॥

ॐ नमःश्रीवेदपुरुषाय ॥ यदोंतत्सद्ब्रह्मप्रणयमिलदर्धांगयुवतेःशिवस्यांकेखेलत्प्रणवसदृशास्याकृतिमहः ॥ निराकारंनारंदधदपिशरीरंश्रुतिशिरोनुतंवारंवारंदिशतुशमपारंप्रणमताम् ॥ १ ॥ नत्वामार्तंडमग्निंगजवदनगिरौब्रह्मविष्णवीशमुख्यान्देवान्मन्वत्रिमुख्यानपिनिखिलमुनीन्धर्मधामप्रदीपान् ॥ सत्याषाढादिवृंदंगुरुमथपितरौतैत्तिरीयद्विजानामर्थेग्रंथंविधास्येतदृषिवरपरिक्षुण्णमार्गेणनूत्नं ॥ २ ॥ संस्काररत्नमालायामाहेश्वर्याश्चसिंधुतः ॥ प्रतापनारसिंहाच्चसंगृह्यविषयान्क्रमात् ॥ ३ ॥ कुर्वेहिरण्यकेशीयब्रह्मकर्मसमुच्चयं ॥ पुंदोषान्न्यूनमधिकंक्षंतुमर्हंतिसाधवः ॥ ४ ॥ निबंधेऽस्मिन्नित्याह्निकविविधसंस्कारनिकरप्रकीर्णात्येष्टीतिप्रकरणचतुष्केप्यभिनवाः ॥ प्रयोगानिर्दिष्टानवचनचयोविस्तरभियासमूलग्रंथेभ्योनिपुणमवसेयोबुधजनैः ॥५॥

॥ २ ॥ परिभाषा ॥

श्रीः ॥ अथवक्ष्यमाणसंस्कारशांतिकपौष्टिकसर्वकर्मणांपरिभाषाधीनत्वादादौसंक्षेपतःपरिभाषार्थःकारिकाभिर्निबध्यते ॥ स्नातःकुर्वीतोपवीतीसर्वकर्मपवित्रवान् ॥ श्रद्धयाकर्मकुर्वीतधौतवस्त्रधरोभवेत् ॥ १ ॥ अव्यग्रोऽलंकृतोमौनीदंभासूयाविवर्जितः ॥ आपद्युक्तोपिशुद्धःसन्नेवकर्मसमाचरेत् ॥ २ ॥ जपहोमादिषुनरमन्यंनाकारणात्स्पृशेत् ॥ अबुद्धिपूर्वंसंस्पर्शश्चेत्तदावार्युपस्पृ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शेत् ॥ ३ ॥ बुद्धिपूर्वकसंस्पर्शेप्राणायामत्रयंचरेत् ॥ संस्पर्शेप्रतिलोमानांस्नानमेवविधीयते ॥ ४ ॥ खल्वाटत्वादिदोषेणवि शिखश्चेन्नरोभवेत् ॥ कौशींतदाधारयीतब्रह्मग्रंथियुतांशिखां ॥ ५ ॥ कार्येयंसप्तभिर्दर्भैर्धार्याश्रोत्रेतुदक्षिणे ॥ कुर्यात्तिलकवा न्कर्मवस्त्रद्वययुतस्तथा ॥ ६ ॥ नैवनग्नोनचद्वीपेनांतरालेकदाचन ॥ श्रुतिस्मृत्युदितंकर्मनकुर्यादशुचिःक्वचित् ॥ ७ ॥ परि तोवेष्टितोदेशोऽद्भिर्यःसद्वीपमुच्यते ॥ अनावृतस्तुयोदेशःसोंऽतरालंप्रकीर्तितं ॥ ८ ॥ दानंप्रतिग्रहोहोमोभोजनंबलिरेवच ॥ सांगुष्ठेनसदाकार्यमसुरेभ्योऽन्यथाभवेत्॥ ९ ॥ अप्रौढपादःकुर्वीतकृतास्वायामएवच ॥ त्रिमात्रःप्रणवोवाच्यःकर्मारंभेचसर्वदा ॥ १० ॥ उपोषितःकर्मकुर्याद्विध्यनुज्ञेविनासदा ॥ येषणादिकयंत्रेषुशब्दोयावत्प्रवर्तते ॥ ११ ॥ पतितांत्यजचांडालादीनांयाव च्चशब्दकः ॥ तावत्कर्मनकर्तव्यंतथासंध्याद्वयेपिच ॥ १२ ॥ संकीर्त्यमासपक्षादीन्निमित्तानितथैवच॥ इदंकर्मकरिष्येऽहमिति संकल्पमाचरेत्॥१३॥ यावंतिकर्मसंबद्धान्यृक्षाणिस्युस्तुतावतां ॥ वारादीनामपितथायुक्तंसर्वत्रकीर्तनं ॥ १४ ॥ केनचि त्तुनवीनेनप्रोक्तमेतत्तुयुक्तितः ॥ कर्मण्यनियतैर्धर्मैःसाध्येसाधारणोक्तितः ॥१५॥ वारादीनांसमुल्लेखोनिर्वाह्योऽस्मिंस्तुकल्पके ॥ प्रायौगिकास्त्वेकभादेरेवकुर्वीतिकीर्तनं ॥ १६ ॥ अनुल्लंघ्यस्वशास्त्रोक्तविधिंकर्मसमारभेत् ॥ कर्मान्यथाकृतंज्ञात्वातावदेवपुन श्चरेत् ॥ १७ ॥ प्रधानस्याक्रियायांतुसांगंतत्पुनराचरेत् ॥ तदंगाकरणेप्रायश्चित्तमेवनकर्मतत् ॥ १८ ॥ प्राचीदिशामनुक्तौ स्यादथवैशान्युदक्स्मृता ॥ अनुक्तौप्रह्वतादीनांकर्तुरासीनताभवेत् ॥ १९॥ कर्त्रंगानामनुक्तौतुदक्षिणांगंप्रकीर्तितं ॥ चक्षुरादि षुनैतत्स्यादितिनारायणःसुधीः ॥ २० ॥ कदंगस्पर्शनेवामोहस्तोऽन्यस्पर्शनेऽन्यकः ॥ नाभ्यधोंगान्यसंतिस्युर्नाभ्यूर्ध्वस्युस्तुसं तिवै ॥ २१ ॥ नाभौत्वन्यतरोहस्तइतिज्ञेयंविचक्षणैः ॥ कररोगोयदितदोभयत्रोभावपिस्मृतौ ॥ २२ ॥ अवैधंनाभ्यधःस्पर्शं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कर्मकालेनचाचरेत् ॥ रक्तपूयोरेतआदिस्पर्शेस्नानंप्रकीर्तितं ॥ २३ ॥ [illegible]कर्मदेवानामुदग्दिगपवर्गकं ॥ उदग्दिक्संस्थ मथवाप्राचीदिगपवर्गकं ॥ २४ ॥ दक्षिणाशापवर्गंतुप्रत्यग्दिक्संस्थमेवहि ॥ पित्र्यंकर्मप्रकर्तव्यंस्पष्टंयदिवचोभवेत् ॥ २५ ॥ अंगोपस्पर्शनेवस्त्रदशासंस्पर्शनेतथा ॥ छेदनेभेदनेचैवनिरासेखननेतथा ॥ २६ ॥ पैतृकेराक्षसेरौद्रेनैर्ऋतेचाभिचारिके ॥ एते षुवैनिमित्तेषुजलोपस्पर्शनंभवेत् ॥ २७ ॥ अधोवायुसमुत्सर्गेप्रहासेऽनृतभाषणे ॥ मार्जारमूषकस्पर्शआक्रंदेक्रोधसंभवे ॥२८॥ निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नपःस्पृशेत् ॥ यत्त्वोत्वाख्वोःस्नानमुक्तंतद्वंन्यविषयंभवेत् ॥ २९ ॥ इतिकेचिद्बुधाःप्राहुरन्येत्वित्थं समूचिरे ॥ पुच्छान्यदेशसंस्पर्शउदकस्पर्शनंभवेत् ॥ ३० ॥ स्नानंतुपुच्छस्पर्शेस्यात्कर्मकालेचभोजने ॥ अबुद्धिस्पर्शविषये वार्युपस्पर्शनंभवेत् ॥ ३१ ॥ बुद्धिपूर्वेतुस्नानंस्यादितिप्राहुःपरेबुधाः ॥ सौम्याख्यदिशिकर्तव्योनिरासोदेवकर्मसु ॥३२॥ पितृ कर्मसुयाम्याख्यदिश्येषपरीकीर्तितः ॥ दैवेकर्मणिसामंतेप्रादक्षिण्यंप्रकीर्तितं ॥ ३३ ॥ पित्र्येऽप्येवंबुधैर्ज्ञेयंनेदंस्यात्परिषेचने ॥ अप्रादक्षिण्यमेवस्यात्तत्रसूत्रकृदुक्तितः ॥ ३४ ॥ निवीतितामानुषेस्याद्दैवेयज्ञोपवीतिता ॥ प्राचीनावीतितातुस्यात्पित्र्येस्पष्टंव चोयदि ॥ ३५ ॥ स्मृत्युक्तांगेषुविज्ञेयेउभेस्मृत्युक्तरीतितः ॥ अप्रादक्षिण्यापसव्येसूत्रोक्तनियमोऽत्रवा ॥ ३६ ॥ हवनंभोजनं दानंश्राद्धदेवार्चनादिच ॥ बहिर्जानुनकार्यंस्यात्तद्वदाचमनंस्मृतं ॥ ३७ ॥ विहारःपृष्ठतोनैवप्रकर्तव्यःकदाचन ॥ पात्राण्या ज्यंहविर्वह्निरेतेष्वंतःक्रमात्परं ॥३८॥ कर्तारस्तुबहिर्भूताएवैष्वंतस्तुहोमकृत् ॥ बहिर्भूतस्ततोब्रह्मान्येभ्योंऽतर्भूतईरितः ॥३९॥ सर्वेष्वेतेषुपत्न्यंतस्ततोऽप्यंतःपतिर्भवेत् ॥ एतत्सर्वत्रविज्ञेयंविशेषविधिनाविना ॥ ४० ॥ अविज्ञातस्वरामंत्राःप्रयोक्तव्याःप्रयो क्तृभिः ॥ एकश्रुत्यैवसर्वत्रजयंतस्वामिभाषणात् ॥ ४१ ॥ ऋषिंचदेवतांछंदोविनियोगंमनोस्तथा ॥ विज्ञायैवक्रियाःकार्याया

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ज्ञवल्क्यमुनिस्मृतेः ॥ ४२ ॥ ऋषिश्छंदोदेवतेतिछंदश्चर्षिश्चदेवता ॥ ऋषिश्चदेवताछंदइत्येवंस्यात्त्रिधाक्रमः ॥ ४३ ॥ सौत्रा मंत्रावेदविच्छिर्वामदेवर्षयःस्मृताः॥ लिंगोदितोभवेद्देवोऽस्पष्टेदेवेऽनलःस्मृतः ॥४४॥ सौत्रेष्वृष्यादिविज्ञाननेत्युक्तंपारिजातके ॥ वैतानिकेमखेश्राद्धेब्रह्मयज्ञेतथैवच ॥ ४५ ॥ ऋष्याद्यवगतेर्नैवापेक्षास्तीतिपुरातनाः ॥ श्रौतेश्राद्धेचमंत्रादौप्रणवोपिनहीष्यते ॥ ४६ ॥ अन्येत्वेतस्यवचसोनिर्मूलत्वादिहापिच ॥ स्याद्दृष्यादिस्मृतिस्तारोच्चारणंचेतिवैजगुः ॥ ४७ ॥ मंत्रांतस्यत्वक्षरस्य पाठकालेहिकर्मणः ॥ सर्वत्रोपक्रमःकार्यःसूत्रकारस्यवाक्यतः ॥ ४८ ॥ स्वाहाकारोहिमंत्रांतेनित्योऽगर्ह्योप्रकीर्तितः ॥ पित्र्यमं त्रेपिनोयत्रस्वधाकारनिदर्शनं ॥ स्वाहांतएवतत्रस्यादितिभाष्यकृतेरितं ॥ ४९ ॥ मंत्रादौमंत्रमध्येवास्वाहाशब्दोऽस्तिचेत्तदा ॥ नांतेप्रयोक्तव्यइतिप्रोक्तवानाश्वलायनः ॥ ५० ॥ भवेदव्यवधानेनदेवतापदतःपुरा ॥ स्वाहाकारस्यपाठश्चेत्तदानांतेभवेदयं ॥ ५१ ॥ नचेद्भवेत्पाठइत्थंतदांतेपिभवेत्सतु ॥ स्वाहाधिमितिमंत्रेऽस्मिन्नर्थेह्यस्तिनिदर्शनं ॥ ५२ ॥ इदमेवानुसर्तव्यंमतएवम नीषिभिः ॥ मंत्रांतेयावह्निजायासातुमंत्रस्वरूपिणी ॥ ५३ ॥ तदंतेन्यांप्रयुंजीतसाहोमांगतयामता ॥ शक्तिसंगमतंत्रोक्तादेत स्माद्वाक्यतःपुनः ॥ ५४ ॥ स्वाहाशब्दंप्रयुंजीततंत्रस्यप्रबलत्वतः ॥ विशेषोऽयंतंत्रयुक्तेवैदिकेहोमकर्मणि ॥ ५५ ॥ जुहोतिवि धिसंबद्धमंत्रेष्वेषविधिःस्मृतः ॥ स्वाहांतोनाममंत्रःस्यादमंत्रास्वाहुतिष्वथो ॥ ५६ ॥ कर्मशिष्टोदकंकर्मसमाप्तौतुपरित्यजेत् ॥ नत्वन्यत्रोपयुंजीताचमनक्षालनादिषु ॥ ५७ ॥ मंत्रमुच्चारयेन्मंत्रप्रतिपाद्यंतुशेषिणं ॥ संस्तुवंस्तन्मनाभूत्वास्यादेतदनुमंत्रणं ॥ ५८ ॥ आभिमुख्येक्षणाधिक्यादेतदेवाभिमंत्रणं ॥ संनिधौतिष्ठन्नासीनोवाकुर्वन्छेषिचिंतनं ॥ ५९ ॥ नतिमुद्रायुतोमंत्रंपठे दियमुपस्थितिः ॥ तिष्ठताश्रवणंचेत्स्याद्यत्रसानियतातदा ॥ ६० ॥ अभिमर्शोमंत्रपाठःसंस्पर्शसमकालिकः ॥ चतुःस्वरोच्चार

CC-0. In Public Domain.Funding by MoE-IKS

णात्माजपतीतिविधौजपः ॥ ६१॥ अभिमंत्र्यानुमंत्रणंतुमंत्रोस्तीतिकर्मणांतत्रसाधितंजपत्वंहिव्याख्याकृद्भिरतस्त्वयं ॥६२॥ चतुःस्वरत्वधर्मस्तुमंत्रेष्वेतेष्वपिस्मृतः ॥ ततोऽन्यत्रतुमंत्राणांनियतैकश्रुतिर्भवेत् ॥ ६३ ॥ कात्यायनमतादत्रापिस्युर्वास्वरसंयुताः ॥ सर्वत्रैवन्यूंखसाम्नोश्चत्वारोनियताःस्वराः ॥ ६४ ॥ संवादप्रैषभिन्नानांमंत्राणांस्यादुपांशुता ॥ ६५ ॥ आश्रावणंप्रवरणंप्रत्याश्रावणमेवच ॥ श्रौतएतान्यपिज्ञेयान्युच्चैरेवविचक्षणैः ॥ ६६ ॥ कुर्यादुपनयादीनिविवाहांतानिलौकिके ॥ प्रायश्चित्ताख्यकर्माणिकाम्यकर्माणिवैतथा ॥ ६७॥ औपासनेलौकिकेवाकर्तव्यानिसदाबुधैः ॥ उपाकर्मोत्सर्जनेतुकुर्याच्छिष्ययुतोयदि ॥ ६८ ॥ लौकिकाग्नौतदाकुर्यादशिष्यश्चेत्स्ववह्निके ॥ गृह्यानलेप्रकर्तव्योहोमःपारायणीयकः ॥ ६९ ॥ पारायणस्यकर्ताचेदृत्विग्लोकानलेतदा ॥ अवशिष्टंगृह्यकर्मकार्यमौपासनानले ॥ ७० ॥ औपासनाग्निसाध्येषुप्रजासंस्कारकर्मसु ॥ मुख्यकर्तुरभावेनयदिकर्त्रंतरंभवेत् ॥ ७१ ॥ लौकिकाग्नौतदाकर्मनतुगृह्येकदाचन ॥ सर्वाधानीभवेद्विप्रश्चेत्तदातत्रलुप्यते ॥ ७२ ॥ स्थालीपाकःपार्वणाख्यऔपासनहुतिस्तथा ॥ मासिश्राद्धादिलोकाग्नावितिकेचिद्बुधाजगुः ॥ ७३ ॥ मासिश्राद्धंदक्षिणाग्नावष्टकादीनिलौकिके ॥ वैजयंतीकृदाहेतिप्राहुरन्येपिकेचन ॥ ७४ ॥ प्रजासंस्कारकर्माणिस्युर्लोकानलएवतु ॥ शास्त्रांतरप्रोक्तचित्तहोमाःसंधानहेतवः ॥ ७५ ॥ नष्टस्यकर्मणोयस्मात्तस्मात्स्युर्गृह्यएवते ॥ स्वतंत्रत्वाल्लौकिकाग्नावेवशास्त्रांतरेरितं ॥ ७६ ॥ ग्रहयज्ञादिकंकार्यनतुगृह्यानलेचरेत् ॥ गृह्यांतरोक्तंलोकाग्नौगृह्याग्नावथवाचरेत् ॥ ७७ ॥ पुनरग्न्याहितौसर्वाधानिनोमथितानले ॥ आनीतेश्रोत्रियागाराद्वाग्नौब्रह्मौदनक्रिया ॥ ७८ ॥ विवाहेयदिनिर्मथ्यस्तदात्रस्यात्तुमंथनं ॥ यदिद्वितीयःपक्षःस्यात्स्वीकार्योऽत्रसएवतु ॥ ७९ ॥ एवंरूपाव्यवस्थातुव्याख्याकृद्भिःप्रदर्शिता ॥ बहुशुष्केंधनेचाग्नौसुसमिद्धेविधूमके॥ ८० ॥ सांगारे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

लेलिहानेचहोतव्यंनान्यथाक्वचित् ॥ आज्यहोमेसूत्रकृतादर्व्येवविहितायतः ॥ ८१ ॥ अतस्तत्रभवेत्सैवनस्रुवेणहुतिर्भवेत् ॥ साधनंक्षीरदध्यादिहोमेदर्वीस्रुवेथवा ॥ ८२ ॥ सूत्रकृद्विहितेहोमेद्रव्यस्यकठिनस्यतु ॥ दर्वीहस्तोऽथवाज्ञेयःशांत्यादौकरएवतु ॥ ८३ ॥ होमेशिष्टैरादृतोऽस्तियतोऽतोत्रसएवहि ॥ हस्तएवाचार्यवाक्यादौपासनहुतौभवेत् ॥ ८४ ॥ होमद्रव्येत्वनादिष्टेसर्वत्राज्यंप्रकीर्तितं ॥ ८५ ॥ कंठोक्तासमिधांस्याच्चेद्यत्रप्रादेशमात्रता ॥ तत्रैवसास्यादन्यत्रत्वैच्छिकीयंसमीरिता ॥ ८६ ॥ ओषध्यः सक्तवःपुष्पंकाष्ठंमूलंफलंतृणं ॥ एतद्धस्तेनहोतव्यंनान्यत्किंचिदचोदनात् ॥ ८७ ॥ अनादेशेदक्षिणागौर्हेमवापूर्णपात्रकं ॥ देवकार्येनैवदेयंरजतंत्वश्रुजंहितत् ॥ ८८ ॥ पात्रंपादोपसंस्पृष्टंप्रक्षाल्यंसर्वथाबुधैः ॥ हुतंयन्मांसधौतेनतन्नभुंक्तेहिदेवता ॥ ८९ ॥ पात्राणांशोधनंनातःकार्यंकेवलहस्ततः ॥ किंतुदर्भैस्तृणैर्वापिपर्णैर्वावाससापिवा ॥ ९० ॥ सर्वेषुधर्मकार्येषुपत्नीदक्षिणतोभवेत् ॥ अभिषेकेविप्रपादक्षालनेवामतःस्मृता ॥ ९१ ॥ प्रभुःप्रथमकल्पस्ययोऽनुकल्पेनवर्तते ॥ सनाप्नोतिफलंतस्यपरत्रेतिश्रुतिःस्मृतिः ॥ ९२ ॥ बह्वल्पंवास्वगृह्योक्तंयस्ययावत्प्रचोदितं ॥ तस्यतावतिशास्त्रार्थेकृतेसर्वंकृतंभवेत् ॥ ९३ ॥ यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत् ॥ आकांक्षितंशेषभूतमनुष्ठेयंविचक्षणैः ॥ ९४ ॥ तत्कृतौफलवैशिष्ट्यंनदोषस्त्वकृतौभवेत् ॥ सामयाचारिकाधर्मादेशजातिकुलोद्भवाः ॥ ९५ ॥ ग्रामाचाराःपरिग्राह्यायेचशास्त्राविरोधिनः ॥ युगधर्माःपरिग्राह्याःसर्वत्रैवयथोचितं ॥ ९६ ॥ इतिसंस्काररत्नमालोक्तासंक्षेपेणपरिभाषा ॥ ॥ अथ 'आचारःप्रथमोधर्मः' इतिस्मरणात्सएवपूर्वंसंगृह्यते ॥

॥ ३ ॥ प्रातःस्मरणम् ॥

श्रीः ॥ प्रातरारभ्यास्वापमावश्यकाहरहःकर्तव्येषुप्रथमंप्रातःस्मरणमुच्यते ॥ तत्रस्मरणीयमाहव्यासः ॥ महर्षिर्भगवान्व्यासः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृत्वेमांसंहितांपुरा ॥ श्लोकैश्चतुर्भिर्धर्मात्मापुत्रमध्यापयच्छुकम् ॥ १ ॥ मातापितृसहस्राणिपुत्रदारशतानिच ॥ संसारेष्वनु
भूतानियांतियास्यंतिचापरे ॥ २ ॥ हर्षस्थानसहस्राणिभयस्थानशतानिच ॥ दिवसेदिवसेमूढमाविशंतिनपंडितम् ॥ ३ ॥
ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे ॥ धर्मादर्थश्चकामश्चसकिमर्थनसेव्यते ॥ ४ ॥ नजातुकामान्नभयान्नलोभाद्धर्मत्यजेज्जी
वितस्यापिहेतोः ॥ धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः ॥ ५ ॥ इमांभारतसावित्रींप्रातरुत्थाययःपठेत् ॥
सभारंतफलंप्राप्यपरंब्रह्माधिगच्छति ॥ ६ ॥ ॥ अन्यच्च ॥ योगोशतंकनकशृंगमयंददातिविप्रायवेदविदुषेचबहुश्रुताय ॥
पुण्यांचभारतकथांशृणुयाच्चनित्यंतुल्यंफलंभवतितस्यचतस्यचैव ॥ १ ॥ ॥ अथसूर्यस्य ॥ प्रातःस्मरामिखलुतत्सवितुर्वरे
ण्यंरूपंहिमंडलमृचोऽथतनुर्यजूंषि ॥ सामानियस्यकिरणाःप्रभवादिहेतुंब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपम् ॥ १ ॥ प्रातर्नमामि
तरणिंतनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितंच ॥ वृष्टिप्रमोचनविनिग्रहहेतुभूतंत्रैलोक्यपालनपरंत्रिगुणात्मकंच ॥ २ ॥
प्रातर्भजामिसवितारमनंतशक्तिंपापौघशत्रुभयरोगहरंपरंच ॥ तंसर्वलोककलनात्मककालमूर्तिंगोकंठबंधनविमोचनमादिदेवम्
॥ ३ ॥ श्लोकत्रयमिदंभानोःप्रातःप्रातःपठेत्तुयः ॥ ससर्वव्याधिनिर्मुक्तःपरंसुखमवाप्नुयात् ॥ ४ ॥ ॥ गणपतेः ॥ प्रातःस्म
रामिगणनाथमनाथबंधुंसिंदूरपूरपरिशोभितगंडयुग्मम् ॥ उद्दंडविघ्नपरिखंडनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यम् ॥ १ ॥
प्रातर्नमामिचतुराननवंद्यमानमिष्टानुकूलमखिलंचवरंददानम् ॥ तंतुंदिलंद्विरसनप्रियययज्ञसूत्रंपुत्रंविलासचतुरंशिवयोःशिवाय
॥ २ ॥ प्रातर्भजाम्यभयदंखलुभक्तशोकदावानलंगणविभुंवरकुंजरास्यम् ॥ अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्धनमहं
सुतमीश्वरस्य ॥ ३ ॥ श्लोकत्रयमिदंपुण्यंसदासाम्राज्यदायकम् ॥ प्रातरुत्थायसततंयःपठेत्प्रयतःपुमान् ॥ ४ ॥ ॥ देव्याः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तःस्मरामिशरदिंदुकरोज्वलाभांसद्रत्नवत्सकलकुंडलहारशोभाम् ॥ दिव्यायुधोर्जितसुनीलसहस्रहस्तांरक्तोत्पलाभचरणांभ
वतींपरेशाम् ॥ १ ॥ प्रातर्नमामिमहिषासुरचंडमुंडशुंभासुरप्रमुखदैत्यविनाशदक्षाम् ॥ ब्रह्मेंद्ररुद्रमुनिमोहनशीललीलांचंडींस
मस्तसुरमूर्तिमनेकरूपाम् ॥ २ ॥ प्रातर्भजामिभजतामखिलार्थदात्रींधात्रींसमस्तजगतांदुरितापहंत्रीम् ॥ संसारबंधनविमोचन
हेतुभूतांमायांपरांसमधिगम्यपरस्यविष्णोः ॥ ३ ॥ श्लोकत्रयमिदंदेव्याश्चंडिकायाःपठेन्नरः ॥ सर्वान्कामानवाप्नोतिविष्णुलोके
महीयते ॥ ४ ॥ ॥ शिवस्य ॥ प्रातःस्मरामिभवभीतिहरंसुरेशंगंगाधरंवृषभवाहनमंबिकेशम् ॥ खट्वांगशूलवरदाभयहस्त
मीशंसंसाररोगहरमौषधमद्वितीयम् ॥ १ ॥ प्रातर्नमामिगिरिशंगिरिजार्धदेहंसर्गस्थितिप्रलयकारणमादिदेवम् ॥ विश्वेश्वरंविजि
तविश्वमनोभिरामंसंसाररोगहरमौषधमद्वितीयम् ॥ २ ॥ प्रातर्भजामिशिवमेकमनंतमाद्यंवेदांतवेद्यमनघंपुरुषंमहांतं ॥ नामा
दिभेदरहितंषडभावशून्यंसंसाररोगहरमौषधमद्वितीयम् ॥ ३ ॥ प्रातःसमुत्थायशिवंविचिंत्यश्लोकत्रयंयेऽनुदिनंपठंति ॥ तेदुः
खजातंबहुजन्मसंचितंहित्वापदंयांतितदेवशंभोः ॥ ४ ॥ ॥ विष्णोः ॥ प्रातःस्मरामिभवभीतिमहार्तिशांत्यैनारायणंगरुड
वाहनमब्जनाभम् ॥ ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रम् ॥ १ ॥ प्रातर्नमामिमनसावचसाचमूर्ध्नापा
दारविंदयुगुलंपरमस्यपुंसः ॥ नारायणस्यनरकार्णवतारणस्यपारायणप्रवणविप्रपरायणस्य ॥ २ ॥ प्रातर्भजामिभजतामभयं
करंतंप्राक्सर्वजन्मकृतपापभयापहत्यै ॥ योग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः ॥ ३ ॥ श्लोकत्रयमि
दंविष्णोःप्रातःप्रातःपठेत्तुयः ॥ लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः ॥ ४ ॥ ॥ रामचंद्रस्य ॥ प्रातःस्मरामिरघुनाथमुखारविंद
मंदस्मितंमृदुलभाषिविशालभालम् ॥ कर्णावलंबिचलकुंडलशोभिगंडंकर्णांतदीर्घनयनंनयनाभिरामम् ॥ १ ॥ प्रातर्भजामिर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

घुनाथकरारविंदंरक्षोगणायभयदंवरदंद्विजभ्यः ॥ यद्राजसंसादविभज्यमहंशचापंसीताकरग्रहणमंगलमापसद्यः ॥ २ ॥ प्रातर्नमामिरघुनाथपदारविंदंवज्रांकुशादिशुभरेखिशुभावहंमे ॥ योगींद्रमानसमधुव्रतसेव्यमानंशापापहंसपदिगौतमधर्मपत्न्याः ॥३॥ प्रातर्वदामिवचसारघुनाथनामवाग्दोषहारिसकलंशमलंनिहंति ॥ यत्पार्वतीस्वपतिनासहमोक्षकामाप्रीत्यासहस्रहरिनामसमंजजाप ॥ ४ ॥ प्रातःश्रयेश्रुतिनुतांरघुनाथमूर्तिंनीलांबुदोत्पलसितेतररत्ननीलाम् ॥ आमुक्तमौक्तिकविशेषविभूषणाढ्यांध्येयांसमस्तमुनिभिर्जनमुक्तिहेतुम् ॥ ५ ॥ यःश्लोकपंचकमिदंप्रयतःपठेतनित्यंप्रभातसमयेपुरुषःप्रबुद्धः ॥ श्रीरामकिंकरजनेषुसएवमुख्योभूत्वाप्रयातिहरिलोकमनन्यलभ्यम् ॥ ६ ॥ ॥ अन्यच्च ॥ ब्रह्मामुरारिस्त्रिपुरांतकारीभानुःशशीभूमिसुतोबुधश्च ॥ गुरुश्चशुक्रःशनिराहुकेतवःकुर्वंतुसर्वेममसुप्रभातम् ॥ १ ॥ भृगुर्वसिष्ठःक्रतुरंगिराश्चमनुःपुलस्त्यःपुलहश्चगौतमः ॥ रैभ्योमरीचिश्यवनश्चदक्षःकुर्वंतुसर्वेममसुप्रभातम् ॥ २ ॥ सनत्कुमारःसनकःसनंदनःसनातनोप्यासुरिपिंगलौच ॥ सप्तस्वराःसप्तरसातलानिकुर्वंतुसर्वेममसुप्रभातम् ॥ ३ ॥ सप्तार्णवाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवनानिसप्त ॥ भूरादिकृत्वाभुवनानिसप्तकुर्वंतुसर्वेममसुप्रभातम् ॥ ४ ॥ पृथ्वीसगंधासरसास्तथापःस्पर्शीचवायुर्ज्वलनःसतेजाः ॥ नभःसशब्दंमहतासहैतेकुर्वंतुसर्वेममसुप्रभातम् ॥ ५ ॥ इत्थंप्रभातेपरमंपवित्रंपठेत्स्मरेद्वाशृणुयाच्चतद्वत् ॥ दुःस्वप्ननाशस्त्विहसुप्रभातंभवेच्चनित्यंभगवत्प्रसादात् ॥ ॥ ६ ॥ वैन्यंपृथुंहैहयमर्जुनंचशाकुंतलेयंभरतंनलंच ॥ रामंचयोवैस्मरतिप्रभातेतस्यार्थलाभोविजयश्चहस्ते ॥ ७ ॥ बलिर्विभीषणोभीष्मःप्रह्लादोनारदोध्रुवः ॥ षडेतेवैष्णवाःप्रोक्ताःस्मरणंपापनाशनं ॥ ८ ॥ अश्वत्थामाबलिर्व्यासोहनूमांश्चविभीषणः ॥ कृपःपरशुरामश्चसप्तैतेचिरजीविनः ॥ ९ ॥ सप्तैतान्संस्मरेन्नित्यंमार्कंडेयमथाष्टमं ॥ जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १० ॥ अहल्याद्रौपदीसीतातारामंदोदरीतथा ॥ पंचकंनास्मरेन्नित्यंमहापातकनाशनम् ॥ ११ ॥ कर्कोटकस्यनागस्यदमयं
त्यानलस्यच ॥ ऋतुपर्णस्यराजर्षेःकीर्तनंकलिनाशनम् ॥ १२ ॥ धर्मोविवर्धतियुधिष्ठिरकीर्तनेनपापंप्रणश्यतिवृकोदरकीर्तनेन ॥
शत्रुर्विनश्यतिधनंजयकीर्तनेनमाद्रीसुतौकथयतांनभवंतिरोगाः ॥ १३ ॥ पुण्यश्लोकोनलोराजापुण्यश्लोकोयुधिष्ठिरः ॥ पुण्य
श्लोकाचवैदेहीपुण्यश्लोकोजनार्दनः ॥ १४ ॥ दर्शनादभ्रसरसोजननात्कमलालये ॥ काश्यांतुमरणान्मुक्तिःस्मरणादरुणाच
लात् ॥ १५ ॥ अहंकाश्यांगमिष्यामितत्रैवनिवसाम्यहं ॥ इतिब्रुवाणःसततंकाशीवासफलंलभेत् ॥ १६ ॥ प्रह्लादनारदपरा
शरपुंडरीकव्यासांबरीषशुकशौनकभीष्मदाल्भ्यान् ॥ रुक्मांगदार्जुनवसिष्ठविभीषणादीन्पुण्यानिमान्परमभागवतान्स्मरामि
॥ १७ ॥ अहोभाग्यमहोभाग्यंनंदगोपव्रजौकसाम् ॥ यन्मित्रंपरमानंदंपूर्णब्रह्मसनातनम् ॥ १८ ॥ अयोध्यामथुरामायाकाशी
कांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामोक्षदायिकाः ॥ १९ ॥ अर्जुनःफाल्गुनोजिष्णुःकिरीटीश्वेतवाहनः ॥ बीभत्सुर्वि
जयःकृष्णःसव्यसाचीधनंजयः ॥ २० ॥ उत्तिष्ठोत्तिष्ठगोविंदउत्तिष्ठगरुडध्वज ॥ उत्तिष्ठकमलाकांतत्रैलोक्यंमंगलंकुरु ॥ २१ ॥
समुद्रवसनेदेविपर्वतस्तनमंडले ॥ विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे ॥ २२ ॥ पलायध्वंपलायध्वंररेरेदानवराक्षसाः ॥
धर्मसंस्थापनार्थायरथारूढःस्वयंहरिः ॥ २३ ॥ वाराणस्यांभैरवोदेवःसंसारभयनाशनः ॥ अनेकजन्मजंपापंस्मरणेनविनश्यति
॥ २४ ॥ वाराणस्यांदक्षिणेभागेकुक्कुटोनामवैद्विजः ॥ तस्यस्मरणमात्रेणदुःस्वप्नःसुखदोभवेत् ॥ २५ ॥ वाराणस्यामुत्तरेभागे
सुमंतुर्नामवैद्विजः ॥ तस्यस्मरणमात्रेणनिर्धनोधनवान्भवेत् ॥ २६ ॥ काशिकाशीतिकाशीतित्रिवारंयःपठेन्नरः ॥ सोपिदेशां
तरेवासीकाशीवासफलंलभेत् ॥२७॥ अशीवरुणयोर्मध्येपंचक्रोशीमहत्फलम् ॥ अमरामृतिमिच्छंतिइतरेषांतुकाकथा ॥ २८ ॥

॥ ५ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Siddhanta eGangotri Gyaan and eGangotri Trust Foundation, Delhi and eGangotri
विश्वेशंमाधवंढुंढिंदंडपाणिंचभैरवम् ॥ वंदेकाशीगुहांगांगभवानीमणिकर्णिकाम् ॥ २९ ॥ कराग्रेवसतेलक्ष्मीःकरमूलेसरस्वती ॥
करमध्येतुगोविंदःप्रभातेकरदर्शनम् ॥ ३० ॥ इतिप्रातःस्मरणंसमाप्तं ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ४ ॥ मूत्रपुरीषोत्सर्गविधिः ॥

श्रीः ॥ ततःप्रातःसमुत्थायकुर्याद्विण्मूत्रमेवच ॥ नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवः ॥ इतिवचनात्प्रातःस्मरणोत्तरंग्रामाद्बहिर्नैर्ऋत्यामिषुक्षेपात्ययेशुद्धमृत्तिकांससिकतांजलपात्रंचादाय कीटादिरहितस्थलंगत्वामृज्जलपात्रेनिधायायज्ञियैरनार्द्रैस्तृणैर्भूमिमाच्छाद्यप्रावृतशिराःपृष्ठतःकंठलंबितयज्ञोपवीतोयद्येकवस्त्रश्चेद्दक्षिणकर्णेनिहितयज्ञोपवीतोमौनीघ्राणास्येपिधाय दिवोदङ्मुखोरात्रौदक्षिणामुखोमूत्रपुरीषेउत्सृज्यलोष्टादिनागुदंपरिमृज्यगृहीतशिश्नउत्थाय पूर्वगृहीतमृज्जलपात्रेगृहीत्वार्द्रामलकमात्रमृज्जलैर्द्विवारंलिंगशौचंकृत्वार्धप्रसृतितदर्धार्धैर्मृज्जलैस्त्रिवारमपानंशोध्य पुनर्जलैरेवलिंगगुदेप्रक्षाल्यशुद्धमृत्तिकयैकवारंहस्तंप्रक्षाल्य शुद्धभूमिमागत्यान्यमृज्जलैर्दशवारंवामकरंप्रक्षाल्य ततःकरद्वयंसप्तवारंतावद्भिरेवमृज्जलैःप्रक्षाल्यवामदक्षिणपादौप्रत्येकंत्रिःप्रक्षाल्यान्यजलेनद्वादशगंडूषान्वामभागेकृत्वाजलपात्रंत्रिःपर्युक्ष्यजलबिंदून्जलेनिक्षिप्योपवीतीद्विराचामेत् ॥ मूत्रमात्रोत्सर्गेतुपूर्ववदेकवारंलिंगंप्रक्षाल्यवामकरंत्रिःप्रक्षाल्यकरद्वयंद्विःप्रक्षाल्यैकैकयामृदापादौप्रक्षाल्यगंडूषचतुष्टयंविधायाचामेत् ॥ उक्तशौचाकरणेप्रायश्चित्तंस्मृतिरत्नावल्यां ॥ गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा इति ॥ जपेदितिशेषः ॥ इतिमूत्रपुरीषो० ॥

॥ ५ ॥ दंतधावनविधिः ॥

श्रीः ॥ मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः ॥ तदार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावने ॥ उत्थायनेत्रेप्रक्षाल्यशुचिर्भूत्वासमाहितः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

परिजप्यचमंत्रेणभक्षयेद्दंतधावनं ॥ शुचिर्भूत्वाविण्मूत्रोत्सर्गेणशुचिर्भूत्वेत्यर्थः ॥ प्रतिपत्षष्ठ्यष्टमीनवम्येकादशीचतुर्दशीपंच दशीसंक्रांतिव्यतीपातव्रतोपवासश्राद्धदिनार्कभौमशुक्रमंददिननिषिद्धदिनातिरिक्तदिनेषुब्राह्मणोद्वादशांगुलप्रमाणेनदशांगुल प्रमाणेनवाकनिष्ठांगुलिवत्स्थूलेनतिंतिण्यादिविहितवृक्षोद्भवेनचूर्णीकृताग्रेणप्रक्षालितेनशुष्केणार्द्रेणवा ॥ आयुर्बलंयशोवर्चः प्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इतिमंत्रेणाभिमंत्रितेनकाष्ठेन--मुखदुर्गंधिनाशायदंतानांचविशु द्ध्ये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं ॥ इतिमंत्रमुक्त्वादंतान्संशोध्यरजतादिनिर्मितयाजिह्वोल्लेखिन्यापर्णादिनावाजि ह्वामुल्लिख्यद्वादशगंडूषांश्चकृत्वा ॐकारंगायत्रींचस्मृत्वाशिखांबध्नीयात् ॥ इतिदंतधावनम् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६ ॥ स्नानविधिः ॥

श्रीः ॥ कर्तांप्रातरुत्थानादिदंतधावनांतंनित्यविधिंनिर्वर्त्यस्नानसामग्रींगृहीत्वाजलसमीपंगत्वोद्धृतजलेनमुखंपाणीपादौचप्रक्षा ल्योदकंस्पृष्ट्वामलापकर्षणस्नानंकृत्वाबद्धशिरादर्भपाणिःप्राङ्मुखआचम्यप्राणानायम्यदेशकालावुत्कीर्त्य ममकायिकवाचिक मानसिकादिसकलपापक्षयपूर्वकंकर्माधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःस्नानमहंकरिष्येइतिसंकल्प्य ॥ ॐ आपोहिष्ठा मयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमा मवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ आपोवाइदꣳसर्वंविश्वाभूतान्यापःप्राणावाआपःपशवआपोन्नमापोमृतमापः संम्राडापोविराडापःस्वराडापश्छंदाꣳस्यापोज्योतीꣳष्यापोयजूꣳष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसुवरापओम् ॥ स्नानं कृत्वा ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमꣳसचतापरुष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized By Sarayu Trust Foundation, Delhi and eGangotri

अघमर्षणं ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्र्यजायतततःसमुद्रोअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोसुवः ॥ ॥ १ ॥ इतित्रिरावृत्त्याअघमर्षणंकुर्यात् ॥ (अथअर्घ्यमंत्राः ॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेकेशवानंत गृहाणार्घ्यनमोस्तुते ॥ १ ॥ एहिसूर्यसहस्रांशोतेजोराशेजगत्पते ॥ अनुकंपयमांभक्त्यागृहाणार्घ्यनमोस्तुते ॥ २ ॥ ब्रह्मक मंडलूद्भूतेगंगेत्रिपथगामिनि ॥ त्रैलोक्यवंदितेदेविगृहाणार्घ्यनमोस्तुते ॥ ३ ॥ तपनस्यसुतेदेवियमुनेचमहानदि ॥ शुद्धानां शुद्धयेदेविगृहाणार्घ्यनमोस्तुते ॥ ४ ॥ किरणाधूतपापाचपुण्यतोयासरस्वती ॥ गंगाचयमुनाचैवगृहाणार्घ्यनमोस्तुते ॥ ५ ॥ पापोहंपापकर्माहंपापात्मापापसंभवः ॥ त्राहिमांकृपयागंगेगृहाणार्घ्यनमोस्तुते ॥६॥ इमान्यर्घ्याणिकाम्यानीतिज्ञेयं) पुनश्चस्नानंकृत्वा ॥ ॐप्रजापतेरक्ष्यश्वयत्तत्परापतत्तदश्वोऽभवद्यदश्वयत्तदश्वस्याश्वत्वंतद्देवाअश्वमेधेनैवप्रत्यदधुरेषवैप्रजापतिꣳसर्वंकरोतियोश्वमेधेनयजतेसर्वएवभवतिसर्वंस्यवाएषाप्रायश्चित्तिःसर्वस्यभेषजꣳसर्ववाएतेनपाप्मानंदेवाअतरन्नपिवाएतेनब्रह्महत्यामतरन्सर्वपाप्मानं १ तरतितरतिब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेवंवेदोत्तरंवैततप्रजापतेरक्ष्यश्वयत्तस्मादश्वस्योत्तरतोवद्यंतिदक्षिणतोन्येषांपशूनांवैतसःकठोभवत्यप्सुयोनिर्वाअश्वोप्सुजोवैतसःस्वएवैनंयोनौप्रतिष्ठापयतिचतुष्टोमस्तोमोभवतिसरङ्ववाअश्वस्यसक्थ्यावृहद्रथन्तरेवाश्वंतुष्टोमेनैवप्रत्यदधुर्यच्चतुष्टोमःस्तोमोभवत्यश्वस्यसर्वत्वाय ॥१२॥ ततःस्नानांगतर्पणंकुर्यात् ॥ अद्यपूर्वोच्चरितएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंस्नानांगदेवर्षिपितृतर्पणंकरिष्ये ॥ अत्रप्रत्येकमेकैकोंजलिः ॥ ब्रह्मादयोयेदेवाःतान्देवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि ॥ भुवर्देवांस्तर्पयामि ॥ सुवर्देवांस्तर्पया

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मि ॥ भूर्भुवःसुवर्देवांस्तर्पयामि ॥ निवीती ॥ प्रत्येकंद्वेद्वेअंजली ॥ विश्वामित्रादयोयऋषयः तान्ऋषींस्तर्पयामि ॥ भूर्ऋषीं
स्तर्पयामि ॥ भुवर्ऋषींस्तर्पयामि ॥ सुवर्ऋषींस्तर्पयामि ॥ भूर्भुवःसुवर्ऋषींस्तर्पयामि ॥ प्राचीनावीती ॥ प्रत्येकमंजलित्रयं ॥
वैशंपायनादयोयेपितरः ॥ तान्पितॄंस्तर्पयामि ॥ भूःपितॄंस्तर्पयामि ॥ भुवःपितॄंस्तर्पयामि ॥ सुवःपितॄंस्तर्पयामि ॥ भूर्भुवः
सुवःपितॄंस्तर्पयामि ॥ इतितर्पयेत् ॥ ततः ॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकं ॥
इतिपरिधानीयंनिष्पीड्य ॥ यज्ञोपवीती ॥ यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥
इतियक्ष्मतर्पणंकृत्वा ॥ ज्ञानतोज्ञानतोवापियन्मयादुष्कृतंकृतं ॥ तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते ॥ इतिनदींक्षमाप्यशु
ष्कंवस्त्रंपरिदध्यात् ॥ सविस्तरःस्नानविधिरग्रेउत्सर्जनप्रयोगेद्रष्टव्यः ॥ इतिस्नानविधिःसमाप्तः ॥ ॥ छ ॥

॥ ७ ॥ वस्त्रधारणविधिः ॥

श्रीः ॥ स्नानोत्तरंदेहेस्वयमेवशुष्केसतिकेशजलेवस्तुतेशुष्कंवस्त्रंत्रिरवधूयउदक्प्राग्वाविस्तार्यपरिदध्यात् ॥ परिहितमार्द्रवस्त्रं
नाभेरूर्ध्वमेवोत्तारयेत् ॥ दक्षिणतःप्रत्यग्वाविस्तारणेतद्वस्त्रंनपरिधेयं ॥ यदितदेवपरिधेयंस्यात्तदाप्रक्षाल्यैवपरिधेयं ॥ ततस्ता
दृगेवोत्तरीयंधारयेत् ॥ शुष्काभावेआर्द्रमेवसप्तवारमवधूयपरिधेयं ॥ उत्तरीयवस्त्रालाभेतृतीयमुपवीतंधार्यं ॥ तस्यापिसर्वथा
भावेअधरीयवस्त्रोत्तरीयवर्गएवोत्तरीयवस्त्रंभवति ॥ इतिवस्त्रधारणविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ८ ॥ गंगाष्टकप्रारंभः ॥

श्रीः ॥ मातःशैलसुतासपत्निवसुधाशृंगारहारावलिस्वर्गारोहणवैजयंतिभवतींभागीरथिप्रार्थये ॥ त्वत्तीरेवसतस्त्वदंबुपिबतस्त्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्वीचिषुप्रेखतस्त्वन्नामस्मरतस्त्वदर्पितदृशःस्यान्मेशरीरव्ययः ॥ १ ॥ त्वच्चारुतरुकोटरांतरगतागंगावहंगावरत्वन्नामस्मरकारिणो रिणिवरंमत्स्योथवाकच्छपः ॥ नैवान्यत्रमदांधसिंधुरघटासंघट्टघंटारणत्कारस्तत्रसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥ २ ॥ उ क्षापक्षीतुरगउरगःकोपिवावारणोवावारीणःस्यांजननमरणक्लेशदुःखासहिष्णुः ॥ नत्वन्यत्रप्रविरलरणत्किंकिणीक्वाणमिश्रंवारस्त्री भिश्चमरमरुतावीजितोभूमिपालः ॥ ३ ॥ काकैर्निष्कुषितंश्वभिःकवलितंगोमायुभिर्लुंठितंस्रोतोभिश्चलितंतटांबुलुलितंवीचीभिरां दोलितं ॥ दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानःकदाद्रक्ष्येहंपरमेश्वरित्रिपथगेभागीरथिस्त्वंवपुः ॥ ४ ॥ अभिनवबिसवल्ली पादपद्मस्यविष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला ॥ जयतिजयपताकाकाप्यसौमोक्षलक्ष्म्याःक्षपितकलिकलंकाजाह्नवीनःपु नातु ॥ ५ ॥ एतत्तालतमालसालसरलव्यालोलवल्लीलताच्छन्नंसूर्यकरप्रतापरहितंशंखेंदुकुंदोज्वलं ॥ गंधर्वामरसिद्धकिन्नरवधू तुंगस्तनास्फालितंस्नानायप्रतिवासरंभवतुमेगांगंजलंनिर्मलं ॥ ६ ॥ गांगंवारिमनोहारिमुरारिचरणच्युतं ॥ त्रिपुरारिशिरश्चा रिपापहारिपुनातुमां ॥ ७ ॥ पापापहारिदुरितारितरंगधारिशैलप्रचारिगिरिराजगुहाविदारि ॥ झंकारकारिहरिपादरजोपहारि गांगंपुनातुसततंशुभकारिवारि ॥ ८ ॥ (भगवतितवतीरेनीरमात्राशनोहंविगतविषयतृष्णःकृष्णमाराधयामि ॥ सकलकलुषभं गेस्वर्गसोपानसंगेतरलतरतरंगेदेविगंगेप्रसीद ॥ ९ ॥) गंगाष्टकंपठतियःप्रयतःप्रभातेवाल्मीकिनाविरचितंशुभदंमनुष्यः ॥ प्रक्षाल्यगात्रकलिकल्मषपंकमाशुमोक्षंलभेत्पततिनैवनरोभवाब्धौ ॥ १० ॥ (विष्णुपादाब्जसंभूतेगंगेत्रिपथगामिनि ॥ धर्मद्रवे तिविख्यातेपापंमेहरजाह्नवि ॥ ११ ॥) ॥ इतिश्रीवाल्मीकिनाविरचितंगंगाष्टकंसंपूर्णम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ९ ॥ आसनकल्पनम् ॥

श्रीः ॥ आसनान्याहव्यासः ॥ कौशेयंकंबलंचैवअजिनंपट्टमेवच ॥ दारुजंताडपत्रंवाआसनंपरिकल्पयेत् ॥ कृष्णाजिनेज्ञान सिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ॥ कुशासनेव्याधिनाशःसर्वेष्टश्चित्रकंबलः ॥ निषिद्धान्याह ॥ वंशासनेतुदारिद्र्यंपाषाणेव्याधिरेवच ॥ धरण्यांतुभवेद्दुःखंदौर्भाग्यंछिद्रदारुजे ॥ तृणेधनयशोहानिःपल्लवेचित्तविभ्रमः ॥ इति ॥ प्रचेताः ॥ गोशकृन्मृन्मयं भिन्नंतथापालाशपिप्पलं ॥ लोहबद्धंसदैवार्कंवर्जयेदासनंबुधः ॥ स्मृत्यंतरे ॥ मृगचर्मप्रयत्नेनवर्जयेत्पुत्रवान्गृही ॥ इति ॥

॥ १० ॥ भस्मनिर्माणधारणादिविधिः ॥

श्रीः ॥ गोपीनाथपद्धतौयथा—कपिलायागोमयंगगनेपतद्गृहीत्वाधरामसंस्पृशन्नेवसद्योजातमित्यानीयवामदेवायनमोज्येष्ठायेति मंत्रेणधरायामसंस्थापयन्नेवपात्रेसंशोष्यअघोरेभ्योथघोरेभ्यइतिविनिर्दह्यतत्पुरुषायेतितद्भस्मसमुद्धृत्यईशानःसर्वविद्यानामिति विशोध्यत्र्यंबकंयजामहइत्यादायआपोहिष्ठेतित्रिभिर्जलंतत्रानीय॥ अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मस र्वंहवाइदंभस्मतस्माद्ब्रह्मतदेतत्पाशुपतंपशुपाशविमोक्षायोम्॥ इत्येतैरेकादशवारमभिमंत्र्य ॐसद्योजातायनमःनंइतिभालेतर्ज नीमध्यमानामाभिःमध्यमानामाकनिष्ठिकाभिर्वाभ्रूप्रांतपर्यंतंविलिप्य ॐ वामदेवायनमःमंइतिदक्षिणांसेविलिप्य ॐ अघोराय नमःशिंइतिवामस्कंधे ॐ तत्पुरुषायनमःवांइत्युदरे ॐ ईशानायनमःयंइतिहृदये ॐ नमःशिवायेतिमंत्रेणमूर्ध्निविलिप्यहस्तौप्रक्षा लयेत्॥ पंचाक्षरेणमंत्रेणैववासर्वत्रललाटहृदयनाभिकंठांसद्वयबाहुद्वयकूर्परद्वयप्रकोष्ठद्वयपृष्ठशिरःसुलेपयेत्॥ एवमशक्तौसद्यो जातादिपंचभिर्मंत्रैरभिमंत्रयेत् ॥ श्रौताग्निमानौपासनाग्निमान्वाभवतिचेत्तदातदग्निजमेवभस्मगृहीत्वासद्योजातादिभिर्धार्य ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

श्रीः ॥ भस्महस्तेआदाय ॥ ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मांशिवोमेअस्तुसदाशिवों ॥ शिरसि ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ मुखे॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ हृदये ॥ ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकल विकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ गुह्ये ॥ ॐ सद्योजा तंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ पादयोः ॥ अग्निरितिभस्म ॥ वायुरिति भस्म॥ जलमितिभस्म ॥ स्थलमितिभस्म ॥ व्योमेतिभस्म ॥ सर्वंहवाइदंभस्म ॥ मानस्तोकेतनयेमानआयुषिमानोगोषुमानो अश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ ॥ इतिसर्वांगेभस्मविलिप्य ॥ आचामेत् ॥ ॥

॥ १२ ॥ पवित्रप्रमाणंकुशग्रहणविधिश्च ॥

श्रीः ॥ समित्पुष्पकुशादीनिब्राह्मणःस्वयमाहरेत् ॥ शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्पतत्यधः ॥ इति ॥ तत्रदशविधादर्भायथा॥ कुशाःकाशायवादूर्वाउशीराश्चसकुंदकाः ॥ गोधूमाव्रीहयोमुंजादशदर्भाःसबल्वजाः ॥ कुशाभावेतुकाशाःस्युःकाशाःकुशसमाः स्मृताः ॥ कुशाभावेगृहीतव्याअन्येदर्भायथोचितम् ॥ कुशग्रहणकालः ॥ मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः ॥ अयात यामास्तेदर्भाविनियोज्याःपुनःपुनः ॥ कुशच्छेदनविधिमाहकौशिकः ॥ शुचिर्भूत्वाशुचौदेशेस्थित्वापूर्वोत्तरामुखः ॥ ॐकारेणै वमंत्रेणकुशान्स्पृष्ट्वाद्विजोत्तमः ॥ मंत्रस्तु ॥ ॐ विरिंचिनासहोत्पन्नपरमेष्ठीनिसर्गज ॥ नुदस्वसर्वपापानिकुशस्वस्तिकरोभव ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इममंत्रंसमुच्चार्यस्थित्वापूर्वोत्तरामुखः ॥ हुंफट्कारेणदर्भास्तुसकृच्छित्त्वासमुद्धरेत् ॥ पवित्रलक्षणंतु ॥ अनंतर्गर्भितंसाग्रंकौशं हिदलमेवच ॥ प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् ॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकम् ॥ एकैकन्यूनमुद्दिष्टंवर्णेवर्णेय थाक्रमम् ॥ सर्वेषांवाभवेद्वाभ्यांपवित्रंग्रंथितंनवाइति॥ अन्यान्यपिपवित्राणिकुशदूर्वामयानिच ॥ हेमात्मकपवित्रस्यकलांनार्हं तिषोडशीम् ॥ हैमेनसर्वदासर्वंकुर्यादेवाविचारयन् ॥ रौप्यंदक्षप्रदेशिन्यांबिभृयाद्दीक्षितोद्विजः ॥ इदमनामिकायांधारयेत् ॥ काम्याद्यन्यपवित्राण्यन्यत्रालोचनीयानि ॥ ॥ इतिकुशग्रहणविधिःपवित्रलक्षणंच ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १३ ॥ मालालक्षणंसंस्कारश्च ॥

श्रीः ॥ अंगुलीगणनादेकंरेखयाष्टगुणंभवेत् ॥ कुशग्रंथ्याकोटिगुणंरुद्राक्षैःस्यादनंतकम् ॥ अक्षगणानाप्युक्ताप्रजापतिना ॥ अष्टोत्तरशतंकुर्याच्चतुःपंचाशदेवतु ॥ सप्तविंशतिकंवापिततोनैकाधिकावरा ॥ रक्तवर्णैरमिश्रैश्चकीटरंध्रविवर्जितैः ॥ अक्षसूत्रं प्रकर्तव्यंगोपुच्छवलयाकृति ॥ वक्रंवक्रेणसंयोज्यपुच्छंपुच्छेनयोजयेत् ॥ मेरुरूर्ध्वमुखःकार्यःप्रत्येकंनागपाशकं ॥ पश्चात्तेनज पंकुर्याद्भवेदुक्तफलंप्रिये ॥ एकैकंमणिमंगुष्ठेनाकर्षन्प्रजपेन्मनुम् ॥ मेरौतुलंघितेदेविनमंत्रफलभाग्भवेत् ॥ प्रमादात्पतिते सूत्रेजपेदष्टोत्तरंशतं ॥ पादयोःपतितेतस्मिन्प्रक्षाल्यद्विगुणंजपेत् ॥ इतिसूत्रमाला ॥ एतच्चगायत्रीजपातिरिक्तजपेज्ञेयम् ॥ ॥ अथसंस्कारः ॥ कुशोदकसहितैःपंचगव्यैर्मालांप्रक्षाल्य ॐ ह्रीं अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवंशंषंसंहंळंक्षं एतानिपंचाशन्मातृकाक्षराणिअश्वत्थपत्रस्थापितमालायांविन्यस्य ॐ सद्यो जातं० ॐ वामदेवाय० ॐ अघोरेभ्यो० ॐ तत्पुरुषाय० ॐ ईशानःसर्वविद्यानां० इतिपंचमंत्रान्जपित्वा सद्योजातेतिमंत्रे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Funding by MoE-IKS and eGangotri

णमालांपंचगव्येनप्रोक्ष्य शीतलजलेनप्रक्षाल्य [illegible] अघोरेतिमालांधूपयित्वा तत्पुरुषातिचंदनकस्तूरी
दिनालेपयित्वा ईशानइतिमंत्रेणप्रतिमणिशतवारंदशवारंवाभिमंत्र्य अघोरइतिमंत्रेणमेरुंशतवारमभिमंत्रयेत् ॥ ततएतैरेवपं
चभिर्मंत्रैर्मालांपंचोपचारैःपूजयेत् ॥ एवंजपमालासंस्कृताभवति ॥ धारणनियमस्त्वित्थम् ॥ रुद्राक्षान्कंठदेशेदशनपरिमिता
न्मस्तकेद्वेचविंशेषट्षट्कर्णप्रदेशेकरयुगलकृतेद्वादशद्वादशैव ॥ बाह्वोरिंदोःकलाभिर्नयनयुगकृतेएकमेकंशिखायांवक्षस्यष्टा
धिकंयःकलयतिशतिकंसस्वयंनीलकंठः ॥ ३ ॥ ॥ इतिमालासंस्कारः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १४ ॥ पुरुषसूक्तप्रारंभः ॥

श्रीः ॥ ॐ सहस्रशीर्षापुरुषः ॥ सहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वा ॥ अत्यतिष्ठद्दशांगुलं ॥ पुरुषएवेदꣳसर्वं ॥ यद्भूतंयच्चभ
व्यं ॥ उतामृतत्वस्येशानः ॥ यदन्नेनातिरोहति ॥ एतावानस्यमहिमा ॥ अतोज्यायाꣳश्चपूरुषः ॥ पादोस्यविश्वाभूतानिं ॥ त्रिपाद
स्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषः ॥ पादोस्येहाभवात्पुनः ॥ ततोविष्वङ्व्यक्रामत् ॥ साशनानशनेअभि ॥ तस्माद्विराडजा
यत ॥ विराजोअधिपूरुषः ॥ सजातोअत्यरिच्यत ॥ पश्चाद्भूमिमथोपुरः ॥ यत्पुरुषेणहविषा ॥ देवायज्ञमतन्वत ॥ वसंतो
अस्यासीदाज्यं ॥ ग्रीष्मइध्मःशरद्धविः ॥ सप्तास्यासन्परिधयः ॥ त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाः ॥ अबध्नन्पुरु
षंपशुं ॥ तंयज्ञंबर्हिषिप्रौक्षन् ॥ पुरुषंजातमग्रतः ॥ तेनदेवाअयजंत ॥ साध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ संभृतंपृष
दाज्यं ॥ पशूꣳस्ताꣳश्चक्रेवायव्यान् ॥ आरण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ ऋचःसामानिजज्ञिरे ॥ छंदाꣳसिज
ज्ञिरेतस्मात् ॥ यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंत ॥ येकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात् ॥ तस्माज्जाताअजा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वयः ॥ यत्पुरुषंव्यदधुः ॥ कतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहू ॥ कावूरूपादावुच्येते ॥ ब्राह्मणोस्यमुखमासीत् ॥ बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यः ॥ पद्भ्याःशूद्रोअजायत ॥ चंद्रमामनसोजातः ॥ चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्याआसीदंतरिक्षं ॥ शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात् ॥ तथालोकाःअकल्पयन् ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्यवर्णंतमसस्तुपारे ॥ सर्वाणिरूपाणिविचित्यधीरः ॥ नामानिकृत्वाभिवदन्यदास्ते ॥ धातापुरस्ताद्यमुदाजहार ॥ शक्रःप्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाअयनायविद्यते ॥ यज्ञेनयज्ञमयजंतदेवाः ॥ तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंते ॥ यत्रपूर्वेसाध्याःसंतिदेवाः ॥ इतिपुरुष० ॥

॥ १५ ॥ आचमनप्रकारः ॥

श्रीः ॥ धर्मसूत्रे ॥ आसीनस्त्रिराचामेद्धृदयंगमाभिरद्भिस्त्रिरोष्ठौपरिमृजेद्द्विरित्येकेसकृदुपस्पृशेद्द्विरित्येकेदक्षिणेनपाणिनासव्यमभ्युक्ष्यपादौशिरश्चेंद्रियाण्युपस्पृशेच्चक्षुषीनासिकेश्रोत्रेचेति ॥ गौतमोपि ॥ शुचौदेशआसीनोदक्षिणबाहुंजान्वंतराकृत्वायज्ञोपवीत्यामणिबंधात्पाणिंप्रक्षालयतिवाग्यतोहृदयस्पृशस्त्रिश्चतुर्वापआचामेत्पादौचाभ्युक्षेत्खानिचोपस्पृशेदिति ॥ याज्ञवल्क्योपि ॥ अंतर्जानुशुचौदेशउपविष्टउदङ्मुखः ॥ प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेत् ॥ उपस्पर्शआचमनं ॥ भरद्वाजः ॥ आयतंपर्वतःकृत्वागोकर्णाकृतिवत्करं ॥ संहतांगुलिनातोयंगृहीत्वापाणिनाद्विजः ॥ मुक्तांगुष्ठकनिष्ठेनशेषेणाचमनंचरेत् ॥ माषमज्जनमात्रास्तुसंगृह्यत्रिःपिबेदपः ॥ आचमनेमंत्रविशेषमाहभारद्वाजः ॥ देव्याःपादैस्त्रिभिःपीत्वाखानिपश्चादुपस्पृशेत् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दव्यागायत्र्याः ॥ आत्रिणातु ॥ आपोहिष्ठादिभिमंत्रैस्त्रिभिस्त्रिःप्राशनंचरेदित्युक्तं ॥ षट्त्रिंशन्मते ॥ होमभोजनकालेचसंध्ययो रुभयोरपि ॥ आचांतःपुनराचामेज्जपहोमार्चनादिषु ॥ इत्याचमनप्रकारः ॥

॥ १६ ॥ संध्यासंबंधिनिर्णयः ॥

श्रीः ॥ प्रातःसंध्याकालः ॥ उत्तमातारकोपेतामध्यमालुप्ततारका ॥ अधमासूर्यसहिताप्रातःसंध्यात्रिधामता ॥ तथा ॥ संध्या कालःप्रागुदयाद्द्विप्रस्यद्विमुहूर्तकःइति ॥ एतद्ब्रह्माह्निककर्तृपरमितिमहेशाशयः ॥ मध्याह्नसंध्यास्मृतिसंग्रहे ॥ मध्याह्नस्नाना दूर्ध्वंकालस्त्वव्यवधानतः ॥ तत्रमध्याह्नसंध्यास्यादूर्ध्वंगौणःस्मृतोबुधैः ॥ सायंसंध्या ॥ उत्तमासूर्यसहितामध्यमालुप्तभास्करा ॥ अधमातारकोपेतासायंसंध्यात्रिधामता ॥ गौणकालस्तु ॥ उदयास्तमयादूर्ध्वंयावत्स्याद्घटिकात्रयं ॥ तावत्संध्यामुपासीतप्राय श्चित्ततःपरं ॥ संध्यास्थानं ॥ गृहेत्वेकगुणासंध्यागोष्ठेदशगुणास्मृता ॥ शतसाहस्रिकानद्यामनंताविष्णुसंनिधौ ॥ बहिःसं ध्यादशगुणागर्तप्रस्रवणेषुच ॥ खातेतीर्थेशतगुणाह्यनंताजाह्नवीजले ॥ अथप्रयोगः ॥ प्राक्कूलेषुततःस्थित्वादर्भेषुसुसमाहितः ॥ प्राणायामत्रयंकृत्वाध्यायेत्संध्यामितिश्रुतिः ॥ आचमनप्रकारःपूर्वमुक्तः ॥ ॥ प्राणायामलक्षणं ॥ प्रणवंव्याहृतीःसप्तगायत्रीं शिरसासह ॥ त्रिःपठेदायतप्राणःप्राणायामःसउच्यते ॥ अत्रपठेदित्युक्तेपिवर्णाभिध्यानमात्रंनोच्चारणं ॥ शनैर्नासापुटेवायुमु त्सृजेन्नतुवेगतः ॥ नकंपयेच्छरीरंतुसयोगःपरमोमतः ॥ पूरकःकुंभकोरेच्यःप्राणायामस्त्रिलक्षणः ॥ नासिकाधृतउच्छ्वासोध्यातः पूरकउच्यते ॥ कुंभकोनिश्चलश्वासोरिच्यमानस्तुरेचकः ॥ इति ॥ दक्षिणेरेचकंकुर्याद्वामेनापूर्यचोदरं ॥ कुंभकेनजपंकुर्यात्प्रा णायामस्यलक्षणं ॥ ॥ मार्जनंयथा ॥ स्मृतिसंग्रहे ॥ आपोहीतित्रिभिर्मंत्रैःशिरस्यंसेचविप्रुषः ॥ यस्यक्षयायेत्यधस्तात्क्षिप्त्वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्भिःपरिषेचयेत् ॥ मध्यमानामिकांगुष्ठैःक्षेपणंतुकुशोदकैः ॥ ऋगंतेमार्जनंकुर्यात्पादांतेवासमाहितः ॥ अर्धचांतेथवाकुर्याच्छि
ष्टानांमतमीदृशं ॥ प्रकारांतरंसंग्रहे ॥ ससथत्रयमाकाशेमस्तकेवरवत्रयं ॥ भूम्यांप्रोक्तंनत्रयंतुएतन्मार्जनलक्षणं ॥ एतान्यक्षरा
णिपादांतप्रदर्शकानियथा–चक्षसे । रसः । जिन्वथ । एतेषुपादांतेषुआकाशे (हृदये) मार्जनं ॥ मयोभुवः । मातरः । गमा
मवः । ऐषुपादांतेषुमस्तके (शिरसि) ॥ दधातन । इहनः । चनः । एषुपादांतेषुभूम्यां (पादयोः) इति ॥ एतच्चधाराच्यु
तजलेवामहस्तधृतेवानकार्यं ॥ अपरंच ॥ शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः ॥ प्रणवेनव्याहृतिभिर्गायत्र्येतिक्रमात्रयं ॥
अब्दैवताभिर्ऋग्भिश्चचतुर्थमितिमार्जनमिति ॥ ॥ अघमर्षणं ॥ उद्धृत्यदक्षिणेहस्तेजलंगोकर्णवत्कृते ॥ निःश्वसन्नासिकाग्रे
षुपाप्मानंपुरुषंस्मरेत् ॥ ऋतंचेतितृचंवापिद्रुपदांवाजपेद्दचं ॥ दक्षनासापुटेनैवपाप्मानमपसारयेत् ॥ तज्जलंनावलोक्याथवा
मभागेक्षितौक्षिपेदिति ॥ ॥ अर्घ्यदानं ॥ तच्चआदित्योपासनंकुर्वन्कुर्यात् ॥ कराभ्यांतोयमादायगायत्र्याचाभिमंत्रितं ॥
आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वमथतत्क्षिपेत् ॥ अत्रधीमहिधियइत्यनयोःसांतत्येनसस्वरसंधिः ॥ जलाभावेमहामार्गेबंधनेत्वशु
चावपि ॥ उभयोःसंध्ययोःकालेरजसाचार्घ्यमुत्सृजेत् ॥ संग्रहे ॥ मुक्तहस्तेनदातव्यंमुद्रांतत्रनकारयेत् ॥ तर्जन्यंगुष्ठयोगेतु
राक्षसीमुद्रिकास्मृता ॥ राक्षसीमुद्रिकार्घ्येणतत्तोयंरुधिरंभवेत् ॥ जलेष्वर्घ्यंप्रदातव्यंजलाभावेशुचिस्थले ॥ संप्रोक्ष्यवारिणा
सम्यक्ततोर्घ्यंतुप्रदापयेत् ॥ ईषन्नम्रःप्रभातेवैमध्याह्नऋजुरास्थितः ॥ सूर्यायार्घ्यांजलिंदद्यात्सायंतूपविशेद्भुवि ॥ ॥ गायत्री
जपः ॥ जपन्नासीतसावित्रींप्रत्यगातारकोदयात् ॥ संध्याप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात् ॥ प्रातस्तिष्ठन्जपेद्देवींसायं
चैवोपविश्यच ॥ उपविश्यतुमध्याह्नेप्राङ्मुखोजपमाचरेत् ॥ आसनाद्युक्तशुचौदेशेदर्भांभसोक्षितेदर्भान्संस्तीर्यव्याहृतिभि

CC-0. In Public Domain.Funding by MoE-IKS

रुपविश्यप्राणायामत्रयंकृत्वाआत्मानंव्याहृतिभिरन्युक्षणादिभिः संस्कृत्य [illegible] स्यात्मानंतद्रूपंभावयेत् ॥ आसनानिपूर्वमुक्तानि ॥ अत्रासनोपवेशनविधिदर्शनात्पूर्ववतूष्णीमेवदर्भासनउपवेशनमितिगम्यते ॥ ॥ जपसंख्या ॥ याज्ञवल्क्यः ॥ ब्रह्मचार्याहिताग्निश्चशतमष्टोत्तरंजपेत् ॥ वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत् ॥ सायंप्रातश्च मध्याह्नेसावित्रींवाग्यतोजपेत् ॥ सहस्रपरमांदेवींशतमध्यांदशावरां ॥ गायत्रींप्रजपेद्धीमान्सर्वपापप्रणाशिनीं ॥ अत्रबौधाय नेन०— शतकृत्वउभयतःप्रणवांससप्तव्याहृतिकांमनसावादशकृत्वइत्यादिविशेषउक्तः ॥ अष्टोत्तरशतंनित्यमष्टाविंशतिमेववा ॥ विधिनादशकंवापित्रिकालंप्रजपेद्बुधइति ॥ नारदः ॥ सर्वत्रैवप्रदोषेषुगायत्रीमष्टसंख्यया ॥ अष्टाविंशत्यनध्यायेजपेन्नाष्टोत्तरं शतमिति ॥ समंतुः ॥ अष्टम्यांचचतुर्दश्यांनित्यादर्धंजपेत्सुधीः ॥ प्रतिपत्सुतुरीयांशंपर्वण्यल्पतरंजपेत् ॥ उत्तमंमानसंजाप्य मुपांशुमध्यमंस्मृतं ॥ अधमंवाचिकंप्राहुःसर्वमंत्रेषुवैद्विजाः ॥ जपेनियममाहशौनकः ॥ कृत्वोत्तानौकरौप्रातःसायंचाधोमुखौ ततः ॥ मध्येसंमुखहस्ताभ्यांजपएवमुदाहृतः ॥ स्मृत्यंतरे ॥ हस्तौनाभिसमौधृत्वाप्रातःसंध्याजपंचरेत् ॥ हृत्समौतुकरोमध्येसायं मुखसमौकरौ ॥ इति ॥ वस्त्रेणाच्छाद्यतुकरंदक्षिणंयःसदाजपेत् ॥ तस्यतत्सफलंजाप्यंतद्धीनमफलंस्मृतमिति ॥ आर्द्रवस्त्रेण नाच्छादयेत् ॥ ॥ गायत्रीमंत्रार्थः ॥ तत्सवितुरिति ॥ तत् सवितुर्जगत्कारणस्यश्रीसूर्यस्य वरेण्यंवरणीयं भर्गस्तेजःअंधका रभर्जनात् धीमहिध्यायेम यो नःधियोऽस्माकंबुद्धीः प्रचोदयात्स्वरूपे प्रेरयत् ॥ प्रेरयतीत्यर्थः ॥ एवंगायत्रीमंत्रार्थस्यजपका लेमनसानुसंधानंकार्यं ॥ ॥ संध्याकालातिक्रमेप्रायश्चित्तं ॥ संध्याकालेत्वतिक्रांतेस्नात्वाचम्ययथाविधि ॥ जपेदष्टशतंदेवीं ततःसंध्यांसमाचरेत् ॥ यत्तुवसिष्ठवचनं ॥ कालातिक्रमणेचैवत्रिसंध्यमपिसर्वदा ॥ चतुर्थार्घ्यंप्रकुर्वीतभानोर्व्याहृतिसंपुटमिति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तदल्पकालातिक्रमविषयं ॥ एकाहाद्यतिक्रमेजमदग्निः ॥ एकाहंसमतिक्रम्यसंध्यावंदनकर्मतु ॥ अहोरात्रोषितोभूत्वागायत्र्या अयुतंजपेत् ॥ द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेत्रिगुणंस्मृतं ॥ ॥ कालातिक्रमेपवादः ॥ रात्रौप्रहरपर्यंतंदिवाकर्माणिकारयेत् ॥ अवगाहंब्रह्मयज्ञंसौरजप्यंविवर्जयेत् ॥ ब्रह्मयज्ञनिषेधस्तुतैत्तिरीयातिरिक्तपरः ॥ तेषांरात्रावपितत्प्रतिपादनात् ॥ इति ॥ ७ ॥

॥ १७ ॥ प्रातःसंध्याप्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ ॥ ॐ केशवायनमः ॥ नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ मधुसूदनायनमः ॥ त्रिविक्रमायनमः ॥ वामनायनमः ॥ श्रीधरायनमः ॥ हृषीकेशाय नमः ॥ पद्मनाभायनमः ॥ दामोदरायनमः ॥ संकर्षणायनमः ॥ वासुदेवायनमः ॥ प्रद्युम्नायनमः ॥ अनिरुद्धायनमः ॥ पुरुषोत्तमायनमः ॥ अधोक्षजायनमः ॥ नारसिंहायनमः ॥ अच्युतायनमः ॥ जनार्दनायनमः ॥ उपेंद्रायनमः ॥ हरयेनमः ॥ श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳसुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ प्रातःसंध्याकुमारीरक्तारक्तवर्णारक्तवस्त्रारक्तमाल्यानुलेपनाहंसवाहनाब्रह्मदैवत्यागार्हपत्याग्न्युपस्थानाऋग्वेदसंहिताप्रथमाब्रह्मसंध्यावेदवतीनाम्नीतिध्यात्वा ममउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसंध्यामुपासिष्ये ॥ आयातुवरदादेवीअक्षरंब्रह्मसंमितं ॥ गायत्रीछंदसांमातेदंब्रह्म जुषस्वमे ॥(यदह्नात्कुरुतेपापंतदह्नात्प्रतिमुच्यते)॥ यद्रात्रियात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते ॥ सर्ववर्णेमहादेविसंध्याविद्ये सरस्वति ॥ अजरेअमरेदेविसर्वदेविनमोस्तुते ॥ ओजोसिसहोसिबलमसिभ्राजोसिदेवानांधामनामासिविश्वमसिविश्वायुःसर्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

मसिसर्वायुरभिभूरोंगायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छंदसींनावाहयामि श्रियमावाहयामि ह्रियमावाहयामि ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ आपोवाइदꣳसर्वंविश्वाभूतान्यापःप्राणा वाआपःपशवआपोन्नमापोमृतमापःसंम्राडापोविराडापःस्वराडापश्छंदाꣳस्यापोयजूꣳष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसु वरापओं ॥ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंतां ॥ यद्रात्रियापापमकार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ रात्रिस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंाममृतयोनौ ॥ सूर्येज्योतिषिजुहोमिस्वाहा ॥ केश वायनमः ॥ नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनो मुखाकरत्प्रणआयूꣳषितारिषत् ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयते हनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ हिरण्यवर्णाःशुचयःपावकायासु जातःकश्यपोयास्विंद्रः ॥ अग्निंयागर्भंदधिरेविरूपास्तानआपःशꣳस्योनाभवंतु ॥ यासाꣳराजावरुणोयातिमध्येसत्यानृतेअवप श्यंजनानां ॥ मधुश्चुतःशुचयोयाःपावकास्तानआपःशꣳस्योनाभवंतु ॥ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोदंतिशुक्रास्तानआपःशꣳस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशत्वचंमे ॥ सर्वाꣳअ ग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ पवमानःसुवर्जनः ॥ पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥ पुनंतुमादेव जनाः ॥ पुनंतुमनवोधिया ॥ पुनंतुविश्वआयवः ॥ जातवेदःपवित्रवत् ॥ पवित्रेणपुनाहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्वाक्रतूꣳरनु ॥ यत्तेपवित्रमर्चिषि ॥ अग्नेवितंतमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभाभ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदेव्यागात् ॥ यस्यैबह्वीस्तनुवोवीतपृष्ठाः ॥ तयामदंतःसधमाद्येषु ॥ वयꣳस्यामपतयोरयीणां ॥ वैश्वानरोरश्मिभिर्मापुनातु ॥ वातःप्राणेनेषिरोमयोभूः ॥ द्यावापृथिवीपयसापयोभिः ॥ ऋतावरीयज्ञियेमापुनीतां ॥ बृहद्भिः सवितस्तृभिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेदक्षैःपुनाहिमा ॥ येनदेवाअपुनत ॥ येनापोदिव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥ इदंब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥ ऋषिभिःसंभृतꣳरसं ॥ सर्वꣳसपूतमश्नाति ॥ स्वदितंमातरिश्वना ॥ पावमानीर्यो अध्येति ॥ ऋषिभिःसंभृतꣳरसं ॥ तस्मैसरस्वतीदुहे ॥ क्षीरꣳसर्पिर्मधूदकं ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिपयस्वतीः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ पावमानीर्दिशंतुनः ॥ इमँल्लोकमथोअमुं ॥ कामान्त्समर्धयंतुनः ॥ देवीर्देवैः समाभृताः ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिघृतश्चुतः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥ तेनसहस्रधारेण ॥ पावमान्यःपुनंतुमा ॥ प्रजापत्यंपवित्रं ॥ शतोद्यामꣳहिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातु ॥ सोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा ॥ जातवेदामोर्जयंत्यापुनातु ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नस्नात्वीमलादिव ॥ पूतंपवित्रेणेवाज्यं ॥ आपःशुंधंतुमैनसः ॥ ॐ भूर्भुवःसुवः ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ॥ श्रीसूर्यायइदमर्घ्यंदत्तंनमम ॥ इतित्रीनर्घ्यान्दत्वा ॥ ३ ॥ असावादित्योब्रह्म ॥ आचम्य ॥ केशवायनमः ॥ नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳसुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओꣳसत्यं ॥

॥ १३ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Siddhanta eGangotri Gyaan and eGangotri Foundation. Funding by MoE-IKS

तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ अपक्रामंतुभूता
निपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभे ॥ पृथ्वीतिमंत्रस्यमेरुपृष्ठऋषिः ॥ कूर्मपृष्ठोदेवता ॥ सुतलंछंदः ॥
आसनेविनियोगः ॥ पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ अंगुष्ठाग्रेतुगोविंदंतर्ज
न्यांतुमहीधरं ॥ मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं ॥ कनिष्ठिक्यांन्यसेद्विष्णुंकरमध्येचमाधवं ॥ एवंचकरविन्यासंसर्व
पापप्रणाशनं ॥ भूः पादाभ्यांनमः ॥ भुवः जानुभ्यांनमः ॥ सुवः कटिभ्यांनमः ॥ महः नाभ्यैनमः ॥ जनः हृदयायनमः ॥
तपः कंठायनमः ॥ सत्यं ललाटायनमः ॥ परंब्रह्म शिरसेस्वाहा ॥ तत्सवितुर्ब्रह्मात्मनेहृदयायनमः ॥ वरेण्यंविष्ण्वात्मनेशिरसे
स्वाहा ॥ भर्गोदेवस्यरुद्रात्मनेशिखायैवषट् ॥ धीमहिपरमात्मनेकवचायहुं ॥ धियोयोनोज्ञानात्मनेनेत्रत्रयायवौषट् ॥ प्रचोद
यात्सत्यात्मनेअस्त्रायफट् ॥ इतिदिग्बंधः ॥ गायत्र्यागायत्रीछंदोविश्वामित्रऋषिः ॥ सवितादेवताग्निर्मुखंब्रह्माशिरोविष्णुर्हृ
दयंरुद्रःशिखापृथिवीयोनिः प्राणापानव्यानोदानसमानासप्राणाश्वेतवर्णासांख्यायनसगोत्रागायत्रीचतुर्विंशत्यक्षरात्रिपदाष
ट्कुक्षिःपंचशीर्षोपनयनेविनियोगः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओंसुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओंसत्यं ॥ ॐ तत्स
वितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ प्रातःसंध्यांगत्वेनअष्टो
त्तरशतसंख्ययाअष्टाविंशतिसंख्ययावागायत्रीजपमहंकरिष्ये ॥ सुमुखंसंपुटंचैवविततंविस्तृतंतथा ॥ द्विमुखंत्रिमुखंचैवचतुः
पंचमुखंतथा ॥ षण्मुखाधोमुखंचैवव्यापकांजलिकंतथा ॥ शकटंयमपाशंचग्रंथितंचोल्मुकोल्मुकं ॥ प्रलंबंमुष्टिकंचैवमत्स्यं
कूर्मंवराहकं ॥ सिंहाक्रांतंमहाक्रांतंमुद्गलंपल्लवंतथा ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुकलानिबद्धमुकुटां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्त्वार्थवर्णात्मिकां ॥ गायत्रींवरदाभयांकुशकशांशुभ्रंकपालंगुणंशंखंचक्रमथारविंदयुगुलंहस्तैर्वहंतींभजे ॥ महामालेमहा मायेसर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव ॥ ॐ भूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ इति १०८ ॥ २८ जपित्वा ॥ तत्सवितुर्ब्रह्मात्मने हृदयायनमः ॥ वरेण्यंविष्ण्वात्मनेशिरसेस्वाहा ॥ भर्गोदेवस्यरुद्रात्मनेशिखायैवषट् ॥ धीमहिपरमात्मनेकवचायहुं ॥ धियोयोनोज्ञानात्मनेनेत्रत्रयायवौषट् ॥ प्रचोदयात्सत्या त्मनेअस्त्रायफट् ॥ इतिदिग्विमोकः ॥ सुरभिर्ज्ञानशूर्पचयोनिःकूर्मोथपंकजं ॥ लिंगंनिर्याणमुद्रांचजपांतेष्टौप्रकीर्तिताः ॥ ॥ मुकुलितकरआदित्यमुपतिष्ठते ॥ मित्रस्यचर्षणीधृतश्रवोदेवस्यसानसि ॥ सत्यंचित्रश्रवस्तमं ॥ मित्रोजनान्यातयतिप्रजान न्मित्रोदाधारपृथिवीमुतद्यां ॥ मित्रःकृष्टीरनिमिषाभिचष्टेसत्यायहव्यंघृतवद्विधेम ॥ प्रसमित्रमतीअस्तुप्रयस्वान्यस्तआदित्य शिक्षतिव्रतेन ॥ नहन्यतेनजीयतेत्वोतोनैनमंहोअश्नोत्यंतितोनदूरात् ॥ यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं ॥ मिनीमसिद्य विद्यवि ॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि ॥ अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः ॥ कित वासोयद्रिरिपुर्नदीवियद्गंधासत्यमुतयन्नविद्म ॥ सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः ॥ याःसदासर्वभूतानिस्थाव रांणिचरांणिच ॥ सायंप्रातर्नमस्यंतिसामासंध्याभिरक्षतु नमः प्राच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोदक्षि णायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमःप्रतीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमउदीच्यैदि शेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमऊर्ध्वायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोधरायैदिशेयाश्चदे वताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमोवांतरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोगंगायमुनयोर्मध्येयेवसंति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Funding by MoE-IKS

तेमेप्रसन्नात्मानश्चिरंजीवितंवर्धयंतिनमोगंगायैमुनायैमुनिभ्यश्चनमः ॥ अवांतरदिशाभ्यान्न
मः ॥ सश्न्नवंतुदिशोमयिसमागच्छंतुसूनृताः ॥ सर्वेकामाअभियंतुनःप्रियाअभिश्नवंतुनःप्रियाअभिवादये ॥ (अत्रस्वस्वप्रवर
गोत्रोच्चारःकार्यः) त्रिप्रवरान्वितामुकगोत्रोत्पन्नोहंयजुर्वेदस्यतैत्तिरीयशाखांतर्गताहिरण्यकेशीशाखाध्यायी ॥ अमुकदेवश
र्माहं भोगुरोअभिवादयामि ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ जगद्धितायकृष्णायगोविंदायनमोनमोगोविंदायन
मोनमः ॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं ॥ स्तुतोमयावरदावेदमाता
प्रचोदयंतीपवनेद्विजाता ॥ आयुःपृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्वाप्रजातुंब्रह्मलोकं ॥ घृणिःसूर्यआदित्योनप्रभावात्यक्षरं ॥
मधुक्षरंतितद्रसं ॥ सत्यंवैतद्रसमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ ब्रह्मलोकायनमः ॥ रुद्रलोकायनमः ॥ संध्यायैनमः ॥
विद्यायैनमः ॥ सरस्वत्यैनमः ॥ वेदायनमः ॥ वेदपुरुषायनमः ॥ इष्टदेवताभ्योनमः ॥ कुलदेवताभ्योनमः ॥ स्थानदेवता
भ्योनमः ॥ वास्तुदेवताभ्योनमः ॥ एतत्कर्मप्रधानदेवताभ्योनमः ॥ सर्वेभ्योदेवेभ्योनमः ॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः ॥
आकाशात्पतितंतोयंयथागच्छतिसागरं ॥ सर्वदेवनमस्कारःकेशवंप्रतिगच्छति ॥ केशवायनमः ॥ नारायणायनमः ॥ माध
वायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ मधुसू० त्रिवि० वाम० श्रीधरा० हृषीके० पद्मना० दामोदरा० संक० वासु०
प्रद्यु० अनि० पुरु० अधो० नार० अच्यु० जना० उपेंद्रा० हरये० श्रीकृष्णायनमः ॥ ॐ भूः ॐ भुवः ओश्सुवः ॐ महः
ॐ जनः ॐ तपः ओश्सत्यं ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्म
भूर्भुवःसुवरोम् ॥ अनेनप्रातःसंध्योपासनाख्येनकर्मणाभगवान्श्रीपरमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ वषट्तेविष्ण

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वासआकृणोमितन्मेजुषस्वाशिपिविष्टह्वयं ॥ वर्धंतुत्वासुष्टुतयोगिरोमेयूयंपातस्वस्तिभिःसदानः ॥ ॥ आदित्योवाएषएतन्मं डलंतपतितत्रताऋचस्तद्दचामंडलꣳसऋचांलोकोथयएषएतस्मिन्मंडलेचिंदीप्यतेतानिसामानिससाम्नांलोकोथयएषएतस्मिन्मंड लेचिंषिपुरुषस्तानियजूꣳषिसयजुषामंडलꣳसयजुषांलोकःसैषात्रय्येवविद्यातपतियएषोंतरादित्येहिरण्मयःपुरुषः ॥१४ ॥ आदि त्योवैतेजओजोबलंयशश्चक्षुःश्रोत्रमात्मामनोमन्युर्मनुर्मृत्युःसत्योमित्रोवायुराकाशःप्राणोलोकपालःकःकिंकंतत्सत्यमन्नममृतोंजी वोविश्वःकतमःस्वयंभुब्रह्मैतदमृतएषपुरुषएषभूतानामधिपतिर्ब्रह्मणःसायुज्यꣳसलोकतामाप्नोत्येतासामेवदेवतानाꣳसायुज्यꣳ सार्ष्टितांꣳसमानलोकतामाप्नोतियएवंवेदेत्युपनिषत् ॥ १५ ॥ उप० ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १८ ॥ औपासनकालः ॥

दक्षः ॥ संध्याकर्मावसानेतुस्वयंहोमोविधीयते ॥ अशक्तौसएवाह ॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः (विट्पति र्जामाता) ॥ एतैरपिहुतंयत्स्यात्तद्धुतंस्वयमेवतु ॥ असमक्षंतुदंपत्योर्होतव्यंनर्त्विगादिना ॥ द्वयोरप्यसमक्षंतुभवेद्धुतमनर्थकं ॥ प्रातर्होमकालमाहमनुः ॥ उदितेनुदितेचैवसमयाध्युषितेतथा ॥ सायंहोमकालमहाकात्यायनः ॥ यावत्सम्यङ्नभाव्यंतेनभस्यृ क्षाणिसर्वतः ॥ लोहितत्वंतुनापैतितावत्सायंतुहूयते ॥ इत्याद्युक्तकालेऔपासनहोमोब्रह्मचारिणोऽग्निकार्यप्रयोगश्चात्रापेक्षितः परंतुसोऽग्रेसंस्कारप्रकरणेविवाहोपनयनादिप्रयोगोत्तरंयथाक्रमंसंगृह्यतएवेतिनात्रविन्यस्तः ॥

॥ १९ ॥ द्वादशनमस्काराः ॥

श्रीः ॥ अद्यपूर्वोच्चरितवर्तमानएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीसूर्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Funding by MoE-IKS Trust Foundation, Delhi and eGangotri

नारायणप्रीत्यर्थद्वादशनमस्काराख्यंकर्मकरिष्ये ॥ सवितृसूर्यनारायणःसरसिजासनसंनिविष्टः ॥
केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ एकचक्रोरथोयस्यदिव्यःकनकभूषणः ॥ समेभवतुसुप्रीतः
पद्महस्तोदिवाकरः ॥ ॐ मित्रायनमः ॥ ॐ रवयेनमः ॥ ॐ सूर्यायनमः ॥ ॐ भानवेनमः ॥ ॐ खगायनमः ॥ ॐ पूष्णे
नमः ॥ ॐ हिरण्यगर्भायनमः ॥ ॐ मरीचयेनमः ॥ ॐ आदित्यायनमः ॥ ॐ सवित्रेनमः ॥ ॐ अर्कायनमः ॥ ॐ भास्क
रायनमः ॥ मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्योनमः ॥ विनतातनयोदेवःकर्मसाक्षीसुरेश्वरः ॥
सप्ताश्वःसप्तरज्जुश्चअरुणोमेप्रसीदतु ॥ अरुणायनमः ॥ आदित्यस्यनमस्कारंयेकुर्वंतिदिनेदिने ॥ जन्मांतरसहस्रेषुदारिद्र्यंनोप
जायते ॥ अनेनद्वादशनमस्काराख्येनकर्मणाभगवान्सवितृसूर्यनारायणःप्रीयतांनमम ॥ अकालमृत्युहरणंसर्वव्याधिविना
शनं ॥ सूर्यपादोदकंतीर्थंजठरेधारयाम्यहं ॥ इतिद्वादशनमस्काराः ॥ ॥ छ ॥ ॥ छ ॥

॥ २० ॥ तृचाकल्पनमस्काराः ॥

श्रीः ॥ आचम्यप्राणानायम्यअद्येत्यादिदेशकालावुत्कीर्त्यश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीसवितृसूर्यनारायणप्रीत्यर्थंचतृचा
कल्पविधिनानमस्काराख्यंकर्मकरिष्ये ॥ (पात्रेजलंगृहीत्वातन्मध्येगंधाक्षतपुष्पाणिक्षिप्त्वा) ॥ ध्येयःसदासवितृमंडलमध्यव
र्तीनारायणःसरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंकचक्रः ॥ इतिध्यात्वा ॥ ॐ ह्रां
उद्यन्नद्यमित्रमहः ह्रां ॐ मित्रायनमः ॥ ॐ ह्रीं आरोहन्नुत्तरांदिवम् ह्रीं ॐ रवयेनमः ॥ ॐ ह्रूं हृद्रोगंममसूर्य ह्रूं ॐ सूर्यायनमः ॥
ॐ ह्रैं हरिमाणंचनाशय ह्रैं ॐ भानवेनमः ॥ ॐ ह्रौं शुकेषुमेहरिमाणम् ह्रौं ॐ खगायनमः ॥ ॐ ह्रः रोपणाकांसुदध्मसि ह्रः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ पूष्णेनमः ॥ ॐ ह्रां अथोहारिद्रवेषुमे ह्रां ॐ हिरण्यगर्भायनमः ॥ ॐ ह्रीं हरिमाणंनिदधमसि ह्रीं ॐ मरीचयेनमः ॥ ॐ ह्रूं उदगादयमादित्यः ह्रूं ॐ आदित्यायनमः ॥ ॐ ह्रैं विश्वेनसहसासह ह्रैं ॐ सवित्रेनमः ॥ ॐ ह्रौं द्विषंतंमह्यंरंधयंन् ह्रौं ॐ अर्कायनमः ॥ ॐ ह्रः मोअहंद्विषतेरधम् ह्रः ॐ भास्करायनमः ॥ ॐ ह्रांह्रीं उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवं ह्रांह्रीं ॐ मित्रविभ्यांनमः ॥ ॐ ह्रूंह्रैं हृद्रोगंममसूर्यहरिमाणंचनाशय ह्रूंह्रैं ॐ सूर्यभानुभ्यांनमः ॥ ॐ ह्रौंह्रः शुकेषुमेहरिमाणंरोपणाकासुदधमसि ह्रौंह्रः ॐ खगपूषभ्यांनमः ॥ ॐ ह्रांह्रीं अथोहारिद्रवेषुमेहरिमाणंनिदधमसि ह्रांह्रीं ॐ हिरण्यगर्भमरीचिभ्यांनमः ॥ ॐ ह्रूंह्रैं उदगादयमादित्योविश्वेनसहसासह ह्रूंह्रैं ॐ आदित्यसवितृभ्यांनमः ॥ ॐ ह्रौंह्रः द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधं ह्रौंह्रः ॐ अर्कभास्कराभ्यांनमः ॥ ॐ ह्रांह्रींह्रूंह्रैं उद्यन्नद्य० दिवं हृद्रो० नाशय ह्रांह्रींह्रूंह्रैं ॐ मित्रविसूर्यभानुभ्यो० ॥ ॐ ह्रौंह्रःह्रांह्रीं शुके० सुदधमसि ॥ अथोहा० निदधमसि ह्रौंह्रःह्रांह्रीं ॐ खगपूषहिरण्यगर्भमरीचिभ्यो० ॥ ॐ ह्रूंह्रैंह्रौंह्रः उदगाद्य० सह ॥ द्विषंतं० रधं ह्रूंह्रैंह्रौंह्रः ॐ आदित्यसवित्रर्कभास्करेभ्योनमः ॥ ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः ह्रांह्रींह्रूंह्रैंह्रौंह्रः उद्यन्नद्य० द्विषंतंमह्यंरंधयन्मोअहं द्विषतेरधं ह्रांह्रींह्रूंह्रैंह्रौंह्रः ह्रांह्रींह्रूंह्रैंह्रौंह्रः ॐ मित्रविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्योनमः ॥ इतित्रिः ॥ विनतातनयोदेवइत्यरुणंप्रणमेत् ॥ आदित्यस्यनमस्कारमित्यादिपूर्वत् ॥ अनेनतृचाकल्पनमस्काराख्येनकर्मणाभगवान्श्रीसवितृसूर्यनारायणःप्रीयतां ॥ इतितृचाकल्पनमस्काराः ॥ तृचाकल्पपद्धतिरग्रेवक्ष्यते ॥ ॥ छ ॥ ॥ छ ॥

॥ २१ ॥ नित्यदानम् ॥

श्रीः ॥ यत्किंचिदपिनित्यंदानमावश्यकं ॥ एकस्मिन्नप्यतिक्रांतेदिनेदानविवर्जिते ॥ दस्युभिर्मुषितस्येवयुक्तमाक्रंदितुंभृशं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात्सर्वैरपिस्वस्वविभवानुसारेणनित्यंधनंधान्यंदेयं ॥ अतएवतुरीयपक्षादेकमपिप्रत्यहंदेयं ॥ ततोगोब्राह्मणादिमंगलंदर्शन
कार्यं ॥ इत्यष्टधाविभक्तदिनस्यप्रथमभागकृत्यम् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २२ ॥ द्विनद्वितीयभागकृत्यं ॥

द्वितीयभागेवेदशास्त्राद्यभ्यासः ॥ पठेदध्यापयेद्वेदान्जपेच्चैवविचारयेत् ॥ अवेक्षेतचशास्त्राणिधर्मादीनिद्विजोत्तमः ॥ देवार्च
नमपिप्रातर्होमोत्तरंवाचतुर्थभागेब्रह्मयज्ञोत्तरंवाकार्यं ॥ देवार्चनंप्रकर्तव्यंत्रिकालेपियथाक्रमं ॥ अशक्तौविस्तरात्प्रातर्मध्याह्ने
गंधमादितः ॥ सायंनीराजनंकुर्यात्त्रिकालेतुलसीदलं ॥ यथासंध्यातथापूजात्रिकालेमोक्षदास्मृता ॥ अथव्यावहारिकःश्रुति
पौराणमंत्रसंवलितःपूजाप्रयोगोग्रेलिख्यते ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २३ ॥ देवपूजाविचारः ॥

श्रीः ॥ कूर्मपुराणे ॥ ब्रह्माणंशंकरंसूर्यंतथैवमधुसूदनं ॥ अन्यांश्चाभिमतान्देवान्भक्त्यात्वक्रोधनोनरः ॥ स्वमंत्रैरर्चयेन्नित्यं
पत्रैःपुष्पैस्तथांबुभिः ॥ पौरुषेणचसूक्तेनततोविष्णुंसमर्चयेत् ॥ पंचायतनेबोपदेवः ॥ शंभौमध्यगतेहरीनहरभूदेव्यो हरौशंकरे
भास्येनागसुता रवौहरगणेशाजांबिकाःस्थापिताः ॥ देव्यांविष्णुहरैकदंतरवयो लंबोदरेजेश्वरेनार्याः शंकरभागतोऽतिसुखदाव्य
स्तास्तुतेहानिदाः ॥ अत्रपंचानामप्येकस्यावाहनादिनमस्कारांतंपूजाकांडंकृत्वानंतरमितरेषामितिकांडानुसमयेनअथवासर्वेषा
मप्यावाहनाद्युपचाराःसममेवेतिपदार्थानुसमयेनवापूजनंकार्यं ॥ अत्रोत्तरपक्षएवज्यायः॥ तत्राप्यावाहनादाविष्टदेवतायामहावि
ष्णवेइत्यादिचतुर्थ्याऊहः पंचायतनपक्षेश्रीमहाविष्णवेशिवविनायकसूर्यशक्तिभ्यश्चेत्येवंयथोपास्यमुच्चारःकार्यः नैवेद्यादौपार्थ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

क्याभावेयथांशतइतिवदेत् ॥ पूजास्थानानि ॥ अप्स्वग्नौहृदयेसूर्येस्थंडिलेप्रतिमासुच ॥ षट्स्वेतेषुहरेःसम्यगर्चनंमुनिभिःस्मृतं ॥ कामासक्तोथवाक्रुद्धःशालग्रामशिलार्चनात् ॥ भक्त्यावायदिवाभक्त्याकलौमुक्तिमवाप्नुयात् ॥ शालग्रामशिलायास्तुप्रतिष्ठानैव विद्यते ॥ महापूजांतुकृत्वादौपूजयेत्तांततोबुधः ॥ बाणलिंगानिराजेंद्रख्यातानिभुवनत्रये ॥ नप्रतिष्ठानमस्कारस्तेषामावाहनं तथा ॥ गृहेलिंगद्वयंनार्च्यंशालग्रामद्वयंतथा ॥ द्वेचक्रेद्वारकायास्तुनार्च्येसूर्यद्वयंतथा ॥ शक्तित्रयंत्रिविघ्नेशंद्वौशंखौनार्चये त्सुधीः ॥ शालग्रामाःसमाःपूज्याःसमेषुद्वितयंनहि ॥ विषमानैवपूज्यंतेविषमेष्वेकएवहि ॥ नार्च्यागृहेऽश्मजामूर्तिश्चतुरंगुलतो धिका ॥ नवितस्त्यधिकाधातुसंभवाश्रेयइच्छता ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २४ ॥ शालग्रामशिलापरीक्षा ॥

श्रीः ॥ विष्णुरहस्ये ॥ गंडकीसरितांपुण्याचक्रतीर्थंचतत्रतु ॥ शालग्रामाभिधंक्षेत्रंतत्रतेषांसमुद्भवः ॥ द्वारदेशेसमेचक्रेदृश्येते नांतरीयके ॥ वासुदेवःसविज्ञेयःशुक्लाभश्चातिशोभनः ॥ द्वेचक्रेएवसंलग्नेपूर्वभागेतुपुष्कलः ॥ संकर्षणःसविज्ञेयोरक्ताभश्चैव सर्वतः ॥ प्रद्युम्नःसूक्ष्मचक्रस्तुश्यामवर्णस्तथैवच ॥ सुशिरःश्छिद्रबहुलोदीर्घाकारःसुशोभनः ॥ अनिरुद्धश्चनीलाभोवर्तुलश्चा तिशोभनः ॥ अतसीपुष्पसंकाशोबिंदुनापरिशोभितः ॥ परितोवर्तुलश्चैववामनःपरिकीर्तितः ॥ बिंदुत्रयसमायुक्तशंखचक्रा न्वितोमुखे ॥ तत्तल्लक्षणसंयुक्तोधनुर्वलयपंचकः ॥ दीर्घदक्षिणक्षामास्योमत्स्याकृतिसमीपगः ॥ कूर्ममूर्तिर्गर्भवक्रोदुर्लभःसर्व कामदः ॥ वनमालांकिताश्यामावर्तुलाचातिशोभना ॥ श्रीवत्सकौस्तुभाभ्यांचबिंदुनापरिशोभिता ॥ साचैवंदेवदेवस्यपूजनी यामहीक्षिता ॥ वराहशक्तिलिंगस्तुचक्रेचविषमेस्थिते ॥ इंद्रनीलनिभःस्थूलस्त्रिरेखालांछितःशुभः ॥ कपिलोनारसिंहस्तुबहुच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

क्रस्तथोन्नतः ॥ वामपार्श्वेस्थितेचक्रेकृष्णवर्णेसविंदुके ॥ लक्ष्मीनृसिंहोविख्यातोभुक्तिमुक्तिप्रदायकः ॥ पारिजातध्वजोवज्रोव
र्तुलःस्यात्सुशोभनः ॥ पुरुषोत्तमःसविज्ञेयःसर्वसौभाग्यदायकः ॥ रेखाद्वितयसंयुक्तःपद्मचिह्नितएवच ॥ श्यामोनारायणोदेवो
नाभिचक्रस्तथोन्नतः ॥ ध्वजवज्रांकुशोपेतश्चतुश्चक्रश्चवर्तुलः ॥ गदाकृतिस्तथारेखातल्लक्ष्मीमध्यदेशतः ॥ लक्ष्मीनारायणोदेवो
ह्यभीष्टफलदःशुभः ॥ चतुश्चक्रःसूक्ष्मरंध्रोवनमालांकितोदरः ॥ लक्ष्मीनारायणःप्रोक्तोभुक्तिमुक्तिफलप्रदः ॥ अनंतचक्रैर्बहुभि
श्चिह्नैरप्युपलक्षितः ॥ अनंतःसतुविज्ञेयःसर्वपूजाफलप्रदः ॥ नानावर्णोह्यनंतःस्यान्नागभोगेनचिह्नितः ॥ कृष्णवर्गस्तथाविष्णुः
स्थूलचक्रःसुशोभनः ॥ गदाकृतिस्तथारेखादृश्यतेमध्यदेशतः ॥ श्रीधरस्तुतथादेवश्चिह्नितोवनमालया ॥ कदंबमुकुलाकारः
सर्वसिद्धिफलप्रदः ॥ त्रिविक्रमोमहादेवःश्यामवर्णोमहाद्युतिः ॥ वामपार्श्वेतथाचक्रेरेखाचैवतुदक्षिणे ॥ मधुसूदनःसविज्ञेय
एकचक्रोमहाद्युतिः ॥ स्निग्धवर्णोव्रणश्चैववर्तुलश्चसुशोभनः ॥ श्यामलश्चमहासूक्ष्मोदधिबिंदुसमन्वितः ॥ दधिवामनइत्युक्तः
पशुपुत्रधनप्रदः ॥ वामपार्श्वेतथाचक्रेरेखाचैवतुदक्षिणे ॥ पीतवर्णोधनुःपर्शुलांगलांकितशोभितः ॥ रामेतराश्चरामश्चसर्वमृत्यु
हरःशुभः ॥ परमेष्ठीतुशुक्लाभःपद्मचक्रसमन्वितः ॥ वर्तुलस्तुतथापीतःपृष्ठेतुसुखिरःस्मृतः ॥ हयग्रीवांकुशाकारोरेखापद्मसमी
पगः ॥ बहुरेखासमाकीर्णःपक्षेनीलमथापिवा ॥ कृष्णवर्णःसमाख्यातोमहासारस्वतप्रदः ॥ चतस्रोयत्रदृश्यंतेरेखाःपार्श्वसमी
पगाः ॥ द्वेचक्रेमध्यदेशेतुसाशिलातुचतुर्मुखी ॥ कूर्मचक्रेमहाभागेश्वेताभागोक्षुरान्विता ॥ शिवनाभिरितिख्याताभुक्तिमुक्ति
फलप्रदा ॥ चक्रंतुकेवलंपत्रंपंकजेनसमन्वितं ॥ लांछनंवनमालायाःश्रियायुक्तःस्थितोहरिः ॥ एकंचक्रंशिरोदेशेनानावर्णंमुखे
तथा ॥ सुदर्शनमितिज्ञेयंसर्वपापप्रणाशनं ॥ चतुश्चक्रःश्यामवर्णोभवेद्देवोजनार्दनः ॥ वैकुंठोमणिवर्णाभश्चक्रमेकंतथांबुजं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्वारोपरितथारेखापूजयेत्तंसुखप्रदं ॥ गोविंदःपुंडरीकाक्षःकृष्णवर्णोमहाद्युतिः ॥ दक्षिणेतुगदाचक्रेवामेपर्वतलांछनं ॥ अर्ध चंद्राकृतिर्देवोहृषीकेशःसउच्यते ॥ इतिशालिग्रामशिलापरीक्षा ॥ ॥ छ ॥ ॥ छ ॥

॥ २५ ॥ देवपूजायांपुष्पादिनिर्णयः ॥

श्रीः ॥ पुष्पैररण्यसंभूतैःपत्रैर्वागिरिसंभवैः ॥ अपर्युषितनिश्छिद्रैःप्रोक्षितैर्जंतुवर्जितैः ॥ आत्मारामोऽब्जवैर्वापिभक्त्यासंपूजयेत्सुरान् ॥ कृमिकीटावपन्नानिशीर्णपर्युषितानिच ॥ स्वयंपतितपुष्पाणित्यजेदुपहतानिच ॥ उपहतानिमलादिभिः ॥ मुकुलैर्नार्चयेद्देवमपक्वंननिवेदयेत् ॥ यत्फलंकृमिविद्धंचप्रयत्नात्तद्विवर्जयेत् ॥ प्रत्येकमुक्तपुष्पेणदशसौवर्णिंकंफलं ॥ स्रजापिनृपशार्दूलतदेवद्विगुणंभवेत् ॥ समित्पुष्पकुशादीनिब्राह्मणःस्वयमाहरेत् ॥ शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्पतत्यधः ॥ लक्षार्चनादौ नायंनिषेधः ॥ समित्पुष्पकुशादीनिवहंतंनाभिवादयेत् ॥ तद्धारीचैवनान्यान्हिनिर्माल्यंतद्धवेत्तयोः ॥ देवोपरिधृतंयच्चवामहस्तेधृतंचयत् ॥ देवतास्तन्नगृह्णंतिपुष्पंनिर्माल्यतांगतमिति ॥ याचितैःपत्रपुष्पाद्यैर्यःकरोतिममार्चनमितिवाराहाद्याचितैर्न पूजयेत् ॥ नित्यपूजार्थंपरोपवनादेरपिपुष्पादिग्रहेचौर्यदोषोनेतिसिंधौ॥ पर्युषितविचारःभविष्ये ॥ ग्रहरंतिष्ठतेजातीकरवीरमहर्निशं ॥ तुलस्यांबिल्वपत्रेचजलजेषुचसर्वशः ॥ नपर्युषितदोषोस्तिमालाकारगृहेषुच ॥ बिल्वादेरपर्युषितत्वदिनसंख्या–बिल्वः ३० अपामार्गः ३ जाती १ तुलसी ६ शमी ६ शतावरी ११ केतकी ४ भृंगराजः ९ दूर्वा ८ मंदारः १ पद्मं १ नागकेसरः २ दर्भाः ३० अगस्त्यः ३ तिलः १ मल्लिका ४ चंपकः ९ करवीरं ८ एतेषामेतद्दिनोत्तरंपर्युषितत्वं ॥ विष्णोःप्रियाणि– मालतीजातीकेतकीमल्लिकाशोकचंपकपुंनागबकुलोत्पलकुंदकरवीरपाटलातगरपुष्पाण्यन्यानिचसुरभीणि ॥ शिवस्यप्रियाणि ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अर्ककरवीरबिल्वबकुलधत्तूरपाटलामंदारापामार्गजातीचंपकाशोकतगरनागकेसरपुन्नागजपामल्लिकासहकारकुसुंभपुष्पाणि ॥ सू
र्यगणाधिपयोररक्तजपादीन्यन्यानिसुरभीणिदूर्वाश्चेति ॥ विशेषोन्यत्रालोचनीयः ॥ ॥ छ ॥ ॥ छ ॥

॥ २६ ॥ देवपूजाप्रारंभः ॥

श्रीगणेशायनमः ॥ उदयात्पूर्वंनिर्माल्यमपसार्ययथाकालेपूजाकार्या ॥ तत्रप्रथमं ॥ ॐ येभ्योमातामधुमत्पिन्वतेपयःपीयूषद्यौ
दितिरद्रिबर्हाः ॥ उक्थशुष्मान्वृषभरान्त्स्वप्नसस्ताँऽआदित्याँऽअनुमदास्वस्तये ॥ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेमनमसाहु
विभिः ॥ बृहस्पतेसुप्रजावीरवंतोवयंस्यामपतयोरयीणां ॥ इतिमंत्रौपठन्घंटानादंकृत्वाआचम्य ॥ ॐ केशवायनमः ॥ नाराय
णायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ मधुसूदनायनमः ॥ त्रिविक्रमायनमः ॥ वामनायनमः ॥ श्री
धरायनमः ॥ हृषीकेशायनमः ॥ पद्मनाभायनमः ॥ दामोदरायनमः ॥ संकर्षणायनमः ॥ वासुदेवायनमः ॥ प्रद्युम्नायनमः ॥
अनिरुद्धायनमः ॥ पुरुषोत्तमायनमः ॥ अधोक्षजायनमः ॥ नारसिंहायनमः ॥ अच्युतायनमः ॥ जनार्दनायनमः ॥ उपें
द्रायनमः ॥ हरयेनमः ॥ श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳसुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओꣳसत्यं ॥
ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरों ॥ श्रीमन्महागणा
धिपतयेनमः ॥ इष्टदेवताभ्योनमः ॥ कुलदेवताभ्यो० ॥ ग्रामदेवताभ्यो० ॥ वास्तुदेवताभ्यो० ॥ लक्ष्मीनारायणाभ्यां० ॥
उमामहेश्वराभ्यां० ॥ शचीपुरंदराभ्यां० ॥ मातापितृभ्यांनमः ॥ सर्वेभ्योदेवेभ्योनमः ॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः ॥ अ
विघ्नमस्तु ॥ सुमुखश्चैकदंतश्चकपिलोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्नराजोगणाधिपः ॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलं ॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥ तदेवलग्नंसुदिनं तदेवताराबलंचंद्रबलंतदेव ॥ विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि ॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः ॥ येषा मिंदीवरश्यामोहृदयस्थोजनार्दनः ॥ विनायकंगुरुंभानुंब्रह्मविष्णुमहेश्वरान् ॥ सरस्वतींप्रणौम्यादौसर्वकार्यार्थसिद्धये ॥ अभी प्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ सर्वेष्वारब्धकार्येषुत्रयस्त्रिभुवनेश्वराः ॥ देवादिशं तुनःसिद्धिंब्रह्मेशानजनार्दनाः ॥ श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणोद्वितीयेपरार्धेविष्णुपदेश्री श्वेतवाराहकल्पेवैवस्वतमन्वंतरेभरतवर्षेभरतखंडेकलियुगेकलिप्रथमचरणेजंबुद्वीपेभरतवर्षेदंडकारण्येदेशेगोदावर्यादक्षिणेतीरे कृष्णावेण्योरुत्तरेतीरेबौद्धावतारेरामक्षेत्रेरामरामाश्रमेशालिवाहनशकेअस्मिन्वर्तमानेअमुकनामसंवत्सरेअमुकायनेअमुकर्तौअ मुकमासेअमुकपक्षेअमुकतिथौअमुकवासरेऽमुकनक्षत्रेऽमुकस्थेचंद्रेऽमुकस्थेसूर्येऽमुकस्थेदेवगुरौशेषेषुग्रहेषुयथायथंराशिस्थान स्थितेषुसत्सुशुभनामयोगेशुभकरणएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममो पात्तदुरितक्षयद्वाराश्रीमहाविष्णुप्रीत्यर्थंयथामीलितोपचारद्रव्यैःपूजनमहंकरिष्ये ॥ पंचायतनपक्षेश्रीरुद्रविनायकसूर्यशक्तिपरि वृतश्रीमहाविष्णुपूजांकरिष्येइतिस्वेष्टपंचायतनोदेशेनसंकल्प्यतदंगत्वेनआसनविधिंपुरुषसूक्तादिन्यासान्कलशपूजनंशंखपूज नंघंटापूजनंचकरिष्ये ॥ पृथ्वीतिमंत्रस्यमेरुपृष्ठऋषिः कूर्मपृष्ठोदेवता सुतलंछंदः आसनेविनियोगः ॥ पृथ्वित्वयाधृतालोका

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

देवित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ ऊर्ध्वकेशीविरूपाक्षिमांसशोणितभोजने ॥ तिष्ठदेविशिखाबंधचामुडेह्यपराजिते ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामवरोधेनपूजाकर्मसमारभे ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ सहस्रशीर्षेतिषोडशर्चस्यसूक्तस्यनारायणऋषिःजगद्बीजपरमपुरुषोदेवताअंत्यात्रिष्टुप्न्यासेपूजनेविनियोगः ॥ ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ वामकरायनमः ॥ ॐ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ दक्षिणकरायनमः ॥ ॐ एतावानस्यमहिमातोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ वामपादायनमः ॥ ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ दक्षिणपादायनमः ॥ ॐ तस्माद्विराळजायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ वामजानवेनमः ॥ ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोऽअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ॥ दक्षिणजानवेनमः ॥ ॐ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाऽअयजंतसाध्याऋषयश्चये ॥ वामकट्यैनमः ॥ ॐ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं ॥ पशून्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ दक्षिणकट्यैनमः ॥ ॐ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ नाभ्यैनमः ॥ ॐ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ हृदयायनमः ॥ ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते ॥ कंठायनमः ॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ॥ वामभुजायनमः ॥ ॐ चंद्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जायत ॥ दक्षिणभुजायनमः ॥ ॐ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँऽअकल्पयन् ॥ मुखायनमः ॥ ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंपशुं ॥ नेत्राभ्यांनमः ॥ ॐ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ मूर्ध्नेनमः ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्याँशूद्रोअजायत ॥ हृदयायनमः ॥ चंद्रमामनसोजातःचक्षोः सूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ शिरसेस्वाहा ॥ नाभ्याआसीदंतरिक्षं शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकल्पयन् ॥ शिखायैवषट् ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधकृताः ॥ देवायद्यज्ञंतन्वाना ऽअबध्नन्पुरुषंपशुं ॥ कवचायहुं ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ अस्त्रायफट् ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ कुक्षौ तुसागराःसर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ अत्रगाय त्रीसावित्रीशांतिःपुष्टिकरीतथा ॥ आयांतुदेवपूजार्थंदुरितक्षयकारकाः ॥ गंगेचयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधुकावे रिजलेस्मिन्तसंनिधिंकुरु ॥ ॐ भूर्भुवःसुवःकलशायनमः ॥ सकलपूजार्थेगंधाक्षतपुष्पंसमर्पयामि ॥ धेनुमुद्रांप्रदर्श्य ॥ शंखा दौचंद्रदैवत्यंकुक्षौवरुणदेवता ॥ पृष्ठेप्रजापतिश्चैवअग्रेगंगासरस्वती ॥ त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ॥ नमितःसर्वदे वैश्चपांचजन्यनमोस्तुते ॥ पांचजन्यायविद्महेपावमानायधीमहि ॥ तन्नःशंखःप्रचोदयात् ॥ शंखदेवताभ्योनमःविलेपनार्थे चंदनंअलंकरणार्थेतुलसीपत्रंपूजार्थेपुष्पंस० ॥ कलशोदकेनशंखोदकेनपूजाद्रव्याणिप्रोक्ष्यआत्मानंप्रोक्षेत् ॥ अपवित्रःपवित्रो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ [illegible] ॥ [illegible]तुदेवानांगमनार्थंतुरक्षसां ॥
कुर्वेघंटारवंतत्रदेवताह्वानलांछनं ॥ घंटायैनमःसकलपूजार्थेगंधाक्षतपुष्पंसमर्पयामि ॥ घंटामुद्रांप्रदर्श्य ॥ घंटानादंकुर्यात् ॥

उत्तरदिशा.	विष्णुपंचायतनं		शिवपंचायतनं		सूर्यपंचायतनं		देवीपंचायतनं		गणेशपंचायतनं		दक्षिणदिशा.
	शंकरः	गणेशः	विष्णुः	सूर्यः	शंकरः	गणेशः	विष्णुः	शंकरः	विष्णुः	शंकरः	
	२	३	२	३	२	३	२	३	२	३	
	विष्णुः		शंकरः		सूर्यः		देवी		गणेशः		
	१		१		१		१		१		
	देवी	सूर्यः	देवी	गणेशः	देवी	विष्णुः	सूर्यः	गणेशः	देवी	सूर्यः	
	५	४	५	४	५	४	५	४	५	४	

अथध्यानं ॥ शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभांगं ॥ लक्ष्मीकांतंकमलनयनंयोगिभिर्ध्या
नगम्यंवंदेविष्णुंभवभयहरंसर्वलोकैकनाथं ॥ १ ॥ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशु
मृगवराभीतिहस्तंप्रसन्नं ॥ पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं ॥
॥ २ ॥ एकदंतंशूर्पकर्णंगचवक्त्रंचतुर्भुजं ॥ पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकं ॥ ३ ॥ ध्येयःसदासवितृमंडलमध्यवर्ती

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नारायणःसरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ ४ ॥ नित्यंपद्मासनासी
नांसुप्रसन्नांचतुर्भुजां ॥ वरदांविश्वजननींदेवींध्यायेऽखिलेष्टदां ॥ ५ ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताःध्यायामि ॥
ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ आवाहयामिभक्त्यात्वांशिबिकादिहयैर्गजैः ॥
पूजार्थमंडपेनानामणिहाटकनिर्मिते ॥ १ ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्योनमःआवाहनार्थेपुष्पांजलिंसमर्पयामि ॥
पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ आसनंस्वर्णरत्नाढ्यंमृदुतूलपरिच्छदं ॥ ददामिभक्त्या
स्थित्वास्मिन्नुपचारान्गृहाणभोः ॥ २ ॥ श्रीमहाविष्णु० ॥ आसनार्थेतुलसीपत्रं० ॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः ॥
पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ पाद्यंस्वीकुरुमद्दत्तंचरणांबुरुहद्वये ॥ युक्तंसुगंधपुष्पाब्जमणिहेमनवांकुरैः ॥ ३ ॥
श्रीमहाविष्णु० ॥ पाद्यंस० ॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ अर्घ्यं
हस्तद्वयेदत्तंचंदनोशीरवासितं ॥ यवदूर्वाकुरफलंपुष्परत्नान्वितंमुदा ॥ ४ ॥ श्रीमहाविष्णु० ॥ अर्घ्यं० ॥ तस्माद्विराळजायत
विराजोअधिपूरुषः ॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ आचम्यतांतोयमिदंवस्त्रपूतंसुगंधितं ॥ आनीतंयमुनागंगाती
र्थेभ्योतिप्रयत्नतः ॥ ५ ॥ श्रीमहाविष्णु० ॥ आचमनीयं० ॥ ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं
ग्रीष्मइध्मःशरद्धविः ॥ गंगासरस्वतीरेवापयोष्णीयमुनाजलैः ॥ स्नापितोसिमयादेवतथाशांतिंप्रयच्छमे ॥ ६ ॥ श्रीमहावि

१ उद्वासावाहनेनस्तःस्थिरायामुद्भवार्चने । अस्थिरायांविकल्पःस्यात्स्थंडिलेचभवेत्त्रयं । यत्रावाहनविसर्जनयोर्निषेधस्तत्र । आवाहनंतत्रादद्या
त्पूर्वंपुष्पांजलिंहरेः । अंतेपुष्पांजलिंदद्यादंगसंपूर्तिहेतवे । मध्यमानामिकामध्येपुष्पंसंग्रहपूजयो

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्णु० ॥ स्नानं० आचमनीयंसम० ॥ मधुपकंगृहाणमकास्यसंपुटसंस्थितं ॥ मध्वाज्यदधिरूपत्वंविधिपूर्वकमार्पितं ॥ मधुपर्क
निवेदयामि ॥ मधुपर्कांतेआचमनीयं० ॥ अथपंचामृतस्नानं ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्य
संगथे ॥ दुग्धंकामदुघोत्पन्नंदेवानांप्रीतिकारकं ॥ स्नानार्थंतेमयानीतंगृहाणघटसंभृतं ॥ श्रीमहाविष्णुप्रमुख० ॥ पयःस्नानं० ॥
पयःस्नानांतेशुद्धोदकस्नानंस० ॥ शुद्धोदकस्नानांतेआचमनीयंसमर्प० ॥ सकलपूजार्थेगंधपुष्पंसमर्पयामि ॥ ॐ दधिक्राव्णो
अकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ॥ दधिस्नातुंददाम्येतदानीतंदधिसागरात् ॥ गृहा
णमसृणंस्वर्णघटस्थंचारुशीतलं ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्योनमः ॥ दधिस्नानंस० ॥ दधिस्नानांतेशुद्धोदकस्ना
नंसमर्पयामि ॥ शुद्धोदकस्नानांतेआचमनीयंसमर्पयामि ॥ सकलपूजार्थेगंधपुष्पंस० ॥ ॐ घृतंमिमिक्षिरेघृतमस्ययोनिर्घृतेश्रि
तोघृतमुवस्यधाम ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यं ॥ घृतंपितृमनुष्याणांदेवानांप्रीतिकारणं ॥ स्नातुंगृहा
णतत्कालंप्रतप्तनवनीतजं ॥ श्रीमहाविष्णुप्रमुख० ॥ घृतस्नानंस० ॥ शुद्धोदकस्नानंस० आचमनीयंस० ॥ सकलपूजार्थेगंध
पुष्पं० ॥ ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसिमधुमत्पार्थिवꣳरजः ॥ मधुद्यौर
स्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमाꣳअस्तुसूर्यः ॥ माध्वीर्गावोभवंतुनः ॥ मधुभ्रमरसंघुष्टंमधुपुष्परसोद्भवं ॥ भक्त्याम
याहृतंशुद्धंस्नानार्थंप्रतिगृह्यतां ॥ श्रीमहाविष्णुप्रमुख० ॥ मधुस्नानंस० ॥ शुद्धोदकस्नानंस० ॥ आचमनीयंस० ॥ सकलपू
जार्थेगंध० ॥ त्वेकतुमपिवृंजंतिविश्वेद्विर्यदेतेत्रिर्भवंत्यूमाः ॥ स्वादोःस्वादीयःस्वादुनासृजासमतंऊषुमधुमधुनाभियोधि ॥ श
र्करांगुडसंभूतांशुभ्रांमलनिवारिणीं ॥ तुभ्यंददामिस्नानार्थंस्वादुस्वादुतरामहं ॥ श्रीमहाविष्णुप्रमुखपं० ॥ शर्करास्नानंस० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शुद्धोदकस्नानंस० ॥ आचमनीयंस० ॥ सकलपूजार्थेगंधा० ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांता मिहोपह्वयेश्रियं ॥ कर्पूरैलासमायुक्तंसुगंधद्रव्यसंयुतं ॥ गंधोदकंमयादत्तंस्नानार्थप्रतिगृह्यतां ॥ श्रीमहाविष्णुप्रमुख० ॥ गंधोदकस्नानंस० ॥ शुद्धोदकस्नानंस० ॥ आचमनीयंस० ॥ सकलपूजार्थेगंध० ॥ श्रीमहाविष्णुप्रमुख० ॥ विलेपनार्थेचंदनं स० ॥ अलंकरणार्थेतुलसीपत्रंस० ॥ पूजार्थेपुष्पाणितुलसीपत्राणिबिल्वपत्राणिदूर्वाकुरांश्चऋतूद्भवानिपुष्पाणिसमर्पयामि ॥ श्रीमहाविष्णुप्रमुख० ॥ धूपंसमर्पयामि ॥ दीपंसमर्पयामि ॥ नैवेद्यार्थेपंचामृतनैवेद्यं ॥ (अथवापयःशर्करागुडं) समर्पयामि ॥ ॐ प्राणायस्वाहा ॥ ॐ अपानायस्वाहा ॥ ॐ व्यानायस्वाहा ॥ ॐ उदानायस्वाहा ॥ ॐ समानायस्वाहा ॥ ॐ ब्रह्मणेस्वाहा ॥ नैवेद्यमध्येपानीयं० ॥ ॐ प्राणायस्वाहा० ॥ ब्रह्मणेस्वाहा ॥ हस्तप्रक्षालनंस० ॥ मुखप्रक्षालनं० ॥ करोद्वर्तनार्थेचंदनं० ॥ मुखवासार्थेपूगीफलतांबूलंसुवर्णपुष्पदक्षिणांसमर्पयामि ॥ श्रीमहाविष्णुप्रमुखपंचा० प्रदक्षिणां० ॥ नमस्कारान्स० ॥ मंत्रपुष्पं स० ॥ अनेनयथाज्ञानेनकृतपूजनेनपूर्वाराधनेनश्रीमहाविष्णुःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तुउत्तरेनिर्माल्यंविसर्जयेत् ॥ अथाभिषेकः ॥ नमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशंगायचपशुपतयेचनमउग्रायचभीमायचनमोअग्रेवधायच दूरेवधायचनमोहंत्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारायनमःशंभवेचमयोभवेचनमःशंकरायचमयस्करायचनमः शिवायचशिवतरायचनमस्तीर्थ्यायचकूल्यायचनमःपार्यायचावार्यायचनमःप्रतरणायचोत्तरणायचनमआतार्यायचालाद्यायच

१ चंदनोशीरकर्पूरकुंकुमागरुवासितजलैरुद्रसुवर्णघर्मानुवाकमहापुरुषविद्यापुरुषसूक्तराजनसामभिरभिषेकः । स्नानेधूपेचदीपेचघंटादेर्नादमाचरेत् ॥ स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंतथा । प्रतिमापट्टयंत्राणांनित्यंस्नानंनकारयेत् । कारयेत्पर्वदिवसेयथामलनिवारणं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नमः॒शष्प्या॑यच॒फेन्या॑यच॒नमः॑सिक॒त्या॑यचप्रवा॒ह्या॑यच ॥ ८ ॥ शंच॑मे॒मयश्च॑मे॒प्रियं॑च॑मेनुका॒मश्च॑मे॒कामश्च॑मेसौमन॒सश्च॑मेभ॒द्रंच॑मे॒
श्रेय॑श्च॒मे॒वस्य॑श्च॒मे॒यश॑श्च॒मे॒भग॑श्च॒मे॒द्रवि॑णंचमेयं॒ताच॑मेध॒र्ताच॑मे॒क्षेम॑श्च॒मे॒धृति॑श्च॒मे॒विश्वं॑च॒मे॒मह॑श्च॒मेसं॒विच्च॑मे॒ज्ञात्रं॑च॒मे॒सूश्च॑मेप्र॒सूश्च॑
मे॒सीरं॑चमेल॒यश्च॑मऋ॒तंच॑मे॒मृतं॑चमेय॒क्ष्मंच॒मेना॑मयच्चमेजी॒वातु॑श्चमेदीर्घायु॒त्वंच॑मेनमि॒त्रंच॒मेभ॑यंचमेसु॒गंच॑मे॒शय॑नंचमेसू॒षाच॑मेसु॒
दिनं॑चमे ॥ ३ ॥ अतो॑दे॒वाअ॑वंतुनो॒यतो॒विष्णु॑र्विचक्र॒मे ॥ पृ॒थि॒व्याःस॒प्तधाम॑भिः ॥ इ॒दंविष्णु॒र्विच॑क्रमेत्रे॒धानिद॑धेप॒दं ॥ समू॑ढ
मस्यपाꣳसु॒रे ॥ त्रीणि॑प॒दाविच॑क्रमे॒विष्णु॑र्गो॒पाअदा॑भ्यः ॥ अतो॒धर्मा॑णिधा॒रयन् ॥ विष्णोः॒कर्मा॑णिपश्यत॒यतो॑व्र॒तानि॑पस्प॒शे ॥
इंद्र॑स्य॒युज्यः॒सखा॑ ॥ तद्विष्णोः॑पर॒मंप॒दंसदा॑पश्यंतिसू॒रयः॑ ॥ दि॒वी॑व॒चक्षु॒रात॑तं ॥ तद्विप्रा॑सोविप॒न्यवो॑जागृ॒वांसः॒समि॑धते ॥ वि
ष्णो॒र्यत्प॑र॒मंप॒दं ॥ दे॒वस्य॑त्वासवि॒तुःप्र॑स॒वे॑श्विनो॑र्बा॒हुभ्यां॑पू॒ष्णोहस्ता॑भ्याम॒ग्नेस्तेज॑सा॒सूर्य॑स्यवर्च॒सेंद्र॑स्येंद्रि॒येणा॒भिषि॑ंचामि ॥ बला
यश्रियैयशसेन्नाद्याय ॥ भूर्भुवः॒सुवः॑अमृताभिषेकोस्तुशांतिःपुष्टिस्तु॑ष्टिश्चा॒स्तु ॥ श्रीमहाविष्णुप्रमुख० अभिषेकस्नानंसमर्पया
मि ॥ अभिषेकस्नानांतेआचमनीयंसमर्पयामि ॥ तद॑स्तुमित्रावरुणा॒तद॑ग्ने॒शंयोर॒स्मभ्य॑मि॒दम॑स्तुश॒स्तं ॥ अशी॒महि॑गा॒धमु॒तप्र॑ति
ष्ठांनमो॑दि॒वेम॑ह॒तेसौभ॑गाय ॥ गृहावैप्रतिष्ठासूक्तंतत्प्रतिष्ठिततमयावाचाशंस्तव्यंतस्माद्यद्यपिदूरैवपशूँल्लभतेगृहानेवैनानाजिग
मिषतिगृहाहिपशूनांप्रतिष्ठाप्रतिष्ठा ॥ नर्य॑प्र॒जांमे॑गोपाय ॥ अ॒मृ॒त॒त्वाय॑जी॒वसे॑ ॥ जा॒तांज॑नि॒ष्यमा॑णांच ॥ अ॒मृते॑स॒त्ये
प्रति॑ष्ठितां ॥ सुप्रतिष्ठितमस्तु ॥ तंय॒ज्ञंब॒र्हिषि॒प्रौक्ष॒न्पुरु॑षंजा॒तम॑ग्र॒तः ॥ तेन॑दे॒वाअ॑यजंतसा॒ध्याऋष॑यश्च॒ये ॥ वस्त्रयुग्मंगृहाणेदंरत्न
किंकिणिकायुतं ॥ श्वेतंपीतंतथारक्तंनीलंचित्रंयथारुचि ॥ श्रीमहाविष्णुप्र० वस्त्रार्थेतुलसीपत्रंस० ॥७॥ तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॒संभृ॑

१ वस्त्रंनित्यंनूतनंदेयं । क्षालनेनैकस्यैववस्त्रस्यप्रतिदिनंदानेदोषोन । वस्त्रमभ्युक्षणाच्छुद्ध्येदपरंतुदिनेदिने ॥ अपरंपुष्पादि ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तंपृषदाज्यं ॥ पशून्तांश्चक्रेवायव्यानारण्यान्ग्राम्यांश्चये ॥ यज्ञसूत्रंत्रिवृत्सौत्रराजतंकांचनंनवं ॥ रत्नग्रंथियुतंशुद्धंमंत्रितंप्रतिगृह्यतां ॥ श्रीमहाविष्णुप्र० ॥ यज्ञोपवीतार्थेतुलसीपत्रंस० ॥ आचमनीयंस० ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं ॥ विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां ॥ श्रीमहाविष्णुप्र०॥ विलेपनार्थेचंदनंस० ॥ ९ ॥ अक्षताश्चसुरश्रेष्ठाःकुंकुमाक्ताःसुशोभिताः ॥ मयानिवेदिताभक्त्यागृहाणपरमेश्वर ॥ श्रीमहाविष्णुप्र० ॥ अलंकरणार्थेअक्षतान्तुलसी० ॥ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः ॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥ करवीरैर्जातिकुसुमैश्चंपकैर्बकुलैःशुभैः ॥ शतपत्रैश्चकह्लारैरर्चयेत्परमेश्वर ॥ १० ॥ श्रीमहाविष्णुप्र० ॥ पूजार्थेकालोद्भवपुष्पाणिस० ॥ अहिरिवभोगैःपर्येतिबाहुंज्याया हेतिंपरिबाधमानः ॥ हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांसंपारिपातुविश्वतः ॥ हरिद्रांकुंकुमंपरिमलद्रव्यंचसमर्पयामि ॥ श्रीमहाविष्णुप्रमुखपं० ॥ केशवादिचतुर्विंशतिनामभिःतुलसीपत्राणिसमर्पयामि ॥ त्रिदलंत्रिगुणाकारंत्रिनेत्रंचत्रियायुधं ॥ त्रिजन्मपापसंहारंएकबिल्वंशिवार्पणं ॥ दर्शनंबिल्ववृक्षस्यस्पर्शनंपापनाशनं ॥ अघोरपापसंहारंएकबिल्वंशिवार्पणं ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते ॥ धूरसिधूर्वधूर्वंतंधूर्वतंयोस्मान्धूर्वतितं ॥ धूर्वयंवयंधूर्वामि ॥ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां ॥ ११ ॥ श्रीमहाविष्णुप्र० ॥ धूपंस० ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ॥ उद्दीप्यस्वजातवेदोपघ्नंनिर्क्रतिंमम ॥ पशूंश्चमह्यमावहजीवनंचदिशोदिश ॥ आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह ॥ भ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्यादीपंप्रयच्छामिदेवायपरमात्मने ॥ त्राहिमांनिरयाद्घोरादीपोयंप्रतिगृह्यतां ॥ श्रीमहाविष्णुप्र० दीपंस० ॥ १२ ॥ च
मनसोजातश्चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु ॥ ईप्सितं
मेवरंदेहिपरत्रचपरांगतिं ॥ शर्कराखंडखाद्यानिदधिक्षीरघृतानिच ॥ आहारंभक्ष्यभोज्यंचनैवेद्यंप्रतिगृह्यतां ॥ श्रीमहाविष्णुप्र०
नैवेद्यार्थेपयःशर्करानैवेद्यंस० ॥ नैवेद्यात्पूर्वंआचमनीयंस० ॥ अमृतोपस्तरणमसि ॥ ॐ प्राणायस्वाहा ॥ ॐ अपानायस्वा
हा ॥ ॐ व्यानायस्वाहा ॥ ॐ उदानायस्वाहा ॥ ॐ समानायस्वाहा ॥ ॐ ब्रह्मणेस्वाहा ॥ नैवेद्यमध्येपानीयंस० ॥ १३ ॥
ॐ प्राणायस्वाहा ॥ ॐ अपा० ब्रह्मणेस्वाहा ॥ उत्तरापोशनंस० ॥ हस्तप्रक्षालनंस० ॥ मुखप्रक्षालनंस० ॥ करोद्वर्तनार्थेचं
दनंस० ॥ पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं ॥ कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां ॥ तांबूलंसमर्पयामि ॥ हिरण्यगर्भगर्भ
स्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ श्रीमहाविष्णुप्र० सुवर्णपुष्पदक्षिणांस० ॥ इलंफलंमयादे
वस्थापितंपुरतस्तव ॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ फलेनफलितंसर्वंत्रैलोक्यंसचराचरं ॥ तस्मात्फलप्रदानेनसफला
श्चमनोरथाः ॥ श्रीमहाविष्णुप्र० नारिकेलफलंकालोद्भवफलंसमर्पयामि ॥ कर्पूरनीराजनदीपंस० ॥ श्रियेजातःश्रियआनिरियाय
श्रियंवयोजरितृभ्योदधाति ॥ श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्यौ ॥ श्रियएवैनंतच्छ्रियामादधातिसंततमृ
चावषट्कृत्यंसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद ॥ याज्ययायजतिप्रत्तिर्वैयाज्यापुण्यैवलक्ष्मीःपुण्यामेवतल्लक्ष्मींसंभावयति
पुण्यांलक्ष्मींसंस्कुरुते ॥ कर्पूरगौरंकरुणावतारंसंसारसारंभुजगेंद्रहारं ॥ सदावसंतंहृदयारविंदेभवंभवानीसहितंनमामि ॥ आ
र्तिक्यंस० ॥ नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकल्पयन् ॥ अन्यथाशरणंनास्तित्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मेवशरणंमम ॥ तस्मात्कारुण्यभावेनरक्षरक्षपरमेश्वर॥ श्रीमहाविष्णुप्र०॥ नमस्कारान्स० ॥१४॥ ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं ॥ यानिकानिचपापानिजन्मांतरकृतानिच ॥ तानितानिविनश्यंतिप्रद क्षिणपदेपदे ॥ श्रीमहाविष्णुप्र० प्रदक्षिणाःस० ॥१५॥ यज्ञेनयज्ञमयजंतदेवस्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःस चंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ॐ राजाधिराजायप्रसह्यसाहिने ॥ नमोवयंवैश्रवणायकुर्महे ॥ समेकामान्कामकामायमह्यं ॥ कामेश्वरोवैश्रवणोददातु ॥ कुबेरायवैश्रवणाय॥ महाराजायनमः ॥ ॐ स्वस्ति साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यं महाराज्यमाधिपत्यमयंसमंतपर्यायीस्यात्सार्वभौमःसार्वायुषःआंतादापरार्द्धात्पृथिव्यैसमुद्रपर्यंतायाएकराळितिदप्येषश्लोको भिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे ॥ आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइति ॥ योवैतांब्रह्मणोवेद ॥ अमृतेनावृतां पुरीं ॥ तस्मैब्रह्मचब्रह्माच ॥ आयुःकीर्तिंप्रजांददुः ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्योनमः ॥ मंत्रपुष्पंसमर्पयामि ॥१६॥ गतंदुःखंगतंपापंगतंदारिद्र्यमेवच ॥ आगतासुखसंपत्तिःपुण्योहंतवदर्शनात् ॥ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परं ॥ प्रपन्नं पाहिमामीशभीतंमृत्युग्रहार्णवात् ॥ इतिवदन्नमेत् ॥ ततोऽग्निमावाह्यपुरुषसूक्तेनप्रत्यृचमाज्यंहुत्वातदसंभवेसूक्तावृत्तिद्वयंज ह्वापुनस्तेनैवसूक्तेनषोडशपुष्पाण्यर्पयित्वापुनःसूक्तंजपेत् ॥ तदनंतरंस्वोपदिष्टमूलमंत्रंयथाशक्तिजह्वा ॥ राजोपचारान्मनसाक ल्पितान्स्वीकुरुष्वभो ॥ छत्रचामरसंगीतव्यजनांदोलिकादिकान् ॥ समस्तराजोपचारार्थेगंधाक्षतपुष्पंस० ॥ आवाहनंनजानामिन जानामितवार्चनं ॥ पूजांचैवनजानामिक्षम्यतांपरमेश्वर ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर ॥ यत्पूजितंमयादेवपरिपूर्णंदत स्तुमे ॥ अनेनयथाशक्तिध्यानावाहनादिपूजनेनश्रीभगवान्परमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ बाणरावणचंडीशनं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दीभृंगीरिटादयः ॥ सदाशिवप्रसादेनसर्वेगृह्णंतुशांभवाः ॥ कलशशंखघंटाधूपदीपस्थावरदीपदेवताभ्योनमः ॥ सर्वोपचारा
धाक्षतपुष्पंस० ॥ शंखमध्येस्थितंतोयंभ्रामितंकेशवोपरि ॥ अंगलग्नंमनुष्याणांब्रह्महत्यांव्यपोहति ॥ अकालमृत्युहरणंसर्वव्याधि
विनाशनं ॥ विष्णुपादोदकंतीर्थंजठरेधारयाम्यहं ॥ विष्णुनिर्माल्यंदेवदत्तंभावयित्वाशिरसिधारयेत् ॥ अपराधसहस्राणिक्रियंते
हर्निशंमया ॥ दासोयमितिमांमत्वाक्षमस्वपरमेश्वर ॥ इतिप्रार्थना ॥ अनेनयथाज्ञानेनकृतपूजनेनभगवान्श्रीपरमेश्वरःप्री० ॥

॥ २७ ॥ पार्थिवलिंगपूजा ॥

श्रीः ॥ आचम्यप्राणानायम्यइष्टदेवतांगुर्वादींश्चनमस्कृत्यदेशकालोत्कीर्तनांतेमुककामनयापार्थिवलिंगपूजांकरिष्यइतिसंक
ल्पः ॥ पार्थिवप्रकारस्तु अरण्यतडागनदीतीरादिशुद्धस्थानमभिलक्ष्योक्तं ॥ गत्वास्थानंनमस्कुर्यान्मंत्रमेतमुदीरयेत् ॥ सर्वा
धारधरादेवत्वद्रूपामृत्तिकामिमां ॥ लिंगार्थंतुप्रगृह्णामिप्रसन्नोभवमेप्रभो ॥ इतिमृत्तिकाग्राह्या ॥ तत्परिमाणंतु ॥ यावत्स्यादा
त्मनःशक्तिर्मृदंतावत्समुद्धरेत् ॥ तदर्धंवाथतस्यार्धंतदर्धंवातदर्धकं ॥ एवंपलद्वयाभ्यूनंनतुकुर्यात्कदाचन ॥ इतिशक्त्यनुसारे
णमृदमानीयतदुपर्यार्द्रतार्थंजलंदत्वा ॐ सद्योजातमितिमंत्रेणमृदंहस्तेगृहीत्वा वामदेवायनमइतितस्यांजलंनिषिच्य अघोरेभ्य
इतिपीठंकृत्वा तत्पुरुषायेतिउपरिभागस्थमृदोपरितनपीठमध्यदेशेजलबुद्बुदमस्तकाकारमस्तकंसतिसंभवेपंचसूत्रलक्षणयुतमति
रमणीयंलिंगंकुर्यात् ॥ ततः ईशानःसर्वविद्यानामितिलिंगमस्तकेऽक्षतानर्पयित्वापूजापीठेबिल्वपत्रंनिधायतदुपरिलिंगंसंस्थाप
येत् ॥ ततः अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयःऋग्यजुःसामानिच्छंदांसिचिद्रूपिणीप्राणशक्तिर्देवताआंबीजंह्रींश
क्तिःक्रोंकीलकंअस्मिन्पार्थिवलिंगेसांबशिवप्राणप्रतिष्ठापनेवि०॥ ततोलिंगमस्तकोपरिपाणितलंकृत्वा ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हंसः सांबशिवप्राणाइहप्राणाः सांबशिवजीवइहस्थितः सांबशिवसर्वेंद्रियाणि सांबशिववाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागत्यसुखंचिरंतिष्ठंतुस्वाहाइतित्रिवारंपठेत्॥ततः कर्पूरगौरंकरुणावतारंसंसारसारंभुजगेंद्रहारं॥सदारमंतंहृदयारविंदेभवंभवा नीसहितंनमामि॥ इतिध्यात्वावक्ष्यमाणमूलमंत्रेणमानसोपचारैःसंपूज्यउत्तानहस्ताग्रेणलिंगंस्पृशन्अस्मिन्लिंगे ॐ भूपुरुषंसांब शिवमावाहयामि ॥ ॐ भुवःपुरुषंसांबशिवं० ॥ ॐ सुवःपुरुषंसांबशिवं० ॥ ॐ भूर्भुवःसुवःपुरुषंसांबशिवंआवाहयामीतिप ठित्वा ॥ चैतन्यविग्रहंदेवंस्थितंहृदयपंकजे ॥ स्वीयमार्गेणागतंतंचिंतयेत्कुसुमांजलौ ॥ इतिवचनात्मूलमंत्रंपठन्कुसुमांजला वागतंतंसंचिंत्य ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसानकं ॥ तावत्त्वंप्रीतिभावेनलिंगेस्मिन्संनिधिंकुरु ॥ इतिमंत्रेणांजलिस्थपु ष्पाणिलिंगमस्तकेस्थापयेत् ॥ ततः गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ॥ ज्ञेयोनमःशिवायेतिमंत्रःसर्वार्थसाधकः ॥ सर्वमंत्रा धिकश्चायंप्रणवाद्यःषडक्षरः ॥ इतिनंदिपुराणवचनात् ॐ नमःशिवायेतिमूलमंत्रांते ॐ सद्योजातंप्रपद्यामिसद्योजातायवैन मोनमः सांबशिवायासनंसमर्पयामीत्यासनंदद्यात् ॥ एवंपाद्याद्युपचारेष्वपिमूलमंत्रपाठानंतरंवक्ष्यमाणमंत्रांतरंपठित्वोपचा रान्दद्यात् ॥ यस्मिन्नुपचारेमंत्रांतरंनास्तितत्रमूलमंत्रएवेतिबोध्यं ॥ ॐ भवेभवेनातिभवेभवस्वमां इतिपाद्यं ॥ ॐ भवोद्भवा यनमः इत्यर्घ्यं ॥ ॐ वामदेवायनमः इत्याचमनीयं ॥ ॐ ज्येष्ठायनमः इत्यंतेआपोहिष्ठेतितिसृभिर्हिरण्यवर्णाःशुचयःपाव काइतिचतसृभिःसतिसामर्थ्येपवमानःसुवर्जनइत्यनुवाकेनरुद्राध्यायेनपुरुषसूक्तेनचाभिषिच्यआचमनंदत्वा ॥ ॐ भवंदेवंतर्प यामि शर्वंदेवंत० ईशानंदेवंत० पशुपतिंदेवंत० उग्रंदेवंत० रुद्रंदेवंत० भीमंदेवंत० महांतंदेवंत०८॥ भवस्यदेवस्यपत्नींत० शर्वस्यदेवस्यपत्नींत० ईशानस्यदेवस्यपत्नींत० पशुपतेर्देवस्यपत्नींत० उग्रस्यदेवस्यपत्नींत० रुद्रस्यदेवस्यपत्नींत० भीमस्यदे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ल्लींत० महतोदेवस्यपल्लींत० ८॥ इतितर्पयित्वा ॥ ॐ श्रष्ठायनमः इतिवस्त्रं० आचमनीयं० ॥ ॐ रुद्रायनमः इत्युपवीतं० आचम
नीयं० ॥ ॐ कालायनमः इतिगंधं ॥ ॐ कलविकरणायनमःइत्यक्षतान् ॥ ॐ बलविकरणायनमः इतिपुष्पाणि ॥ ॐ बला
यनमः इतिधूपं०॥ ॐ बलप्रमथनायनमः इतिदीपं० ॥ ॐ सर्वभूतदमनायनमः इतिनैवेद्यं० मूलेनफलं ॥ ॐ मनोन्मनाय
नमः इतितांवूलं ॥ मूलेननीराजनं ॥ ईशानःसर्वविद्यानां इतिमंत्रेणपुष्पांजलिंदत्वा ॥ ॐ शर्वायक्षितिमूर्तयेनमः इतिलिं
गस्यपूर्वदिग्भागेवेद्यां ॐ भवायजलमूर्तयेनमः इतीशान्यां ॐ रुद्रायतेजोमूर्तयेनमः इत्युत्तरस्यां ॐ उग्रायवायुमूर्तयेनमः
इतिवायव्यां ॐ भीमायआकाशमूर्तयेनमःइतिपश्चिमायां ॐ पशुपतयेयजमानमूर्तयेनमः इतिनैर्ऋत्यां ॐ महादेवायसोममू
र्तयेनमः इतिदक्षिणस्यां ॐ ईशानायसूर्यमूर्तयेनमः इत्याग्नेय्यांइत्यष्टासुदिक्षुवेद्यांअष्टमूर्तिपूजांकृत्वा ॥ ॐ भवायदेवायनमः
शर्वाय० ईशानाय० पशुपतये० उग्राय० रुद्राय० भीमाय० महते० ८ ॥ इतिलिंगमस्तकेष्टौपुष्पाण्यर्पयित्वा ॥ लिंगवामभागे
ॐ भवस्यदेवस्यपत्न्यैनमः शर्वस्य० ईशानस्य० पशुपते०उग्रस्य०रुद्रस्य० भीमस्य० महतोदेवस्यपत्न्यैनमः इत्यभितोष्टौपुष्पाणि
दद्यात् ॥ ततः ॐ अघोरेभ्यइत्यारभ्यमंत्रत्रयंदशवारंजप्त्वाअष्टोत्तरसहस्रंशतंवामूलमंत्रंचजप्त्वा ॥ गुह्यातिगुह्यगोप्तात्वंगृहा
णास्मत्कृतंजपं ॥ सिद्धिर्भवतुदेवेशत्वत्प्रसादान्मयिस्थिरा ॥ इतिमंत्रेणदेवायजपंसमर्प्यपंचप्रदक्षिणाःनमस्कारांश्चकृत्वोपवि
श्यपुनःप्रणम्य ईशानःसर्वविद्यानामितिमंत्रेणलिंगमस्तकस्थंपुष्पमाघ्रायशिरसिधृत्वाहृदिप्रविष्टंदेवंसंचिंत्यमूलेनमानसैःपंचोप
चारैःसंपूज्य ॥ कृतेनपार्थिवलिंगपूजनेनश्रीपरमेश्वरःप्रीयतामितीश्वरायार्पयेत् ॥ इतिबौधायनकल्पबृहद्वासिष्ठलैंगानुसारी
पार्थिवलिंगपूजाविधिःसमाप्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २८ ॥ भूशुद्धिः (आसनविधिः) ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालोत्कीर्तनपूर्वकर्मसंकल्प्यशरीरशुद्ध्यर्थभूशुद्धिभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकान्यासान्करिष्यइतिसंकल्प्य ॥ शुचौदेशेआसनार्थकुशाअजिनंचैलमितिक्रमादुपर्युपर्यास्तीर्यतदासनंगायत्र्यामूलमंत्रेणचाभ्युक्ष्य ॥ पृथ्वीतिमंत्रस्यमेरुपृष्ठऋषिःकूर्मपृष्ठोदेवतासुतलंछंदःआसनोपवेशनेविनियोगः ॥ ॐ पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ अनंतासनायनमः ॥ विमलासनाय० ॥ पद्मासनाय० ॥ कूर्मासनाय० ॥ योगासनाय० ॥ आधारशक्तिकमलासनाय० ॥ मध्येपरमसुखायनमःइत्यासनेप्राङ्मुखउपविश्यस्वस्तिकपद्मान्यतरासनंबध्नीयात् ॥ (तल्लक्षणंगौतमीतंत्रे ॥ जानूर्वोरंतरेसम्यक्कृत्वापादतलेउभे ॥ ऋजुकायोवसेद्योगीस्वस्तिकंतत्प्रचक्षते ॥ ऊर्वोरुपरिविन्यस्यतथापादतलेउभे ॥ पद्मासनमितिप्रोक्तंयोगिनांहृदयंगमं ॥ इति ॥) ततः ऊर्ध्वकेशिविरूपाक्षिमांसशोणितभोजने ॥तिष्ठदेविशिखाबंधेचामुंडेह्यपराजिते ॥ इतिचामुंडांसंप्रार्थ्य ॥ स्वशिरसिगुंगुरुभ्योनमः ॥ दक्षिणांसेगंगणपतयेनमः ॥ वामेदुंदुर्गायैनमः ॥ दक्षिणजानुनिक्षंक्षेत्रपालायनमः ॥ वामेसंसरस्वत्यैनमः ॥ इतिनमस्कृत्य ॥ अंआत्मनेनमः ॥ संसत्वात्मनेनमः ॥ रंरजआत्मनेनमः ॥ तंतमआत्मनेनमः ॥ नमोस्त्वनंतायनमोस्तुवेधसेनमोवसिष्ठायनमोस्तुशक्तये ॥ पराशरायाथनमोस्तुशाश्वतेनमोस्तुतेसत्यवतीसुताय ॥ नमोगुरुभ्योगुरुपादुकाभ्योनमःपरेभ्यःपरपादुकाभ्यः ॥ आचार्यसिद्धेश्वरपादुकाभ्योनमोस्तुलक्ष्मीपतिपादुकाभ्यः ॥ ॐ नमोमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः ॥ यजामदेवान्यदिशक्वामाज्यायसःशंसमावृक्षिदेवाः ॥ इतिनमस्कुर्यात् ॥ अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया ॥ अपक्रामंतुभू

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभे ॥ इत्यनेनवामपादपार्ष्णिघातत्रयेणपार्थिवान्विघ्नान् तालत्रय
णआंतरिक्षान् दिव्यदृष्ट्यवलोकनेनदिव्यान्विघ्नांश्चोत्सार्य सर्वभूतनिवारणायसशरायसशार्ङ्गायसुदर्शनायास्त्रराजायहुंफट्इति
दिग्बंधंविधायपरितोग्निप्राकारंविचिंत्यभूतशुद्धिंकुर्यात् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २९ ॥ भूतशुद्धिः ॥

सायथा ॥ मूलाधारस्थितांबिसतंतुनिभांविद्युत्प्रभांप्रसुप्तभुजगाकारांसार्धत्रिवलयांस्वयंभूलिंगवेष्टिनींकुंडलिनींध्यात्वामूलाधा
रात्प्रणवेनभुजगीमिवतामुत्थाप्यप्रणवेनोर्ध्वमुखंविकसितंहृत्पद्मंकृत्वातत्रत्यंजीवात्मानंषट्चक्रभेदक्रमेणब्रह्मरंध्रंनीत्वा सहस्रद
लगतबिंदुरूपेपरमात्मनिसंयोज्यहंसःसोहंइतिमंत्रेणपरमात्मनैक्यभावमापादयेत् ॥ पादादिजानुपर्यंतंपृथिवीमंडलंचतुरस्रंस्व
र्णवर्णंवज्रलांछितंनिवृत्तिकलंब्रह्मदैवत्यंलंबीजयुक्तंध्यायेत् ॥ स्योनेत्यस्ययाज्ञिक्यउपनिषदोभूमिर्गायत्रीभूमिनमस्कारेवि० ॥
स्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ लंभूम्यैनमःइतिनमस्कुर्यात् ॥ जान्वादिनाभिपर्यंतंअंबुमंडलं
अर्धचंद्राकारंशुभ्रवर्णंपद्मद्वयलांछितंप्रतिष्ठाकलंविष्णुदैवत्यंवंबीजयुक्तंध्यायेत् ॥ अप्सुमइत्यस्यविश्वेदेवाआपोनुष्टुप् ॥ अंबुन
मस्कारेवि० ॥ अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा ॥ अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः ॥ वंअंबुनेनमः ॥ नाभ्यादिहृ
दयपर्यंततेजोमंडलंत्रिकोणंरक्तवर्णंस्वस्तिकलांछितंविद्याकलंशिवदैवत्यंरंबीजयुक्तंध्यायेत् ॥ अग्निंदूतमित्यस्यप्रजापतिरग्निर्गा
यत्रीतेजोनमस्कारेवि० ॥ अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं ॥ अस्ययज्ञस्यसुक्रतुं ॥ रंतेजसेनमः ॥ हृदयादिभ्रूमध्यपर्यंतंवा
युमंडलंवृत्तंधूम्रवर्णंषड्बिंदुलांछितंशांतिकलंईशानदैवत्यंयंबीजयुक्तंध्यायेत् ॥ वायोशतमित्यस्यविश्वेदेवावायुरनुष्टुप्वायुनम

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्कारेवि० ॥ वायोश्शतश्हरीणांयुवस्वपोष्याणां ॥ उतवातसहस्रिणोरथआयातुपाजसा ॥ यंवायवेनमः ॥ भ्रूमध्यादाब्रह्मरंध्रं आकाशमंडलंवृत्तंशुक्लवर्णंविधुलांछितंशांत्यतीतकलंसदाशिवदैवत्यंहंबीजयुक्तंध्यायेत् ॥ घृतंघृतपावानइत्यस्यसोमआकाशोय जुःआकाशनमस्कारेवि० ॥ घृतंघृतपावानःपिबतवसांवसापावानःपिबतांतरिक्षस्यहविरसिस्वाहात्वांतरिक्षायदिशःप्रदिशआदि शोंविदिशउद्दिशस्वाहादिग्भ्योनमोदिग्भ्यः ॥ हंआकाशायनमः ॥ पद्भस्तपायूपस्थवाचःक्रमात्पृथिव्यादिषुन्यसामि ॥ गमना दानरेचनानंदवचनानिक्रमात्पृ० ॥ घ्राणरसनचक्षुःस्पर्शनश्रोत्राणिक्रमा० ॥ गंधरसरूपस्पर्शशब्दान्क्रमा० ॥ समानोदानव्या नापानप्राणान्क्रमा०॥ एवंविन्यस्यपृथ्वींपंचगुणांषडुद्धातप्रयोगेणलं ६अंबुनिप्रविलापयामि ॥ अंबुद्विगुणंपंचोद्धातप्रयोगेणवं ५ अग्नौप्रविलापयामि ॥ अग्निंत्रिगुणंचतुरुद्धातप्रयोगेणरं ४ वायौप्रविलापयामि ॥ वायुंद्विगुणंत्रिरुद्धातप्रयोगेणयं ३ आका शेप्रविलापयामि ॥ आकाशमेकगुणंद्विरुद्धातप्रयोगेणहं २ अहंकारेप्रविलापयामि ॥ तमहंकारंमहत्तत्त्वेप्रविला० तन्महत्तत्त्वं प्रकृतौप्र० तांप्रकृतिंपरब्रह्मणिप्र० ॥ इतिप्रविलापयेत् ॥ ततः ॥ ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं ॥ तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातकरोमाणंरक्तश्मश्रुविलोचनं ॥ अधोमुखंकृष्णवर्णमंगुष्ठपरि माणकं ॥खड्गचर्मधरंक्रुद्धंवामकुक्षौविचिंतयेत् ॥ ततोयमितिवायुबीजेनषोडश १६ वारमावृत्तेनपापपुरुषंसंशोष्य रमित्यग्नि बीजेनचतुःषष्टि ६४ वारमावृत्तेनसंदह्य यमितिवायुबीजेनद्वात्रिंशत् ३२ वारमावृत्तेनतद्भस्मदक्षिणनासापुटेनबहिर्निःसार्य वमित्यमृतबीजेनषोडश १६ वारमावृत्तेनतद्भस्मामृतेनसंप्लाव्य लमितिभूमिबीजेनषोडश १६ वारमावृत्तेनघनीभूतंदेहंविभा व्य हमितिआकाशबीजेनषोडश १६ वारमावृत्तेनदेवताराधनयोग्यतांविभाव्य ब्रह्मणःसकाशात्प्रकृतिःप्रकृतेर्महत्तत्त्वं महत्त

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वादहंकारः अहंकारादाकाशः आकाशाद्वायुः वायोराग्निः अग्नेरापः अद्भ्यःपृथिवी पृथिव्याओषयः ओषधीभ्यान्न अन्नाद्रेतसःपुरुषः सवाएषपुरुषोन्नरसमयः इतिसृष्टिक्रमंविभाव्यप्रणवेनहृत्पद्ममूर्ध्वमुखंविभाव्यहंसःसोहंइतिमंत्रेणजीवात्मानंहृत्पद्मे समागतंविभाव्यकुंडलिनींस्वस्थानगतांविभावयेत् ॥ इतिभूतशुद्धिः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ३० ॥ प्राणप्रतिष्ठा ॥

अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुशिवाऋषयःऋग्यजुःसामानिछंदांसिचैतन्यरूपाप्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः क्रोंकीलकंप्राणप्रतिष्ठापनेवि०॥ ब्रह्मविष्णुशिवेभ्यऋषिभ्योनमःशिरसि ॥ ऋग्यजुःसामभ्यश्छंदोभ्योनमःमुखे ॥ चैतन्यरूपायैप्राणशक्तिदेवतायैनमःहृदये॥ आंबीजायगुह्ये॥ ह्रींशक्तयेनमःपादयोः॥ क्रोंकीलकायनमःनाभौ॥ प्राणप्रतिष्ठापनेविनियोगायनमःसर्वांगे ॥ ॐ आंह्रींक्रोंअंकंखंगंघंङंआकाशवाय्वग्निसलिलपृथिव्यात्मनेआंहृदयायनमः ॥ ॐ आंह्रींक्रोंइंचंछंजंझंञंशब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा ॥ ॐ आंह्रींक्रोंउंटंठंडंढंणंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेऊंशिखायैवषट् ॥ ॐ आंह्रींक्रोंएंतंथंदंधंनंवाक्पाणिपादपायूपस्थात्मनेऐंकवचायहुं ॥ ॐ आंह्रींक्रोंओंपंफंबंभंमंवचनादानविसर्गगमनानंदात्मनेऔंनेत्रत्रयायवौषट् ॥ ॐ आंह्रींक्रोंअंयंरंलंवंशंषंसंहंळंक्षंमनोबुद्ध्यहंकारचित्तानंदात्मनेअःअस्त्रायफट्इतिषडंगेषुतत्तन्मुद्राभिर्विन्यस्य नाभ्यादिपादद्वयाग्रांतं आंनमः ॥ कंठादिनाभ्यंतंह्रींनमः ॥ मूर्धादिकंठांतंक्रोंनमः ॥ ततोहृद्येव यंत्वगात्मनेनमः ॥ रंअसृगात्मनेनमः ॥ लंमांसात्मने० ॥ वंमेदआत्मने० ॥ शंअस्थ्यात्मने० ॥ षंमज्जात्मने० ॥ संशुक्रात्मने० ॥ हंओजआत्मने० ॥ लंजीवात्मने ॥ क्षंपरमात्मने० ॥ ततोहृदयकमलेयंनमः ॥ आग्नेयेरंनमः ॥ पूर्वेलंनमः ॥ पश्चिमेवंनमः ॥ ईशानेशंनमः नैर्ऋतेषंनमः उत्तरेसंनमः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दक्षिणेहंनमः कर्णिकायांक्षंनमः इतिविन्यसेत् ॥ ततःसमस्तमातृकाभिर्मूर्धादिचरणावधिव्यापकन्यासंविधाय ॥ रक्ताब्धिपो
तारुणपद्मसंस्थांपाशांकुशाविक्षुशरासबाणान् ॥ शूलेकपालंदधतींकराग्रेरक्तांत्रिनेत्रांप्रणमामिदेवीं ॥ इतिध्यायेत् ॥ वामाद्यू
र्ध्वयोराद्येतदाद्यधःस्थयोरन्येतदाद्यधःस्थयोरपरेइत्यायुधस्थितिः ॥ शरासोधनुः ॥ ततोहृदिदक्षहस्ततलंनिधाय ॥ ॐ
आंह्रींक्रोंअंयंरंलंवंशंषंसंहंळंक्षंअःक्रोंह्रींआंहंसःसोहंममप्राणाइहप्राणाः ॥ पुनरोमित्यादिजपांतमुक्त्वाममजीवइहस्थितः ॥
पुनस्तथैवोक्त्वाममसर्वेंद्रियाणि ॥ पुनस्तथैवोक्त्वाममवाङ्मनश्चक्षुःश्रोत्रत्वग्घ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा ॥ असु
नीतेपुनरस्मासुचक्षुःपुनःप्राणमिहनोधेहिभोगं ॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळयानःस्वस्ति ॥ गर्भाधानादिपंचदशसंस्का
रसिद्ध्यर्थंपंचदशवारंप्रणवंजपेत् ॥ इतिप्राणप्रतिष्ठा ॥ ॥ छ ॥ ॥ छ ॥

॥ ३१ ॥ अंतर्मातृकान्यासः ॥

तत्रमातृकाभिःप्राणायामत्रयंकृत्वामातृकान्यासंकुर्यात् सचस्वरैःपूरकः कादिभिःकुंभकः यादिभीरेचकः इतिप्राणायामक्रमः ॥
इत्थंप्राणायामत्रयंकृत्वा ॥ अस्यश्रीमातृकामंत्रस्यब्रह्मणऋषयेनमःशिरसि ॥ गायत्र्यैछंदसेनमःमुखे ॥ मातृकासरस्वत्यैदेवता
यैनमःहृदये ॥ हल्भ्योबीजेभ्योनमःगुह्ये ॥ स्वरेभ्यःशक्तिभ्योनमःपादयोः ॥ व्यक्तयेकीलकायनमःनाभौ ॥ मातृकान्यासे
विनियोगायनमःसर्वांगे ॥ ॐ अंकंखंगंघंङंआंअंगुष्ठाभ्यांनमः ॥ ॐ इंचंछंजंझंञंईतर्जनीभ्यांनमः ॥ ॐ उंटंठंडंढंणंऊंमध्य
माभ्यांवषट् ॥ ॐ एंतंथंदंधंनंऐंअनामिकाभ्यांहुं ॥ ॐ ओंपंफंबंभंमंऔंकनिष्ठिकाभ्यांवौषट् ॥ ॐ अंयंरंलंवंशंषंसंहंळंक्षंअःक
रतलकरपृष्ठाभ्यांफट् ॥ एवंअंकंइत्यादिहृदयायनमः शिरसेस्वाहा शिखायैवषट् कवचायहुं नेत्रत्रयायवौषट् अस्त्रायफट् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सर्वाभिर्मातृकाभिस्त्रिर्व्यापकं ॥ अथध्यानं ॥ पंचाशद्वर्णभेदविहितवदनदोःपद्महृत्कुक्षिवक्षोदेशांभास्वत्कपर्दाकलितशशि-
लामिंदुकुंदावदातां ॥ अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्षणांपद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरांभारतींतांनमामि ॥
दक्षिणोर्ध्वकरमारभ्यदक्षाधःकरपर्यंतमायुधस्थितिः ॥ चिंतालिखितंपुस्तकं ॥ एवंध्यात्वांतर्मातृकान्यासंकुर्यात् ॥ तत्रादौकं
ठस्थेविशुद्धचक्रेषोडशदलेपूर्वादिप्रादक्षिण्येन ॐ अंनमः ॐ आंनमः ॐ अःनमः इतिविन्यस्य हृदयस्थेनाहतचक्रेद्वादशदले
पूर्वादिप्रादक्षिण्येन ॐ कंनमः ॐ खंनमः ॐ ठंनमः इतिविन्यस्यनाभिमंडलस्थेमणिपूरकचक्रेदशदलेपूर्वादिप्रादक्षिण्येन ॐ
डंनमः ॐ ढंनमः ॐ फंनमः इतिविन्यस्यलिंगमूलस्थेस्वाधिष्ठानचक्रेषड्दलेपूर्वादिप्रादक्षिण्येन ॐ बंनमः ॐ भंनमः ॐ
लंनमः इतिविन्यस्यमूलाधारस्थेमूलाधारचक्रेचतुर्दलेपूर्वादिप्रादक्षिण्येन ॐ वंनमः ॐ संनमः इतिविन्यस्यभ्रूमध्यस्थेआज्ञा
चक्रेद्विदलेदक्षिणवामक्रमेण ॐ हंनमः ॐ क्षंनमः इतिविन्यसेत् ॥ इत्यंतर्मातृकान्यासः ॥ ॥ छ ॥ ॥ छ ॥

॥ ३२ ॥ बहिर्मातृकान्यासः ॥

पंचाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षस्थलांभास्वन्मौलिनिबद्धचंद्रशकलामापीनतुंगस्तनीं ॥ मुद्रामक्षगुणंसुधाढ्यकलशं
विद्यांचहस्तांबुजैर्बिभ्राणांविशदप्रभांत्रिनयनांवाग्देवतामाश्रये ॥ इतिध्यात्वा ॥ ॐ अंनमःशिरसि ॥ सर्वत्रादौतारः ॥ आंन
मःमुखवृत्ते ॥ इंनमःदक्षिणनेत्रे ॥ ईंनमःवामनेत्रे ॥ उंनमःदक्षिणश्रोत्रे ॥ ऊंनमःवामश्रोत्रे ॥ ऋंनमःदक्षिणनासापुटे ॥
ॠंनमःवामनासापुटे ॥ ऌंनमःदक्षिणगंडे ॥ ॡंनमःवामगंडे ॥ एंनमःऊर्ध्वोष्ठे ॥ ऐंनमःअधरोष्ठे ॥ ओंनमःऊर्ध्वदंतपंक्तौ ॥
औंनमःअधरदंतपंक्तौ ॥ अंनमःशिरसि ॥ अःनमःग्रीवायां ॥ कंनमःदक्षिणबाहुमूले ॥ खंनमःदक्षिणकूर्परे ॥ गंनमःदक्षि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णमणिबंधे ॥ घंनमःदक्षिणकरांगुलिमूलेषु ॥ ङंनमःदक्षिणकरांगुल्यग्रेषु ॥ चंनमःवामबाहुमूले ॥ छंनमःवामकूर्परे ॥ जंनमः वाममणिबंधे ॥ झंनमःवामकरांगुलिमूलेषु ॥ ञंनमःवामकरांगुल्यग्रेषु ॥ टंनमःदक्षिणपादमूले ॥ ठंनमःदक्षिणजानुनि ॥ डंनमःदक्षिणगुल्फे ॥ ढंनमःदक्षिणपादांगुलिमूलेषु ॥ णंनमःदक्षिणपादांगुल्यग्रेषु ॥ तंनमःवामपादमूलेषु ॥ थंनमःवामजा नुनि ॥ दंनमःवामगुल्फे ॥ धंनमःवामपादांगुलिमूलेषु ॥ नंनमःवामपादांगुल्यग्रेषु ॥ पंनमःदक्षिणपार्श्वे ॥ फंनमःवामपार्श्वे ॥ बंनमःपृष्ठे ॥ भंनमःनाभौ ॥ मंनमःजठरे ॥ यंनमःहृदि ॥ रंनमःदक्षिणांसे ॥ लंनमःककुदि ॥ वंनमःवामांसे ॥ शंनमःहृदा दिदक्षकराग्रांतं ॥ षंनमःहृदादिवामकराग्रांतं ॥ संनमःहृदादिदक्षिणपादाग्रांतं ॥ हंनमःहृदादिवामपादाग्रांतं ॥ ळंनमःहृदा दिगुह्यांतं ॥ क्षंनमःहृदादिमूर्धांतं ॥ अंगुष्ठानामिकाभ्यामयंन्यासः ॥ आचक्रायहृदयायनमः ॥ विचक्रायशिरसेस्वाहा ॥ सुचक्रायशिखायैवषट् ॥ त्रैलोक्यरक्षणचक्रायकवचायहुं ॥ असुरांतचक्रायअस्त्रायफट् ॥ अंगषट्कपक्षे ॥ असुरांतकचक्राय नेत्रत्रयायवौषट् ॥ सुदर्शनचक्रायअस्त्रायफट् ॥ इतिबहिर्मातृकान्यासः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ३३ ॥ पवनपावनप्रारंभः ॥

श्रीः ॥ सुमुखश्चेत्यादिश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थशरीरशुद्ध्यर्थआत्मानंपावयिष्ये ॥ आचार्यःऋत्विग्यजमानैःसहैकविं शतिदर्भपिंजूलान्यादायसप्तभिःसप्तभिःपावयति ॥ ॐ चित्पतिर्मापुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥ नाभ्याः सोदकैर्दर्भैर्मुखपर्यंतंसंमार्ष्टि ॥ सकृन्मंत्रेणद्विस्तूष्णीं ॥ यद्देवादेवहेडनं ॥ देवासश्चकृमावयं ॥ आदित्यास्तस्मान्मामुंचत ॥ कृतस्यर्तेनमामुत ॥ देवाजीवनकाम्यायत ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृम ॥ करोतुमामनेनसं ॥ ऋतेनद्यावापृथिवी ॥ ऋतेनत्वꣳसरस्वति ॥ ऋतान्मामुञ्चताꣳहसः ॥ यदन्यकृतमारिम ॥ सजा
तशꣳसादुतवाजामिशꣳसात् ॥ ज्यायसःशꣳसादुतवाकनीयसः ॥ अनाज्ञातंदेवकृतंयदेनः ॥ तस्मात्त्वमस्मान्जातवेदोमुमुग्धि ॥
यद्वाचायन्मनसा ॥ बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां ॥ शिश्नैर्यदनृतंचकृमावयं ॥ अग्निर्मातस्मादेनसः ॥ यद्धस्ताभ्यांचकरकिल्बि
षाणि ॥ अक्षाणांवग्नुमुपजिघ्नमानः ॥ दूरेपश्याचराष्ट्रभृच्च ॥ तान्यप्सरसावनुदत्तामृणानि ॥ अदीव्यन्नृणंयदहंचकार ॥ यद्वा
दास्यंत्संजगाराजनेभ्यः ॥ अग्निर्मातस्मादेनसः ॥ यन्मयिमातागर्भेसति ॥ एनश्चकारयत्पिता ॥ अग्निर्मातस्मादेनसः ॥ यदा
पिपेषमातरंपितरं ॥ पुत्रःप्रमुदितोधयन् ॥ अहिꣳसितौपितरौमयातत् ॥ तदग्नेअनृणोभवामि ॥ यदंतरिक्षंपृथिवीमुतद्यां ॥
यन्मातरंपितरंवाजिहिꣳसिम ॥ अग्निर्मातस्मादेनसः ॥ यदाशसानिशसायत्पराशसा ॥ यदेनश्चकृमानूतनंयत्पुराणं ॥ अग्निर्मात
स्मादेनसः ॥ अतिक्रामामिदुरितंयदेनः ॥ जहामिरिप्रंपरमेसधस्थे ॥ यत्रयंतिसुकृतोनापिदुष्कृतः ॥ तमारोहामिसुकृतांनु
लोकं ॥ त्रितेदेवाअमृजतैतदेनः ॥ त्रितएतन्मनुष्येषुमामृजे ॥ ततोमायदिकिंचिदानशे ॥ अग्निर्मातस्मादेनसः ॥ गार्हपत्यः
प्रमुंचतु ॥ दुरितायानिचकृम ॥ करोतुमामनेनसं ॥ दिविजाताअप्सुजाताः ॥ याजाताओषधीभ्यः ॥ अथोयाअग्निजाआपः ॥
तानःशुंधंतुशुंधनीः ॥ यदापोनक्तंदुरितंचराम ॥ यद्वादिवानूतनंयत्पुराणं ॥ हिरण्यवर्णास्ततउत्पुनीतनः ॥ इमंमेवरुणतत्वा
यामि ॥ त्वन्नोअग्नेसत्वंनोअग्ने ॥ त्वमग्नेअयासि ॥ इत्यनुवाकंजपित्वा ॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभि
नोमुखाकरत्प्रणआयूꣳषितारिषत् ॥ इतिमार्जनं ॥ तांस्त्यक्त्वा ॥ अन्यान्गृहीत्वा ॥ ॐ वाक्पतिर्मापुनात्वच्छिद्रेणपवित्रेणव
सोःसूर्यस्यरश्मिभिः ॥ नाभ्याःसोदकैर्दर्भैर्नासिकपर्यंतंसंमार्ष्टि ॥ सकृन्मंत्रेणद्विस्तूष्णीं ॥ पवमानःसुवर्जनः ॥ पवित्रेणविच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्षणिः ॥ यःपोतासपुनातुमा ॥ पुनंतुमादेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनंतुविश्वआयवः ॥ जातवेदःपवित्रवत् ॥ पवित्रेण पुनाहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूꣳरनु ॥ यत्तेपवित्रमार्चिषि ॥ अग्नेवितंतमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभाभ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदेव्यागात् ॥ यस्यैबह्वीस्तनुवोवीतपृष्ठाः ॥ तयामदंतःसधमाद्येषु ॥ वयꣳस्यामपतयोरयीणां ॥ वैश्वानरोरश्मिभिर्मापुनातु ॥ वातःप्राणेनेषिरोमयोभूः ॥ द्यावापृथिवीपयसापयोभिः ॥ ऋतावरीयज्ञियेमापुनीतां ॥ बृहद्भिःसवितस्तृभिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेदक्षैःपुनाहिमा ॥ येनदेवाअपुनत ॥ येनापोदिव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥ इदंब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥ ऋषिभिःसंभृतꣳरसं ॥ सर्वꣳसपूतमश्नाति ॥ स्वदितंमातरिश्वना ॥ पावमानीर्योअध्येति ॥ ऋषिभिःसंभृतꣳरसं ॥ तस्मैसरस्वतीदुहे ॥ क्षीरꣳसर्पिर्मधूदकं ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिपयस्वतीः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ पावमानीर्दिशंतुनः ॥ इमंलोकमथोअमुं ॥ कामान्त्समर्धयंतुनः ॥ देवीर्देवैःसमाभृताः ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिघृतश्चुतः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥ तेनसहस्रधारेण ॥ पावमान्यःपुनंतुमा ॥ प्राजापत्यंपवित्रं ॥ शतोद्यामꣳहिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातु ॥ सोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा ॥ जातवेदामोर्जयंत्यापुनातु ॥ इत्यनुवाकंजप्त्वा ॥ ततोमार्जनं ॥ आपोहिष्ठामयोभुवः ॥ तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसः ॥ तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवः ॥ यस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ तांस्त्यक्त्वा ॥ अन्यान्गृहीत्वा ॥ ॐ देवोवःसवितापुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥

॥ ३० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नाभ्याःसोदकैर्दभैर्ललाटपर्यंतंसंमार्ष्टि ॥ सकृन्मंत्रेणद्विस्तूष्णीं ॥ तस्यैतपवित्रपतेपवित्रेणयस्मैकंपुनेतच्छकेयं ॥ इतिजप्त्वा ॥ ततोमार्जनं ॥ हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्नियागर्भदधिरेविरूपास्तानआपःशंस्योनाभवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यन्जनानां ॥ मधुश्चुतःशुचयोयाःपावकास्तानआपःशंस्योनाभवंतु ॥ यासांदेवा दिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोंदंतिशुक्रास्तानआपःशंस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापः शिवयातनुवोपस्पृशत्वचंमे ॥ सर्वाँअग्नीँरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ तांस्त्यक्त्वा ॥ भूर्भुवःसुवः ॥ इत्य पःप्राश्य ॥ आपोहिष्ठेतितिसृभिर्मुखंनिमृज्य ॥ ततःआचमनानि ॥ तस्माअरं० चनः ॥ योवःशिव० तरः ॥ आपोहि० क्षसे ॥ पयस्वतीरोषधयःपयस्वद्वीरुधांपयः ॥ अपांपयसोयत्पयस्तेनमामिंद्रसꣳसृज ॥ इतिप्रतिमंत्रमाचामेत् ॥ ततःस्मृत्युक्तमाच मनंकृत्वा ॥ कृत्वालंपादशौचंविमलमथजलंत्रिःपिबेदुन्मृजेद्विर्देशिन्यंगुष्ठयुग्मंसजलमभिमृशेन्नासिकारंध्रयुग्मं ॥ अंगुष्ठानामि काभ्यांनयनयुगयुतंकर्णयुग्मंकनिष्ठांगुष्ठाभ्यांनाभिदेशेहृदयमयतलेनांगुलीभिःशिरौंसौ ॥ १ ॥ इतिस्मृत्युक्तमाचमनंचरेत् ॥ गायत्रीजपःशतकृत्वःसहस्रकृत्वोपरिमितकृत्वोवावर्तयेत् ॥ दशवारमिडाजपः ॥ ॐ इडादेवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्था मदानिशꣳसिषद्विश्वेदेवाःसूक्तवाचःपृथिविमातर्मामाहिꣳसीर्मधुमनिष्येमधुजनिष्येमधुवक्ष्यामिमधुवदिष्यामिमधुमतींदेवेभ्यो वाचमुद्यासꣳशुश्रूषेण्यांमनुष्येभ्यस्तंमादेवाअवंतुशोभायैपितरोनुमदंतु ॥ अपनःशोशुचदघमग्नेशुशुग्ध्यारयिं ॥ अपनःशो शुचदघं ॥ सुक्षेत्रियासुगातुयावसूयाचयजामहे ॥ अपनःशोशुचदघं ॥ प्रयद्भंदिष्ठएषांप्रास्माकासश्चसूरयः ॥ अपनःशो शुचदघं ॥ प्रयद्ग्नेःसहस्वतोविश्वतोयंतिभानवः ॥ अपनःशोशुचदघं ॥ प्रयत्तेअग्नेसूरयोजायेमहिप्रतेवयं ॥ अपनःशोशुच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्यं ॥ त्वꣳहिविश्वतोमुखविश्वतःपरिभूरसि ॥ अपन्नःशोशुचद्यं॥ द्विषोनोविश्वतोमुखातिनावेवपारय ॥ अपन्नःशोशुचद्यं ॥ सन्नःसिंधुमिवनावयातिपर्षास्वस्तये ॥ अपन्नःशोशुचद्यं ॥ आपःप्रवणादिवयतीरपास्मत्स्यंदतामघं ॥ अपन्नःशोशुचद्यं ॥ उद्वनादुदकानीवापास्मत्स्यंदतामघं ॥ अपन्नःशोशुचद्यं ॥ आनंदायप्रमोदायपुनरागाꣳस्वान्गृहान् ॥ अपन्नःशोशुचद्यं ॥ नवैतत्रप्रमीयतेगौरश्वःपुरुषःपशुः ॥ यत्रेदंब्रह्मक्रियतेपरिधिर्जीवनायकमपन्नःशोशुचद्यं ॥ सहस्रशीर्षेत्यादिपुरुषसूक्तंपठेत् ॥

॥ ३४ ॥ महान्यासप्रारंभः ॥

श्रीः ॥ ॐम् ॥ अथातःपंचांगरुद्राणांन्यासपूर्वकंजपहोमार्चनविधिंव्याख्यास्यामः ॥ ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहि ॥ शिखायैनमः ॥ ॐ अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि ॥ तेषाꣳसहस्रयोजनेव धन्वानितन्मसि ॥ शिरसेस्वाहा ॥ ॐ सहस्राणिसहस्रशोयेरुद्राअधिभूम्यां ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ललाटायनमः ॥ ॐ हꣳसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् ॥ भ्रूमध्यायनमः ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ नेत्राभ्यां नमः ॥ ॐ नमःस्रुत्यायचपथ्यायच ॥ कर्णाभ्यांनमः ॥ ॐ मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ नासिकायैनमः ॥ ॐ अवतत्यधनुस्त्वꣳसहस्राक्षशतेषुधे ॥ निशीर्यशल्यानांमुखाशिवोनःसुमनाभव ॥ मुखायनमः ॥ ॐ नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ कंठायनमः ॥ ॐ नीलग्रीवाःशितिकंठादिवꣳरुद्राउपश्रिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ उपकंठा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यनमः ॥ ॐ नमस्तेअस्त्वायुधायानाततायधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने ॥ बाहुभ्यांनमः ॥ ॐ यातेहेति
मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिब्भुज ॥ उपबाहुभ्यांनमः ॥ ॐ येतीर्थानिप्रचरंतिसृकावंतोनिषं
गिणः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ हस्ताभ्यांनमः ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवे
नातिभवेभवस्वमांभवोद्भवायनमः ॥ अंगुष्ठाभ्यांनमः ॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविक
रणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ तर्जनीभ्यांनमः ॥ ॐ अघो
रेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ मध्यमाभ्यांनमः ॥ ॐ तत्पुरुषायविद्महेमहादे
वायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ अनामिकाभ्यांनमः ॥ ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधि
पतिर्ब्रह्मशिवोमेअस्तुसदाशिवोम् ॥ कनिष्ठिकाभ्यांनमः ॥ ॐ नमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्यः ॥ हृदयायनमः ॐ नमो
गणेभ्योगणपतिभ्यश्चवोनमः ॥ पृष्ठचैनमः ॥ ॐ नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमः ॥ पार्श्वाभ्यांनमः ॥ ॐ विज्यं
धनुःकपर्दिनोविशल्योबाणवाꣳउत ॥ अनेशन्नस्येषवआभुरस्यनिषंगथिः ॥ जठरायनमः ॥ ॐ हिरण्यगर्भःसमवर्तताग्रेभूत
स्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ नाभ्यैनमः ॥ ॐ मीढुष्टमशिवतमशिवोनःसुम
नाभव ॥ परमेवृक्षआयुधंनिधायकृत्तिंवसानआचरपिनाकंबिभ्रदागहि ॥ कट्यैनमः ॥ ॐ येभूतानामधिपतयोविशिखासःक
पर्दिनः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ गुह्यायनमः ॥ ॐसशिराजातवेदाः ॥ अक्षरंब्रह्मसंमितं ॥ वेदानाꣳशिरउत्तमं ॥
जातवेदसेशिरसामाता ॥ स्वयंब्रह्मभूर्भुवःसुवरोम् ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां ॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमः ॥ अग्नेत्वंपारयानव्योअस्मान्स्वस्तिभिरतिदुर्गाणिविश्वा ॥ पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनायशंयोः ॥ विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि ॥ अग्नेअत्रिवन्मनसागृणानोस्माकंबोध्यविताततनूनां ॥ पृतनाजितंसहमानमुग्रमग्निंहुवेमपरमात्सधस्थात् ॥ सनःपर्षदतिदुर्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निः ॥ अपानायनमः ॥ ॐ मानोमहांतमुतमानोअर्भकमानउक्षंतमुतमानउक्षितं ॥ मानोवधीःपितरंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषः ॥ ऊरुमध्याभ्यांनमः ॥ ॐएषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजवतोतीह्यवततधन्वापिनाकहस्तःकृत्तिवासाः ॥ जानुभ्यांनमः ॥ ॐसꣳसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राꣳअपबाधमानः ॥ जंघाभ्यांनमः ॥ ॐ विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् ॥ सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु ॥ गुल्फाभ्यांनमः ॥ ॐ येपथांपथिरक्षयऐलबृदायव्युधः ॥ तेषांꣳसहस्रयोजनेवधन्वानितन्मसि ॥ पादाभ्यांनमः ॥ ॐ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहीꣳश्चसर्वान्जंभयन्त्सर्वाश्चयातुधान्यः ॥ कवचायनमः ॥ ॐ नमोबिल्मिनेचकवचिनेच ॥ उपकवचायनमः ॥ ॐ नमोअस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेअस्यसत्वानोहंतेभ्योकरंनमः ॥ तृतीयनेत्रायनमः ॥ ॐ प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तइषवःपराताभगवोवप ॥ अस्त्रायनमः ॥ ॐ यएतावंतश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे ॥ तेषांꣳसहस्रयोजनेवधन्वानितन्मसि ॥ इतिदिग्बंधः ॥ ॐ नमोभगवतेरुद्रायेतिनमस्कारंन्यसेत् ॥ ॐ ॐ मूर्ध्नेनमः ॥ ॐ नंनासिकायैनमः ॥ ॐ लंललाटायनमः ॥ ॐ भं मुखायनमः ॥ ॐ गं कंठायनमः ॥ ॐ वं हृदयायनमः ॥ ॐ तें दक्षिणहस्तायनमः ॥ ॐ रुं वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

महस्तायनमः ॥ ॐ द्रांनाभ्यैनमः ॥ ॐ यंपादाभ्यांनमः ॥ ॐ सद्योजातप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभ
वेभवस्वमांभवोद्भवायनमः ॥ पादाभ्यांनमः ॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणाय
नमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ ऊरुमध्यायनमः ॥ ॐ अघोरेभ्यो
थघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ हृदयायनमः ॥ ॐ तत्पुरुषायविद्महेमहादेवा
यधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ मुखायनमः ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा
शिवोमेअस्तुसदाशिवोम् ॥ ॐ शिरसेस्वाहा ॥ ॐ हंसायनमः ॥ ॐ परमहंसायनमः ॥ हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवः ॥
एवंन्यासविधिंकृत्वाततःसंपुटमारभेत् ॥ ॐ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं ॥ हुवेनुशक्रंपुरुहूतमिंद्रꣳस्व
स्तिनोमघवाधात्विंद्रः ॥ ललाटस्थानेइंद्रायनमः ॥ ॐ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिंष्ठोवह्नितमः
शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥ अग्नयेनमः ॥ ॐ सुगंनःपंथामभयंकृणोतुयस्मिन्नक्षत्रेयमएतिराजा ॥ यस्मिन्नेनम
भ्यर्षिचंतदेवास्तदस्यचित्रꣳहविषायजाम ॥ यमायनमः ॥ ॐ असुन्वंतमयजमानमिच्छस्तेनस्येत्यांतस्करस्यान्वेषि ॥ अन्य
मस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ निर्ऋतयेनमः ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥
अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः ॥ वरुणायनमः ॥ ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपया
हियज्ञं ॥ वायोअस्मिन्हविषिमादयस्वयूयंपातस्वस्तिभिःसदानः ॥ वायवेनमः ॥ ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥
प्रजावंतोअशीमहि ॥ सोमायनमः ॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यःशंसतेस्तुवतेधायिपज्रइंद्रज्येष्ठा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अस्मांअवंतुदेवाः ॥ आकाशायनमः ॥ ॐ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधे
रक्षितापायुरदब्धःस्वस्तयें ॥ एकादशरुद्रेभ्योनमः ॥ ॐ स्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ भूम्यै
नमः ॥ एतत्संपुटमिंद्रादीन्दिक्षुविन्यस्यैवमेवात्मनिरौद्रीकरणंकृत्वा ॥ (रौद्रीकरणंचेत्थं)॥ ॐ विभूरसिप्रवाहणोरौद्रेणानीकेन
पाहिमाग्नेपिपृहिमामामाहिꣳसीः ॥ श्रोत्राभ्यांनमः ॥ ॐ वह्निरसिहव्यवाहनोरौद्रेणानीकेन० ॥ त्वचेनमः ॥ ॐ श्वात्रोसिप्रचे
तारौद्रेणानीकेन०॥ चक्षुर्भ्यां०॥ ॐ तुथोसिविश्ववेदारौद्रे०॥ जिह्वायै०॥ ॐ उशिगसिकवीरोरौद्रेणानीकेन०॥ नासिकायै०॥
ॐ अंधारिरसिबंभारिरौद्रेणानीकेन० ॥ पायवेन० ॥ ॐ अवस्युरसिदुवस्वान्रौद्रेणानीकेन० ॥ उपस्थायन० ॥ ॐ शुंध्यूरसि
मार्जालीयोरौद्रेणानीकेन० ॥ हस्ताभ्यांन० ॥ ॐ सम्राडसिकृशानूरौद्रेणानीकेनपाहि० ॥ पादाभ्यांन० ॥ ॐ ॥ परिषद्योसि
पवमानोरौद्रेणा० ॥ वाचेनमः ॥ ॐ प्रतक्वासिनभस्वान्रौद्रे० ॥ आत्मनेनमः ॥ ॐ असंमृष्टोसिहव्यसूदोरौद्रे० ॥ आका
शायनमः ॥ ॐ ऋतधामासिसुवर्ज्योतीरौद्रे० ॥ वायवेनमः॥ ॐ ब्रह्मज्योतिरसिसुवर्धामारौद्रे० ॥ अग्नयेनमः॥ ॐ अजोस्ये
कपाद्रौद्रे० ॥ अन्ध्योनमः॥ ॐ अहिरसिबुध्नियोरौद्रे० ॥ भूम्यैनमः॥) त्वगस्थिगतैःपापैःप्रमुच्यतेसर्वभूतेष्वपराजितोभवति ॥
ततोयक्षराक्षसगंधर्वभूतप्रेतपिशाचयमदूतशाकिनीडाकिनीसर्पश्वापदतस्कराद्युपद्रवाद्युपघाताःसर्वेज्वलंतंपश्यंतु ॥ माꣳरक्षंतु॥
यजमानꣳरक्षंतु॥ ॐ मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञꣳसमिमंदधातु ॥ याइष्टाउषसोनिष्कृतश्चताःसंदधामिहविषाघृतेन ॥
गुह्यायनमः॥ ॐ अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं ॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ ॥
अग्नयेनमः ॥ ॐ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

हृदयायनमः॥ ॐ मर्माणितेवर्मभिश्छादयामिसोमस्त्वाराजामृतेनाभवस्ता ॥ पुरोरथोवारिवस्तेअस्तुजयंतंत्वामनुमदतुदेवाः ॥
मुखायनमः ॥ ॐ जातवेदायदिवापावकोसि ॥ वैश्वानरोयदिवाविद्युतोसि ॥ शंप्रजाभ्योयजमानायलोकं॥ ऊर्जपुष्टिंददद्भ्या
ववृत्स्व ॥ शिरसेस्वाहा ॥ ॐ ब्रह्मात्मन्वदसृजत ॥ तदकामयत ॥ समात्मनापद्येयेति ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मै
दशमश्हूतःप्रत्यशृणोत् ॥ सदशहूतोभवत् ॥ दशहूतोहवैनामैषः ॥ तंवाएतंदशहूतश्संतं ॥ दशहोतेत्याचक्षतेपरोक्षेण ॥
परोक्षप्रियाइवहिदेवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैसप्तमश्हूतःप्रत्यशृणोत् ॥ ससप्तहूतोभवत् ॥ सप्तहूतोहवैनामैषः ॥
तंवाएतश्सप्तहूतश्संतं ॥ सप्तहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैषष्ठश्हूतः
प्रत्यशृणोत् ॥ सषहूतोभवत् ॥ षड्हूतोहवैनामैषः ॥ तंवाएतश्षड्हूतश्संतं ॥ षड्होतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहि
देवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैपंचमश्हूतःप्रत्यशृणोत् ॥ सपंचहूतोभवत् ॥ पंचहूतोहवैनामैषः ॥ तंवाएतंपंच
हूतश्संतं ॥ पंचहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैचतुर्थश्हूतःप्रत्यशृ
णोत् ॥ सचतुर्हूतोभवत् ॥ चतुर्हूतोहवैनामैषः ॥ तंवाएतंचतुर्हूतश्संतं ॥ चतुर्होतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहि
देवाः ॥ तमब्रवीत् ॥ त्वंवैमेनेदिष्ठश्हूतःप्रत्यश्रौषीः ॥ त्वयैनानाख्यातारइतिं ॥ तस्मान्नुहैनाश्श्चतुर्होतारइत्याचक्षते ॥
तस्माच्छुश्रूषुःपुत्राणाश्हृद्यतमः ॥ नेदिष्ठोहृद्यतमः ॥ नेदिष्ठोब्रह्मणोभवति ॥ यएवंवेद ॥ ॐ यज्जाग्रतोदूरमुदैतुदैवंतदुसुप्त
स्यतथैवैति ॥ दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनःशिवसंकल्पमस्तु ॥ येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः ॥
यदपूर्वंयक्षमंतःप्रजानांतन्मेमनःशिवसंकल्पमस्तु॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतंप्रजासु ॥ यस्मान्नऋतेकिंचन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कर्मक्रियतेतन्मेमनःशिवसंकल्पमस्तु ॥ येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं ॥ येनयज्ञस्त्रायतेसप्तहोतातन्मेमनःशिवसंकल्पमस्तु ॥ यस्मिन्नृचःसामयजूंष्यस्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिंश्चित्तंसर्वमोतंप्रजानांतन्मेमनःशिवसंकल्पमस्तु ॥ सुषारथिरश्वानिवयंमनुष्यान्नेनीयतेभीशुभिर्वाजिनइव ॥ हृत्प्रतिष्ठंयदजिरंयविष्ठंतन्मेमनःशिवसंकल्पमस्तु ॥ शिवसंकल्पंहृदयायनमः ॥ ॐ सहस्रशीर्षापुरुषः ॥ सहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वा ॥ अत्यतिष्ठद्दशांगुलं ॥ पुरुषएवेदंसर्वं ॥ यद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानः ॥ यदन्नेनातिरोहति ॥ एतावानस्यमहिमा ॥ अतोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानि ॥ त्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषः ॥ पादोस्येहाभवात्पुनः ॥ ततोविष्वङ्व्यक्रामत् ॥ साशनानशनेअभि ॥ तस्माद्विराडजायत ॥ विराजोअधिपूरुषः ॥ सजातोअत्यरिच्यत ॥ पश्चाद्भूमिमथोपुरः ॥ यत्पुरुषेणहविषा ॥ देवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं ॥ ग्रीष्मइध्मःशरद्धविः ॥ सप्तास्यासन्परिधयः ॥ त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाः ॥ अबध्नन्पुरुषंपशुं ॥ तंयज्ञंबर्हिषिप्रौक्षन् ॥ पुरुषंजातमग्रतः ॥ तेनदेवाअयजंत ॥ साध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ संभृतंपृषदाज्यं ॥ पशूंस्ताश्चक्रेवायव्यान् ॥ आरण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ ऋचःसामानिजज्ञिरे ॥ छंदांसिजज्ञिरेतस्मात् ॥ यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंत ॥ येकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात् ॥ तस्माज्जाताअजावयः ॥ यत्पुरुषंव्यदधुः ॥ कतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहू ॥ कावूरूपादावुच्येते ॥ ब्राह्मणोस्यमुखमासीत् ॥ बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यः ॥ पद्भ्यांशूद्रोअजायत ॥ चंद्रमामनसोजातः ॥ चक्षोःसूर्योअजायत ॥ मुखादिंद्राग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्याआसीदंतरिक्षं ॥ शीर्ष्णोद्यौःसम

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वर्तत ॥ पद्भ्याभूमिर्दिशःश्रोत्रात् ॥ तथालोकाꣳअकल्पयन् ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्यवर्णंतमसस्तुपारे ॥ सर्वाणि
रूपाणिविचित्यधीरः ॥ नामानिकृत्वाभिवदन्यदास्ते ॥ धातापुरस्ताद्यमुदाजहार ॥ शक्रःप्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवंवि
द्वानमृतइहभवति ॥ नान्यःपंथाअयनायविद्यते ॥ यज्ञेनयज्ञमयजंतदेवाः ॥ तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानः
सचंते ॥ यत्रपूर्वेसाध्याःसंतिदेवाः ॥ पुरुषसूक्तꣳशिरसेस्वाहा ॥ अद्भ्यःसंभूतःपृथिव्यैरसाच्च ॥ विश्वकर्मणःसमवर्त
ताधि ॥ तस्यत्वष्टाविदधद्रूपमेति ॥ तत्पुरुषस्यविश्वमाजानमग्रे ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्यवर्णंतमसःपरस्तात् ॥
तमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाविद्यतेयनाय ॥ प्रजापतिश्चरतिगर्भेअंतः ॥ अजायमानोबहुधाविजायते ॥
तस्यधीराःपरिजानंतियोनिं ॥ मरीचीनांपदमिच्छंतिवेधसः ॥ योदेवेभ्यआतपति ॥ योदेवानांपुरोहितः ॥ पूर्वोयोदेवेभ्यो
जातः ॥ नमोरुचायब्राह्मये ॥ रुचंब्राह्मंजनयंतः ॥ देवाअग्रेतदब्रुवन् ॥ यस्त्वैवंब्राह्मणोविद्यात् ॥ तस्यदेवाअसन्वशे ॥
ह्रीश्चतेलक्ष्मीश्चपत्न्यौ ॥ अहोरात्रेपार्श्वे ॥ नक्षत्राणिरूपं ॥ अश्विनौव्यात्तं ॥ इष्टंमनिषाण ॥ अमुंमनिषाण ॥ सर्वंमनिषाण ॥
उत्तरनारायणꣳशिखायवषट् ॥ ॐ आशुःशिशानोवृषभोनयुध्मोघनाघनःक्षोभणश्चर्षणीनां ॥ संक्रंदनोनिमिषएकवीरःश
तꣳसेनाअजयत्साकमिंद्रः ॥ संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना ॥ तादिंद्रेणजयततत्सहध्वंयुधोनरइ
षुहस्तेनवृष्णा ॥ सइषुहस्तैःसनिषंगिभिर्वशीसꣳस्रष्टासयुधइंद्रोगणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभि
रस्ता ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राꣳअपबाधमानः ॥ प्रभंजन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यविताराथानां ॥ गोत्र
भिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा ॥ इमꣳसजाताअनुवीरयध्वमिंद्रꣳसखायोनुसꣳरभध्वं ॥ बलविज्ञायस्थविरःप्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वीरःसहस्वान्वाजीसहमानउग्रः ॥ अभिवीरोअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित् ॥ अभिगोत्राणिसहसागाहमानोदा
योवीरःशतमन्युरिंद्रः ॥ दुश्यवनःपृतनाषाडयुध्योस्माकꣳसेनाअवतुप्रयुत्सु ॥ इंद्रंआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः॥
देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रे ॥ इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुताꣳशर्धउग्रं ॥ महामनसांभुवनच्यु
वानांघोषोंदेवानांजयतामुदस्थात् ॥ अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु ॥ अस्माकंवीराउत्तरेभवंत्वस्मान्देवाअ
वताहवेषु ॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमहाꣳसि ॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतामेतुघोषः ॥ उपप्रे
तजयतानरःस्थिरावःसंतुबाहवः ॥ इंद्रोवःशर्मयच्छत्वनाधृष्यायथासथ ॥ अवसृष्टापरापतशरव्येब्रह्मसꣳशिता ॥ गच्छामि
त्रान्प्रविशमैषांकंचनोच्छिषः ॥ मर्माणितेवर्मभिश्छादयामिसोमस्त्वाराजामृतेनाभिवस्तां ॥ उरोवरीयोवरिवस्तेअस्तुजयंतंत्वा
मनुमदंतुदेवाः ॥ यत्रबाणाःसंपतंतिकुमाराविशिखाइव ॥ इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयच्छतु ॥ कवचायहुं ॥ ॐ त्वमग्नेरुद्रो
असुरोमहोदिवः ॥ त्वꣳशर्धोमारुतंपृक्षईशिषे ॥ त्वंवातैररुणैर्यासिशंगयः ॥ त्वंपूषाविधतःपासिनुत्मना ॥ देवादेवेषुश्रयध्वं ॥
प्रथमाद्वितीयेषुश्रयध्वं ॥ द्वितीयास्तृतीयेषुश्रयध्वं ॥ तृतीयाश्चतुर्थेषुश्रयध्वं ॥ चतुर्थाःपंचमेषुश्रयध्वं ॥ पंचमाःषष्ठेषुश्रयध्वं ॥
षष्ठाःसप्तमेषुश्रयध्वं ॥ सप्तमाअष्टमेषुश्रयध्वं ॥ अष्टमानवमेषुश्रयध्वं ॥ नवमादशमेषुश्रयध्वं ॥ दशमाएकादशेषुश्रयध्वं ॥
एकादशाद्वादशेषुश्रयध्वं ॥ द्वादशात्रयोदशेषुश्रयध्वं ॥ त्रयोदशाश्चतुर्दशेषुश्रयध्वं ॥ चतुर्दशाःपंचदशेषुश्रयध्वं ॥ पंचद
शाःषोडशेषुश्रयध्वं ॥ षोडशाःसप्तदशेषुश्रयध्वं ॥ सप्तदशाअष्टादशेषुश्रयध्वं ॥ अष्टादशाएकान्नविꣳशेषुश्रयध्वं ॥ एकान्न

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विꣳशाविꣳशेषुश्रयध्वं ॥ विꣳशाएकविꣳशेषुश्रयध्वं ॥ एकविꣳशाद्द्वाविꣳशेषुश्रयध्वं ॥ द्वाविꣳशात्त्रयोविꣳशेषुश्रयध्वं ॥ त्र
योविꣳशाश्चतुर्विꣳशेषुश्रयध्वं ॥ चतुर्विꣳशाःपञ्चविꣳशेषुश्रयध्वं ॥ पञ्चविꣳशाःषड्विꣳशेषुश्रयध्वं ॥ षड्विꣳशाःसप्तविꣳशेषु
श्रयध्वं ॥ सप्तविꣳशाअष्टाविꣳशेषुश्रयध्वं ॥ अष्टाविꣳशाएकान्नत्रिꣳशेषुश्रयध्वं ॥ एकान्नत्रिꣳशात्त्रिꣳशेषुश्रयध्वं ॥ त्रिꣳशा
एकत्रिꣳशेषुश्रयध्वं ॥ एकत्रिꣳशाद्द्वात्रिꣳशेषुश्रयध्वं ॥ द्वात्रिꣳशात्त्रयस्त्रिꣳशेषुश्रयध्वं ॥ देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिꣳशाः ॥
उत्तरेभवत ॥ उत्तरवर्मानउत्तरसत्वानः ॥ यत्कामइदंजुहोमि ॥ तन्मेसमृध्यतां ॥ वयꣳस्यामपतयोरयीणां ॥ ॐ भूर्भुवः
सुवःस्वाहा शतरुद्रीयꣳअस्त्रायफट्॥ ॐ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मै
देवायहविषाविधेम ॥ यःप्राणतोनिमिषतोमहित्वैकइद्राजाजगतोबभूव ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम॥
ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ महीद्यौःपृथि
वीचनइमंयज्ञंमिमिक्षतां ॥ पिपृतांनोभरीमभिः ॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुतांविष्टितंजगत् ॥ सदुदुभेसजूरिंद्रेण
देवैर्दूराद्दवीयोअपसेधशत्रून् ॥ अग्नेनयसुपथाराये अस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेन
मउक्तिंविधेम ॥ यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानं ॥ अच्छावसूनिकृण्वन्नस्मेनयापुरूणि ॥ यज्ञोभूत्वायज्ञमासीदस्वां
योनिं ॥ जातवेदोभुवआजायमानःसक्षयएहि ॥ इमंयमप्रस्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः ॥ आत्वामंत्राःकविश
स्तावहंत्वेनाराजन्हविषामादयस्व ॥ उरसाशिरसादृष्ट्यामनसावचसातथा ॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगउच्यते ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३५ ॥ लघुन्यासः ॥

प्रजननेब्रह्मातिष्ठतु ॥ पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयोर्हरस्तिष्ठतु ॥ बाह्वोरिंद्रस्तिष्ठतु ॥ जठरेअग्निस्तिष्ठतु ॥ हृदयेशिवस्तिष्ठतु ॥ कंठेवसवस्तिष्ठंतु ॥ वक्त्रेसरस्वतीतिष्ठतु ॥ नासिकयोर्वायुस्तिष्ठतु ॥ नयनयोःसूर्याचंद्रमसौतिष्ठतां ॥ कर्णयोरश्विनौदेवौतिष्ठतां ॥ ललाटेरुद्रास्तिष्ठंतु ॥ मूर्ध्न्यादित्यास्तिष्ठंतु ॥ शिरसिमहादेवस्तिष्ठतु ॥ शिखायांचामुंडातिष्ठतु ॥ पृष्ठेपिनाकीतिष्ठतु ॥ पुरतःशूलीतिष्ठतु ॥ पार्श्वयोःशिवाशंकरौतिष्ठतां ॥ सर्वतोवायुस्तिष्ठतु ॥ ततोबहिःसर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठतु ॥ सर्वेष्वंगेषुसर्वादेवतायथायथास्थानानितिष्ठंतु ॥ मा॑ऽरक्षंतु ॥ यजमान॑ऽरक्षंतु ॥ अग्निर्मे॑वाचिश्रितः॥ वाग्घृहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ वायुर्मे॑प्राणेश्रितः ॥ प्राणोहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ सूर्यो॑मे॒चक्षुषि श्रितः ॥ चक्षुर्हृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ चंद्रमा॑मे॒मनसिश्रितः ॥ मनोहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ दिशो॑मे॒श्रोत्रेश्रिताः ॥ श्रोत्र॑ऽहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ आपो॑मे॒रेतसि श्रिताः ॥ रेतोहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ पृथि॒वीमे॒शरी॑रेश्रिता ॥ शरी॑र॑ऽहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ ओष॒धिव॒नस्प॒तयो॑मे॒लोम॑सुश्रिताः ॥ लोमा॑नि॒हृदये॥ हृद॑यंमयि॥ अहम॒मृते॥ अमृत॑ब्रह्मणि॥ इंद्रो॑मे॒बले॑श्रितः ॥ बल॑ऽहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते॥ अमृत॑ब्रह्मणि ॥ प॒र्ज॒न्यो॑मे॒मू॒र्ध्नि॑श्रितः ॥ मूर्धाहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ ईशा॑नोमे॒म॒न्यौश्रितः ॥ म॒न्युर्हृदये ॥ हृद॑यंमयि ॥ अहम॒मृते॥ अमृत॑ब्रह्मणि ॥ आत्मा॑म आत्मनिश्रितः ॥ आत्माहृदये ॥ हृद॑यंमयि ॥ अहम॒मृते ॥ अमृत॑ब्रह्मणि ॥ पुनर्म॑आत्मापुनरायुरागात् ॥ पुनःप्राणःपुन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

राकूतमागात् ॥ वैश्वानरोरश्मिभिर्वावृधानः ॥ अंतस्तिष्ठत्वमृतस्यगोपाः ॥ एवंसवंशरीरंस्पृशेत् ॥ अथात्मानंशिवात्मानंश्री
रुद्ररूपंध्यायेत् ॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं ॥ गंगाधरंदशभुजंसर्वाभरणभूषितं ॥ नीलग्रीवंशशांकांकंनागयज्ञोपवी
तिनं ॥ व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदं ॥ कमंडल्वक्षसूत्राभ्यामन्वितंशूलपाणिनं ॥ ज्वलंतंपिंगलजटाशिखमुद्योतका
रिणं ॥ अमृतेनाप्लुतंहृष्टमुमादेहार्धधारिणं ॥ दिव्यसिंहासनासीनंदिव्यभोगसमन्वितं ॥ दिग्देवतासमायुक्तंसुरासुरनमस्कृतं ॥
नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं ॥ सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणं ॥ एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत् ॥
आराधितोमनुष्यैस्त्वंसिद्धैर्देवासुरादिभिः ॥ आराधयामिभक्त्यात्वांमांगृहाणमहेश्वर ॥ आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैः
सहकेतुमद्भिर्वाताजवैर्बलवद्भिर्मनोजवैरायाहिशीघ्रंमर्महव्यायशर्वोम् ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसानकं ॥ तावत्त्वं
प्रीतिभावेनलिंगेस्मिन्सन्निधोभव ॥ शांतिदोभव ॥ सुप्रसन्नोभव ॥ वरदोभव ॥ ॥ छ ॥ ॥ छ ॥

॥ ३६ ॥ रुद्राध्यायः ॥

श्रीः ॥ (अस्यश्रीरुद्रस्यप्रश्नस्य ॥ अनुष्टुप्छंदस्य ॥ अघोरऋषिः ॥ संकर्षणमूर्तिस्वरूपोयोऽसावादित्यःपरमपुरुषःसएषरुद्रोदे
वता ॥ अग्निक्रतुचरमायामिष्टिकायाःशतरुद्रियजपेविनियोगः ॥ सकलस्यरुद्राध्यायस्य ॥ श्रीरुद्रोदेवता ॥ एकागायत्रीछंदः ॥
तिस्रोनुष्टुभस्तिस्रःपंक्तयः ॥ सप्तानुष्टुभौद्वेजगत्यौ ॥ परमेष्ठीऋषिः ॥ अग्नाविष्णूसजोषसेत्येकादशानामनुवाकाना ॥ अग्निः
कांडऋषिः ॥ आद्यागायत्री ॥ आग्नावैष्णवी ॥ शिष्टंयजुः ॥ वाजादयोन्नादिविशेषादेवताः ॥ महाविराट्छंदः ॥ नमःशंभवे
तिबीजं ॥ मयोभवेतिशक्तिः ॥ नमःशंकरायेतिबीजं ॥ मयस्करायेतिशक्तिः ॥ नमःशिवायेतिबीजं ॥ शिवतरायेतिशक्तिः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ कारोबीजं ॥ मायाशक्तिः ॥ ब्रह्माबीजं ॥ सुषुम्नाशक्तिः ॥ नमइषुकृन्द्योधन्वकृन्द्यइतिकीलकं ॥ अमुकदेवताप्रीत्यर्थंजपेऽभिषेकेवाविनियोगः) ॥ हरिः ॐ ॥ इडादेवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानिंशꣳसिषद्विश्वेदेवाः सूक्तवाचःपृथिविमातर्मामाहिꣳसीर्मधुमनिष्येमधुजनिष्येमधुवक्ष्यामिमधुवदिष्यामिमधुमतींदेवेभ्योवाचमुद्यासꣳशुश्रूषेण्यांमनुष्येभ्यस्तंमादेवाअवंतुशोभायैपितरोनुमदंतु ॥ नमोरुद्रेभ्यः॥ ॐ शांतिःशांतिःशांतिः ॥ ॥ ॐ नमस्तेरुद्रमन्यवउतोतइषवेनमः ॥ नमस्तेअस्तुधन्वनेबाहुभ्यांमुततेनमः । यातइषुःशिवतमाशिवंबभूवतेधनुः । शिवाशरव्यायातवतयानोरुद्रमृडय । यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहि । यामिषुंगिरिशंतहस्तेबिभर्ष्यस्तवे । शिवांगिरित्रतांकुरुमाहिꣳसीः पुरुषंजगत् ॥ शिवेनवचसात्वागिरिशाच्छावदामसि । यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाअसत् । अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् । अहीꣳश्चसर्वान्जंभयन्त्सर्वाश्चयातुधान्यः । असौयस्ताम्रोअरुणउतबभ्रुःसुमंगलः । येचेमाꣳरुद्राअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडईमहे । असौयोवसर्पतिनीलग्रीवोविलोहितः । उतैनंगोपाअदृश्रन्नदृशन्नुदहार्यः । उतैनंविश्वाभूतानिसदृष्टोमृडयातिनः । नमोअस्तुनीलग्रीवायसहस्राक्षायमीढुषे । अथोयेअस्यसत्वानोहंतेभ्योकरंनमः । प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्याँ । याश्चतेहस्तइषवःपराताभगवोवप । अवतत्यधनुस्त्वꣳसहस्राक्षशतेषुधे ॥ निशीर्यशल्यानांमुखाशिवोनःसुमनाभव । विज्यंधनुःकपर्दिनोविशल्योबाणवाꣳउत । अनेशन्नस्येषवआभुरस्यनिषंगथिः । यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः । तयास्मान्विश्वतस्त्वमयक्ष्मयापरिब्भुज । नमस्तेअस्त्वायुधायानातताय धृष्णवे । उभाभ्यांमुततेनमोबाहुभ्यांतवधन्वने । परितेधन्व

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नोहेतिरस्मान्वृणक्तुविश्वतः । अथोयइषुधिस्तवारेअस्मन्निधेहितं ॥ १ ॥ नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमोनमोवृक्षे
भ्योहरिकेशेभ्यःपशूनांपतयेनमोनमःसस्पिंजरायत्विषीमतेपथीनांपतयेनमोनमोबभ्लुशायविव्याधिनेऽन्नानांपतयेनमोनमोहरि
केशायोपवीतिनेपुष्टानांपतयेनमोनमोभवस्यहेत्यैजगतांपतयेनमोनमोरुद्रायातताविनेक्षेत्राणांपतयेनमोनमःसूतायाहंत्यायवनां
नांपतयेनमोनमोरोहितायस्थपतयेवृक्षाणांपतयेनमोनमोमंत्रिणेवाणिजायकक्षाणांपतयेनमोनमोभुवंतयेवारिवस्कृतायौषधीनांप
तयेनमोनमउच्चैर्घोषायाक्रंदयतेपत्तीनांपतयेनमोनमःकृत्स्नवीतायधावतेसत्वनांपतयेनमः॥२॥ नमःसहमानायनिव्याधिनऽआ
व्याधिनीनांपतयेनमोनमःककुभायनिषंगिणेस्तेनानांपतयेनमोनमोनिषंगिणऽइषुधिमतेतस्कराणांपतयेनमोनमोवंचतेपरिवंच
तेस्तायूनांपतयेनमोनमोनिचेरवेपरिचरायारण्यानांपतयेनमोनमःसृकाविभ्योजिघांसद्भ्योमुष्णतांपतयेनमोनमोऽसिमद्भ्योनक्तं
चरद्भ्यःप्रकृंतानांपतयेनमोनमउष्णीषिणेगिरिचरायकुलुंचानांपतयेनमोनमइषुमद्भ्योधन्वाविभ्यश्चवोनमोनमआतन्वानेभ्यः
प्रतिदधानेभ्यश्चवोनमोनमआयच्छद्भ्योविसृजद्भ्यश्चवोनमोनमोऽस्यद्भ्योविध्यद्भ्यश्चवोनमोनमआसीनेभ्यःशयानेभ्यश्चवोनमोन
मःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमःसभाभ्यःसभापतिभ्यश्चवोनमोनमोअश्वेभ्योश्वपतिभ्यश्चवोनमः
॥ ३ ॥ नमआव्याधिनीभ्योविविध्यंतीभ्यश्चवोनमोनमउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमो
व्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगणेभ्योगणपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमोमहद्भ्यःक्षुल्लकेभ्यश्चवो
नमोनमोरथिभ्योरथेभ्यश्चवोनमोनमोरथेभ्योरथपतिभ्यश्चवोनमोनमःसेनाभ्यःसेनानिभ्यश्चवोनमोनमःक्षत्तृभ्यःसंगृहीतृभ्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्ववोनमोनमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्मारेभ्यश्चवोनमोनमःपुंजिष्टेभ्योनिषादेभ्यश्चवोनमोनमोऽइषुकृद्भ्यो
धन्वकृद्भ्यश्चवोनमोनमोमृगयुभ्यःश्वनिभ्यश्चवोनमोनमःश्वभ्यःश्वपतिभ्यश्चवोनमः ॥ ४ ॥ नमोभवायचरुद्रायचनमःशर्वायच
चपशुपतयेचनमोनीलग्रीवायचशितिकंठायचनमःकपर्दिनेचव्युप्तकेशायचनमःसहस्राक्षायचशतधन्वनेचनमोगिरिशायचशि
पिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसंवृध्वनेचनमोअग्रियायचप्र
थमायचनमआशवेचाजिरायचनमःशीघ्रियायचशीभ्यायचनमऊर्म्यायचावस्वन्यायचनमःस्रोतस्यायचद्वीप्यायच ॥ ५ ॥ नमो
ज्येष्ठायचकनिष्ठायचनमःपूर्वजायचापरजायचनमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्नियायचनमःसोभ्यायचप्रतिस
र्यायचनमोयाम्यायचक्षेम्यायचनमउर्वर्यायचखल्यायचनमःश्लोक्यायचावसान्यायचनमोवन्यायचकक्ष्यायचनमःश्रवायचप्र
तिश्रवायचनमआशुषेणायचाशुरथायचनमःशूरायचावभिंदतेचनमोवर्मिणेचवरूथिनेचनमोबिल्मिनेचकवचिनेचनमःश्रुताय
चश्रुतसेनायच ॥ ६ ॥ नमोदुंदुभ्यायचाहनन्यायचनमोधृष्णवेचप्रमृशायचनमोदूतायचप्रहितायचनमोनिषंगिणेचेषुधिमतें
चनमस्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायचसुधन्वनेचनमःस्रुत्यायचपथ्यायचनमःकाट्यायचनीप्यायचनमःसूद्यायचसरस्या
यचनमोनाद्यायचवैशंतायचनमःकूप्यायचावट्यायचनमोवर्ष्यायचावर्ष्यायचनमोमेघ्यायचविद्युत्यायचनमईध्रियायचातप्या
यचनमोवात्यायचरेष्मियायचनमोवास्तव्यायचवास्तुपायच ॥ ७ ॥ नमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशंगा
यचपशुपतयेचनमउग्रायचभीमायचनमोअग्रेवधायचदूरेवधायचनमोहंत्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारायनमः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शंभवेचमयोभवेचनमःशंकरायचमयस्करायचनमःशिवायचशिवतरायचनमस्तीर्थ्यायचकूल्यायचनमःपार्यायचावार्यायचनमः
प्रतरणायचोत्तरणायचनमआतार्यायचालाद्यायचनमःशष्प्यायचफेन्यायचनमःसिकत्यायचप्रवाह्यायच ॥८॥नमइरिण्यायचप्र
पथ्यायचनमःकिंशिलायचक्षयणायचनमःकपर्दिनेचपुलस्तयेचनमोगोष्ठ्यायचगृह्यायचनमस्तल्प्यायचगेह्यायचनमःकाट्याय
चगह्वरेष्ठायचनमोह्रदय्यायचनिवेष्प्यायचनमःपांसव्यायचरजस्यायचनमःशुष्क्यायचहरित्यायचनमोलोप्यायचोलप्यायच
नमऊर्व्यायचसूर्म्यायचनमःपर्ण्यायचपर्णशद्यायचनमोपगुरमाणायचाभिघ्नतेचनमऽआख्खिदतेचप्रख्खिदतेचनमोवःकिरिके
भ्योदेवानाहृदयेभ्योनमोविक्षीणकेभ्योनमोविचिन्वत्केभ्योनमआनिर्हतेभ्योनमआमीवत्केभ्यः ॥ ९ ॥ द्रापेअंधसस्पतेदरिद्रं
नीललोहित ॥ एषांपुरुषाणामेषांपशूनांमाभेर्मारोमोएषांकिंचनाममत् ॥ यातेरुद्रशिवातनूःशिवाविश्वाहभेषजी ॥ शिवारुद्र
स्यभेषजीतयानोमृडजीवसे ॥ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतिं ॥ यथानःशमसद्विपदेचतुष्पदेविश्वंपुष्टंग्रामे
अस्मिन्ननातुरं ॥ मृडानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधेमते ॥ यच्छंचयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीतौ ॥
मानोमहांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं ॥ मानोवधीःपितरंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषः ॥ मानस्तोकेत
नयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ आरात्तेगोघ्नउतपूरुषघ्ने
क्षयद्वीरायसुम्नमस्मेतेअस्तु ॥ रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयच्छद्विबर्हाः ॥ स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुं
मुग्रं ॥ मृडाजरित्रेरुद्रस्तवानोअन्यंतेअस्मन्निवपंतुसेनाः ॥ परिणोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्मतिरघायोः ॥ अवस्थिरामघव

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ऋस्तनुष्वमीढ्वस्तोकायतनयायमृडय ॥ मीढुष्टमशिवतमशिवोनःसुमनाभव ॥ परमेवृक्षआयुधंनिधायकृत्तिंवसानआचरपिनाकंबिभ्रदागहि ॥ विकिरिदविलोहितनमस्तेअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्यमस्मन्निवपंतुताः ॥ सहस्राणिसहस्रधाबाहुवोस्तवहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ १० ॥ सहस्राणिसहस्रशोयेरुद्राअधिभूम्यां ॥ तेषांसहस्रयोजनेवधन्वानितन्मसि ॥ अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि ॥ नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः ॥ नीलग्रीवाःशितिकंठादिवंरुद्राउपश्रिताः ॥ येवृक्षेषुसस्पिंजरानीलग्रीवाविलोहिताः ॥ येभूतानामधिपतयोविशिखासःकपर्दिनः ॥ येअन्नेषुविविध्यंतिपात्रेषुपिबतोजनान् ॥ येपथांपथिरक्षयऐलबृदायव्युधः ॥ येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः ॥ यएतावंतश्चभूयांसश्चदिशोरुद्रावितस्थिरे ॥ तेषांसहस्रयोजनेवधन्वानितन्मसि ॥ नमोरुद्रेभ्योयेपृथिव्यांयेंतरिक्षेयेदिवियेषामन्नंवातोवर्षमिषवस्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ ११ ॥ ॥ ॐ अन्नाविष्णूसजोषसेमावर्धंतुवांगिरः ॥ द्युम्नैर्वाजेभिरागतं ॥ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रावश्चमेश्रुतिश्चमेज्योतिश्चमेसुवश्चमेप्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तंचमआधीतंचमेवाक्चमेमनश्चमेचक्षुश्चमेश्रोत्रंचमेदक्षश्चमेबलंचमओजश्चमेसहश्चमआयुश्चमेजरात्चमआत्माचमेतनूश्चमेशर्मचमेवर्मचमेंऽगानिचमेस्थानिंचमेपरूंषिचमेशरीराणिचमे ॥१॥ ज्यैष्ठ्यंचमआधिपत्यंचमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्ष्माचमेद्राघुयाचमेवृद्धंचमेवृद्धिश्चमेसत्यंचमेश्रद्धाचमेजगच्चमेधनंचमेवशश्चमेत्विषिश्चमेक्रीडाचमेमोदश्चमेजातंचमेजनिष्यमाणंच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

मेसूक्तंचमेसुकृतंचमेवित्तंचमेवेद्यंचमेभूतंचमेभविष्यच्चमेसुगंचमेसुपथंचमेऋद्धंचमेऋद्धिश्चमेक्लृप्तिश्चमेमतिश्चमेसुमतिश्च
मे ॥२॥ शंचमेमयश्चमेप्रियंचमेनुकामश्चमेकामश्चमेसौमनसश्चमेभद्रंचमेश्रेयश्चमेवस्यश्चमेयशश्चमेभगश्चमेद्रविणंचमेयंताचमेध
र्ताचमेक्षेमश्चमेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्रसूश्चमेसीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंचमेऽनामयच्चमे
जीवातुश्चमेदीर्घायुत्वंचमेऽनमित्रंचमेभयंचमेसुगंचमेशयनंचमेसूषाचमेसुदिनंचमे ॥ ३ ॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतं
चमेमधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रंचमऔद्भिद्यंचमेरयिश्चमेरायश्चमेपुष्टंचमेपुष्टिश्चमेविभुचमेप्रभुचमेबहुच
मेभूयश्चमेपूर्णंचमेपूर्णतरंचमेक्षितिश्चमेकूयवाश्चमेन्नंचमेक्षुच्चमेव्रीहयश्चमेयवाश्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेगोधूमा
श्चमेमसुराश्चमेप्रियंगवश्चमेऽणवश्चमेश्यामाकाश्चमेनीवाराश्चमे ॥ ४ ॥ अश्माचमेमृत्तिकाचमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेव
नस्पतयश्चमेहिरण्यंचमेयश्चमेसीसंचमेत्रपुश्चमेश्यामंचमेलोहंचमेग्निश्चमआपश्चमेवीरुधश्चमओषधयश्चमेकृष्टपच्यंचमेकृष्टपच्यं
चमेग्राम्याश्चमेपशवआरण्याश्चयज्ञेनकल्पंतांवित्तंचमेवित्तिश्चमेभूतंचमेभूतिश्चमेवसुचमेवसतिश्चमेकर्मचमेशक्तिश्चमेऽर्थश्चमएम
श्चमइतिश्चमेगतिश्चमे ॥ ५ ॥ अग्निश्चमइंद्रश्चमेसोमश्चमइंद्रश्चमेसविताचमइंद्रश्चमेसरस्वतीचमइंद्रश्चमेपूषाचमइंद्रश्चमेबृहस्प
तिश्चमइंद्रश्चमेमित्रश्चमइंद्रश्चमेवरुणश्चमइंद्रश्चमेत्वष्टाचमइंद्रश्चमेधाताचमइंद्रश्चमेविष्णुश्चमइंद्रश्चमेऽश्विनौचमइंद्रश्चमेमरुत
श्चमइंद्रश्चमेविश्वेचमेदेवाइंद्रश्चमेपृथिवीचमइंद्रश्चमेंऽतरिक्षंचमइंद्रश्चमेद्यौश्चमइंद्रश्चमेदिशश्चमइंद्रश्चमेमूर्धाचमइंद्रश्चमेप्रजाप
तिश्चमइंद्रश्चमे ॥ ६ ॥ अंशुश्चमेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमउपांशुश्चमेंतर्यामश्चमऐंद्रवायवश्चमेमैत्रावरुणश्चमआश्विन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमंथीचमआग्रयणश्चमेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमेऋतुग्रहाश्चमेतिग्राह्याश्चमऐंद्राग्नश्चमेवैश्वदे
वश्चमेमरुत्वतीयाश्चमेमाहेंद्रश्चमआदित्यश्चमेसावित्रश्चमेसारस्वतश्चमेपौष्णश्चमेपात्नीवतश्चमेहारियोजनश्चमे ॥ ७ ॥ इध्मश्च
मेबर्हिश्चमेवेदिश्चमेधिष्णियाश्चमेस्रुचश्चमेचमसाश्चमेग्रावाणश्चमेस्वरवश्चमऊपरवाश्चमेधिषवणेचमेद्रोणकलशश्चमेवायव्यानिच
मेपूतभृच्चमआधवनीयश्चमआग्नीध्रंचमेहविर्धानंचमेगृहाश्चमेसदश्चमेपुरोडाशाश्चमेपचताश्चमेऽवभृथश्चमेस्वगाकारश्चमे ॥ ८ ॥
अग्निश्चमेघर्मश्चमेऽर्कश्चमेसूर्यश्चमेप्राणश्चमेश्वमेधश्चमेपृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेशकरीरंगुलयोदिशश्चमेयज्ञेनकल्पंता
मृक्चमेसामचमेस्तोमश्चमेयजुश्चमेदीक्षाचमेतपश्चमऋतुश्चमेव्रतंचमेहोरात्रयोर्वृष्ट्याबृहद्रथंतरेचमेयज्ञेनकल्पेतां ॥ ९ ॥ गर्भाश्च
मेवत्साश्चमेत्र्यविश्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपंचाविश्चमेपंचावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्यवाट्चमेतुर्यौहीचमे
पष्ठवाच्चमेपष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमेवेहच्चमेऽनड्वान्चमेधेनुश्चमआयुर्यज्ञेनकल्पतांप्राणोयज्ञेनकल्पतामपानोय
ज्ञेनकल्पतांव्यानोयज्ञेनकल्पतांचक्षुर्यज्ञेनकल्पताꣳश्रोत्रंयज्ञेनकल्पतांमनोयज्ञेनकल्पतांवाग्यज्ञेनकल्पतामात्मायज्ञेनकल्पतांय
ज्ञोयज्ञेनकल्पतां ॥ १० ॥ एकाचमेतिस्रश्चमेपंचचमेसप्तचमेनवचमएकादशचमेत्रयोदशचमेपंचदशचमेसप्तदशचमेनवदश
चमएकविꣳशतिश्चमेत्रयोविꣳशतिश्चमेपंचविꣳशतिश्चमेसप्तविꣳशतिश्चमेनवविꣳशतिश्चमएकत्रिꣳशच्चमेत्रयस्त्रिꣳशच्चमेचत
स्रश्चमेष्टौचमेद्वादशचमेषोडशचमेविꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेचत्वारिꣳशच्चमे
चतुश्चत्वारिꣳशच्चमेष्टाचत्वारिꣳशच्चमेवाजश्चप्रसवश्चापिजश्चक्रतुश्चसुवश्चमूर्धाचव्यश्नियश्चांत्यायनश्चांत्यश्चभौवनश्चभुवनश्चा
धिपतिश्च ॥ ११ ॥ इडादेवहूर्मनु० ॥ इतिरुद्राध्यायःसमाप्तः ॥

॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३७ ॥ सुवर्णघर्मानुवाकः ॥

श्रीः ॥ ॐ सुवर्णघर्मंपरिवेदवेनं ॥ इंद्रस्यात्मानंदशधाचरंतं ॥ अंतःसमुद्रेमनसाचरंतं ॥ ब्रह्मान्वविंदद्दशहोतारमर्णं ॥ अंतः प्रविष्टःशास्ताजनानां ॥ एकःसन्बहुधाविचारः ॥ शतꣳशुक्राणियत्रैकंभवंति ॥ सर्वेवेदायत्रैकंभवंति ॥ सर्वेहोतारोयत्रैकंभवंति ॥ समानसीनआत्माजनानां ॥ १ ॥ अंतःप्रविष्टःशास्ताजनानाꣳसर्वात्मा ॥ सर्वाःप्रजायत्रैकंभवंति ॥ चतुर्होतारोयत्रसंपदंगच्छंतिदेवैः ॥ समानसीनआत्माजनानां ॥ ब्रह्मेंद्रमग्निंजगतःप्रतिष्ठां ॥ दिवआत्मानꣳसवितारंबृहस्पतिं ॥ चतुर्होतारंप्रदिशोनुकृप्तं ॥ वाचोवीर्यंतपसान्वविंदत् ॥ अंतःप्रविष्टंकर्तारमेतं ॥ त्वष्टारꣳरूपाणिविकुर्वंतंविपश्चिं ॥ २ ॥ अमृतस्यप्राणंयज्ञमेतं ॥ चतुर्होतृणामात्मानंकवयोनिचिक्युः ॥ अंतःप्रविष्टंकर्तारमेतं ॥ देवानांबंधुंनिहितंगुहासु ॥ अमृतेनकृप्तंयज्ञमेतं ॥ चतुर्होतृणामात्मानंकवयोनिचिक्युः ॥ शतंनियुतःपरिवेद्विश्वाविश्ववारः ॥ विश्वमिदंवृणाति ॥ इंद्रस्यात्मानिहितःपंचहोता ॥ अमृतंदेवानामायुःप्रजानां ॥ ३ ॥ इंद्रꣳराजानꣳसवितारमेतं ॥ वायोरात्मानंकवयोनिचिक्युः ॥ रश्मिꣳरश्मीनांमध्येतपंतं ॥ क्रुतस्यपदेकवयोनिपाति ॥ यआंडकोशेभुवनंबिभर्ति ॥ अनिर्भिण्णःसन्नथलोकान्विचष्टे ॥ यस्यांडकोशꣳशुष्ममाहुःप्राणमुल्बं ॥ तेनकृप्तोमृतेनाहमस्मि ॥ सुवर्णकोशꣳरजसापरीवृतं ॥ देवानांवसुधानीविराजं ॥ ४ ॥ अमृतस्यपूर्णांतामुकलांविचक्षते ॥ पादꣳषड्धोतुर्नकिलाविवित्से ॥ येनर्तवःपंचधोतकृप्ताः ॥ उतवाषड्धामनसोतकृप्ताः ॥ तꣳषड्धोतारमृतुभिःकल्पमानं ॥ क्रुतस्यपदेकवयोनिपाति ॥ अंतःप्रविष्टंकर्तारमेतं ॥ अंतश्चंद्रमसिमनसाचरंतं ॥ सहैवसंतंनविजानंतिदेवाः ॥ इंद्रस्यात्मानꣳशतधाचरंतं ॥ ५ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इंद्रोराजाजगतोयईशे ॥ सप्तहोतासप्तधाविक्लृप्तः ॥ परेणतंतुंपरिषिच्यमानं ॥ अंतरादित्येमनसाचरंतं ॥ देवानाऽहृदयंब्रह्मा न्वविंदत् ॥ ब्रह्मैतद्ब्राह्मणउज्जभार ॥ अर्कऽश्चोतंतऽसरिरस्यमध्ये ॥ आयस्मिन्त्सप्तपेरवः ॥ मेहंतिबहुलाऽश्रियं ॥ बह्वश्वामिंद्रगोमतीं ॥ ६ ॥ अच्युतांबहुलाऽश्रियं ॥ सहरिर्वसुवित्तमः ॥ पेरुरिंद्रायपिन्वते ॥ बह्वश्वामिंद्रगोमतीं ॥ अच्युतांबहुलाऽश्रियं ॥ मह्यमिंद्रोनियच्छतु ॥ शतऽशताअस्ययुक्ताहरीणां ॥ अर्वाङयातुवसुभीरश्मिरिंद्रः ॥ प्रमऽहमाणोबहुलाऽश्रियं ॥ रश्मिरिंद्रःसवितामेनियच्छतु ॥ ७ ॥ घृतंतेजोमधुमदिंद्रियं ॥ मय्ययमग्निर्दधातु ॥ हरिःपतंगःपटरीसुपर्णः ॥ दिविक्षयोनभसायएति ॥ सनइंद्रःकामवरंददातु ॥ पंचारंचक्रंपरिवर्ततेपृथु ॥ हिरण्यज्योतिःसरिरस्यमध्ये ॥ अजस्रंज्योतिर्नभसासर्पदेति ॥ सनइंद्रःकामवरंददातु ॥ सप्तयुंजंतिरथमेकचक्रं ॥ ८ ॥ एकोअश्वोवहतिसप्तनामा ॥ त्रिनाभिचक्रमजरमनर्वं ॥ येनेमाविश्वाभुवनानितस्थुः ॥ भद्रंपश्यंतउपसेदुरग्रे ॥ तपोदीक्षामृषयःसुवर्विदः ॥ ततःक्षत्रंबलमोजश्चजातं ॥ तदस्मैदेवाअभिसन्नमंतु ॥ श्वेतऽ रश्मिंबोभुज्यमानं ॥ अपांनेतारंभुवनस्यगोपां ॥ इंद्रंनिचिक्युःपरमेव्योमन् ॥ ९ ॥ रोहिणीःपिंगलाएकरूपाः ॥ क्षरंतीःपिंगलाएकरूपाः ॥ शतऽसहस्राणिप्रयुतानिनाव्यानां ॥ अयंयःश्वेतोरश्मिः ॥ परिसर्वंमिदंजगत् ॥ प्रजांपशून्धनानि ॥ अस्माकंददातु ॥ श्वेतोरश्मिःपरिसर्वंबभूव ॥ सुवन्मह्यंपशून्विश्वरूपान् ॥ पतंगमक्तमसुरस्यमायया ॥ १० ॥ हृदापश्यंतिमनसामनीषिणः ॥ समुद्रेअंतःकवयोविचक्षते ॥ मरीचीनांपदमिच्छंतिवेधसः ॥ पतंगोवाचंमनसाबिभर्ति ॥ तांगंधर्वोवदद्गर्भेअंतः ॥ तांद्योतमानाऽस्वर्यंमनीषां ॥ ऋतस्यपदेकवयोनिपांति ॥ येग्राम्याःपशवोविश्वरूपाः ॥ विरूपाःसंतोबहुधैकरूपाः ॥ अग्नि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्ताꣳअग्रेप्रमुमोक्तुदेवः ॥ ११ ॥ प्रजापतिःप्रजयासंविदानः ॥ वीतꣳस्तुकेस्तुके ॥ युवमस्मासुनियच्छतं॥ प्रप्रयज्ञपतितिर ॥
येग्राम्याःपशवोविश्वरूपाः ॥ विरूपाःसंतोबहुधैकरूपाः ॥ तेषाꣳसप्तानामिहरंतिरस्तु ॥ रायस्पोषायसुप्रजास्त्वायसुवीर्यायं ॥
यआरण्याःपशवोविश्वरूपाः ॥ विरूपाःसंतोबहुधैकरूपाः ॥ १२ ॥ वायुस्ताꣳअग्रेप्रमुमोक्तुदेवः ॥ प्रजापतिःप्रजयासंविदा
नः ॥ इडायैसूप्तंघृतवच्चराचरं ॥ देवाअन्वविंदन्गुहाहितं ॥ यआरण्याःपशवोविश्वरूपाः ॥ विरूपाःसंतोबहुधैकरूपाः ॥
तेषाꣳसप्तानामिहरंतिरस्तु ॥ रायस्पोषायसुप्रजास्त्वायसुवीर्यायं ॥ १३ ॥ इतिसुवर्णधर्मानुवाकः ॥ ॥ छ ॥

॥ ३८ ॥ श्रीसूक्तप्रारंभः ॥

श्रीः ॥ हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य ॥ आनंदकर्दमचिक्लीतेंदिरासुताऋषयः ॥ श्रीर्देवता ॥ आद्यास्तिस्रोनुष्टुभः ॥
चतुर्थीप्रस्तारपंक्तिः ॥ पंचमीषष्ठ्यौत्रिष्टुभौ ॥ ततोष्टावनुष्टुभः ॥ अंत्याप्रस्तारपंक्तिः ॥ जपेविनियोगः ॥ हरिः ॐ ॥ हिरण्य
वर्णांहरिणींसुवर्णरजतस्रजां ॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरं
ण्यंविंदेयंगामश्वंपुरुषानहं ॥ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीं ॥ श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषतां ॥ कांसोस्मितांहिरं
ण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं ॥ पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ॥ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टा
मुदारां ॥ तांपद्मिनीमींशरणमहंप्रपद्येऽलक्ष्मीर्मेनश्यतांत्वांवृणे ॥ १ ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ॥
तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ॥ प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ङ्किंददातुमे ॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं ॥ अभूतिमसमृद्धिंचसर्वान्निर्णुदमेगृहात् ॥ गंधद्वारांदुराधर्षांनित्यपुष्टां करीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥ मनसःकाममाकूतिंवाचःसत्यमशीमहि ॥ पशूनांरूपमन्नस्यमयिश्रीःश्रय तांयशः ॥ २ ॥ कर्दमेनप्रजाभूतामयिसंभवकर्दम ॥ श्रियंवासयमेकुलेमातरंपद्ममालिनीं ॥ आपःस्रजंतुस्निग्धानिचिक्लीतवस मेगृहे ॥ निचदेवींमातरंश्रियंवासयमेकुले ॥ आर्द्रांयःकरिणींयष्टिंसुवर्णांहेममालिनीं ॥ सूर्यांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ आर्द्रांपुष्करिणींपुष्टिंपिंगलांपद्ममालिनीं ॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं ॥ ३ ॥ यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं ॥ सूक्तंपंचदशर्चंचश्रीका मःसततंजपेत् ॥ (पद्माननेपद्मऊरूपद्माक्षीपद्मसंभवे ॥ तन्मेभजासिपद्माक्षियेनसौख्यंलभाम्यहं ॥ अश्वदायैगोदायैधनदायै महाधने ॥ धनंमेलभतांदेविसर्वकामांश्चदेहिमे ॥ पद्माननेपद्मविपद्मपत्रेपद्मप्रियेपद्मदलायताक्षि ॥ विश्वप्रियेविश्वमनोनुकूले त्वत्पादपद्ममयिसंनिधत्स्व ॥ पुत्रपौत्रधनंधान्यंहस्त्यश्वादिगवेरथं ॥ प्रजानांभवसीमाताआयुष्मंतंकरोतुमे ॥ धनमग्निर्धनंवा युर्धनंसूर्योधनंवसुः ॥ धनमिंद्रोबृहस्पतिर्वरुणंधनमस्तुते ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा ॥ सोमंधनस्यसोमिनोमह्यंददा तुसोमिनः ॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः ॥ भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥ सरसिजनिलयेसरोजहस्ते धवलतरांशुकगंधमाल्यशोभे ॥ भगवतिहरिवल्लभेमनोज्ञेत्रिभुवनभूतिकरिप्रसीदमह्यं ॥ विष्णुपत्नींक्षमांदेवींमाधवींमाधव प्रियां ॥ लक्ष्मींप्रियसखींदेवींनमाम्यच्युतवल्लभां ॥ महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि ॥ तन्नोलक्ष्मीःप्रचोदयात् ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्शोभमानंमहीयते ॥ धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ इतिश्रीसूक्तं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३९ ॥ नारायणाथर्वशीर्षम् ॥

श्रीः ॥ ॐ [1]अथपुरुषोहवैनारायणोऽकामयतप्रजाःसृजेयेति । नारायणात्प्राणोजायते । मनःसर्वेंद्रियाणिच । खंवायुर्ज्योतिरा
पःपृथिवीविश्वस्यधारिणी । नारायणाद्ब्रह्माजायते । नारायणाद्विष्णुर्जायते । नारायणाद्रुद्रोजायते ।नारायणादिंद्रोजायते ।
नारायणात्प्रजापतिःप्रजायते । नारायणाद्वादशादित्यारुद्रावसवःसर्वाणिछंदांसि । नारायणाद्देवाःसमुत्पद्यंते । नारायणात्प्र
वर्तंते । नारायणेप्रलीयंते । अथादित्योनारायणः । ब्रह्मानारायणः । शिवश्चनारायणः । शक्रश्चनारायणः । कालश्चनारा
यणः । दिशश्चनारायणः । ऊर्ध्वंचनारायणः । अधश्चनारायणः । अंतर्बहिश्चनारायणः । नारायणएवेदꣳसर्वंयद्भूतंयच्चभा
व्यम् । निष्कलोनिरंजनोनिर्विकल्पोनिराख्यातःशुद्धोदेवएकोनारायणोनद्वितीयोऽस्तिकश्चित् । यएवंवेद । सविष्णुरेवभव
तिसविष्णुरेवभवति । ॐमित्यग्रेव्याहरेत् । नमइतिपश्चात् । नारायणायेत्युपरिष्टात् । ॐमित्येकाक्षरम् । नमइतिद्वेअक्षरे ।
नारायणायेतिपंचाक्षराणि । एतद्वैनारायणस्याष्टाक्षरंपदं । योहवैनारायणस्याष्टाक्षरंपदमध्येति । अनुपव्रतःसर्वमायुरेति ।
विंदतेप्रजांरायस्पोषंगौपत्यंततोऽमृतत्वमश्नुतेततोऽमृतत्वमश्नुतइति । प्रत्यगानंदंब्रह्मपुरुषंप्रणवस्वरूपं । अकारउकारोमकार
इति । तानेकधासंयोज्यतदेवतदोमिति । यमुक्त्वामुच्यतेयोगीजन्मसंसारबंधनात् । ॐनमोनारायणायेतिमंत्रोपासकःवैकुं
ठभुवनंगच्छति । तदिदंपरमंपुंडरीकंविज्ञानघनं । तस्मात्तडिदाभमात्रं । ब्रह्मण्योदेवकीपुत्रोब्रह्मण्योमधुसूदनः । सर्वभूतस्थ
मेकंवैनारायणम् । कारणरूपंपरब्रह्मकम् ॥ ॥ एतदथर्वशीर्षंयोऽधीते । सायमधीयानोदिवसकृतंपापंनाशयति । प्रातरधी

१ सर्वत्राथर्वशीर्षारंभेतेचभद्रंकर्णेभिः० स्वस्तिनइंद्र० इतिशांतिरवश्यंपठनीया ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यानोरात्रिकृतंपापंनाशयति । सायंप्रातःप्रयुंजानोअपापोभवति । मध्यंदिनमादित्याभिमुखोऽधीयानःसद्यःपंचमहापातकोपपातकेभ्योमुच्यते । सर्ववेदपारायणपुण्यंलभते । श्रीनारायणसायुज्यमवाप्नोति । यएवंवेद । इत्युपनिषत् ॥ इतिनारायणाथर्व०

॥ ४० ॥ शिवाथर्वशीर्षम् ॥

श्रीः ॥ ॐ देवाहवैस्वर्गलोकमायंस्तेरुद्रमपृच्छन्कोभवानिति ॥ सोऽब्रवीदहमेकःप्रथममासोद्वर्तामिचभविष्यामिचनान्यःकश्चिन्मत्तोव्यतिरिक्तइति । सोंऽतरादंतरंप्राविशद्दिशश्चांतरंप्राविशत्सोऽहंनित्यानित्योव्यक्ताव्यक्तोब्रह्माब्रह्माहंप्रांचःप्रत्यंचोऽहंदक्षिणांचउदंचोऽहमधश्चोर्ध्वश्चाहंदिशश्चप्रतिदिशश्चाहं पुमानपुमान्स्त्रियश्चाहंसावित्र्यहंगायत्र्यहंत्रिष्टुब्जगत्यनुष्टुप्चाहंछंदोऽहंस त्योऽहंगार्हपत्योदक्षिणाग्निराहवनीयोहंगौरहंगौर्यहमृगहंयजुरहं सामाहमथर्वांगिरसोऽहंज्येष्ठोऽहंश्रेष्ठोऽहंवरिष्ठोऽहमापोहंतेजोऽहंगुह्योऽहमरण्योऽहमक्षरमहंपुष्करमहंपवित्रमहमुग्रंच बलिश्चपुरस्ताज्ज्योतिरित्यहमेवसर्वेभ्योमामेवससर्वःसमायोमांवेदसदेवान्वेदसर्वांश्चवेदान्सांगानपि ब्रह्मब्राह्मणैश्चगांगोभिर्ब्राह्मणान्ब्राह्मणेनहविर्हविषाआयुरायुषासत्यंसत्येनधर्मेणधर्मंतर्पयामिस्वेनतेजसा । ततोहवैतेदेवारुद्रमपृच्छन्तेदेवारुद्रमपश्यन्तेदेवारुद्रमध्यायन्तेदेवाऊर्ध्वबाहवोरुद्रंस्तुवंति ॥ १ ॥ ॐ योवैरुद्रः सभगवान्यश्चब्रह्मातस्मैवैनमोनमः ॥ १ ॥ योवैरुद्रःसभगवान्यश्चविष्णुस्तस्मैवैनमोनमः ॥ २ ॥ योवैरुद्रःसभगवान्यश्चस्कंदस्तस्मै०॥ ३ ॥ योवैरुद्रःसभगवान्यश्चेंद्रस्तस्मैवैनमो०॥ ४ ॥ योवैरुद्रःसभगवान्यश्चाग्निस्तस्मै०॥ ५ ॥ योवैरुद्रःसभगवान्यश्च वायुस्तस्मैवैनमो०॥ ६ ॥ योवैरुद्रःसभगवान्यश्चसूर्यस्तस्मैवैनमो०॥ ७॥ योवैरुद्रःसभगवान्यश्चसोमस्तस्मैवैनमो० ॥ ८ ॥ यो वैरुद्रःसभगवान्येऽष्टौग्रहास्तस्मैवैनमो०॥ ९ ॥ योवैरुद्रःसभगवान्येचाष्टौप्रतिग्रहास्तस्मै०॥ १० ॥ योवैरुद्रःसभगवान्यच्च

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूस्तस्मैवैनमो० ॥ ११ ॥ योवैरुद्रःसभगवान्यच्चभुवस्तस्मै० ॥ १२ ॥ योवैरुद्रःसभगवान्यच्चस्वस्तस्मैवैनमो० ॥ १३ ॥
योवैरुद्रःसभगवान्यच्चमहस्तस्मै० ॥ १४ ॥ योवैरुद्रःसभगवान्याचपृथिवीतस्मै० ॥ १५ ॥ योवैरुद्रःसभगवान्यच्चांतरिक्षं
तस्मैवैनमो० ॥ १६ ॥ योवैरुद्रःसभगवान्याचद्यौस्तस्मै० ॥ १७ ॥ योवैरुद्रःसभगवान्याश्चापस्तस्मै० ॥ १८ ॥ योवैरुद्रः
सभगवान्यच्चतेजस्तस्मै० ॥ १९ ॥ योवैरुद्रःसभगवान्यश्चकालस्तस्मै० ॥२० ॥ योवैरुद्रःसभगवान्यश्चयमस्तस्मै० ॥ २१ ॥
योवैरुद्रःसभगवान्यश्चमृत्युस्तस्मै० ॥ २२ ॥ योवैरुद्रःसभगवान्यच्चामृतंतस्मै० ॥ २३ ॥ योवैरुद्रःसभगवान्यच्चाकाशं
तस्मै० ॥ २४ ॥ योवैरुद्रःसभगवान्यच्चविश्वंतस्मै० ॥ २५ ॥ योवैरुद्रःसभगवान्यच्चस्थूलंतस्मै० ॥ २६ ॥ योवैरुद्रःसभ
गवान्यच्चसूक्ष्मंतस्मै० ॥ २७ ॥ योवैरुद्रःसभगवान्यच्चशुक्लंतस्मै० ॥ २८ ॥ योवैरुद्रःसभगवान्यच्चकृष्णंतस्मै० ॥ २९ ॥
योवैरुद्रःसभगवान्यच्चकृत्स्नंतस्मै० ॥ ३० ॥ योवैरुद्रःसभगवान्यच्चसत्यंतस्मै० ॥ ३१ ॥ योवैरुद्रःसभगवान्यच्चसर्वंतस्मै०
॥ ३२ ॥ २ ॥ भूस्तेआदिर्मध्यंभुवस्तेस्वस्तेशीर्षंविश्वरूपोऽसिब्रह्मैकस्त्वंद्विधात्रिधावृद्धिस्त्वंशांतिस्त्वंपुष्टिस्त्वंहुतमहुतंदत्तमद
त्तंसर्वमसर्वंविश्वमविश्वंकृतमकृतंपरमपरंपरायणंचत्वं । अपामसोममृताअभूमागन्मज्योतिरविदामदेवान् । किंनूनमस्मान्
कृणवदरातिःकिमुधूर्तिरमृतमर्त्यस्य । सोमसूर्यपुरस्तात्सूक्ष्मःपुरुषः । सर्वजगद्धितंवाएतदक्षरंप्राजापत्यंसौम्यंसूक्ष्मंपुरुषंग्राह्य
मग्राह्येणभावंभावेन सौम्यंसौम्येनसूक्ष्मंसूक्ष्मेणवायव्यंवायव्येनग्रसतितस्मैमहाग्रासायवैनमोनमः । हृदिस्थादेवताःसर्वाहृदि
प्राणाःप्रतिष्ठिताः । हृदित्वमसियोनित्यंतिस्रोमात्राःपरस्तुसः । तस्योत्तरतःशिरोदक्षिणतःपादौ यउत्तरतःसओंकारःयओंकारः
सप्रणवःयःप्रणवःससर्वव्यापीयःसर्वव्यापीसोऽनंतःयोऽनंतस्तत्तारंयत्तारंतच्छुक्लंयच्छुक्लंतत्सूक्ष्मंयत्सूक्ष्मंतद्वैद्युतंयद्वैद्युतंतत्परं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ब्रह्मयत्परंब्रह्मसएकःयएकःसरुद्रःयोरुद्रःसईशानःयईशानःसभगवान्महेश्वरः ॥ ३ ॥ अथकस्मादुच्यतेओंकारःयस्मादुच्चार्यमाणएवप्राणानूर्ध्वमुत्क्रामयतितस्मादुच्यतेओंकारः । अथकस्मादुच्यतेप्रणवःयस्मादुच्चार्यमाणएवऋग्यजुःसामाथर्वांगिरसंब्रह्मब्राह्मणेभ्यःप्रणामयतिनामयतिचतस्मादुच्यतेप्रणवः । अथकस्मादुच्यतेसर्वव्यापीयस्मादुच्चार्यमाणएवयथास्नेहेनपललपिंडमिवशांतरूपमोतप्रोतमनुप्राप्तोव्यतिषक्तश्चतस्मादुच्यतेसर्वव्यापी । अथकस्मादुच्यतेऽनंतःयस्मादुच्चार्यमाणएवतिर्यगूर्ध्वमधस्ताच्चास्यांतोनोपलभ्यतेतस्मादुच्यतेऽनंतः । अथकस्मादुच्यतेतारंयस्मादुच्चार्यमाणएषगर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयतित्रायतेचतस्मादुच्यतेतारं । अथकस्मादुच्यतेशुक्लंयस्मादुच्चार्यमाणएवक्लंदतेक्लामयतिचतस्मादुच्यतेशुक्लं । अथकस्मादुच्यतेसूक्ष्मंयस्मादुच्चार्यमाणएवसूक्ष्मोभूत्वाशरीराण्यधितिष्ठतिसर्वाणिचांगान्यभिमृशतितस्मादुच्यतेसूक्ष्मं । अथकस्मादुच्यतेवैद्युतंयस्मादुच्चार्यमाणएवव्यक्तेमहतितमसिद्योतयतितस्मादुच्यतेवैद्युतं । अथकस्मादुच्यतेपरंब्रह्मयस्मात्परमपरंपरायणंचबृहद्बृहत्याबृंहयतितस्मादुच्यतेपरंब्रह्म । अथकस्मादुच्यतेएकःयःसर्वान्प्राणान्संभक्ष्यसंभक्षणेनाजःसंसृजतिविसृजतितीर्थमेकेव्रजंतितीर्थमेकेदक्षिणाःप्रत्यंचउदंचःप्रांचोऽभिव्रजंत्येकेतेषांसर्वेषामिहसंगतिःसाकंसएकोऽभूदंतश्चरतिप्रजानांतस्मादुच्यतेएकः । अथकस्मादुच्यतेरुद्रःयस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्यरूपमुपलभ्यतेतस्मादुच्यतेरुद्रः । अथकस्मादुच्यतेईशानःयःसर्वान्देवानीशतेईशानीभिर्जननीभिश्चशक्तिभिः । अभित्वाशूरणोनुमोदुग्धाइवधेनवः । ईशानमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुषइतितस्मादुच्यतेईशानः । अथकस्मादुच्यतेभगवान्महेश्वरःयस्माद्भक्तान्ज्ञानेनभजत्यनुगृह्णातिचवाचंसंसृजतिविसृजतिचसर्वान्भावान्परित्यज्यात्मज्ञानेनयोगैश्वर्येणमहतिमहीयतेतस्मादुच्यतेभगवान्महेश्वरः । तदेतद्रुद्रचरितम् ॥ ४ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एषोहदेवःप्रदिशोऽनुसर्वाःपूर्वोहजातःसउगर्भेअंतः । सएवजातःसजनिष्यमाणःप्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः । एकोरुद्रोन
द्वितीयायतस्मैयइमाँल्लोकानीशतईशनीभिः । प्रत्यङ्जनास्तिष्ठतिचांतकालेसंसृज्यविश्वाभुवनानिगोपा ॥ योयोनिंयोनिमधि
तिष्ठत्येकोयेनेदंसर्वंविचरतिसर्वम् । तमीशानंवरदंदेवमीड्यंनिचाय्येमांशांतिमत्यंतमेति । क्षमांहित्वाहेतुजालस्यमूलंबुद्ध्यासं
चितंस्थापयित्वातुरुद्रे । रुद्रमेकंत्वामाहुःशाश्वतंवैपुराणमिषमूर्जेणपशवोनुनामयंतंमृत्युपाशान् । तदेतेनात्मन्नेतेनार्धचतुर्थेन
मात्रेणशांतिंसंसृजतिपशुपाशविमोक्षणंयासाप्रथमामात्राब्रह्मदेवत्यारक्तावर्णेनयस्तांध्यायतेनित्यंसगच्छेद्ब्रह्मपदं । यासाद्वितीं
यामात्राविष्णुदेवत्याकृष्णवर्णेनयस्तांध्यायतेनित्यंसगच्छेद्वैष्णवंपदं । यासातृतीयामात्राईशानदेवत्याकपिलावर्णेनयस्तांध्याय
तेनित्यंसगच्छेदैशानंपदं । यासार्धचतुर्थीमात्रासर्वदेवत्याऽव्यक्तीभूताखंविचरतिशुद्धास्फटिकसंनिभावर्णेनयस्तांध्यायतेनित्यं
सगच्छेत्पदमनामयम् । तदेतदुपासीतमुनयोवाग्वदंतिनतस्यग्रहणमयंपंथाविहितउत्तरेणयेनदेवायांतियेनपितरोयेनऋषयःप
रमपरंपरायणंचेति । वालाग्रमात्रंहृदयस्यमध्येविश्वंदेवंजातरूपंवरेण्यं । तमात्मस्थंयेतुपश्यंतिधीरास्तेषांशांतिर्भवतिनेतरेषां ।
यस्मिन्क्रोधंयांचतृष्णांक्षमांचाक्षमांहित्वाहेतुजालस्यमूलं । बुद्ध्यासंचितंस्थापयित्वातुरुद्रेरुद्रमेकत्वमाहुः । रुद्रोहिशाश्वतेनवैपु
राणेनेषमूर्जेणतपसानियंताग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्ममनएता
निचक्षूंषियस्मादव्रतमिदंपाशुपतंयद्भस्मनांगानिसंस्पृशेत्तस्माद्ब्रह्मतदेतत्पाशुपतंपशुपाशविमोक्षणाय ॥५॥ योऽग्नौरुद्रोयोऽ
प्स्वंतर्योओषधीर्वीरुधआविवेश । यइमाविश्वाभुवनानिचक्लृपेतस्मैरुद्रायनमोऽस्त्वग्नये । योरुद्रोऽग्नौयोरुद्रोऽप्स्वंतर्योरुद्रओष
धीर्वीरुधआविवेश । योरुद्रइमाविश्वाभुवनानिचक्लृपेतस्मैरुद्रायवैनमोनमः । योरुद्रोऽप्सुयोरुद्रओषधीषुयोरुद्रोवनस्पतिषु ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

येनरुद्रेणजगदूर्ध्वधारितंपृथिवीद्विधात्रिधाधर्ताधारितानागायेंतरिक्षेतस्मैरुद्रायवैनमोनमः । मूर्धानमस्यसंसेव्याप्यथर्वाहृदयं चयत् । मस्तिष्कादूर्ध्वप्रेरयत्यवमानोऽधिशीर्षतः । तद्वाअथर्वणःशिरोदेवकोशःसमुज्झितः । तत्प्राणोऽभिरक्षतिशिरोंऽतम थोमनः । नचदिवोदेवजनेनगुह्यानचांतरिक्षाणिनचभूमयइमाः । यस्मिन्निदंसर्वमोतप्रोतंतस्मादन्यन्नपरंकिंचनास्ति । नतस्मा त्पूर्वेनपरंतदस्तिनभूतंनोतभव्यंयदासीत् । सहस्रपादेकमूर्ध्नाव्याप्तंसएवेदमावरीवर्तिभूतं । अक्षरात्संजायतेकालःकालाद्व्याप कउच्यते । व्यापकोहिभगवान्रुद्रोभोगायमानोयदाशेतेरुद्रस्तदासंहार्यतेप्रजाः । उच्छ्वसितेतमोभवतितमसआपोऽप्स्वंगुल्या मथितंशिशिरेशिशिरंमथ्यमानंफेनंभवतिफेनादंडंभवत्यंडाद्ब्रह्माभवतिब्रह्मणोवायुःवायोरोंकारः ओंकारात्सावित्रीसावित्र्यागा यत्रीगायत्र्यालोकाभवंति । अर्चयंतितपःसत्यंमधुरक्षंतियद्ध्रुवं । एतद्धिपरमंतपः । आपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरोंन मइति ॥ ६ ॥ ॥ यइदमथर्वशिरोब्राह्मणोऽधीते । अश्रोत्रियःश्रोत्रियोभवति । अनुपनीतउपनीतोभवति । सोऽग्निपूतोभ वति । सवायुपूतोभवति । ससूर्यपूतोभवति । ससोमपूतोभवति । ससत्यपूतोभवति । ससर्वैर्देवैर्ज्ञातोभवति । ससर्वैर्वेदैर नुध्यातोभवति । ससर्वेषुतीर्थेषुस्नातोभवति । तेनसर्वैःक्रतुभिरिष्टंभवति । गायत्र्याःषष्टिसहस्राणिजप्तानिभवंति । प्रणवाना मयुतंजप्तंभवति । सचक्षुषापंक्तिंपुनाति । आसप्तमात्पुरुषयुगान्पुनातीत्याहभगवानथर्वशिरःसकृज्जप्त्वैवशुचिःसपूतःकर्मण्यो भवति । द्वितीयंजप्त्वागणाधिपत्यमवाप्नोति । तृतीयंजप्त्वैवमेवानुप्रविशत्योंसत्यमोंसत्यमोंसत्यं ॥ इत्यथर्ववेदेशिवाथर्व० ॥

॥ ४१ ॥ गणपत्यथर्वशीर्षम् ॥

श्रीः ॥ ॐ नमस्तेगणपतये । त्वमेवप्रत्यक्षंतत्त्वमसि । त्वमेवकेवलंकर्तासि । त्वमेवकेवलंधर्तासि । त्वमेवकेवलंहर्तासि । त्वमे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वसर्वंखल्विदंब्रह्मासि । त्वंसाक्षादात्मासिनित्यं ॥ १ ॥ ऋतंवच्मि । सत्यंवच्मि ॥ २ ॥ अवत्वंमां । अववक्तारं । अवश्रो
तारं । अवदातारं । अवधातारं । अवानूचानमवशिष्यं । अवपश्चात्तात् । अवपुरस्तात् । अवोत्तरात्तात् । अवदक्षिणात्ता
त् । अवचोर्ध्वात्तात् । अवाधरात्तात् । सर्वतोमांपाहिपाहिसमंतात् ॥ ३ ॥ त्वंवाङ्मयस्त्वंचिन्मयः । त्वमानंदमयस्त्वंब्रह्म
मयः । त्वंसच्चिदानंदाद्वितीयोसि । त्वंप्रत्यक्षंब्रह्मासि । त्वंज्ञानमयोविज्ञानमयोसि ॥ ४ ॥ सर्वंजगदिदंत्वत्तोजायते । सर्वंज
गदिदंत्वत्तस्तिष्ठति । सर्वंजगदिदंत्वयिलयमेष्यति । सर्वंजगदिदंत्वयिप्रत्येति । त्वंभूमिरापोनलोनिलोनभः । त्वंचत्वारिवाक्
पदानि ॥ ५ ॥ त्वंगुणत्रयातीतः । त्वंदेहत्रयातीतः । त्वंकालत्रयातीतः । त्वंमूलाधारस्थितोसिनित्यं ॥ त्वंशक्तित्रयात्मकः ।
त्वांयोगिनोध्यायंतिनित्यं । त्वंब्रह्मात्वंविष्णुस्त्वंरुद्रस्त्वमिंद्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्रमास्त्वंब्रह्मभूर्भुवःस्वरोम् ॥ ६ ॥
गणादिंपूर्वमुच्चार्यवर्णादिंतदनंतरं । अनुस्वारःपरतरः । अर्धेंदुलसितं । तारेणरुद्धं । एतत्तवमनुस्वरूपं । गकारःपूर्वरूपं ।
अकारोमध्यमरूपं । अनुस्वारश्चांत्यरूपं । बिंदुरुत्तररूपं । नादःसंधानं । सꣳहितासंधिः । सैषागणेशविद्या । गणकऋषिः ।
निचृद्गायत्रीछंदः । गणपतिर्देवता । ॐ गंगणपतयेनमः ॥ ७ ॥ एकदंतायविद्महेवक्रतुंडायधीमहि । तन्नोदंतिःप्रचोदयात् ।
॥ ८ ॥ एकदंतंचतुर्हस्तंपाशमंकुशधारिणम् । रदंचवरदंहस्तैर्बिभ्राणंमूषकध्वजम् । रक्तंलंबोदरंशूर्पकर्णकंरक्तवाससं । रक्तगंधा
नुलिप्तांगंरक्तपुष्पैःसुपूजितम् । भक्तानुकंपितंदेवंजगत्कारणमच्युतं । आविर्भूतंचसृष्ट्यादौप्रकृतेःपुरुषात्परं । एवंध्यायतियोनि
त्यंसयोगीयोगिनांवरः ॥ ९ ॥ नमोव्रातपतयेनमोगणपतयेनमःप्रमथपतयेनमस्तेअस्तुलंबोदरायैकदंतायविघ्ननाशिनेशिवसुता
यश्रीवरदमूर्तयेनमः ॥ १० ॥ एतदथर्वशीर्षयोधीते । सब्रह्मभूयायकल्पते । ससर्वतःसुखमेधते । ससर्वविघ्नैर्नबाध्यते । सपंच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

महापापात्प्रमुच्यते । सायमधीयानोदिवसकृतंपापंनाशयति । प्रातरधीयानोरात्रिकृतंपापंनाशयति । सायंप्रातःप्रयुंजानोअपापोभवति । सर्वत्राधीयानोपविघ्नोभवति । धर्मार्थकाममोक्षंचविंदति । इदमथर्वशीर्षमशिष्यायनदेयं । योयदिमोहाद्दास्यति सपापीयान्भवति । सहस्रावर्तनात् यंयंकाममधीते तंतमनेनसाधयेत् ॥ ११ ॥ अनेनगणपतिमभिषिंचति सवाग्मीभवति । चतुर्थ्यामनश्नन्जपति सविद्यावान्भवति । इत्यथर्वणवाक्यं । ब्रह्माद्याचरणंविद्यान्नबिभेतिकदाचनेति ॥ १२ ॥ योदूर्वांकुरैर्यजति सवैश्रवणोपमोभवति । योलाजैर्यजति सयशोवान्भवति समेधावान्भवति । योमोदकसहस्रेणयजति सवांछितफलमवाप्नोति । यःसाज्यसमिद्भिर्यजति ससर्वंलभते ससर्वंलभते । अष्टौब्राह्मणान्सम्यक्ग्राहयित्वा सूर्यवर्चस्वीभवति । सूर्यग्रहेमहानद्यांप्रतिमासन्निधौवाजप्त्वा सिद्धमंत्रोभवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महापापात्प्रमुच्यते । ससर्वविद्भवति ससर्वविद्भवतियएवंवेद । इत्युपनिषत् ॥ १३ ॥ इतिगणपत्यथर्वशीर्षसमाप्तम् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ४२ ॥ सूर्याथर्वशीर्षम् ॥

श्रीः ॥ ॐ अस्यश्रीसूर्याथर्वशीर्षस्य । ब्रह्माऋषिः । आदित्योदेवता । गायत्रीछंदः । हंसाद्यग्निनारायणयुक्तंबीजं । हृल्लेखा शक्तिः । द्विपदादिसर्गसंयुक्तंकीलकं । धर्मार्थकाममोक्षार्थंजपेविनियोगः ॥ षट्स्वरारूढबीजेनषडंगंरक्तांबुजसंस्थितंसप्ताश्वरथिनंहिरण्यवर्णंचतुर्भुजंपद्मद्वयाभयवरदहस्तंकालचक्रप्रणेतारंचश्रीसूर्यनारायणंयएवंवेदसवैब्राह्मणः ॥ ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यं । ॐ तत्सवितु० । परोरजसेसावदोम् । ॐ आपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःसुवरोम् । सूर्यआत्माजगतस्तस्थुषश्च । सूर्याद्वैखल्विमानिभूतानिजायंते । सूर्याद्यज्ञाःपर्जन्योऽन्नमात्मा । नमस्तेआदि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्याय । त्वमेवकेवलंकर्तासि । त्वमेवप्रत्यक्षंविष्णुरसि । त्वमेवप्रत्यक्षंब्रह्मासि । त्वमेवप्रत्यक्षंरुद्रोऽसि । त्वमेवप्रत्यक्षमृगसि । त्वमेवप्रत्यक्षंयजुरसि । त्वमेवप्रत्यक्षंसामासि । त्वमेवप्रत्यक्षमथर्वासि । त्वमेवसर्वंछंदोसि । आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापोजायंते । आदित्याज्ज्योतिर्जायते । आदित्याद्व्योमदिशोजायंते । आदित्याद्वेदाजायंते । आदित्यादेवाजायंते । आदित्योवाएषएतन्मंडलंतपति । असावादित्योब्रह्म । आदित्योंऽतःकरणमनोबुद्धिचित्ताहंकाराः । आदित्योवैव्यानसमानोदानापानप्राणाः । आदित्योवैश्रोत्रत्वक्चक्षूरसनानासाः । आदित्योवैवाक्पाणिपादोपस्थपायूनि । आदित्यो वैशब्दस्पर्शरूपरसगंधाः । आदित्योवैवचनादानगमनानंदविसर्गाः । आनंदमयोज्ञानमयोविज्ञानमयआदित्यः । नमोमित्रा यभानवेमृत्योर्मोपाहिभ्राजिष्णवेविश्वहेतवेनमः । सूर्योनोदिवस्पातुवातोअंतरिक्षात् । अग्निर्नःपार्थिवेभ्यः । सूर्याद्भवंतिभू तानि । सूर्येणपालितानितु । सूर्येलयंप्राप्नुवंति । यःसूर्यःसोहमेवच । चक्षुर्नोदेवःसविता । शक्षुर्नउतपर्वतः । चक्षुर्धातादधा तुनः । आदित्यायविद्महेसहस्रकरायधीमहि । तन्नःसूर्यःप्रचोदयात् । सवितापश्चात्तात् । सवितापुरस्तात् । सवितोत्तरा त्तात् । सवितादरात्तात् । सवितानःसुवतुसर्वतातिम् । सवितानोरासतांदीर्घमायुः ॥ ॥ ओमित्येकाक्षरंब्रह्म । घृणिरिति द्वेअक्षरे । सूर्यइत्यक्षरद्वयम् । आदित्यइतित्रीण्यक्षराणि । एतद्वैसूर्यस्याष्टाक्षरंमनुंयःसदाहरहर्जपतिसोब्रह्मण्योब्राह्मणोभ वति । सूर्याभिमुखंजप्त्वामहाव्याधिभयात्प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्यभक्षणात्पूतोभवति । अपेयपानात्पूतोभवति । अगम्यागमनात्पूतोभवति । व्रात्यसंभाषणात्पूतोभवति । मध्याह्नेसूर्याभिमुखःपठेत् । सद्यःपंचमहापापात्प्रमुच्यते । सैषासा वित्रीविद्यानकस्यचित्प्रशंसेत् । यएतन्महाभागःप्रातःपठतिसभाग्यवान्जायते । पशून्विंदतिवेदार्थलभते । त्रिकालंजप्त्वाक्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तुशतफलंप्राप्नोति । हस्तादित्येजपतिसमहामृत्युंतरति । यएवंवेद । इत्युपनिषत् ॥ इतिसूर्याथर्वशीर्षंसमाप्तम् ॥ ॥ छ ॥

॥ ४३ ॥ देव्यथर्वशीर्षम् ॥

श्रीः ॥ ॐ सर्वेवैदेवादेवीमुपतस्थुःकासित्वंमहादेवीति साब्रवीदहंब्रह्मस्वरूपिणी । मत्तःप्रकृतिपुरुषात्मकंजगत् । शून्यंचाशून्यंच । अहमानंदानानंदौअहंविज्ञानाविज्ञानेअहंब्रह्माब्रह्मणीद्वेब्रह्मणीवेदितव्ये । इतिचाथर्वणीश्रुतिः । अहंपंचभूतानि । अहंपंचतन्मात्राणि । अहमखिलंजगत् । वेदोहमवेदोहं । विद्याहमविद्याहम् । अजाहमनजाहं । अधश्चोर्ध्वंचतिर्यक्काहं । अहꣳरुद्रेभिर्वसुभिश्चरामि । अहमादित्यैरुतविश्वदेवैः । अहंमित्रावरुणावुभौबिभर्मि । अहमिंद्राग्नीअहमश्विनाउभौ । अहꣳसोमंत्वष्टारंपूषणंभगंदधामि । अहंविष्णुमुरुक्रमं । ब्रह्माणमुत्प्रजापतिंदधामि । अहंदधामिद्रविणꣳहविष्मतेसुप्राव्येयजमानायसुव्रते । अहꣳराज्ञीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानां । अहꣳसुवेपितरमस्यमूर्धन्ममयोनिरप्स्वंतःसमुद्रे । यएवंवेद सदैवीꣳसंपदमाप्नोति । तेदेवाअब्रुवन् । नमोदेव्यैमहादेव्यैशिवायैसततंनमः । नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् । तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टाम् । दुर्गांदेवींशरणंप्रपद्यामहेऽसुरान्नाशयित्र्यैतेनमः । देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंति । सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ॥ कालरात्रींब्रह्मस्तुतांवैष्णवींस्कंदमातरम् । सरस्वतीमदितिंदक्षदुहितरंनमामःपावनांशिवाम् । महालक्ष्म्यैचविद्महेसर्वशक्त्यैचधीमहि । तन्नोदेवीप्रचोदयात् । अदितिर्ह्यजनिष्टदक्षयादुहितातव । तांदेवाअन्वजायंतभद्राअमृतबंधवः ॥ कामेयोनिःकमलावज्रपाणिर्गुहाहंसामातलिश्वाभ्रमिंद्रः । पुनर्गुहासकलामाययाचापृथक्क्लेशाविश्वमातादिविद्याः ॥ एषात्मशक्तिः । एषाविश्वमोहिनीपाशांकुशधनुर्बाणधरा । एषाश्री

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

महाविद्या । यएवंवेद सशोकंतरति । नमस्तेभगवतिमातरस्मान्पाहिसर्वतः । सैषावैष्णव्यष्टौवसवः सैवैकादशरुद्राः सैषाद्वा
दशादित्याः सैषाविश्वेदेवाःसोमपाअसोमपाश्च सैषायातुधानाअसुरारक्षांसिपिशाचयक्षसिद्धाः सैषासत्वरजस्तमांसि सैषाब्रह्मवि
ष्णुरुद्ररूपिणी सैषाप्रजापतींद्रमनवः सैषाग्रहनक्षत्रज्योतिष्कलाकाष्ठादिविश्वरूपिणीतामहंप्रणौमिनित्यम् । पापापहारिणीदेवी
भुक्तिमुक्तिप्रदायिनी । अनंतांविजयांशुद्धांशरण्यांसर्वदांशिवाम् ॥ वियदाकारसंयुक्तंवीतिहोत्रसमन्वितम् ॥ अर्धेंदुलसितंदे
व्याबीजंसर्वार्थसाधकम् ॥ एवमेकाक्षरंमंत्रंयतयःशुद्धचेतसः । ध्यायंतिपरमानंदमयाज्ञानांबुराशयः ॥ वाङ्मयाब्रह्मभूस्तस्मा
त्षष्ठवक्त्रसमन्वितम् । सूर्योवामश्रोत्रबिंदुसंयुक्ताष्टतृतीयकम् ॥ नारायणेनसंमिश्रोवायुश्चाधारयुक्तयः । विच्चेनवार्णकोणस्यम
हानानंददायकः । हृत्पुंडरीकमध्यस्थांप्रातःसूर्यसमप्रभाम् । पाशांकुशधरांसौम्यांवरदाभयहस्तकाम् ॥ त्रिनेत्रांरक्तवसनांभ
क्तकामदुहंभजे । भजामित्वांमहादेविमहाभयविनाशिनि ॥ महादारिद्र्यशमनिमहाकारुण्यरूपिणि । यस्याःस्वरूपंब्रह्मादयो
नजानंतितस्मादुच्यतेअज्ञेया । यस्याअंतोनलभ्यतेतस्मादुच्यतेअनंता । यस्यालक्षंनोपलक्ष्यतेतस्मादुच्यतेअलक्षा । यस्याज
ननंनोपलक्ष्यतेतस्मादुच्यतेअजा । एकैवसर्वत्रवर्ततेतस्मादुच्यतएका । एकैवविश्वरूपिणीतस्मादुच्यतेऽनेका । अतएवोच्य
तेऽज्ञेयानंतलक्ष्यजैकानेका। मंत्राणांमातृकादेवीशब्दानांज्ञानरूपिणी। ज्ञानानांचिन्मयातीताशून्यानांशून्यसाक्षिणी ॥ यस्याः
परतरंनास्तिसैषादुर्गाप्रकीर्तिता । तांदुर्गांदुर्गमांदेवींदुराचारविघातिनीम् ॥ नमामिभवभीतोऽहंसंसारार्णवतारिणीम् ॥ ॥
इदमथर्वशीर्षयोऽधीते । सपंचाथर्वशीर्षफलमाप्नोति । इदमथर्वशीर्षंज्ञात्वायोर्चांस्थापयति । शतलक्षंप्रजप्तापिनार्चांशुद्धिंच
विंदति । शतमष्टोत्तरंचास्यपुरश्चर्याविधिःस्मृतः । दशवारंपठेद्यस्तुसद्यःपापैःप्रमुच्यते । महादुर्गाणितरतिमहादेव्याःप्रसा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दतः ॥ सायमधीयानोदिवसकृतंपापंनाशयति । प्रातरधीयानोरात्रिकृतंपापंनाशयति । सायंप्रातःप्रयुंजानोअपापोभवति । निशीथेतुरीयसंध्यायांजप्त्वावाक्सिद्धिर्भवति । नूतनायांप्रतिमायांजप्त्वादेवतासांनिध्यंभवति । भौमाश्विन्यांमहादेवीसंनिधौ जप्त्वामहामृत्युंतरतिसमहामृत्युंतरति । यएवंवेदइत्युपनिषत् ॥ इत्यथर्वशीर्षम् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ४४ ॥ महापुरुषविद्या ॥

श्रीः ॥ ॐ जितंतेपुंडरीकाक्षनमस्तेविश्वभावन ॥ सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वज ॥ १ ॥ नमोहिरण्यगर्भायप्रधानाव्यक्त रूपिणे ॥ ॐनमोवासुदेवायशुद्धज्ञानस्वरूपिणे ॥ २ ॥ देवानांदानवानांचसामान्यमसिदैवतं ॥ सर्वदाचरणद्वंद्वंव्रजामिश रणंतव ॥ ३ ॥ एकस्त्वमसिलोकस्यस्रष्टासंहारकस्तथा ॥ अध्यक्षश्चानुमंताचगुणमायासमावृतः ॥ ४ ॥ संसारसागरंघोरमनंतं क्लेशभाजनं ॥ त्वामेवशरणंप्राप्यनिस्तरंतिमनीषिणः ॥ ५ ॥ नतेरूपंनचाकारोनायुधानिनचास्पदं ॥ तथापिपुरुषाकारोभक्ता नांत्वंप्रकाशसे ॥ ६ ॥ नैवकिंचित्परोक्षंतेनप्रत्यक्षोसिकस्यचित् ॥ नैवकिंचिदसिद्धंतेनचसिद्धोसिकस्यचित् ॥ ७ ॥ कार्याणां कारणंपूर्णवचसांवाच्यमुत्तमं ॥ योगिनांपरमांसिद्धिंवदंतिपरमंविदः ॥८ ॥ अहंभीतोस्मिदेवेशसंसारेऽस्मिन्भयावहे ॥ त्राहिमां पुंडरीकाक्षनजानेशरणंपरं ॥९॥ कालेष्वपिचसर्वेषुदिक्षुसर्वासुचाच्युत ॥ शरीरेपिगतौचापिवर्ततेमेमहद्भयं ॥१०॥ त्वत्पादकम लादन्यन्नमेजन्मांतरेष्वपि ॥ निमित्तंकुशलस्यास्तियेनगच्छामिसद्गतिं ॥११॥ विज्ञानंयदिदंप्राप्तंयदिदंज्ञानमर्जितं ॥ जन्मांतरेपि मेदेवमाभूदस्यपरिक्षयः ॥१२॥ दुर्गतावपिजातायांत्वंगतिस्त्वंमतिर्मम ॥ यदिनाथंचविंदेयंतावतास्मिकृतीसदा ॥१३॥ अकाम

१ धर्मसिंधौदेवपूजांप्रकृत्य 'स्वर्णघर्मानुवाकेनमहापुरुषविद्यया' इत्युक्तमासीदतोऽत्राभिषेकसूक्तेषुपौराणायाअपिमहापुरुषविद्यायानिवेशःकृतः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कलुषंचित्तंममतेपादयोःस्थितं॥ कामयेवैष्णवत्वंतुसर्वजन्मसुकेवलं ॥१४॥ पुरुषस्यहरेःसूक्तंस्वर्ग्यंधन्यंयशस्करं॥ आत्मज्ञानमि
दंपुण्यंयोगज्ञानमिदंपरं ॥ १५॥ इत्येवमनयास्तुत्यास्तुत्वादेवंजनार्दनं ॥ किंकरोस्मीतिचात्मानंदेवायैवनिवेदयेत् ॥१६॥ इति॥

॥ ४५ ॥ देवेप्रारंभः ॥

श्रीः॥ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ १ ॥ मम
त्तुनःपरिज्मावसर्हाममत्तुवातोअपांवृषण्वान् ॥ शिशीतामिंद्रापर्वतायुवन्नस्तन्नोविश्वेवरिवस्यंतुदेवाः ॥ २ ॥ सबुध्नादाष्टजनुषा
भ्यग्रंबृहस्पतिर्देवतायस्यसम्राट् ॥ बुध्नाद्योअग्रमभ्यर्त्योजसाबृहस्पतिमाविवासंतिदेवाः ॥ ३ ॥ वायुस्ताꣳअग्रेप्रमुमोक्तुदेवःप्र
जापतिःप्रजयासंविदानः ॥ प्रमुंचमानाभुवनस्यरेतोगातुंधत्तयजमानायदेवाः ॥ ४ ॥ जातवेदोवपयागच्छदेवान्त्वꣳहिहोताप्र
थमोबभूथ ॥ घृतेनत्वंतनुवोवर्धयस्वस्वाहाकृतꣳहविरदंतुदेवाः ॥ ५ ॥ शतंवर्चिनःसहस्रंचसाकꣳहथोअप्रत्यसुरस्यवीरान् ॥
उतमातामहिषमन्ववेनदमीत्वाजहतिपुत्रदेवाः ॥ ६ ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानः
सचंतेयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ७ ॥ बृहस्पतेसवितर्बोधयैनꣳसꣳशितंचित्संतराꣳसꣳशिशाधि ॥ वर्धयैनंमहतेसौभगाय
विश्वएनमनुमदंतुदेवाः ॥ ८ ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ यआत्मदाबलदायस्यविश्वउपासतेप्र
शिषंयस्यदेवाः ॥ ९ ॥ येसहाꣳसिसहसासहंतेरेजतेअग्नेपृथिवीमखेभ्यः ॥ विश्वेदेवाविश्वेदेवाः ॥ १० ॥ अपामतिंदुर्मतिंबा
धमानारायस्पोषेयज्ञपतिमाभजंतीसुवर्धेहियजमानायपोषमश्विनाध्वर्यूसादयतामिहत्वा ॥ अग्नेःपुरीषमसिदेवयानीतांत्वावि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्वेंअभिगृणंतुदेवाः ॥ ११ ॥ मर्मांणितेवर्मभिश्छादयामिसोमस्त्वाराजामृतेनाभिवस्तां ॥ उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वाम नुमदंतुदेवाः ॥ १२ ॥ प्रजापतेस्तपसावावृधानःसद्योजातोदधिषेयज्ञमग्ने ॥ स्वाहाकृतेनहविषापुरोगायाहिसाध्याहविरदंतु देवाः ॥ १३ ॥ तत्ग्रहाणांग्रहत्वं ॥ देवतावाएतायजमानस्यगृहेगृह्यंते ॥ यत्ग्रहाः ॥ विदुरेनंदेवाः ॥ १४ ॥ तदिष्टीनामि ष्टित्वं ॥ एष्टयोहवैनाम ॥ ताइष्टयइत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १५ ॥ दशहूतोहवैनामैषः ॥ तंवाएतं दशहूतꣳसंतं ॥ दशहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १६ ॥ सप्तहूतोहवैनामैषः ॥ तंवाएतꣳसप्तहूतꣳसंतं ॥ सप्तहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १७ ॥ षड्हूतोहवैनामैषः ॥ तंवाएतꣳषड्हूतꣳसंतं ॥ षड्होतेत्याचक्षतेप रोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १८ ॥ पंचहूतोहवैनामैषः ॥ तंवाएतंपंचहूतꣳसंतं ॥ पंचहोतेत्याचक्षतेपरोक्षेण ॥ परोक्ष प्रियाइवहिदेवाः ॥ १९ ॥ चतुर्हूतोहवैनामैषः ॥ तंवाएतंचतुर्हूतꣳसंतं ॥ चतुर्होतेत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ २० ॥ आशिक्षंतोनशेकिम ॥ मेदस्वतायजमानाः ॥ स्रुचाज्येनजुह्वतः ॥ अकामावोविश्वेदेवाः ॥ २१ ॥ नहिस्पशमविं दंनन्यमस्मात् ॥ वैश्वानरात्पुरएतारमग्नेः ॥ अथेममंथनमृतममूराः ॥ वैश्वानरंक्षेत्रजित्यायदेवाः ॥ २२ ॥ उपतेगाइवाकरं ॥ वृणीष्वदुहितर्दिवः ॥ रात्रीस्तोमंनजिग्युषीं ॥ देवींवाचमजनयंतदेवाः ॥ २३ ॥ सहिवेदयथाहविः ॥ शिवाअस्मभ्यमोषधीः ॥ कृणोतुविश्वचर्षणिः ॥ भद्रान्नःश्रेयःसमनैष्टदेवाः ॥ २४ ॥ अयंयज्ञोवर्धतांगोभिरश्वैः ॥ इयंवेदिःस्वपत्यासुवीरा ॥ इदंब र्हिरतिबर्हीꣳष्यन्या ॥ इमंयज्ञंविश्वेअवंतुदेवाः ॥ २५ ॥ देवंदेवायजागृवि ॥ कामिहैकाःकइमेपतंगाः ॥ मांथालाःकुलिप

॥ ४९ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रिमापतंति ॥ अनावृतैतान्प्रधमंतुदेवाः ॥ २६ ॥ स्तोमेसप्तदशेस्तुतं ॥ वैरूपेणविशौजसा ॥ हविरिंद्रेवयोदधुः ॥ शारदेनर्तु
नादेवाः ॥ २७ ॥ एकविꣳशऋभवःस्तुतं ॥ वैराजेनःश्रियाश्रियं ॥ हविरिंद्रेवयोदधुः ॥ हेमंतेनर्तुनादेवाः ॥ २८ ॥ मरुत
स्त्रिणवेस्तुतं ॥ बलेनशक्करीःसहः ॥ हविरिंद्रेवयोदधुः ॥ शैशिरेणर्तुनादेवाः ॥ २९ ॥ आदित्यान्कामयमवसेहुवेम ॥ येभूता
निंजनयंतोविचिख्युः ॥ सीदंतुपुत्राअदितेरुपस्थं ॥ स्तीर्णबर्हिर्हविरद्यायदेवाः ॥ ३० ॥ आवृत्रहणागीर्भिर्विप्रः ॥ ब्रह्मणस्प
तेत्वमस्ययंता ॥ सूक्तस्यबोधितनयंचजिन्व ॥ विश्वंतद्भद्रंयदवंतिदेवाः ॥ ३१ ॥ नराशꣳसोग्नास्पतिर्नोअव्यात् ॥ आयेवा
मस्यसंगथेरयीणां ॥ प्रियादेवस्यसवितुःस्याम ॥ आनोविश्वेअस्कागमंतुदेवाः ॥ ३२ ॥ शमभिषाचःशमुरातिषाचः ॥ शंनो
दिव्याःपार्थिवाःशंनोअप्याः ॥ येसवितुःसत्यसवस्यविश्वे ॥ मित्रस्यव्रतेवरुणस्यदेवाः ॥ ३३ ॥ याश्चवैशंतीरुतप्रासचीर्याः ॥
यासामषाढामधुभक्षयंति ॥ तानआपःशꣳस्योनाभवंतु ॥ तन्नोविश्वेउपशृण्वंतुदेवाः ॥ ३४ ॥ तौदेवेभ्यःकृणुतोदीर्घमायुः ॥
शतꣳसहस्राभेषजानिधत्तः ॥ यज्ञंनोराजावरुणउपयातु ॥ तन्नोविश्वेअभिसंयंतुदेवाः ॥ ३५ ॥ श्रेष्ठोदेवानामुतमानुषाणां ॥
तंब्राह्मणाःसोमपाःसोम्यासः ॥ प्रोष्ठपदासोअभिरक्षंतिसर्वं ॥ चत्वारएकमभिकर्मदेवाः ॥३६ ॥ लोकस्यराजामहतोमहान्हि ॥
सुगंनःपंथामभयंकृणोतु ॥ यस्मिन्नक्षत्रेयमएतिराजा ॥ यस्मिन्नेनमभ्यर्षंचंतदेवाः ॥ ३७ ॥ यथादेवतमेवप्रसौति ॥ दैव्यस्य
चमानुषस्यचव्यावृत्यै ॥ त्रिराह ॥ त्रिषत्याहिदेवाः ॥ ३८ ॥ यएवदेवानाꣳहविष्कृतः ॥ तान्ह्वयति ॥ त्रिर्ह्वयति ॥ त्रिष
त्याहिदेवाः ॥३९॥ तत्ब्रह्मह्रणंनात्यच्यवत ॥ अंतर्वेदिनिनयत्यवरुध्यै ॥ उल्मुकेनाभिगृह्णातिशृतत्वाय ॥ शृतकामाइवहिदेवाः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ४० ॥ तेषांतद्भागधेयं ॥ तानेवतेनप्रीणाति ॥ वैश्वदेव्यर्चा ॥ एतेहिविश्वेदेवाः ॥ ४१ ॥ सद्योजातोव्यमिमीतयज्ञं ॥ अग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुःप्रदिशृतस्यवाचि ॥ स्वाहाकृतꣳहविरदंतुदेवाः ॥४२॥ आत्मन्वान्त्सोमघृतवान्हिभूत्वा ॥ देवान्गच्छसुवर्विदयजमानायमह्यं ॥ इराभूतिःपृथिव्यैरसोमोत्क्रमीत् ॥ देवाःपितरःपितरोदेवाः ॥ ४३ ॥ यज्ञियायज्ञंविचयं तिशंच ॥ ओषधीरापइहशर्करीश्च ॥ योमाहृदामनसायश्चवाचा ॥ योब्रह्मणाकर्मणाद्वेष्टिदेवाः ॥ ४४ ॥ विच्छिनद्मिविधृतीभ्याꣳसपत्नान् ॥ जातान्भ्रातृव्यान्येचजनिष्यमाणाः ॥ विशोयंत्राभ्यांविधमाम्येनान् ॥ अहꣳस्वानामुत्तमोसानिदेवाः ॥ ४५ ॥ उषाश्चतस्मैनिम्रुक्च ॥ सर्वंपापꣳसमूहतां ॥ योनःसपत्नोयोरणः ॥ मर्तोभिदासतिदेवाः ॥ ४६ ॥ अन्नंविराट् ॥ विराजैवान्नाद्यमवरुंधे ॥ त्रेधाविभज्यदेवतांजुहोति ॥ त्र्यावृतोवैदेवाः ॥ ४७ ॥ अस्मिन्नेवतल्लोकेकामान्दधाति ॥ तस्मादस्मिन्लोकेबहवःकामाः ॥ त्रयाणांत्रयाणाꣳसहवपाजुहोति ॥ त्र्यावृतोवैदेवाः ॥ ४८ ॥ राजामहिमा ॥ यद्वपांमहिम्नोभयतःपरियजति ॥ यजमानमेवराज्येनोभयतःपरिगृह्णाति ॥ पुरस्तात्स्वाहाकारावाअन्येदेवाः ॥ ४९ ॥ एतद्वैतद्देवाएतांदेवतां ॥ पशुंभूतंमेधायालभंत ॥ यज्ञमेव ॥ यज्ञेनयज्ञमयजंतदेवाः ॥ ५० ॥ तेनमेतप ॥ तेनमेज्वल ॥ तेनमेदीदिहि ॥ यावद्देवाः ॥ ५१ ॥ वासोंददाति ॥ तेनायुःप्रतिरते ॥ वेदितृतीयेयजेत ॥ त्रिषत्याहिदेवाः ॥५२॥ कृशानुर्विश्वावसुः ॥ मूर्धन्वान्त्सूर्यवर्चाः ॥ कृतिरित्येकादशगंधर्वगणाः ॥ देवाश्चमहादेवाः ॥ ५३ ॥ एवाहिवायो ॥ एवाहींद्र ॥ एवाहिपूषन् ॥ एवाहिदेवाः ॥ ५४ ॥ भुवनंदेवसूवरीः ॥ आदित्यानदितिंदेवीं ॥ योनिनोर्ध्वमुदीषत ॥ भद्रंकर्णेभिःशृणुयामदेवाः ॥ ५५ ॥ उषाश्चत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्मैनिम्रुच्कसर्वंपापꣳसमूहतां ॥ योनःसपत्नोयोरणोमर्तोभिदासतिदेवाः ॥ ५६ ॥ ऋतस्यपदेकवयोनिपांति ॥ अंतःप्रविष्टंक
र्तारमेतं ॥ अंतश्चंद्रमसिमनसाचरंतं ॥ सहैवसंतंनविजानंतिदेवाः ॥ ५७ ॥ शक्रःप्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवंविद्वानमृतइह
भवति ॥ तान्यःपंथाअयनायविद्यते ॥ यज्ञेनयज्ञमयजंतदेवाः ॥५८॥ ॐ राजाधिराजायप्रसह्यसाहिने ॥ नमोवयंवैश्रवणाय
कुर्महे ॥ समेकामान्कामकामायमह्यं ॥ कामेश्वरोवैश्रवणोददातु ॥ कुबेरायवैश्रवणाय ॥ महाराजायनमः ॥ ॐ स्वस्ति ॥
साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यमयंसमंतपर्यायीस्यात्सार्वभौमःसार्वायुषआंतादापरार्धात्पृ
थिव्यैसमुद्रपर्यंतायाएकराळिति ॥ तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे ॥ आविक्षितस्यकामप्रेर्विश्वे
देवाःसभासदइति ॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वतस्पात् ॥ संबाहुभ्यांनमतिसंपतत्रैर्द्यावापृथिवीजनयन्
देवएकः ॥ योवैतांब्रह्मणोवेद ॥ अमृतेनावृतांपुरीं ॥ तस्मैब्रह्मचब्रह्माच ॥ आयुःकीर्तिंप्रजांददुः ॥ इतिदेवेमंत्राःसमाप्ताः ॥

॥ ४६ ॥ गायत्र्यःपुष्पमंत्राश्च ॥

अथगायत्री ॥ पुरुषस्यविद्मसहस्राक्षस्यमहादेवस्यधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ १ ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥
तन्नोरुद्रःप्रचोदयात् ॥ २ ॥ तत्पुरुषायविद्महेवक्रतुंडायधीमहि ॥ तन्नोदंतिःप्रचोदयात् ॥ ३ ॥ तत्पुरुषायविद्महेचक्रतुंडा
यधीमहि ॥ तन्नोनंदिःप्रचोदयात् ॥ ४ ॥ तत्पुरुषायविद्महेमहासेनायधीमहि ॥ तन्नःषण्मुखःप्रचोदयात् ॥ ५ ॥ तत्पुरुषाय
विद्महेसुवर्णपक्षायधीमहि ॥ तन्नोगरुडःप्रचोदयात् ॥ ६ ॥ वेदात्मनायविद्महेहिरण्यगर्भायधीमहि ॥ तन्नोब्रह्मप्रचोदयात्

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ७ ॥ नारायणायविद्महेवासुदेवायधीमहि ॥ तन्नोविष्णुःप्रचोदयात् ॥ ८ ॥ वज्रनखायविद्महेतीक्ष्णदंष्ट्रायधीमहि ॥ तन्नो नारसिꣳहःप्रचोदयात् ॥ ९ ॥ भास्करायविद्महेमहद्युतिकरायधीमहि ॥ तन्नोआदित्यःप्रचोदयात् ॥ १० ॥ वैश्वानरायविद्म हेलालीलायधीमहि ॥ तन्नोअग्निःप्रचोदयात् ॥११॥ कात्यायनायविद्महेकन्यकुमारिधीमहि ॥ तन्नोदुर्गिःप्रचोदयात् ॥ १२॥ अथपुष्पमंत्राः ॥ योंपांपुष्पंवेद । पुष्पवान्प्रजावान्पशुमान्भवति । चंद्रमावाअपांपुष्पं । पुष्पवान्प्रजावान्पशुमान्भवति । यएवंवेद । योंपामायतनंवेद । आयतनवान्भवति । अग्निर्वाअपामायतनं । आयतनवान्भवति । योंऽग्नेरायतनंवेद ॥ १ ॥ आयतनवान्भवति । आपोवाअग्नेरायतनं । आयतनवान्भवति । यएवंवेद । योंपामायतनंवेद । आयतनवान्भवति । वायुर्वाअपामायतनं । आयतनवान्भवति । योवायोरायतनंवेद । आयतनवान्भवति ॥ २ ॥ आपोवैवायोरायतनं । आयतनवान्भवति । यएवंवेद । योंऽपामायतनंवेद । आयतनवान्भवति । असौवैतपन्नपामायतनं । आयतनवान्भवति । योमुष्यतपत आयतनंवेद । आयतनवान्भवति । आपोवाअमुष्यतपतआयतनं ॥ ३ ॥ आयतनवान्भवति । यएवंवेद । योंपामायतनंवेद । आयतनवान्भवति । चंद्रमावाअपामायतनं । आयतनवान्भवति । यश्चंद्रमसआयतनंवेद । आयतनवान्भवति । आपोवैचंद्रमसआयतनं । आयतनवान्भवति ॥ ४ ॥ यएवंवेद । योंपामायतनंवेद । आयतनवान्भवति । नक्षत्राणिवाअपामायतनं । आयतनवान्भवति । योनक्षत्राणामायतनंवेद । आयतनवान्भवति । आपोवैनक्षत्राणामायतनं । आयतनवान्भवति । यएवंवेद ॥ ५ ॥ योंपामायतनंवेद । आयतनवान्भवति । पर्जन्योवाअपामायतनं । आयतनवान्भवति । यःपर्जन्यस्यायतनंवेद ।

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

आयतनवान्भवति । आपोवैपर्जन्यस्यायतनं । आयतनवान्भवति । यएवंवेद । योपामायतनंवेद ॥ ६ ॥ आयतनवान्भवति । संवत्सरोवाअपामायतनं । आयतनवान्भवति । यःसंवत्सरस्यायतनंवेद । आयतनवान्भवति । आपोवैसंवत्सरस्यायतनं । आयतनवान्भवति । यएवंवेद । योप्सुनावंप्रतिष्ठितांवेद । प्रत्येवतिष्ठति ॥ ७ ॥ इतिमंत्रपुष्पमंत्राः ॥ ॥ छ ॥

॥ ४७ ॥ मध्याह्नसंध्याप्रारंभः ॥

श्रीगणेशायनमः ॥ ॐ केशवायनमः ॥ नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ मधुसूदनायनमः ॥ त्रिविक्रमायनमः ॥ वामनायनमः ॥ श्रीधरायनमः ॥ हृषीकेशायनमः ॥ पद्मनाभायनमः ॥ दामोदरायनमः ॥ संकर्षणायनमः ॥ वासुदेवायनमः ॥ प्रद्युम्नायनमः ॥ अनिरुद्धायनमः ॥ पुरुषोत्तमायनमः ॥ अधोक्षजायनमः ॥ नारसिंहायनमः ॥ अच्युतायनमः ॥ जनार्दनायनमः ॥ उपेंद्रायनमः ॥ हरयेनमः ॥ श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳ सुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ मध्याह्नसंध्यायुवानाश्वेतवर्णाश्वेतवस्त्राश्वेतगंधानुलेपनावृषभवाहनारुद्रदैवत्या दक्षिणाग्न्युपस्थानायजुर्वेदसꣳहिताद्वितीयारुद्रसंध्याधर्मवतीनाम्नीइतिध्यात्वा ममउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थम ध्याह्नसंध्यामुपासिष्ये ॥ आयातुवरदादेवीअक्षरंब्रह्मसंमितं ॥ गायत्रीछंदसांमातेदंब्रह्मजुषस्वमे ॥ यदह्नात्कुरुतेपापंतदह्नात्प्रतिमुच्यते ॥ यद्रात्रियात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते ॥ सर्ववर्णेमहादेविसंध्याविद्येसरस्वति ॥ अजरेअमरेदेविसर्वदेविनमो

१ मध्याह्नस्नानंप्रायःप्रातर्वदेव अत्रमृज्जहणंविशेषः । दिनतृतीयभागेयजनयाजनाध्ययनाध्यापनदानःसत्प्रतिग्रहादिनायोगक्षेमर्थद्रव्यार्जनं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तुते ॥ ओजोऽसिसहोऽसिबलमसिभ्राजोऽसिदेवानांधामनामासिविश्वमसिविश्वायुःसर्वमसिसर्वायुरभिभूरोम् गायत्रीमावाहयामि सावित्रीमावाहयामिसरस्वतीमावाहयामिछंदर्षीनावाहयामिश्रियमावाहयामिह्रियमावाहयामिइत्यावाह्यकुशैरात्मानंमार्जयति ॥ ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्मा अरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ततअपोभिमंत्रयति ॥ ॐआपोवाइदꣳसर्वंविश्वाभूतान्यापःप्राणा वाआपःपशवआपोन्नमापोमृतमापःसंम्राडापोविराडापःस्वराडापश्छंदाꣳस्यापोज्योतीꣳष्यापोयजूꣳष्यापःसत्यमापःसर्वादेवता आपोभूर्भुवःसुवरापओम् ॥ ततःप्राश्नाति ॥ आपःपुनंतुपृथिवींपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम ॥ सर्वंपुनंतुमामापोसतांचप्रतिग्रहꣳस्वाहा ॥ केशवायनमः ॥ नारायणायनमः ॥ माधवाय नमः ॥ गोविंदायनमः ॥ ॐदधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूꣳषितारिषत् ॥ आपोहि ष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंग मामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्नियागर्भंदधिरे विरूपास्तानआपःशꣳस्योनाभवंतु ॥ यासाꣳराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतःशुचयोयाःपावकास्ता नआपःशꣳस्योनाभवंतु ॥ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोंदंतिशुक्रास्तानआपःशꣳस्यो नाभवंतु ॥ शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशत्वचंमे ॥ सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पव॑मान॒ःसु॒व॒र्जन॑ः ॥ प॒वित्रे॑ण॒विच॑र्षणिः ॥ यःपो॒तास॑पु॒नातु॒मा ॥ पु॒नं॒तु॒मादे॑व॒जना॑ः ॥ पु॒नं॒तु॒मन॑वो॒धि॒या ॥ पु॒नं॒तु॒विश्व॑मा॒यव॑ः ॥ जात॑वेदः॒प॒वि॒त्र॒व॒त् ॥ प॒वित्रे॑ण॒पु॒ना॒हि॒मा ॥ शु॒क्रेण॑देव॒दी॒द्य॒त् ॥ अग्ने॑क्र॒त्वा॒क्रतू॑ꣳरनु ॥ यत्ते॑प॒वित्र॒मा॒र्चिषि॑ ॥ अग्ने॒वि॒त॒त॒मं॒त॒रा ॥ ब्रह्म॒तेन॑पुनीमहे ॥ उ॒भाभ्यां॑देवसवितः ॥ प॒वित्रे॑ण॒स॒वेन॑च ॥ इ॒दंब्रह्म॑पुनीमहे ॥ वै॒श्व॒दे॒वीपु॑न॒तीदे॒व्यागा॑त् ॥ यस्यै॑ब॒ह्वीस्त॒नु वो॑वी॒तपृ॑ष्ठाः ॥ तया॒मद॑ंतःसध॒माद्ये॑षु ॥ व॒यꣳस्या॒म॒पत॑योरयी॒णां ॥ वै॒श्वा॒न॒रोर॒श्मिभि॒र्मा॒पु॒ना॒तु ॥ वा॑त॒ःप्रा॒णेने॑षि॒रोम॑यो॒भूः ॥ द्यावा॑पृथि॒वीप॑य॒सा॒पयो॑भिः ॥ ऋ॒ता॒व॒री॒य॒ज्ञिये॑मापुनीतां ॥ बृ॒हद्भि॑ःसवि॒त॒स्तृ॒भिः ॥ वषि॑ष्ठै॒र्दे॒व॒म॒न्म॒भिः ॥ अग्ने॒द॒क्षै॑ःपुनाहिमा ॥ येन॑दे॒वाअपु॑नत ॥ येनापो॑दि॒व्यंक॒शः ॥ तेन॑दि॒व्येन॒ब्रह्म॑णा ॥ इ॒दंब्रह्म॑पुनीमहे ॥ यःपा॑व॒मा॒नी॒र॒ध्येति॑ ॥ ऋषि॑भि॒ःसंभृ॑त॒ꣳरस॑ं ॥ सर्व॒ꣳसपू॒तम॑श्नाति ॥ स्व॒दि॒तमा॑त॒रिश्व॑ना ॥ पा॒व॒मा॒नीर्यो॑अ॒ध्येति॑ ॥ ऋषि॑भि॒ःसंभृ॑त॒ꣳरस॑ं ॥ तस्मै॒सर॑स्वतीदुहे ॥ क्षीर॑ꣳसर्पि॒र्म धू॒द॒कं ॥ पा॒व॒मा॒नी॒ःस्व॒स्त्यय॑नीः ॥ सु॒दु॒घा॒हिप॑य॒स्वती॑ः ॥ ऋषि॑भि॒ःसंभृ॑तो॒रस॑ः ॥ ब्रा॒ह्म॒णेष्व॒मृत॑ꣳहि॒तं॥ पा॒व॒मा॒नीर्दिशं॑तु॒नः ॥ इ॒मंलो॒कमथो॑अ॒मुं ॥ काम॒मान्त्सम॑र्धयंतुनः ॥ दे॒वीर्दे॒वैः॒स॒माभृ॑ताः ॥ पा॒व॒मा॒नी॒ःस्व॒स्त्यय॑नीः ॥ सु॒दु॒घा॒हिघृ॒त॒श्चुत॑ः ॥ ऋषि॑भि॒ः संभृ॑तो॒रस॑ः ॥ ब्रा॒ह्म॒णेष्व॒मृत॑ꣳहि॒तं ॥ येन॑दे॒वा॒ःप॒वित्रे॑ण ॥ आ॒त्मान॑पु॒न॒ते॒सदा॑ ॥ तेन॑स॒हस्र॑धारेण ॥ पा॒व॒मा॒न्य॒ःपु॒नं॒तु॒मा ॥ प्रा॒जा॒प॒त्यंप॒वित्र॑ं ॥ श॒तो॒द्या॒मꣳहि॒र॒ण्मय॑ं ॥ तेन॑ब्रह्मविदो॒व॒यं ॥ पू॒तंब्रह्म॑पुनीमहे ॥ इंद्र॑ःसु॒नी॒ती॒स॒हमा॑पुनातु ॥ सोम॑ःस्व॒स्त्या॒ वरु॑ण॒ःस॒मी॒च्या॑ ॥ य॒मोरा॑जा॒प्रमृ॑णा॒भि॒ःपु॒नातु॒मा ॥ जा॒तवे॑दा॒मो॒र्ज॒यं॒त्या॒पु॒ना॒तु ॥ द्रु॒प॒दादि॒वे॒न्मु॒मु॒चा॒नः ॥ स्वि॒न्नः॒स्ना॒त्वी॒मलां॑ दि॒व ॥ पू॒तंप॒वित्रे॑णे॒वाज्य॑ं ॥ आप॑ःशुंधंतु॒मैन॑सः ॥ ॐ भूर्भु॒व॒ःसु॒व॒ः ॥ तत्स॑वि॒तु॒र्वरे॑ण्यं॒भर्गो॑दे॒व॒स्य॒धीम॑हि ॥ धि॒यो॒योन॑ःप्र॒चो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दयात् ॥ श्रीसूर्यनारायणायइदमर्घ्यंदत्तंनमम ॥ इतित्रीनर्घ्यान्दत्वा ॥ ३ ॥ आत्मानंप्रदक्षिणीकुर्वन्असावादित्योब्रह्म ॥ आचम्य ॥ के० यनमः ॥ ना० यनमः ॥ मा० यनमः ॥ गो० यनमः ॥ विष्णवेनमः ॥ श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳसुवः ॥ ॐमहः ॥ ॐजनः ॥ ॐतपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरों ॥ ॐउद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्च ॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतंजीवेमशरदःशतंनंदामशरदःशतंमोदामशरदःशतंभवामशरदःशतꣳशृणवामशरदःशतंप्रब्रवामशरदःशतमजीताःस्यामशरदःशतंज्योक्चसूर्यंदृशे ॥ यउदगान्महतोर्णवाद्विभ्राजमानःसरिरस्यमध्यात्समावृषभोलोहिताक्षःसूर्योविपश्चिन्मनसापुनातु ॥ इत्युपस्थाय ततउपविश्यभूतशुद्धिंकरोति ॥ यथा ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामवरोधेनब्रह्मकर्मसमारभे ॥ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरं ॥ मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं ॥ कनिष्ठिक्यांन्यसेद्विष्णुंकरमध्येचमाधवं ॥ एवंचकरविन्यासंसर्वपापप्रणाशनं ॥ भूःपादाभ्यांनमः ॥ भुवःजानुभ्यांनमः ॥ सुवःकटिभ्यांनमः ॥ महःनाभ्यैनमः ॥ जनःहृदयायनमः ॥ तपःकंठायनमः ॥ सत्यंललाटायनमः ॥ परब्रह्मशिरसेस्वाहा ॥ तत्सवितुर्ब्रह्मात्मनेहृदयायनमः ॥ वरेण्यंविष्ण्वात्मनेशिरसेस्वाहा ॥ भर्गोरुद्रात्मनेशिखायैवषट् ॥ धीमहिपरमात्मने

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कवचायहुं ॥ धियोयोनोज्ञानात्मनेनेत्रत्रयायवौषट् ॥ प्रचोदयात्सत्यात्मनेअस्त्रायफट् ॥ इतिदिग्बंधः ॥ गायत्र्यागायत्रीछं
दोविश्वामित्रऋषिःसवितादेवताग्निर्मुखंब्रह्माशिरोविष्णुर्हृदयꣳरुद्रःशिखापृथिवीयोनिःप्राणापानव्यानोदानसमानासप्राणाश्वेत
वर्णासांख्यायनसगोत्रागायत्रीचतुर्विꣳशत्यक्षरात्रिपदाषट्कुक्षिःपंचशीर्षोपनयनेविनियोग ॐभूः ॥ ॐभुवः ॥ ओꣳसुवः ॥
ॐमहः ॥ ॐ जनः ॥ ॐतपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योती
तीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ मध्याह्नसंध्यांगत्वेनअष्टोत्तरशतसंख्ययागायत्रीजपमहंकरिष्ये ॥ १०८ वा २८ ॥ सुमुखंसं
पुटंचैववितंविस्तृतंतथा ॥ द्विमुखंत्रिमुखंचैवचतुःपंचमुखंतथा ॥ षण्मुखाधोमुखंचैवव्यापकांजलिकंतथा ॥ शकटंयमपाशं
चग्रंथितंचोल्मुकोल्मुकं ॥ प्रलंबंमुष्टिकंचैवमत्स्यंकूर्मंवराहकं ॥ सिंहाक्रांतंमहाक्रांतंमुद्गलंपल्लवंतथा ॥ मुक्ताविद्रुमहेमनील
धवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुकलानिबद्धमुकुटांतत्त्वार्थवर्णात्मिकां ॥ गायत्रींवरदाभयांकुशकशांशुभ्रंकपालंगुणंशंखंच
क्रमथाराविंदयुगुलंहस्तैर्वहंतींभजे ॥ महामालेमहामायेसर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव ॥
ॐभूर्भुवःसुवः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ इतिजपित्वा ॥ तत्सवितुर्ब्रह्मात्मनेहृदयायनमः ॥
वरेण्यंविष्ण्वात्मनेशिरसेस्वाहा ॥ भर्गोदेवस्यरुद्रात्मनेशिखायैवषट् ॥ धीमहिपरमात्मनेकवचायहुं ॥ धियोयोनोज्ञानात्मने
नेत्रत्रयायवौषट् ॥ प्रचोदयात्सत्यात्मनेअस्त्रायफट्इतिदिग्बंधः ॥ सुरभिर्ज्ञानशूर्पंचयोनिःकूर्मोथपंकजं ॥ लिंगंनिर्याणमुद्रा
श्चजपांतेष्टौप्रकीर्तिताः ॥ नमःप्राच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोदक्षिणायैदिशेयाश्चदेवताएतस्यांप्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिवसंत्येताभ्यश्चनमोनमःप्रतीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमउदीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमऊर्ध्वायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोधरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोवांतरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोगंगायमुनयोर्मध्येयेवसंतितेमेप्रसन्नात्मानश्चिरंजीवितंवर्धयंतिनमोगंगायमुनयोर्मुनिभ्यश्चनमोनमोगंगायमुनयोर्मुनिभ्यश्चनमः ॥ अवांतरदिशाभ्योनमः ॥ सप्तस्रवंतुदिशोमयि समागच्छंतुसूनृताः ॥ सर्वेकामाअभियंतुनःप्रियाअभिस्रवंतुनःप्रियाः ॥ अभिवादयेत्रिप्रवरान्वितामुकगोत्रोत्पन्नःयजुर्वेदस्यतैत्तिरीयशाखांतर्गतहिरण्यकेशीशाखाध्यायीअमुकदेवशर्माहं भोगुरोअभिवादयामि ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहिताय च ॥ जगद्धितायकृष्णायगोविंदायनमोनमोगोविंदायनमोनमः ॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं ॥ स्तुतोमयावरदावेदमाताप्रचोदयंतीपवनेद्विजाता ॥ आयुःपृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्वाप्रजातुं ब्रह्मलोकं ॥ घृणिःसूर्यआदित्योनप्रभावात्यक्षरं ॥ मधुक्षरंतितद्रसं ॥ सत्यंवैतद्रसमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ ब्रह्मलोकायनमः ॥ विष्णुलोकायनमः ॥ रुद्रलोकायनमः ॥ संध्यायैनमः ॥ विद्यायैनमः ॥ सरस्वत्यैनमः ॥ वेदायनमः ॥ वेदपुरुषायनमः ॥ इष्टदेवताभ्यो० ॥ कुलदेवताभ्यो० ॥ स्थानदेवताभ्यो० ॥ वास्तुदेवताभ्यो० ॥ एतत्कर्मप्रधानदेवताभ्योनमः ॥ सर्वेभ्योदेवेभ्यो० ॥ सर्वेभ्योब्राह्मणेभ्योनमो० ॥ आकाशात्पतितंतोयंयथागच्छतिसागरं ॥ सर्वदेवनमस्कारः केशवंप्रतिगच्छति ॥ १ ॥ केशवायनमः ॥ नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ मधुसूद

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नायनमः ॥ त्रिविक्रमायनमः ॥ वामनायनमः ॥ श्रीधरायनमः ॥ हृषीकेशायनमः ॥ पद्मनाभायनमः ॥ दामोदरायनमः ॥ संकर्षणायनमः ॥ वासुदेवायनमः ॥ प्रद्युम्नायनमः ॥ अनिरुद्धायनमः ॥ पुरुषोत्तमायनमः ॥ अधोक्षजायनमः ॥ नारसिंहायनमः ॥ अच्युतायनमः ॥ जनार्दनायनमः ॥ उपेंद्रायनमः ॥ हरयेनमः ॥ श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳ सुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरों ॥ अनेनमध्याह्नसध्योपासनाख्येनकर्मणाभगवान्श्रीपरमेश्वरःप्रीयतांनमम ॥ इति ॥

॥ ४८ ॥ ब्रह्मयज्ञः ॥

श्रीः ॥ अद्यपूर्वोच्चरितवर्तमानएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थंब्रह्मयज्ञेनयक्ष्ये ॥ हस्तावनिज्य ॥ त्रिराचामेत् ॥ द्विःपरिमृज्यसकृदुपस्पृश्य ॥ सव्यंपाणिंपादौप्रोक्षति ॥ शिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभ्य ॥ दक्षिणोत्तरौपाणीपादौकृत्वा ॥ ॐ भूर्भुवःसुवः ॥ तत्सवितुर्वरेण्यं ॥ भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ १ ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ २ ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॥ ३ ॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ १ ॥ इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्न्यादेवभागमूर्जस्वतीःपयस्वतीःप्रजावतीरनमीवा अयक्ष्मामावस्तेनईशतमाघशꣳसोरुद्रस्यहेतिःपरिवोवृणक्तुध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ २ ॥ अग्न

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

आयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ ३ ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ ४ ॥ शक्त्याध्ययनंकुर्यात् ॥ नमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि ॥ इतित्रिवारंजप्त्वा ॥ ३ ॥ ॐशांतिःशांतिःशांतिः ॥ ब्रह्मयज्ञेनयक्ष्यमाणःप्राच्यांदिशिग्रामादच्छादिर्दर्शउदीच्यांप्राशुदीच्यांवोदितआदित्येदक्षिणतउपवीयोपविश्यहस्तावनिज्यत्रिराचामेद्द्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभ्ययत्रिराचामतितेनऋचःप्रीणातियद्द्विःपरिमृजतितेनयजूंषियत्सकृदुपस्पृशतितेनसामानियत्सर्वंपाणिंपादौप्रोक्षतियच्छिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभतेतेनाथर्वांगिरसोब्राह्मणानीतिहासान्पुराणानिकल्पान्गाथानाराशंसीःप्रीणातिदर्भाणांमहदुपस्तीर्योपस्थंकृत्वाप्राङासीनःस्वाध्यायमधीयीतापांवाएषओषधीनांरसोयद्दर्भाःसरसमेवब्रह्मकुरुतेदक्षिणोत्तरौपाणीपादौकृत्वासपवित्रावोमितिप्रतिपद्यतएतद्वैयजुस्त्रयींविद्यांप्रत्येषावागेतत्परममक्षरंतदेतद्दृचाभ्युक्तमृचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुर्यस्तन्नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमासतइतित्रीनेवप्रायुंक्तभूर्भुवःस्वरित्याहैतद्वैवाचःसत्यंयदेववाचःसत्यंतत्प्रायुंक्तार्थसावित्रींगायत्रींत्रिरन्वाहपच्छोर्ध्वंशोनवानंसवितारंश्रियंप्रसवितारंश्रियमेवाप्नोत्यथोप्रज्ञातयैवप्रतिपदाछंदांसिप्रतिपद्यते ॥ ११ ॥ अनेनब्रह्मयज्ञाख्येनकर्मणाश्रीभगवान्परमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ अथदेवर्षिपितृतर्पणं ॥ ब्रह्माणंतर्पयामि ॥ प्रजापतिंतर्पयामि ॥ बृहस्पतिंतर्पयामि ॥ अग्निंतर्पयामि ॥ वायुंतर्पयामि ॥ सूर्यंतर्पयामि ॥ चंद्रमसंतर्पयामि ॥ नक्षत्राणितर्पयामि ॥ इंद्रंराजानंतर्पयामि ॥ यमंराजानंतर्पयामि ॥ वरुणंराजानंत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्पयामि ॥ सोमꣳराजानंतर्पयामि ॥ वैश्रवणꣳराजानंतर्पयामि ॥ वसूंस्तर्पयामि ॥ रुद्रांस्तर्पयामि ॥ आदित्यांस्तर्पयामि ॥ विश्वान्देवांस्तर्पयामि ॥ साध्यांस्तर्पयामि ॥ ऋभूंस्तर्पयामि ॥ भृगूंस्तर्पयामि ॥ मरुतस्तर्पयामि ॥ अथर्वणस्तर्पयामि ॥ अंगिरसस्तर्पयामि ॥ ॥ अथनिवीती ॥ विश्वामित्रंतर्पयामि ॥ जमदग्निंतर्पयामि ॥ भरद्वाजंतर्पयामि ॥ गौतमंतर्पयामि ॥ अत्रिंतर्पयामि ॥ वसिष्ठंतर्पयामि ॥ कश्यपंतर्पयामि ॥ अरुंधतींतर्पयामि ॥ अगस्त्यंतर्पयामि ॥ कृष्णद्वैपायनंतर्पयामि ॥ जातूकर्ण्यंतर्पयामि ॥ तरुक्षंतर्पयामि ॥ तृणबिंदुंतर्पयामि ॥ वर्मिणंतर्पयामि ॥ वरूथिनंतर्पयामि ॥ वाजिनंतर्पयामि ॥ वाजश्रवसंतर्पयामि ॥ सत्यश्रवसंतर्पयामि ॥ सुश्रवसंतर्पयामि ॥ सुतश्रवसंतर्पयामि ॥ सोमशुष्मायणंतर्पयामि ॥ सत्ववतंतर्पयामि ॥ बृहदुक्थंतर्पयामि ॥ वामदेवंतर्पयामि ॥ वाजिरत्नंतर्पयामि ॥ हर्यज्वानंतर्पयामि ॥ उदमयंतर्पयामि ॥ गोतमंतर्पयामि ॥ ऋणंजयंतर्पयामि ॥ ऋतंजयंतर्पयामि ॥ कृतंजयंतर्पयामि ॥ धनंजयंतर्पयामि ॥ बभ्रुंतर्पयामि ॥ त्र्यरुणंतर्पयामि ॥ त्रिवर्षंतर्पयामि ॥ त्रिधातुंतर्पयामि ॥ शिबिंतंतर्पयामि ॥ पराशरंतर्पयामि ॥ विष्णुंतर्पयामि ॥ रुद्रंतर्पयामि ॥ स्कंदंतर्पयामि ॥ काशीश्वरंतर्पयामि ॥ ज्वरंतर्पयामि ॥ धर्मंतर्पयामि ॥ अर्थंतर्पयामि ॥ कामंतर्पयामि ॥ क्रोधंतर्पयामि ॥ वसिष्ठंतर्पयामि ॥ इंद्रंतर्पयामि ॥ त्वष्टारंतर्पयामि ॥ कर्तारंतर्पयामि ॥ धर्तारंतर्पयामि ॥ धातारंतर्पयामि ॥ मृत्युंतर्पयामि ॥ सवितारंतर्पयामि ॥ सावित्रींतर्पयामि ॥ ऋग्वेदंतर्पयामि ॥ यजुर्वेदंतर्पयामि ॥ सामवेदंतर्पयामि ॥ अथर्ववेदंतर्पयामि ॥ इतिहासपुराणांस्तर्पयामि ॥ ॥ प्राचीनावीती ॥ वैशंपायनंतर्पयामि ॥ पलिंगुंतर्पयामि ॥ तित्तिरंतर्पयामि ॥ उखंतर्पयामि ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

आत्रेयंपदकारंतर्पयामि ॥ कौंडिण्यंवृत्तिकारंतर्पयामि ॥ सूत्रकारंतर्पयामि ॥ सत्याषाढंतर्पयामि ॥ प्रवचनकर्तृंस्तर्पयामि ॥ आचार्यांस्तर्पयामि ॥ ऋषींस्तर्पयामि ॥ वानप्रस्थांस्तर्पयामि ॥ ऊर्ध्वरेतसस्तर्पयामि ॥ एकपत्नींस्तर्पयामि ॥ १४ ॥ यथाधिकारंपितॄन् ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतुपितरःसर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं ॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृह्णंतुमयादत्तंसूत्रनिष्पीडनोदकं ॥ अनेनतर्पणाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ४९ ॥ वैश्वदेवः ॥

श्रीः ॥ केशवादिचतुर्विंशतिनामभिःआचम्य प्राणायामंकृत्वा ॥ अद्यपूर्वोच्चरितवर्तमानएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं पंचसूनादोषपरिहारार्थंआत्मसंस्कारार्थंअन्नसंस्कारार्थंसिद्धान्नेनप्रातःसायंवैश्वदेवौतंत्रेणकरिष्ये ॥ रुक्मकनामानमग्निंप्रतिष्ठापयामि ॥ वेणुधमन्याग्निंप्रज्वाल्य ॥ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँआविवेश ॥ सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः ॥ स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरंव्यजनंवामैर्घृतपात्रंचधारयन् ॥ मेषारूढोजटाबद्धोगौरवर्णोमहौजसः ॥ धूम्रध्वजोलोहिताक्षःसप्तार्चिःसर्वकामदः ॥ आत्माभिमुखमासीनएवंरूपोहुताशनः ॥ अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसंमुखोवरदोभव ॥ यथाहुतद्धविर्वहसिसप्तार्चिषेसुकृतमेतमवतादिवंगच्छतादेवान्यज्ञपतिंगच्छतादेवान्यज्ञपतिंगच्छतादेवान्यज्ञपति

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मन्यस्व ॥ सरस्वतेनुमन्यस्व ॥ देवसवितःप्रसुव ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यमर्त्योजोहवीमि ॥ जातवेदोयशोअस्मा
सुधेहिप्रजाभिरग्नेअमृतत्वमश्यां ॥ यस्मैत्वꣳसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं ॥ अश्विनꣳसपुत्रिणंवीरवंतंगोमंतꣳरयिंनश
तेस्वस्ति ॥ सिद्धमन्नमग्नावधिश्रित्य ॥ उदगुद्वास्य ॥ प्रोक्ष्य ॥ अग्नेःपश्चान्नीत्वा ॥ अभिघार्य ॐ अग्नयेस्वाहा ॥ अग्नयइदंन
मम ॥ विश्वेभ्योदेवेभ्यःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदंनमम ॥ ध्रुवायभूमायस्वाहा ॥ ध्रुवायभूमायेदंनमम ॥ ध्रुवक्षितयेस्वाहा ॥
ध्रुवक्षितयइदंनमम ॥ अच्युतक्षितयेस्वाहा ॥ अच्युतक्षितयइदंनमम ॥ अग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदंनमम ॥ ॐ
भूस्वाहाअग्नयइदंनमम ॥ ॐ भुवःस्वाहावायवइदंनमम ॥ ॐ सुवःस्वाहासूर्यायेदंनमम ॥ ॐ भूर्भुवःसुवःस्वाहाप्रजापतयइदं
नमम ॥ यथाहृतद्धसवोगौर्यंचित्पदिषिताममुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यꣳहःप्रातार्यग्नेप्रतरानआयुः ॥ परिस्तरणानि
उत्तरेविसृज्य ॥ अदितेन्वंमꣳस्थाः ॥ अनुमतेन्वंमꣳस्थाः ॥ सरस्वतेन्वंमꣳस्थाः ॥ देवसवितःप्रासावीः ॥ यज्ञनमस्तेयज्ञ ॥
नमोनमश्चतेयज्ञ ॥ शिवेनमेसंतिष्ठस्व ॥ स्योनेनमेसंतिष्ठस्व ॥ सुभूतेनमेसंतिष्ठस्व ॥ ब्रह्मवर्चसेनमेसंतिष्ठस्व ॥ यज्ञस्यर्धिमनु
संतिष्ठस्व ॥ उपतेयज्ञनमः ॥ उपतेनमः ॥ उपतेनमः ॥ सर्वमंत्रेषुतिष्ठति ॥ मेधावि ॥ तेजस्वि ॥ वर्चस्वि ॥ ब्रह्मवर्चसि ॥
आयुष्मान्भूयासं ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन ॥ प्रमादात्कुर्व
तांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णस्यादितिश्रुतिः ॥ ॥ बलिहरणेनयक्ष्ये तत्रभूमिंप्रोक्ष्य ॥ धर्मायस्वाहा ॥
अधर्मायस्वाहा ॥ परिषिच्य ॥ अद्भ्यःस्वाहा ॥ परिषिच्य ॥ ओषधिवनस्पतिभ्यःस्वाहा ॥ रक्षोदेवजनेभ्यःस्वाहा ॥ परिषि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

च्य ॥ गृह्याभ्यःस्वाहा ॥ अवसानेभ्यःस्वाहा ॥ अवसानपतिभ्यःस्वाहा ॥ सर्वभूतेभ्यःस्वाहा ॥ परिषिच्य ॥ कामायस्वाहा ॥ परिषिच्य ॥ अंतरिक्षायस्वाहा ॥ परिषिच्य ॥ यदेजतिजगतियच्चचेष्टतिनान्नोभागोयन्नान्नेस्वाहा ॥ परिषिच्य ॥ ॐ पृथिव्यै स्वाहा ॥ अंतरिक्षायस्वाहा ॥ दिवेस्वाहा ॥ सूर्यायस्वाहा ॥ चंद्रमसेस्वाहा ॥ नक्षत्रेभ्यःस्वाहा ॥ इंद्रायस्वाहा ॥ बृहस्पतयेस्वाहा ॥ प्रजापतयेस्वाहा ॥ ब्रह्मणेस्वाहा ॥ परिषिच्य ॥ प्राचीनावीती ॥ स्वधापितृभ्यःस्वाहा ॥ परिषिच्य ॥ यज्ञोपवीती ॥ अपउपस्पृश्य ॥ नमोरुद्रायपशुपतयेस्वाहा ॥ परिषिच्य ॥ देवेभ्यःस्वाहा ॥ अग्नौआहुतिंहुत्वा ॥ अग्नौपरिषिच्य ॥ अपसव्यं ॥ पितृभ्यःस्वधास्तु ॥ परिषिच्य ॥ सव्यं ॥ भूतेभ्योनमः ॥ परिषिच्य ॥ मनुष्ययज्ञेनयक्ष्ये ॥ मनुष्येभ्योहंत ॥ परिषिच्य ॥ प्रजापतयेस्वाहा ॥ परिषिच्य ॥ परमेष्ठिनेस्वाहा ॥ परिषिच्य ॥ यथाकूपःशतधारःसहस्रधारोअक्षितः ॥ एवामेअस्तुधान्यꣳ सहस्रधारमक्षितं ॥ धनधान्यैस्वाहा ॥ परिषिच्य ॥ द्वावेकंद्वौचचत्वारिप्रत्येकंत्रितयंतथा ॥ पृथिव्यादिदशैतानिप्रत्येकंशेष मेवच ॥ इतिपरिषेचनक्रमः ॥ अग्नयेनमः गंधाक्षतपुष्पंसमर्पयामि ॥ अनेनप्रातःसायंवैश्वदेवहोमाख्येनकर्मणाभगवान्परमे श्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ येभूताःप्रचरंतिदिवानक्तंबलिमिच्छंतोवितुदस्यप्रेष्याः ॥ तेभ्योबलिंपुष्टिकामोहरा मिमयिपुष्टिंपुष्टिपतिर्दधातुस्वाहा ॥ चांडालवायसेभ्यःभूतेभ्यइदंनमम ॥ हस्तौपादौप्रक्षाल्य ॥ आचम्य ॥ केश० श्रीकृष्णा० ॐ भू० रोम् अनाज्ञातादिमंत्रत्रयंजपेत् ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयन्नोअस्तु ॥ शिवादिशःप्रदिशउद्दिशोन आपौविद्युतःपरिपांतुसर्वतःशांतिःशांतिःशांतिः ॥ समाप्तं ॥

॥ छ ॥ ॥ छ ॥

॥ ५७ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अथ बलिहरणम्

२५ देवेभ्यः स्वा०

३१ यथाकूं०	९ सर्वभूते०	१२ यदेजति०	५ रक्षोदेवज०	२२ ब्रह्मणे०	२७ भूतेभ्यो०	२६ पितृभ्यं०
३० परमे०	८ अवसानं०	११ अंतरिक्षा०	४ ओषधिवन०	२१ प्रजापं०	२४ नमो०	२३ स्वधापि०
२९ प्रजापं०	७ अवसानें०	१० कामाय०	३ अद्भ्यःस्वा०	२० बृहस्प०		
२८ मनुष्यें०	६ गृह्याभ्य०	२ अधर्मा०	१ धर्मा०	१९ इंद्राय०		
				१८ नक्षत्रे०		
				१७ चंद्रमं०		
				१६ सूर्याय०		
				१५ दिवे०		
				१४ अंतरिं०		
				१३ पृथि०		

१ इयं २५ तमाहुतिः कुंडे प्रक्षेप्या.

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५० ॥ गोविप्रपूजनविधिः ॥

श्रीः ॥ देशकालावुत्कीर्त्यश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीरुद्ररूपिण्यागोःपूजनमहंकरिष्ये ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ श्रीरुद्ररूपिण्यैगवेनमइतिसर्वानुपचारान्दत्वा ओदननैवेद्यंसमर्पयामि ॥ गोग्रासमंत्रः ॥ आगावोंअग्मन्नुतभद्रमक्रन् ॥ सीदंतुगोष्ठेरणयंत्वस्मे ॥ प्रजावतीःपुरुरूपाइहस्युः ॥ इंद्रायपूर्वीरुषसोदुहानाः ॥ सौरभेय्यःसर्वहिताःपवित्राःपुण्यराशयः ॥ प्रतिगृह्णंत्विमंग्रासंगावस्त्रैलोक्यमातरः ॥ गवामंगेष्वितिमंत्रेणप्रदक्षिणामंत्रपुष्पंसमर्पयामि ॥ अनेनगोपूजनेनश्रीरुद्ररूपिणीगौःप्रीयतां ॥ ॥ अथब्राह्मणपूजा ॥ महाविष्णुस्वरूपिणेब्राह्मणायइदमासनंइदंपाद्यं ॥ चरणंपवित्रंवितंतंपुराणंयेनपूतस्तरतिदुष्कृतानिं ॥ तेनपवित्रेणशुद्धेनपूताअतिपाप्मानमरातिंतरेम ॥ भूमिदेवाग्रजन्मासित्वंविप्रपुरुषोत्तम ॥ प्रत्यक्षोयज्ञपुरुषअर्घोयंप्रतिगृह्यतां ॥ इदमर्घ्यंस० अस्त्वर्घ्यः गंधाःपांतु सौमंगल्यंचास्तु अक्षताःपांतु आयुष्यमस्तु पुष्पाणिपांतुसौश्रियमस्तु धूपंपातुदीपंपातुतांबूलंपातुदक्षिणाःपांतुऐश्वर्यमस्तु ॥ नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः ॥ सकलाराधनैःस्वर्चितमस्तुअस्तुसकलाराधनैःस्वर्चितं ॥ भोजनविधिः ॥ ॥ गायत्र्यापात्राणिप्रोक्ष्य ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां ॥ एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः ॥ अनेनब्राह्मणभोजनेनकर्मांगदेवतास्वरूपीपरमेश्वरःप्रीयतां ॥ यंतुनदयोवर्षंतुपर्जन्याः ॥ सुपिप्पलाओषधयोभवंतु ॥ अन्नवतामोदनवतामामिक्षमतां ॥ एषाःराजाभूयासं ॥ ओदनमुद्वते ॥ परमेष्ठीवाएषः ॥ यदोदनः ॥ परमामेवैनंश्रियंगमयति ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५१ ॥ परिवेषणविधिः ॥

सत्यंत्वर्तेनपरिषिंचामीतिप्रातः ॥ ऋतंत्वासत्येनपरिषिंचामीतिसायं ॥ ओंभूःस्वाहा ॥ ॐ भुवःस्वाहा ॥ ॐ सुवःस्वाहा ॥ ॐ भूर्भुवःसुवःस्वाहा ॥ ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतुष्पदे ॥ अमृतोपस्तरणमसि ॥ ॐ प्राणायस्वाहा ॥ ॐ अपानायस्वाहा ॥ ॐ व्यानायस्वाहा ॥ ॐ उदानायस्वाहा ॥ ॐ समानायस्वाहा ॥ ॐ ब्रह्मणेस्वाहा ॥ अमृतापिधानमसि ॥ परिवेषणंसमाप्तं ॥ ॥ छ ॥ ॥ छ ॥

॥ ५२ ॥ भोजनविशेषविधिः ॥

श्रीः ॥ आयुष्कामःप्राङ्मुखःकीर्तिकामोदक्षिणामुखःश्रीकामोनिष्कामोपिप्रत्यङ्मुखः पित्र्यंविनानोदङ्मुखःकदाचन जीवत्पितृकोजीवदन्यतरोवानदक्षिणामुखःकदाचनेत्यभिसंधायोपविश्य भूर्भुवःसुवरोमितिआहियमाणमन्नमुपस्थायपरिविष्टंप्रणवव्याहृतिसहितयागायत्र्याभ्युक्ष्यतर्जन्यांरौप्यंधृतंचेन्निष्कास्यवामहस्तेनचतुरश्रमंडलेस्थापितंभोजनपात्रंधृत्वादक्षिणहस्तेनजलमादाय सत्यंत्वर्तेनपरिषिंचामिइतिप्रातः ऋतंत्वासत्येनपरिषिंचामिइतिसायंपरिषिच्यभोजनपात्रस्यदक्षिणतोदशांगुलपरिमितंपंचांगुलपरिमितंवास्थलंत्यक्त्वातत्रतूष्णीमभ्युक्ष्यान्नात्किंचिद्गृहीत्वा भूःस्वाहा (अग्नयइदं) पुनर्गृहीत्वा भुवःस्वाहा (वायवइदं) पुनःसुवःस्वाहा (सूर्यायेदं) पुनःभूर्भुवःसुवःस्वाहा (प्रजापतयइदं) इतिप्राक्संस्थमुदक्संस्थंवाभ्युक्षितदेशेबलीन्दद्यात् ॥ बलिषुनवात्यागः ॥ ततोबलीन्परिषिच्यहस्तंप्रक्षाल्य ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतुष्पदे ॥ इत्यन्नमभिमंत्र्य गोकर्णाकृतिनाहस्तेनमाषपरिमितंजलमादाय ॐ श्रद्धायांप्राणेनिविष्टोमृतंजुहोमि श्रद्धायांम

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पाने० इत्यादि त्मामृतत्वायइत्यात्मानंपरमात्मनिसंयुक्तंभावयित्वा अमृतोपस्तरणमसि इतिपुरस्तादुदकंपिबति ॥ ततःपरिविष्टा दन्नाद्भृतप्लुतादेकामाहुतिंश्रद्धायांप्राणे० शिवोमावि० प्राणायस्वाहा इतितर्जनीमध्यमांगुष्ठैर्मुखेजुहुयात् ॥ श्रद्धायांमपाने० इतिमध्यमानामिकांगुष्ठैर्द्वितीयां ॥ श्रद्धायांव्या० इतिकनिष्ठिकानामिकांगुष्ठैस्तृतीयां ॥ श्रद्धायांमुदा० इतितर्जनीरहिताभिः कनिष्ठिकातर्जन्यंगुष्ठैश्चतुर्थीं ॥ श्रद्धायांसमाने० इतिसर्वांगुलिभिःपंचमीं ॥ त्यागेविकल्पः ॥ अथवासर्वाआहुतयोमुक्तकनिष्ठि केनकरेणहोतव्याः ॥ अयंचहोमोन्नरसमविजानतादंतैःस्पर्शमकुर्वतामौनेनैवकर्तव्यः ॥ अतऊर्ध्वमनियमोमौनस्य ॥ जीवत्पितृक स्यप्राणाहुत्यूर्ध्वंमौनंनास्त्येव ॥ मौनलोपेविष्णुस्मरणं ॥ ततोभोजनपात्रमाधारोपरिसंस्थाप्यदत्तांश्चतुरोबलीन्केनचिन्निष्काश यित्वाअसंभवेतान्प्रच्छाद्यपादौभूमौनिधायवामहस्तांगुष्ठतर्जनीमध्यमाभिर्धृतभोजनपात्रःपंचार्द्रोविमुक्तशिखोभुंजीयात् ॥ भो जनोत्तरंततःसर्वंभुक्तोच्छिष्टमन्नमादाय ॥ रौरवादिनिमज्ञानांदेहिनामन्नमिच्छतां ॥ तृप्तयेन्नमिदंदत्तमक्षय्यमुपतिष्ठतु ॥ इत्यु च्छिष्टभाग्भ्योन्नंदत्वा ॥ रौरवेपूयनिलयेपद्मार्बुदनिवासिनां ॥ अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु ॥ इत्यन्नोपर्युदकंदद्यात् ॥ ततःअमृतापिधानमसि ॥ इत्युदकंपीत्वोत्तिष्ठेत् ॥

॥ ७ ॥

॥ ७ ॥

१ भोजनेनियमाः । गायत्र्यभ्युक्षितंकिंचिदन्नंपात्रेकस्मिंश्चित्प्रदेशेपृथङ्निधायभोजनांतेतद्भुंजीयात् । वामहस्तेनान्नंनस्पृशेत् । नपादौशिरोवस्तिंच स्पृशेत् । पदाभोजनपात्रंनस्पृशेत् । नोच्छिष्टआज्यंगृह्णीयाद्रवद्रव्याणिच । नप्रसृतांगुलिर्भुंजीयात्नफूत्कारसंयुतंनाजीर्णीनातिबुभुक्षितोवहुनार्द्रवा सानार्द्रशिरानदेवतायतनेनप्रसारितपादोनवेष्टितशिराःनसशब्दंनोत्संगकृतभाजनोनग्रासशेषंनबहूनांभुंजतांत्वरान्वितःनब्रह्मकीर्तयन्नभार्यायासहनभि न्नभाजनेनभूम्यांनपाणितलेनतैलयंत्रग्रावोलूखलपेषणयंत्रशब्देषुजायमानेषुभुंजीयात् । उद्धृतपीतावशेषमुदकंनैवपिबेत् उदकपात्रंदक्षिणभागएवस्था

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५३ ॥ सायंसंध्या ॥

श्रीः ॥ ॐ केशवायनमः० श्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ॐ सुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ॐ सत्यं ॥ ॐ तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑दे॒वस्य॑ धीमहि ॥ धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ ॐ मापो॒ ज्योती॒रसो॒ मृतं॒ ब्रह्म॒ भूर्भुवः॒ सुव॒रोम् ॥ सायंसंध्यावृद्धा कृष्णाकृष्णवर्णाकृष्णवस्त्राकृष्णमाल्यानुलेपनागरुडवाहनाविष्णुदैवत्याआहवनीयाग्न्युपस्थानासामवेदसंहितातृतीयाविष्णु संध्यासत्यवतीनाम्नीतिध्यात्वा ममउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंसायंसंध्यामुपासिष्ये ॥ आया॑तु॒ वर॑दादे॒वी अ॒क्षरं॑ ब्रह्म॒

पयेत् । चंडालपतितरजस्वलावाक्यंशृण्वन्नैकमपिग्रासंभुंजीयात् । उदकपानकालेभोजनपात्रेमुखाद्यद्युदकंपतेत्तदातदन्नंनभुंजीयात् । ब्रह्मचारीचेन्माष उमुद्गक्षारलवणादिवर्जमन्नंकांस्यव्यतिरिक्तेपात्रेभुंजीत । वटाश्वत्थार्कपत्रेषुसाग्रकदलीपत्रेपलाशमध्यमपत्रेकरेखर्परकेपाषाणेचसर्वेषांभोजनंनिषिद्धं । दकपानकालेदक्षिणहस्तेनपात्रंधारयन्नुद्धृतौदकपात्रंवामहस्तेनादायदक्षिणमणिबंधेतत्पात्रंसंस्पर्श्यवामहस्तेनैवपिबेत् । एकपंक्त्युपविष्टानांमध्येयदि कश्चननास्तिक्यात्प्रमादाद्वाभुंजानेषुपूर्वमुत्तिष्ठेत्तदाशिष्टंभोजनपात्रस्थमन्नंपरित्यजेत् । संकटे अग्निनाभस्मनादर्भेणोदकेनद्वारव्यवधानेनवापंक्तिभेदः कार्यः । भोजनपात्रेशिष्टंलवणंपात्रमस्पृशन्वामहस्तेनजलेनप्लावयेत् । ततोभोजनपात्रंनिष्काशयित्वाहस्तप्रक्षालनमकुर्वन्नेकवारंगंडूषमेवादौकृत्वाहस्तौ मुखंचयावल्लेपनिःसरणंतर्जनीरहितांगुलिभिःप्राक्षाल्य लोहितनिःसरणंविनायावद्दंतलग्नमुच्छिष्टंनिर्गच्छतितावन्निष्काश्यषोडशगंडूषान्कृत्वामुखंपा दौचप्रक्षालयेत् । अथभोजनकालेचेदशुचिर्भवतिद्विजः । भूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रोविशुद्ध्यति । संवर्तः । केशकीटावपन्नंचनीलीलाक्षोपघा तितं । स्नाय्वस्थिचर्मसंसृष्टंभुक्त्वातूपवसेदहः । हारीतः । विशुद्धमपिचाहारंमक्षिकाकृमिजंतुभिः । केशरोमनखैर्वापिदूषितंपरिवर्जयेत् । अपवा दः । देवद्रोण्यांविवाहादौयज्ञेषुप्रकृतेषुच । काकैःश्वभिश्चसंस्पृष्टमन्नंतन्नविवर्जयेत् । अन्नंतन्मात्रमुद्धृत्यशेषंसंस्कारमर्हति । ब्रह्मपुराणे । भक्ष्यंत्वभ क्ष्यवाक्येनयद्दद्याद्रोषधर्मतः । गुरोरपिनभोक्तव्यंवाग्दुष्टंतन्महापदि ॥ वाग्दुष्टंभावदुष्टंचभाजनेभावदूषिते । भुक्त्वान्नंतुद्विजःपश्चात्त्रिरात्रंतुव्रतीभ वेत् । एतेषुनिषिद्धेष्वन्यतमदोषेषुसत्सुतत्तत्प्रायश्चित्तादिविस्तरोविस्तरभियानात्रालेखिसोन्यत्रद्रष्टव्यः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संमितं ॥ गायत्रीछंदसांमातेदंब्रह्मजुषस्वमे ॥ यदह्नात्कुरुतेपापंतदह्नात्प्रतिमुच्यते ॥ यद्रात्रियात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते ॥ सर्ववर्णेमहादेविसंध्याविद्येसरस्वति ॥ अजरेअमरेदेविसर्वदेविनमोस्तुते ॥ ओजोसिसहोसिबलमसिभ्राजोसिदेवानांधामनामासिविश्वमसिविश्वायुःसर्वमसिसर्वायुरभिभूरोंगायत्रीमावाहयामिसावित्रीमावाहयामिसरस्वतीमावाहयामिछंदर्षीनावाहयामिश्रियमावाहयामिह्रियमावाहयामि ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ आपोवाइदꣳसर्वंविश्वाभूतान्यापःप्राणावाआपःपशवआपोन्नमापोमृतमापःसम्राडापोविराडापःस्वराडापश्छंदाꣳस्यापोज्योतीꣳष्यापोयजूꣳष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसुवरापओम् ॥ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंतां ॥ यदह्नापापमकार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ अहस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंाममृतयोनौ ॥ सत्येज्योतिषिजुहोमिस्वाहाइतिप्राश्याचम्य ॥ केशवायनमः ॥ नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ दधिक्राव्णोंअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूꣳषितारिषत् ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ हिरण्यवर्णाःशुचयःपावका० ॥ जातवेदामोर्जयंत्यापुनातु ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नःस्नात्वीमलादिव ॥ पूतंपवित्रेणेवाज्यं ॥ आपःशुंधंतुमैनसः ॥ ॥ प्रत्यङ्मुखः ॐभूर्भुवःसुवः ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ श्रीसवित्रेर्घ्यंदत्तंनमम ॥ इतित्रीनर्घ्यान्दत्वा ॥ प्रत्यङ्मुखएवगायत्रीजपंसमाप्यअसावादित्योब्रह्म ॥ केशवायनमः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नारायणायनमः ॥ माधवायनमः ॥ गोविंदायनमः ॥ विष्णवेनमः ॥ मधुसूद० ॥ त्रीकृष्णायनमः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳसुवः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ अपसर्पंतु० अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभे ॥ पृथ्वीतिमंत्रस्य ॥ मेरुपृष्ठऋषिः ॥ कूर्मोदेवता ॥ सुतलंछंदः ॥ आसनेविनियोगः ॥ ॐ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरं ॥ मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं ॥ कनिष्ठिक्यांन्यसेद्विष्णुंकरमध्येतुमाधवं ॥ एवंचकरविन्यासंसर्वपापप्रणाशनं ॥ भूःपादाभ्यांनमः ॥ भुवःजानुभ्यांनमः ॥ सुवःकटिभ्यांनमः ॥ महःनाभ्यैनमः ॥ जनःहृदयायनमः ॥ तपःकंठायनमः ॥ सत्यंललाटायनमः ॥ परब्रह्मशिरसेस्वाहा ॥ तत्सवितुर्ब्रह्मात्मनेहृदयायनमः ॥ वरेण्यंविष्णवात्मनेशिरसेस्वाहा ॥ भर्गोदेवस्यरुद्रात्मनेशिखायैवषट् ॥ धीमहिपरमात्मनेकवचायहुं ॥ धियोयोनोज्ञानात्मनेनेत्रत्रयायवौषट् ॥ प्रचोदयात्सत्यात्मनेअस्त्रायफट् ॥ इतिदिग्बंधः ॥ गायत्रियागायत्रीछंदो विश्वामित्रऋषिः सवितादेवताग्निर्मुखंब्रह्माशिरोविष्णुर्हृदयꣳरुद्रःशिखापृथिवीयोनिःप्राणापानव्यानोदानसमानासप्राणाश्चेतवर्णासांख्यायनसगोत्रागायत्रीचतुर्विꣳशत्यक्षरात्रिपदाषट्कुक्षिःपंचशीर्षोपनयनेविनियोगः ॥ ॐ भूः ॥ ॐ भुवः ॥ ओꣳसुवः ॥ ॐ महः ॥ ॐ जनः ॥ ओंतपः ॥ ओꣳसत्यं ॥ ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ओमापो ज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरों ॥ सायंसंध्यांगत्वेनअष्टोत्तरशतसंख्ययाष्टाविंशतिर्वागायत्रीजपमहंकरिष्ये ॥ सुमुखंसंपुटंचैव० मुक्ताविद्रुमहेमनीरधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुकलानिबद्धमुकुटांतत्त्वार्थवर्णात्मिकां ॥ गायत्रींवरदाभयाकुशकशांशुभ्रं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कपालंगुणंशंखंचक्रमथारविंदयुगुलंहस्तैर्वहंतींभजे॥ महामालेमहामायेसर्वशक्तिस्वरूपिणि॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव॥ ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्॥ इतिजपित्वा॥ तत्सवितुर्ब्रह्मात्मनेहृदयायनमः॥ वरेण्यंविष्ण्वात्मनेशिरसेस्वाहा॥ भर्गोदेवस्यरुद्रात्मनेशिखायैवषट्॥ धीमहिपरमात्मनेकवचायहुं॥ धियोयोनोज्ञानात्मनेनेत्रत्रयायवौषट्॥ प्रचोदयात्सत्यात्मनेअस्त्रायफट्॥ इतिदिग्विमोकः॥ सुरभिर्ध्यानशूर्पंचयोनिःकूर्मोथपंकजं॥ लिंगंनिर्याणमुद्रांचजपांतेष्टौप्रकीर्तिताः॥ ॐ इमंमेवरुणश्रुधीहवंमद्याचमृडय॥ त्वामवस्युराचके॥ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधि॥ यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं॥ मिनीमसिद्यविद्यवि॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि॥ अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः॥ कितवासोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्नविद्म॥ सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः॥ यांसदासर्वभूतानिस्थावराणिचराणिच॥ सायंप्रातर्नमस्यंतिसामासंध्याभिरक्षतु॥ नमःप्रतीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमउदीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमःप्राच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोदक्षिणायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमऊर्ध्वायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोधरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोवांतरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोगंगायमुनयोर्मध्येयेवसंतितेमे

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रसन्नात्मानश्चिरंजीवितंवर्धयंतिनमोगंगायमुनयोर्मुनिभ्यश्चनमोनमोगंगायमुनयोर्मुनिभ्यश्चनमः ॥ अवांतरदिशाभ्योनमः ॥ सꣳस्रवंतुदिशोमयिसमागच्छंतुसूनृताः ॥ सर्वेकामाअभियंतुनःप्रियाअभिस्रवंतुनःप्रियाः ॥ ॐप्रियाअभिवादयेत्रिप्रवरान्वितअमुकगोत्रोत्पन्नः यजुर्वेदस्यतैत्तिरीयशाखांतर्गतहिरण्यकेशीशाखाध्यायीअमुकदेवशर्माहं भोगुरोअभिवादयामि॥नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ जगद्धितायकृष्णायगोविंदायनमोनमः ॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं ॥ स्तुतोमयावरदावेदमाताप्रचोदयंतीपवनेद्विजाता ॥ आयुःपृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्वाप्रजातुं ब्रह्मलोकं ॥ घृणिःसूर्यआदित्योनप्रभावात्यक्षरं ॥ मधुक्षरंतितद्रसं ॥ सत्यंवैतद्रसमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरों ॥ ब्रह्म लोकायनमः ॥ विष्णुलोकायनमः ॥ रुद्रलोकायनमः ॥ संध्यायैनमः ॥ विद्यायैनमः ॥ सरस्वत्यैनमः ॥ वेदायनमः ॥ वेद पुरुषायनमः ॥ आकाशात्पतितंतोयंयथागच्छतिसागरं ॥ सर्वदेवनमस्कारःकेशवंप्रतिगच्छति ॥ केशवायनमःइत्याचम्यप्रा णानायम्य ॥ अनेनसायंसंध्योपासनाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ ॐ वषट्तेविष्ण वास० ॥ सायंसंध्योत्तरंध्रुवोपस्थानंकरिष्ये ॥ भूःप्रपद्येभुवःप्रपद्येस्वःप्रपद्येभूर्भुवःस्वःप्रपद्येब्रह्मप्रपद्येब्रह्मकोशंप्रपद्येमृतंप्रपद्येमृ तकोशंप्रपद्येचतुर्जालंब्रह्मकोशंयंमृत्युर्नावपश्यतितंप्रपद्येदेवान्प्रपद्येदेवपुरंप्रपद्येपरीवृतोवरीवृतोब्रह्मणावर्मणाहंतेजसाकश्यप स्ययस्यैनमस्तच्छिरोधर्मोमूर्धानंब्रह्मोत्तराहनुर्यज्ञोधराविष्णुर्हृदयꣳसंवत्सरःप्रजननंमश्विनापूर्वपादावत्रिर्मध्यंमित्रावरुणावपरपा दावग्निःपुच्छस्यप्रथमंकांडंततइंद्रस्ततःप्रजापतिरभयंचतुर्थꣳसवाएषदिव्यःशाकरःशिशुमारस्तꣳहयएवंवेदापपुनर्मृत्युंजयतिज यतिस्वर्गलोकंनाध्वनिप्रमीयतेनाग्नौप्रमीयतेनाप्सुप्रमीयतेनानपत्यःप्रमीयतेलघ्वान्नोभवतिध्रुवस्त्वमसिध्रुवस्याक्षितमसित्वंभूता

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नामधिपतिरसित्वंभूतानाꣳश्रेष्ठोसित्वांभूतान्युपपर्यावर्ततेनमस्तेनमःसर्वतेनमोनमःशिशुकुमारायनमः ॥ १९ ॥ ॥ छ ॥

॥ ५४ ॥ उदकशांतिःसप्रयोगा ॥

श्रीः ॥ गोमयेनगोचर्ममात्रंचतुरस्रमुपलिप्यकर्ताशुचिःसुप्रक्षालितपाणिपादआचांतोदर्भेषूपविश्यदूर्वादर्भांश्चधारयमाणःप्राणानायम्यतिलकादिकृत्वादेशकालौसंकीर्त्यअस्माकमित्यादिममशरीरेउत्पन्नस्योत्पत्स्यमानस्यचकफवातपित्तत्रिदोषान्यतमप्रकोपोद्भूतज्वरादिविविधव्याधेःजीवच्छरीराविरोधेनसमूलनिवृत्त्याक्षिप्रारोग्यावाप्त्यर्थंग्रहभूतप्रेतपिशाचक्षुद्रदेवतासिद्धाभिशापादिविविधोपद्रवशांत्यर्थंचसर्वापन्निवृत्तिपूर्वकसर्वाभीष्टसिद्धिद्वाराश्रीषडंगसहितवेदपुरुषब्रह्मप्रीत्यर्थंब्राह्मणद्वारावौधायनोक्तामुदकशांतिंकरिष्ये ॥ तत्रादौनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनंपंचवाक्यैःपुण्याहवाचनंब्राह्मणवरणंचकरिष्ये ॥ गणपतिंसंपूज्यपंचवाक्यैःपुण्याहंवाचयित्वाब्राह्मणवरणंकुर्यात् अमुकप्रवरान्वितामुकगोत्रोत्पन्नोमुकशर्माऽहंअमुकप्रवरान्वितामुकगोत्रममुकशाखाध्यायिनममुकशर्माणंब्राह्मणं अस्यामुदकशांतौपूर्वस्यांदिशिविहितसूक्तजपकर्तारंत्वांवृणे अस्यामुदकशांतौदक्षिणस्यांदिशि० अस्यामुदकशांतौपश्चिमायांदिशिविहितसूक्तजपकर्तारमाचार्यत्वेनचत्वांवृणे अस्यामुदकशांतावुत्तरस्यांदिशिविहितसूक्तजपकर्तारं० ॥ नमोस्त्वनंताय० ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्चितामया ॥ सुप्रसन्नाःप्रकुर्वंतुशांतिकंविधिपूर्वकं॥ यांतुदेवगणाःसर्वे० ॥ सर्वेआचम्यप्राणानायम्यदेशकालावुत्कीर्त्यअमुकगोत्रोत्पन्नेनामुकशर्मणायजमानेनउदकशांतिकर्मणिवृतोहमाचार्यकर्मकरिष्ये ॥ निर्विघ्नार्थंमहागणपतिस्मरणंशरीरशुद्ध्यर्थंपुरुषसूक्तजपंचकरिष्ये ॥ गणपतिंस्मृत्वापुरुषसूक्तंजस्त्वायदत्रसंस्थितं० जितंतेपुंडरीकाक्ष० अपक्रामंत्वितिसर्षपविकिरणादिग्रादेशांतंकृत्वापंचप्रस्थसिकताभिःशुद्धाभिरद्भिरर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ङ्गिमात्रंचतुरङ्गंस्थंडिलंकृत्वासुवर्णव्रीहिदभानगुष्ठनमहानाम्न्याचोपसंगृह्य ॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआ
वः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ इतितस्यपश्चादारभ्यमध्येप्राचीःसंततांलेखांलिखित्वा ॥ तदक्षि
णतः ॐ नाकेसुपर्णमुपयत्पतंतंहृदावेनंतोअभ्यचक्षतत्वा ॥ हिरण्यपक्षंवरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युं ॥ प्रादेशमात्रांत
थैवलेखांविलिख्य ॥ तस्योत्तरतः ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ तथैवलेखांविलिख्य तस्यद
क्षिणतोमध्यादारभ्य ॥ ॐ योरुद्रोअग्नौयोअप्सुयओषधीषुयोरुद्रोविश्वाभुवनाविवेशतस्मैरुद्रायनमोअस्तु ॥ इत्युदीचीःसंत
तांलेखांविलिख्यतस्याःपश्चात्प्रादेशमात्रां ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपाःसुरे ॥ इतितथैवलेखांविलिख्य
तस्याःपुरस्तात् ॥ इंद्रंविश्वाअवीवृधन्त्समुद्रव्यचसंगिरः ॥ रथीतमःरथीनांवाजानांसत्पतिंपतिं ॥ इतितथैवलेखांविलिख्या
ङ्गिरभ्युक्ष्य देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददे॥उत्तरतोनिरस्यअपउपस्पृश्यगंधोदकेनाभ्युक्ष्यदूर्वादर्भैः
प्रच्छाद्यपुष्पैःफलैश्चावकीर्यतदुत्तरतोदर्भेषुप्रोक्षणींब्रह्मपात्रंचासाद्यप्रोक्षणीःसंस्कृत्यप्रोक्षिताःस्थइतित्रिः॥ ब्रह्मपात्रंत्रिःप्रोक्ष्य
धूपयेत्॥ब्रह्मजज्ञानमितिमंत्रेणब्रह्मपात्रंस्थंडिलेनिधाय॥देवस्यत्वासवितुः० हस्ताभ्यांपरिस्तृणामीतिषोडशदर्भैरुदगग्रैःपुरस्तात्प
रिस्तीर्य ॥ भूर्भुवःसुवरितिदक्षिणतःप्रागग्रैःसप्तदशभिः ॥ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योत्तिरु
त्तममितिपश्चादुदगग्रैरष्टादशभिः ॥ अग्नआयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ उत्तरतःप्रागग्रैःसप्तदशभिः
परिस्तीर्य तिरःपवित्रंब्रह्मपात्रेअपआनीय ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं० ॐ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोर
भिस्रवंतुनः ॥ आपोवाइदःसर्वंविश्वाभूतान्यापःप्राणावाआपःपशवआपोन्नमापोमृतमापःसम्राडापोविराडपःस्वराडापश्छंदाः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्यापोज्योतीऽष्यापोयजूऽष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसुवरापओम् ॥ अपःप्रणयति ॥ श्रद्धावाआपः ॥ श्रद्धामेवा रभ्यप्रणीयप्रचरति ॥ अपःप्रणयति ॥ यज्ञोवाआपः ॥ यज्ञमेवारभ्यप्रणीयप्रचरति ॥ अपःप्रणयति ॥ वज्रोवाआपः ॥ वज्र मेवभ्रातृव्येभ्यःप्रहृत्यप्रणीयप्रचरति ॥ अपःप्रणयति ॥ आपोवैरक्षोघ्नीः ॥ रक्षसामपहत्यै ॥ अपःप्रणयति ॥ आपोवैदेवानां प्रियंधाम ॥ देवानामेवप्रियंधामप्रणीयप्रचरति ॥ अपःप्रणयति ॥ आपोवैसर्वादेवताः ॥ देवताएवारभ्यप्रणीयप्रचरति ॥ आपोवैशांताःशांताभिरेवास्यशुचंऽशमयति ॥ अमृतंवाआपस्तस्मादद्भिरवतांतमभिषिंचंति ॥ ॐ भूर्भुवःसुवरितियवाक्षततं डुलानावपति ॥ ॐ ब्रह्मजज्ञानं० अस्मिन्कुंभेषडंगसहितवेदपुरुषब्रह्मआवाहयामि॥ ॐ भूःब्रह्मआवा०॥ ॐ भूर्भुवःसुवःइतिषडं गन्यासंकृत्वाकलशादीन्संपूज्य॥ ॐ वेदात्मनायविद्महेहिरण्यगर्भायधीमहि ॥ तन्नोब्रह्मप्रचोदयात्॥ अनेनमंत्रेणषोडशोपचारैः संपूज्यपितविराजामृषभोरयीणामितिमंत्रपुष्पंसमर्प्य ॥ अनयापूजयाश्रीषडंगसहितवेदपुरुषब्रह्मप्रीयतां ॥ दूर्वादर्भैःप्रच्छा द्य ॥ ब्राह्मणाब्रह्मपात्रमन्वारभ्यजपंति ॥ तत्सवितुर्वरेण्यमित्येतांपच्छोर्धर्चशोऽनवानमुक्त्वावेदादीत्राक्षोघ्नादींश्चजपेयुः ॥ ॐ शंनोदेवीरभि० ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं ॥ भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ १ ॥ तत्सवितुर्वरेण्यंभ र्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥२॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॥ ३ ॥ अग्निमीळेपु रोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ (ऋग्वेदस्य) ॥ इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमाय कर्मणे ॥ (यजुर्वेदस्य) ॥ अग्नआयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ (सामवेदस्य) ॥ शंनोदेवीरभिष्टय आपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ (इत्यथर्ववेदस्य) ॥ इत्यापःसमाप्तानंतरंजपेयुः ॥ राक्षोघ्नं ॥ कृणुष्वपाजःप्रसितिंनपृ

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

थ्वांयाहिराजेवामंवाऽइभेन ॥ तृष्वीमनुप्रसितिंद्रूणानोस्तांसिविध्यरक्षसस्तपिष्ठैः ॥ तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः ॥ तपूंष्यग्नेजुह्वापतंगानसंदितोविसृजविष्वगुल्काः ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोअस्याअदब्धः ॥ योनोदूरेअघशंसोयोअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँओषतात्तिग्महेते ॥ योनोअरातिंसमिधानचक्रेनीचातंधक्ष्यतसंनशुष्कं ॥ ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने ॥ अवस्थिरातनुहियातुजूनांजामिमजामिं प्रमृणीहिशत्रून् ॥ सतेजानातिसुमतिंयविष्ठयईवतेब्रह्मणेगातुमैरत् ॥ विश्वान्यस्मैसुदिनानिरायोद्युम्नान्ययोंविदुरोअभिद्यौत् ॥ सेदग्नेअस्तुसुभगःसुदानुर्यस्त्वानित्येनहविषायउक्थैः ॥ पिप्रीषतिस्वआयुषिदुरोणेविश्वेदस्मैसुदिनासासदिष्टिः ॥ अर्चामिते सुमतिंघोष्यर्वाक्संतेवावातंजरतामियंगीः ॥ स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधारयेरनुद्यून् ॥ इहत्वाभूर्याचरेदुपत्मन्दोषावस्तर्दीदिवाँसमनुद्यून् ॥ क्रीडंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवाँसोजनानां ॥ यस्त्वास्वश्वःसुहिरण्योअग्नउपयातिवसुमतारथेन ॥ तस्यत्राताभवसितस्यसखायस्तआतिथ्यमानुषग्जुजोषत् ॥ महोरुजामिबंधुतावचोभिस्तन्मापितुर्गोतमादन्वियाय॥ त्वंनोअस्यवचसश्चिकिद्धिहोतर्यविष्ठसुक्रतोदमूनाः ॥ अस्वप्नजस्तरणयःसुशेवाअतंद्रासोवृकाअश्रमिष्ठाः ॥ तेपायवःसध्रियंचो निषद्याग्नेतवनःपांत्वमूर ॥ येपायवोमामतेयंतेअग्नेपश्यंतोअंधंदुरितादरक्षन् ॥ ररक्षतान्त्सुकृतोविश्ववेदादिप्संतइद्रिपवोनाह देभुः ॥ त्वयावयंसधन्यस्त्वोतास्तवप्रणीत्यश्यामवाजान् ॥ उभाशंसासूदयसत्यतातेनुष्टुयाकृणुह्यहयाण ॥ अयातेअग्नेसमिधाविधेमप्रतिस्तोमंशस्यमानंगृभाय ॥ दहाशसोरक्षसःपाह्यस्मान्द्रुहोनिदोमित्रमहोअवद्यात् ॥ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्टमुपयामिशर्म ॥ शिशानोअग्निःक्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तं ॥ विज्योतिषाबृहताभात्यग्निराविर्विश्वानि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृणुतेमहित्वा ॥ प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृंगेरक्षसेविनिक्षे ॥ उतस्वानासोदिविषंत्वग्नेस्तिग्मायुधारक्षसेहंतवाउ ॥ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः ॥ अस्माकमस्तुकेवलः ॥ इंद्रंनरोनेमधिताहवंतेयत्पार्यायुनजतेधियस्ताः ॥ शूरोनृषाताशर्व सश्चकानआगोमतिव्रजेभजात्वंनः ॥ इंद्रियाणिशतक्रतोयातेजनेषुपंचसु ॥ इंद्रतानितआवृणे ॥ अनुतेदायिमहइंद्रियायसत्रा तेविश्वमनुवृत्रहत्ये ॥ अनुक्षत्रमनुसहोयजत्रेंद्रदेवेभिरनुतेनृषह्ये ॥ आयस्मिन्त्सप्तवासवास्तिष्ठंतिस्वारुहोयथा ॥ ऋषिर्हदीर्घश्रु त्तमइंद्रस्यघर्मोअतिथिः ॥ आमासुपक्वमैरयआसूर्यंरोहयोदिवि ॥ घर्मनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेगिरः ॥ इंद्रमिद्गा थिनोबृहदिंद्रमर्केभिरर्किणः ॥ इंद्रंवाणीरनूषत ॥ गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणः ॥ ब्रह्माणस्त्वाशतक्रतवुद्वंशमिवयये मिरे ॥ अंहोमुचेप्रभरेमामनीषामोषिष्ठदात्रेसुमतिंगृणानाः ॥ इदमिंद्रप्रतिहव्यंगृभायसत्याःसंतुयजमानस्यकामाः ॥ विवेषय न्मांधिषणाजजानस्तवैपुरापार्यादिंद्रमह्नः ॥ अंहसोयत्रपीपरद्यथानोनावेवयंतमुभयेहवंते ॥ प्रसद्याजैप्रथममध्वराणामंहो मुचंवृषभंयज्ञियानां ॥ अपानपातमश्विनाहयंतमस्मिन्नरइंद्रियंधत्तमोजः ॥ विनइंद्रमृधोजहिनीचायच्छपृतन्यतः ॥ अधस्पदं तमींकृधियोअस्माअभिदासति ॥ इंद्रक्षत्रमभिवाममोजोजायथावृषभचर्षणीनां ॥ अपानुदोजनंममित्रयंतमुरुंदेवेभ्योअकृणो रुलोकं ॥ मृगोनभीमःकुचरोगिरिष्ठाःपरावतआजगामापरस्याः ॥ सृकंसंशायपविमिंद्रतिग्मंविशत्रून्ताढिविमृधोनुदस्व ॥ विशत्रून्विमृधोनुदविवृत्रस्यहनूरुज ॥ विमन्युमिंद्रभामितोमित्रस्याभिदासतः ॥ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशू रमिंद्रं ॥ हुवेनुशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः ॥ मातेअस्मांसंहसावन्परिष्टावघायभूमहरिवःपरादै ॥ त्रायस्वनोवृ केभिर्वरूथैस्तवप्रियासःसूरिषुस्याम ॥ अनवस्तेरथमश्वायतक्षन्त्वष्टावज्रंपुरुहूतद्युमंतं ॥ ब्रह्माणइंद्रंमहयंतोअर्कैरवर्धयन्नहयेहंत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi. Funding by MoE-IKS

वाउं ॥ वृष्णेयत्तेवृषणोअर्कमर्चानिंद्रग्रावाणआदितःसजोषाः ॥ अनश्वासोयेऽनभीशवोरथाइंद्रेषिताअभ्यवर्तंतदस्यून् ॥ २ ॥
यतइंद्रभयामहेततोनोअभयंकृधि ॥ मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥ स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी ॥
वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः ॥ महाँइंद्रोवज्रबाहुःषोडशीशर्मयच्छतु ॥ स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वेष्टि ॥
सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहन्छूरविद्वान् ॥ जहिशत्रूँरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥ येदेवाःपुरःसदो
ग्निनेत्रारक्षोहणस्तेनंःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहा ॥ येदेवादक्षिणसदोयमनेत्रारक्षोहणस्तेनंःपांतुतेनोवंतुतेभ्योनमस्तेभ्यः
स्वाहा ॥ येदेवाःपश्चात्सदःसवितृनेत्रारक्षोहणस्तेनंःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहा ॥ येदेवाउत्तरसदोवरुणनेत्रारक्षोहण
स्तेनंःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहा ॥ येदेवाउपरिषदोबृहस्पतिनेत्रारक्षोहणस्तेनंःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहा ॥
अग्नयेरक्षोघ्नेस्वाहा ॥ यमायरक्षोघ्नेस्वाहा ॥ सवित्रेरक्षोघ्नेस्वाहा ॥ वरुणायरक्षोघ्नेस्वाहा ॥ बृहस्पतयेदुवस्वतेरक्षोघ्नेस्वाहा ॥ अ
ग्निरायुष्मान्त्सवनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ॥ सोमआयुष्मान्त्सओषधीभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ॥
यज्ञआयुष्मान्त्सदक्षिणाभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ॥ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेनत्वायुषायुष्मंतंकरोमि ॥ देवा
आयुष्मंतस्तेमृतेनायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ॥ ४ ॥ यावांमिंद्रावरुणायतव्यांतनूस्तयेममँहसोमुंचतं ॥ यावांमिंद्राव
रुणासहस्यांतनूस्तयेममँहसोमुंचतं ॥ यावांमिंद्रावरुणारक्षस्यांतनूस्तयेममँहसोमुंचतं ॥ यावांमिंद्रावरुणातेजस्यांतनूस्तयेम
मँहसोमुंचतं ॥ योवांमिंद्रावरुणावग्नौस्रामस्तंवांमेतेनावयजे ॥ योवांमिंद्रावरुणाद्विपात्सुपशुषुस्रामस्तंवांमेतेनावयजे ॥ योवां
मिंद्रावरुणाचतुष्पात्सुपशुषुस्रामस्तंवांमेतेनावयजे ॥ योवांमिंद्रावरुणागोष्ठेस्रामस्तंवांमेतेनावयजे ॥ योवांमिंद्रावरुणागृहेषुस्रा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मस्तंवामेतेनावयजे ॥ योवामिंद्रावरुणाप्सुस्रामस्तंवामेतेनावयजे ॥ योवामिंद्रावरुणौषधीषुस्रामस्तंवामेतेनावयजे ॥ योवामिं द्रावरुणावनस्पतिषुस्रामस्तंवामेतेनावयजे ॥ अग्नेयशस्विन्यशसेममर्पयेंद्रावतीमपचितीमिहावह ॥ अयंमूर्धापरमेष्ठीसुवर्चाःस मानानामुत्तमश्लोकोअस्तु ॥ भद्रंपश्येंतउपसेदुरग्रेतपोदीक्षामृषयःसुवर्विदः ॥ ततःक्षत्रंबलमोजश्चजातंतदस्मैदेवाअभिसंन मंतु ॥ धातारिंधातापरमोतसंदृक्प्रजापतिःपरमेष्ठीविराजा ॥ स्तोमाश्छंदाꣳसिनिविदोमआहुरेतस्मैराष्ट्रमभिसंनमाम ॥ अभ्या वर्तध्वमुपमेतसाकमयꣳशास्ताधिपतिर्वोअस्तु ॥ अस्यविज्ञानमनुसꣳरभध्वमिमंपश्चादनुजीवाथसर्वे ॥ ऋताषाडृतधामाग्निर्गंध र्वस्तस्यौषधयोप्सरसऊर्जोनामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहाताभ्यःस्वाहासꣳहितोविश्वसामासूर्योगंधर्वस्तस्य मरीचयोप्सरसआयुवःसुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोबेकुरयोभुज्युःसुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरस स्तवाःप्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यर्क्सामान्यप्सरसोवह्नयइषिरोविश्वव्यचावातोगंधर्वस्तस्यापोप्सरसोमुदाभुवनस्यपतेय स्यतउपरिगृहाइहचं॥ सनोरास्वाज्यानिꣳरायस्पोषꣳसुवीर्यꣳसंवत्सरीणाꣳस्वस्तिं ॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वस्तस्यविश्वमप्सर सोभुवःसुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्योगंधर्वस्तस्यविद्युतोप्सरसोरुचोदूरेहेतिरमृडयोमृत्युर्गंधर्वस्तस्यप्रजाअप्सरसोभीरुव श्चारुःकृपणकाशीकामोगंधर्वस्तस्याधयोप्सरसःशोचयंतीनामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहाताभ्यःस्वाहासनो भुवनस्यपतेयस्यतउपरिगृहाइहचं ॥ उरुब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छ ॥ नमोअस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येअंतरिक्षेयेदि वितेभ्यःसर्पेभ्योनमः ॥ येदोरोचनेदिवोयेवासूर्यस्यरश्मिषु ॥ येषामप्सुसदःकृतंतेभ्यःसर्पेभ्योनमः ॥ याइषवोयातुधानानांये

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कस्थलाचकृतस्थलाचाप्सरसौयातुधानाहेतीरक्षाꣳसिप्रहेतिस्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ अयं
दक्षिणाविश्वकर्मातस्यरथस्वनश्चरथेचित्रश्चसेनानिग्रामण्यौमेनकाचसहजन्याचाप्सरसौदंक्ष्णवःपशवोहेतिःपौरुषेयोवधःप्रहे
तिस्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ अयंपश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेनानिग्राम
ण्यौप्रम्लोचंतीचानुम्लोचंतीचाप्सरसौसर्पाहेतिर्व्याघ्राःप्रहेतिस्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ अ
यमुत्तरात्संयद्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानिग्रामण्यौविश्वाचीचघृताचीचाप्सरसावापोहेतिर्वातःप्रहेतिस्तेभ्योनमस्तेनोमृडयं
तुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ अयमुपर्यर्वाग्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानिग्रामण्यावुर्वशीचपूर्वचित्तिश्चाप्सर
सौविद्युद्धेतिरवस्फूर्जन्प्रहेतिस्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ आशुःशिशानोवृषभोनयुध्मोघना
घनःक्षोभणश्चर्षणीनां ॥ संक्रंदनोनिमिषएकवीरःशतꣳसेनाअजयत्साकमिंद्रः ॥संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवने
नधृष्णुना ॥ तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनवृष्णा॥ सइषुहस्तैःसनिषंगिभिर्वशीसꣳस्रष्टासयुधइंद्रोगणेन ॥ सꣳसृष्टजि
त्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राꣳअपबाधमानः ॥ प्रभंजन्त्सेनाःप्रमृणोयुधा
जयन्नस्माकमेध्यवितारथानां ॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा ॥ इमꣳसजाताअनुवीरयध्वमिंद्रꣳसखायो
नुसꣳरभध्वं ॥बलविज्ञायःस्थविरःप्रवीरःसहस्वान्वाजीसहमानउग्रः ॥ अभिवीरोअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित् ॥
अभिगोत्राणिसहसागाहमानोदायोवीरःशतमन्युरिंद्रः ॥ दुश्च्यवनःपृतनाषाडयुध्योस्माकꣳसेनाअवतुप्रयुत्सु ॥ इंद्रआसांनेता
बृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः ॥ देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रे ॥ इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मरुताꣳशर्धउग्रं ॥ महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात् ॥ अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताज यंतु ॥ अस्माकंवीराउत्तरेभवंत्वस्मानुदेवाअवताहवेषु ॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमहांसि ॥ उद्वृत्रहन्वाजि नांवाजिनान्युद्रथानांजयतामेतुघोषः ॥ उपप्रेतजयतानरःस्थिरावःसंतुबाहवः ॥ इंद्रोवःशर्मयच्छत्वनाधृष्यायथासथ ॥ अव सृष्टापरापतशरव्येब्रह्मसꣳशिता ॥ गच्छामित्रान्प्रविशमैषांकंचनोच्छिषः ॥ मर्माणितेवर्मभिश्छादयामिसोमस्त्वाराजामृतेनाभिवस्तां ॥ उरोवरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः ॥ यत्रबाणाःसंपतंतिकुमारावि शिखाइव ॥ इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयच्छतु ॥ शंचमेमयश्चमेप्रियंचमेनुकामश्चमेकामश्चमेसौमनसश्चमेभद्रंचमेश्रेयश्चमेवस्यश्चमेयशश्चमेभगश्चमेद्रविणं चमेयंताचमेधर्ताचमेक्षेमश्चमेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्रसूश्चमेसीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंच मेनामयच्चमेजीवातुश्चमेदीर्घायुत्वंचमेनमित्रंचमेभयंचमेसुगंचमेशयनंचमेसूषाचमेसुदिनंचमे ॥ ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेधानास्तनुवंपुषेम ॥ मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेणपृतनाजयेम ॥ ममदेवाविहवेसंतुसर्वइंद्रावंतोमरुतोविष्णुरग्निः ॥ ममांतरिक्षमुरुगोपमस्तुमह्यंवातःपवतांकामेअस्मिन् ॥ मयिदेवाद्रविणमायजंतांमय्याशीरस्तुमयिदेवहूतिः ॥ दैव्याहोतारावनिषंतपूर्वेरिष्टाःस्यामतनुवासुवीराः ॥ मह्यंयजंतुममयानिहव्याकूतिःसत्यामनसोमेअस्तु ॥ एनोमानिगांकतमच्चनाहंविश्वेदेवासोअधिवोचताम ॥ देवीःषडुर्वीरुरुणःकृणोतविश्वेदेवासइहवीरयध्वं ॥ माहास्महिप्रजयामातनूभिर्मारधामद्विषतेसोमराजन् ॥ अग्निर्मन्युंप्रतिनुदन्पुरस्तादद्ब्धोगोपाःपरिपाहिनस्त्वं ॥ प्रत्यंचोयंतुनिगुतःपुनस्तेमैषांचित्तंप्रबुधाविनेशत् ॥ धाताधातृणांभुवनस्ययस्पतिर्देवꣳसवितारमभिमातिषाहं ॥ इमंयज्ञमश्विनोभाबृहस्पतिर्देवाःपांतयजमानंन्यर्थात् ॥ उरुव्यचानोमहिषःशर्मयꣳ

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सदस्मिन्हवेपुरुहूतःपुरुक्षु ॥ सनःप्रजायैहर्यश्वमृडयेंद्रमानोरीरिषोमापरादाः ॥ येनःसपत्नाअपतेभवंत्विंद्राग्निभ्यामवबाधाम
हेतान् ॥ वसवोरुद्राआदित्याउपरिस्पृशंमोग्रंचेत्तारमधिराजमक्रन् ॥ अर्वाचमिंद्रमुतोहवामहेयोगोजिद्धनजिदश्वजिद्यः ॥
इमंनोयज्ञंविहवेजुषस्वास्यकुर्मोहरिवोमेदिनंत्वा ॥ अग्नेर्मन्वेप्रथमस्यप्रचेतसोयंपांचजन्यंबहवःसमिंधते ॥ विश्वस्यांविशिप्रविवि
शिवाꣳसमीमहेसनोमुंचत्वꣳहसः ॥ यस्येदंप्राणंनिमिषद्यदेजतियस्यजातंजनमानंचकेवलं ॥ स्तौम्यग्निंनाथितोजोहवीमिसनो
मुंचत्वꣳहसः ॥ इंद्रस्यमन्येप्रथमस्यप्रचेतसोवृत्रघ्नस्तोमाउपमामुपागुः ॥ योदाशुषःसुकृतोहवमुपगंतासनोमुंचत्वꣳहसः ॥ यःसैं
ग्रामंनयतिसंवशीयुधेयःपुष्टानिसꣳसृजातित्रयाणि ॥ स्तौमींद्रंनाथितोजोहवीमिसनोमुंचत्वꣳहसः ॥ मन्वेवांमित्रावरुणातस्य
वित्तꣳसत्यौजसादꣳहणायंनुदेथे ॥ याराजानꣳसरथंयाथउग्रातानोमुंचतमागंसः ॥ योवाꣳरथऋजुरश्मिःसत्यधर्मामिथुश्चरंत
मुपयातिदूषयन् ॥ स्तौमिमित्रावरुणानाथितोजोहवीमितौनोमुंचतमागंसः ॥ वायोःसवितुर्विदथानिमन्महेयावात्मन्वाद्वीभृतो
यौचरक्षतः ॥ यौविश्वस्यपरिभूबभूवतुस्तौनोमुंचतमागंसः ॥ उपश्रेष्ठानआशिषोदेवयोर्धर्मैअस्थिरन् ॥ स्तौमिवायुꣳसवितारं
नाथितोजोहवीमितौनोमुंचतमागंसः ॥ रथीतमौरथीनामह्वऊतयेशुभंगमिष्ठौसुयमेभिरश्वैः ॥ ययोर्वांदेवौदेवेष्वनिशितमोज
स्तौनोमुंचतमागंसः ॥ यदयातंवहतुꣳसूर्यायास्त्रिचक्रेणसꣳसदमिच्छमानौ ॥ स्तौमिदेवावश्विनौनाथितोजोहवीमितौनोमुंचत
मागंसः ॥ मरुतांमन्वेअधिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे ॥ आशून्हुवेसुयमानूतयेतेनोमुंचंत्वेनसः ॥ तिग्ममायुधंवीड्वितꣳ
सहस्वद्विव्यꣳशर्धःपृतनासुजिष्णु ॥ स्तौमिदेवान्मरुतोनाथितोजोहवीमितेनोमुंचंत्वेनसः ॥ देवानांमन्वेअधिनोब्रुवंतुप्रेमां
वाचंविश्वामवंतुविश्वे ॥ आशून्हुवेसुयमानूतयेतेनोमुंचंत्वेनसः ॥ यदिदंमाभिशोचतिपौरुषेयेणदैव्येन ॥ स्तौमिविश्वान्देवान्नां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

थितोजोंहवीमितेनोंमुंचंत्वेनंसः ॥ अनुंनोद्यानुंमतिर्यज्ञंदेवेषुंमन्यतां ॥ अग्निश्चंहव्यवाहंनोभवतांदाशुषेमयंः ॥ अन्विदंनुमतेत्वंमन्यांसैशंचंनःकृधि ॥ क्रत्वेदक्षांयनोहिनुप्रणआयूंश्षितारिषः ॥ वैश्वानरोनऊत्याप्रयांतुपरावतंः ॥ अग्निरुक्थेनवाहंसा ॥ पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश ॥ वैश्वानरःसहंसापृष्टोअग्निःसनोदिवांसरिषःपांतुनक्तं ॥ येअग्रंथेतामिमेतेभिरोजोंभिर्येप्रतिष्ठेअभवतांवसूनां ॥ स्तौमिद्यावापृथिवीनाथितोजोंहवीमितेनोंमुंचतमंहसः ॥ उर्वीरोदसीवरिवःकृणोतंक्षेत्रस्यपत्नीअधिनोंब्रूयातं ॥ स्तौमिद्यावापृथिवीनाथितोजोंहवीमितेनोंमुंचतमंहसः ॥ यत्तेवयंपुरुषत्रायविष्ठाविद्वांसश्चकृमाकच्चनागंः ॥ कृधीस्वस्मांअदितेरनागांव्येनांसिशिश्रथोविष्वगग्ने ॥ यथांहतद्वसवोगौर्यंचित्पदिषितामुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यंहःप्रातर्यग्नेप्रतरांनआयुः ॥ समीचीनामांसिप्राचीदिक्तस्यांस्तेग्निरधिपतिरसितोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोंमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदधामि ॥ ओजस्विनीनामांसिदक्षिणादिक्तस्यांस्तइंद्रोधिपतिःपृदाकूरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोंमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदधामि ॥ प्राचीनामांसिप्रतीचीदिक्तस्यांस्तेसोमोधिपतिःस्वजोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोंमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदधामि ॥ अवस्थावानामास्युदीचीदिक्तस्यांस्तेवरुणोधिपतिस्तिरश्चराजीरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोंमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदधामि ॥ अधिपत्नीनामांसिबृहतीदिक्तस्यांस्तेबृहस्पतिरधिपतिःश्वित्रोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोंमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदधामि ॥ वशिनीनामांसीयंदिक्तस्यांस्तेयमोधिपतिःकल्माषग्रीवोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोंमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदधामि ॥ हेतयोनामस्थतेषांवःपुरोगृहाअग्निर्वइषवःसलिलो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वातनामंतेभ्योवोनमस्तेनोमृडयततेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ निलिंपानामस्थतेषांवोदक्षिणागृहाःपितरोवइषवः
सगरोवातनामंतेभ्योवोनमस्तेनोमृडयततेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ वज्रिणोनामस्थतेषांवःपश्चाद्गृहाःस्वप्नोवइष
वोगह्वरोवातनामंतेभ्योवोनमस्तेनोमृडयततेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ अवस्थावानोनामस्थतेषांवउत्तराद्गृहाआ
पोवइषवःसमुद्रोवातनामंतेभ्योवोनमस्तेनोमृडयततेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ अधिपतयोनामस्थतेषांवउप
रिगृहावर्षवइषवोवस्वान्वातनामंतेभ्योवोनमस्तेनोमृडयततेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ क्रव्यानामस्थपार्थिवास्तेषां
वइहगृहाअन्नंवइषवोनिमिषोवातनामंतेभ्योवोनमस्तेनोमृडयततेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ शुतायुधायशुतवीर्या
यशुतोतयेभिमातिषाहे ॥ शुतंयोनःशुरदोअजीतानिंद्रोनेषदतिदुरितानिविश्वा ॥ येचत्वारःपथयोदेवयानाअंतराद्यावापृथिवी
वियंति ॥ तेषांयोअज्यानिमजीतिमावहात्तस्मैनोदेवाःपरिदत्तेहसर्वे ॥ ग्रीष्मोहेमंतउतनोवसंतःशरद्वर्षाःसुवितन्नोअस्तु ॥ तेषां
मृतूनाꣳशतशारदानांनिवातएषामभयेस्याम ॥ इदुवत्सरायपरिवत्सरायसंवत्सरायकृणुताबृहन्नमः ॥ तेषांवयꣳसुमतौयज्ञियानां
नाज्योगजीतााअहतास्याम ॥ भद्रांनश्रेयःसमनैष्टदेवास्त्वयावसेनसमशीमहित्वा ॥ सनोमयोभूःपितोआविशस्वशंतोकायतनु
वेस्योनः ॥ भूतंभव्यंभविष्यद्वषट्स्वाहानमऋक्सामयजुर्वषट्स्वाहानमोगायत्रीत्रिष्टुप्जगतीवषट्स्वाहानमःपृथिव्यंतरिक्षंद्यौर्व
षट्स्वाहानमोग्निर्वायुःसूर्योवषट्स्वाहानमःप्राणोव्यानोपानोवषट्स्वाहानमोन्नंकृषिर्वृष्टिर्वषट्स्वाहानमःपितापुत्रःपौत्रोवषट्स्वा
हानमोभूर्भुवःसुवर्वषट्स्वाहानमः ॥ इंद्रोदधीचोअस्थभिः ॥ वृत्राण्यप्रतिष्कुतः ॥ जघाननवतीर्नव ॥ इच्छन्नश्वस्यशिरः ॥
पर्वतेष्वपश्रितं ॥ तद्विदच्छर्यणावति ॥ अत्राहगोरमन्वत ॥ नामत्वष्टुरपीच्यं ॥ इत्थाचंद्रमसोगृहे ॥ इंद्रमिद्गाथिनोबृहत् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इंद्रंमर्केभिरर्किणः ॥ इंद्रंवाणीरनूषत ॥ इंद्रइद्धर्योःसचा ॥ संमिश्लआवचोयुजा ॥ इंद्रोवज्रीहिरण्ययः ॥ इंद्रोदीर्घायचक्षसे ॥ आसूर्यꣳरोहयद्दिवि ॥ विगोभिरद्रिमैरयत् ॥ इंद्रवाजेषुनोअव ॥ सहस्रप्रधनेषुच ॥ उग्रउग्राभिरूतिभिः ॥ तमिंद्रंवाजयामसि ॥ महेवृत्रायहंतवे ॥ सवृषावृषभोभुवत् ॥ इंद्रःसदामनेकृतः ॥ ओजिष्ठःसबलेहितः ॥ द्युम्नीश्लोकीससौम्यः ॥ गिरावज्रोनसंभृतः ॥ सबलोअनपच्युतः ॥ ववक्षुरुग्रोअस्तृतः ॥ चक्षुषोहेतेमनसोहेते ॥ वाचोहेतेब्रह्मणोहेते ॥ योमाघायुरभिदासति ॥ तमग्नेमेन्यामेनिंकृणु ॥ योमाचक्षुषायोमनसा ॥ योवाचाब्रह्मणाघायुरभिदासति ॥ तयाग्नेत्वंमेन्या ॥ अमुममेनिंकृणु ॥ यत्किंचासौमनसायच्चवाचा ॥ यज्ञैर्जुहोतियजुषाहविर्भिः ॥ तन्मृत्युर्निर्ऋत्यासंविदानः ॥ पुरादिष्टादाहुतीरस्यहंतु ॥ यातुधानानिर्ऋतिरादुरक्षः ॥ तेअस्यघ्नंत्वनृतेनसत्यं ॥ इंद्रेषिताआज्यमस्यमथ्नंतु ॥ मातत्समृद्धियदसौकरोति ॥ हन्मितेहंकृतꣳहविः ॥ योमेघोरमचीकृतः ॥ अपांचौतउभौबाहू ॥ अपनह्याम्यास्यं ॥ अपनह्यामितेबाहू ॥ अपनह्याम्यास्यं ॥ अग्नेर्देवस्यब्रह्मणा ॥ सर्वंतेवधिषंकृतं ॥ पुरामुष्यवषट्कारात् ॥ यज्ञंदेवेषुनस्कृधि ॥ स्विष्टमस्माकंभूयात् ॥ मास्मान्प्रापन्नरातयः ॥ अंतिदूरेसतोअग्ने ॥ भ्रातृव्यस्याभिदासतः ॥ वषट्कारेणवज्रेण ॥ कृत्याꣳहन्मिकृतामहं ॥ योमानक्तंदिवासायं ॥ प्रातश्चाह्नोनिपीयति ॥ अद्यातमिंद्रवज्रेण ॥ भ्रातृव्यंपादयामसि ॥ प्राणोरक्षतिविश्वमेजत् ॥ इयोंभूत्वावहुधाबहूनिं ॥ सइत्सर्वव्यानशे ॥ योदेवोदेवेषुविभूरंतः ॥ आवृदूदात्क्षेत्रियध्वगद्वषा ॥ तमित्प्राणंमनसोपशिक्षत ॥ अग्नेदेवानामिदमत्तुनोहविः ॥ मनसश्चित्तेदं ॥ भूतंभव्यंचगुप्यते ॥ तद्धिदेवेष्वग्रियं ॥ आनएतुपुरश्चरं ॥ सहदेवैरिमꣳहवं ॥ मनःश्रेयसिश्रेयसि ॥ कर्मन्यज्ञपतिंदधत् ॥ जुषतांमेवागिदꣳहविः ॥ विराट्देवीपुरोहिता ॥ हव्यवाडनपायिनी ॥ यथारूपाणिबहुधावदंति ॥ पेशांसिदेवाः

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

परमेजनित्रे ॥ सानोविराडनपस्फुरंती ॥ वाग्देवीजुषतामिदꣳहविः ॥ चक्षुर्देवानांज्योतिरमृतेन्यक्तं ॥ अस्यविज्ञानायबहु
धानिधीयते ॥ तस्यसुम्नमशीमहि ॥ मानोहासीद्विचक्षणं ॥ आयुरिन्नःप्रतीर्यतां ॥ अनंधाश्चक्षुषावयं ॥ जीवाज्योतिरशीमहि ॥
सुवर्ज्योतिरुतामृतं ॥ श्रोत्रेणभद्रमुतशृण्वंतिसत्यं ॥ श्रोत्रेणवाचंबहुधोद्यमानां ॥ श्रोत्रेणमोदꣳश्रमहꣳश्रश्रूयते ॥ श्रोत्रेणसर्वा
दिशआशृणोमि ॥ येनप्राच्याउतदक्षिणा ॥ प्रतीच्यैदिशःशृण्वंत्युत्तरात् ॥ तदिच्छ्रोत्रंबहुधोद्यमानं ॥ अरांननेमिःपरिसर्वं
बभूव ॥ सिꣳहेव्याघ्रउतयापृदाकौ ॥ त्विषिरग्नौब्राह्मणेसूर्येया ॥ इंद्रंयादेवीसुभगाजजान ॥ सानआगन्वर्चसासंविदाना ॥
यारांजन्यैदुंदुभावायतायां ॥ अश्वस्यक्रंद्यपुरुषस्यमायौ ॥ इंद्रंयादेवीसुभगाजजान ॥ सानआगन्वर्चसासंविदाना ॥ याहस्ति
निद्वीपिनियाहिरण्ये ॥ त्विषिरश्वेषुपुरुषेषुगोषु ॥ इंद्रंयादेवीसुभगाजजान ॥ सानआगन्वर्चसासंविदाना ॥ रथेअक्षेषुवृषभ
स्यवाजे ॥ वातेपर्जन्येवरुणस्यशुष्मे ॥ इंद्रंयादेवीसुभगाजजान ॥ सानआगन्वर्चसासंविदाना ॥ राडसिविराडसि ॥ सम्राड
सिस्वराडसि ॥ इंद्रायत्वातेजस्वतेतेजस्वंतꣳश्रीणामि ॥ इंद्रायत्वौजस्वतओजस्वंतꣳश्रीणामि ॥ इंद्रायत्वापयस्वतेपयस्वंतꣳ
श्रीणामि ॥ इंद्रायत्वायुष्मतआयुष्मंतꣳश्रीणामि ॥ तेजोसि ॥ तत्तेप्रयच्छामि ॥ तेजस्वदस्तुमेमुखं ॥ तेजस्वच्छिरोअस्तुमे ॥
तेजस्वान्विश्वतःप्रत्यङ् ॥ तेजसासांपिंपृग्धिमा ॥ ओजोसि ॥ तत्तेप्रयच्छामि ॥ ओजस्वदस्तुमेमुखं ॥ ओजस्वच्छिरोअस्तुमे ॥
ओजस्वान्विश्वतःप्रत्यङ् ॥ ओजसासांपिंपृग्धिमा ॥ पयोसि ॥ तत्तेप्रयच्छामि ॥ पयस्वदस्तुमेमुखं ॥ पयस्वच्छिरोअस्तुमे ॥
पयस्वान्विश्वतःप्रत्यङ् ॥ पयसासांपिंपृग्धिमा ॥ आयुरसि ॥ तत्तेप्रयच्छामि ॥ आयुष्मदस्तुमेमुखं ॥ आयुष्मच्छिरोअस्तुमे ॥
आयुष्मान्विश्वतःप्रत्यङ् ॥ आयुषासांपिंपृग्धिमा ॥ इममग्नआयुषेवर्चसेकृधि ॥ प्रियꣳरेतोवरुणसोमराजन् ॥ मातेवास्माअ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दितेशर्मयच्छ ॥ विश्वेदेवाजरदष्टिर्यथासत् ॥ आयुरसिविश्वायुरसि ॥ सर्वायुरसिसर्वमायुरसि ॥ यतोवातोमनोजवाः ॥ यतःक्षरंतिसिंधवः ॥ तासांत्वासर्वासाꣳरुचा ॥ अभिषिंचामिवर्चसा ॥ समुद्रइवासिगह्मना ॥ सोमइवास्यदाभ्यः ॥ अग्निरिव विश्वतःप्रत्यङ् ॥ सूर्यइवज्योतिषाविभूः ॥ अपांयोद्रवणेरसः ॥ तमहमस्माआमुष्यायणायं ॥ तेजसेब्रह्मवर्चसायगृह्णामि ॥ अपांयऊर्मीरसः ॥ तमहमस्माआमुष्यायणायं ॥ ओजसेवीर्यायगृह्णामि ॥ अपांयोमध्यतोरसः ॥ तमहमस्माआमुष्यायणायं ॥ पुष्ट्यैप्रजननायगृह्णामि ॥ अपांयोयज्ञियोरसः ॥ तमहमस्माआमुष्यायणायं ॥ आयुषेदीर्घायुत्वायगृह्णामि ॥ अहमस्मिप्रथमजाऋतस्य ॥ पूर्वंदेवेभ्योंअमृतस्यनाभिः ॥ योमाददातिसइदेवमावाः ॥ अहमन्नमन्नमदंतमद्मि ॥ पूर्वमन्नेरपिदहत्यन्नं ॥ यत्तौहासातेअहमुत्तरेषु ॥ व्यात्तमस्यपशवःसुजंभं ॥ पश्यंतिधीराःप्रचरंतिपाकाः ॥ जहाम्यन्यंनजहाम्यन्यं ॥ अहमन्नंवशमिच्चरामि ॥ समानमर्थंपर्येमिभुंजत् ॥ कोमामन्नंमनुष्योदयेत ॥ परांकेअन्नंनिहितंलोकएतत् ॥ विश्वैर्देवैःपितृभिर्गुप्तमन्नं ॥ यद्द्यतेलुप्यतेयत्परोप्यते ॥ शततमीसातनूर्मेबभूव ॥ महांतौचरूसकृदुग्धेनपप्रौ ॥ दिवंचपृथ्विंपृथिवींचसाकं ॥ तत्संपिबंतोनमिनंतिवेधसः ॥ नैतद्भूयोभवतिनोकनीयः ॥ अन्नंप्राणमन्नमपानमाहुः ॥ अन्नंमृत्युंतमुजीवातुमाहुः ॥ अन्नंब्रह्माणोजरसंवदंति ॥ अन्नमाहुःप्रजननंप्रजानां ॥ मोघमन्नंविंदतेअप्रचेताः ॥ सत्यंब्रवीमिवधइत्सतस्य ॥ नार्यमणंपुष्यतिनोसखायं ॥ केवलाघोभवतिकेवलादी ॥ अहंमेघस्तनयन्वर्षन्नस्मि ॥ मामदंत्यहमदंयन्यान् ॥ अहꣳसदमृतोभवामि ॥ मदादित्याअधिसवंतपंति ॥ देवींवाचमजनयंतदेवाः ॥ तांविश्वरूपाःपशवोवदंति ॥ सानोमंद्रेषमूर्जंदुहाना ॥ धेनुर्वागस्मानुपसुष्टुतैतु ॥ यद्वाग्वदंत्यविचेतनानि ॥ राष्ट्रीदेवानांनिषसादमंद्रा ॥ चतस्रऊर्जंदुदुहेपयांꣳसि ॥ क्वस्विदस्याःपरमंजगाम ॥ अनंतामंतादधिनिर्मि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तांमहीं ॥ यस्यांदेवाअदधुर्भोजनानि ॥ एकाक्षरांद्विपदाꣳषट्पदांच॥ वाचंदेवाउपजीवंतिविश्वे ॥ वाचंगंधर्वाःपशवोमनुष्याः ॥ वाचीमाविश्वाभुवनान्यर्पिता ॥ सानोहवंजुषतामिंद्रपत्नी ॥ वागक्षरंप्रथमजाऋतस्य ॥ वेदानां मातामृतस्यनाभिः ॥ सानोंजुषाणोपयज्ञमागात् ॥ अवंतीदेवीसुहवामेअस्तु ॥ यामृषयोमंत्रकृतोमनीषिणः ॥ अन्वैच्छंन्दवा स्तपसाश्रमेण ॥ तांदेवींवाचꣳहविषायजामहे ॥ सानोंदधातुसुकृतस्यलोके ॥ चत्वारिवाक्परिमितापदानि ॥ तानिविदुर्ब्राह्म णायेमनीषिणः ॥ गुहात्रीणिनिहितानेंगयंति ॥ तुरीयंवाचोमनुष्यावदंति ॥ श्रद्धयाग्निःसमिध्यते ॥ श्रद्धयाविंदतेहविः ॥ श्रद्धांभगस्यमूर्धनि ॥ वचसावेदयामसि ॥ प्रियꣳश्रद्धेददतः ॥ प्रियꣳश्रद्धेदिदासतः ॥ प्रियंभोजेषुयज्वसु ॥ इदंमउदितं कृधि ॥ यथादेवाअसुरेषु ॥ श्रद्धामुग्रेषुचक्रिरे ॥ एवंभोजेषुयज्वसु ॥ अस्माकमुदितंकृधि ॥ श्रद्धांदेवायजमानाः ॥ वायुगोपाउपासते ॥ श्रद्धाꣳहृदय्ययाकूत्या ॥ श्रद्धयाहूयतेहविः ॥ श्रद्धांप्रातर्हवामहे ॥ श्रद्धांमध्यंदिनंपरि ॥ श्रद्धाꣳसूर्यस्यनि म्रुचि ॥ श्रद्धेश्रद्धापयेहमा ॥ श्रद्धादेवानधिवस्ते ॥ श्रद्धाविश्वमिदंजगत् ॥ श्रद्धांकामस्यमातरं ॥ हविषावधर्यामसि ॥ ब्रह्म जज्ञानंप्रथमंपुरस्तात् ॥ विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाः ॥ सतश्चयोनिमसतश्चविवः ॥ पितावि राजामृषभोरयीणां ॥ अंतरिक्षंविश्वरूपआविवेश ॥ तमर्कैरभ्यर्चंतिवत्सं ॥ ब्रह्मसंतंब्रह्मणावर्धयंतः ॥ ब्रह्मदेवानजनयत् ॥ ब्रह्मविश्वमिदंजगत् ॥ ब्रह्मणःक्षत्रंनिर्मितं ॥ ब्रह्मब्राह्मणआत्मना ॥ अंतरस्मिन्निमेलोकाः ॥ अंतर्विश्वमिदंजगत् ॥ ब्रह्मैव भूतानांज्येष्ठं ॥ तेनकोर्हतिस्पर्धितुं ॥ ब्रह्मन्देवास्त्रयस्त्रिꣳशत् ॥ ब्रह्मन्निंद्रप्रजापती ॥ ब्रह्मन्हविश्वाभूतानि ॥ नावीवांतःस माहिता ॥ चतस्रआशाःप्रचरंत्वग्नयः ॥ इमंनोयज्ञंनयतुप्रजानन् ॥ घृतंपिन्वन्नजरꣳसुवीरं ॥ ब्रह्मसमिद्धवत्याहुतीनां ॥ आ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गावोऽअग्मन्नुतभद्रमक्रन् ॥ सीदंतुगोष्ठेरणयंत्वस्मे ॥ प्रजावतीःपुरुरूपाऽइहस्युः ॥ इंद्रायपूर्वीरुषसोदुहानाः ॥ इंद्रोयज्वनेपृण तेचशिक्षति ॥ उपेद्ददातिनस्वंमुषायति ॥ भूयोभूयोरयिमिदस्यवर्धयन् ॥ अभिन्नेखिलेनिदधातिदेवयुं ॥ नतानंशंतिनदंभा तितस्करः ॥ नैनाअमित्रोव्यथिरादधर्षति ॥ देवाश्चयाभिर्यजतेददातिच ॥ ज्योगित्ताभिःसचतेगोपतिःसह ॥ नताअर्वारेणु ककाटोअश्नुते ॥ नसंस्कृतत्रमुपयंतिताअभि ॥ उरुगायमभयंतस्यताअनु ॥ गावोमर्त्यस्यविचरंतियज्वनः ॥ गावोभगोगाव इंद्रोमेअच्छात् ॥ गावःसोमस्यप्रथमस्यभक्षः ॥ इमायागावःसजनासइंद्रः ॥ इच्छामीद्धृदामनसाचिदिंद्रं ॥ यूयंगावोमेदयथा कृशंचित् ॥ अश्लीलंचित्कृणुथासुप्रतीकं ॥ भद्रंगृहंकृणुथभद्रवाचः ॥ बृहद्वोवयउच्यतेसभासु ॥ प्रजावतीःसूयवसंरिशंतीः ॥ शुद्धाअपःसुप्रपाणेपिबंतीः ॥ मावस्तेनईशतमाघशंसः ॥ परिवोहेतीरुद्रस्यवृज्यात् ॥ उपेदमुपपर्चनं ॥ आसुगोषूपपृच्यतां ॥ उपर्षभस्यरेतसि ॥ उपेंद्रतवीर्ये ॥ तासूर्याचंद्रमसाविश्वभृत्तमामहत् ॥ तेजोवसुमद्राजतोदिवि ॥ सामात्मानाचरतःसाम चारिणा ॥ ययोर्व्रतंनममेजातुदेवयोः ॥ उभावंतौपरियातअर्म्या ॥ दिवोनरश्मीरंस्तनुतोव्यर्णवे ॥ उभाभुवंतीभुवनाकविक्रतू ॥ सूर्यानचंद्राचरतोहतामती ॥ पतीद्युमद्विश्वविदाउभादिवः ॥ सूर्याउभाचंद्रमसाविचक्षणा ॥ विश्ववारावरिवोभावरेण्या ॥ तानोवतंमतिमंतामहिव्रता ॥ विश्ववपरीप्रतरणातरंता ॥ सुवर्विदाद्दशयेभूरिरश्मी ॥ सूर्याहिचंद्रावसुत्वेषदर्शता ॥ मनस्विनो भानुचरतोनुसंदिवं ॥ अस्यश्रवोनद्यःसप्तबिभ्रति ॥ द्यावाक्षामापृथिवीदर्शतंवपुः ॥ अस्मेसूर्याचंद्रमसाभिचक्षे ॥ श्रद्धेकामं द्रचरतोविचर्तुरं ॥ पूर्वापरंचरतोमाययैतौ ॥ शिशूक्रीडंतौपरियातोअध्वरं ॥ विश्वान्यन्योभुवनाभिचष्टे ॥ ऋतूनन्योविदधज्जायतेपुनः ॥ हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्नियागर्भंदधिरेविरूपास्तान्आपःशंस्योनाभवंतु ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यासाꣳराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतःशुचयोयाःपावकास्तानआपःशꣳस्योनाभवंतु ॥ यासांदेवा दिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोंदंतिशुक्रास्तानआपःशꣳस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यता पःशिवयातनुवोपस्पृशत्वचंमे ॥ सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ आपोभद्राघृतमिदापआसुरग्नीषो मौबिभ्रत्यापइत्ताः ॥ तीव्रोरसोमधुपृचामरंगमआमाप्राणेनसहवर्चसागन् ॥ आदित्यश्याम्युतवाशृणोम्यामाघोषोगच्छतिवाङ्म आसाम् ॥ मन्येभेजानोअमृतस्यतर्हिहिरण्यवर्णाअतृप्यदावः ॥ नासदासीन्नोसदासीत्तदानीं ॥ नासीद्रजोनोव्योमापरोयत् ॥ किमावरीवःकुहकस्यशर्मन् ॥ अंभःकिमासीद्गहनंगभीरं ॥ नमृत्युरमृतंतर्हिन ॥ रात्र्याअह्नआसीत्प्रकेतः ॥ आनीदवातꣳस्व धयातदेकं ॥ तस्माद्धान्यंनपरःकिंचनास ॥ तमआसीत्तमसागूढमग्रेप्रकेतं ॥ सलिलꣳसर्वमाइदं ॥ तुच्छेनाभ्वपिहितंयदा सीत् ॥ तमसस्तन्महिनाजायतैकं ॥ कामस्तदग्रेसमवर्तताधि ॥ मनसोरेतःप्रथमंयदासीत् ॥ सतोबंधुमसतिनिरविंदन् ॥ हृदि प्रतीष्याकवयोमनीषा ॥ तिरश्चीनोविततोरश्मिरेषां ॥ अधस्विदासी३दुपरिस्विदासी३त् ॥ रेतोधाआसन्महिमानआसन् ॥ स्वधाअवस्तात्प्रयतिःपरस्तात् ॥ कोअद्धावेदकइहप्रवोचत् ॥ कुतआजाताकुतइयंविसृष्टिः ॥ अर्वाग्देवाअस्यविसर्जनाय ॥ अथाकोवेदयतआबभूव ॥ इयंविसृष्टिर्यतआबभूव ॥ यदिवादधेयदिवान ॥ योअस्याध्यक्षःपरमेव्योमन् ॥ सोअंगवेदयदिवा नवेद ॥ किꣳस्विद्वनंकउसवृक्षआसीत् ॥ यतोद्यावापृथिवीनिष्टतक्षुः ॥ मनीषिणोमनसापृच्छतेदुतत् ॥ यदध्यतिष्ठद्भुवनानि धारयन् ॥ ब्रह्मवनंब्रह्मसवृक्षआसीत् ॥ यतोद्यावापृथिवीनिष्टतक्षुः ॥ मनीषिणोमनसाविब्रवीमिवः ॥ ब्रह्माध्यतिष्ठद्भुवनानि धारयन् ॥ प्रातरग्निंप्रातरिंद्रꣳहवामहे ॥ प्रातर्मित्रावरुणाप्रातरश्विना ॥ प्रातर्भगंपूषणंब्रह्मणस्पतिं ॥ प्रातःसोममुतरुद्रꣳहुवे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वेम ॥ प्रातर्जितंभगमुग्रꣳहुवेम ॥ वयंपुत्रमदितेर्योविधर्ता ॥ आध्रश्चिद्यंमन्यमानस्तुरश्चित् ॥ राजाचिद्यंभगंभक्षीत्याह ॥ भग प्रणेतर्भगसत्यराधः ॥ भगेमांधियमुदवददन्नः ॥ भगप्रणोजनयगोभिरश्वैः ॥ भगप्रनृभिर्नृवंतःस्याम ॥ उतेदानींभगवंतः स्याम ॥ उतप्रपित्वउतमध्येअह्नां ॥ उतोदितामघवन्त्सूर्यस्य ॥ वयंदेवानांꣳसुमतौस्याम ॥ भगएवभगवाꣳअस्तुदेवाः ॥ तेन वयंभगवंतःस्याम ॥ तंत्वाभगसर्वइज्जोहवीमि ॥ सनोभगपुरएताभवेह ॥ समध्वरायोषसोनमंत ॥ दधिक्रावेवशुचयेपदाय ॥ अर्वाचीनंवसुविदंभगंनः ॥ रथमिवाश्वावाजिनआवहंतु ॥ अश्वावतीर्गोमतीर्नउषासः ॥ वीरवतीःसदमुच्छंतुभद्राः ॥ घृतंदु हानाविश्वतःप्रपीनाः ॥ यूयंपातस्वस्तिभिःसदानः ॥ ॥ अग्निर्नःपातुकृत्तिकाः ॥ नक्षत्रंदेवमिंद्रियं ॥ इदमासांविचक्षणं ॥ हविरासंजुहोतन ॥ यस्यभांतिरश्मयोयस्यकेतवः ॥ यस्येमाविश्वाभुवनानिसर्वा ॥ सकृत्तिकाभिरभिसंवसानः ॥ अग्निर्नोदेवःसुवितेदधातु ॥ प्रजापतेरोहिणीवेतुपत्नी ॥ विश्वरूपाबृहतीचित्रभानुः ॥१॥ सानोयज्ञस्यसुवितेदधातु ॥ यथाजीवेमशरदःसवीराः ॥ रोहिणीदेव्युदगात्पुरस्तात् ॥ विश्वारूपाणिप्रतिमोदमाना ॥ प्रजापतिꣳहविषावर्धयंती ॥ प्रियादेवानामुपयातुयज्ञं ॥ सोमो राजामृगशीर्षेणआगन् ॥ शिवंनक्षत्रंप्रियमस्यधाम ॥ आप्यायमानोबहुधाजनेषु ॥ रेतःप्रजांयजमानेदधातु ॥ २ ॥ यत्तेनक्ष त्रंमृगशीर्षमस्ति ॥ प्रियꣳराजन्प्रियतमंप्रियाणां ॥ तस्मैतेसोमहविषाविधेम ॥ शंनएधिद्विपदेशंचतुष्पदे ॥ आर्द्रयारुद्रःप्रथ मानएति ॥ श्रेष्ठोदेवानांपतिरघ्न्यानां ॥ नक्षत्रमस्यहविषाविधेम ॥ मानःप्रजाꣳरीरिषन्मोतवीरान् ॥ हेतीरुद्रस्यपरिणोवृणक्तु ॥ आर्द्रानक्षत्रंजुषताꣳहविर्नः ॥ ३ ॥ प्रमुंचमानौदुरितानिविश्वा ॥ अपाघशꣳसंनुदतामरातिं ॥ पुनर्नोदेव्यदितिस्पृणोतु ॥ पुनर्वसू नःपुनरेतायज्ञं ॥ पुनर्नोदेवाअभियंतुसर्वे ॥ पुनःपुनर्वोहविषायजामः ॥ एवानदेव्यदितिरनर्वा ॥ विश्वस्यभवींजगतःप्रतिष्ठा ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पुनर्वसूहविषावर्धयंती ॥ प्रियंदेवानामप्येतुपाथः ॥४॥ बृहस्पतिःप्रथमंजायमानः ॥ तिष्यंनक्षत्रमभिसंबभूव ॥ श्रेष्ठोदेवानां
पृतंतासुजिष्णुः ॥ दिशोनुसर्वाअभयंनोअस्तु ॥ तिष्यःपुरस्तादुतमध्यतोनः ॥ बृहस्पतिर्नःपरिपातुपश्चात् ॥ बाधेतांद्वेषोअभ
यंकृणुतां ॥ सुवीर्यस्यपतयःस्याम ॥ इदꣳसर्पेभ्योहविरस्तुजुष्टं ॥ आश्रेषायेषामनुयंतिचेतः ॥५॥ येअंतरिक्षंपृथिवींक्षियंति ॥
तेनःसर्पासोहवमागमिष्ठाः । येरोचनेसूर्यस्यापिसर्पाः ॥ येदिवंदेवीमनुसंचरंति ॥ येषामाश्रेषाअनुयंतिकामं ॥ तेभ्यःसर्पेभ्यो
मधुमज्जुहोमि ॥ उपहूताःपितरोयेमघासु ॥ मनोजवसःसुकृतःसुकृत्याः ॥ तेनोनक्षत्रेहवमागमिष्ठाः ॥ स्वधाभिर्यज्ञंप्रयतंजुषं
तां ॥६॥ येअग्निदग्धायेनाग्निदग्धाः ॥ येमुंलोकंपितरःक्षियंति ॥ याꣳश्चविद्मयाꣳउचनप्रविद्म ॥ मघासुयज्ञꣳसुकृतंजुषंतां ॥
गवांपतिःफल्गुनीनामसित्वं ॥ तदर्यमन्वरुणमित्रचारु ॥ तंत्वावयꣳसनितारꣳसनीनां ॥ जीवाजीवंतमुपसंविशेम ॥ येनेमा
विश्वाभुवनानिसंजिता ॥ यस्यदेवाअनुसंयंतिचेतः ॥ ७ ॥ अर्यमाराजाजरस्तुविष्मान् ॥ फल्गुनीनामृषभोरोरवीति ॥ श्रेष्ठो
देवानांभगवोभगासि ॥ तत्त्वाविदुःफल्गुनीस्तस्यवित्तात् ॥ अस्मभ्यंक्षत्रमजरꣳसुवीर्यं ॥ गोमदश्ववदुपसंनुदेह ॥ भगोहदा
ताभगइत्प्रदाता ॥ भगोदेवीःफल्गुनीराविवेश ॥ भगस्येत्तंप्रसवंगमेम ॥ यत्रदेवैःसधमादंमदेम ॥ ८ ॥आयातुदेवःसवितोप
यातु ॥ हिरण्ययेनसुवृतारथेन ॥ वहन्हस्तꣳसुभगविद्मनापसं ॥ प्रयच्छंतंपपुरिंपुण्यमच्छ ॥ हस्तःप्रयच्छत्वमृतंवसीयः ॥
दक्षिणेनप्रतिगृभ्णीमएनत् ॥ दातारमद्यसवितारविंदेय ॥ योनोहस्तायप्रसुवातियज्ञं ॥ त्वष्टानक्षत्रमभ्येतिचित्रां ॥ सुभꣳसंसं
युवतिꣳरोचमानां ॥ ९ ॥ निवेशयन्नमृतान्मर्त्यांश्च ॥ रूपाणिपिꣳशन्भुवनानिविश्वा ॥ तन्नस्त्वष्टातदुचित्राविचष्टां ॥ तन्न
क्षत्रंभूरिदाअस्तुमह्यं ॥ तन्नःप्रजांवीरवतीꣳसनोतु ॥ गोभिर्नोअश्वैःसमनक्तुयज्ञं ॥ वायुर्नक्षत्रमभ्येतिनिष्ट्यां ॥ तिग्मशृंगोवृ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मीरोरुवाणः ॥ समीरयन्भुवनामातरिश्वा ॥ अपद्वेषाꣳसिनुदतामरातीः ॥ १० ॥ तन्नोवायुस्तदुनिष्ट्याशृणोतु ॥ तन्नक्षत्रंभूरिदाअस्तुमह्यं ॥ तन्नोदेवासोअनुजानंतुकामं ॥ यथातरेमदुरितानिविश्वा ॥ दूरमस्मच्छत्रवोयंतुभीताः ॥ तद्विद्राग्नीकृणुतां तद्विशाखे ॥ तन्नोदेवाअनुमदंतुयज्ञं ॥ पश्चात्पुरस्तादभयंनोअस्तु ॥ नक्षत्राणामधिपत्नीविशाखे ॥ श्रेष्ठाविद्राग्नीभुवनस्य गोपौ ॥ ११ ॥ विष्णुःशत्रूनपबाधमानौ ॥ अपक्षुधंनुदतामरातिं ॥ पूर्णापश्चादुतपूर्णापुरस्तात् ॥ उन्मध्यतःपौर्णमासीजिगाय ॥ तस्यांदेवाअधिसंवसंतः ॥ उत्तमेनाकंइहमादयंतां ॥ पृथ्वीसुवर्चायुवतिःसजोषाः ॥ पौर्णमास्युदगाच्छोभमाना ॥ आप्यायय॑तीदुरितानिविश्वा ॥ उरुंदुहांयजमानायय॒ज्ञं ॥ १२ ॥ ऋध्यास्महव्यैर्नमसोपसद्य ॥ मित्रंदेवंमित्रधेयंनोअस्तु ॥ अनूराधान्हविषावर्धयंतः ॥ शतंजीवेमशरदःसवीराः ॥ चित्रंनक्षत्रमुदगात्पुरस्तात् ॥ अनूराधासइतियद्वदंति ॥ तन्मित्रए तिपथिभिर्देवयानैः ॥ हिरण्ययैर्वितततैरंतरिक्षे ॥ इंद्रोज्येष्ठामनुनक्षत्रमेति ॥ यस्मिन्वृत्रंवृत्रतूर्येततार ॥ तस्मिन्वयममृतंदुहानाः ॥ क्षुधंतरेमदुरितंदुरिष्टिं ॥ पुरंदरायवृषभायधृष्णवे ॥ अषाढायसहमानायमीढुषे ॥ इंद्रायज्येष्ठामधुमदुहाना ॥ उरुंकृणोतु यजमानायलोकं ॥ मूलंप्रजावीरवतीविदेय ॥ पराच्येतुनिर्ऋतिःपराचा ॥ गोभिर्नक्षत्रंपशुभिःसमक्तं॥अहंभूयाद्यजमानायमह्यं ॥ १३ ॥ अहर्नोअद्यसुविदेदधातु ॥ मूलंनक्षत्रमितियद्वदंति ॥ परांचींवाचानिर्ऋतिंनुदामि ॥ शिवंप्रजायैशिवमस्तुमह्यं ॥ या दिव्याआपःपयसासंबभूवुः ॥ याअंतरिक्षउतपार्थिवीर्याः ॥ यासांमषाढाअनुयंतिकामं ॥ तानआपःशꣳस्योनाभवंतु ॥ याश्च कूप्यायाश्चनाद्याःसमुद्रियाः ॥ याश्चवैशंतीरुतप्रास्वचीर्याः ॥ यासांमषाढामधुभक्षयंति ॥ तानआपःशꣳस्योनाभवंतु ॥ तन्नो विश्वेउपशृण्वंतुदेवाः ॥ तदषाढाअभिसंयंतुयज्ञं ॥ तन्नक्षत्रंप्रथतांपशुभ्यः ॥ कृषिर्वृष्टिर्यजमानायकल्पतां ॥ शश्वाःकन्यायु ॥ ७२ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वतयःसुपेशसः ॥ कमकृतःसुकृतावायावतीः ॥ विश्वान्देवान्हविषावधयंतीः ॥ अषाढाःकाममुपयांतुयज्ञं ॥ यस्मिन्ब्रह्माभ्य
जयत्सर्वमेतत् ॥ अमुंचलोकमिदमूचसर्वं ॥ तन्नोनक्षत्रमभिजिद्विजित्य ॥ श्रियंदधात्वहृणीयमानं ॥ उभौलोकौब्रह्मणासंजि
तेमौ ॥ तन्नोनक्षत्रमभिजिद्विचष्टां ॥ तस्मिन्वयंपृतनाःसंजयेम ॥ तन्नोदेवासोअनुजानंतुकामं ॥ शृण्वंतिश्रोणामृतस्यगोपां ॥
पुण्यामस्याउपशृणोमिवाचं ॥ महींदेवींविष्णुपत्नीमजूर्यां ॥ प्रतीचींमेनाऽहविषायजामः ॥ त्रेधाविष्णुरुरुगायोविचक्रमे ॥
महींदिवंपृथिवीमंतरिक्षं ॥ तच्छ्रोणैतिश्रवइच्छमाना ॥ पुण्यश्लोकंयजमानायकृण्वती ॥ अष्टौदेवावसवःसोम्यासः ॥ चतस्रो
देवीरजराःश्रविष्ठाः ॥ तेयज्ञंपांतुरजसःपरस्तात् ॥ संवत्सरीणममृतऽस्वस्ति ॥ यज्ञंनःपांतुवसवःपुरस्तात् ॥ दक्षिणतोभियंतु
श्रविष्ठाः ॥ पुण्यंनक्षत्रमभिसंविशाम ॥ मानोअरातिरघशंसागन् ॥ क्षत्रस्यराजावरुणोधिराजः ॥ नक्षत्राणामशतभिषग्व
सिष्ठः ॥ तौदेवेभ्यःकृणुतोदीर्घमायुः ॥ शतंसहस्राभेषजानिधत्तः ॥ यज्ञंनोराजावरुणउपयातु ॥ तन्नोविश्वेअभिसंयंतुदेवाः ॥
तन्नोनक्षत्रंशतभिषग्जुषाणं ॥ दीर्घमायुःप्रतिरद्भेषजानिं ॥ अजएकपादुदगात्पुरस्तात् ॥ विश्वाभूतानिप्रतिमोदमानः ॥
तस्यदेवाःप्रसवंयंतिसर्वे ॥ प्रोष्ठपदासोअमृतस्यगोपाः ॥ विभ्राजमानःसमिधानउग्रः ॥ आंतरिक्षमरुहदगंद्यां ॥ तंसूर्यंदेव
मजमेकपादं ॥ प्रोष्ठपदासोअनुयंतिसर्वे ॥ अहिर्बुध्नियःप्रथमानएति ॥ श्रेष्ठोदेवानामुतमानुषाणां ॥ तंब्राह्मणाःसोमपाःसो
म्यासः ॥ प्रोष्ठपदासोअभिरक्षंतिसर्वे ॥ चत्वारएकमभिकर्मदेवाः ॥ प्रोष्ठपदासइतियान्वदंति ॥ तेबुध्नियंपरिषद्यंस्तुवंतः ॥
अहिंरक्षंतिनमसोपसद्य ॥ पूषारेवत्यन्वेतिपंथां ॥ पुष्टिपतीपशुपावाजबस्त्यौ ॥ इमानिहव्याप्रयतांजुषाणा ॥ सुगैनोयानैरुप
यातांयज्ञं ॥ क्षुद्रान्पशून्रक्षतुरेवतीनः ॥ गावोनोअश्वाअन्वेतुपूषा ॥ अन्नंरक्षंतौबहुधाविरूपं ॥ वाजंसनुतांयजमानाय

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

युज्ञं ॥ तद्श्विनावश्वयुजोपयातां ॥ शुभंगमिष्ठौसुयमेभिरश्वैः ॥ स्वंनक्षत्रꣳहविषायजंतौ ॥ मध्वासंपृक्तौयजुषासमक्तौ ॥ यौदेवानांभिषजौहव्यवाहौ ॥ विश्वस्यदूतावमृतस्यगोपौ ॥ तौनक्षत्रंजुजुषाणोपयातां ॥ नमोश्विभ्यांकृणुमोश्वयुग्भ्यां ॥ अप पाप्मानंभरणीर्भरंतु ॥ तद्यमोराजाभगवान्विचष्टां ॥ लोकस्यराजामहतोमहान्हि ॥ सुगंनःपंथामभयंकृणोतु ॥ यस्मिन्नक्षत्रेय मएतिराजा ॥ यस्मिन्नेनमभ्यषिंचंतदेवाः ॥ तदस्यचित्रꣳहविषायजाम ॥ अपपाप्मानंभरणीर्भरंतु ॥ निवेशनीसंगमनीवसूनांविश्वारूपाणिवसून्यावेशयंती ॥ सहस्रपोषꣳसुभगाराणासानआगन्वर्चसासंविदाना ॥ यत्तेदेवाअदधुर्भागधेयममावास्ये संवसंतोमहित्वा ॥ सानोयज्ञंपिपृहिविश्ववारेरयिंनोधेहिसुभगेसुवीरं ॥ नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रे ॥ भागं देवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः ॥ यमादित्याअꣳशुमाप्यायय॑तियमक्षितमक्षितयःपिबंति ॥ तेननोराजावरुणो बृहस्पतिराप्यायय॑तुभुवनस्यगोपाः ॥ येविरूपेसमनसासंव्यय॑ती ॥ समानंततंतुंपरितातनाते ॥ विभूप्रभूअनुभूविश्वतोहुवे ॥ तेनोनक्षत्रेहवमागमेतं ॥ वयंदेवीब्रह्मणासंविदानाः ॥ सुरत्नासोदेववीतिंदधानाः ॥ अहोरात्रेहविषावर्धयंतः ॥ अतिपाप्मा नमतिमुक्त्यागमेम ॥ प्रत्युवदृश्यायती ॥ व्युच्छंतीदुहितादिवः ॥ अपोमहीवृणुतेचक्षुषा ॥ तमोज्योतिष्कृणोतिसूनरी ॥ उदु स्रियाःसचतेसूर्यः ॥ सचाउद्यन्नक्षत्रमार्चिमत् ॥ तवेदुषोव्युषिसूर्यस्यच ॥ संभक्तेनगमेमहि ॥ तन्नोनक्षत्रमार्चिमत् ॥ भानुमत्ते जउच्चरत् ॥ उपयज्ञमिहागमत् ॥ प्रनक्षत्रायदेवाय ॥ इंद्रायेदुꣳहवामहे ॥ सनःसवितासुवत्सनिं ॥ पुष्टिदांवीरवत्तमं ॥ उदु त्यंजातवेदसंदेववंहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवी अंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्च ॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः ॥ अदितिःपात्वꣳहसः ॥ महीमूषुमातरꣳसुव्रता

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नामृतस्यपत्नीमवसेहुवेम ॥ तुविक्षत्रामजरंतीमुरूचीꣳसुशर्माणमदितिꣳसुप्रणीतिं ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपाꣳसुरे ॥ प्रतद्विष्णुस्तवतेवीर्याय ॥ मृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणेषु ॥ अधिक्षियंतिभुवनानि विश्वा ॥ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥ अपाꣳरेताꣳसिजिन्वति ॥ भुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः ॥ दिविमूर्धानंदधिषेसुवर्षांजिह्वामग्नेचकृषेहव्यवाहं ॥ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां ॥ अग्निश्चहव्यवाहनोभवतांदाशुषेमयः ॥ अन्विदनुमतेत्वंमन्यासैशंचनःकृधि ॥ क्रत्वेदक्षायनोहिनुप्रणआयुꣳषितारिषः ॥ हव्यवाहमभिमातिषाहं ॥ रक्षोहणंपृतनासुजिष्णुं ॥ ज्योतिष्मंतंदीद्यतंपुरंधिं ॥ अग्निꣳस्विष्टकृतमाहुवेम ॥ स्विष्टमग्नेअभितत्पृणाहि ॥ विश्वादेवपृतनाअभिष्य ॥ उरुंनःपंथांप्रदिशन्विभाहि ॥ ज्योतिष्मद्धेह्यजरंनआयुः ॥ ॥ अग्नयेस्वाहाकृत्तिकाभ्यःस्वाहा ॥ अंबायैस्वाहादुलायैस्वाहा ॥ नितत्न्यैस्वाहाभ्रयंत्यैस्वाहा ॥ मेघयंत्यैस्वाहावर्षयंत्यैस्वाहा ॥ चुपुणीकायैस्वाहा ॥ प्रजापतयेस्वाहारोहिण्यैस्वाहा ॥ रोचमानायैस्वाहाप्रजाभ्यःस्वाहा ॥ सोमायस्वाहामृगशीर्षायस्वाहा ॥ इन्वकाभ्यःस्वाहौषधीभ्यःस्वाहा ॥ राज्यायस्वाहाभिजित्यैस्वाहा ॥ रुद्रायस्वाहार्द्रायैस्वाहा ॥ पिन्वमानायैस्वाहापशुभ्यःस्वाहा ॥ अदित्यैस्वाहापुनर्वसुभ्यां ॥ स्वाहाभूत्यैस्वाहाप्रजात्यैस्वाहा ॥ बृहस्पतयेस्वाहातिष्यायस्वाहा ॥ ब्रह्मवर्चसायस्वाहा ॥ सर्पेभ्यःस्वाहाश्रेषाभ्यःस्वाहा ॥ दंदशूकेभ्यःस्वाहा ॥ पितृभ्यःस्वाहामघाभ्यः ॥ स्वाहानघाभ्यःस्वाहागदाभ्यः ॥ स्वाहारुंधतीभ्यःस्वाहा ॥ अर्यम्णेस्वाहाफल्गुनीभ्याꣳस्वाहा ॥ पशुभ्यःस्वाहा ॥ भगायस्वाहाफल्गुनीभ्याꣳस्वाहा ॥ श्रैष्ठ्यायस्वाहा ॥ सवित्रेस्वाहाहस्ताय ॥ स्वाहादद्तेस्वाहापृणते ॥ स्वाहाप्रयच्छतेस्वाहा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रतिगृभ्णतेस्वाहा ॥ त्वष्ट्रेस्वाहाचित्रायैस्वाहा ॥ चैत्रायस्वाहाप्रजायैस्वाहा ॥ वायवेस्वाहानिष्क्रीयैस्वाहा ॥ कामचारायस्वाहाभिजित्यैस्वाहा ॥ इंद्राग्निभ्याꣳस्वाहाविशाखाभ्याꣳस्वाहा ॥ श्रैष्ठ्यायस्वाहाभिजित्यैस्वाहा ॥ पौर्णमास्यैस्वाहाकामायस्वाहागत्यैस्वाहा ॥ मित्रायस्वाहानूराधेभ्यःस्वाहा ॥ मित्रधेयायस्वाहाभिजित्यैस्वाहा ॥ इंद्रायस्वाहाज्येष्ठायैस्वाहा ॥ ज्यैष्ठ्यायस्वाहाभिजित्यैस्वाहा ॥ प्रजापतयेस्वाहामूलायस्वाहा ॥ प्रजायैस्वाहा ॥ अद्भ्यःस्वाहाषाढाभ्यःस्वाहा ॥ समुद्रायस्वाहाकामायस्वाहा ॥ अभिजित्यैस्वाहा ॥ विश्वेभ्योदेवेभ्यःस्वाहाषाढाभ्यःस्वाहा ॥ अनपजय्यायस्वाहाजित्यैस्वाहा ॥ ब्रह्मणेस्वाहाभिजितेस्वाहा ॥ ब्रह्मलोकायस्वाहाभिजित्यैस्वाहा ॥ विष्णवेस्वाहाश्रोणायैस्वाहा ॥ श्लोकायस्वाहाश्रुतायस्वाहा ॥ वसुभ्यःस्वाहाश्रविष्ठाभ्यःस्वाहा ॥ अग्रायस्वाहापरीत्यैस्वाहा ॥ वरुणायस्वाहाशतभिषजेस्वाहा ॥ भेषजेभ्यःस्वाहा ॥ अजायैकपदेस्वाहाप्रोष्ठपदेभ्यःस्वाहा ॥ तेजसेस्वाहाब्रह्मवर्चसायस्वाहा ॥ अहयेबुध्नियायस्वाहाप्रोष्ठपदेभ्यःस्वाहा ॥ प्रतिष्ठायैस्वाहा ॥ पूष्णेस्वाहारेवत्यैस्वाहा ॥ पशुभ्यःस्वाहा ॥ अश्विभ्याꣳस्वाहाश्वयुग्भ्याꣳस्वाहा ॥ श्रोत्रायस्वाहाश्रुत्यैस्वाहा ॥ यमायस्वाहापभरणीभ्यःस्वाहा ॥ राज्यायस्वाहाभिजित्यैस्वाहा ॥ अमावास्यायैस्वाहाकामायस्वाहागत्यैस्वाहा ॥ चंद्रमसेस्वाहाप्रतीदृश्यायैस्वाहा ॥ अहोरात्रेभ्यःस्वाहार्धमासेभ्यःस्वाहा ॥ मासेभ्यःस्वाहर्तुभ्यःस्वाहा ॥ संवत्सरायस्वाहा ॥ अह्नेस्वाहारात्रियैस्वाहा ॥ अतिमुक्त्यैस्वाहा ॥ उषसेस्वाहाव्युष्टयैस्वाहा ॥ व्यूषुष्यैस्वाहाव्युच्छंत्यैस्वाहा ॥ व्युष्टायैस्वाहा ॥ नक्षत्रायस्वाहोदेष्यतेस्वाहा ॥ उद्यतेस्वाहोदितायस्वाहा ॥ हरसेस्वाहाभरसेस्वाहा ॥ भ्राजसेस्वाहातेजसेस्वाहा ॥ तपसेस्वाहाब्रह्मवर्चसाय

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वाहा ॥ सूर्यायस्वाहानक्षत्रेभ्यःस्वाहा ॥ प्रतिष्ठायैस्वाहा ॥ आदित्यस्वाहाप्रतिष्ठायैस्वाहा ॥ विष्णवेस्वाहायज्ञायस्वाहा ॥ प्रतिष्ठायैस्वाहा ॥ ॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयुंषितारिषत् ॥ आपोहिष्ठामयोभुवस्ता० ॥ चनः ॥ यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं ॥ मिनीमसिद्यविद्यवि ॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि ॥ अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः ॥ कितवासोयद्रिरिपुर्दीवियद्वाघासत्यमुतयन्नविद्म ॥ सर्वाताविष्यशिथिरेवदेवाधातेस्यामवरुणप्रियासः ॥ हिरण्यवर्णाःशुचयःपावका० यासाःराजा० यासांदेवा० शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशत्वचंमे ॥ सर्वाःअग्नीःरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ पवमानःसुवर्जनः ॥ पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा० ॥ जातवेदामोर्जयंत्यापुनातु ॥ भूर्भुवःसुवः तच्छंयोरावृणीमहे ॥ गातुंयज्ञाय ॥ गातुंयज्ञपतये ॥ दैवीस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेषजं ॥ शंनोअस्तुद्विपदे ॥ शंचतुष्पदे ॥ नमोब्रह्मणेनमोअस्त्वग्नये नमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि ॥ इतित्रिः ॥ ॐशांतिःशांतिःशांतिः ॥ ॥ पंचोपचारैःपूजनंकृत्वा महानैवेद्यंसमर्प्य पूर्ववन्मंत्रपुष्पंसमर्प्य ॥ आभिर्गीर्भिर्यदतोनऊनमाप्यायायहरिवोवर्धमानः ॥ यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्याम ॥ प्रणवेनोदकुंभमुत्थाप्यतत्रैवस्थाप्यवृतैर्ब्राह्मणैःसपत्नीकंयजमानमुदकुंभोदकेनाभिषेकःकार्यः ॥ तत्रमंत्राः ॥ दधिक्राव्णोअकारिषंआपोहिष्ठेतितिस्रःहिरण्यवर्णाइतिचतस्रः पवमानइत्यनुवाकःनॐअपैतुमृत्युरमृतंनआगन्वैवस्वतोनोअभयंकृणोतु ॥ पर्णवनस्पतेरिवाभिनःशीयताःरयिःसचतांनःशचीपतिः ॥ परंमृत्योअनुपरेहिपं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

थांयस्तेस्वइतरोदेवयानात् ॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोतवीरान् ॥ वातंप्राणंमनसान्वारभामहेप्रजापतिं
योभुवनस्यगोपाः॥ सनोमृत्योस्त्रायतांपात्वꣳहसोज्योग्जीवाजरामशीमहि॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेअभिशस्तेरमुंचः ॥
प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्नेभिषजाशचीभिः ॥ हरिꣳहरंतमनुयंतिदेवाविश्वस्येशानंवृषभंमतीनां ॥ ब्रह्मसरूपमनुमे
दमागादयनंमाविवधीर्विक्रमस्व ॥ शल्कैरग्निमिंधानउभौलोकौसनेमहं ॥ उभयोर्लोकयोर्ऋध्वातिमृत्युंतराम्यहं ॥ माछिदोमृत्यो
मावधीर्मामेबलंविवृहोमाप्रमोषीः ॥ प्रजांमामेरीरिषआयुरुग्रनृचक्षसंत्वाहविषाविधेम ॥ मानोमहांतमुतमानोअर्भकं० ॥ मान
स्तोकेतनये० ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणां ॥
स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः ॥ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुक
मिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ येतेसहस्रमयुतंपाशामृत्योमर्त्यायहंतवे ॥ तान्यज्ञस्यमाययासर्वानवयजामहे ॥ महांतंत्वा
महीनां० देवस्यत्वेत्यभिषिक्तोयजमानआचम्य॥ अकालमृत्युहरणं० वेदाभिमंत्रितंतोयंजठरेधारयाम्यहं॥इतितीर्थंप्राश्य॥ अद्ये
त्याद्युच्चार्य कृतस्यर्त्विग्द्वाराउदकशांतिकर्मणःसांगतासिद्धयेतत्कर्मकर्तृभ्यऋत्विग्भ्यःपूजनपूर्वकंदक्षिणाप्रदानंक० ॥ नमोस्त्व
नंताय०॥ स्वस्त्यस्तु पूर्वस्यांदिशिजपकर्त्रेऽमुकशर्मणेऋत्विजेसुवर्णनिष्क्रयीभूतामिमांदक्षिणांतुभ्यमहं० ॥ दक्षिणस्यांदिशि०
रजतनिष्क्रयीभूतामिमांद० पश्चिमायांदिशि० कꣳसनिष्क्रयीभूतामिमांद० उत्तरस्यांदिशि० वासोनिष्क्रयीभूतामिमांदक्षिणां
दातुमह० ॥ ततःकृतस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्येतेभ्योभूयसींदक्षिणांदातुमुत्सृज्येइत्यादिसर्वंवि
धायाशिषोगृह्णीयात् ॥ इत्युदकशांतिःसप्रयोगासमाप्ता ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५५ ॥ हिरण्यकेशीयःश्रावणीप्रयोगः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालावुत्कीर्त्यममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थंपंचगव्यमेलनं करिष्ये ॥ ताम्रायागोस्त्रिपलंगोमूत्रंगायत्रीमंत्रेणगृहीत्वा ॥ श्वेतायाअंगुष्ठार्धपरितंगोमयं ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरीꣳसर्वभूतानांतामिहोपह्वयेश्रियं ॥ नीलायाःसप्तपलंपयः ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ पीतायाःत्रिपलंदधि ॥ ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूꣳषितारिषत् ॥ कृष्णायाएकपलंघृतं ॥ ॐशुक्रमसिज्योतिरसितेजोसि ॥ एकपलंकुशोदकं ॥ ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां ॥ आपोहिष्ठेतिमंथयेत् ॥ प्रणवेनालोड्य ॥ प्रणवेनयज्ञकाष्ठेननिर्मथ्य ॥ प्रणवेनाभिमंत्र्य ॥ ॥ छ ॥ श्रीः ॥ सर्वैःसहआचम्यप्राणानायम्यदेशकालाद्युत्कीर्तनांते एवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थं अधीतानांछंदसांअध्येष्यमाणानांचअस्थानोच्छ्वासादिजनितयातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैःसहवेदोत्सर्जनाख्यंकर्मकरिष्ये ॥ तत्रादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनं (पंचशब्दैःपुण्याहवाचनंच)करिष्ये ॥ ॐ गणानांत्वागणपतिꣳहवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनः शृण्वन्नूतिभिःसीदसादनं ॥ भूर्भुवःसुवःऋद्धिबुद्धिसहितंमहागणपतिंसांगंसपरिवारंसायुधंसशक्तिकंअस्मिन्पूगीफलेआवाहयामि ॥ श्रीमहागणपतिंध्यायामि ॐभूर्भुवःसुवःमहागणपतयेनमःआसनमित्यादिसंपूज्य कर्पूरदीपांते ॥ ॐ सइज्जनेनसविशासजन्मनासपुत्रैर्वाजंभरतेधनानृभिः ॥ देवानांयःपितरमाविवाससतिश्रद्धामनाहविषाब्रह्मणस्पतिं ॥ दूर्वांकुरान् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गणानांत्वेतिमंत्रपुष्पं ॥ विघ्नान्नाशयमेसर्वान्नाशायोपस्थितान्प्रभो ॥ त्वत्प्रसादेनकार्याणिसर्वाणीहकरोम्यहं ॥ शत्रूणांबुद्धिना शोस्तुमित्राणामुदयंकुरु ॥ इतिविज्ञाप्यदेवेशंप्रणिपत्यपुनःपुनः ॥ अनयापूजयासकलविघ्नहर्तामहागणपतिःप्रीयतां ॥ मह्यं सकुटुंबायमहाजनान्नमस्कुर्वाणायआशीर्वचनमपेक्षमाणायवेदोत्सर्जनकर्मकारिणेपुण्याहंभवंतोब्रुवंतु ॥ ॐ पुण्याहं ॥ मह्यं० कर्म० स्वस्तिभवंतोब्रुवंतु ॥ आयुष्मतेस्वस्ति ॥ मह्यं०ऋद्धिंभवंतोब्रुवंतु ॥ कर्मऋद्ध्यतां ॥ ऋद्धिःसमृद्धिः ॥ मह्यं० श्रीरस्त्विति० अस्तुश्रीः ॥ मह्यंस० कल्याणं० अस्तुकल्याणं ॥ आमूरज० पुण्याहवाचनफलसमृद्धिरस्त्वितिभवंतोब्रुवंतुपुण्याहवाचनफलसमृद्धिरस्तु ॥ ॥ अथस्नानविधिः ॥ दर्भदूर्वाक्षततिलभस्ममृद्गोमयादिसंभारेणसहनदीतीरंगत्वाआचम्यप्राणायामंकृत्वा श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंवेदोत्सर्जनांगभूतभस्मगोमयमृत्तिकास्नानानिकरिष्ये ॥ जलसमीपंगत्वाभस्मादाय ॥ ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मांशिवोमेअस्तुसदाशिवोम् ॥ इतिशिरसि ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ इतिमुखे ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ हृदये ॥ ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ गुह्ये ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमां॥ भवोद्भवायनमः॥ पादयोः ॥ अग्निरितिभस्म ॥ वायुरितिभस्म ॥ जलमितिभस्म ॥ स्थलमितिभस्म ॥ व्योमेतिभस्म ॥ सर्वंहवाइदंभस्म ॥ ॐ मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ सर्वांगेभस्मविलिप्य ॥ ॐ आपोहिष्ठा०चनः इतिस्नात्वामार्ज

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

येत् ॥ आचम्य ॥ ततोगोमयस्नानं ॥ गायत्र्यागोमयमादाय ॥ ॐ तत्सवितु० दयात् ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांक
रीषिणीं ॥ ईश्वरींꣳसर्वभूतानांतामिहोपह्वयेश्रियं ॥ इतिसूर्यायदर्शयित्वा ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने ॥ तासामृषभ
पत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा ॥ शिरःप्रभृत्यंगानिविलिप्य ॥ स्नात्वा ॐआपोहिष्ठा० इति
मार्जयेत् ॥ आचम्य ॥ ततोमृत्तिकास्नानं ॥ ॐअश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरा ॥ शिरसाधारयिष्यामिरक्षस्वमांपदेपदे ॥
भूमिमभिमंत्र्य ॥ ॐभूमिर्धेनुर्धरणीलोकधारिणी ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ लोष्ठमादाय ॥ ॐसहस्रपरमादेवीशत
मूलाशतांकुरा ॥ सर्वंहरतुमेपापंदूर्वादुःस्वप्ननाशिनी ॥ दूर्वामभिमंत्र्य ॥ ॐकांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानो
दूर्वेप्रतनुसहस्रेणशतेनच ॥ दूर्वामादाय ॥ ॐयाशतेनप्रतनोषिसहस्रेणविरोहसि ॥ तस्यास्तेदेवीष्टकेविधेमहविषावयं ॥ दूर्वांमृ
दिप्रतिष्ठाप्य ॥ ॐमृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं ॥ मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता ॥ मृत्तिकेदेहिमेपुष्टिंत्वयिसर्व
प्रतिष्ठितं ॥ मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णुदमृत्तिके ॥ तयाहतेनपापेनगच्छामिपरमांगतिं॥मृदमभिमंत्र्य ॥ॐयतइंद्रभयामहेततो
नोअभयंकृधि ॥ मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥ पूर्वेमृदंनिक्षिप्य ॥ ॐस्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी ॥
वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः ॥ दक्षिणे ॥ ॐस्वस्तिनइद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः
स्वस्तिनोबृहस्पतिर्दधातु ॥ प्रतीच्यां ॥ ॐआपौतमन्युस्तृपलप्रभर्माधुनिःशिमीवांछरुमाꣳऋजीषी ॥ सोमोविश्वान्यतसावनानि
नार्वागिंद्रंप्रतिमानानिदेभुः ॥ उदीच्यां ॥ ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःस
तश्चयोनिमसतश्चविवः ॥ ऊर्ध्वे ॥ ॐस्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ भूमौ ॥ ॐगंधद्वारांदुराध

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्षानित्यपुष्टांकरीषिणीं ॥ ईश्वरीꣳसर्वभूतानांतामिहोपह्वयेश्रियं ॥ सूर्यायदर्शयित्वा ॥ ॐश्रींमेभजतु ॥ ललाटमालिप्य ॥ ॐअलक्ष्मींमेनश्यतु ॥ प्रदक्षिणꣳशिरोविलिप्य ॥ ॐविष्णुमुखावैदेवाश्छंदोभिरिमान्लोकाननपजय्यमभ्यजयन् ॥ मुखे॥ ॐमहाꣳइंद्रोवज्रबाहुःषोडशीशर्मयच्छतु ॥ स्वस्तिनोमघवांकरोतुहंतुपाप्मानंयोस्मान्द्वेष्टि ॥ बाह्वोः ॥ ॐसोमानꣳस्वरणंकृणुहिब्रह्मणस्पते ॥ कक्षीवंतंयऔशिजं ॥ कुक्ष्योः ॥ ॐशरीरंयज्ञशमलंकुसींदंतस्मिन्त्सीदतुयोस्मान्द्वेष्टि ॥ शरीरं ॥ ॐचरणंपवित्रंविततंपुराणंयेनपूतस्तरतिदुष्कृतानि ॥ तेनपवित्रेणशुद्धेनपूताअतिपाप्मानमरातिंतरेम ॥ चरणौविलिप्य ॥ ॐसजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहन्छूरविद्वान् ॥ जहिशत्रूꣳरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥ सदूर्वमृच्छेषंशिरसिनिधाय ॥ ॐसुमित्र्यानआपओषधयःसंतु॥अद्भिरात्मानमासिच्य ॥ ॐदुर्मित्रास्तस्मैभूयासुः॥द्विषंतंमनसाध्यायन्जलांजलिंभूमौक्षिपेत् ॥ ॐयोस्मान्द्वेष्टि ॥ यंचवयंद्विष्मः ॥ शिरःस्थांमृदंभूमौनिक्षिपेत् ॥ ॐहिरण्यशृंगंवरुणंप्रपद्येतीर्थमेदेहियाचितः ॥ यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः ॥ यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं ॥ तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः ॥ नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवारुण्यैनमोद्भ्यः॥ यदपांक्रूरंयदमेध्ययदशांतंतदपगच्छतात् ॥ अत्याशनादतीपानाद्यचउग्रात्प्रतिग्रहात्॥ तन्नोवरुणोराजापाणिनाह्यवमर्शतु ॥ सोहमपापोविरजोनिर्मुक्तोमुक्तकिल्बिषः ॥ नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां ॥ यश्चाप्सुवरुणःसपुनात्वघमर्षणः ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ सागरस्यतुनिश्वासदंडहस्ताऽसुरांतक ॥ जगत्स्रष्टर्जगन्मर्दिन्नमामित्वांसुरेश्वर ॥ इममंत्रंसमुच्चार्यतीर्थस्नानंसमाचरेत् ॥ अन्यथातत्फलस्यार्धं तीर्थंशोहरतिध्रुवं ॥ वरुणंप्रार्थयेत् ॥ ॐइममेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीये

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

कीयेशृणुह्यासुषोमया ॥ पाणिनोदकंत्रिःप्रदक्षिणमावृत्य ॥ ऋतंचत्यघमर्षण ॥ ॐऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्रिरजायततःसमुद्रोअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोसुवः ॥ त्रिरावृत्ततृचेनत्रिवारमघमर्षणेनत्रीन्प्राणायामान्कृत्वा ॥ ॐयत्पृथिव्याश्रजस्त्वमांतरिक्षेविरोदसी ॥ इमाश्स्तदापोवरुणःपुनात्वघमर्षणः ॥ पुनंतुवसवःपुनातुवरुणःपुनात्वघमर्षणः ॥ एषभूतस्यमध्येभुवनस्यगोप्ता ॥ एषपुण्यकृताँलोकानेषमृत्योर्हिरण्मयं ॥ द्यावापृथिव्योर्हिरण्मयश्शश्रितश्सुवः ॥ सन्नःसुवःसश्शिशाधि ॥ इतिमंत्रस्नानंकृत्वा ॥ ॐआर्द्रज्वलंतिज्योतिरहमस्मि ॥ ज्योतिर्ज्वलंतिब्रह्माहमस्मि ॥ योहमस्मिब्रह्माहमस्मि ॥ अहमस्मिब्रह्माहमस्मि ॥ अहमेवाहमांजुहोमिस्वाहा ॥ आचमनंकृत्वा ॥ ॐअकार्यकार्यंवकीर्णीस्तेनोभ्रूणहागुरुतल्पगः ॥ वरुणोपामघमर्षणतस्मात्पापात्प्रमुच्यते ॥ पुनःमंत्रस्नानंकृत्वा ॥ ॐरजोभूमिंस्तमाश्रोदयस्वप्रवदंतिधीराः ॥ पापक्षयार्थंमंत्रस्नानंकृत्वा ॥ आक्रान्समुद्रःप्रथमेविधर्मन्जनयन्प्रजाभुवनस्यराजा ॥ वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुः ॥ इतिमंत्रंजस्त्वा ॥ आचम्य ॥ सपवित्रेणपाणिना ॥ ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ॐहिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्नियागर्भंदधिरेविरूपास्तानआपःशश्स्योनाभवंतु ॥ यासाश्राजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतःशुचयोयाःपावकास्तानआपःशश्स्योनाभवंतु ॥ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोंदंतिशुक्रास्तानआपःशश्स्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशत्वचंमे ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सर्वाँ॒ऽअग्नीँ॒रप्सु॒षदो॑हुवेवो॒मयि॒वर्चो॒बल॒मोजो॒निध॑त्त ॥ ॐपव॑मान॒ःसुव॒र्जन॑ः ॥ प॒वित्रे॑ण॒विच॑र्षणिः ॥ यःपोता॒सपु॑नातुमा ॥ पु॒नंतु॑ मादेवज॒नाः ॥ पु॒नंतु॒मन॑वोधि॒या ॥ पु॒नंतु॒विश्व॑आ॒यव॑ः ॥ जात॑वेदःप॒वित्र॑वत् ॥ प॒वित्रे॑णपुनाहिमा ॥ शु॒क्रेण॑देव॒दीद्य॑त् ॥ अग्ने॒ क्रत्वा॒क्रतूँ॒रनु॑ ॥ यत्ते॑प॒वित्र॑म॒र्चिषि॑ ॥ अग्ने॒वित॑तमंत॒रा ॥ ब्रह्म॒तेन॑पुनीमहे ॥ उ॒भाभ्यां॑देवसवितः ॥ प॒वित्रे॑णस॒वेन॑च ॥ इ॒दंब्र ह्म॑पुनीमहे ॥ वै॒श्व॒दे॒वीपु॑न॒तीदे॒व्यागा॑त् ॥ यस्यै॑ब॒ह्वीस्त॒नुवो॑वी॒तपृ॑ष्ठाः ॥ तया॒मदं॑तःसध॒माद्ये॑षु ॥ व॒यँ॒स्या॑म॒पत॑योरयी॒णां ॥ वै॒श्वा॒न॒रोर॒श्मिभि॑र्मापुनातु ॥ वात॑ःप्रा॒णेने॑षि॒रोम॑यो॒भूः ॥ द्यावा॑पृथि॒वीपय॑सा॒पयो॑भिः ॥ ऋ॒ताव॑रीय॒ज्ञिये॑मापुनीताम् ॥ बृ॒हद्भिः॑ सवित॒स्तृभिः॑ ॥ वर्षि॑ष्ठैर्देव॒मन्म॑भिः ॥ अग्ने॒दक्षैः॑पुनाहिमा ॥ येन॑दे॒वाअपु॑नत ॥ येनापो॑दि॒व्यंकशः॑ ॥ तेन॑दि॒व्येन॒ब्रह्म॑णा ॥ इ॒दंब्रह्म॑पुनीमहे ॥ यःपा॑वमा॒नीर॒ध्येति॑ ॥ ऋषि॑भि॒ःसंभृ॑त॒ँ॒रसं॑ ॥ सर्व॒ँ॒सपू॒तम॑श्नाति ॥ स्व॒दि॒तंमा॑त॒रिश्व॑ना ॥ पा॒व॒मा॒नीर्यो अ॒ध्येति॑ ॥ ऋषि॑भि॒ःसंभृ॑त॒ँ॒रसं॑ ॥ तस्मै॒सर॑स्वतीदुहे ॥ क्षी॒रँ॒स॒र्पिर्मधू॑द॒कं ॥ पा॒व॒मा॒नीःस्व॒स्त्यय॑नीः ॥ सु॒दुघा॒हिपय॑स्वतीः ॥ ऋषि॑भि॒ःसंभृ॑तो॒रसः॑ ॥ ब्रा॒ह्म॒णेष्व॒मृत॑ँ॒हि॒तं ॥ पा॒व॒मा॒नीर्दि॑शंतुनः ॥ इ॒मंलो॒कमथो॑अ॒मुं ॥ कामा॒न्सम॑र्धयंतुनः ॥ दे॒वीर्दे॒वैःस॒ माभृ॑ताः ॥ पा॒व॒मा॒नीःस्व॒स्त्यय॑नीः ॥ सु॒दुघा॒हिघृ॑त॒श्चुतः॑ ॥ ऋषि॑भि॒ःसंभृ॑तो॒रसः॑ ॥ ब्रा॒ह्म॒णेष्व॒मृत॑ँ॒हि॒तं ॥ येन॑दे॒वाःप॒वित्रे॑ण ॥ आ॒त्मानं॑पु॒नते॒सदा॑ ॥ तेन॑स॒हस्र॑धारेण ॥ पा॒व॒मा॒न्यःपु॑नंतुमा ॥ प्रा॒जा॒प॒त्यंप॒वित्रं॑ ॥ श॒तोद्या॑मँ॒हिर॒ण्मयं॑ ॥ तेन॑ब्रह्म॒विदो॑व॒यं ॥ पू॒तंब्रह्म॑पुनीमहे ॥ इंद्रः॑सुनी॒तीस॒हमा॑पुनातु ॥ सोमः॑स्व॒स्त्यावरु॑णःस॒मीच्या॑ ॥ य॒मोराजा॑प्रमृ॒णाभिः॑पुनातुमा ॥ जा॒तवे॑दामो॒र्ज यं॑त्यापुनातु ॥ ततःस्नानांगदेवर्षिपितृतर्पणंकरिष्ये ॥ ब्रह्मादयोयेदेवाः ॥ तान्देवांस्तर्पयामि ॥ भूर्देवांस्तर्प० ॥ भुवर्देवांस्तर्प० ॥ सुवर्देवांस्तर्प० ॥ भूर्भुवःसुवर्देवांस्तर्पयामि ॥ ततोनिवीती ॥ विश्वामित्रादयऋषयः ॥ तान्ऋषींस्तर्पयामि ॥ भूर्ऋषींस्तर्प

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यामि ॥ भुवर्ऋषींस्तर्पयामि ॥ सुवर्ऋषींस्तर्पयामि ॥ भूर्भुवःसुवर्ऋषींस्तर्पयामि ॥ प्राचीनावीती ॥ वैशंपायनादयोयेपितरः ॥ तान्पितॄंस्तर्पयामि ॥ भूःपितॄंस्तर्पयामि ॥ भुवःपितॄंस्तर्पयामि ॥ सुवःपितॄंस्तर्पयामि ॥ भूर्भुवःसुवःपितॄंस्तर्पयामि ॥ यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥ इतियक्ष्माणंतर्पयित्वा ततोबहिरागत्यदर्भानन्योन्यस्मैआदित्संतोवाततोवस्त्रपरिधानादिकुर्युः ॥ आचम्यप्राणानायम्य ॥ अद्यपूर्वोच्चरित० श्रीपरमेश्वरप्रीत्यर्थंशरीरवाङ्मनःशुद्ध्यर्थंपंचगव्यप्राशनमहंकरिष्ये ॥ ॐ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके ॥ प्राशनात्पंचगव्यस्यदहत्यग्निरिवेंधनं ॥ ॐ ॐ ॐ एवंत्रिवारं त्रिःप्राश्य ॥ ॥ अथऋषिपूजनं ॥ ॥ आचम्यदेशकालौसंकीर्त्यउत्सर्जनांगत्वेनब्रह्मादिदेवानां विश्वामित्रादिऋषीणांवैशंपायनादिपितॄणांच स्थापनंपूजनंचकरिष्ये ॥ देवगणादिपूजार्थंचतुरस्रांप्राक्प्रवणांउदक्प्रवणांदक्षिणाप्रवणांचवेदिंकुर्यात् ॥ तत्रप्राक्प्रवणेदेशेप्रागग्रैर्दर्भैःउदगपवर्गाण्यासनानिकल्पयंति ब्रह्मणेआसनंकल्पयामि १ प्रजापतयेआसनंकल्पयामि २ बृहस्पतयेआसनंकल्पयामि ३ अग्नयेआसनंकल्पयामि ४ वायवेआसनंकल्पयामि ५ सूर्यायआसनंकल्पयामि ६ चंद्रमसेआसनंकल्पयामि ७ नक्षत्रेभ्यआसनंकल्पयामि ८ इंद्रायराज्ञेआसनंकल्पयामि ९ यमायराज्ञेआसनंकल्पयामि १० वरुणायराज्ञेआसनंकल्पयामि ११ सोमायराज्ञेआसनंकल्पयामि १२ वैश्रवणायराज्ञेआसनंकल्पयामि १३ वसुभ्यआसनंकल्पयामि १४ रुद्रेभ्यआसनंकल्पयामि १५ आदित्येभ्यआसनंकल्पयामि १६ विश्वेभ्योदेवेभ्यआसनंकल्पयामि १७ साध्येभ्यआसनंकल्पयामि १८ ऋभुभ्यआसनंकल्पयामि १९ भृगुभ्यआसनंकल्पयामि २० मरुद्भ्यआसनंकल्पयामि २१ अथर्वभ्यआसनंकल्पयामि २२ अंगिरोभ्यआसनंकल्पयामि २३ ॥ ततोनिवीतीउत्तरतउदीचीप्रवणेदेशेउदगग्रैर्दर्भैःप्रागपवर्गाण्यासनानिकल्पयंति मंडल

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्योत्तरभागेउत्तराग्रान्दर्भान् ॥ विश्वामित्रायआसनंकल्पयामि १ जमदग्नयेआसनंकल्पयामि २ भरद्वाजायआसनंकल्पयामि ३ गौतमायआसनंकल्पयामि ४ अत्रयेआसनंकल्पयामि ५ वसिष्ठायआसनंकल्पयामि ६ कश्यपायआसनंकल्पयामि ७ अनयो र्मध्येअरुंधत्यैआसनंकल्पयामि ८ ॥ देवस्यदक्षिणेउत्तराग्रान्दर्भान् ॥ अगस्त्यायआसनंकल्पयामि १ मध्येपूर्वाग्रान्दर्भान्उदग पवर्गेण द्विपंचाशदृषीनावाहयेत् ॥ कृष्णद्वैपायनायआसनंकल्पयामि २ जातूकर्ण्यायआसनंकल्पयामि ३ तरुक्षायआसनंक ल्पयामि ४ तृणबिंदवेआसनंकल्पयामि ५ वार्मिणेआसनंकल्पयामि ६ वरूथिनेआसनंकल्पयामि ७ वाजिनेआसनंकल्पयामि ८ वाजिश्रवसेआसनंकल्पयामि ९ सत्यश्रवसेआसनंकल्पयामि १० सुश्रवसेआसनंकल्पयामि ११ सुतश्रवसेआसनंकल्प यामि १२ सोमशुष्मायणायआसनंकल्पयामि १३ सत्ववतेआसनंकल्पयामि १४ बृहदुक्थायआसनंकल्पयामि १५ वामदे वायआसनंकल्पयामि १६ वाजिरत्नायआसनंकल्पयामि १७ हर्यश्वायनायआसनंकल्पयामि १८ उदमयायआसनंकल्पयामि १९ गोतमायआसनंकल्पयामि २० ऋणंजयायआसनंकल्पयामि २१ ऋतंजयायआसनंकल्पयामि २२ कृतंजयायआसनंक ल्पयामि २३ धनंजयायआसनंकल्पयामि २४ बभ्रवेआसनंकल्पयामि २५ त्र्यरुणायआसनंकल्पयामि २६ त्रिवर्षायआसनं कल्पयामि २७ त्रिधातवेआसनंकल्पयामि २८ शिबिंतायआसनंकल्पयामि २९ पराशरायआसनंकल्पयामि ३० विष्णवे आसनंकल्पयामि ३१ रुद्रायआसनंकल्पयामि ३२ स्कंदायआसनंकल्पयामि ३३ काशीश्वरायआसनंकल्पयामि ३४ ज्वरा यआसनंकल्पयामि ३५ धर्मायआसनंकल्पयामि ३६ अर्थायआसनंकल्पयामि ३७ कामायआसनंकल्पयामि ३८ क्रोधाय आसनंकल्पयामि ३९ वसिष्ठायआसनंकल्पयामि ४० इंद्रायआसनंकल्पयामि ४१ त्वष्टेआसनंकल्पयामि ४२ कर्त्रेआसनंक

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ल्पयामि ४३ धर्त्रेआसनंकल्पयामि ४४ धात्रेआसनंकल्पयामि ४५ मृत्यवेआसनंकल्पयामि ४६ सवित्रेआसनंकल्पयामि ४७ सावित्र्यैआसनंकल्पयामि ४८ ऋग्वेदायआसनंकल्पयामि ४९ यजुर्वेदायआसनंकल्पयामि ५० सामवेदायआसनंकल्पयामि ५१ अथर्ववेदायआसनंकल्पयामि ५२ इतिहासपुराणायआसनंकल्पयामि ५३॥ प्राचीनावीती ॥ एभ्योदक्षिणतोदक्षिणाप्रवणेदेशेदक्षिणाग्रैर्दर्भैःप्रत्यगपवर्गाण्यासनानिकल्पयंति ॥ मंडलस्यदक्षिणेदक्षिणाग्रान्दर्भान् ॥ वैशंपायनायआसनंकल्पयामि १ पलिंगवेआसनंकल्पयामि २ तित्तिरायआसनंकल्पयामि ३ उखायआसनंकल्पयामि ४ आत्रेयायपदकारायआसनंकल्पयामि ५ कौंडिण्यायवृत्तिकारायआसनंकल्पयामि ६ सूत्रकारेभ्यआसनंकल्पयामि ७ सत्याषाढायआसनंकल्पयामि ८ प्रवचनकर्तृभ्यआसनंकल्पयामि ९ आचार्येभ्यआसनंकल्पयामि १० ऋषिभ्यआसनंकल्पयामि ११ वानप्रस्थेभ्यआसनंकल्पयामि १२ ऊर्ध्वरेतोभ्यआसनंकल्पयामि १३ एकपत्निभ्यआसनंकल्पयामि १४ पित्रेआसनंकल्पयामि १ पितामहायआसनंकल्पयामि २ प्रपितामहायआसनंकल्पयामि ३ मात्रेआसनंकल्पयामि ४ पितामह्यैआसनंकल्पयामि ५ प्रपितामह्यैआसनंकल्पयामि ६ मातामहायआसनंकल्पयामि ७ मातुःपितामहायआसनंकल्पयामि ८ मातुःप्रपितामहायआसनंकल्पयामि ९ मातामह्यैआसनंकल्पयामि १० मातुःपितामह्यैआसनंकल्पयामि ११ मातुःप्रपितामह्यैआसनंकल्पयामि १२ अमुंकल्पयाम्यमुंकल्पयामीत्यासनेमुंतर्पयाम्यमुंतर्पयामीत्युदकेनामुष्मैनमोमुष्मैनमइतिगंधपुष्पधूपदीपैरभ्यर्च्यअमुष्मैस्वाहामुष्मैस्वाहेत्यनेनामुंतर्पयाम्यमुंतर्पयामीतिफलोदकेनामुष्मैनमोमुष्मैनमइत्युपस्थाय ॥ सव्यं ॥ ब्रह्माणंतर्पयामीतितर्पयेत् उक्तपितृगणांस्तिलोदकेनतर्पयेत् ॥ ब्रह्मादिदेवेभ्यः विश्वामित्रादिऋषिभ्यः वैशंपायनादिपितृभ्यः ॥ अर्घ्यंसम० ॥ आचमनीयंसमर्पयामि ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पंचामृतस्नानं ॥ वस्त्रोपवस्त्रे ॥ यज्ञोपवीतं ॥ गंधं ॥ अलंकारान्दत्वा ॥ ब्रह्मणेनमः इत्यादिपुष्पंसमर्पयामि ॥ धूपं ॥ दीपं ॥ महानैवेद्यं ॥ ब्रह्मणेस्वाहा ॥ इत्यादि ॥ ब्रह्माणंतर्पयामीतिपूर्ववत् ॥ फलोदकं उत्तरापोशनं हस्तप्रक्षालनंसमर्पयामि मुखप्रक्षालनंसमर्पयामि करोद्वर्तनं मुखवासार्थेपूगीफलतांबूलं दक्षिणां उत्तरनीराजनं ॥ ब्रह्मणेप्रजापतयेइत्यादिमंत्रपुष्पं ॥ प्रदक्षिणां ॥ नमस्कारान् ॥ प्रार्थयेत् ॥ अनेनकृतपूजनेनब्रह्मादिदेवविश्वामित्रादिऋषिवैशंपायनादिपितृस्वरूपीपरमेश्वरःप्रीयतां ॥ अथस्थंडिलविधिः ॥ ॥ आचम्यप्राणानायम्य ॥ अद्यपूर्वोच्चरितवर्तमानएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंवेदोत्सर्जनांगंहवनंकर्तुस्थंडिलादिसर्वकर्मकरिष्ये ॥ स्थंडिलंगोमयेनोपलिप्यउल्लिख्य ॥ उद्धन्यमानमस्याअमेध्यं ॥ अपपाप्मानंयजमानस्यहंतु ॥ शिवानःसंतुप्रदिशश्चतस्रः ॥ ॐ शंनोमातापृथिवीतोकसाता ॥ तिस्रः प्राचीस्तिस्रउदीचीरेखाःकृत्वा ॥ रेखासाधनमुत्तरतःस्थंडिलेनिधायप्रोक्ष्य ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ शकलमाग्नेय्यांनिरस्यअपउपस्पृश्य ॥ इंद्राद्यष्टौलोकपालानावाहयति इंद्रायनमः अग्नयेनमः यमायनमः निर्ऋतयेनमः वरुणायनमः वायवेनमः सोमायनमः ईशानायनमः मध्येअग्निस्थानायनमः ॥ इत्यक्षतैरावाह्य ॥ ॐ वैश्वानरस्यरूपं ॥ पृथिव्यांपरिस्रसा ॥ स्योनमाविंशंतुनः ॥ भूर्भुवःसुवरोम्बलवर्धननामानमग्निंप्रतिष्ठापयामिइत्यग्निंप्रतिष्ठाप्य ॥ प्रोक्षितेंधनानिनिक्षिप्य ॥ वेणुधमन्याप्रबोध्यध्यायेत् ॥ ॐ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ आविवेश ॥ सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः ॥ स्वाहांतुदक्षिणेपार्श्वेदेवींवामे

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शनः ॥ अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसंमुखोवरदोभव ॥ समित्रयमादाय ॐश्रद्धएहिसत्येनत्वाह्वयामि ३ ॐ याःपुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्चयाः ॥ ताभीरश्मिपवित्राभिःश्रद्धांयज्ञमारभे ॥ आकूत्यैत्वाकामायत्वासमृधेत्वापुरोदधेअमृत त्वायजीवसे ॥ आकूतिमस्यावसेकाममस्यसमृद्धै ॥ इंद्रस्ययुंजतेधियः ॥ आकूतिंदेवींमनसःपुरोदधेयज्ञस्यमातासुहवामेअस्तु ॥ यदिच्छामिमनसासकामोविदेयमेनद्धृदयेनिविष्टं ॥ हृदयालंभः उदकस्पर्शः प्राणायामः उत्सर्जनहोमकर्मणियायक्ष्यमाणादेवता स्ताःसर्वाःपरिग्रहीष्यामि ॥ जातवेदसमग्निमिध्मेन आधारहोमे प्रजापतिंमनुमिंद्रंचाज्येन ॥ आज्यभागहोमे अग्निंसोमंचाज्येन ॥ सामान्यप्रधानहोमे ॥ अग्निंजातवेदसꣳसꣳराधनीꣳसꣳराधनींदेवींप्रसाधनींदेवीं व्याहृतीनामग्निंवायुंसूर्यप्रजापतिंप्रत्येकमाज्येन वैशेषिकप्रधानहोमे ॥ प्रजापतिंकांडऋषिंसोमंकांडऋषिंअग्निंकांडऋषिंविश्वान्देवान्कांडऋषीन्स्वयंभुवंकांडऋषिं ॥ सावित्रीं ऋग्वेदंयजुर्वेदंसामवेदंअथर्ववेदंसदसस्पतिंचाज्येनयक्ष्ये ॥ परमात्मानंयज्ञोपवीतेनयक्ष्ये ॥ अंगहोमे ॥ वरुणंद्विःअग्निवरुणौद्विः अयासमग्निंप्रजापतिंप्रत्येकमाज्येनयक्ष्ये ॥ जयहोमे ॥ चित्तंचित्तिंआकूतंआकूतिंविज्ञातंविज्ञानंमनःशक्करीःदर्शपूर्णमासंबृहद्रथं तरंप्रजापतिंचप्रत्येकमाज्येनयक्ष्ये ॥ अभ्यातानहोमे ॥ अग्निंभूतानामधिपतिं इंद्रंज्येष्ठानामधिपतिं यमंपृथिव्याअधिपतिं वायुमं तरिक्षस्याधिपतिं सूर्यंदिवोधिपतिं चंद्रमसंनक्षत्राणामधिपतिं बृहस्पतिंब्रह्मणोधिपतिं मित्रंसत्यानामधिपतिं वरुणंअपामधि पतिं समुद्रंस्रोत्यानामधिपतिं अन्नꣳसाम्राज्यानामधिपति सोमंओषधीनामधिपतिं सवितारंप्रसवानामधिपतिं रुद्रंपशूनामधि पतिं ॥ उदकस्पर्शः त्वष्टारंरूपाणामधिपतिं विष्णुंपर्वतानामधिपतिं मरुतोगणानामधिपतीन् प्राचीनावीती पितृन्पितामहान्प

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रान्वरांश्चप्रत्येकमाज्येनयक्ष्ये ॥ यज्ञोपवीती उदकस्पर्शः ॥ राष्ट्रभृद्धोमेअग्निंगंधर्वंओषधीरप्सरसः सूर्यंगंधर्वंमरीचीरप्सरसःचं द्रमसंगंधर्वंनक्षत्राण्यप्सरसः यज्ञंगंधर्वंदक्षिणाअप्सरसः मनोगंधर्वंऋक्सामान्यप्सरसः वातंगंधर्वंअपोप्सरसः भुवनस्यपतिंमृत्युं गंधर्वंविश्वमप्सरसः पर्जन्यंगंधर्वंविद्युतोप्सरसः अमृडयंमृत्युंगंधर्वंप्रजाअप्सरसः कामंगंधर्वंआधीरप्सरसः सनोभुवनस्यपतिं चप्रत्येकमाज्येनयक्ष्ये ॥ स्विष्टकृद्धोमे ॥ अग्निꣳस्विष्टकृतंहुतशेषेणयक्ष्ये ॥ उत्सर्जनांगत्रिवृदन्नहोमे ॥ अग्निंत्रिवृदन्नेन ॥ सोमंत्रिवृदन्नेन अग्निमन्नादंत्रिवृदन्नेन अग्निमन्नपतिंत्रिवृदन्नेन प्रजापतिंत्रिवृदन्नेन विश्वान्देवान्त्रिवृदन्नेन सर्वादे वताःत्रिवृदन्नेन अग्निꣳस्विष्टकृतंत्रिवृदन्नेन वास्तोष्पतिंबलीकरणेनयक्ष्ये ॥ प्रायश्चित्तहोमे ॥ अग्निंत्रिःअग्नीवरुणौद्विःइंद्रंद्विः त्र्यंबकंविष्णुंअग्निंवायुंसूर्यंबृहस्पतिंवरुणंइंद्रंविश्वान्देवांश्चाज्येनयक्ष्ये ॥ सꣳस्रावहोमे ॥ वसून्रुद्रानादित्यान्सꣳस्रावाज्येनय क्ष्ये ॥ एतादेवताःसद्योयक्ष्ये ॥ ॐभूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदंनमम ॥ अन्वाधानसमिधंदद्यात् ॥ ॐएषहिदेवःप्रदिशोनु सर्वाःपूर्वोहिजातःसउगर्भेअंतः ॥ सविजायमानःसजनिष्यमाणःप्रत्यङ्जनास्तिष्ठतिविश्वतोमुखः ॥ इत्यग्निमाचारात्संमुखीकृत्य यथाहुतद्वसवोगौर्यंचित्पदिषिताममुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यꣳहःप्रातार्यग्नेप्रतरान्नआयुः ॥ परिस्तीर्य ॥ पुरस्तात् दक्षिणतः पश्चात् उत्तरतः ॥ इध्मबंधनं ॥ भूर्भुवःसुवःदक्षिणतःब्रह्मणेइदमासनं ॥ भूर्भुवःसुवःउत्तरतःब्रह्मप्रणीतायैइदमा सनं ॥ द्वौदर्भौहस्तेगृहीत्वा हृदयमालभ्य ॥ ॐमयिगृह्णाम्यग्रेअग्निꣳरायस्पोषायसुप्रजास्त्वायसुवीर्यायं ॥ मयिप्रजांमयिवर्चो दधाम्यरिष्टाःस्यामतनुवासुवीराः ॥ योनोअग्निःपितरोहृत्स्वंतरमर्त्योमर्त्याꣳआविवेश ॥ तमात्मन्परिगृह्णीमहेवयंमासोअस्माꣳ

CC-0.In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्भान्अवज्वलनदर्भान्यज्ञोपवीतंआज्यंत्रिवृदन्नंचासादयामि ॥ ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः॥ सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ अस्मिन्कुशेब्रह्मणेनमः ब्रह्माणंआवाहयामि ॥ ब्रह्मसदनात्तृणंनिरस्य अपउपस्पृश्य ब्रह्मप्रणीतासंस्कारः ॥ समावप्रच्छिन्नाग्रौदर्भौ समौसाग्रौअंतर्गर्भरहितौप्रादेशमात्रौपवित्रेकृत्वा नखादन्येनच्छित्वा अद्भिरनुमृज्य प्रणीतापात्रंत्रिःप्रक्षाल्य प्रागग्रपवित्रांतर्हितेपात्रेपआनीय उपबिलंपूरयित्वा ॥ पवित्रेअंगुष्ठोपकनिष्ठिकाभ्यांधृत्वाउदगग्राभ्यांपवित्राभ्यांत्रिरुत्पूय दक्षिणोत्तराभ्यांपाणिभ्यांसमंप्राणैर्धृत्वा अविषिंचन्अग्नेर्दक्षिणतोहृत्वा उत्तरेणाग्निंदर्भेषुनिधाय अन्यैर्दर्भैरपिदधाति ॥ तिरःपवित्रंप्रोक्षणीःसꣳस्कृत्य ॥ यथापुरस्तात्उदगग्रपवित्रांतर्हितमद्भिःपूरयित्वा बिलवंत्युत्तानानिकृत्वा इध्मंचविस्रस्य प्राक्संस्थंविषायेध्मंत्रिःसर्वाभिःप्रोक्षति ॥ तेपवित्रेआज्यपात्रेनिधाय दर्वीनिष्टप्य संमृज्यसंमार्ग कुशानादाय दर्वीप्राचीमग्रैरंतरतोभ्याकारंप्रतीचींमध्यैर्बाह्यतोमूलैर्दंडंसंमृज्य पुनर्निष्टप्य अनधोनिदधाति ॥ संमार्गानभ्युक्ष्य अग्नावादधाति ॥ आज्यंविलाप्य पवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरुप्य उपवेषेणाग्न्यायतनादुत्तरतोंगारान्निरुह्य तेष्वधिश्रित्य दर्भैराज्यमवद्योत्य ॥ दर्भाग्रद्वयंसजलमाज्येन्यस्यप्रज्वालितैर्दर्भैःत्रिःपर्यग्निकृत्वा उल्मुकंनिरस्य अपउपस्पृश्य उपवेषेणअंगारान्प्रत्यूह्य उपवेषेनिरस्य अपउपस्पृश्य ॥ अपरेणाग्निंबर्हिरास्तीर्यतेष्वाज्यस्थालीमानीय पवित्रेविरलेकृत्वा उदगग्राभ्यांपवित्राभ्यांपुनराहारमाज्यंत्रिरुत्पूय पवित्रेप्रोक्ष्य अग्नावाधाय शम्याभिःपरिदधाति ॥ अपरेणाग्निमुदीचीनकुंबांमध्यमांनिदधाति ॥ दक्षणेनाग्निꣳसꣳस्पृष्टांमध्यमयाप्राचीनकुंबां ॥ उत्तरेणाग्निꣳसꣳस्पृष्टांमध्यमयाप्राचीनकुंबां ॥ अपरेणाग्निंप्राङ्मुखउपविशति ॥ ॐअदितेनुमन्यस्व ॥ ॐअनुमतेनुमन्यस्व ॥ ॐसरस्वतेनुमन्यस्व ॥ ॐदेवसवितःप्रसुव ॥ इध्ममङ्त्वाभ्याद

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धाति॥ अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेंधिवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहा॥ जातवेद
सेऽग्नयइदं॥ अथदर्व्याजुहोतिउत्तरपरिधिसंधिमन्ववहृत्य॥ ॐप्रजापतयेमनवेस्वाहा॥ प्रजापतयेमनवइदं॥ दक्षिणपरिधिसंधि
मन्ववहृत्य॥ ॐइंद्रायस्वाहा॥ इंद्रायेदं इदंद्वयमुपांशु॥ उत्तरार्धपूर्वार्धे॥ अग्नयेस्वाहा॥ अग्नयइदं॥ दक्षिणार्धपूर्वार्धे॥ ॐसोमा
यस्वाहा॥ सोमायेदं॥ तावंतरेणेतराजुहोति॥ युक्तोवहजातवेदःपुरस्तादग्नेविद्धिकर्मक्रियमाणंयथेदं॥ त्वंभिषक्भेषजस्यासि
कर्तात्वयागाश्वान्पुरुषान्सनेमस्वाहा॥ जातवेदसेऽग्नयइदं॥ यातिरश्चीनिपद्यसेहंविधरणीइति॥ तांत्वाघृतस्यधारयाग्नौसंराध
नीयजेस्वाहा॥ संराधन्याइदं॥ ॐसंराधन्यैदेव्यैस्वाहा॥ संराधन्यैदेव्याइदं॥ ॐप्रसाधन्यैदेव्यैस्वाहा॥ प्रसाधन्यैदेव्या
इदं॥ ॐभूःस्वाहा॥ अग्नयइदं॥ ॐभुवःस्वाहा॥ वायवइदं॥ ॐसुवःस्वाहा॥ सूर्यायेदं॥ ॐभूर्भुवःसुवःस्वाहा॥ प्रजापतयइदं॥
प्रधानहोमे॥ ॐप्रजापतयेकांडर्षयेस्वाहा॥ प्रजापतयेकांडर्षयइदं॥ ॐसोमायकांडऋषयेस्वाहा॥ सोमायकांडऋषयइदं॥ ॐअग्न
येकांडऋषयेस्वाहा॥ अग्नयेकांडऋषयइदं॥ ॐविश्वेभ्योदेवेभ्यःकांडऋषिभ्यःस्वाहा॥ विश्वेभ्योदेवेभ्यःकांडऋषिभ्यइदं॥
स्वयंभुवेकांडऋषयेस्वाहा॥ स्वयंभुवेकांडऋषयइदं॥ सावित्र्यैस्वाहा॥ सावित्र्याइदं॥ ऋग्वेदायस्वाहा॥ ऋग्वेदायेदं॥
यजुर्वेदायस्वाहा॥ यजुर्वेदायेदं॥ सामवेदायस्वाहा॥ सामवेदायेदं॥ अथर्ववेदायस्वाहा॥ अथर्ववेदायेदं॥ सदसस्पत
येस्वाहा॥ सदसस्पतयइदं॥ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तु
तेजःस्वाहा॥ परमात्मनइदं॥ इतियज्ञोपवीतंहुत्वाविप्रेभ्योदत्त्वाचधारयेत्॥ ॥ अथयज्ञोपवीतसंस्कारः॥ श्रौतस्मार्तकर्मा
नुष्ठानसिद्ध्यर्थंयज्ञोपवीतसंस्कारंकरिष्ये॥ गार

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चक्षेस ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनय थाचनः ॥ हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्नियागर्भंदधिरेविरूपास्तान्आपःशंस्योनाभवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतःशुचयोयाःपावकास्तान्आपःशंस्योनाभवंतु ॥ यासांदेवा दिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोंदंतिशुक्रास्तान्आपःशंस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यता पःशिवयातनुवोपस्पृशत्वचंमे ॥ सर्वांश्अग्नीश्रप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ पवमानःसुवर्जनः ॥ पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥ पुनंतुमादेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनंतुविश्वआयवः ॥ जातवेदःपवित्रवत् ॥ पवित्रेणपुनाहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूंरनु ॥ १ ॥ यत्तेपवित्रमर्चिषि ॥ अग्नेवितंतमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभाभ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदेव्यागात् ॥ यस्यैब्रह्वीस्तनुवोवीतपृष्ठाः ॥ तया मदंतःसधमाद्येषु ॥ वयंस्यामपतयोरयीणां ॥ २ ॥ वैश्वनरोरश्मिभिर्मापुनातु ॥ वातःप्राणेनेषिरोमयोभूः ॥ द्यावापृथिवी पयसापयोभिः ॥ ऋतावरीयज्ञियेमापुनीतां ॥ बृहद्भिःसवितस्तृभिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेदक्षैःपुनाहिमा ॥ येनदेवा अपुनत ॥ येनापोदिव्यंकशः ॥ तनदिव्येनब्रह्मणा ॥ ३ ॥ इदंब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥ ऋषिभिःसंभृतंरसं ॥ सर्वंसपूतमश्नाति ॥ स्वदितंमातरिश्वना ॥ पावमानीर्योअध्येति ॥ ऋषिभिःसंभृतंरसं ॥ तस्मैसरस्वतीदुहे ॥ क्षीरंसर्पिर्मधूदकं ॥ पावमानीःस्वस्त्ययनीः ॥४॥ सुदुघाहिपयस्वतीः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतंहितं ॥ पावमानीर्दिशंतुनः ॥ इमंलोकमथोअमुं ॥ कामान्समर्धयंतुनः ॥ देवीर्देवैःसमाभृताः ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिघृतश्चुतः ॥ ऋषिभिःसं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भृतोरसः ॥ ५ ॥ ब्राह्मणेष्वमृतꣳहितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनेतसदा ॥ तेनसहस्रधारेण ॥ पावमान्यःपुनंतुमा ॥ प्राजापत्यंपवित्रं ॥ शतोद्यामꣳहिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातु ॥ सोमःस्वस्त्यावरुणः समीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा ॥ जातवेदामोर्जयंत्यापुनातु ॥६॥ इतिमंत्रेणयज्ञोपवीतंमार्जयेत् ॥ ॐ भूरग्निंचपृथिवींचमांच ॥ त्रीꣳश्चलोकान्त्संवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वद्ध्रुवासींद ॥ भुवोवायुंचांतरिक्षंचमांच ॥ त्रीꣳश्चलोकान्त्संवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वद्ध्रुवासींद ॥ स्वरादित्यंचदिवंचमांच ॥ त्रीꣳश्चलोन्त्संवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वद्ध्रुवासींद ॥ भूर्भुवःसुवश्चंद्रमसंचदिशश्चमांच ॥ त्रीꣳश्चलोकान्त्संवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वद्ध्रुवासींद ॥ ॐ कारंप्रथमतंतौन्यसामि ॥ अग्निंद्वितीयतंतौन्यसामि ॥ नागांस्तृतीयतंतौन्यसामि ॥ सोमंचतुर्थतंतौन्यसामि ॥ पितॄन्पंचमतंतौन्यसामि ॥ प्रजापतिंषष्ठतंतौन्यसामि ॥ वायुंसप्तमतंतौन्यसामि ॥ सूर्यंअष्टमतंतौन्यसामि ॥ विश्वान्देवान्नवमतंतौन्यसामि ॥ गायत्रींप्रत्येकंदशवारंजप्त्वाअभिमंत्र्य ॥ अद्यपूर्वोच्च० प्राप्त्यर्थंश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतधारणमहंकरिष्ये ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो हस्ताभ्यामाददे ॥ यज्ञोपवीतंगृहीत्वा ॥ ॐ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उदुत्यं जातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्च ॥ त्रिस्ताडयेत् ॥ सूर्यायदर्शयित्वा ॥ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयु

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १ ॥ उत्सृष्टावैवेदाः ॥ त्र्यहमेकाहंवानध्यायःकार्यः ॥ ॐ इमंमेवरुणश्रुधीहवंमद्याचमृडय ॥ त्वामवस्युराचकेस्वाहा ॥ वरुणायेदंनमम ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः स्वाहा ॥ वरुणायेदंनमम ॥ ॐत्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ अग्नीवरुणाभ्यामिदंनमम ॥ ॐ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधिस्वाहा ॥ अग्नीवरुणाभ्यामिदंनमम ॥ ॐ त्वमग्नेअयास्ययासन्मनसाहितः ॥ अयासन्हव्यमूहिषेयानोधेहिभेषजꣳस्वाहा ॥ अयसेग्नयइदंनमम ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणाꣳस्वाहा ॥ प्रजापतयइदं ॥ चित्तंचस्वाहा ॥ चित्तायेदं ॥ चित्तिश्चस्वाहा ॥ चित्तयइदं ॥ आकूतंचस्वाहा ॥ आकूतायेदं ॥ आकूतिश्चस्वाहा ॥ आकूत्याइदं ॥ विज्ञातंचस्वाहा ॥ विज्ञातायेदं ॥ विज्ञानंचस्वाहा ॥ विज्ञानायेदं ॥ मनश्चस्वाहा ॥ मनसइदं ॥ शक्करीश्चस्वाहा ॥ शक्करीभ्यइदं ॥ दर्शश्चस्वाहा ॥ दर्शायेदं ॥ पूर्णमासश्चस्वाहा ॥ पूर्णमासायेदं ॥ बृहच्चस्वाहा ॥ बृहतइदं ॥ रथंतरंचस्वाहा ॥ रथंतरायेदं ॥ ॐप्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाज्यैषुतस्मैविशःसमनमंतसर्वाःसउग्रःसहिहव्योबभूवस्वाहा ॥ प्रजापतयइदं ॥ ॐअग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याꣳस्वाहा ॥ अग्नयेभूतानामधिपतयइदं ॥ ॐइंद्रोज्येष्ठानामधिपतिःसमावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याꣳस्वाहा ॥ इंद्रायज्येष्ठानामधिपतयइदं ॥ ॐयमःपृथिव्याधिपतिःसमावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याꣳस्वाहा ॥ यमायपृथिव्याअधिपतयइ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दं ॥ ॐ वायुरंतरिक्षस्याधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ वायवेंतरिक्षस्याधिपतयइदं ॥ ॐ सूर्योदिवोधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ सूर्यायदिवोधिपतयइदं ॥ ॐ चंद्रमानक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ चंद्रमसेनक्षत्राणामधिपतयइदं ॥ ॐ बृहस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ बृहस्पतयेब्रह्मणोधिपतयइदं ॥ ॐ मित्रः सत्यानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ मित्रायसत्यानामधिपतयइदं ॥ ॐ वरुणोपामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ ॐ वरुणायापामधिपतयइदं ॥ समुद्रः स्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ समुद्रायस्रोत्यानामधिपतयइदं ॥ ॐ अन्नꣳसाम्राज्यानामधिपतिस्तन्मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ अन्नायसाम्राज्यानामधिपतयइदं ॥ ॐ सोम ओषधीनामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ सोमायओषधीनामधिपतयइदं ॥ ॐ सविताप्रसवानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ सवित्रेप्रसवानामधिप० ॥ ॐ रुद्रः पशूनामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ रुद्रायपशूनामधिपत० ॥ उदकस्पर्शः ॥

॥ ८४ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णामधिपतयइदं ॥ ॐविष्णुःपर्वतानामाधिपतिःसमावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्या
ऽस्वाहा ॥ विष्णवेपर्वतानामधिपतयइदं ॥ मरुतोगणानामाधिपतयस्तेमावंत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायाम
स्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ मरुद्भ्योगणानामधिपतिभ्यइदं ॥ प्राचीनावीती ॥ पितरःपितामहाःपरेवरेततास्ततामहाइह
मावत ॥ अस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याऽस्वाहा ॥ पितृभ्यःपितामहेभ्यःपरेभ्यो
वरेभ्यइदं ॥ यज्ञोपवीती ॥ उदकस्पर्शः ॥ ऋतुषाडृतधामाग्निर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ अग्नयेगंधर्वायेदं ॥ तस्यौ
षधयोप्सरसऊर्जोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ ओषधीभ्योप्सरोभ्यइदं ॥ सऽहितोविश्वसामासूर्योगंधर्वःसइदंब्रह्म
क्षत्रंपातुतस्मैस्वाहा ॥ सूर्यायगंधर्वायेदं ॥ तस्यमरीचयोप्सरसआयुवोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ मरीचिभ्योप्सरो
भ्यइदं ॥ सुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ चंद्रमसेगंधर्वायेदं ॥ तस्यनक्षत्राण्यप्सरसोबेकुर्योना
मताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ नक्षत्रेभ्योप्सरोभ्यइदं ॥ भुज्युःसुपर्णोयज्ञोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ यज्ञाय
गंधर्वायेदं ॥ तस्यदक्षिणाअप्सरसःस्तवानामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ दक्षिणाभ्योप्सरोभ्यइदं ॥ प्रजापतिर्विश्वकर्मा
मनोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ मनसेगंधर्वायेदं ॥ तस्यर्क्सामान्यप्सरसोवह्ययोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वा
हा ॥ ऋक्सामभ्योप्सरोभ्यइदं ॥ इषिरोविश्वव्यचावातोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ वायवेगंधर्वायेदं ॥ तस्यापो
प्सरसोमुदानामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ अद्भ्योप्सरोभ्यइदं ॥ भुवनस्यपतेयस्यतउपरिगृहाइहच ॥ सनोरास्वाज्यानिऽ
रायस्पोषऽसुवीर्यऽसंवत्सरीणाऽस्वस्तिऽस्वाहा ॥ भुवनस्यपत्यइदं ॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मृत्यवेगंधर्वायेदं ॥ तस्यविश्वमप्सरसोभुवोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ विश्वस्माअप्सरोभ्यइदं ॥ सुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्योगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ पर्जन्यायगंधर्वायेदं ॥ तस्यविद्युतोप्सरसोरुचोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ विद्युद्भ्योप्सरोभ्यइदं ॥ दूरेहेतिरमृडयोमृत्युर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ अमृडयायमृत्यवेगंधर्वायेदं ॥ तस्यप्रजाअप्सरसोभीरुवोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ प्रजाभ्योप्सरोभ्यइदं ॥ चारुःकृपणकाशीकामोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ कामायगंधर्वायेदं ॥ तस्याधयोप्सरसःशोचयंतीर्नामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ आधिभ्योप्सरोभ्यइदं ॥ सनोभुवनस्यपतेयस्यतउपरिगृहाइहचं ॥ उरुब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छस्वाहा ॥ सनोभुवनस्यपत्यइदं ॥ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वꣳस्विष्टꣳसुहुतंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वहुतआहुतीनांकामानाꣳसमर्धयित्रेस्वाहा ॥ अग्नयेस्विष्टकृतइदं ॥ अथत्रिवृदन्नहोमः ॥ ॐ अग्नयेस्वा० अग्नयइदं १ सोमायस्वा० सोमायेदं २ अग्नयेन्नादायस्वा० अग्नयेन्नादायेदं० ३ अग्नयेन्नपतयेस्वा० अग्नयेन्नपतयइदं ४ प्रजापतयेस्वा० प्रजापतयइ० ५ विश्वेभ्योदेवेभ्यःस्वा० विश्वेभ्योदेवेभ्य० ६ सर्वाभ्योदेवताभ्यःस्वा० सर्वाभ्योदेवताभ्यइदं ७ अग्नयेस्विष्टकृतेस्वा० अग्नयेस्विष्टकृतइ० ८ अग्नेरुत्तरतोदर्भानास्तीर्यहविःशेषेणबलिंकरोति ॥ वास्तुपतयेस्वा० वास्तुपतयइदं ९ तूष्णींमंतेपरिषेकः ॥ त्रिवृदन्नहोमाख्यस्यकर्मणः पुण्याहंभवंतोब्रु० स्वस्ति० ऋद्धिं० पुण्याहवाचनफलसमृद्धिरस्त्वितिभवंतोब्रुवंतु ॥ शुल्बप्रहरणं ॥ रुद्रायपशुपतयेस्वाहा ॥ रुद्रायपशुपतयइदं ॥ उदकस्पर्शः ॥ परिध्यंजनं मध्यमं दक्षिणं उत्तरं

CC-0. Panini Kanya Maha Vidyalaya Collection. Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation. Developed eGangotri

च ॥ परिसमूहनं ॥ यथाहतद्वसवइतिपूर्ववत्परिषेकः ॥ यथाहतद्वसवोगायत्रीचित्पदेषिताममुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुं
चाव्यꣳहःप्रातार्यग्नेप्रतरान्नआयुः ॥ बर्हिभ्यःपरिस्तरणेभ्यश्चकानिचित्तृणान्यादायदर्व्यामग्राण्यनक्ति ॥ अग्राणिदर्व्यांमध्या
निमूलानिचाज्यस्थाल्यां ॥ अग्राणिदर्व्यांमध्यानिमूलानिचाज्यस्थाल्यां ॥ मूलानिमध्यानिचाज्यस्थाल्यांअग्राणिदर्व्यां ॥
एकंतृणमवशिष्यसर्वंप्रहृत्य ॥ सर्पेभ्यःस्वाहा ॥ सर्पेभ्यइदं ॥ एतदेतदेतत् ॥ घ्राणं चक्षुः पृथिवीं अपउपस्पृश्यपरिधी
न्प्रहरति मध्यमंमध्येकरोति सहेतरौप्रहरति ॥ अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथा
तथꣳस्वाहा ॥ अग्नयइदं ॥ पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा ॥ अग्नयइदं ॥
यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः ॥ अग्निष्टद्धोताक्रतुविद्विजाननयजिष्ठोदेवाꣳऋतुशोयजातिस्वाहा ॥ अग्नय
इदं ॥ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा ॥
अग्नीवरुणाभ्यामिदं ॥ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधि
स्वाहा ॥ अग्नीवरुणाभ्यामिदं ॥ यतइंद्रभयामहेततोनोअभयंकृधि ॥ मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहिस्वा
हा ॥ इंद्रायेदं ॥ स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरःस्वाहा ॥ अभयंकरायेदं ॥ त्र्यंबकं
यजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा ॥ त्र्यंबकायेदं ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥
समूढमस्यपाꣳसुरेस्वाहा ॥ विष्णवइदं ॥ ॐ भूःस्वाहा ॥ अग्नयइदं ॥ ॐ भुवःस्वाहा ॥ वायवइदं ॥ ॐ सुवःस्वाहा ॥ सूर्या
येदं ॥ ॐ महःस्वाहा ॥ बृहस्पतयइदं ॥ ॐ जनःस्वाहा ॥ वरुणायेदं ॥ ॐ तपःस्वाहा ॥ इंद्रायेदं ॥ ॐ सत्यꣳस्वाहा ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्ठस्व ॥ यज्ञस्यर्धिमनुसंतिष्ठस्व ॥ उपतेयज्ञनमः ॥ उपतनमः ॥ उपतनमः ॥ अग्नयनमः ॥ गंधाद्युपचारैःपूजयेत् ॥ अग्ने नयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम ॥ अग्नयेनमःमंत्रपुष्पं समर्पयामि ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन ॥ प्रमादात्कुर्व तांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै ॥ यानि तेषामशेषाणांकृष्णानुस्मरणंपरं ॥ अनेनमयाकृतेनदेशकालाद्यनुसारतःवेदोत्सर्जनहवनेनश्रीभगवान्परमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ इतिवेदोत्सर्जनं ॥ ॥

॥ ५६ ॥ अथवेदोपाकर्म ॥

आचम्यप्राणानायम्यदेशकालावुत्कीर्त्यममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंअधीतानांछंदसांअध्येष्यमाणानांस्थानोच्छा सादिजनितयातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैःसहवेदोपाकरणाख्यंकर्मकरिष्ये ॥ तदंगंगणपति पूजनंस्थंडिलादिसकलंकर्मकरिष्ये ॥ गणपतिपूजनंकृत्वास्थंडिलंगोमयेनोपलिप्येत्यादिसर्वंउत्सर्जनवत् ॥ त्रिवृदन्नंनास्ति ॥ वेदो त्सर्जनशब्दस्थानेवेदोपाकरणइत्यूहः ॥ अनेनवेदोपाकरणहवनेनपरमेश्वरःप्रीयतां ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्ति ब्राह्मणान्भोजयिष्ये ॥ तेभ्योदक्षिणांदातुमहमुत्सृजे ॥ तेनश्रीपरमेश्वरःप्रीयतां ॥ ॥ हरिःॐम् ॥ इषेत्वोर्जेत्वावायवस्थो पायवस्थदेवोवःसवितात्प्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्नियादेवभागमूर्जस्वतीःपयस्वतीःप्रजावतीरनमीवाअयक्ष्मावः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विश्वेभ्योदेवेभ्यइदं ॥ अस्मिन्कर्मणिकेशकीटकपतंगपिपीलिकामक्षिकाद्युपघातदोषपरिहारार्थंद्वेमिंदाहुतीहोष्यामि ॥ ॐ यन्म आत्मनोमिंदाभूद्ग्निस्तत्पुनराहार्जातवेदाविर्चर्षणिःस्वाहा ॥ मिंदवतेन्नयइदं ॥ पुनरग्निश्चक्षुरदात्पुनरिंद्रोबृहस्पतिः ॥ पुनर्मे अश्विनायुवंचक्षुराधत्तमक्ष्योःस्वाहा ॥ मिंदवतेन्नयइदं ॥ अस्मिन्कर्मणिस्वराक्षरपदवर्णभ्रेषन्यूनातिरिक्तदोषपरिहारार्थंआभि र्गीर्भिरित्याज्याहुतिंहोष्यामि ॥ आभिर्गीर्भिर्यदतोनऊनमाप्यायंयहरिवोवर्धमानः ॥ यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभा जोअधतेस्याम्स्वाहा ॥ इंद्रायहरिवतइदं ॥ सांगतासिद्ध्यर्थंसर्वप्रायश्चित्तंकरिष्ये ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं ॥ वसु भ्योरुद्रेभ्यंआदित्येभ्यःस्वाहा ॥ वसुभ्योरुद्रेभ्यआदित्येभ्यःसꣳस्रावभाग्भ्यइदं ॥ बर्हिंषिपूर्णपात्रंनिनयेत् ॥ सदसिसन्मेभू याःसर्वंमसिसर्वंमेभूयाःपूर्णमसिपूर्णंमेभूयाअक्षितमसिमामेक्षेष्ठाः प्राच्यांदिशिदेवाक्रत्विजोमार्जयंतां ॥ दक्षिणायांदिशिमासाः पितरोमार्जयंतां ॥ प्रतीच्यांदिशिगृहाःपशवोमार्जयंतां ॥ उदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतां ॥ ऊर्ध्वायांदिशियज्ञः संवत्सरोयज्ञपतिर्मार्जयतां ॥ समुद्रंवःप्राहिणोम्यक्षिताःस्वांयोनिमापिगच्छत ॥ अच्छिद्रःप्रजयाभूयासंमापरासेचिमत्पयः ॥ यद्प्सुतेसरस्वतिगोष्वश्वेषुयन्मधु ॥ तेनमेवाजिनीवतिमुखंमड्धिसरस्वति ॥ मुखंविमृष्टे ॥ कृतस्यउत्सर्जनहवनाख्यस्यकर्म णःसांगतासिद्ध्यर्थंब्रह्मणेपूर्णपात्रप्रतिनिधिभूतांदक्षिणांदातुमहमुत्सृजे ॥ ब्रह्माणंविसर्जयामि ॥ परिस्तरणान्युत्तरेविसृजेत् ॥ अदितेन्वमꣳस्थाः ॥ अनुमतेन्वमꣳस्थाः ॥ सरस्वतेन्वमꣳस्थाः ॥ देवसवितःप्रासावीः ॥ इतिपूर्ववत्परिषिच्य ॥ उपतिष्ठते ॥ यज्ञनमस्तेयज्ञ ॥ नमोनमश्चतेयज्ञ ॥ शिवेनमेसंतिष्ठस्व ॥ सुभूतेनमेसंतिष्ठस्व ॥ ब्रह्मवर्चसेनमेसंति

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्ठस्व ॥ यज्ञस्यर्धिमनुसंतिष्ठस्व ॥ उपतेयज्ञनमः ॥ उपतनमः ॥ उपतनमः ॥ अग्नयनमः ॥ गंधाद्युपचारैःपूजयेत् ॥ अग्ने नयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम ॥ अग्नयेनमःमंत्रपुष्पं समर्पयामि ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन ॥ प्रमादात्कुर्व तांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै ॥ यानि तेषामशेषाणांकृष्णानुस्मरणंपरं ॥ अनेनमयाकृतेनदेशकालाद्यनुसारतःवेदोत्सर्जनहवनेनश्रीभगवान्परमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ इतिवेदोत्सर्जनं ॥ ॥

॥ ५६ ॥ अथवेदोपाकर्म ॥

आचम्यप्राणानायम्यदेशकालावुत्कीर्त्यममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंअधीतानांछंदसांअध्येष्यमाणानांस्थानोच्छा सादिजनितयातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैःसहवेदोपाकरणाख्यंकर्मकरिष्ये ॥ तदंगंगणपति पूजनंस्थंडिलादिसकलंकर्मकरिष्ये ॥ गणपतिपूजनंकृत्वास्थंडिलंगोमयेनोपलिप्येत्यादिसर्वंउत्सर्जनवत् ॥ त्रिवृदन्ननास्ति ॥ वेदो त्सर्जनशब्दस्थानेवेदोपाकरणइत्यूहः ॥ अनेनवेदोपाकरणहवनेनपरमेश्वरःप्रीयतां ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्ति ब्राह्मणान्भोजयिष्ये ॥ तेभ्योदक्षिणांदातुमहमुत्सृजे ॥ तेनश्रीपरमेश्वरःप्रीयतां ॥ ॥ हरिःॐम् ॥ इषेत्वोर्जेत्वावायवस्थो पायवस्थदेवोवःसवितात्प्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्नियादेवभागमूर्जस्वतीःपयस्वतीःप्रजावतीरनमीवाअयक्ष्मामाव

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तेनईशतमाघशꣳसोरुद्रस्यहेतिःपरिवोवृणक्तुध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ इषेत्रिचत्वारिꣳशत् ॥
॥ १ ॥ यज्ञस्यघोषदसिप्रत्युष्टꣳरक्षःप्रत्युष्टाअरातयःप्रेयमगाद्धिषणाबर्हिरच्छमनुनाकृतास्वधयावितष्टातआवहंतिकवयःपुर
स्ताद्देवेभ्योजुष्टमिहबर्हिरासदेदेवानांपरिषूतमसिवर्षवृद्धमसिदेवबर्हिर्मात्वान्वङ्मातिर्यक्पर्वतेराध्यासमाच्छेत्तातेमारिषंदेवब
र्हिःशतवल्शंविरोहसहस्रवल्शा ॥ १ ॥ विवयꣳरुहेमपृथिव्याःसंपृचःपाहिसुसंभृतात्वासंभराम्यदित्यैरास्नासींद्राण्यैसंनहनं
पूषातेग्रंथिंग्रथ्नातुसतेमास्थादिंद्रस्यत्वाबाहुभ्यामुद्यच्छेबृहस्पतेर्मूर्ध्नाहराम्युर्वंतरिक्षमन्विहिदेवंगममसि ॥ २ ॥ सहस्रवल्शाअ
ष्टात्रिꣳशच्च ॥ २ ॥ शुंधध्वंदैव्यायकर्मणेदेवयज्यायैमातरिश्वनोघर्मोसिद्यौरसिपृथिव्यसिविश्वधायाअसिपरमेणधाम्नादृꣳहस्व
माह्वार्वसूनांपवित्रमसिशतधारंवसूनांपवित्रमसिसहस्रधारꣳहुतस्तोकोहुतोद्रप्सोग्नयेबृहतेनाकायस्वाहाद्यावापृथिवीभ्याꣳसावि
श्वायुःसाविश्वव्यचाःसाविश्वकर्मासंपृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमामंद्राधनस्यसातयेसोमेनत्वातनच्मींद्रायदधिविष्णोहव्य
ꣳरक्षस्व ॥ १ ॥ सोमेनाष्टौच ॥ ॥ ॐ आपउंदंतुजीवसेदीर्घायुत्वायवर्चसओषधेत्रायस्वैनꣳस्वधितेमैनꣳहिꣳसीर्देवश्रूरेतानि
प्रवपेस्वस्त्युत्तराण्यशीयापोअस्मान्मातरःशुंधंतुघृतेननोघृतपुवः पुनंतुविश्वमस्मत्प्रवहंतुरिप्रमुदाभ्यःशुचिरापूतएमिसोमस्यतनू
रसितनुवंमेपाहिमहीनांपयोसिवर्चोधाअसिवर्चः ॥ १ ॥ मयिधेहिवृत्रस्यकनीनिकासिचक्षुष्पाअसिचक्षुर्मेपाहिचित्पतिस्त्वापुना
तुवाक्पतिस्त्वापुनातुदेवस्त्वासवितापुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिस्तस्यतेपवित्रपतेपवित्रेणयस्मैकंपुनेतच्छकेय
मावोदेवासईमहेसत्यधर्माणोअध्वरेयद्वोदेवासआगुरेयज्ञियासोहवामहइंद्रासीद्यावापृथिवीआपओषधीस्त्वंदीक्षाणामधिपतिर

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

सीहमासंतंपाहि ॥ २ ॥ वर्चओषधीरष्टौच ॥ १ ॥ ॥ हरिः ॐ ॥ युजानःप्रथममनस्तत्वायसविताधियः ॥ अग्निंज्योतिर्निचाय्यंपृथिव्याअध्याभरत् ॥ युक्त्वायमनसोद्वान्त्सुवर्यतोधियादिवं ॥ बृहज्ज्योतिःकरिष्यतःसविताप्रसुवातितान् ॥ युक्तेनमनसावयंदेवस्यसवितुःसवे ॥ सुवर्गेयायशक्त्यै ॥ युंजतेमनउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकइत् ॥ १ ॥ महीदेवस्यसवितुःपरिष्टुतिः ॥ युजेवांब्रह्मपूर्व्यनमोभिर्विश्लोकायंतिपथ्येवसूराः ॥ शृण्वंतिविश्वेअमृतस्यपुत्राआयेधामानिदिव्यानितस्थुः ॥ यस्यप्रयाणमन्वन्यइद्ययुर्देवादेवस्यमहिमानमर्चतः ॥ यःपार्थिवानिविममेसएतशोरजाꣳसिदेवःसवितामहित्वना ॥ देवसवितःप्रसुवयज्ञंप्रसुव ॥ २ ॥ यज्ञपतिंभगायदिव्योगंधर्वः ॥ केतपूःकेतंनःपुनातुवाचस्पतिर्वाचंमद्यस्वदातिनः ॥ इमंनोदेवसवितर्यज्ञंप्रसुवदेवायुवꣳसखिविदꣳसत्राजितंधनजितꣳसुवर्जितं ॥ ऋचास्तोमꣳसमर्धयगायत्रेणरथंतरं ॥ बृहद्गायत्रवर्तनि ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांगायत्रेणछंदसाददेगिरस्वदाभ्रेरसिनारिः ॥ ३ ॥ असिपृथिव्याःसधस्थादग्निंपुरीष्यमंगिरस्वदाभरत्रैष्टुभेनत्वाछंदसाददेगिरस्वद्बभ्रेरसिनारिरसित्वयावयꣳसधस्थआग्निꣳशकेमखनितुंपुरीष्यंजागतेनत्वाछंदसाददेगिरस्वद्धस्तआधायसविताबिभ्रदाभ्रेꣳहिरण्ययीं ॥ तयाज्योतिरजस्रमिदाग्निंखात्वीनआभरानुष्टुभेनत्वाछंदसाददेगिरस्वत् ॥ ४ ॥ इद्यज्ञंप्रसुवनारिरानुष्टुभेनत्वाछंदसात्रीणिच ॥१॥ ॐ ॥ अनुमत्यैपुरोडाशमष्टाकपालंनिर्वपति ॥ येप्रत्यंचःशम्यायाअवशीयंते ॥ तंनैर्ऋतमेकंकपालं ॥ इयंवाअनुमतिः ॥ इयंनिर्ऋतिः ॥ नैर्ऋतेनपूर्वेणप्रचरति ॥ पाप्मानमेवनिर्ऋतिंपूर्वीनिरवदयते ॥ एककपालोभवति ॥ एकधैवनिर्ऋतिंनिरवदयते ॥ यदहुत्वागार्हपत्यईयुः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १ ॥ रुद्रोभूत्वाग्निरनूत्थाय ॥ अध्वर्युंचयजमानंचहन्यात् ॥ वीहिस्वाहाहुतिंजुषाणइत्याह ॥ आहुत्यैवैनꣳशमयति ॥ नार्तिं मार्छत्यर्ध्वयुर्नयजमानः ॥ एकोल्मुकेनयंति ॥ तद्धिनिर्ऋत्यैभागधेयं ॥ इमांदिशंयंति ॥ एषावैनिर्ऋत्यैदिक् ॥ स्वायामेवदिशिनिर्ऋतिंनिरवदयते ॥ २ ॥ स्वकृतइरिणेजुहोतिप्रद्रेवा ॥ एतद्वैनिर्ऋत्याआयतनं ॥ स्वएवायतनेनिर्ऋतिंनिरवदयते ॥ एषतेनिर्ऋतेभागइत्याह ॥ निर्दिशत्यैवैनां ॥ भूतेहविष्मत्यसीत्याह ॥ भूतिमेवोपावर्तते ॥ मुंचेममꣳहसइत्याह ॥ अꣳहसएवैनं मुंचति ॥ अंगुष्ठाभ्यांजुहोति ॥३॥ अंततएवनिर्ऋतिंनिरवदयते ॥ कृष्णंवासःकृष्णतूषंदक्षिणा ॥ एतद्वैनिर्ऋत्यैरूपं ॥ रूपेणैव निर्ऋतिंनिरवदयते ॥ अप्रतीक्षमायंति ॥ निर्ऋत्याअंतर्हित्यै ॥ स्वाहानमोयइदंचकारेतिपुनरेत्यगार्हपत्येजुहोति ॥ आहुत्यैवनमस्यंतोगार्हपत्यमुपावर्तते ॥ आनुमतेनप्रचरति ॥ इयंवाअनुमतिः ॥४॥ इयमेवास्मैराज्यमनुमन्यते ॥ धेनुर्दक्षिणा ॥ इमामेवधेनुंकुरुते ॥ आदित्यंचरुंनिर्वपति ॥ उभयींष्वेवप्रजास्वभिषिच्यते ॥ दैवीषुचमानुषीषुच ॥ वरोदक्षिणावरोहिराज्यꣳसमृद्ध्यै ॥ आग्नावैष्णवमेकादशकपालंनिर्वपति ॥ अग्निःसर्वादेवताः ॥५॥ विष्णुर्यज्ञः ॥ देवताश्चैवयज्ञंचावरुंधे ॥ वामनोवहीदक्षिणा ॥ यद्वही ॥ तेनाग्नेयः ॥ यद्वामनः ॥ तेनवैष्णवःसमृद्ध्यै ॥ अग्नीषोमीयमेकादशकपालंनिर्वपति ॥ अग्नीषोमाभ्यांवाइंद्रोवृत्रमहन्निति ॥ यदग्नीषोमीयमेकादशकपालंनिर्वपति ॥ ६ ॥ वार्त्रघ्नमेवविजित्यै ॥ हिरण्यंदक्षिणासमृद्ध्यै ॥ इंद्रोवृत्रꣳहत्वा ॥ देवताभिश्चेंद्रियेणचव्यार्ध्यत ॥ सएतमैंद्राग्नमेकादशकपालमपश्यत् ॥ तंनिरपवत् ॥ तेनवैसदेवताश्चेंद्रियंचावारुंध ॥ यदैंद्राग्नमेकादशकपालंनिर्वपति ॥ देवताश्चैवतेनेंद्रियंचयजमानोरुंधे ॥ वामनोवहीदक्षिणा ॥ ७ ॥ यद्वही ॥ तेनाग्नेयः ॥ यद्

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षभः ॥ तेनैंद्रःसमृद्ध्यै ॥ आग्नेयमष्टाकपालंनिर्वपति ॥ ऐंद्रंदधि ॥ यदाग्नेयोभवति ॥ अग्निर्वैयज्ञमुखं ॥ यज्ञमुखमेवाद्धिपुरस्ताद्धत्ते ॥ यदैंद्रंदधि ॥ ८ ॥ इंद्रियमेवावरुंधे ॥ ऋषभोवहीदक्षिणा ॥ यद्वही ॥ तेनाग्नेयः ॥ यदृषभः ॥ तेनैंद्रःसमृद्ध्यै ॥ यावतीर्वैंप्रजाओषधीनामहुतानामाश्नन् ॥ ताःपराभवन् ॥ आग्रयणंभवतिहुताद्यायै ॥ यजमानस्यापराभावाय ॥ ९ ॥ देवा वाओषधीष्वाजिमयुः ॥ ताइंद्राग्नीउदजयतां ॥ तावैतमैंद्राग्नंद्वादशकपालंनिरवृणातां ॥ यदैंद्राग्नोभवत्युज्जित्यै ॥ द्वादशकपालोभवति ॥ द्वादशमासाःसंवत्सरः ॥ संवत्सरेणैवास्माअन्नमवरुंधे ॥ वैश्वदेवश्चरुर्भवति ॥ वैश्वदेवंवाअन्नं ॥ अन्नमेवास्मैस्वदयति ॥ १० ॥ प्रथमजोवत्सोदक्षिणासमृद्ध्यै ॥ सौम्यर्श्यामाकंचरुंनिर्वपति ॥ सोमोवाअकृष्टपच्यस्यराजा ॥ अकृष्टपच्यमेवास्मैस्वदयति ॥ वासोदक्षिणा ॥ सौम्यर्श्हिदेवतयावासःसमृद्ध्यै ॥ सरस्वत्यैचरुंनिर्वपति ॥ सरस्वतेचरुं ॥ मिथुनमेवावरुंधे ॥ मिथुनौगावौदक्षिणासमृद्ध्यै ॥ एतिवाएषयज्ञमुखादध्याः ॥ योग्नेर्देवतायाएति ॥ अष्टावेतानिहुवीर्षिभवंति ॥ अष्टाक्षरागायत्री ॥ गायत्रोग्निः ॥ तेनैवयज्ञमुखादध्याअग्नेर्देवतायैनैति ॥ ११ ॥ ॥ ॐम् ॥ सहवैदेवानांचासुराणांचयज्ञौप्रतातावास्तांवयर्श्स्वर्गलोकमैष्यामोवयमैष्यामइतितेसुराःसंनह्यसहसैवाचरन्ब्रह्मचर्यंणतपसैवदेवास्तेसुराअमुह्यर्श्स्तेनप्राजानर्श्स्तेपराभवन्तेनस्वर्गलोकमायन्प्रसृतेनवैयज्ञेनदेवाःस्वर्गलोकमायन्नप्रसृतेनासुरान्पराभावयन्प्रसृतौहवैयज्ञोपवीतिनोयज्ञोप्रसृतोनुपवीतिनोयत्किंचब्राह्मणोयज्ञोपवीत्यधीतेयजतएवतत्तस्माद्यज्ञोपवीत्येवाधीयीतयाजयेद्यजेतवायज्ञस्यप्रसृत्याअजिनंवासोवादक्षिणतउपवीयदक्षिणंबाहुमुद्धरतेवधत्तेसव्यमितियज्ञोपवीतमेतदेवविपरीतंप्राचीनावीतर्श्संवीतंमानुषं ॥१॥ गच्छगच्छेतिवि०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ऋषिमंडलम् ॥

अगस्त्याः १

ब्रह्मणे. १
प्रजाप. २
ब्रह्मस्पत. ३
अथर्वे. ४
वायवे. ५
सूर्याय. ६
चंद्रमं. ७
नक्षत्रे. ८
इंद्रायरा. ९
यमायरा. १०
वरुणाय. ११
सोमायरा. १२
वैश्वानराय. १३
बसुभ्यः १४
रुद्रेभ्यः १५
आदित्ये. १६
विश्वेभ्यो. १७
साध्ये. १८
ऋभुभ्यः १९
मरुद्भ्यः २१
अथर्वे. २२
अंगिरा. २३

कश्यपा. ७
अरुंधत्यै. ८
वसिष्ठाय. ६
अत्रये. ५
गौतमा. ४
भरद्वा. ३
जमद. २
विश्वामि. १

इतिहास. ५२
अथर्ववे. ५१
सामवे. ५०
यजुर्वे. ४९
ऋग्वेदा. ४८
सावित्र्यै. ४७
सवित्रे. ४६
मृत्यवे. ४५
धात्रे. ४४
धर्त्रे. ४३
कर्त्रे. ४२
त्वष्ट्रे. ४१
इंद्राय. ४०

वसिष्ठाय. ३९
क्रोधाय. ३८
कामाय. ३७
अर्थाय. ३६
धर्माय. ३५
ज्वराय. ३४
काशीश्वराय. ३३
स्कंदाय. ३२
रुद्राय. ३१
विष्णवे. ३०
पराशरा. २९
शिबिंता. २८
त्रिधातवे. २७

त्रिवर्षा. २६
त्र्यरुणा. २५
बभ्रवे. २४
धनंजया. २३
कृतंजया. २२
ऋतंजया. २१
ऋणंजया. २०
गोतमाय. १९
उदमयाय. १८
हर्यज्वाय. १७
वाजिरत्ना. १६
वामदेवा. १५
बृहदुक्था. १४

सत्ववते. १३
सोमशु. १२
सुतश्र. ११
सुश्रव. १०
सत्यश्र. ९
वाजिश्र. ८
वाजिने. ७
वरूथि. ६
वर्मिणे. ५
तृणबिंदवे. ४
तरुक्षा. ३
जातूक. २
कृष्णद्वै. १

वैशंपायनाय. १
पलिंगवे. २
तित्तिराय. ३
उखाय. ४
आत्रेयाय. ५
कौंडिण्याय. ६
सूत्र. ७
सत्याषाढाय. ८
प्रवच. ९
आचा. १०
ऋषी. ११
वानप्र. १२
ऊर्ध्व. १३
एकप. १४

पित्रे. १
पिताम. २
प्रपिताम. ३
मात्रे. ४
पितामह्यै. ५
प्रपितामह्यै. ६
मातामहा. ७
मातुःपिता. ८
मातु.प्र. ९
मातामह्यै. १०
मातुःपि. ११
मातुःप्र. १२

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५७ ॥ अथपर्जन्यसूक्तप्रारंभः ॥

ॐ मारुतमसिमरुतामोजोपांधारांभिंधिरमर्यतमरुतश्येनमायिनंमनोजवसंवृषणश्सुवृक्तिं ॥ येनशर्धरुग्रमवसृष्टमेतिदश्विना परिधत्तश्स्वस्ति ॥ पुरोवातोवर्षञ्जिन्वरावृत्स्वाहावाताववृद्धर्षन्नुग्रावृत्स्वाहास्तनयन्वर्षन्भीमरावृत्स्वाहानशन्यवस्फूर्जदिद्युद्धर्षत्वे षरावृत्स्वाहातिरात्रंवर्षन्पूर्तिरावृत् ॥ १ ॥ स्वाहाबहुहायमवृषादितिश्रुतरावृत्स्वाहातपतिवर्षन्विराडावृत्स्वाहावस्फूर्जदिद्युद्ध र्षंभूतरावृत्स्वाहामांदावाशाःशुंध्यूरजिराः ॥ ज्योतिष्मतीस्तमस्वरीरुंदतीःसुफेनाः ॥ मित्रंभृतःक्षत्रंभृतःसुराष्ट्राइहमावत ॥ वृष्णोअश्वस्यसंदानमसिवृष्टयैत्वोपनह्यामि ॥ २ ॥ पूर्तिरावृद्विचत्वारिंशच्च ॥ देवावसव्याअग्नेसोमसूर्य ॥ देवाःशमर्ण्या मित्रावरुणार्यमन् ॥ देवाःसपीतयोपांनपादाशुहेमन् ॥ उद्गोदत्तोदधिंभिंतदिवःपर्जन्यादंतरिक्षात्पृथिव्यास्ततोनोवृष्ट्यावत ॥ दिवाचित्तमःकृण्वंतिपर्जन्येनोदवाहेन ॥ पृथिवींयद्व्युंदंति ॥ आयंनरःसुदानवोददाशुषेदिवःकोशमचुच्यवुः ॥ विपर्जन्याः सृजंतिरोदसीअनुधन्वनायंति ॥ १ ॥ वृष्टयः ॥ उदीरयथामरुतःसमुद्रतोयूयंवृष्टिंवर्षयथापुरीषिणः ॥ नवोदस्राउपदस्यंतिधेनवःशुभंयातामनुरथाअवृत्सथ ॥ सृजावृष्टिंदिवआद्भिःसमुद्रंपृण ॥ अजाअसिप्रथमजाबलमसिसमुद्रियं ॥ उन्नंभयपृथिवीं भिंधीददिव्यंनभः ॥ उद्गोदिव्यस्यनोदेहीशानोविसृजादतिं ॥ येदेवादिविभागायैतरिक्षभागायेपृथिविभागाः ॥ तइमंयज्ञमवं तुतइदंक्षेत्रमाविशंतुतइदंक्षेत्रमनुविविशंतु ॥ २ ॥ यंतिदेवाविश्श्रतिश्च ॥ मारुतमसिमरुतामोजइतिकृष्णंवासःकृष्णतूषंप रिधत्तएतद्वैवृष्टैरूपश्सरूपएवभत्वापूर्जन्यंवर्षयतिरमर्यतमरुतश्येनमायिनमितिपश्चाद्धातंप्रतिमीवतिपुरोवातमेवजनयतिवर्ष

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्यावरुध्यैवातनामानिजुहोतिवायुर्वैवृष्ट्याईशेवायुमेवस्वेनभागधेयेनोपधावतिसएवास्मैपर्जन्यंवर्षयत्यष्टौ ॥ १ ॥ जुहोतिचत
स्रोवैदिशश्चतस्रोवांतर्दिशादिग्भ्यएववृष्टिꣳसंप्रच्यावयतिकृष्णाजिनेसंयौतिहविरेवाकरंतर्वेदिसंयौत्यवरुध्यैयतीनामद्यमाना
नाꣳशीर्षाणिपरापतंतेखर्जूराअभवंतेषाꣳरसऊर्ध्वोपतत्तानिकरीराण्यभवन्त्सौम्यानिवैकरीराणिसौम्याखलुवाआहुतिर्दिवोवृष्टिं
च्यावयतियत्करीराणिभवंति ॥ २ ॥ सौम्ययैवाहुत्यादिवोवृष्टिमवरुंधेमधुषासंयौत्यपांवाएष ओषधीनाꣳरसोयन्मध्वद्भ्यए
वौषधीभ्योवर्षत्यथोअद्भ्यएवौषधीभ्योवृष्टिंनिनयतिमांदावाशाइतिसंयौतिनामधेयैरेवैनाअच्छैत्यथोयथाब्रूयादसावेहीत्येवमेवै
नानामधेयैरा ॥ ३ ॥ च्यावयतिवृष्णोअश्वस्यसंदानमसिवृष्ट्यैत्वोपनह्यामीत्याहवृषावाअश्वोवृषापर्जन्यःकृष्णइवखलुवैभूत्वा
वर्षतिरूपेणैवैनꣳसमर्धयतिवर्षस्यावरुध्यै ॥ ४ ॥ अष्टौभवंतिनामधेयैरेकान्नत्रिꣳशच्च ॥ देवावसव्यादेवाःशर्मण्यादेवाःसपीत
यइत्याबध्नातिदेवताभिरेवान्वहंवृष्टिमिच्छतियदिवर्षेत्तावत्येवहोतव्यंयदिनवर्षेच्छ्वोभूतेहविर्निर्वपेदहोरात्रेवैमित्रावरुणावहोरा
त्राभ्यांखलुवैपर्जन्योवर्षतिनक्तंवाहिदिवावावर्षतिमित्रावरुणावेवस्वेनभागधेयेनोपधावतितावेवास्मै ॥१॥ अहोरात्राभ्यांपर्जन्यं
वर्षयतोग्नयेधावच्छरेपुरोडाशमष्टाकपालंनिर्वपेन्मारुतꣳसप्तकपालꣳसौर्यमेककपालमग्निर्वाइतोवृष्टिमुदीरयतिमरुतःसृष्टांनयंति
यदाखलुवाअसावादित्योन्यङ्रश्मिभिःपर्यावर्ततेथवर्षतिधामच्छदिवखलुवैभूत्वावर्षत्येतावैदेवतावृष्ट्याईशतेताएवस्वेनभागधे
येनोपधावतिताः ॥ २ ॥ एवास्मैपर्जन्यंवर्षयंत्युतावर्षिष्यन्वर्षत्येवसृजावृष्टिंदिवआद्भिःसमुद्रंपृणेत्याहेमाश्चैवामूश्चापःसमर्द्धय
त्यथोआभिरेवामूरछैत्यब्जाअसिप्रथमजाबलमसि[illegible]भयपृथिवीमितिवर्षाह्वांजुहोत्येषावाओषधी

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नांवृष्टिवनिस्तयैववृष्टिमाच्यावयतियेदेवादिवभागाइतिकृष्णाजिनमवधूनातामेवास्मलोकाःप्रीताअभीष्टाभवंति ॥३॥ अस्मै धावतितावाएकविंशतिश्च ॥ ॥ इतिपर्जन्यसूक्तसहश्रावणीप्रयोगःसमाप्तः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ५८ ॥ शांतिपाठः ॥

श्रीः ॥ यस्यवाक्यंसकृषिर्यातेनोच्यतेसादेवतायदक्षरपरिमाणंतच्छंदःसर्वारिष्टशांत्यर्थशांतिसूक्तानांराक्षोघ्नसूक्तानांपठनेविनियोगः ॥ ॐ कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवाँइभेन ॥ तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षस्तपिष्ठैः ॥ तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः ॥ तपूंष्यग्नेजुह्वापतंगानसंदितोविसृजविष्वगुल्काः ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोअस्याअदब्धः ॥ योनोदूरेअघशंसोयोअंत्यग्नेमाकिंष्टेव्यथिरादधर्षीत् ॥ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँओषतात्तिग्महेते ॥ योनोअरातिंसमिधानचक्रेनीचातंधक्ष्यतसंनशुष्कं ॥ ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने ॥ अवस्थिरातनुहियातुजूनांजामिमजामिंप्रमृणीहिशत्रून् ॥ सतेजानातिसुमतिंयविष्ठयईवतेब्रह्मणेगातुमैरत् ॥ विश्वान्यस्मैसुदिनानिरायोद्युम्नान्यर्योविदुरोअभिद्यौत् ॥ सेदग्नेअस्तुसुभगःसुदानुर्यस्त्वानित्येनहविषायउक्थैः ॥ पिप्रीषतिस्वआयुषिदुरोणेविश्वेदस्मैसुदिनासासदिष्टिः ॥ अर्चीमितेसुमतिंघोष्यर्वाक्संतेवावाताजरतामियंगीः ॥ स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधारयेरनुद्यून् ॥ इहत्वाभूर्याचरेदुपत्मन्दोषावस्तर्दीदिवाँसमनुद्यून् ॥ क्रीडंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवाँसोजनानां ॥ यस्त्वास्वश्वःसुहिरण्योअग्नउपयातिवसुमतारथेन ॥ तस्यत्राताभवसितस्यसख्यस्तआतिथ्यमानुषग्जुजोषत् ॥ महोरुजामिंब्रधुतावचोभिस्तन्मापितुर्गोतमादन्वियाय ॥ त्वंनोअस्यवचसश्चिकिद्धिहोतर्यविष्ठसुक्रतोदमूनाः ॥ अस्वप्नजस्तरणयःसुशेवाअ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तँद्रासोवृकाअश्रमिष्ठाः ॥ तेपायवःसध्रियंचोनिषद्याग्नेतवंनःपांत्वमूर ॥ येपायवोमामतेयंतेअग्नेपश्यंतोअंधंदुरितादरक्षन् ॥ ररक्षतान्त्सुकृतोविश्ववेदादिप्संतइद्रिपवोनाहदेभुः ॥ त्वयावयꣳसधन्यस्त्वोतास्तवप्रणीत्यश्याम्वाजान् ॥ उभाशꣳसासूदय सत्यतातेनुष्टुयाकृणुह्यहयाण ॥ अयातेअग्नेसमिधाविधेमप्रतिस्तोमꣳशस्यमानंगृभाय ॥ दहाशसोरक्षसःपाह्यस्मान्द्रुहोनिदो मित्रमहोअवद्यात् ॥ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म ॥ शिशानोअग्निःक्रतुभिःसमिद्धःसनोदिवासीरषःपा तुनक्तं ॥ विज्योतिषाबृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा ॥ प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृंगेरक्षसेविनिक्षे ॥ उतस्वा नासोदिविषंत्वग्नेस्तिग्मायुधारक्षसेहंतवाउ ॥ महाꣳइंद्रोवज्रबाहुःषोडशीशर्मयच्छतु ॥ स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मा न्द्वेष्टि ॥ सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहन्छूरविद्वान् ॥ जहिशत्रूꣳरप मृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं ॥ हुवेनुशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः ॥ यतइंद्रभयामहेततोनोअभयंकृ धि ॥ मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥ स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनःस्वस्तिदाअभयं करः ॥ आभिर्गीभिर्यदतोनऊनमाप्यायायहरिवोवर्धमानः ॥ यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्याम ॥ येदेवाः पुरःसदोग्निनेत्रादक्षिणसदोयमनेत्राःपश्चात्सदःसवितृनेत्राउत्तरसदोवरुणनेत्राउपरिषदोबृहस्पतिनेत्रारक्षोहणस्तेनःपांतुतेनोवं तुतेभ्योनमस्तेभ्यःस्वाहासमूढꣳसक्षःसंदग्धꣳरक्षइदमहꣳरक्षोभिसंदहाम्यग्नयेरक्षोघ्नेस्वाहायमायसवित्रेवरुणायबृहस्पतयेदुर्व

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रक्षोयद्वस्तेतदक्षिणा ॥ पावमानेनत्वास्तोमेनगायत्रस्यवर्तन्योपाꣳशोर्वीर्येणदेवस्त्वासवितोत्सृजतुजीवातवेजीवनस्यायैबृहद्रथं तरयोस्त्वास्तोमेनत्रिष्टुभोवर्तन्याशुक्रस्यवीर्येणदेवस्त्वासवितोत्सृजतुजीवातवेजीवनस्यायाअग्नेस्त्वामात्रयाजगत्यैवर्तन्याग्रयण स्यवीर्येणदेवस्त्वासवितोत्सृजतुजीवातवेजीवनस्यायाइममग्नआयुषेवर्चसेकृधिप्रियꣳरेतोवरुणसोमराजन् ॥ मातेवास्माअदि तेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत् ॥ अग्निरायुष्मान्त्सवनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि सोमआयुष्मान्त्सओ षधीभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि यज्ञआयुष्मान्त्सदक्षिणाभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ब्रह्मायुष्मत्तद्ब्राह्मणैरा युष्मत्तेनत्वायुषायुष्मंतंकरोमि देवाआयुष्मंतस्तेमृतेनायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ॥ १ ॥ नाभापृथिव्याःसमिधानमग्निꣳ रायस्पोषायबृहतेहवामहे ॥ इरंमदंबृहदुक्थंयजत्रंजेतारमग्निंपृतनासुसासहिं ॥ याःसेनाअभित्वरीराव्याधिनीरुगणाउत ॥ येस्तेनायेचतस्करास्ताꣳस्तेअग्नेपिदधाम्यास्ये ॥ दꣳष्ट्राभ्यांमलिम्लून्जभ्यैस्तस्कराꣳउत ॥ हनूभ्याꣳस्तेनान्भगवस्ताꣳस्त्वं खादसुखादितान् ॥ येजनेषुमलिम्लुवस्तेनासस्तस्करावने ॥ येकक्षेष्वघायवस्ताꣳस्तेदधामिजंभयोः ॥ योअस्मभ्यमरातीयाद्यश्चनोद्वेषतेजनः ॥ निंदाद्योअस्मान्दिप्साच्चसर्वतमस्मसाकुरु ॥ सꣳशितंमेब्रह्मसꣳशितंवीर्यंबलं ॥ सꣳशितंक्षत्रंजिष्णुयस्याहमस्मिपुरोहितः ॥ उदेषांबाहूअतिरमुद्वर्चउदूबलं ॥ क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वाꣳअहं ॥ दृशानोरुक्मउर्व्याव्यद्यौदुर्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः ॥ विश्वारूपाणिप्रतिमुंचतेकविःप्रासावीद्भद्रंद्विपदेचतुष्पदे ॥ विनाकमख्यत्सवितावरेण्योनुप्रयाणमुषसोविराजति ॥ नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची ॥ द्यावाक्षामारुक्मोअंतर्विभातिदेवाअग्निंधारयन्द्रविणोदाः ॥ सुपर्णोसिगरुत्मान्त्रिवृत्तेशिरोगायत्रंचक्षुस्तोमआत्मासा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंतेतनूर्वामदेव्यंबृहद्रथंतरेपक्षौयज्ञायज्ञियंपुच्छंछंदाꣳस्यंगानिधिष्णियाःशफायजूꣳषिनाम ॥ सुपर्णोसिगरुत्मान्दिवंगच्छसुवः
पत ॥ याजाताओषधयोदेवेभ्यस्त्रियुगंपुरा ॥ मंदामिबभ्रूणामहꣳशतंधामानिसप्तच ॥ शतंवोअंबधामानिसहस्रमुतवोरुहः ॥
अथाशतक्रत्वोयूयमिमंमेअगदंकृत ॥ पुष्पावतीःप्रसूवतीःफलिनीरफलाउत ॥ अश्वाइवसजित्वरीर्वीरुधःपारयिष्णवः ॥
ओषधीरितिमातरस्तद्वोदेवीरुपब्रुवे ॥ रपाꣳसिविघ्नतीरितरपश्चातयमानाः ॥ अश्वत्थेवोनिषदनंपर्णेवोवसतिःकृता ॥ गोभा
जइत्किलासथयत्सनवथपूरुषं ॥ यदहंवाजयन्निमाओषधीर्हस्तआदधे ॥ आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा ॥ यदोषध
यःसंगच्छंतेराजानःसमिताविव ॥ विप्रःसउच्यतेभिषग्रक्षोहामीवचातनः ॥ निष्कृतिर्नामवोमाताथायूयꣳस्थसंकृतीः ॥ सराः
पतत्रिणीस्थनयदामयतिनिष्कृत ॥ अन्यावोअन्यामवत्वन्यान्यस्याउपावत ॥ ताःसर्वाओषधयःसंविदानाइदंमेप्रावतावचः ॥
उच्छुष्माओषधीनांगावोगोष्ठादिवेरते ॥ धनꣳसनिष्यंतीनामात्मानंतवपूरुष ॥ अतिविश्वाःपरिष्ठास्तेनइवव्रजमक्रमुः ॥
ओषधयःप्राचुच्यवुर्यत्किंचतनुवाꣳरपः ॥ यास्तआतस्थुरात्मानंयाआविविशुःपरुःपरुः ॥ तास्तेयक्ष्मंविबाधंतामुग्रोमध्यमशी
रिव ॥ साकंयक्ष्मप्रपतश्येनेनकिकिदीविना ॥ साकंवातस्यध्राज्यासाकंनश्यनिहाकया ॥ अश्वावतीꣳसोमवतीमूर्जयंतीमुदो
जसं ॥ आवित्सिसर्वाओषधीरस्माअरिष्टतातये ॥ याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचं
त्वꣳहसः ॥ याओषधयःसोमराज्ञीःप्रविष्टाःपृथिवीमनु ॥ तासांत्वमस्युत्तमाप्रणोजीवातवेसुव ॥ अवपतंतीरवदन्दिवओषधयः
परि ॥ यंजीवमश्नवामहैनसरिष्यातिपूरुषः ॥ याश्चेदमुपशृण्वंतियाश्चदूरंपरागताः ॥ इहसंगत्यताःसर्वाअस्मैसंदत्तभेषजं ॥
मातोरिषत्खनितायस्मैचाहंखनामिवः ॥ द्विपच्चतुष्पदस्माकꣳसर्वमस्त्वनातुरं ॥ ओषधयःसंवदंतेसोमेनसहराज्ञा ॥ यस्मैकरो

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिंब्राह्मणस्तऽराजन्पारयामसि ॥ नवोनवोभवतिजायमानोहांकेतुरुषसामेत्यग्रे ॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः ॥ यमादित्याअश्शुमाप्याययंतियमक्षितमक्षितयःपिबंति ॥ तेननोराजावरुणोबृहस्पतिराप्यायययंतुभुवनस्यगोपाः ॥ प्राच्यांदिशित्वमिंद्रासिराजोतोदीच्यांवृत्रहन्वृत्रहासि ॥ यत्रयंतिस्रोत्यास्तज्जितंतेदक्षिणतोवृषभएधिहव्यः ॥ इंद्रोजयातिन पराजयाताअधिराजोराजसुराजयाति ॥ विश्वाहिभूयाःपृतनाअभिष्टीरुपसद्योनमस्योयथासत् ॥ अस्येदेवप्ररिरिचेमहित्वंदिवः पृथिव्याःपर्यंतरिक्षात् ॥ स्वराडिंद्रोदमआविश्वगूर्तिःस्वरिरमत्रोववक्षेरणाय ॥ अभित्वाशूरनोनुमोदुग्धाइवधेनवः ॥ ईशानमस्यजगतःसुवर्दृशमीशानमिंद्रतस्थुषः ॥ त्वामिद्धिहवामहेसातावाजस्यकारवः ॥ त्वांवृत्रेष्विंद्रसत्पतिंनरस्त्वांकाष्ठास्वर्वतः ॥ यद्यावइंद्रतेशतंशतंभूमीरुतस्युः ॥ नत्वावज्रिन्त्सहस्रंसूर्याअनुनजातमष्टरोदसी ॥ पिबासोममिंद्रमंदतुत्वायंतेसुषावहर्यश्वाद्रिः ॥ सोतुर्बाहुभ्याऽसुयतोनार्वा ॥ रेवतीर्नःसधमादइंद्रेसंतुतुविवाजाः ॥ क्षुमंतोयाभिर्मदेम ॥ उदग्नेशुचयस्तवविज्योतिषोदुत्यंजातवेदसऽसम्त्वाहरितोरथेवहंतिदेवसूर्य ॥ शोचिष्केशंविचक्षण ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षऽसूर्यआत्माजगतस्तस्थुषश्च ॥ विश्वेदेवाऋतावृधऋतुभिर्हवनश्रुतः ॥ जुषंतांयुज्यंपयः ॥ विश्वेदेवाःशृणुतेमऽहवंमेयेअंतरिक्षेयउपद्यविष्ठ ॥ येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं ॥ तच्छंयोरावृणीमहे ॥ गातुंयज्ञाय ॥ गातुंयज्ञपतये ॥ दैवीस्वस्तिरस्तुनः ॥ स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेषजं ॥ शंनोअस्तुद्विपदे ॥ शंचतुष्पदे ॥ गणानांत्वागणपतिऽहवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ क्षेत्रस्यपतिनावयंहितेने

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वजयामसि ॥ गामश्वंपोषयित्न्वासनोमृडातीदृशे ॥ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनएधिद्विपदेशंचतुष्पदे ॥ आसत्येनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनाविपश्यन् ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥ अपाꣳरेताꣳसिजिन्वति ॥ उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसꣳसृजेथामयंच ॥ पुनःकृण्वꣳस्त्वापितरंयुवानमन्वाताꣳसीत्त्वयितंतुमेतं ॥ बृहस्पतेअतियदर्योअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसर्तप्रजातदस्मासुद्रविणंधेहिचित्रं ॥ शुक्रंतेअन्यद्यजतंतेअन्यद्विषुरूपेअहनीद्यौरिवासि ॥ विश्वाहिमायाअवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे ॥ समुषद्भिरजायथाः ॥ अर्यमणंबृहस्पतिमिंद्रंदानायचोदय ॥ वाचंविष्णुꣳसरस्वतीꣳसवितारंचवाजिनं ॥ सोमꣳराजानंवरुणमग्निमन्वारभामहे ॥ आदित्यान्विष्णुꣳसूर्यंब्रह्माणंचबृहस्पतिं ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याꣳसरस्वत्यैवाचोयंतुर्यंत्रेणाग्नेस्त्वासाम्राज्येनाभिषिंचामींद्रस्यबृहस्पतेस्त्वासाम्राज्येनाभिषिंचामि ॥ अर्यमायातिवृषभस्तुविष्मान्दातावसूनांपुरुहूतोअर्हन् ॥ सहस्राक्षोगोत्रभृद्वज्रबाहुरस्मासुदेवोद्रविणंदधातु ॥ येतेयमन्बहवोदेवयानाःपंथानोराजन्दिवआचरंति ॥ तेभिर्नोदेवमहिशर्मयच्छशंनएधिद्विपदेशंचतुष्पदे ॥ बुध्नादग्रमंगिरोभिर्गृणानोविपर्वतस्यदꣳहिनान्यैरत् ॥ रुजद्रोधाꣳसिकृत्रिमाण्येषाꣳसोमस्यतामदइंद्रश्चकार ॥ बुध्नादग्रेणविमिमायमानैर्वज्रेणखान्यतृणन्नदीनां ॥ वृथासृजत्पथिभि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दुच्चास्वधयाभिप्रतस्थौ ॥ महान्महीरस्तभायद्विजातोद्याꣳसद्मपार्थिवंचरजः ॥ सबुध्नादाष्टजनुषाभ्यग्रंबृहस्पतिर्देवतायस्यसम्राट् ॥ बुध्नाद्योअग्रमभ्यर्त्योजसाबृहस्पतिमाविवासंतिदेवाः ॥ भिनद्बलंविपुरोदर्दरीतिकनिक्रदत्सुवरपोजिगाय ॥ याꣳसदा सर्वभूतानिस्थावराणिचराणिच ॥ सायंप्रातर्नमस्यंतिसामासंध्याअभिरक्षत्वोनमः ॥ नमोअस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥ येदोरोचनेदिवोयेवासूर्यस्यरश्मिषु ॥ येषामप्सुसदःकृतंतेभ्यःसर्पेभ्योनमः ॥ याइषवोयातुधानानांयेवावनस्पतीꣳरनु ॥ येवावटेषुशेरतेतेभ्यःसर्पेभ्योनमः ॥ अपांयोद्रवणेरसः ॥ तमहमस्माआमुष्यायणायं ॥ तेजसेब्रह्मवर्चसायगृह्णामि ॥ अपांयऊर्मौरसः ॥ तमहमस्माआमुष्यायणायं ॥ ओजसेवीर्यायगृह्णामि ॥ अपांयोमध्यतोरसः ॥ तमहमस्माआमुष्यायणायं ॥ पुष्ट्यैप्रजननायगृह्णामि ॥ अपांयोयज्ञियोरसः ॥ तमहमस्माआमुष्यायणायं ॥ आयुषेदीर्घायुत्वायगृह्णामि ॥ शंचमेमयश्चमेप्रियंचमेनुकामश्चमेकामश्चमेसौमनसश्चमेभद्रंचमेश्रेयश्चमेवस्यश्चमेयशश्चमेभगश्चमेद्रविणंचमेयंताचमेधर्ताचमेक्षेमश्चमेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्रसूश्चमेसीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंचमेनामयच्चमेजीवातुश्चमेदीर्घायुत्वंचमेनमित्रंचमेभयंचमेसुगंचमेशयनंचमेसूषाचमेसुदिनंचमे ॥ नमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि ॥ इतित्रिः ॥ ॐशांतिःशांतिःशांतिः ॥ कृणुष्वपाजोमहान्त्सजोषात्रातारमिंद्रंयतइंद्रभयामहेस्वस्तिदाभिर्गीर्भिर्यैदेवाःपावमानेनाग्निरायुष्मान्नाभापृथिव्यायाजातानवोनवस्तच्छंयोर्गणानांत्वार्यमणमर्यमायाति ॥ ॥ इतिशांतिपाठःसमाप्तः ॥

॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५९ ॥ महालयश्राद्धप्रयोगः ॥

श्रीः ॥ आचम्यपवित्रपाणिः ॥ पवित्रवंतःपरिवाजमासंतेपितैषांप्रलोअभिरक्षतिव्रतं ॥ महःसमुद्रंवरुणस्तिरोदधेधीराइच्छेकुधर्रुणेष्वारभं ॥ ऊर्ध्वकेशिविरूपाक्षिमांसशोणितभोजने ॥ तिष्ठदेविशिखाबंधेचामुंडेह्यपराजिते ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनश्राद्धकर्मसमारभे ॥ प्राणानायम्य ॥ पितृदेवताभ्योनमः ॥ निहन्मिसर्वंयदमेध्यवद्भवेद्ध ताश्चसर्वेसुरदानवामया ॥ रक्षांसियक्षाश्चपिशाचगुह्यकाहतामयायातुधानाश्चसर्वे ॥ पूर्वेकुशयवान्क्षिपेत् ॥ अपसव्यं ॥ तिलारक्षंत्वसुरान्दर्भारक्षंतुराक्षसान् ॥ पंक्तिंवैश्रोत्रियोरक्षेदतिथिःसर्वरक्षकः ॥ सुरक्षकः ॥ दक्षिणेकुशतिलान्क्षिपेत् ॥ सव्यं ॥ अपवित्रःपवित्रोवासर्वावस्थागतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ सर्वशुचिः ॥ आत्मानंमार्जयेत् ॥ अपसव्यं ॥ श्राद्धभूमौगयांध्यात्वाध्यात्वादेवंगदाधरम् ॥ वस्वादींश्चपितॄन्ध्यात्वाततःश्राद्धंप्रवर्तते ॥ प्रवर्तय ॥ उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ आगच्छंतुश्राद्धकालेविश्वेदेवैःसहपितरः ॥ विष्णवेनमः ॥ विष्णुर्विष्णुः श्रीमद्भगवतोमहापुरुषस्येत्यादिश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ॥ धूरिलोचनसंज्ञकानांविश्वेषां देवानां ॥ अपसव्यं ॥ अस्मत्पितृपितामहप्रपितामहानांअमुकशर्मणांगोत्राणांवसुरुद्रादित्यस्वरूपाणांअस्मन्मातृपितामहीप्रपि

१ संबंधगोत्रनामभिरितिवाक्यात् अमुकगोत्राणां अमुकशर्मणां वसु॰ पितामह॰ तथा सकारेणतुवक्तव्यंगोत्रंसर्वत्रधीमताइतिवाक्यात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तामहीनांअमुकदानागोत्राणावसुरुद्रादित्यस्वरूपाणाअस्मत्सापत्नमातुःदायाःगोत्रायाःवसुरूपायाःअस्मन्मातामहमातुः पितामहमातुःप्रपितामहानांशर्मणांगोत्राणांवसुरुद्रादित्यस्वरूपाणां अस्मन्मातामहीमातुःपितामहीमातुःप्रपितामहीनांअमुकदानां गोत्राणांवसुरुद्रादित्यस्वरूपाणांअस्मत्पत्न्याःदायाःगोत्रायाःवसुरूपायाःअस्मत्पुत्रस्यशर्मणःगोत्रस्यसपत्नीकस्यवसुरूपस्यअस्मदुहितुःदायाःगोत्रायाःसभर्तृकायाःवसुरूपायाः अस्मत्पितृव्यस्यशर्मणःगोत्रस्यसपत्नीकस्यसापत्यस्यवसुरूपस्य अस्मन्मातुलस्यशर्मणःगोत्रस्यसपत्नीकस्यसापत्यस्यवसुरूपस्य अस्मद्भ्रातुःशर्मणःगोत्रस्यसपत्नीकस्यसापत्यस्यवसुरूपस्य अस्मत्पितृभगिन्याःदायाःगोत्रायाःसभर्तृकायाःसापत्यायाःवसुरूपायाः अस्मन्मातृभगिन्याःदायाःसभर्तृकायाःसापत्यायाःवसुरूपायाः अस्मद्भगिन्याःदायाःसभर्तृकायाःसापत्यायाःवसुरूपायाः अस्मच्छ्वशुरस्यशर्मणःगोत्रस्यसपत्नीकस्यसापत्यस्यवसुरूपस्य अस्मद्गुरोःशर्मणःगोत्रस्यसपत्नीकस्यसापत्यस्यवसुरूपस्यअस्मच्छिष्यस्यशर्मणःगोत्रस्यसपत्नीकस्यसापत्यस्यवसुरूपस्य अस्मदाप्तस्यअमुकशर्मणः गोत्रस्य वसुरूपस्य एतेषांश्रेयोर्थमोक्षार्थंतृप्त्यर्थंदेशकालाद्यनुसारतःपित्रादीनांसकृन्महालयापरपक्षिकश्राद्धं सदैवंसाग्नौकरणंसपिंडंपार्वणैकोद्दिष्टेनविधिनाअन्नेनहविषासद्यःकरिष्ये ॥ तदंगत्वेनगृहभांडादिशुद्ध्यर्थंयवतिलोदकाभिमंत्रणंप्रायश्चित्तसूक्तजपंचकरिष्ये ॥ कुरुष्व ताम्रपात्रेयवोदकंरजतपात्रेतिलोदकंपूरयित्वा ॥ इ॒मंमे॑गंगेयमुनेसरस्व॒ति॒शु॒तु॒द्रि॒स्तो॒मꣳस॒च॒ता॒प॒रु॒ष्णि॒या ॥ अ॒सि॒क्नि॒या॒म॒रु॒द्वृ॒धे॒वि॒त॒स्त॒या॒र्जी॒कीये॒शृ॒णु॒ह्या॒सु॒षो॒म॒या ॥ गं॒ध॒द्वा॒रां॒दु॒रा॒ध॒र्षां॒नि॒त्यपु॑ष्टांकरी॒षिणी॑ ॥ ई॒श्वरीꣳसर्व॑भूता॒नां॒ता॒मि॒हो॒प

---

१ अनेकामातरोयस्यश्राद्धेचापरपक्षिके । अर्घ्यदानंपृथक्कुर्यात्पिंडमेकंतुनिर्वपेत् । इतिवाक्यात् अस्मन्मातृ-मातृपितामहीप्रपितामहीनांगंगायमुनापार्वतीराधादानां अमुकगोत्राणां वसु० इतिमातुःसहैवोच्चारोनपृथक् । २ मातामहादीनांसपत्नीकत्वमितिबहवः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ह्वयेश्रियं ॥ गंधंक्षिप्त्वा ॥ शरासःकुशरासोदर्भासःसैर्याउत ॥ मौंजाअदृष्टाबैरिणाःसर्वेसाकंन्यलिप्सत ॥ कुशान्क्षिप्त्वा ॥ यवोसि धान्यराजोवावारुणोमधुसंयुतः ॥ निर्णोदःसर्वपापानांपवित्रमृषिभिःस्मृतम् ॥ यवान् ॥ तिलोसिसोमदैवत्योगोसवेदेवनिर्मितः ॥ प्रत्नवद्भिःप्रत्तःस्वधयापितृनिमान्लोकान्प्रीणयाहिनःस्वधानमः ॥ तिलान् ॥ यवतिलोदकदेवताभ्यःइदंगंधंतुलसीपत्रंचसर्वेउपचाराःयवतिलैःसफलैःसहिरण्यैःसंपूर्णाःसंतु ॥ कूष्मांडमंत्रान्पुरुषसूक्तंचजप्त्वा ॥ कूष्मांडमंत्राः ॥ कूष्मांडैर्जुहुयाद्योपूतइवमन्येतयथास्तेनोयथाभ्रूणहैवमेषभवतियोनौरेतःसिंचतियदर्वाचीनमेनोभ्रूणहत्यायास्तस्मान्मुच्यतेयावदेनोदीक्षामुपैतिदीक्षित एतैःसंततिजुहोतिसंवत्सरेदीक्षितोभवतिसंवत्सरादेवात्मानंपुनीतेमासंदीक्षितोभवतियोमासःससंवत्सरःसंवत्सरादेवात्मानंपुनीतेचतुर्विंशतिरात्रींदीक्षितोभवतिचतुर्विंशतिरर्धमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेद्वादशरात्रींदीक्षितोभवतिद्वादशमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेषड्रात्रींदीक्षितोभवतिषड्वाऋतवःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेतिस्रोरात्रींदीक्षितोभवतित्रिपदागायत्रीगायत्रियाएवात्मानंपुनीतेनमाꣳसमश्नीयान्नस्त्रियमुपेयान्नोपर्यासीतजुगुप्सेतानृतात्पयोब्राह्मणस्यव्रतंयवागूराजन्यस्यामिक्षावैश्यस्याथोसौम्येष्वध्वरएतद्व्रतंब्रूयाद्यदिमन्येतोपदस्यामीत्योदनंधानाःसक्तून्घृतमित्यनुव्रतयेदात्मनोनुपदासाय ॥८॥ सहस्र० शुचींवोहव्यामरुतःशुचींनाꣳशुचिꣳहिनोम्यध्वरꣳशुचिभ्यः ॥ ऋतेनसत्यमृतसापआयन्शुचिंजन्मानःशुचयःपावकाः ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः ॥ शुचीरोचतआहुतः ॥ उदग्नेशुचयस्तवशुक्राभ्राजंतईरते ॥ तवज्योतीꣳष्यर्चयः ॥ अपवित्रःपवित्रोवासर्वावस्थागतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ सर्वेशुचिः ॥ सर्वाणिस्थलानिशुचीनिभवंतु ॥ संतुशुचीनि ॥पाकप्रोक्षणं॥ यदे[illegible]

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वनकाम्यायद्वाचानृतमूदिम ॥ तस्मान्नइहमुंचतविश्वेदेवाःसजोषसः॥ ऋतेनद्यावापृथिवीऋतेनत्वꣳसरस्वति ॥ कृतान्नःपाह्येनसो यत्किंचानृतमूदिम ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ विहितमंत्रैःपाकादीनांपवित्रतास्तु ॥ सर्वेपा काःशुचयोभवंतु ॥ पाकप्रोक्षणंविधिवदस्तु ॥ अस्तुविधिवत् ॥ हस्तेकुशान्हिरण्यंचगृहीत्वा ॥ समस्तसंपत्समवाप्तिहेतवःसमुत्थि तापत्कुलधूमकेतवः ॥ अपारसंसारसमुद्रसेतवःपुनंतुमांब्राह्मणपादपांसवः ॥ आदद्धनध्वांतसहस्रभानवःसमीहितार्थार्पणकाम धेनवः ॥ समस्ततीर्थाबुपवित्रमूर्तयोरक्षंतुमांब्राह्मणपादपांसवः ॥ विप्रौघदर्शनात्क्षिप्रंक्षीयंतेपापराशयः ॥ वंदनान्मंगलावाप्तिर र्चनादच्युतंपदं ॥ आधिव्याधिहरंनृणांमृत्युदारिद्र्यनाशनं ॥ श्रीःपुष्टिकीर्तिदंवंदेविप्रश्रीपादपंकजं ॥ यावंतीवैदेवतास्ताःसर्वावेद विदिंब्राह्मणेवसंतितस्माद्ब्राह्मणेभ्योवेदविद्भ्योदिवेदिंवेनमस्कुर्यान्नाश्लीलंकीर्तयेदेताएवदेवताःप्रीणाति ॥ अपसव्यं ॥ अक्रोधनैः शौचपरैःसततंब्रह्मचारिभिः ॥ भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा ॥ अद्यतिथौममपित्रादीनांसकृन्महालयापरपक्षिकंश्राद्धं कर्तुममाधिकारसंपदस्त्वितिभवंतोब्रुवंतु ॥ अस्तुश्राद्धाधिकारसंपत् ॥ कालोयंमुख्यकालोस्त्वितिभवंतोब्रुवंतु ॥ कालोयंमुख्यका लोस्तु ॥ सव्यं ॥ नमोदेवेभ्यः ॥ प्राचीनावीती ॥ स्वधापितृभ्यः ॥ सव्यं ॥ धूरि० विश्वेदेवस्थानेक्षणंदत्वाभवद्भिःप्रसादःकर्तव्यः॥ सुकर्तव्यः ॥ एवंद्वितीयेपि ॥ अपसव्यं ॥ अ०पितृपितामहप्रपितामहस्थानेक्षणंदत्वाभवद्भिःप्रसादःकर्तव्यः॥ अ०मातृपितामहीप्र पितामहीस्थाने० अ०सापत्नमातृस्थाने० अ०मातामहमातुःपितामहमातुःप्रपितामहस्थाने० अ०मातामहीमातुःपितामहीमातुः प्रपितामहीस्थाने० अ०पत्नीस्थाने० अ०सुतस्थाने० अस्म०दुहितृस्थाने० अ०पितृव्यसपत्नीकसापत्यस्थाने अ० मातुल सपत्नी कसापत्यस्थाने० अ०भ्रातृसपत्नीकसापत्यस्थाने०अ०पितृभगिनीसभर्तृकसापत्यस्थाने० अ०मातृभगिनीसभर्तृकसापत्यस्था

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ने०आत्मभगिनीसभर्तृकसापत्यस्थाने०अ०श्वशुरसपत्नीकसापत्य०अ०गुरुसपत्नीकसापत्यस्था० अ०शिष्य०आप्त० ॥ सुकर्तव्यः ॥ सव्यं ॥ सर्वेषांस्वागतं ॥ सुस्वागतं ॥ देवाःसमाध्वं ॥ सुसमास्महे ॥ अपसव्यं ॥ पित्रादयःसमाध्वं ॥ सुसमास्महे ॥ सव्यं ॥ उपक्रांतंसकृन्महालयापरपक्षिकश्राद्धाख्यंकर्मकरिष्ये ॥ कुरुष्व ॥ अपसव्यंश्राद्धस्यकर्मणःसिद्धिरस्त्वितिभवंतोब्रुवंतु ॥ अस्तुश्राद्धस्यकर्मणःसिद्धिः ॥ सव्यं ॥ विश्वेषांदेवानांश्राद्धस्यकर्मणःसिद्धिरस्त्वितिभवंतोब्रुवंतु ॥ अस्तुश्राद्धस्यकर्मणःसिद्धिः ॥ आगच्छंतुमहाभागाविश्वेदेवामहाबलाः ॥ येअत्रविहिताःश्राद्धेसावधानाभवंतुते ॥ भवामः ॥ अपोदत्वाधूरिलोचनसंज्ञकानांविश्वेषांदेवानांब्रह्मणेइदमासनं२ ॥ स्वासनं ॥ अत्रास्यतां ॥ धर्मोसि ॥ सकृन्महालया० श्राद्धेदैवेक्षणःक्रियतां ॥ ॐतथा ॥ प्राप्नोतुभवान् ॥ प्राप्नवानि ॥ प्रोक्षितायांभुविदर्भानास्तीर्य पात्रमेकंनिधायप्रोक्ष्य उद्धृत्यपुनःप्रोक्ष्यप्राग्ग्रकूर्चंनिधायजलमासिच्ययवान्विकीर्य यवान्वामहस्तेगृहीत्वा ॥ धूरिलोचनसंज्ञकान्विश्वान्देवान्भवत्सुयथायथंआवाहयिष्ये ॥ आवाहय ॥ विश्वेदेवाऋतावृधऋतुभिर्हवनश्रुतः ॥ जुषंतांयुज्यंपयः ॥ विश्वान्देवान्आवाहयामि ॥ आवाहय ॥ विश्वेदेवाःशृणुतेमꣳहवंमेयेअंतरिक्षेयउपद्यविष्ठ ॥ येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं ॥ आगच्छंतुविश्वेदेवाविश्वेदेवाः ॥ विश्वेभ्योदेवेभ्योवोजुष्टंगृह्णामि ॥ इतिद्विः ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ अर्घ्यपात्रेइदंगंधतुलसीपत्रंसर्वेउपचाराःयवैःसंपूर्णाःसंतु ॥ देवार्घ्यपात्रंसंपन्नं ॥ सुसंपन्नं ॥ देवेभ्यःस्वाहार्घ्याआपः ॥ हस्तार्चनविधेःसर्वस्यपरिपूर्णतास्तु ॥ यादिव्याआपःपयसासंबभूवुः ॥ याअंतरिक्षउतपार्थिवीर्याः ॥ तासांत्वासर्वासाꣳरुचा ॥ अभिषिंचामिवर्चसा ॥ धूरिलोचनसंज्ञकाविश्वेदेवाःभूर्भुवः

१ इतउत्तरमत्रैवमंडलकरणविप्रपादक्षालनादिस

CC-0. In Public Domain. Funding by MoE-IKS

सुवःइदंवोअर्घ्यंस्वाहानमः२॥ स्वर्घ्य ॥ तूष्णींयवोदकंइदमर्घ्यंदत्तंनममअस्तुदत्तं॥ धूरिलोचन० देवाःयथाभागशःअमीवो
गंधाःस्वाहानमः॥ सुगंधाः॥ पूजार्थेइमानिवःपुष्पाणितुलसीपत्रंचस्वाहा०॥ सुपत्रपुष्पाणि॥ एषवोधूपःस्वाहान०॥ एषवो
दीपःस्वाहानमः॥ आच्छादनार्थेइदंबार्ह्यस्पत्यंवासःस्वाहान०॥ स्वाच्छादनं॥ पवित्रार्थेइमौकुशौस्वाहान०॥ सुपवित्रं॥
धारणार्थेयज्ञोपवीतं॥ अनुलेपनार्थेगोपीचंदनं॥ फलार्थेपूगीफलं॥ सर्वालंकारार्थेव्यावहारिकद्रव्यंस्वाहान०॥ युवा॑सु॒वासाः॒
परि॑वीत॒आगा॒त्सउ॒श्रेया॑न्भवति॒जाय॑मानः॥ तंधीरा॑सःक॒वय॒उन्न॑यंतिस्वा॒धियो॒मन॑सादेव॒यंतः॑॥ भोदेवाःएतेआसनादिगंध
पुष्पधूपदीपाच्छादनांताःपंचोपचाराःसर्वेपरिपूर्णाभवंतु॥ अर्चनविधौस्वर्चितमस्तु॥ न्यूनंतद्विधिवदस्तु॥ यस्यस्मृत्याच
नामोक्त्यातपोयज्ञक्रियादिषु॥ न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं॥ अच्युतायन० गयायैन०गदधरायनमः पुंडरीकाक्षा
य०॥ युष्मदनुज्ञयापित्राद्यर्चनंकरिष्ये॥ कुरुष्व॥ कुरुक्षेत्रंगयांगंगांप्रभासंपुष्कराणिच॥ एतानिमनसाध्यात्वाश्राद्धकालेसदा
पठेत्॥ अपसव्यं॥ अपोदत्वा अस्मत्पितृपितामहप्रपितामहानांशर्मणांगोत्राणांवसुरुद्रादित्यस्वरूपाणांब्रह्मणेइदमासनं॥ स्वास
नं॥ अस्मन्मातृपितामहीप्रपितामहीनांदानांगोत्राणां वसुरुद्रादित्यस्वरूपाणांब्रह्मणेइदमासनं॥ एवंषष्ठ्यासर्वत्रआसनंदद्यात्॥
अत्रास्यतां॥ धर्मोसि॥ सकृन्महालयापरपक्षिकश्राद्धेपित्र्येक्षणःक्रियतां॥ ॐ तथा॥ प्राप्नोतुभवान्॥ प्राप्नवानि॥ अर्घ्य
मासाद्य॥ प्रोक्षितायांभुविदर्भानास्तीर्यपात्रमेकंनिधायप्रोक्ष्यउद्धृत्यपुनःप्रोक्ष्यदक्षिणाग्रकूर्चंनिधायजलमासिच्य तिलान्वि
कीर्य॥ अस्मत्पितृपितामहप्रपितामहान्शर्मणःगोत्रान्वसुरुद्रादित्यस्वरूपान्॥ अ०मातृपितामहीप्रपितामहीःदाःगोत्राःव
सुरुद्रादित्यस्वरूपाः॥ अ०सापत्नमातरंदांगोत्रांवसुरूपां अस्मन्मातामहमातुःपितामहमातुःप्रपितामहान्शर्मणःगोत्रान्वसुरु०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अस्मन्मातामहीमातुःपितामहीमातुःप्रपितामहीःदाःगोत्राःवसु०अ०पत्नींदांगोत्रांवसुरूपां अ०पुत्रंशर्माणंगोत्रंसपत्नीकंवसुरूपं० अ०दुहितरंदांगोत्रांसभर्तृकांवसुरूपां अ०पितृव्यंशर्माणंगोत्रंसपत्नीकंसापत्यंवसुरूपं अ०मातुलंशर्माणंगोत्रंसपत्नीकंसापत्यंवसुरूपं अ०भ्रातरंशर्माणंगोत्रंसपत्नीकंसापत्यंवसुरूपं अ०पितृभगिनींदांगोत्रांसभर्तृकांसापत्यांवसुरूपां अस्मन्मातृभगिनींदांगोत्रांसभर्तृकांसापत्यांव० अस्मदात्मभगिनींदांगोत्रांसभर्तृकांसापत्यां० अ०श्वशुरंशर्माणंगोत्रंसपत्नीकंसापत्यं० अ० गुरुंशर्माणंगोत्रंसपत्नीकंसापत्यं० अ०शिष्यंशर्माणंगोत्रंसपत्नीकंसापत्यं०अ०दाप्तंस०सा०व० भवत्सुयथायथंआवाहयिष्ये ॥ आवाहय ॥ उशंतस्त्वाहवामहउशंतःसमिधीमहि ॥ उशन्नुशतआवहपितॄन्हविषेअत्तवे ॥ पितृपितामहप्रपितामहानावाहयामि ॥ आवाहय ॥ एवंद्वितीयांतंआवाहनं ॥ आयंतुनःपितरःसोम्यासोअग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदंत्वधिब्रुवंतुतेअवंत्वस्मान् ॥ आगच्छंतुपितरः ॥ पितृभ्योवोजुष्टंगृह्णामि एवंसर्वेषां ॥ अपःप्रदाय ॥ शंनोदेवीरभिष्टय० तुनः ॥ तिलोसिसोमदेवत्योगोसवे०नमः ॥ पित्रर्घ्यपात्रेइदंगंधंतुलसीपत्रंसर्वेउपचाराःतिलैःसंपूर्णाःसंतु ॥ पित्रर्घ्यपात्रंसंपन्नं ॥ सुसंपन्नं ॥ पितृभ्यःस्वधाअर्घ्याआपः ॥ हस्तार्चनविधेःसर्वस्यपरिपूर्णतास्तु ॥ अपोदत्वा ॥ यादिव्याआपः ॥ अस्मत्पितरिदंतेर्घ्यं स्वधा ॥ एवंपितामहादीनामपि ॥ इदमर्घ्यंदत्तंनमम ॥ स्थानमसिप्रणीतायैइदमासनं ॥ पितृणांस्वधेयंस्थानमसि ॥ स्थानमसिदेवतायैइदंगंधंतुलसीपत्रंसर्वेउपचाराःतिलैःसंपूर्णाःसंतु ॥ स्थानमसिप्रच्छाद्य ॥ संकल्पोदिष्टपितरःयथानामगोत्ररूपाःयथाभागशःअमीवोगंधाःस्वधानमः ॥ सुगंधाः ॥ इमानिवःपुष्पाणितुलसीभृंगराजसहितानिस्वधान०॥ सुपुष्पाणि ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

एषवोधूपःस्वधान० ॥ सुधूपः ॥ एषवादीपःस्वधा० ॥ सुदीपः ॥ आच्छादनार्थेइदंवार्हस्पत्यंवासःस्वधा० ॥ स्वाच्छादनं ॥ पवित्रार्थेइमेकुशाः ॥ सुपवित्रं ॥ धारणार्थेयज्ञोपवीतं ॥ अनुलेपनार्थेगोपीचंदनं ॥ फलार्थेपूगीफलं ॥ सर्वालंकारार्थेव्यावहारिकंद्रव्यं ॥ स्वलंकारः ॥ इदंपितृभ्योनमोअस्त्वद्यपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्तायेवानूनꣳसुवृजनासुविक्षु ॥ भोपितरःआसनादिगंधपत्रपुष्पधूपदीपाच्छादनांताःपंचोपचाराःसर्वेपरिपूर्णाभवंतु ॥ अर्चनविधौस्वर्चितमस्तु ॥ न्यूनंतद्विधिवदस्तु ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु०च्युतं ॥ अच्युतायनमः ॥ गयायै० ॥ गदाधराय० ॥ सव्यं ॥ युष्मदनुज्ञयामंडलादिकरिष्ये ॥ कुरुष्व ॥ तत्रदेवपात्रेचतुरस्रंमंडलं ॥ ब्रह्माविष्णुश्चरुद्रश्चश्रीर्हुताशन एवच ॥ मंडलान्युपजीवंतितस्मात्कुर्वीतमंडलं ॥ अपसव्यं ॥ पितृपात्रेवर्तुलाकारंमंडलमप्रदक्षिणंकुर्यात् ॥ आदित्यावसवो रुद्राविश्वेदेवाःसपैतृकाः ॥ मंडलेचोपतिष्ठंतितस्मात्कुर्वीतमंडलं ॥ पात्राण्यासाद्य ॥ अपसव्यं ॥ बृहत्सामक्षत्रभृद्वृद्धवृष्णियंत्रिष्टुभौजःशुभितमुग्रवीरं ॥ इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्ष ॥ एवंपितामहादिपात्रे ॥ सव्यं ॥ रक्षोहणोवलगहनोवैष्णवान्खनामीदमहंतंवलगमुद्वपामियन्नःसमानोयमसमानोनिचखानेदमेनमधरंकरोमियोनःसमानोयोसमानोरातीयतिंगायत्रेणछंदसावबाढोवलगःकिमत्रभद्रंतन्नौसहविराडसिसपत्नहासम्राडसिभ्रातृव्यहास्वराडस्यभिमातिहाविश्वाराडसिविश्वासांराष्ट्राणांꣳहंता ॥ यथाचक्रधरोविष्णुस्त्रैलोक्यंपरिरक्षति ॥ एवंमंडलभस्मांकःसर्वभूतानिरक्षतु ॥ सर्वेषांपापदृष्टीनांच ध्रुवक्षातिकेशवः ॥ भस्मनामंडलंकुर्यात्पंक्तिदोषोनविद्यते ॥ अपसव्यं ॥ पितृणांकरशुद्धिः ॥ सव्यं ॥ देवानांकरशुद्धिः ॥ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ इतिपात्रशुद्धिः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अपसव्यं ॥ उद्धरिष्याम्यग्नौचकरिष्यामि ॥ काममुद्धियतांकाममग्नौचक्रियतां ॥ सव्यं ॥ युष्मदनुज्ञयाअग्नावग्नौकरणंकरिष्ये ॥ कव्यवाहननामानमग्निंप्रतिष्ठापयामि ॥ चत्वारिशृंगात्रयोंअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहो देवोमर्त्याँआविवेश ॥ सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः ॥ स्वाहांतुदक्षि णेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरंव्यजनंवामैर्घृतपात्रंचधारयन् ॥ आत्माभिमुख मासीनएवंरूपोहुताशनः ॥ अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखोममसंमुखोवरदोभव ॥ यथाहुतद्धसवोगौर्यंचित्पदि षितामुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यँहःप्रातार्यग्नेप्रतरान्नआयुः ॥ परिसमुह्य ॥ दक्षिणाग्रैःकुशैःपरिस्तीर्य ॥ अदि तेनुमन्यस्व ॥ अनुमतेनुमन्यस्व ॥ सरस्वतेनुमन्यस्व ॥ देवसवितःप्रसुव ॥ आज्येनअन्नमभिघार्यकुशेनभागंकुर्यात् ॥ हस्ते कुशंगृहीत्वा ॥ अपसव्यं ॥ सोमायपितृमतेस्वधानमः ॥ सोमायपितृमतइदंनमम ॥ यमायांगिरस्वतेपितृमतेस्वधानमः ॥ यमायांगिरस्वतेपितृमतइदं० ॥ अग्नयेकव्यवाहनायस्विष्टकृतेस्वधानमः ॥ अग्नयेकव्यवाहनायस्विष्टकृतइदं० ॥ सव्यं ॥ यथाहुतद्धसवोगौर्यंचित्पदिषितामुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यँहःप्रातार्यग्नेप्रतरान्नआयुः ॥ परिस्तरणादिविसृज्य अदितेन्वमँस्थाः ॥ अनुमतेन्वमँस्थाः ॥ सरस्वतेन्वमँस्थाः ॥ देवसवितःप्रासावीः॥ यज्ञनमस्तेयज्ञ ॥ नमोनमश्चतेयज्ञ ॥ शिवेनमेसंतिष्ठस्व ॥ स्योनेनमेसंतिष्ठस्व ॥ सुभूतेनमेसंतिष्ठस्व ॥ ब्रह्मवर्चसेनमेसंतिष्ठस्व ॥ यज्ञस्यर्धिमनुसंतिष्ठस्व ॥ उपते यज्ञनमः ॥ उपतेनमः ॥ उपतेनमः ॥ अनेनाग्नौकरणहोमाख्येनकर्मणाश्रीयज्ञनारायणःप्रीयतां ॥ अग्नयेनमःगंधाद्युपचारा

CC-0. In Public Domain.Funding by MoE-IKS

१ अत्रसोमायपितृपातायस्वधानमःइत्यवकचनप

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

आसूर्यꣳरोहयोदि॒वि ॥ घ॒र्मंनसामन्तपतासुवृ॒क्तिभि॒र्जुष्टं॒गिर्व॑णसे॒गिरः॑ ॥ सोमो॑धे॒नुꣳ

...तु ॥ सा॒द॒न्यं॑वि॒दथ्य॑ꣳस॒भेयं॑ ॥ पितु॒ःश्रव॑णं॒योददा॑शदस्मै ॥ उप॑ह्वयेसु॒दुघां॑० इतिसूक्तं

त्रिसु॑पर्णंचपठेत् ॥ सव्यं ॥ ततोऽन्नंगायत्र्याभ्युक्ष्यदक्षिणंजान्वाच्यपात्रंहस्तेनधृत्वा ॥ स॒त्यंत्व॒र्तेन॒परि॑षिंचा॒मि ॥ पृथिवी

तेपात्रंद्यौरपिधानंब्राह्मणस्त्वामुखेमृतंजुहोमिब्राह्मणानांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिमादेवानांक्षेष्ठाअमुत्रामुष्मि

न्लोके इ॒दंविष्णु॒र्विच॑क्रमेत्रे॒धानिद॑धेप॒दं ॥ समू॑ढमस्यपाꣳसु॒रे ॥ धूरिलोचनसंज्ञकाविश्वेदेवादेवताइदंवोअन्नंविष्णोहव्यंरक्षस्व ॥

धूरिलोचनसंज्ञकेभ्योविश्वेभ्योदेवेभ्यःइदमन्नंसोपस्करंपरिविष्टंपरिवेक्ष्यमाणंचअस्यब्राह्मणस्यआतृप्तिपर्यंतंअमृतरूपेणसंपद्य

तांस्वाहाहव्यंनमम ॥ तत्सद्गयायांविष्णुपदादिचतुर्दशपदेषुदत्तमन्नमक्षय्यमस्तु ॥ गयागदाधरःप्रीयतां ॥ प्रीतोभवतुगयागदा

धरः ॥ येदे॑वादि॒व्येका॑दश॒स्थपृ॑थि॒व्यामध्येका॑दश॒स्थाप्सु॒षदो॑महि॒नैका॑दश॒स्थतेदे॑वाय॒ज्ञमि॒मंजु॑षध्वं ॥ देवेभ्यःयथासांकल्पितः

प्रीयतां ॥ देवानुज्ञयापित्राद्यन्ननिवेदनंकरिष्ये ॥ कुरुष्व ॥ अपसव्यं ॥ सव्यंजान्वाच्य ॥ पितृपात्रे स॒त्यंत्व॒र्तेन॒परि॑षिं

चा॒मि ॥ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्त्वामुखेमृतंजुहोमिब्राह्मणानांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिमापितॄणां

क्षेष्ठाअमुत्रामुष्मिन्लोके पृथि॑व्यंतरिक्षंद्यौःसमातासांअग्निवायुरादित्याउपद्रष्टारःदत्तस्याप्र॑मादा॒य ॥ प्रा॒णेनिवि॑श्या॒मृतं॑जुहोमि ॥

इ॒दंविष्णु॒र्विच॑क्रमेत्रे॒धानिद॑धेप॒दं ॥ समू॑ढमस्यपाꣳसु॒रे ॥ पितृपितामहप्रपितामहादेवताइदंवोअन्नंविष्णोकव्यंरक्षस्व ॥ पितृपि

---

१ उपह्वयेइतिसूक्तंत्रिसुपर्णंचैतत्प्रयोगांतेद्रष्टव्यं । २ पितॄणांपृथग्विप्रत्वेतु–पृथ्वीसमातस्याअग्निरुपद्रष्टा–अंतरिक्षꣳसमंतस्यवायुरुपद्रष्टा– द्यौः समातस्याआदित्यउपद्रष्टा–इतिपृथगुच्चारःपार्वणेकार्यः । एकोद्दिष्टेतुनकिमपि ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तामहप्रपितामहेभ्यःशर्मभ्यःगोत्रेभ्यःवसुरुद्रादित्यस्वरूपेभ्यःइदमन्नंसोपस्करंपरिविष्टंपरिवेक्ष्यमाणंचअस्यब्राह्मणस्यआतृप्ति पर्यंतंअमृतरूपेणसंपद्यतांस्वधाकव्यंनमम ॥ तत्सद्वयायांरुद्रपदादिचतुर्दशपदेषुदत्तमन्नमक्षय्यमस्तु ॥ गयागदाधरःप्रीयतां ॥ प्रीतोभवतुगयागदाधरः ॥ एवंमात्रादीनां ॥ येचेहपितरोयेचनेहयाꣳश्चविद्मयाꣳउचनप्रविद्म ॥ अग्नेतान्वेत्थयतितेजातवेदस्तयाप्रत्तꣳस्वधयामदंतुस्वधानमः ॥ सव्यं ॥ मधुमतीःश्रावयिष्ये ॥ श्रावय ॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसिमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमाꣳअस्तुसूर्यः ॥ माध्वीर्गावोभवंतुनः ॥ मधुमधुमधु ॥ सुमधु ॥ सर्वान्नंमधु ॥ श्राद्धमच्छिद्रमस्त्वितिभवंतोब्रुवंतु ॥ अच्छिद्रंभवतु ॥ गयाश्राद्धमस्तु ॥ सप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ ॥ चक्रवाकाःसरोद्वीपेहंसाःसरसिमानसे ॥ तेपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः ॥ प्रस्थितादीर्घमध्वानंयूयंकिमवसीदथ ॥ अमूर्तानांचमूर्तानांपितॄणांदीप्ततेजसां ॥ नमस्यामिसदातेषांध्यायिनांयोगचक्षुषां ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच ॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु ॥ ईशानःपितृरूपेणमहादेवोमहेश्वरः ॥ प्रीयतांभगवानीशःपरमात्मासदाशिवः ॥ अपसव्यं ॥ ईशानविष्णुकमलासनकार्तिकेयवह्नित्र्यार्करजनीशगणेश्वराणां ॥ क्रौंचामरेंद्रकलशोद्भवकश्यपानांपादान्नमामिसततंपितृमुक्तिहेतून् ॥ सव्यं ॥ ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ॥ ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना ॥ हरिर्दाताहरिर्भोक्ताहरिरन्नंप्रजापतिः ॥ हरिर्विप्रशरीरस्थोभुंक्तेभोजयतेहरिः ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच ॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु ॥ तत्सद्वार्पणमस्तु ॥ नैवेद्यसमर्पणं ॥ अपसव्यं ॥ एकोवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सेनीभोजनेनपितृस्वरूपीजनार्दनवासुदेवःप्रीयतां ॥ सव्यं ॥ देवाःतत्सत्अमृतमस्तु ॥ अपसव्यं ॥ पितरःतत्सद्ब्रह्मार्पणमस्तु ॥ सव्यं ॥ यथासुखंजुषध्वं श्रद्धायाम्प्राणेनिर्विष्टोमृतंजुहोमि ॥ श्रद्धायामपानेनिर्वि० ॥ श्रद्धायाँव्यानेनिर्वि० ॥ श्रद्धायामुदानेनिर्वि ष्टोमृ० ॥ श्रद्धायाःसमानेनिर्विष्टोमृतंजुहोमि ॥ ब्रह्मणिमआत्मामृतत्वाय ॥ अपसव्यसव्याभ्यांपितृपूर्वकंअपोशनंदत्वा ॥ अमृतो पस्तरणमसि ॥ श्रद्धायाम्प्राणेनिर्विष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ प्राणायस्वाहा ॥ श्रद्धायामपानेनिर्विष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ अपानायस्वाहा ॥ श्रद्धायाँव्यानेनिर्विष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ व्यानायस्वाहा ॥ श्रद्धायामुदानेनिर्विष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ उदानायस्वाहा ॥ श्रद्धायाःसमानेनिर्विष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ समानायस्वाहा ॥ ब्रह्मणेस्वाहा ॥ अपसव्यसव्याभ्यांहस्तोदकंपितृपूर्वकंदत्वा ॥ दशवारंगायत्रींज प्त्वाप्रार्थयेत् ॥ अपेक्षितंयाचितव्यंत्याज्यंचैवानपेक्षितं ॥ उपविश्यसुखेनैवभोक्तव्यंस्वस्थमानसैः ॥ विद्यमानशाकपाकादिप दार्थेषुयद्रोचतेतद्ब्राह्मंयन्नरोचतेतत्त्याज्यं ॥ सुखेनैवभोक्तव्यं ॥ जुषामहे ॥ राक्षोघ्नसूक्तानिपितृसूक्तान्याश्रावयिष्ये ॥ आश्रा वय ॥ सूक्तानिपठेत् ॥ भोजनांते ॥ अपेक्षितं ॥ संपूर्णं ॥ सिद्धस्यहविषोमध्येयद्रोचतेतद्याचयध्वं ॥ अलं ॥ मधुमतीःश्रा वयिष्ये ॥ श्रावय ॥ मधुवाताऋतायते० ॥ अपसव्यं ॥ अक्षन्नमीमदंतह्यवप्रियाअधूषत ॥ अस्तोषतस्वभानवोविप्रानविष्ठया मतीयोजान्विद्रतेहरी ॥ श्राद्धंसंपन्नं ॥ सुसंपन्नं ॥ सव्यं ॥ विश्वेदेवाःतृप्तास्थ ॥ तृप्तास्मः ॥ अपसव्यं ॥ पित्रादयःतृप्तास्थ ॥ तृप्तास्मः ॥ शेषमन्नंकिंक्रियतां ॥ इष्टैःसहभुज्यतां ॥ सव्यं ॥ असोमपाश्चयेदेवायज्ञभागविवर्जिताः ॥ तेषामन्नंप्रदास्यामि विकिरंवैश्वदेविकं ॥ देवपात्राग्रेअन्नंविकिरेत् ॥ असोमपेभ्योविश्वेभ्योदेवेभ्यःइदंविकिरान्नंदत्तंनमम ॥ अपसव्यं ॥ असं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्कृतप्रमीतायेत्यागिन्योयाःकुलस्त्रियः ॥ दास्यामितेभ्योविकिरमन्नंताभ्यश्चपैतृकं ॥ येकुमाराःकुमार्योवायेचगर्भाद्विनिःसृताः॥ तेषामन्नमिदंदत्तंतृप्यंतुचमदंतुच ॥ पितृपात्राग्रेकुमारकुमारिकाभ्यःइदंप्रकिरान्नंदत्तंनमम ॥ येअग्निदग्धायेअनग्निदग्धाजीवा जाताःकुलेमम ॥ भूमौदत्तेनपिंडेनतृप्तायांतुपरांगतिं ॥ अग्निदग्धेभ्यःअनग्निदग्धेभ्यःअस्मत्कुलप्रसूतेभ्योजीवेभ्यःउच्छिष्टपिं डःस्वधा ॥ सव्यं ॥ पाणिपादौप्रक्षाल्य ॥ पवित्रेविसृज्य ॥ आचम्यपुनःपवित्रेधृत्वा ॥ उच्छिष्टभाग्भ्योन्नंदीयतां ॥ यजमा लकुलेजातादासादास्योन्नकांक्षिणः ॥ तेसर्वेतृप्तिमायांतुमयादत्तेनभूतले ॥ अस्मिन्श्राद्धेपिंडप्रदानंकरिष्ये ॥ कुरुष्व ॥ अमृ तापिधानमसि ॥ श्रद्धायांप्राणेनिविंश्यामृतꣳहुतं ॥ प्राणमन्नेनाप्यायस्व ॥ श्रद्धायामपानेनिविंश्यामृतꣳहुतं ॥ अपानमन्नेना प्यायस्व ॥ श्रद्धायांव्यानेनिविंश्यामृतꣳहुतं ॥ व्यानमन्नेनाप्यायस्व ॥ श्रद्धायामुदानेनिविंश्यामृतꣳहुतं ॥ उदानमन्नेनाप्या यस्व ॥ श्रद्धायांसमानेनिविंश्यामृतꣳहुतं ॥ समानमन्नेनाप्यायस्व ॥ अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः ॥ ईशःसर्वस्यज गतःप्रभुःप्रीणातिविश्वभुक् ॥ रौरवेपूयनिलयेपद्मार्बुदनिवासिनां ॥ अर्थिनामुदकंदत्तंह्यक्षय्यमुपतिष्ठतु ॥ अपसव्यं ॥ सव्यं जान्वाच्य ॥ अपहताअसुरारक्षाꣳसिवेदिषदः ॥ दर्भेणलेखांलिखति ॥ तामभ्युक्ष्य ॥ सकृदाच्छिन्नैर्दर्भैरवस्तीर्य ॥ सकृदाच्छि न्नंबर्हिरूर्णामृदु ॥ स्योनंपितृभ्यस्त्वाभराम्यहं ॥ अस्मिन्त्सीदंतुमेपितरꣳसोम्याः ॥ पितामहाःप्रपितामहाश्चानुगैःसह ॥ तेषुदर्भेष्वा सीनांजलिनात्रिरुदकंनिनयति ॥ मार्जयंतांपितरःसोम्यासोमार्जयंतांपितामहाःसोम्यासोमार्जयंतांप्रपितामहाःसोम्यासःमार्ज यंतांसर्वेपितरः ॥ एतत्तेअस्मत्पितःशर्मन्गोत्रवसुरूपायेतत्वामह ॥ पित्रेशर्मणेगोत्रायवसुरूपायअयंपिंडःस्वधा ॥ गयास्थो

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sravya Trust Foundation, Delhi and eGangotri

न्मात्रेदायैगोत्रायैवसुरूपायैअयंपिंडःस्वधा ॥ गयास्थोदत्तोनममताभ्यश्च ॥ गयास्थोदत्तोऽस्तु ॥ एवंपितामहीप्रपितामह्योः एवंमातामहसपत्नीकस्त्रीपुत्रकन्यापितृव्यमातुलभ्रातृपितृभगिनीमातृभगिनीआत्मभगिन्योधवापत्ययुक्ताःश्वशुरगुरुशिष्या प्ताःतीर्थेमहालयेच ॥ आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीयाः ॥ वंशद्वयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसे वकाश्च ॥ मित्राणिसख्युःपशवश्चवृक्षादृष्टाश्चपृष्टाश्चकृतोपकाराः ॥ जन्मांतरंयेममसंगताश्चतेभ्यःस्वधापिंडमहंददामि ॥ १ ॥ पितृवंशेमृतायेचमातृवंशेतथैवच ॥ गुरुश्वशुरबंधूनांयेचान्येबांधवामृताः ॥ येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः ॥ क्रिया लोपगताश्चैवजात्यंधाःपंगवस्तथा ॥ विरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेमम ॥ धर्मपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतु ॥ २ ॥ असीपत्रवनेघोरेकुंभीपाकेचयेगताः ॥ तेषामुद्धरणार्थायइमंपिंडंददाम्यहं ॥ ३ ॥ उत्सन्नकुलवंश्यानांयेषांदाताकुलेनहि ॥ धर्मपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतु ॥ ४ ॥ शमीपत्रप्रमाणेनपिंडंदद्याद्गयाशिरे ॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं ॥ अत्रपितरोमादयध्वं ॥ आंजनमांजन्यायअभ्यंजनमभ्यंजन्याययथाभागमेवैनान्प्रीणाति ॥ अंक्ष्वासावंक्ष्वासावितित्रिरां जनं ॥ पितःशर्मन्गोत्रवसुरूपअंक्ष्व ॥ एवंपितामहादि एवंअभ्यंक्ष्व ॥ अभ्यंक्ष्वासावभ्यंक्ष्वासावितित्रिरभ्यंजनं ॥ ओष्मणो व्यावृतउपास्ते ॥ ऊष्मभागाहिपितरः ॥ उत्तरआयुषिलोमछिंधीत ॥ नमस्करोति ॥ नमस्कारोहिपितॄणां ॥ ततःसव्येनपिं डपूजांकरिष्ये ॥ (युक्तंत्वपसव्येन) ॥ पिंडसंस्थाःपितरःपाद्यंस्वधा अर्घ्यं आचमनीयं स्नानं० वस्त्रं० अलंकारान्० गंधं० पुष्पंस्वधा धूपंस्वधा दीपंस्वधा नैवेद्यंस्वधा तांबूलंस्वधा दक्षिणां० फलंस्वधा ॥ अथोपतिष्ठते ॥ अपसव्यं ॥ नमोवःपित

---

१ मात्रादिद्वित्वेएतद्वामस्मन्मातरौ यज्ञदेश्रीदेयाश्रयुवामनुअस्मन्मातृभ्यामित्याद्युच्चार्यएकएवपिंडोदेयः बहुत्वेबहुवचननैकएव ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रोरसायनमोवःपितरःशुष्मायनमोवःपितरोजीवायनमोवःपितरःस्वधायनमोवःपितरोमन्यवेनमोवःपितरोघोरायपितरोनमो वोयएतस्मिंल्लोकेस्थयुष्माꣳस्तेनुयेस्मिंल्लोकेमांतेनुयएतस्मिंल्लोकेस्थयूयंतेषांवासिष्ठाभूयास्तयेस्मिंल्लोकेहंतेषांवासिष्ठोभूयासं ॥ ऊर्ज स्वतीस्वधयावंदमानास्तावोगच्छंतिपितरःस्योनाः ॥ ऊर्जवहंतीःसततमक्षिकोदकाःक्षीरमुदकंघृतंमधुपयःकीलालंपरिस्रुतꣳ स्वधास्थतर्पयतमेपितॄन् स्वधास्थतृप्यततृप्यत ॥ इतिलेपोदकमप्रदक्षिणंपिंडोपरिक्षिपेत् ॥ ततःपाणीव्यत्यस्यदक्षिणमुत्तरमु त्तरंचदक्षिणं ॥ परेतपितरःसोम्यागंभीरैःपथिभिःपूर्व्यैः ॥ अथापितॄन्सुविदत्राꣳअपीतयमेनयेसधमादंमदंति ॥ मनोन्वाहुं वामहेनाराशꣳसेनस्तोमेन पितृणांचमन्मभिः ॥ आनएतुमनःपुनःक्रत्वेदक्षायजीवसे ॥ ज्योक्सूर्यंदृशे ॥ पुनर्नःपितरोमनोद दातुदैव्योजनः ॥ जीवंव्रातꣳसचेमहि ॥ सव्यंअग्निंविसर्जयेत् ॥ यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिꣳसिम ॥ अग्नि र्मातस्मादेनसःप्रमुंचतुदुरितायानिंचकृमकरोतुमामनेनसं ॥ ततःसव्येनब्राह्मणहस्ते शिवाआपःसंतु ॥ संतुशिवाआपः ॥ सौम नस्यमस्तु ॥ अस्तुसौमनस्यं ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टंच ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ दीर्घ मायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ अपसव्येनपितृहस्तेशिवाआपःसंतु ॥ संतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौम नस्यं ॥ तिलाःपांतु ॥ पांतुतिलाः ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्त्वितिभवंतोब्रुवंतु ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तु ष्टिश्चास्तु ॥ अपसव्यं ॥ ऋचेत्वारुचेत्वासमित्स्रवंतिसरितोनधेनाः ॥ अंतर्हृदामनसापूयमानाः ॥ घृतस्यधारा अभिचाकशी मि ॥ हिरण्ययोवेतसोमध्यआसां ॥ तस्मिन्सुपर्णोमधुकृत्कुलायी भगाय सोम भुड्भ्यवताभ्यः ॥ तस्यासतेहरयःसप्ततीरेस्वधांदुहा

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तमुक्त्वायद्दत्तंआपरपक्षिकश्राद्धीयान्नोदकादितक्षय्यमस्त्वितिभवतोब्रुवंतु ॥ अस्त्वक्षय्यं ॥ सव्यं ॥ धूरिलोचन० श्राद्धीयमन्न मुदकादितदक्षय्यम० ॥ अस्त्वक्षय्यं ॥ सव्यं ॥ अस्यश्राद्धयज्ञाख्यस्यकर्मणःप्रतिष्ठाफलसंसिद्ध्यर्थंदेवानांसुवर्णंपितृणांरजतं श्राद्धभोक्तृभ्योब्राह्मणेभ्यःइमांदक्षिणांयुष्मभ्यमहंसंप्रददे ॥ दक्षिणाःपांतु ॥ पांतुदक्षिणाः ॥ अपसव्यं ॥ पित्रादिसमस्तपि तृगणेभ्यःस्वधोच्यतां ॥ अस्तुस्वधा ॥ स्वधासंपद्यतामितिभवंतोब्रुवंतु ॥ संपद्यतांस्वधा ॥ सव्यं ॥ अग्निपुरोगाविश्वेदेवाः प्रीयंतामितिभवंतो० ॥ प्रीयंतांविश्वेदेवाः ॥ अपसव्यं ॥ वसुपुरोगाःपितरःप्रीयंतामितिभवंतोब्रुवंतु ॥ प्रीयंतांपितरः ॥ सव्यं ॥ सर्वेस्वस्तिभवंतोब्रुवंतु ॥ आयुष्मतेस्वस्ति ॥ शोभनंहविः ॥ आत्मालंकारः ॥ शाकपाकाःपितृप्रियाः ॥ उत्तमो त्तमाः ॥ पिंडान्नमस्कृत्य ॥ देवपितृणामग्रेसहैवगोत्राशिषःप्रार्थयते ॥ विप्रहस्तेअक्षतान्दद्यात् ॥ अघोराःपितरःसंतु ॥ गोत्रं वर्धतां ॥ दातारोनोभिवर्धतांवेदाःसंततिरेवनः ॥ श्रद्धाचनोमाव्यगमत् ॥ बहुदेयंचनोस्तु ॥ अन्नंचनोबहुभवेत् ॥ अतिथीं श्चलभेमहि ॥ याचितारश्चनःसंतु ॥ माचयाचिष्मकंचन ॥ इतिप्रार्थ्य ॥ दातारोवोभिवर्धतां ॥ वेदाःसंततिरेववः ॥ श्रद्धा चवोमाव्यगमत् ॥ बहुधेयंचवोस्तु ॥ अन्नंचवोबहुभवेत् ॥ अतिथींश्चलभध्वं ॥ याचितारश्चवःसंतु ॥ माचयाचिढ्वंकंचन ॥ स्वस्तिगोत्रंगोत्रस्याभिवृद्धिरस्तु ॥ एताःसत्याआशिषःसंतु ॥ देवपितृप्रसादोस्तु ॥ गयाकृतश्राद्धमस्तु ॥ पिंडानुद्वासयिष्ये॥ उद्वासय ॥ तद्विष्णोःपरमंपदꣳसदापश्यंतिसूरयः ॥ दिवीवचक्षुरातंतं ॥ तद्विप्रासोविपन्यवोजागृवाꣳसःसमिंधते ॥ विष्णोर्य त्परमंपदं ॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामोक्षदायकाः ॥ पिंडस्थानेशांतिःपुष्टिस्तुष्टि श्चास्त्वितिभवंतोब्रुवंतु ॥ पिंडस्थानेशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ स्वस्थानेवासः ॥ देवान्पितॄन्सहैवविसर्जयिष्ये ॥ विसर्जय ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अपसव्यं ॥ वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ॥ अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ उत्तिष्ठंतुपितरः ॥ सव्येनविश्वेदेवैःसह ॥ आमावाजस्यप्रसवोजगम्यादाद्यावापृथिवीविश्वशंभू ॥ आमागंतांपितरामातराचामासोमोअमृतत्वायगम्यात् ॥ स्वादुष्टसदःपितरोवयोधाःकृच्छ्रेश्रितःशक्तीवंतोगभीराः ॥ चित्रसेनाइषुबलाअमृध्राःसतोवीराउरवोव्रातसाहाः ॥ ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृथिवीअनेहसा ॥ पूषानःपातुदुरितादृतावृधोरक्षामाकिर्नोअघशंसईशत ॥ ब्राह्मणाः ॥ इहैवस्तंमावियौष्टंविश्वमायुर्व्यश्नुतं ॥ क्रीळंतौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे ॥ आयुःप्रजांधनंविद्यांस्वर्गमोक्षंसुखानिच ॥ प्रयच्छंतुतथाराज्यंप्रीतानृणांपितामहाः ॥ एताःसत्याआशिषःसंतु ॥ श्राद्धंगयाकृतश्राद्धमस्तु ॥ पितृणामक्षय्यातृप्तिरस्तु ॥ यजमानः ॥ अद्यमेसफलंजन्मभवत्पादाब्जवंदनात् ॥ अद्यमेवंशजाःसर्वेयातावोनुग्रहाद्दिवं ॥ यत्तुशाकादिदानेनक्लेशितायूयमीदृशाः ॥ तत्क्लेशजातंचित्तस्थंविस्मृत्यक्षंतुमर्हथ ॥ विस्मृत्यक्षमामहे ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंद्विजोत्तमाः ॥ श्राद्धंसंपूर्णतांयातुप्रसादाद्भवतांमम ॥ श्राद्धंसंपूर्णमस्तु ॥ यःकश्चिच्छ्राद्धयज्ञस्यप्रोक्तोमन्वादिभिर्विधिः ॥ असौयुष्मत्प्रसादेनसंपूर्णःसकलोस्तुमे ॥ अस्तुसंपूर्णःसकलः ॥ शेषोप्यस्ति ॥ हूयतां ॥ इष्टैःसहभुज्यतां ॥ वासिष्ठासःपितृवद्वाचंमक्रतदेवाँईळानाऋषिवत्स्वस्तयें ॥ प्रीताईवज्ञातयःकाममेत्यास्मेदेवासोवधूनुतावसुं ॥ देवान्वसिष्ठोअमृतान्ववंदेयेविश्वाभुवनाभिप्रतस्थुः ॥ तेनोरासंतामुरुगायमद्ययूयंपातस्वस्तिभिःसदानः ॥ इदंपितृभ्योनमोअस्त्वद्येतिनमस्कारवतीमंततःशंसतित स्मादंततःपितृभ्योनमस्क्रियतेतदाहुर्व्याहावंपित्र्याःशंसेत ॥ अन्याहावाँइति ॥ व्याहावमेवशंसेदसंस्थितंवैपितृयज्ञस्यसाध्वसं

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शोप॑दधाति॒द्वाद॑शाक्षरा॒जग॑ती॒जाग॑ताःप॒शवो॒जग॑त्यै॒वास्मै॑प॒शूनव॑रुंधे॒ष्टाव॑ष्टाव॒न्येषु॒धिष्णि॑ये॒षूप॑दधात्य॒ष्टाश॑फाःप॒शवः॑प॒शूने॒वाव॑
रुंधे॒षण्मा॑र्जा॒लीये॒षड्वा॒ऋ॒तव॑ऋ॒तवः॒खलु॒वैदे॒वाःपि॒तर॑ऋ॒तूने॒वदे॒वान्पि॒तॄन्प्री॑णाति ॥ जपच्छिद्रंतपश्छिद्रंयच्छिद्रंश्राद्धकर्मणि ॥
सर्वंभवतुमेऽछिद्रंब्राह्मणानांप्रसादतः ॥ सर्वमच्छिद्रंभवतु ॥ अनेनाग्नौकरणब्राह्मणभोजनपिंडप्रदानकर्मत्रयात्मकेनश्राद्धेन
पितृस्वरूपीजनार्दनवासुदेवःप्रीयतां ॥ एषपितृयज्ञःतत्सद्ब्रह्मार्पणमस्तु ॥ द्विराचामेत् ॥ तर्पणंकुर्यात् ॥ अद्येत्यादि० पितृ
णांमहालयश्राद्धांगभूतंपरेहनिक्रियमाणमपिसद्योपकर्षेणदेवपूर्वकंतर्पणंकरिष्ये ॥ विश्वान्देवांस्तर्पयामि २ ॥ प्राचीनावीती ॥
पितरंशर्माणमित्यादिसर्वान्पितॄंस्तर्पयेत् स्वयंभुंजीत ॥ इतिमहालयश्राद्धम् ॥ ॥ छ ॥ ॥ छ ॥

॥ ६० ॥ अन्नसूक्तानि ॥

उप॑ह्वयेसु॒दुघां॑धे॒नुमे॒तांसु॒हस्तो॑गो॒धुगु॒तदो॑हदेनां ॥ श्रेष्ठं॑स॒वंस॑वि॒तासा॑विषंनो॒भी॑द्धोघ॒र्मस्तदु॒षुप्रवो॑चं ॥ हिं॒कृ॒ण्व॒तीव॑सु॒पत्नी॒वसू॑नां
व॒त्समि॒च्छंती॒मन॑सा॒भ्यागा॑त् ॥ दु॒हाम॒श्विभ्यां॒पयो॑अ॒घ्न्येयंसाव॑र्धतांमह॒तेसौभ॑गाय ॥ इंद्र॒दृह्य॑यामको॒शाअ॑भूवन्य॒ज्ञाय॑शिक्षगृ
ण॒तेसखि॑भ्यः ॥ दु॒र्मा॒यवो॑दु॒रेवा॒मर्त्या॑सोनिषं॒गिणो॑रि॒पवो॒हंत्वा॑सः ॥ वाशी॑मंतऋष्टि॒मंतो॑मनी॒षिणः॑सु॒धन्वा॑न॒इषु॑मंतोनिषं॒गिणः॑ ॥
स्वश्वा॑स्थसु॒रथाः॑पृश्निमातरःस्वायु॒धाम॑रुतोयाथना॒शुभं॑ ॥ चतु॑ष्कपर्दायुव॒तिःसु॒पेशा॑घृ॒तप्र॑तीकाव॒युना॑निवस्ते ॥ तस्यां॑सुप॒र्णावृष॑
णा॒निषे॑दतु॒र्यत्र॑दे॒वाद॑धि॒रेभा॑ग॒धेयं॑ ॥ एकः॑सुप॒र्णःसस॑मु॒द्रमावि॑वेश॒सइ॒दंविश्वं॒भुव॑नं॒विच॑ष्टे ॥ तंपाके॑न॒मन॑सापश्य॒मंति॑त॒स्तंमा॒तारे॑
ह्लि॒सउ॑रेह्लिमा॒तरं॑ ॥ सु॒प॒र्णंविप्राः॑क॒वयो॒वचो॑भि॒रेकं॒संतं॑बहु॒धाक॑ल्पयंति ॥ छंदां॑सिच॒दध॑तोअध्व॒रेषु॒ग्रहा॒न्त्सोम॑स्यमिमते॒द्वाद॑श ॥
पि॒तुंनुस्तो॑षंम॒होध॒र्माणं॒तवि॑षीं ॥ यस्य॑त्रि॒तोव्योज॑सावृ॒त्रंविप॑र्वम॒र्दय॑त् ॥ स्वादो॑पितो॒मधो॑पितोव॒यंत्वा॑ववृमहे ॥ अ॒स्माक॑मवि॒

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ताभव ॥ उपनःपितवाचरशिवःशिवाभिरूतिभिः॥ मयोभुरद्विषेण्यःसखासुशेवोअद्वयाः॥ तवत्येपितोरसारजांस्यनुविष्ठिताः॥ दिविवाताइवश्रिताः॥ तवत्येपितोददतस्तवस्वादिष्ठतेपितो ॥ प्रस्वाह्मानोरसानांतुविग्रीवाइवेरते ॥ त्वेपितोमहानांदेवानां मनोहितं ॥ अकारिचारुकेतुनातवाहिमवसावधीत् ॥ यददोपितोअजगन्विवस्वपर्वतानां ॥ अत्राचिन्नोमधोपितोरभक्षायगम्याः ॥ यद्पामोषधीनांपरिशमारिशामहे ॥ वातापेपीवइद्भव ॥ यत्तेसोमगवाशिरोयवाशिरोभजामहे ॥ वातापेपीवइद्भव ॥ करंभओषधेभवपीवोवृक्कउदारथिः ॥ वातापेपीवइद्भव ॥ तंत्वावयंपितोवचोभिर्गावोनहव्यासुषूदिम ॥ देवेभ्यस्त्वासधमादं मस्मभ्यंत्वासधमादं ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः ॥ दृह्लाचिदारुजेवसु ॥ अभीषुणःसखीनामविताजरितॄणां ॥ शतंभवास्यूतिभिः ॥ ॥ ततआब्रह्मन्नित्यनुवाकंपठंति ॥ ७ ॥

आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामास्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरंधिर्योषा जिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतांनिकामेनिकामेनःपर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतांयोगक्षेमोनःक ल्पतां ॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामित्याह ॥ ब्राह्मणएवब्रह्मवर्चसंदधाति ॥ तस्मात्पुराब्राह्मणोब्रह्मवर्चस्यजाय त ॥ आस्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतामित्याह ॥ राजन्यएवशौर्यंमहिमानंदधाति॥ तस्मात्पुराराजन्यइषव्यः शूरोमहारथोजायत ॥ दोग्ध्रीधेनुरित्याह ॥ धेन्वामेवपयोदधाति ॥ तस्मात्पुरादोग्ध्रीधेनुरजायत॥ वोढानड्वानित्याह ॥ अन डुह्येववीर्यंदधाति ॥ तस्मात्पुरावोढानड्वानजायत ॥ आशुःसप्तिरित्याह ॥ अश्वेनैवजवंदधाति ॥ तस्मात्पुराशुरश्वोजायत ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यते ॥ यत्रैतेनयज्ञेनयजंते ॥ सभेयोयुवेत्याह ॥ यावेपूर्ववयसौ ॥ ससभयायुवा ॥ तस्माद्युवापुमान्प्रियोभावुकः ॥ आस्य यजमानस्यवीरोजायतामित्याह ॥ आहवैतत्रयजमानस्यवीरोजायते ॥ यत्रैतेन० ॥ निकामेनिकामेनःपर्जन्योवर्षत्वित्याह ॥ निकामेनिकामेहवैतत्रपर्जन्योवर्षति ॥ यत्रैतेनय०॥ फलिन्योनओषधयःपच्यंतामित्याह ॥ फलिन्योहवैतत्रौषधयःपच्यंते ॥ यत्रैतेन० ॥ योगक्षेमोनःकल्पतामित्याह ॥ कल्पतेहवैतत्रप्रजाभ्योयोगक्षेमः ॥ यत्रैतेनयज्ञेनयजंते ॥ ॥ नमःककुभायनिषंगिणेस्तेनानांपतयेनमः ॥ नमोनिषंगिणइषुधिमतेतस्कराणांपतयेनमः ॥ नमोनिषंगिणेचेषुधिमतेच ॥ येतीर्थानिप्रचरंति सृकावंतोनिषंगिणः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ सइषुहस्तैःसनिषंगिभिर्वशीसꣳस्रष्टासयुधइंद्रोगणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता ॥ ॥ ततस्त्रिसुपर्णंपठेत् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६१ ॥ त्रिसुपर्णम् ॥

श्रीः ॥ ॐ शांतिःशांतिःशांतिः ॥ ॐ ब्रह्ममेतुमां ॥ मधुमेतुमां ॥ ब्रह्ममेवमधुमेतुमां ॥ यास्तेसोमप्रजावत्सोभिसोअहं ॥ दुष्वप्नहंदुरुःषह ॥ यास्तेसोमप्राणाꣳस्तान्जुहोमि ॥ त्रिसुपर्णमयाचितंब्राह्मणायदद्यात् ॥ ब्रह्महत्यांवाएतेघ्नंति ॥ येब्राह्मणास्त्रिसुपर्णंपठंति ॥ तेसोमंप्राप्नुवंति ॥ आसहस्रात्पंक्तिंपुनंति ॥ ॐ ब्रह्ममेधया ॥ मधुमेधया ॥ ब्रह्ममेवमधुमेधया ॥ अद्यानो देवसवितःप्रजावत्सावीःसौभगं ॥ परादुष्वाप्नियꣳसुव ॥ विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्मआसुव ॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसिमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमाꣳअस्तुसूर्यः ॥ माध्वीर्गावोभवंतुनः ॥ यइमंत्रिसुपर्णमयाचितंब्राह्मणायदद्यात् ॥ भ्रूणहत्यांवाएतेघ्नंति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

येब्राह्मणास्त्रिसुपर्णपठंति ॥ तेसोमंप्राप्नुवंति ॥ आसहस्रात्पंक्तिंपुनंति ॥ ॐ ब्रह्ममेधवा ॥ मधुमेधवा ॥ ब्रह्ममेवमधुमेधवा ॥ ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणां ॥ श्येनोगृध्राणांस्वधितिर्वनानांसोमःपवित्रमत्येतिरेभन् ॥ हꣳसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् ॥ ऋचेत्वारुचे त्वासमित्स्रवंतिसरितोनधेनाः ॥ अंतर्हृदामनसापूयमानाः ॥ घृतस्यधाराअभिचाकशीमि ॥ हिरण्ययोवेतसोमध्यआसां ॥ तस्मिन्त्सुपर्णोमधुकृत्कुलायीभजन्नास्तेमधुदेवताभ्यः ॥ तस्यासतेहरयःसप्ततीरेस्वधांदुहानाअमृतस्यधारां ॥ यइदंत्रिसुपर्णमयाचितंब्राह्मणायदद्यात् ॥ वीरहत्यांवाएतेघ्नंति ॥ येब्राह्मणास्त्रिसुपर्णपठंति ॥ तेसोमंप्राप्नुवंति ॥ आसहस्रात्पंक्तिंपुनंति ॥ ॐ तस्यैवं विदुषोयज्ञस्यात्मायजमानःश्रद्धापत्नीशरीरमिध्ममुरोवेदिर्लोमानिबर्हिर्वेदःशिखाहृदयंयूपःकामआज्यंमन्युःपशुस्तपोग्निर्दमःश मयितादक्षिणावाग्घोताप्राणउद्गाताचक्षुरध्वर्युर्मनोब्रह्माश्रोत्रमग्नीद्यावद्धियतेसादीक्षायदश्नातितद्धविर्यत्पिबतितदस्यसोमपा नंयद्रमतेतदुपसदोयत्संचरत्युपविशत्युत्तिष्ठतेचसप्रवर्ग्योयन्मुखंतदाहवनीयोयाव्याहृतिराहुतिर्यदस्यविज्ञानंतज्जुहोतियत्सायं प्रातरत्तितत्समिधंयत्प्रातर्मध्यंदिनꣳसायंचतानिसवनानियेअहोरात्रेतेदर्शपूर्णमासौयेर्धमासाश्चमासाश्चतेचातुर्मास्यानियक्रतव स्तेपशुबंधायेसंवत्सराश्चपरिवत्सराश्चतेहर्गणाःसर्ववेदसंवाएतत्सत्रंयन्मरणंतदवभृथएतद्वैजरामर्यमग्निहोत्रꣳसत्रंयएवंविद्वानुद गयनेप्रमीयतेदेवानामेवमहिमानंगत्वादित्यस्यसायुज्यंगच्छत्यथयोदक्षिणेप्रमीयतेपितृणामेवमहिमानंगत्वाचंद्रमसःसायुज्यꣳ सलोकतामाप्नोत्येतौवैसूर्याचंद्रमसोर्महिमानौब्राह्मणोविद्वानभिजयतितस्माद्ब्राह्मणोमहिमानमाप्नोतितस्माद्ब्राह्मणोमहिमानं ॥ स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ६२ ॥ अभिश्रवणसूक्तानि ॥

ॐ युंजतेमनऽउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः॥ सुवाग्देवदु र्याऽआवददेवश्रुतौदेवेष्वाघोषेथामानोवीरोजायतांकर्मण्योयऽसर्वेनुजीवाम्योबहूनामसद्वशी॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेप दं॥समूढमस्यपाऽसुरइरावतीधेनुमतीहिभूतऽसूयवसिनीमनवेयशस्ये॥व्यस्कभ्नाद्रोदसीविष्णुरेतेदाधारपृथिवीमभितोमयूखैः॥ प्राचीप्रेतमध्वरंकल्पयंतीऊर्ध्वंयज्ञंनयतंमाजीह्वरतमत्रंरमेथांवर्ष्मन्पृथिव्यादिवोवाविष्णवुतवापृथिव्याम्होवाविष्णवुतवांतरि क्षाद्रस्तौपृणस्वबहुभिर्वसव्यैराप्रयच्छदक्षिणादोतसव्यात् ॥ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजाऽसियोअस्कभाय दुत्तरऽसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णोरराटमसिविष्णोःपृष्ठमसिविष्णोश्यस्नेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसि विष्णवेत्वा॥१॥ कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवाऽइभेन ॥२॥ रक्षोहणोवलगहनोवैष्णवान्खनामीदमहंतंवलगमुद्वपा मियन्नःसमानोयमसमानोनिचखानेदमेनमधरंकरोमियोनःसमानोयोसमानोरातीयतिंगायत्रेणच्छंदसावबाढोवलगःकिमत्रभद्रं तन्नौसहविराडसिसपत्नहासम्राडसिभ्रातृव्यहास्वराडस्यभिमातिहाविश्वाराडसिविश्वासांराष्ट्राणाऽहंतारक्षोहणोवलगहनःप्रो क्षामिवैष्णवान्रक्षोहणोवलगहनोवनयामिवैष्णवान्यवोसियवयास्मद्वेषोयवयारातीरक्षोहणोवलगहनोवस्तृणामिवैष्णवान्रक्षो हणोवलगहनोभिजुहोमिवैष्णवान्रक्षोहणोवलगहनावुपदधामिवैष्णवीरक्षोहणोवलगहनौपयूंहामिवैष्णवीरक्षोहणोवलगहनौप रिस्तृणामिवैष्णवीरक्षोहणोवलगहनौवैष्णवीबृहन्नसिबृहद्भावाबृहतीमिंद्रायवाचंवद॥३॥ सोमायपितृमतेपुरोडाशऽष्टकपालंनि र्वपतिपितृभ्योबर्हिषद्भ्योधानाःपितृभ्योग्निष्वात्तेभ्योभिवान्यायैदुग्धेमंथमेतत्तेततयेचत्वामन्वेतत्तेपितामहप्रपितामहयेचत्वाम

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्वत्रपितरोयथाभागमंदध्वꣳसुसंदृशंत्वावयंमघवन्मंदिषीमहि॥प्रनूनंपूर्णवंधुरस्तुतोयासिवशाꣳअनु॥योजान्विंद्रतेहरी॥ अक्षन्न मीमदंतह्यवंप्रियाअधूषत॥ अस्तोषतस्वभानवोविप्रानविष्ठयामती॥ योजान्विंद्रतेहरी॥अक्षन्पितरोमीमदंतपितरोतीतृपंतपितरो मीमृजंतपितरः॥ परेतपितरःसोम्यागंभीरैःपथिभिःपूर्व्यैः॥ अथापितॄन्त्सुविदत्राꣳअपीतयमेनयेसधमादंमदंति॥ मनोन्वाहुवामहेनाराशꣳसेनस्तोमेनपितृणांचमन्मभिः॥ आनएतुमनःपुनःक्रत्वेदक्षायजीवसे॥ ज्योक्चसूर्यंदृशे॥ पुनर्नःपितरोमनोददातुदैव्योजनः॥ जीवंव्रातꣳसचेमहि॥ यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिꣳसिम॥ अग्निर्मातस्मादेनसोगार्हपत्यः प्रमुंचतुदुरितानिचकृमकरोतुमामनेनसं॥ ४॥ उशंतस्त्वाहवामहउशंतःसमिधीमहि॥ उशंनुशतआवहपितॄन्हविषेअत्तवे॥ त्वꣳसोमप्राचिकितोमनीषात्वꣳरजिष्ठमनुनेषिपंथां॥ तवप्रणीतीपितरोनइंदोदेवेषुरत्नमभजंतधीराः॥ त्वयाहिनःपितरःसोमपूर्वेकर्माणिचक्रुःपवमानधीराः॥ वन्वन्नवातःपरिधीꣳरपोर्णुवीरेभिरश्वैर्मघवाभवानः॥ त्वꣳसोमपितृभिःसंविदानोनुद्यावापृथिवीआततंथ॥ तस्मैतइंदोहविषाविधेमवयꣳस्यामपतयोरयीणां॥ अग्निष्वात्ताःपितरएहगच्छतसदःसदःसदतसुप्रणीतयः॥ अत्ताहवीꣳषिप्रयतानिबर्हिष्यथारयिꣳसर्ववीरंदधातन॥ बर्हिषदःपितरऊत्यर्वागिमावोहव्याचकृमाजुषध्वं॥ तआगतावसाशं तमेनाथास्मभ्यꣳशंयोररपोदधात॥ आहंपितॄन्त्सुविदत्राꣳअवित्सिनपातंचविक्रमणंचविष्णोः॥ बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठाः॥ उपहूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियेषु॥ तआगमंतुतइहश्रुवंत्वधिब्रुवंतुतेअवंत्वस्मान्॥ उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु॥ इदंपितृभ्योनमोअस्त्वद्यये

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षाणाः ॥ शुचीदयंदीधितिमुक्थशासःक्षामाभिदताअरुणीरपव्रन् ॥ यदग्नकव्यवाहनपितृन्यक्ष्यन्ऋतावृधः ॥ प्रचह्व्यानिवक्ष्यसिदेवेभ्यश्चपितृभ्यऽआ ॥ त्वमग्नईडितोजातवेदोवाह्व्यानिसुरभीणिकृत्वा ॥ प्रादाःपितृभ्यःस्वधयातेअक्षन्नद्धित्वंदेवप्रयताहवीꣳषि ॥ मातलीकव्यैर्यमोअंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ॥ याꣳश्चदेवावावृधुर्येचदेवान्त्स्वाहान्येस्वधयान्येमदंति ॥ इमंयमप्रस्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः ॥ आत्वामंत्राःकविशस्तावहन्त्वेनाराजन्हविषामादयस्व ॥ अंगिरोभिरागहियज्ञियेभिर्यमंवैरूपैरिहमादयस्व ॥ विवस्वंतꣳहुवेवःपितातेस्मिन्यज्ञेबर्हिष्यानिषद्य ॥ अंगिरसोनःपितरोनवग्वाअथर्वाणोभृगवःसोम्यासः ॥ तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ ५ ॥ भक्षेहिमाविंशदीर्घायुत्वायशंतनुत्वायराय स्पोषायवर्चसेसुप्रजास्त्वायेहिवसोपुरोवसोप्रियोमेहृदोस्यश्विनोस्त्वाबाहुभ्याꣳसघ्यासंनृचक्षसंत्वादेवसोमसुचक्षाअवख्येषंमंद्राबिभूतिःकेतुर्यज्ञानांवाग्जुषाणासोमस्यतृप्यतुमंद्रास्वर्वाच्यदितिरनाहतशीर्ष्णीवाग्जुषाणासोमस्यतृप्यत्वेहिविश्वचर्षणेशंभूर्मयोभूःस्वस्तिमाहरिवर्णप्रचरक्त्वेदक्षायरायस्पोषायसुवीरतायैमामाराजन्विबीभिषोमामेहार्दित्विषावधीः ॥ वृषणेशुष्मायायुषेवर्चसे ॥ वसुमद्गणस्यसोमदेवतेमतिविदःप्रातःसवनस्यगायत्रछंदसइंद्रपीतस्यनराशꣳसपीतस्यपितृपीतस्यमधुमतउपहूतस्योपहूतोभक्षयामिरुद्रवद्गणस्यसोमदेवतेमतिविदोमाध्यंदिनस्यसवनस्यत्रिष्टुप्छंदसइंद्रपीतस्यनराशꣳसपीतस्यपितृपीतस्यमधुमतउपहूतस्योपहूतोभक्षयाम्यादित्यवद्गणस्यसोमदेवतेमतिविदस्तृतीयस्यसवनस्यजगतीछंदसइंद्रपीतस्यनराशꣳसपीतस्यपितृपीतस्यमधुमतउपहूतस्योपहूतोभक्षयामि ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ हिन्वमेगात्राहरिवोगणान्मेमावितीतृषः ॥ शिवोमेससप्तऋषीनुपतिष्ठस्वमामेवाङ्नाभिमतिंगाः ॥ अपामसोममृताअभूमादर्श्मज्योतिरविदामदेवान् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

किम॒स्मान्कृ॑णव॒दरा॑ति॒ःकिमु॑धू॒र्तिर॑मृत॒मर्त्य॑स्य ॥ यन्म॑आ॒त्मनो॑मिं॒दाभू॑द॒ग्निस्तत्पुन॒राहा॑र्जा॒तवे॑दा॒विच॑र्षणिः॥ पुन॑र॒ग्निश्चक्षु॑रदा॒त्पुन॒रिंद्रो॒बृह॒स्पतिः॑॥पुन॑र्मेअश्विनायु॒वंचक्षु॒राध॑त्तम॒क्ष्योः॥ इ॒ष्टय॑जुषस्तेदेवसोमस्तु॒तस्तो॑मस्यश॒स्तोक्थ॑स्य॒हरि॑वत॒इंद्र॑पीतस्य॒मधु॑मत॒उप॑हूत॒स्योप॑हूतोभक्षयामि ॥ आ॒पूर्या॒स्थामा॑पूरयतप्र॒जया॑च॒धने॑नच॥ए॒तत्ते॑तत॒येच॒त्वामन्वे॒तत्ते॑पितामहप्रपितामह॒येच॒त्वामन्वत्र॑पितरोयथाभा॒गंमं॑दध्वं॒नमो॑वःपितरो॒रसा॑य॒नमो॑वःपितर॒ःशुष्मा॑य॒नमो॑वःपितरोजी॒वाय॒नमो॑वःपितरःस्व॒धायै॒नमो॑वःपितरोम॒न्यवे॒नमो॑वःपितरोघो॒राय॒पित॑रो॒नमो॑वो॒यए॒तस्मिं॑ल्लो॒केस्थयु॒ष्माꣳस्तेनु॒येस्मिन्लो॒केमांतेनु॒यए॒तस्मिं॑ल्लो॒केस्थयू॒यंतेषां॒वसि॑ष्ठाभूयास्त॒येस्मिं॑ल्लो॒केहंतेषां॒वसि॑ष्ठोभूयासं॥प्रजा॑पते॒नत्वदे॒तान्य॒न्योविश्वा॑जा॒तानि॒परि॒ताब॑भूव॥यत्का॑मास्तेजुहु॒मस्तन्नो॑अस्तुव॒यꣳस्या॑म॒पत॑योरयी॒णां॥ दे॒वकृ॑त॒स्यैन॑सोव॒यज॑नमसिमनु॒ष्यकृ॑त॒स्यैन॑सोव॒यज॑नमसिपि॒तृकृ॑त॒स्यैन॑सोव॒यज॑नमस्य॒प्सुधौ॒तस्य॑सोमदेवते॒नृभिः॑सु॒तस्ये॒ष्टय॑जुषस्तु॒तस्तो॑मस्यश॒स्तोक्थ॑स्य॒योभ॒क्षोअ॑श्व॒सनि॒र्योगो॒सनि॒स्तस्य॑तेपि॒तृभि॑र्भ॒क्षंकृ॑त॒स्योप॑हूत॒स्योप॑हूतोभक्षयामि ॥६॥ प्र॒जाप॑ति॒र्मन॒सांधोछे॑तोधा॒तादी॒क्षाया॑ꣳसवि॒ताभृ॒त्यांपू॒षासो॑म॒क्रय॑ण्यां॒वरु॑ण॒उप॑न॒द्धोसु॑रःक्री॒यमा॑णोमि॒त्रःक्री॒तश्शि॑पिवि॒ष्टआसा॑दितोन॒रंधि॑षःप्रो॒ह्यमा॒णोभि॑पति॒राग॑तःप्र॒जाप॑तिःप्रणी॒यमा॑नो॒ग्निराग्नी॑ध्रे॒बृह॒स्पति॒राग्नी॑ध्रात्प्रणी॒यमा॑न॒इंद्रो॑हवि॒र्धानेदि॑ति॒रासा॑दितो॒विष्णु॑रुपावह्रि॒यमा॒णोथ॒र्वोपो॑त्तोय॒मो॑भिषु॑तोपूत॒पाआ॑धू॒यमा॑नोवा॒युःपू॒यमा॑नोमि॒त्रःक्षी॑र॒श्रीर्म॒ंथीस॑क्तु॒श्रीर्वै॑श्वदे॒वउन्नी॑तोरु॒द्रआहु॑तोवा॒युरावृ॑त्तोनृ॒चक्षाः॒प्रति॑ख्यातोभ॒क्षआग॑तःपितृ॒णांना॑राश॒ꣳसोसु॒रात्तः॒सिंधु॑रवभृ॒थम॑वप्र॒यन्त्स॑मु॒द्रोव॑गतःसलि॒लःप्रप्लु॑तः॒सुव॑रु॒दृचं॑ग॒तः॥७॥ अग्न॑उदधे॒यात॒इषु॑र्यु॒वानाम॒तया॑नोमृड॒तस्या॑स्ते॒नम॒स्तस्या॑स्त॒उपजीवं॑तोभूयासमा॒मेतु॒ध्रुवंगृ॒हाकिꣳशिलवन्य॒यात॒इषु॑र्यु॒वानाम॒तया॑नोमृड॒त

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्यः पंचमः ॥८॥ शिरोवाएतद्यज्ञस्ययद्धविर्धानंप्राणाउपरवाहविर्धानेखायंतेतस्माच्छीर्षन्प्राणाअधस्तात्खायंतेतस्मादधस्ताच्छी
र्ष्णःप्राणारक्षोहणोवलगहनोवैष्णवान्खनामीत्याहवैष्णवाहिदेवतयोपरवाअसुरावैनिर्यंतोदेवानांप्राणेषुवलगान्यखनंतान्बाहुमा
त्रेन्वविंदन्तस्माद्बाहुमात्राःखायंतइदमहंतंवलगमुद्वपामियन्नःसमानोयमसमानोनिचखानेत्याहद्वौवावपुरुषौयश्चैवसमानोय
श्चासमानोयमेवास्मैतौवलगंनिखनतस्तमेवोद्वपतिसंतृणत्तितस्मात्संतृण्णाअंतरतःप्राणानसंभिनत्तितस्मादसंभिन्नाःप्राणाअपोव
नयतितस्मादाद्राअंतरतःप्राणायवमतीरवनयति ॥ ऊर्ग्वैयवःप्राणाउपरवाःप्राणेष्वेवोर्जंदधातिबर्हिरवस्तृणातितस्माल्लोमशाअंत
रतःप्राणाआज्येनव्याघारयतितेजोवाआज्यंप्राणाउपरवाःप्राणेष्वेवतेजोदधातिहनूवाएतेयज्ञस्ययदधिषवणेनसंतृणत्त्यसंतृण्णेहि
हनूअथोखलुदीर्घसोमेसंतृद्येधृत्यैशिरोवाएतद्यदस्ययद्धविर्धानं ॥ प्राणाउपरवाहनूअधिषवणेजिह्वाचर्मग्रावाणोदंतामुखमाहव
नीयोनासिकोत्तरवेदिरुदरꣳसदोयदाखलुवैजिह्वयादत्स्वधिखादत्यथमुखंगच्छतियदामुखंगच्छत्यथोदरंगच्छतितस्माद्धविर्धाने
चर्मन्नधिग्रावभिरभिषुत्याहवनीयेहुत्वाप्रत्यंचःपरेत्यसदसिभक्षयंतियोवैविराजोयज्ञमुखेदोहंवेददुहएवैनामियंवैविराट्तस्यैत्व
क्कमोदोधिषवणेस्तनाउपरवाग्रावाणोवत्सोऋत्विजोदुहंतिसोमःपयोयएवंवेददुहएवैनां ॥ ९ ॥ असावादित्योस्मिंल्लोकआसीत्तं
देवाःपृष्ठैःपरिगृह्यसुवर्गंलोकमगमयन्परैरवस्तात्पर्यगृह्णन्दिवाकीर्त्येनसुवर्गेलोकेप्रत्यस्थापयन्परैःपरस्तात्पर्यगृह्णन्पृष्ठैरुपावारोह
न्त्सवाअसावादित्योमुष्मिन्लोकेपरैरुभयतःपरिगृहीतोयत्पृष्ठानिभवंतिसुवर्गमेवतैर्लोकंयजमानायंतिपरैरवस्तात्परिगृह्णंतिदिवा
कीर्त्येन ॥ सुवर्गेलोकेप्रतितिष्ठंतिपरैःपरस्तात्परिगृह्णंतिपृष्ठैरुपावरोहंतियत्परेपरस्तान्नस्युःपरांचःसुवर्गांल्लोकान्निष्पद्येरन्यद
वस्तान्नस्युःप्रजानिर्दहेयुरभितोदिवाकीर्त्यंपरःसामानोभवंतिसुवर्गएवैनांलोकउभयतःपरिगृह्णंतियजमानावैदिवाकीर्त्यꣳसंवत्स

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रःपरःसामानोभितोदिवाकीर्त्यैपरःसामानोभवंतिसंवत्सरएवोभयतःप्रतितिष्ठंतिपृष्ठंवैदिवाकीर्त्यैपार्श्वेपरःसामानोभितोदिवाकीर्त्यैपरःसामानोभवंतितस्माद्भितःपृष्ठंपार्श्वेभूयिष्ठाग्रहागृह्यंतेभूयिष्ठश्शस्यतेयज्ञस्यैवतन्मध्यतोग्रंथिंग्रथ्नंत्यविस्रंसायसंसगृह्यंतेसप्तवैशीर्षण्याःप्राणाःप्राणानेवयजमानेषुदधतियत्परांचीनानिपृष्ठानिभवंत्यमुमेवतैर्लोकमभ्यारोहंतियदिमंलोकंनप्रत्यवरोहेयुरुद्वामाद्येयुर्यजमानाःप्रवामीयेरन्यत्प्रतीचीनानिपृष्ठानिभवंतीममेवतैर्लोकंप्रत्यवरोहंत्यथोअस्मिन्नेवलोकेप्रतितिष्ठत्यनुन्मादायेंद्रोअप्रतिष्ठितआसीत्सप्रजापतिमुपाधावत्तस्माएतमेकविंशतिरात्रंप्रायच्छत्तमाहरत्तेनायजततोवैसप्रत्यतिष्ठद्येबहुयाजिनोप्रतिष्ठिताःस्युस्तएकविंशतिरात्रमासीरन्द्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशएतावंतोवैदेवलोकास्तेष्वेवयथापूर्वंप्रतितिष्ठंत्यसावादित्योनव्यरोचतसप्रजापतिमुपाधावत्तस्माएतमेकविंशतिरात्रंप्रायच्छत्तमाहरत्तेनायजततोवैसोरोचतयएवंविद्वाꣳसएकविंशतिरात्रमासतेरोचंतएवैकविंशतिरात्रोभवतिरुग्वाएकविंशोरुचमेवगच्छंत्यथोप्रतिष्ठामेवप्रतिष्ठाह्येकविंशोतिरात्रावभितोभवतोब्रह्मवर्चसस्यपरिगृहीत्यै ॥१०॥ किꣳस्विदासीत्पूर्वचित्तिःकिꣳस्विदासीद्बृहद्वयः ॥ किꣳस्विदासीत्पिशंगिलाकिꣳस्विदासीत्पिलिप्पिला ॥ द्यौरासीत्पूर्वचित्तिरश्वआसीद्बृहद्वयः ॥ रात्रिरासीत्पिशंगिलाविरासीत्पिलिप्पिला ॥ कःस्विदेकाकीचरतिकउस्विज्जायतेपुनः ॥ किꣳस्विद्धिमस्यभेषजंकिꣳस्विदावपनंमहत् ॥ सूर्यएकाकीचरतिचंद्रमाजायतेपुनः ॥ अग्निर्हिमस्यभेषजंभूमिरावपनंमहत् ॥ पृच्छामित्वापरमंतंपृथिव्याःपृच्छामित्वाभुवनस्यनाभिं ॥ पृच्छामित्वावृष्णोअश्वस्यरेतःपृच्छामिवाचःपरमंव्योम ॥ वेदिमाहुःपरमंतंपृथिव्याःयज्ञमाहुर्भुवनस्यनाभिं ॥ सोममाहुर्वृष्णोअश्वस्यरेतोब्रह्मौ

CC-0. In Public Domain. Funding By MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ६३ ॥ दर्शश्राद्धपार्वणप्रयोगः ॥

पार्वणश्राद्धानुक्रमकारिकाः ॥ आरंभःपाकशुद्धिःसुरपितृसदनेकव्यवाहाग्निसिद्धिःप्रज्ञातंस्यात्पवित्रंद्विजपरिगमनादुद्धरिष्यामिचोक्त्वा ॥ शम्याधानादिचक्षुष्युपरिदिविषदावाहनंपैतृकंचापांसेकोमुख्यहोमोघृतबहुघृतमिश्रौदनाभ्यांपृथक्च ॥ १ ॥ कव्यंस्विष्टंपुरोत्राप्युपरितउदकैःसेचनंतुप्रसव्यमन्नस्पर्शांतमर्घ्यंपुनरपिकुसुराचांतमेषुप्रदद्यात् ॥ हस्तार्चादक्षिणाक्षय्यकमुखकरणंप्रार्थ्यविप्रान्विसृज्यपिंडान्दद्यादथांजल्युदकनिनयनंवैजयंतीक्रमोयं॥२॥ अथप्रयोगः॥ तत्रयद्यग्निविच्छेदस्तदापुनराधानेनाग्निंसंपाद्य आचम्य० पवित्रवंतःपरि० ऊर्ध्वकेशि० अपक्रामंतु० श्राद्धकर्मसमारभे॥ प्राणायामः॥ निहन्मिस० अपसव्यं तिलारक्षंत्वसुरान्० सव्यं अपवित्रःपवित्रोवा० ॥ अपसव्यं ॥ श्राद्धभूमौ० उदीरता० आगच्छंतुश्राद्धकालेविश्वेदेवैःसहपितरः ॥ सव्यं॥ विष्णुर्विष्णुः० प्राप्त्यर्थंपुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानां प्राचीनावीती॥ अस्मत्पितृपितामहप्रपितामहानांशर्मणांगोत्राणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांअस्मन्मातामहमातुःपितामहमातुःप्रपितामहानांशर्मणांगोत्राणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांएतेषांश्रेयोर्थंमोक्षार्थंतृप्त्यर्थंपित्रादीनांदर्शश्राद्धंदेशकालाद्यनुसारतःपार्वणेनविधिनाअन्नेनहविषासद्यःकरिष्ये। कुरुष्व ॥ तदंगंगृहभांडभाजनशुद्ध्यर्थं[1]यवोदकतिलोदकाभिमंत्रणंक्षणादिचकरिष्ये॥ कुरुष्व॥ इमंमे०भवंतु ॥ पाकप्रोक्षणं ॥ यद्देवादेवहळनंइत्यादिपाकप्रोक्षणंविधिवदस्तुअस्तुविधिवत् ॥ अग्निमुपसमाधाय॥ युष्मदनुज्ञयाअग्नौकरणंकरिष्ये॥ दक्षिणाग्रान्दर्भानासनेकल्पयित्वा ॥ प्राचीनावीती ॥ अग्नेत्वंकव्यवाहनोसि ॥ सव्यं ॥ चत्वारिशृंगाइत्यादिममसंमुखोवरदोभव ॥

१ अत्रकेचनआसनादिकरिष्यइत्येवसंकल्प्ययवतिलोदकेपाकप्रोक्षणंचद्वितीयसंकल्पोत्तरंकुर्वंति ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

समित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा ॥ अग्नौकरणहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि ॥ जात वेदसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वा ॥ वैशेषिकप्रधानहोमे ॥ प्राचीनावीती ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतं पितरं पितामहंप्रपितामहंअमुकशर्माणं ३ पितरंपितामहंप्रपितामहं पितॄन्द्विः पितॄन्पितामहान्प्रपितामहांश्चाज्येन ॥ सोमंपितृमंतं यममंगिरस्वंतंपितृमंतंपितरंपितामहंप्रपितामहंअमुकशर्माणंत्रिः ३ पितरंपितामहंप्रपितामहं पितॄन्द्विः पितॄन्पितामहान् प्रपितामहांश्चान्नेन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतं मातरंपितामहींप्रपितामहींअमुकदां ३ मातरंपितामहींप्रपितामहीं पितॄन्द्विः मातॄःपितामहीःप्रपितामहीश्चाज्येन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातरंपितामहींप्रपितामहींअमुकदां ३ मातरंपितामहींप्रपितामहीं पितॄन्द्विः मातॄःपितामहीःप्रपितामहीश्चान्नेन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातामहंमातुःपि तामहंमातुःप्रपितामहंअमुकशर्माणं ३ मातामहंमातुःपितामहंमातुःप्रपितामहं पितॄन्द्विः मातामहान्मातुःपितामहान्मातुःप्र पितामहांश्चाज्येन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातामहंमातुःपितामहंमातुःप्रपितामहंअमुकशर्माणं ३ मातामहंमातुः पितामहंमातुःप्रपितामहं पितॄन्द्विः मातामहान्मातुःपितामहान्मातुःप्रपितामहांश्चान्नेन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतं मातामहींमातुःपितामहींमातुःप्रपितामहींमातुःप्रपितामहींअमुकदां ३ मातामहींमातुःपितामहींमातुःप्रपितामहींपितॄन्द्विःमा तामहीःमातुःपितामहीःमातुःप्रपितामहीश्चाज्येन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातामहींमातुःपितामहींमातुःप्रपिताम हींअमुकदां ३ मातामहींमातुःपितामहींमातुःप्रपितामहीं पितॄन्द्विः मातामहीःमातुःपितामहीःमातुःप्रपितामहीश्चान्नेन ॥ अग्निंकव्यवाहनꣳस्विष्टकृतमाज्येन ॥ यज्ञोपवीती ॥ प्रायश्चित्तहोमे ॥ [illegible]

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वायुंसूर्यंबृहस्पतिंवरुणमिंद्रंविश्वान्देवांश्चाज्येन ॥ सꣳस्रावहोमेवसून्रुद्रानादित्यान्सꣳस्रावाज्येन ॥ एतादेवताःसद्योयक्ष्ये ॥ ॐ भूर्भुवःसुवःस्वाहा ॥ प्रजा० म ॥ अन्वाधाय ॥ एषहि० मुखः ॥ यथा० आयुः ॥ दक्षिणाग्रान्दर्भान्परिस्तीर्य ॥ इध्मबंधनं ॥ दक्षिणतःब्रह्मणेइदमासनं ॥ उत्तरतःब्रह्मप्रणीतायैइदमासनं ॥ दर्भाग्रद्वयंगृहीत्वाहृदयमालभ्य मयिगृह्ण०,गात् ॥ पात्राण्यासादयति ॥ दर्वीस्रुवंआज्यस्थालींप्रणीतांप्रोक्षणींइध्मंबर्हिःउपवेषंसंमार्गदर्भान्अवज्वलनदर्भान्अर्घ्यपात्रेद्वेउद्धरणपात्रंमेक्षणंदर्भमुष्टिमन्नमाज्यंचासादयामि ब्रह्मसदनात्तृणंनिरस्यअपउपस्पृश्यअग्निमभिमुखउपविशति ॥ समावप्रच्छिन्नाग्रौदर्भौप्रादेशमात्रौपवित्रेकृत्वेत्यादित्रिःसर्वाभिःप्रोक्षतीत्यंतंकृत्वादर्वीस्रुवौनिष्टप्यदधाति॥ आज्यंविलाप्यएकदर्भपवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरुप्येत्यादिउपवेषनिरसनांतंकृत्वा ॥ अपउपस्पृश्य ॥ अपरेणाग्निमित्याद्याज्योत्पवनांतंकृत्वा ॥ पवित्रंप्रज्ञातंनिधाय ॥ कुतुपकालेब्राह्मणान्प्रदक्षिणीकुर्यात् ॥ भूर्भुवःसुवः ॥ समस्तसंपत्० यावतीर्वै०प्रीणाति ॥ अपसव्यं ॥ अक्रोधनैरित्यादिश्राद्धाधिकारंवाचयित्वा ॥ सव्यं कालस्यमुख्यःकालो०॥ नमोदेवेभ्यःअपसव्यं स्वधापितृभ्यःसव्यं पुरूरवार्द्रवसंज्ञकविश्वेदेवस्थानेक्षणंदत्वाभवद्भिःप्रसा० प्राचीना०पितृपितामहप्रपितामहसपत्नीकस्थानेक्षणंदत्वाभव० अस्मन्मातामहमातुःपितामहमातुःप्रपितामहसपत्नीकस्थानेक्षणंदत्वाभ० सव्यं सर्वेषांस्वागतं सु० देवाःसमाध्वंसुस० अपसव्यं पित्रादयःसमाध्वं सुसमा० सव्यं उपक्रांतंपित्रादीनांदर्शश्राद्धाख्यंकर्मकरिष्ये ॥ अपसव्यं श्राद्धस्यकर्मणःसिद्धिरस्त्वितिभवंतो० सव्यं विश्वेषांदेवानां श्राद्धस्यकर्मणःसिद्धि० ॥ आगच्छंतुमहाभागा०अपोदत्वा ॥ पुरूरवार्द्रव०विश्वेषांदेवानांब्रह्मणेइदमासनं ॥ स्वा०॥ अत्रास्यतां

१ इदंपवित्रंपित्रर्घ्यपात्रेनिदध्यात् देवपात्रेतुदर्भद्वयात्मकमपरंलौकिकंनिदध्यात्।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

समित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा ॥ अग्नौकरणहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि ॥ जात वेदसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वा ॥ वैश्वेषिकप्रधानहोमे ॥ प्राचीनावीती ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतं पितरं पितामहंप्रपितामहंअमुकशर्माणं ३ पितरंपितामहंप्रपितामहं पितॄन्द्विः पितॄन्पितामहान्प्रपितामहांश्चाज्येन ॥ सोमंपितृमंतं यममंगिरस्वंतंपितृमंतंपितरंपितामहंप्रपितामहंअमुकशर्माणंत्रिः ३ पितरंपितामहंप्रपितामहं पितॄन्द्विः पितॄन्पितामहान् प्रपितामहांश्चान्नेन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतं मातरंपितामहींप्रपितामहींअमुकदां ३ मातरंपितामहींप्रपितामहीं पितॄन्द्विः मातृःपितामहीःप्रपितामहीश्चाज्येन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातरंपितामहींप्रपितामहींअमुकदां ३ मातरंपितामहींप्रपितामहीं पितॄन्द्विः मातृःपितामहीःप्रपितामहीश्चान्नेन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातामहंमातुःपितामहंमातुःप्रपितामहंअमुकशर्माणं ३ मातामहंमातुःपितामहंमातुःप्रपितामहं पितॄन्द्विः मातामहान्मातुःपितामहान्मातुःप्रपितामहांश्चाज्येन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातामहंमातुःपितामहंमातुःप्रपितामहंअमुकशर्माणं ३ मातामहंमातुःपितामहंमातुःप्रपितामहं पितॄन्द्विः मातामहान्मातुःपितामहान्मातुःप्रपितामहांश्चान्नेन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतं मातामहींमातुःपितामहींमातुःप्रपितामहींमातुःप्रपितामहींअमुकदां ३ मातामहींमातुःपितामहींमातुःप्रपितामहींपितॄन्द्विःमा तामहीःमातुःपितामहीःमातुःप्रपितामहीश्चाज्येन ॥ सोमंपितृमंतंयममंगिरस्वंतंपितृमंतंमातामहींमातुःपितामहींमातुःप्रपितामहींअमुकदां ३ मातामहींमातुःपितामहींमातुःप्रपितामहीं पितॄन्द्विः मातामहीःमातुःपितामहीःमातुःप्रपितामहीश्चान्नेन ॥ अग्निंकव्यवाहनंस्विष्टकृतमाज्येन ॥ यज्ञोपवीती ॥ प्रायश्चित्तहोमे ॥ अग्नित्रिः अग्नीवरुणौद्विः इंद्रंद्विः त्र्यंबकंविष्णुं अग्निं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वायुंसूर्यबृहस्पतिंवरुणमिंद्रंविश्वान्देवांश्चाज्येन ॥ सꣳस्रावहोमेवसून्रुद्रानादित्यान्सꣳस्रावाज्येन ॥ एतादेवताःसद्योयक्ष्ये ॥ ॐ भूर्भुवःसुवःस्वाहा ॥ प्रजा० म ॥ अन्वाधाय ॥ एषहि० मुखः ॥ यथा० आयुः ॥ दक्षिणाग्रान्दर्भान्परिस्तीर्य ॥ इध्मबं धनं ॥ दक्षिणतःब्रह्मणेइदमासनं ॥ उत्तरतःब्रह्मप्रणीतायैइदमासनं ॥ दर्भाग्रद्वयंगृहीत्वाहृदयमालभ्य मयिगृह्णा०.गात् ॥ पा त्राण्यासादयति ॥ दर्वीस्रुवंआज्यस्थालींप्रणीतांप्रोक्षणींइध्मंबर्हिःउपवेषंसंमार्गदर्भान्अवज्वलनदर्भान्अर्घ्यपात्रेद्वेउद्धरणपात्रं मेक्षणंदर्भमुष्टिमन्नमाज्यंचासादयामि ब्रह्मसदनात्तृणंनिरस्यअपउपस्पृश्यअग्निमभिमुखउपविशति ॥ समावप्रच्छिन्नाग्रौदर्भौप्रा देशमात्रौपवित्रेकृत्वेत्यादित्रिःसर्वाभिःप्रोक्षतीत्यंतंकृत्वादर्वीस्रुवौनिष्टप्यदधाति॥ आज्यंविलाप्यएकदर्भपवित्रांतर्हितायामाज्य स्थाल्यामाज्यंनिरुप्येत्यादिउपवेषनिरसनांतंकृत्वा ॥ अपउपस्पृश्य ॥ अपरेणाग्निमित्याद्याज्योत्पवनांतंकृत्वा ॥ पवित्रंप्रज्ञातं निधाय ॥ कुतुपकालेब्राह्मणान्प्रदक्षिणीकुर्यात् ॥ भूर्भुवःसुवः ॥ समस्तसंपत्० यावतीर्वै०प्रीणाति ॥ अपसव्यं ॥ अक्रोधनैरित्या दिश्राद्धाधिकारंवाचयित्वा ॥ सव्यं कालस्यमुख्यःकालो०॥ नमोदेवेभ्यःअपसव्यं स्वधापितृभ्यःसव्यं पुरूरवार्द्रवसंज्ञकविश्वेदेव स्थानेक्षणंदत्वाभवद्भिःप्रसा० प्राचीना०पितृपितामहप्रपितामहसपत्नीकस्थानेक्षणंदत्वाभव० अस्मन्मातामहमातुःपितामहमा तुःप्रपितामहसपत्नीकस्थानेक्षणंदत्वाभ० सव्यं सर्वेषांस्वागतं सु० देवाःसमाध्वंसुस० अपसव्यं पित्रादयःसमाध्वं सुसमा० सव्यं उपक्रांतंपित्रादीनांदर्शश्राद्धाख्यंकर्मकरिष्ये ॥ अपसव्यं श्राद्धस्यकर्मणःसिद्धिरस्त्वितिभवंतो० सव्यं विश्वेषांदेवानां श्राद्धस्यकर्मणःसिद्धि० ॥ आगच्छंतुमहाभागा०अपोदत्वा ॥ पुरूरवार्द्रव०विश्वेषांदेवानांब्रह्मणेइदमासनं ॥ स्वा०॥ अत्रास्यतां

१ इदंपवित्रंपित्र्यपात्रेनिदध्यात् देवपात्रेतुदर्भद्वयात्मकमपरंलौकिकंनिदध्यात्।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धर्मोसि ॥ अस्मिन्श्राद्धेदैवेक्षणःक्रियताम्०वानि ॥ पूर्वासादितमर्घ्यपात्रमादाय ॥ प्रागग्रकूर्चंनिधाययवान्विकीर्यउदकमा
सिच्य ॥ विश्वेभ्योदेवेभ्योवोजुष्टंगृह्णामि ॥ २ ॥ अपःप्रदाय ॥ शंनो० तुनः॥ देवार्घ्यपात्रंसं० सुसंपन्नं॥ दक्षिणेनाग्निंदर्भेषु
सादयित्वाब्राह्मणहस्तेगंधपुष्पाक्षतान्दत्वा ॥ यवोसियवयास्मद्वेषोयवयारातीः ॥ इदंवि०सुरे ॥ यादिव्याआ० र्चसा ॥ पुरू०
भ्योविश्वभ्योदेवेभ्यःइदमर्घ्यंदत्तंन० ॥ तूष्णींइदंवोर्घ्यंदत्तंनमम ॥ पुरूर०गंधाःइत्यादिपुष्पपत्रधूपदीपाच्छादनादियथावद
स्वायुष्मदनुज्ञयापित्राद्यर्चनंकरिष्ये ॥ कुरुष्व ॥ अपसव्यं पितृपितामहप्रपितामहानांशर्मणांगोत्राणांसपत्नीकानां० रूपाणां
मातामहमातुःपितामहमातुःप्रपितामहानांशर्मणांगोत्राणांसप०रूपाणांइदमासनं ॥ अत्रास्यतां ॥ धर्मोसि॥ अत्रास्यामःदर्शश्रा
द्धेपित्र्येक्षणःक्रियतां ॥ प्रामो०वानि ॥ पूर्वासादितंपात्रमादायतिलान्विकीर्यउदकमासिच्य ॥ पितृभ्योसपत्नीकेभ्यःवोजुष्टंगृ
ह्णामि पिता० प्रपिता०मि ॥ अपःप्रदाय ॥ शंनो० तुनः ॥ पित्रर्घ्यपात्रंसं०संतु॥ पितृ०पन्नं ॥ दक्षिणेनाग्निंदर्भेषुसादयि
त्वाब्राह्मणहस्तेगंधपुष्पाक्षतान्दत्वा ॥ अपहतासुरारक्षाꣳसिवेदिषदः ॥ इदंवि०रे ॥ उदीर०वेषु ॥ यादिव्या०र्चसा ॥ पित्रे
अ०इदमर्घ्यंस्वधानमः ॥ पिता०मः ॥ पितृ०धाः ॥ पि०गंधाद्युपचारान्दत्वायस्यस्मृत्येत्युक्त्वा सव्यं मंडलादिकरिष्ये ॥ ब्र०
लं ॥ आ०लं ॥ बृह०रक्ष ॥ सव्यं ॥ रक्षो०हंता ॥ यथा०विधते ॥ मूर्धा०देवा० ॥ अपसव्यं ॥ उद्धरिष्या०क्रियतां ॥
सव्यं शम्याभिःपरिदधाति ॥ अपरे० शति० अदि०भ्यादधाति ॥ अयंतइ०स्वाहा ॥ जातवे०म॥ अथदर्व्याजुहोति ॥ प्रजा
पत०नम ॥ इंद्रा०स्वाहा ॥ इंद्रा०म० ॥ अग्नयेस्वा० अ०म०॥ सोमायस्वाहा० सो०म ॥ आज्यभागांतंकृत्वा ॥ येदेवादि
वीतिदेवानावाहयति ॥ येदेवादिव्येका०षध्वं ॥ पुरूरवा०यामि ॥ आवाहय ॥ प्राचीनावीती ॥ आयातपितरःसोम्यागं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भीरैःपथिभिःपूर्व्यैः ॥ प्रजामस्मभ्यंददतोरयिंचदीर्घायुत्वंचशतशारदंच ॥ दक्षिणस्यांदिश्यावाहनं ॥ आपोदेवीःप्रहिणुताग्नि
मेतंयज्ञंपितरोनोजुषंताम् ॥ मासीमामूर्जमूतयेभजंतेतेनोरयिꣳसर्ववीरंनियंतु ॥ यज्ञोपवीती ॥ युक्तोव०स्वाहा ॥ भू० ॥
प्रजापतयइदं ॥ प्राचीनावीती ॥ सोमायपितृमतेस्वधानमः ॥ सोमायपितृमतइदं ॥ यमायांगिरस्वतेपितृमतेस्वधानमः ॥
यमायांगिरस्वतेपितृमतइदं ॥ याःप्राचीःसंभवंत्यापउत्तरतश्चयाः ॥ अद्भिर्विश्वस्यभुवनस्यधर्त्रीभिरंतरन्यंपितुर्दधेस्वधानमः ॥
पित्रइदं ॥ अंतर्दधेपर्वतैरंतर्मह्यापृथिव्या ॥ दिवादिभिरनंताभिरूतिभिरंतरन्यंपितामहाद्दधेस्वधानमः ॥ पितामहायेदं ॥
अंतर्दधऋतुभिरहोरात्रैःसुसंधिभिः ॥ अर्धमासैश्चमासैश्चांतरन्यंप्रपितामहाद्दधेस्वधानमः ॥ प्रपितामहायेदं ॥ अथनामधेयैर्जु
होति ॥ अमुकशर्मणेस्वधानमः ३ ॥ यन्मेमाताप्रलुलोभचरत्यननुव्रता ॥ तन्मेरेतःपितावृंक्तामाभुरन्योपपद्यताꣳस्वधानमः ॥
पित्रइदं ॥ यन्मेपितामहीप्रलु०व्रत ॥ तन्मेरेतःपितामहोवृंक्तामाभुरन्योपपद्यताꣳस्वधानमः ॥ पितामहायेदं ॥ यन्मेप्रपिता
महीप्रलु०व्रत ॥ तन्मेरेतःप्रपितामहोवृंक्तामाभुरन्योपपद्यताꣳस्वधानमः ॥ प्रपितामहायेदं ॥ येचेहपितरोयेचनेहयाꣳश्चवि
द्मयाꣳउचनप्रविद्म ॥ अग्नेतान्वेत्थयदितेजातवेदस्तयाप्रह्वꣳस्वधयामदंतुस्वधानमः ॥ पितृभ्यइदं ॥ यद्वःक्रव्यादंगमदहल्लो
कानयंप्रणयंजातवेदाः ॥ तद्वोहंपुनरावेशयाम्यरिष्टाःसर्वैरंगैःसंभवतपितरःस्वधानमः ॥ पितृभ्यइदं ॥ वहाज्यंजातवेदःपितृ
भ्योयत्रैतान्वेत्थनिहितान्पराके ॥ आज्यस्यकूल्याउपतान्क्षरंतुसत्याएषामाशिषःसंतुकामैःस्वधानमः ॥ पितृभ्यइदं ॥ वहाज्यं
जातवेदःपितामहेभ्योयत्रै०नमः ॥ पितामहेभ्यइदं ॥ वहाज्यंजातवेदःप्रपितामहेभ्योयत्रै०नमः ॥ प्रपितामहेभ्यइदं ॥ एवम
न्नस्यजुहोति ॥ यथा ॥ सोमायपितृमतेस्व० ॥ सोमायपितृमतइदं ॥ यमायांगिरस्वतेपितृमतेस्वधा० ॥ यमायांगिरस्वतेपि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तृमतइदं ॥ याःप्राचीः०पितुर्दधेस्वधानमः ॥ पित्रइदं ॥ अंतर्दधेपर्वतै० पितामहाद्धेस्वधानमः ॥ पितामहायेदं ॥ अंतर्द धऋतुभिः० प्रपितामहाद्धेस्वधानमः ॥ प्रपितामहायेदं ॥ अथनामधेयैः ॥ अमुकशर्मणेस्वधानमः ३ ॥ यन्मेमाताप्रलु लोभ०तन्मेरेतःपितावृंक्ता०॥ पित्रइदं० ॥ यन्मेपितामही० ॥ तन्मेरेतःपितामहोवृंक्ता० ॥ पितामहायेदं ॥ यन्मेप्रपितामही० तन्मेरेतःप्रपितामहोवृंक्ता० ॥ प्रपितामहायेदं ॥ येचेहपितरो० ॥ पितृभ्यइदं ॥ यद्वःक्रव्यादंगम० ॥ पितृभ्यइदं ॥ वहान्नं जातवेदःपितृभ्यो० ॥ अन्नस्यकूल्याउप० पितृभ्यइदं ॥ वहान्नंजातवेदःपितामहेभ्यो० ॥ अन्नस्यकूल्याउप० ॥ पितामहे भ्यइदं ॥ वहान्नंजातवेदःप्रपितामहेभ्यो० अन्नस्य० ॥ प्रपितामहेभ्यइदं ॥ सोमायपितृमतेस्वधानमः ॥ सो०म ॥ यमायां गिरस्वतेपितृमतेस्वधानमः ॥ य०म ॥ याःप्राचीःसंभवं०मातुर्दधेस्वधानमः ॥ मात्रइदं ॥ अंतर्दधेपर्व०पितामह्यादधेस्वधा नमः ॥ पितामह्याइदं ॥ अंतर्दधऋतुभि० प्रपितामह्यादधेस्वधानमः ॥ प्रपितामह्याइदं० ॥ अमुकदायैस्वधानमः ३ ॥ मात्रेस्वधानमः ॥ मात्रइदं ॥ पितामह्यैस्वधानमः ॥ पितामह्याइदं ॥ प्रपितामह्यैस्वधानमः ॥ प्रपितामह्याइदं ॥ येचेहपि तरो०स्वधानमः ॥ पितृभ्यइदं ॥ यद्वःक्रव्या०स्वधानमः॥ पितृभ्यइदं ॥ वहाज्यंजातवेदोमातृभ्योयत्रैतावेत्थनिहिताःपराके ॥ आज्यस्यकूल्याउपताःक्षरंतुसत्याआसामाशिषःसंतुकामैःस्वधानमः ॥ मातृभ्यइदं ॥ वहाज्यंजातवेदःपितामहीभ्योयत्रैतावे त्थनिहिताःपराके ॥ आज्यस्यकूल्याउपताःक्षरंतुसत्याआसामाशिषःसंतुकामैःस्वधानमः ॥ पितामहीभ्यइदं ॥ वहाज्यंजात वेदःप्रपितामहीभ्योयत्रैतावेत्थनिहिताःपराके ॥ आज्यस्यकूल्याउपताःक्षरंतुसत्याआसामाशिषःसंतुकामैःस्वधानमः ॥ प्रपिता महीभ्यइदं ॥ एवमन्नस्यजुहोति॥ सोमायपितृमतेस्वधा०इदं ॥ यमायांगिरस्वतेपितृ०इदं ॥ याःप्राचीःसंभवं० मातुर्दधेस्वधा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नमःमात्रइदं ॥ अंतर्दधेपर्वतै० पितामह्यादधेस्वधानमःपितामह्याइदं ॥ अंतर्दधऋतुभि० प्रपितामह्यादधेस्वधानमः प्रपितामह्याइदं ॥ अमुकदायैस्वधानमः ३ ॥ मात्रेस्वधानमः मात्रइदं ॥ पितामह्यैस्वधानमःपितामह्याइदं ॥ प्रपितामह्यैस्वधानमः प्रपितामह्याइदं ॥ येचेहपितरो०स्वधानमः पितृभ्यइदं ॥ यद्वःक्रव्या०स्वधानमः पितृभ्यइदं ॥ वहान्नंजातवेदोमातृभ्यो० अन्नस्यकूल्याउप०मातृभ्यइदं ॥ वहान्नंजातवेदःपितामहीभ्यो० अन्नस्यकूल्याउप०पितामहीभ्यइदं ॥ वहान्नंजातवेदःप्रपितामहीभ्यो० अन्नस्यकूल्याउप० प्रपितामहीभ्यइदं ॥ सोमायपितृमतेस्वधानमः ॥ सोमा०दं॥ यमायांगिरस्वतेपितृमतेस्वधानमः ॥ यमा०दं ॥ याःप्राचीःसंभ० मातामहाद्धेस्वधानमः ॥ मातामहायेदं ॥ अंतर्दधेपर्व०मातुःपितामहाद्धेस्वधानमः ॥ मातुःपितामहायेदं ॥ अंतर्दधऋतुभिः०मातुःप्रपितामहाद्धेस्वधानमः ॥ मातुःप्रपितामहायेदं ॥ अमुकशर्मणेस्वधानमः ३ ॥ यन्मेमातामहीप्रलु०व्रता ॥ तन्मेरेतोमातामहोवृंक्तःमाभुरन्योपपद्यताꣳस्वधानमः ॥ मातामहायेदं ॥ यन्मेमातुःपितामहीप्रलु०व्रत ॥ तन्मेरेतोमातुःपितामहोवृंक्ता०नमः ॥ मातुःपितामहायेदं ॥ यन्मेमातुःप्रपितामहीप्रलु०व्रत ॥ तन्मेरेतोमातुःप्रपितामहोवृंक्ता०नमः ॥ मातुःप्रपिता०दं ॥ येचेहपितरो०नमः ॥ पितृभ्यइदं ॥ यद्वःक्रव्यादं०नमः ॥ पितृभ्यइदं ॥ वहाज्यंजातवेदोमातामहेभ्योयत्रै०नमः ॥ मातामहेभ्यइदं ॥ वहाज्यंजातवेदोमातुःपितामहेभ्योयत्रै०नमः ॥ मातुःपितामहेभ्यइदं ॥ वहाज्यंजातवेदोमातुःप्रपितामहेभ्योयत्रै०नमः ॥ मातुःप्रपितामहेभ्यइदं ॥ एवमन्नस्यजुहोति ॥ सोमायपितृमतेस्वधा०इदं ॥ यमायांगिरस्वतेपितृ०इदं ॥ याःप्राचीःसंभवंति०मातामहाद्धेस्वधानमः मातामहायेदं ॥ अंतर्दधेपर्व०मातुःपितामहाद्धेस्वधानमःमातुःपितामहायेदं ॥ अंतर्दधऋतुभिः०मातुःप्रपितामहाद्धेस्वधानमः मातुःप्रपितामहायेदं ॥ अमुकशर्मणेस्वधा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नमः ३ ॥ यन्मेमातामहीप्रलुलोभ० तन्मेरेतोमातामहोवृंक्तामाभु०मातामहायेदं ॥ यन्मेमातुःपितामहीप्रलुलोभ० तन्मेरेतो मातुःपितामहो० मातुःपितामहायेदं ॥ यन्मेमातुःप्रपितामहीप्रलुलोभ० तन्मेरेतोमातुःप्रपितामहोवृंक्ता० मातुःप्रपितामहा येदं० ॥ येचेहपितरो० पितृभ्यइदं ॥ यद्वःक्रव्यादं० पितृभ्यइदं ॥ वहान्नंजातवेदोमातामहेभ्योयत्रै० अन्नस्यकूल्याउप० मातामहेभ्यइदं ॥ वहान्नंजातवेदोमातुःपितामहेभ्यो० अन्नस्यकूल्या० मातुःपितामहेभ्यइदं ॥ वहान्नंजातवेदोमातुःप्रपिताम हेभ्यो० अन्नस्यकूल्या० मातुःप्रपितामहेभ्यइदं ॥ सोमायपितृमतेस्वधानमः ॥ सो०म० ॥ यमायांगिरस्वतेपितृमतेस्वधा नमः ॥ य०म॥ याःप्राचीःसंभवंत्या०मातामह्यादधेस्वधानमः ॥ मातामह्याइदं ॥ अंतर्दधेपर्व०मातुःपितामह्यादधेस्वधानमः॥ मातुःपितामह्याइदं ॥ अंतर्दधऋतुभिः० मातुःप्रपितामह्यादधेस्वधानमः ॥ मातुःप्रपितामह्याइदं ॥ अमुकदायैस्वधानमः ३ ॥ मातामह्यैस्वधानमः ॥ मातुःपितामह्यैस्वधानमः ॥ मातुःप्रपितामह्यैस्वधानमः ॥ येचेहपितरोये०स्वधानमः ॥ पितृभ्यइदं ॥ यद्वःक्रव्यादंग०स्वधानमः ॥ पितृभ्यइदं ॥ वहाज्यंजातवेदोमातामहीभ्योयत्रैतावेत्थनिहिताःपराके ॥ आज्यस्यकूल्याउप ताःक्षरंतुसत्याआसामाशिषःसंतुकामैःस्वधानमः ॥ मातामहीभ्यइदं ॥ वहाज्यंजातवेदोमातुःपितामहीभ्योयत्रैतावेत्थनिहि ताःपराके ॥ आज्यस्यकूल्याउपताःक्षरंतुसत्याआसामाशिषःसंतुकामैःस्वधानमः ॥ मातुःपितामहीभ्यइदं ॥ वहाज्यंजातवेदो मातुःप्रपितामहीभ्योयत्रैतावेत्थनिहिताःपराके॥ आज्यस्यकूल्याउपताःक्षरंतुसत्याआसामाशिषःसंतुकामैःस्वधानमः ॥ मातुःप्र पितामहीभ्यइदं ॥ एवमन्नस्यजुहोति ॥ सोमायपितृमतेस्वधा०इदं ॥ यमायांगिरस्वते०इदं ॥ याःप्राचीःसंभवंत्या० माता मह्यादधेस्वधानमः मातामह्याइदं ॥ अंतर्दधेपर्व०मातुःपितामह्यादधेस्वधानमः मातुःपितामह्याइदं ॥ अंतर्दधऋतुभिः०मातुः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रपितामह्यादधे० मातुःप्रपितामह्याइदं ॥ अमुकदायैस्वधानमः ३ ॥ मातामह्यैस्वधानमः ॥ मातुःपितामह्यैस्वधानमः ॥ मातुः
प्रपितामह्यैस्वधानमः ॥ येचेहपितरो० पितृभ्यइदं ॥ यद्वःक्रव्यादंग० पितृभ्यइदं ॥ वहान्नंजातवेदोमातामहीभ्योयत्रैता०
अन्नस्यकूल्याउप०मातामहीभ्यइदं ॥ वहान्नंजातवेदोमातुःपितामहीभ्यो० अन्नस्यकूल्याउप०मातुःपितामहीभ्यइदं ॥ वहान्नं
जातवेदोमातुःप्रपितामहीभ्यो०अन्नस्यकूल्याउप०मातुःप्रपितामहीभ्यइदं ॥ अग्नयेकव्यवाहनायस्विष्टकृतेस्वधानमः ॥ अग्नये०
इदं० ॥ यज्ञोपवीती ॥ शुल्बप्रहरणादिसंस्थाजपांतंकर्मसमापयेत् ॥ आमासुपक्वमैरय० सोमोधेनुं० दस्मै ॥ परिविष्टमन्नंगाय
त्र्याप्रोक्ष्यसत्यंत्वर्तेनप०दाय ॥ ब्राह्मणानुपस्पर्शयति ॥ ब्राह्मणहस्तेगंधपुष्पाक्षतान्दत्वा ॥ यवोसि०तीः ॥ इदंवि०सुरे ॥
यादिव्याआ०र्चसा ॥ पुरूरवार्द्रवसंज्ञकाविश्वेदेवाःब्रह्मणेइदंवोअर्घ्यं ॥ तूष्णींयवोदकं० म ॥ सुदत्तं ॥ प्राणेनिविश्यामृतंजुहो
मिइदं०करिष्ये ॥ सव्यंजान्वाच्य ॥ सत्यंत्व०लोके ॥ पृथिव्यंतरिक्षंद्यौःसमातासामग्निर्वायुरादित्यउपद्रष्टारःदत्तस्याप्रमादाय ॥
ब्राह्मणानुपस्पर्शयति ॥ ब्राह्मणहस्तेगंधपुष्पाक्षतान्दत्वा ॥ अपहतेदंविष्णुरुदीरतेतियादिव्या० ॥ पित्रेइदमर्घ्यंस्वधानमः ॥
पितामहायइद०नमःप्रपितामहायइद०मः ॥ तूष्णींतिलोदकं ॥ प्राणेनिविश्यामृतंजुहोमि ॥ इदं० ॥ शेषमन्नंकिंक्रियतां ॥
आचांतेष्वनाचांतेषुवा ॥ असोमपा०॥ आचम्यपवित्रेधृत्वा ॥ ब्राह्मणहस्तेअपोदत्वा ॥ पूर्वइदमर्घ्यंदत्वा ॥ शिवाआपःसंतु ॥
पितॄन्प्रीणातिभुक्तवतोनुप्रव्रज्यशेषमनुज्ञाप्योदकुंभंदर्भमुष्टिंचादाय ॥ दक्षिणपूर्वमवांतरदेशंगत्वादक्षिणाग्रान्दर्भान्सꣳस्तीर्य
तेष्ववाचीनपाणिंदक्षिणापवर्गांस्त्रीनुदकांजलीन्निनयति ॥ मार्जयंतांपितरःसोम्यासो०सोम्यासः ॥ एतत्तेपितःअमुकशर्मन्अ
मुकगोत्रवसुरूपयेचत्वामनु ॥ एवंसर्वत्र ॥ अत्रपितरोमादयध्वं० ॥ लोकउपवक्षरंतु ॥ प्रसव्यंपरिषिच्य ॥ कुलाभिवृद्ध्यर्थं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सव्येनपिंडपूजांकरिष्ये ॥ पिंडस्थाःपितरःपाद्यंस्वधा०प्रीयतां ॥ पिंडोपस्थानंकरिष्ये ॥ प्राचीनावीती ॥ पाणीव्यत्यस्यदक्षिणमुत्तरमुत्तरंचदक्षिणं ॥ नमोवःपितरोरसायपितरोनमोवोयएतस्मिन्लोकेस्थयुष्माꣳस्तेनुयेस्मिन्लोकेमांतेनुयएतस्मिन्लोकेस्थयूयंतेषांवसिष्ठाभूयास्तयेस्मिन्लोकेहंतेषांवसिष्ठोभूयासं ॥ नमोवःपितरःशुष्मायपितरोन०भूयासं ॥ नमोवःपितरोजीवायपितरो०भूयासं ॥ नमोवःपितरःस्वधायैपितरो०भूयासं॥ नमोवःपितरोमन्यवेपितरोन० भूयासं ॥ नमोवःपितरोघोरायपितरोन० भूयासं ॥ नमस्कारैरुपतिष्ठते ॥ ऊर्जवहंती० तृन्०स्व०त०परेत०सोम्या०मनेनसं ॥ वीरंमेदत्तपितरः ॥ एषतेततमधुमाꣳऊर्मिःसरस्वान्यावानग्निश्चपृथिवीचतावत्यस्यमात्रातावानस्यमहिमातावंतमेनंभूतंददामियथाग्निरक्षितोनुपदस्तएवंमह्यंपित्रेक्षितोनुपदस्तस्वधाभवतांतꣳस्वधामक्षितंतैःसहोपजीवअमुकशर्मन्ऋचस्तेमहिमा ॥ एषतेपितामहमधुमाꣳऊर्मिःसरस्वान्यावान्वायुश्चांतरिक्षंचतावत्यस्यमात्रातावानस्यमहिमातावंतमेनंभूतंददामियथावायुरक्षितोनुपदस्तएवंमह्यंपितामहायाक्षितोनुपदस्तस्वधाभवतांतꣳस्वधामक्षितंतैःसहोपजीवअमुकशर्मन्यजूꣳषितेमहिमा ॥ एषतेप्रपितामहमधुमाꣳऊर्मिःसरस्वान्यावानादित्यश्चद्यौश्चतावत्यस्यमात्रातावानस्यमहिमातावंतमेनंभूतंददामियथादित्योक्षितोनुपदस्तएवंमह्यंप्रपितामहायाक्षितोनुपदस्तस्वधाभवतांतꣳस्वधामक्षितंतैःसहोपजीवप्रपितामहअमुकशर्मन् ॥ सामानितेमहिमा ॥ एषतेमातुःपितामहमधुमाꣳसरःस्वान्०पजीवमातामहअमुकशर्मन्ऋचस्तेमहिमा ॥ एषतेमातुःपितामहमधुमाꣳऊर्मिःसरस्वा०पजीवमातुःपितामहअमुकशर्मन्यजूꣳषितेमहिमा ॥ एषतेमातुःप्रपितामहमधुमाꣳऊर्मिःसरस्वा०पजीवमातुःप्रपितामहअमुकशर्मन्सामानितेमहिमा ॥ परायातपि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तरःसाम्यागभारःपाथोभिःपूर्व्यैः ॥ अथपुनरायातनोगृहान्हविरत्तुꣳसुप्रजसःसुवीराः ॥ वाजेवाजे०यानैः॥ आमावाजस्यप्र० भवंतोब्रुवंतु ॥ जपच्छिद्रं०भवतुएषपितृयज्ञःतत्सद्ब्रह्मार्पणमस्तु ॥ इतिपार्वणदर्शश्राद्धप्रयोगः ॥ ॥ छ ॥

॥ ६४ ॥ श्राद्धदिनेवैश्वदेवादिनिर्णयः ॥

तत्राहिताग्नेर्वैश्वदेवःपिंडपितृयज्ञात्पूर्वमेवभवति ॥ गृह्याग्निमतापिंडपितृयज्ञात्पूर्वंश्राद्धांतेवाकार्यः ॥ श्वोभूतेस्थालीपाकइति धर्मसूत्राद्यदापर्वदिनेपरिस्तरणांतंक्रियतेतदापरिस्तरणोत्तरमेववैश्वदेवंकृत्वापिंडपितृयज्ञःकर्तव्यइतिद्रष्टव्यं ॥ सांवत्सरिकादि श्राद्धेषुवैश्वदेवोऽग्नौकरणानंतरंउच्छिष्टपिंडदानोत्तरमेववापृथक्पाकेनैवकार्यः श्रौताग्निमता ॥ गृह्याग्निमताश्राद्धारंभात्प्रागे वपृथक्पाकेनैवकर्तव्यः ॥ एकादशाहिकेतुएतयोरप्यंतरएव ॥ अग्नौकरणानंतरंबलिदानोत्तरंवावैश्वदेवानुष्ठानपक्षेपृथक्पाके नैववैश्वदेवहोममात्रंकृत्वाश्राद्धंसमाप्यानंतरंवैश्वदेवार्थान्नेनैवबलिहरणादिकर्तव्यं ॥ यदात्वंतेतदाश्राद्धशेषेणैव ॥ सचवैश्वदे वोमासिश्राद्धमध्येमासिकश्राद्धमध्येवाकार्यः ॥ ॥ एतदन्यतरांतेवासमवदायाश्नीयादित्यनेनशेषस्याशनंविहितं ॥ तच्चदि वैवकार्यनरात्रौ ॥ तस्मिन्दिनेआवश्यकोपवासप्राप्तौशेषाघ्राणंकार्यं ॥ शेषनाशेभोजनलोपइतिकेचित् ॥ प्रतिनिधिभूतेनान्नेन भोजनंकार्यमित्यन्ये ॥ ॥ कर्तृभोक्तृनियमाः ॥ दंतधावनतांबूलंतैलाभ्यंगमभोजनं ॥ रत्यौषधपरान्नानिश्राद्धकर्तावर्जयेत् ॥ पुनर्भोजनमध्वानंभारमध्यायसंगमं ॥ दानंप्रतिग्रहोहोमःश्राद्धभुग्वर्जयेद्द्विजः ॥ इत्यादयःकर्तृभोक्तृनियमाः ॥ ॥ श्राद्ध भोक्तृप्रायश्चित्तं षट्प्राणायामाःदशवारावर्तितगायत्र्यभिमंत्रितजलप्राशनंचेतिज्ञेयं ॥ विशेषविस्तरोग्रंथांतरआलोचनीयः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सव्येनपिंडपूजांकरिष्ये ॥ पिंडस्थाःपितरःपाद्यस्वधा०प्रीयतां ॥ पिंडोपस्थानंकरिष्ये ॥ प्राचीनावीती ॥ पाणीव्यत्यस्यदक्षि
णमुत्तरमुत्तरंचदक्षिणं ॥ नमोवःपितरोरसायपितरोनमोवोयएतस्मिन्लोकेस्थयुष्माꣳस्तेनुयेस्मिन्लोकेमांतेनुयएतस्मिन्लोकेस्थ
यूयंतेषांवसिष्ठाभूयास्तयेस्मिन्लोकेहंतेषांवसिष्ठोभूयासं ॥ नमोवःपितरःशुष्मायपितरोन०भूयासं ॥ नमोवःपितरोजीवायपित
रो०भूयासं ॥ नमोवःपितरःस्वधायैपितरो०भूयासं॥ नमोवःपितरोमन्यवेपितरोन० भूयासं ॥ नमोवःपितरोघोरायपितरोन०
भूयासं ॥ नमस्कारैरुपतिष्ठते ॥ ऊर्जवहंती० तृन्०स्व०त०परेत०सोम्या०मनेनसं ॥ वीरंमेदत्तपितरः ॥ एषतेततमधुमाꣳ
ऊर्मिःसरस्वान्यावानग्निश्चपृथिवीचतावत्यस्यमात्रातावानस्यमहिमातावंतमेनंभूतंददामियथाग्निरक्षितोनुपदस्तएवंमह्यंपित्रेक्षि
तोनुपदस्तस्वधाभवतांतꣳस्वधामक्षितंतैःसहोपजीवअमुकशर्मन्ऋचस्तेमहिमा ॥ एषतेपितामहमधुमाꣳऊर्मिःसरस्वान्यावा
न्वायुश्चांतरिक्षंचतावत्यस्यमात्रातावानस्यमहिमातावंतमेनंभूतंददामियथावायुरक्षितोनुपदस्तएवंमह्यंपितामहायाक्षितोनुपद
स्तस्वधाभवतांतꣳस्वधामक्षितंतैःसहोपजीवअमुकशर्मन्यजूꣳषितेमहिमा ॥ एषतेप्रपितामहमधुमाꣳऊर्मिःसरस्वान्यावानादि
त्यश्चद्यौश्चतावत्यस्यमात्रातावानस्यमहिमातावंतमेनंभूतंददामियथादित्योक्षितोनुपदस्तएवंमह्यंप्रपितामहायाक्षितोनुपदस्तस्व
धाभवतांतꣳस्वधामक्षितंतैःसहोपजीवप्रपितामहअमुकशर्मन् ॥ सामानितेमहिमा ॥ एषतेमातुःपितामहमधुमाꣳसरःस्वान्०
पजीवमातामहअमुकशर्मन्ऋचस्तेमहिमा ॥ एषतेमातुःपितामहमधुमाꣳऊर्मिःसरस्वा०पजीवमातुःपितामहअमुकशर्मन्यजूꣳ
षितेमहिमा ॥ एषतेमातुःप्रपितामहमधुमाꣳऊर्मिःसरस्वा०पजीवमातुःप्रपितामहअमुकशर्मन्सामानितेमहिमा ॥ परायातपि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तरःसोम्यागंभीरैःपथिभिःपूर्व्यैः ॥ अथपुनरायातनोगृहान्हविरत्तुऽसुप्रजसःसुवीराः ॥ वाजेवाजे०यानैः॥ आमावाजस्यप्र० भवंतोब्रुवंतु ॥ जपच्छिद्रं०भवतुएषपितृयज्ञःतत्सद्ब्रह्मार्पणमस्तु॥ इतिपार्वणदर्शश्राद्धप्रयोगः ॥ ॥ ७ ॥

॥ ६४ ॥ श्राद्धदिनेवैश्वदेवादिनिर्णयः ॥

तत्राहिताग्नेर्वैश्वदेवःपिंडपितृयज्ञात्पूर्वमेवभवति ॥ गृह्याग्निमतापिंडपितृयज्ञात्पूर्वंश्राद्धांतेवाकार्यः ॥ श्वोभूतेस्थालीपाकइति धर्मसूत्राद्यदापर्वदिनेपरिस्तरणांतंक्रियतेतदापरिस्तरणोत्तरमेववैश्वदेवंकृत्वापिंडपितृयज्ञःकर्तव्यइतिद्रष्टव्यं ॥ सांवत्सरिकादि श्राद्धेषुवैश्वदेवोऽग्नौकरणानंतरंउच्छिष्टपिंडदानोत्तरमेववापृथक्पाकेनैवकार्यः श्रौताग्निमता ॥ गृह्याग्निमताश्राद्धारंभात्प्रागे वपृथक्पाकेनैवकर्तव्यः ॥ एकादशाहिकेतुएतयोरप्यंतरएव ॥ अग्नौकरणानंतरंबलिदानोत्तरंवावैश्वदेवानुष्ठानपक्षेपृथक्पाके नैववैश्वदेवहोममात्रंकृत्वाश्राद्धंसमाप्यानंतरंवैश्वदेवार्थान्नेनैवबलिहरणादिकर्तव्यं ॥ यदात्वंततेदाश्राद्धशेषेणैव ॥ सचवैश्वदे वोमासिश्राद्धमध्येमासिकश्राद्धमध्येवाकार्यः ॥ ॥ एतदन्यतरांतेवासमवदायाश्नीयादित्यनेनशेषस्याशनंविहितं ॥ तच्चदि वैवकार्यनरात्रौ ॥ तस्मिन्दिनेआवश्यकोपवासप्राप्तौशेषाघ्राणंकार्यं ॥ शेषनाशेभोजनलोपइतिकेचित् ॥ प्रतिनिधिभूतेनान्नेन भोजनंकार्यमित्यन्ये ॥ ॥ कर्तृभोक्तृनियमाः ॥ दंतधावनतांबूलंतैलाभ्यंगमभोजनं ॥ रत्यौषधपरान्नानिश्राद्धकर्ताविवर्ज येत्॥ पुनर्भोजनमध्वानंभारमध्यायसंगमं॥ दानंप्रतिग्रहोहोमःश्राद्धभुग्वर्जयेद्द्विजः॥ इत्यादयःकर्तृभोक्तृनियमाः॥ ॥ श्राद्ध भोक्तृप्रायश्चित्तं षट्प्राणायामाःदशवारावर्तितगायत्र्यभिमंत्रितजलप्राशनंचेतिज्ञेयं ॥ विशेषविस्तरोग्रंथांतरआलोचनीयः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ६५ ॥ सांकल्पिकश्राद्धविधिः ॥

श्रीः ॥ उक्तायराह्णेयथाधिकारंकृतनित्यक्रियस्तिलतर्पणंविधायदेशकालौसंकीर्त्यप्राचीनावीती करिष्यमाणश्राद्धविहितपितृणां षष्ठ्यंतप्रयोगेणोत्कीर्तनंकृत्वामुकश्राद्धंसांकल्पिकविधिनाकरिष्यइतिसंकल्प्य पूर्ववद्विप्रनिमंत्रणादिकृत्वापूर्ववदुपवेश्यआवाहनार्घ्यदानवर्ज्यंआसनाच्छादनांतैरुपचारैःपूजयेत् अथवातूष्णीमावाहनं ॥ ततोग्नौकरणवर्जमपोशनदानांतंकुर्यात् ॥ ब्राह्मणाबलिदानंवर्जंविधिनाभुंजीयुः ॥ भोजनांतेतृप्तिप्रश्नंकृत्वामधुमतीःअक्षन्नमीमदंतेतिचश्रावयित्वासंपन्नप्रश्नंकृत्वाशेषमन्नंकिंक्रियतामित्यादिउच्छिष्टभाग्भ्योन्नदानांतंकृत्वाअघोराःपितरःसंत्वित्यादितत्रोच्छिष्टपिंडदाने ॥ नचात्रस्वधासंपद्यंतामितिभवंतोब्रुवंतुइतिस्वधोच्यतामितिचस्वधावाचनं॥ततोवाजेवाजेइतिकर्मेश्वरार्पणांतेसंकल्पात्सिद्धिरस्त्वितिभवंतोब्रुवंतुइतिविप्रान्वदेत् ॥ तथास्त्वितितैरुक्तेविष्णुंसंस्मृत्यपवित्रग्रंथिंविसृज्यत्यक्त्वाचमनंकृत्वाबंधुभिःसहश्राद्धशेषंभुंजीत ॥ इत्थमपिकरणाशक्तौसंकल्पंकृत्वादेवपितृपूजांविधायान्नत्यागंकृत्वाभुक्तवद्व्यस्तांवूलंदक्षिणांचदत्वासंकल्पात्सिद्धिस्त्वितिभवंतोब्रुवंत्वितिवाचयित्वाकर्मेश्वरायार्पयेत् ॥ वैश्वदेवकालव्यवस्थापूर्ववदेव ॥ इतिसांकल्पिकश्राद्धप्रयोगः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६६ ॥ आमश्राद्धविधिः ॥

श्रीः ॥ केनचित्संकटेनपाकासंभवेजातकर्मणिचग्रहणनिमित्तकश्राद्धेचामश्राद्धंकार्यं ॥ सपिंडीश्राद्धंमासिकंप्रतिवार्षिकंमहालयाष्टकादिश्राद्धंचामेनकार्यं ॥ शूद्रस्यतुदशाहपिंडादिश्राद्धमात्रमामेननकदापिपाकेन ॥ तत्रयथाधिकारंप्रातःकृतनित्यक्रियः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्रौताग्निमान्गृह्याग्निमान्वायेनकेनचिद्व्येणकृतवैश्वदेवःपितृनुद्दिश्यतिलतर्पणंकृत्वापूर्वाह्णएवदेशकालकथनांतेप्राचीनावीता षष्ठ्यापितृनुद्दिश्यामुकश्राद्धंसदैवंसपिंडमामेनहविषाकरिष्ये ॥ इतिसंकल्पः ॥ तिलोदकादिदैवपित्र्यविप्रनिमंत्रणादिअन्यः प्रयोगःपूर्वोक्तएव ॥ पाकप्रोक्षणस्थानेआमप्रोक्षणं॥ आवाहनेउशंतस्त्वेतिमंत्रेहविषेअत्तवेइत्यत्रहविषेस्वीकर्तवेइत्यूहः ॥ भस्म मर्यादांतंप्राग्वत् ॥ अग्नौकरणकालेसकृदाच्छिन्नच्छेदनादिपिंडपितृयज्ञवत्तंडुलाद्यन्यतमेनसंप्रदेयेनहविष्यद्रव्येणहुत्वा॥अन्ना च्चतुर्गुणंद्विगुणंसमंवातत्तदामंपात्रेषुसंस्थाप्यपाणिहोमशेषंपिंडार्थंसंस्थाप्यपात्रेषुदत्वागायत्र्याप्रोक्ष्यपृथ्वीतेपात्रमित्यादि० इद मामंसोपस्करंहव्यंकव्यमित्यादिइदममममृतरूपंस्वाहेत्यादियथाधर्ममध्वित्यंतंप्राकृतं ॥ यथासुखंजुषध्वमित्यस्यापोशनप्राणा हुतितृप्तिप्रश्नानांलोपः ॥ मधुमतीश्रावणंसंपन्नवाचनांतेन्नशेषप्रश्नलोपः ॥ सर्वमतेतंडुलैःसक्तुभिर्वापूर्ववत्पिंडदानं॥ केचिद्गृहसि द्धान्नेनपायसेनवापिंडदानमाहुः ॥ अपोदेवीरित्याद्यग्न्युपस्थानांतंकृत्वाअतिप्रणीताग्निमेलनादितदक्षय्यमस्त्वितिभवंतोब्रुवंत्वि तिअक्षय्येऊहःस्वस्तीतिब्रूतेतिवर्ज्यंवाजेवाजेइतिमंत्रेतृप्तायातेतिस्थानेतर्प्स्यथयातपथिभिर्देवयानैरित्यूहः ॥ ततःप्राग्वच्छेषंसमा पयेत् ॥ आमश्राद्धंद्विजैःपूर्वाह्णेकार्यंशूद्रैरपराह्णएव ॥ इत्यामश्राद्धविधिः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६७ ॥ हिरण्यश्राद्धं ॥

हिरण्यश्राद्धमप्येवमेवसंकल्पादौहिरण्यपदमामस्थानेयोज्यं ॥ कृतनित्यक्रियोदेशकालकथनांतेषष्ठ्यापितृनुद्दिश्यामुकश्राद्धं हिरण्येनसांकल्पविधिनाकरिष्यइतिसंकल्प्यतिलोदकविप्रावाहनादिप्रकृतिवत् ॥ आमवद्धेमप्रोक्षणं ॥ अत्तवइत्यादिमंत्रत्रयो हःप्राग्वदेव॥ तंडुलादिभिर्हस्तेग्नौकरणं॥ हिरण्यमन्नादष्टगुणंचतुर्गुणंद्विगुणंसमंवादेयं॥ हिरण्यश्राद्धेपिदक्षिणास्त्येव॥ श्राद्धी

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यमामंहेमंवाद्विजदत्तंयथेष्टंविनियोज्यं शूद्रदत्तंतुभोजनादन्यत्रविनियोज्यं श्राद्धीयामेनपंचयज्ञाःश्राद्धंचनकार्यं ॥ हेमश्राद्धे आमश्राद्धेचपिंडदानविकल्पात्सांकल्पविधिनाप्येतद्वयं ॥ अत्रपिंडदानेविकल्पः ॥ नमोवःपितरोरसायेत्यत्रहिरण्यायेत्यूहः॥ सांकल्पिकेचसमंत्रकावाहनार्घ्याग्नौकरणपिंडदानविकिराक्षय्यस्वधावाचनप्रश्नाइत्येतत्सप्तकंवर्ज्यं ॥ शूद्रगृहेऽन्यदीयमपि क्षीराद्यपिनभक्ष्यंकिमुततदीयमामादितद्गृहेपक्वान्नंनभोक्ष्यमिति ॥ तस्माच्छूद्रालब्धंचगृहेपक्त्वाभक्ष्यं॥ इत्यामश्राद्धविधिः ॥

॥ ६८ ॥ एकोद्दिष्टश्राद्धं ॥

तच्चापुत्रपितृव्यमातुलभ्रातृसापत्नमातृणामाब्दिकमेकोद्दिष्टविधिनाकार्यं ॥ मध्याह्नएवदेशकालकीर्तनांतेअस्मत्पितृव्यस्यश र्मणोगोत्रस्यवसुरूपस्याब्दिकश्राद्धमेकोद्दिष्टविधिनाकरिष्यइतिसंकल्प्यपित्रर्थमेवविप्रान्विप्रंवानिमंत्र्ययथाचारंपादप्रक्षालना दिकृत्वाएकमर्घ्यपात्रंसंस्थाप्यएकदर्भयुतेतस्मिन्पात्रेजलमासिच्येत्यादिआवाहनवर्जमर्घ्यदानांतंकृत्वातत्पात्रस्थापनादिअग्नौ करणवर्जंअन्नत्यागांतंकृत्वा यस्योद्देशस्तस्याक्षय्यातृप्तिरस्त्वित्युक्त्वापोशनोदकदानादि पिंडदानकालेएकएवपिंडःअन्यत्सर्वं पूर्ववत् ॥ द्वितीयेहनिश्राद्धांगंसतिलमेवतर्पणं एषांपार्वणश्राद्धपक्षेपितृव्यपितामहप्रपितामहानांभ्रातृपितृपितामहानामित्यु च्चारः ॥ जीवत्पितृकस्यत्वेकोद्दिष्टमेव ॥ मातुलमातामहमातुःपितामहानां–सापत्नमातृपितामहीप्रपितामहीनांइत्यादियथा यथमूहोज्ञेयः ॥ कनिष्ठभ्रात्रादीनांब्रह्मचारिस्नातकावस्थायांमृतौतदाब्दिकश्राद्धेएकोद्दिष्टप्रयोगएव ॥ इत्येकोद्दिष्टश्राद्धं ॥

॥ ६९ ॥ अनुपनीत–स्त्रीकर्तृकश्राद्धं ॥

देशकालकथनांतेअस्मद्भर्तृतत्पितृतत्पितृणांशर्मणांगोत्राणांवसुरुद्रादित्यस्व० आब्दिकश्राद्धमद्यकरिष्यइतिस्वयंसंकल्पंकृत्वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कंचिद्ब्राह्मणंऋत्विक्त्वेपरिपृच्छ्यतंब्रूयात्ममाज्ञयात्वमिदंकर्मकुरुइति कर्ताओमित्यंगीकृत्यसर्वमपिविधिंकुर्यात्॥तत्रविशेषः॥
अनुज्ञात्र्याःभर्तुःशर्मणोगोत्रस्यवसु० अनुज्ञात्र्याःभर्तृपितुःशर्मणोगोत्रस्यरुद्र० अनुज्ञात्र्याःभर्तृपितामहस्यशर्मणोगोत्र०आदि
त्य० इत्यादितत्तद्विभक्त्यूहेनप्रयोगः॥ यत्रयत्रपितृशब्दवत्पितामहशब्दोपिबहुवचनांतोदृश्यतेतत्रैवपितृशब्देप्यूहोनान्यत्र॥
सचबहुवचनांतएव—यथामार्जयंतांपितरःसोम्यासइत्यादिषुआपोदेवीःस्वधया०अत्रपितरोयथाभागंमंदध्वं अमीमदंतपितरः
एतानिवःपितरः नमोवःपितरोरसाय ऊर्जस्वतीःस्वधया उत्तिष्ठतपितरः यंतुपितरः मनोन्वाहुवामहे० पुनर्नःपितरो० अभून्नो
दूतो० येसमानाःसमनसः० इत्येतेषुमंत्रेषुतुनोहः बहुवचनांतंपितामहादिशब्दप्रयोगदर्शनाभावात् ॥एकोदिष्टपक्षेतुतद्धर्मेण
श्राद्धंकुर्यात्यथाचारंव्यवस्थाइतिस्मृयनुज्ञातेविशेषः ॥ अथवास्वयमेववैदिकमंत्रवर्जंविधिंकुर्यात् मंत्रसाध्यकर्मापितूष्णींकर्तव्य
मेव ब्राह्मणद्वाराश्राद्धेपिमंत्रवर्जमेवप्रयोगइतिबहवः॥ अनुपनीतानुज्ञातेप्येवं शूद्रानुज्ञातेतुमंत्रवर्जएवविधिः ज्वरादिनाकर्तुर
सामर्थ्येप्येषएवविधिः श्राद्धकर्तृनियमास्तुऋत्विग्यजमानयोरुभयोरपिसमानाः उत्तरीयवस्त्रेणप्राचीनावीती अनुज्ञात्रानुपनी
तेनअनुज्ञात्र्यास्त्रियाचकर्तव्येतर्पणंतुअनुज्ञातृकर्मकमेव ॥ इतिअनुपनीतकर्तृकं—स्त्रीकर्तृकंचश्राद्धं ॥ ॥ छ ॥

॥ ७० ॥ विधवाकर्तृकश्राद्धं ॥

आचम्यदेशकालावुत्कीर्त्यअस्मद्भर्तृसपत्नीकतत्पितृतत्पितृणांशर्मणांगोत्राणांवसुरुद्रादित्यस्वरूपाणां (पितृत्रयीमातृत्रयीग्राह्ये
तिद्वितीयपुस्तके)॥ अस्मन्मातामहमातुःपितामहमातुःप्रपितामहानांशर्मणांगोत्राणांवसु० सपत्नीकानांएतेषामित्यादिमहालय
श्राद्धंकरिष्यइतिसंकल्पंकुर्यात् ॥ विभवेसतिभर्तृपार्वणोत्तरंश्वश्रूतच्छ्वश्वोःदयोःगोत्रयोःवसुरुद्ररूपयोः इत्येवंपृथक्पृथगेको

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दिष्टवद्वा ॥ भर्तुरेकोद्दिष्टत्वपक्षेश्वश्रूतच्छ्वश्रूतच्छ्वश्रूणांइतितिस्रृणामुद्देशः ॥ अत्रसपत्नीकपक्षएवऋजुः ॥ मातामहपार्वणोत्तरंमातामहीपार्वणंचसंकीर्तयेत् ॥ अस्मिन्कल्पेभर्तृशब्दोत्तरंमातामहपार्वणेचनसपत्नीकशब्दोच्चारणं ॥ ततःस्वपितृव्यादीनाम पिशक्तौसत्यांकीर्तनं ॥ एवंयथाधिकारंसंकल्पंकृत्वाकंचिद्ब्राह्मणमृत्विक्त्वेनविभाव्यतद्द्वारासर्वंकारयेत् ॥ तदभावेस्वयमेववैदिकमंत्रवर्जंसर्वंविधिमाचरेत् ॥ स्वमात्रादिपार्वणचतुष्टयमपुत्रविषयकमितिनवीनाः ॥ परेद्युस्तर्पणं ॥ इति ॥ ॥

॥ ७१ ॥ अविधवानवमीश्राद्धं ॥

उक्तापराह्णेश्रौताग्निमान्स्मार्ताग्निमान्वाचेत्पृथक्पाकेनवैश्वदेवंकृत्वाआप्रकोडात्प्राचीनावीतंकृत्वाअस्मन्मातृपितामहीप्रपितामहीनांअमुकदानांगोत्राणांवसु० अस्मत्सापत्नमातुःदायाःगोत्रायाःवसु० नवमीश्राद्धमहंकरिष्यइतिसंकल्प्यवैश्वदेवार्थंद्वावेकंवाविप्रंनिमंत्र्यमातृपार्वणार्थंविप्रत्रयंसापत्नमात्रर्थमेकंसर्वार्थमेकंवानिमंत्र्य इतरत्सर्वंपार्वणवत् सापत्नमातुरेकोद्दिष्टवत् प्रपितामह्यनंतरंसापत्नमातुःकीर्तनं आसनादिपिंडदानांतेषुपदार्थेषुइत्येकःपक्षःअपरस्तुमात्रासहैवसापत्नमातरमुत्कीर्त्यपितामहीप्रपितामह्योरुत्कीर्तनमिति ॥ अस्मिन्पक्षेअस्मन्मात्रोःअमुकदयोःगोत्रयोःवसुरूपयोःपितामहीप्रपितामह्योःदयोःगोत्रयोःरुद्रादित्यरूपयोःइति अस्मन्मातृसापत्नमातृपितामहीप्रपितामहीनांदानांगोत्राणांवसुरुद्रादित्यस्व० इत्येवंवोत्कीर्तनंसर्वत्र ॥ अस्मिन्पक्षेमात्रोःस्थानेक्षणःकरणीयःपितामहीस्थानेप्रपितामहीस्थानेच॥अर्घ्यदानंमात्रेसापत्नमात्रेचपृथगेव॥ गंधादिषुअस्मन्मातरौअमुकदेगोत्रेरूपेएषयुवांगंधःइत्याद्यूहः॥ अन्नदानेअस्मन्मातृ[illegible]इदमन्नमित्याद्यूहः॥ पिंडदानेएतद्वामस्मन्मातरौअमुक

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

देयेचयुवामनु याश्चेतिवा अंजाथांअभ्यंजाथांइत्यंजनाभ्यंजने॥ बहुत्वेतुबहुवचनं॥ अमुकदाःगोत्राः येचवोनुइतिपिंडदाने॥ अङ्ध्वमभ्यङ्ध्वमित्यंजनाभ्यंजनेइतिविशेषः॥ तदहरेवशुक्लतिलैस्तर्पणं॥ इत्यविधवानवमीश्राद्धं॥ ॥ ७१ ॥

॥ ७२ ॥ दौहित्रप्रतिपच्छ्राद्धं ॥

आश्विनशुक्लप्रतिपदिउक्तापराह्णेसंगवेवाश्रौताग्निमान्स्मार्ताग्निमान्वाचेत्पृथक्पाकेनवैश्वदेवंकृत्वाआचम्यपवित्रपाणिःप्राणानायम्यदेशकालोत्कीर्तनांतेअस्मन्मातामहमातुःपितामहमातुःप्रपितामहानांशर्मणांगोत्राणांवसुरुद्रादित्यस्वरूपाणां (मातामह्या अपिमृतौ सपत्नीकानां) तृप्त्यर्थंआश्विनशुक्लप्रतिपच्छ्राद्धंसांकल्पिकविधिनाकरिष्येइतिसंकल्प्यपूर्वोक्तसांकल्पविधानेनसर्वं कृत्वातद्वर्गमात्रस्यशुक्लतिलैस्तदहरेवतर्पणंकृत्वाश्राद्धशेषमिष्टैःसहभुंजीत॥ इतिदौहित्रप्रतिपच्छ्राद्धं॥ ॥

॥ ७३ ॥ तीर्थश्राद्धं ॥

काश्यादितीर्थप्राप्तौस्नानादिकंविधायतिलतर्पणंकृत्वादेशकालौसंकीर्त्यपुरूरवार्द्रवसं० प्राचीनावीतीपित्राद्याप्तांतान्महालयवदुच्चार्यतीर्थश्राद्धंकरिष्यइतिसंकल्प्य क्षेत्रवासिनोन्यान्वाब्राह्मणान्महालयवन्निमंत्र्य अर्घ्यावाहनांगुष्ठनिवेशनतृप्तिप्रश्नविकिरविसर्जनवर्जंमहालयश्राद्धवत्सर्वंकुर्यात्॥ दृग्दोषदिग्बंधावत्रनस्तइतिकश्चित्॥ अत्राग्नौकरणंकृताकृतं॥ तत्रकरणपक्षेग्नावेवहोमः॥ पिंडांस्तुतीर्थजलएवक्षिपेत्॥ महालयपदस्थानेतीर्थश्राद्धपदोच्चारणं॥ एवंगयाश्राद्धादावपियथायथमूहोद्रष्टव्यः॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ७४ ॥ यात्रारंभेघृतश्राद्धं ॥

उक्तापराह्णेश्रौताग्निमान्स्मार्ताग्निमान्वाचेत्पृथक्पाकेनवैश्वदेवंकृत्वातिलतर्पणंविधायदेशकालकीर्तनांतेमहालयवत्पितॄनुद्दिश्य अमुकतीर्थयात्रांकर्तुमादौतदंगत्वेनविहितंसमस्तपितॄनुद्दिश्यघृतश्राद्धंकरिष्यइतिसंकल्प्यक्षणादिअर्घ्यावाहनवर्जंपरिवेषणांतं कुर्यात् ॥ अग्नौकरणंकृताकृतं ॥ करणपक्षेघृतेनाग्नौकरणं तस्यैवमुख्यत्वात् ॥ पात्रेघनीभूतंघृतंप्रधानं भक्ष्यभोज्यादिकंव्यं जनत्वेनेतिद्रष्टव्यं ॥ अन्नशब्दस्थानेघृतशब्दप्रयोगोदानेकार्यः ॥ अन्यत्सर्वंतीर्थश्राद्धवत् ॥ ततोबंधून्संभोज्यघृतशेषमादाय ग्रामंप्रदक्षिणीकृत्यक्रोशमात्रंगत्वातत्रपाकंविधायसर्वस्मादन्नात्किंचित्किंचिद्ग्रासमात्रंसमवदायघृतप्लुतमग्नौकिंचित्प्रक्षिप्यानी तश्राद्धशिष्टघृतेनसहभोजनंकुर्यात् ॥ इतिघृतश्राद्धं ॥ ॥ यात्रांकृत्वागृहप्रवेशेश्राद्धंपूर्वोक्तवत्सर्वंकुर्यात् ॥ तत्रसर्वान्पि तॄनुच्चार्यअमुकतीर्थात्प्रत्यागमननिमित्तंघृतश्राद्धंकरिष्येइतिसंकल्पवाक्येविशेषः ॥ अन्यत्समानं ॥ केचिद्दधिश्राद्धमाहुःतत्र संकल्पादौमध्येमध्येचघृतपदस्थानेदधिश्राद्धमित्यूहोज्ञेयः ॥ इतियात्रोत्तरंघृतश्राद्धम् ॥ ॥ ७ ॥

॥ ७५ ॥ युगादिश्राद्धं ॥

उक्तापराह्णेश्रौताग्निमान्स्मार्ताग्निमान्वाचेद्वैश्वदेवंकृत्वासपत्नीकपितृवर्गस्यसपत्नीकमातामहवर्गस्यचतिलतर्पणंकृत्वादेशकाल कीर्तनांतेपुरूरवार्द्रव० प्राचीनावीतीअस्मत्पितृपितामहप्रपितामहानांशर्मणांगोत्राणांवस्वादिरूपाणांसपत्नीकानांमातामहमा तुःपितामहमातुःप्रपितामहानांशर्मणांगोत्राणांवस्वादिरूपाणांसपत्नीकानांयुगादिनिमित्तंश्राद्धंसंकल्पविधिनासद्यःकरिष्यइति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एवमन्वादि–अयनद्वय–संक्रमण–ग्रहण–व्यतीपात–वैधृत्यादिनिमित्तंश्राद्धंकरिष्येइति तत्रतत्रतत्तद्दूहःकार्यः ॥ एवमर्धोदय–गजच्छाया–कपिलाषष्ठीषुतत्तद्दूहेनश्राद्धंकुर्यात् ॥ इतियुगादिश्राद्धानि ॥ ॥ ७ ॥

॥ ७६ ॥ अक्षय्यतृतीया ॥

अत्रयुगादिश्राद्धमुपरिनिर्दिष्टवत्सपत्नीकपित्रादित्रयसपत्नीकमातामहादित्रयेतिषट्दैवतंसांकल्पविधिनाकार्यं इदमपिंडकमेवे तिधर्मसिंधौ॥ श्राद्धासंभवेतिलतर्पणमप्यत्रकार्यं ॥ अत्रदेवतोद्देशेनपित्रुद्देशेनचोदकुंभदानमुक्तंतत्रसंकल्पः॥ श्रीपरमेश्वरप्री त्यर्थंपितृप्रीत्यर्थंचब्राह्मणायोदकुंभदानमहंकरिष्ये ॥ तदंगंकुंभपूजनंब्राह्मणपूजनंचकरिष्येइतिसंकल्प्य सूत्रवेष्टितंगंधफलय वाद्युपेतंकुंभंगंधादिपंचोपचारैःसंपूज्य ॥ एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्सकलाममसंतुमनोरथाः ॥ इतिमंत्रेणदद्यात् ॥ पित्रुद्देशेतुपितृणामक्षय्यतृप्त्यर्थंउदकुंभदानंकरिष्ये ॥ उदकुंभब्राह्मणौसंपूज्य कुंभेगंधतिलफलादिनि क्षिप्य ॥ एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः ॥ गंधोदकतिलैर्मिश्रंसान्नंकुंभंफला न्वितं ॥ पितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठतु ॥ इतिमंत्रेणदद्यात् ॥ अत्रसमुद्रस्नानंमहाफलं ॥ इत्यक्षय्यतृतीया ॥ ॥

॥ ७७ ॥ नित्यश्राद्धप्रयोगः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्मत्पितृपितामहप्रपितामहानांशर्मणांगोत्राणांवसुरु० सपत्नीकानांअस्मन्मा तामहमातुःपितामहमातुःप्रपितामहानांशर्मणांगोत्राणांवसुरु० सपत्नीकानांतृप्त्यर्थंनित्यश्राद्धंकरिष्येइतिसंकल्प्यआसनेतत्तद्ब

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गोंदेशेनविप्रद्वयमेकंवोपवेश्यगंधादिभिःसंपूज्य इदंपरिविष्टंपरिवेक्ष्यमाणंसोपस्करमन्नंपितृपितामहप्रपितामहानांसपत्नीकाना मातृणांस्वधासंपद्यतांकव्यंनममइतिनिवेदयेत् ॥ एवंमातामहवर्गे ॥ विप्रभोजनोत्तरंयथासंभवंदक्षिणांदत्त्वानमस्कृत्यवि सर्जयेत् ॥ नात्रब्रह्मचर्यादिनियमाःनतर्पणंनविश्वेदेवाः ॥ दक्षिणादानेविकल्पः ॥ अथसर्वथाविप्रालाभेकिंचिदन्नमुद्धृत्यपितृ भ्यइदमन्नंस्वधानममइतिपित्रुद्देशेनत्यक्त्वागोभ्योदद्यात् ॥ गवालाभेअग्नौक्षिपेत् ॥ यस्मिन्दिनेपितुरमावास्यानांदीमुखश्रा द्धादिकंपतेत्तदापित्रादीनांतृप्तत्वात् तत्रनांदीश्राद्धंकर्तव्यं पद्व्यादिसांवत्सरिकादिषुएतानइतिशिष्टानित्यश्राद्धदेवतास्तत्रकर्त व्यमितिव्यवस्थाज्ञेया ॥ इतिनित्यश्राद्धंमासिश्राद्धंच ॥ ॥ इतिनित्यश्राद्धप्रयोगः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ७८ ॥ श्राद्धसंपातेतंत्रप्रयोगः ॥

श्रीः ॥ वर्गचतुष्टयस्यैकदिनमरणेनश्राद्धसंपातेपृथक्पाककरणाशक्तावेकपाकेनतंत्रेणश्राद्धप्रयोगः ॥ यद्यपिवर्गचतुष्टयश्राद्धंपृथ गेवकर्तव्यंतथापिएकस्मिन्दिनेमुख्यकालेपृथक्पृथक्कर्तुमशक्यत्वात्तंत्रमेव ॥ देशकालोत्कीर्तनांतेपितृवर्गस्य अपुत्रश्चेन्मातामहस्त द्वर्गस्य मातामहीवर्गस्यचषष्ठ्यंतमुच्चारणंकृत्वाएतेषामाब्दिकश्राद्धंदर्शश्राद्धविधिनाद्यकरिष्यइतिसंकल्प्य वर्गचतुष्टयार्थंतंत्रे णैववैश्वदेवविप्रनिमंत्रणंकृत्वाप्रतिवर्गंत्रयंत्रयंएकमेकमेकमेववाविप्रंनिमंत्र्यपादप्रक्षालनादिसर्वंदर्शश्राद्धवत्कुर्यात् ॥ श्वोभूते तिलतर्पणं ॥ पितृव्यादीनामप्येकस्मिन्दिवसेचेन्मरणंतदातेषामेकोद्दिष्टविधिपक्षेपृथेगवमरणक्रमेणतदज्ञानेसंबंधासत्तिक्रमेणोल्ले खंकृत्वातंत्रेणैवश्राद्धंमध्याह्नकालत्वात्पित्रादिश्राद्धात्पूर्वमेवकार्यं पार्वणपक्षेतुवर्गचतुष्टयेनसहैव ॥ अत्रपित्रादिवर्गचतुष्टयोल्ले खोत्तरमेवसर्वत्रोल्लेखः स्त्रियाअप्येतद्दिनेमरणेएकोद्दिष्टपक्षेपृथगेव पितृव्यादीनामप्येतस्मिन्दिनेश्राद्धंचेत्तेषामप्येकोद्दिष्टपक्षे

CC0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तैःसाकमेवपत्न्याअप्येकोद्दिष्टंकार्यं पार्वणपक्षेसर्वेषांसहैवेतिद्रष्टव्यं ॥ यदिसमतंत्राणांश्राद्धानामेकस्मिन्दिनेसंपातस्तदातानि सर्वाण्युत्कीर्त्यतंत्रेणकरिष्यइत्युल्लिखेत् यदिमहातंत्राल्पतंत्रयोःसमासस्तदामहातंत्रस्यैवोल्लेखंकृत्वाश्राद्धंकुर्यात्॥अल्पतंत्रस्यतु तेनैवसिद्धिः प्रसंगसिद्धस्यतर्पणंविरोधेसमसंख्यत्वेआदावंतेवाविषमसंख्यत्वेबह्वनुरोधः ॥ इतिश्राद्धसंपातेप्रयोगः ॥ ॥

॥ ७९ ॥ प्रोष्ठपदीश्राद्धप्रयोगः ॥

भाद्रपदपौर्णमास्यांकृतनित्यक्रियःउक्तापराह्णेप्रपितामहात्परांस्त्रींस्तिलमिश्रोदकेनतर्पयित्वादेशकालौसंकीर्त्यधुरिलोचनसंज्ञ कानांविश्वेषांदेवानांप्राचीनावीतीअस्मत्प्रपितामहपितृपितामहप्रपितामहानांशर्मणांगोत्राणांवसुरुद्रादित्यस्वरूपाणांप्रोष्ठप्रदी श्राद्धमद्यकरिष्ये धुरिसंज्ञकविश्वेदेवार्थेलोचनसंज्ञकदेवार्थेचविप्रद्वयमेकंवानिमंत्र्यअस्मत्प्रपितामहपितुःशर्मणःगोत्रस्यवसुरूप स्यस्थानेत्वांनिमंत्रयेइतिनिमंत्र्यत्वयाक्षणःकरणीयःअस्मत्प्रपितामहपितामहस्यशर्मणोगोत्रस्यरुद्र०स्थानेत्वां०अस्मत्प्रपितामह प्रपितामहस्यशर्मणोगोत्रस्यादित्यरूपस्यस्थानेत्वां० इतिविप्रत्रयमेकंवानिमंत्रयेत् विप्रैकत्वपक्षेधुरिलोचनसंज्ञकविश्वेषांदेवानां इतिदेवविप्रनिमंत्रणेतत्तत्कर्मणितत्तद्विभक्त्योहः अस्मत्प्रपितामहपितृपितामहप्रपितामहानांशर्मणांगोत्राणांवसुरुद्रादित्यस्वरू पाणांइत्यादिपितृकर्मणितत्तद्विभक्त्योहः ॥ मार्जयंतांप्रपितामहपितरःसोम्यासःमार्जयंतांप्रपितामहपितामहाःसोम्यासःमार्ज यंतांप्रपितामहप्रपितामहाःसोम्यासःएतत्तेप्रपितामहपितरमुकशर्मन्येचत्वामनुएतत्तेप्रपितामहपितामहामुकशर्मन्येचत्वामनु एतत्तेप्रपितामहप्रपितामहामुकशर्मन्येचत्वामनुआंक्ष्वप्रपितामहपितरमुकशर्मन्आंक्ष्वप्रपितामहपितामहामुकशर्मन्आंक्ष्वप्र पितामहप्रपितामहामुकशर्मन्एवमभ्यंक्ष्वेत्यत्राप्यूहः नात्रचतुर्थःपिंडोलेपनिमार्जनंवा ॥ अन्यत्सर्वंदर्शश्राद्धवत् ॥ इतिप्रो०॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ८० ॥ श्राद्धानुकल्पाः ॥

तत्रद्विजाद्यभावेदर्भबटुविधानेनपिंडदानमात्रमुक्तं ॥ अथवाद्रव्यविप्रयोरभावेपक्कान्नस्यपैतृकसूक्तेनहोमःकार्यः ॥ यद्वाश्राद्धदिनेप्राप्तेभवेन्निरशनःपुमान् ॥ किंचिद्दद्यादशक्तोवाउदकुंभादिकंद्विजे ॥ तृणानिवागवेदद्यात्पिंडान्वाप्यथनिर्वपेत् ॥ तिलदर्भैःपितॄन्वापितर्पयेत्स्नानपूर्वकं ॥ अथवातृणभारंदहेत् ॥ धान्यंवातिलान्वास्वल्पांदक्षिणांवादद्यात् ॥ अथवासंकल्पादिसर्वंश्राद्धप्रयोगंपठेत् ॥ सर्वाभावेवनंगत्वोर्ध्वबाहुःस्वकक्षंदर्शयन्निदंपठेत् ॥ नमेस्तिवित्तंनधनंनचान्यच्छ्राद्धोपयोगिस्वपितॄन्नतोस्मि ॥ तृप्यंतुभक्त्यापितरोमयैतौभुजौकृतौवर्त्मनिमारुतस्य ॥ इति ॥ प्रभासखंडेन्येपिमंत्राउक्ताः ॥ इतिश्राद्धानुकल्पाः ॥

॥ ८१ ॥ यतेःसमाराधनप्रयोगः ॥

श्रीः ॥ समाराधनप्रयोगःपार्वणश्राद्धानंतरंश्वःसद्योवाकार्यः ॥ कृतनित्यक्रियोयजमानःप्रातःआचम्यप्राणानायम्यदेशकालावुत्कीर्त्यश्रीनारायणप्रीत्यर्थंब्रह्मीभूतस्यगुरोःसमाराधनंकरिष्ये ॥ तदंगंक्षणादिकरिष्ये ॥ ब्रह्मीभूतस्यगुरोःसमाराधनेगुर्वर्थे भवद्भिःक्षणःकर्तव्यः ॥ परमगुर्वर्थे परमेष्ठीगुर्वर्थे परात्परगुर्वर्थेभवद्भिःक्षणःकर्तव्यः ॥ शुक्लेकेशवार्थेक्षणःकर्तव्यः एवंनारायणार्थे माधवार्थे गोविंदार्थे विष्ण्वर्थे मधुसूदनार्थे त्रिविक्रमार्थे वामनार्थे श्रीधरार्थे हृषीकेशार्थे पद्मनाभार्थे दामोदरार्थेक्षणःकर्तव्यः ॥ कृष्णेतु संकर्षणार्थे वासुदेवार्थे प्रद्युम्नार्थे अनिरुद्धार्थे पुरुषोत्तमार्थे अधोक्षजार्थे नारसिंहार्थे अच्युतार्थे जनार्दनार्थे उपेंद्रार्थे हर्यर्थे श्रीकृष्णार्थेइति ॥ एवंषोडशअष्टौचतुरोवाब्राह्मणान्निमंत्र्य (यतीन्निमंत्र्य) ॥ गंधाक्षततुलसीदलकर्पूरमिश्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

[illegible]कृत्वामंत्रान्पठेत् ॥ अस्मिन्राष्ट्रश्रियमावेशयाम्यतादेवीःप्रतिपश्याम्यापः ॥ दक्षिणं[illegible]
मवनेनिजेस्मिन्राष्ट्रइंद्रियंदधामि ॥ सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंवर्धयामि ॥ पूर्वमन्यमपरमन्यंपादाववनेनिजे ॥ देवा
राष्ट्रस्यगुप्त्याअभयस्यावरुध्यै ॥ आपःपादावनेजनीर्द्विषंतंनिर्दहंतुमे ॥ चर॑णंप॒वित्रं॒वित॑तंपुरा॒णं ॥ येन॑पू॒तस्तर॑तिदुष्कृ॒तानि॑ ॥ ते
न॑प॒वित्रे॑णशु॒द्धेन॑पू॒ताः ॥ अति॑पा॒प्मान॒मरा॑तिंतरेम ॥ लो॒कस्य॒द्वार॑मर्चि॒मत्प॒वित्रं॑ ॥ ज्योति॑ष्म॒द्भ्राज॑मानं॒मह॑स्वत् ॥ अ॒मृत॑स्य॒धारा॑ब
हु॒धादोह॑मानं ॥ चर॑णंनोलो॒केसुधि॑तांदधातु ॥ ती॒र्थमे॒वस॑मा॒नानां॑भवतिइत्यादिसूक्तंपठेत् ॥ गुरुस्वरूपिणेब्राह्मणायइदंपाद्यं ॥
ततःतानाचमय्यस्वयंचद्विराचम्यपादप्रक्षालनोदकंपात्रांतरेगृहीत्वातत्पादौसाक्षतगंधपुष्पतुलसीदलैरभ्यर्च्य ॥ आनंदमानंद
करंप्रसन्नंज्ञानस्वरूपंनिजबोधरूपं ॥ योगींद्रमीड्यंभवरोगवैद्यंश्रीमद्गुरुंनित्यमहंनमामि ॥ इतिनमस्कुर्यात् ॥ एवंसर्वेषांपूजां
गंधादिभिःकृत्वातत्पादोदकपात्रंगंधादिभिरलंकृत्यदेवसंनिधौसंस्थाप्य कुशासनेषुप्राङ्मुखानुदङ्मुखान्वागुरवेइदमासनंपरम
गुरवेइदमासनमित्यादिक्रमेणअथवागुर्वादिभ्यइदमासनमित्याद्युपवेश्यपुरुषसूक्तेनप्रत्यृचं ॐ नमोनारायणायेतिमंत्रसहितेन
आवाहनादिषोडशोपचारैःपदार्थानुसमयेनाभ्यर्चयेत् ॥ अथवागंधपुष्पधूपदीपाच्छादनांतापूजाकर्तव्या ॥ ॐ स॒हस्र॑शीर्षा॒० ॐ
नमोनारायणायगुरुभ्योनमः॥संकर्षणादिश्रीकृष्णांतेभ्योनमःआवाहनंस० इति ॥ ततश्चतुरस्राणिमंडलानिकृत्वातेषुपात्राण्या
साद्यतेषुपायसादिविशिष्टद्रव्यंसाज्यंव्यंजनसहितंचपरिविष्यगायत्र्याप्रोक्ष्यगुरवेइदमन्नंपरिविष्टंपरिवेक्ष्यमाणंचातृप्तेःस्वाहा ॥
हव्यंनमम एवंसर्वेषां ॥ परमगुरवेपरमेष्ठीगुरवे परात्परगुरवे केशवाय० इत्यादिसंकर्षणायेदमन्नं ॥ इतिसर्वेभ्योनिवेद्य (एको

१ पादप्रक्षालनकालेअथातःपुरोधायाइत्यादीनिब्राह्मणखंडानिपठंति ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विष्णुर्महद्भूतं० अनेनगुर्वाराधनेनभगवान्नारायणःप्रीयतां ॥ सर्वेषामापोशनंदत्वा) ॐतद्ब्रह्म ॐतद्वायुः ॐतदात्मा ॐतत्सत्यं ॐतत्सर्वं ॐतत्पुरोर्नमः अंतश्चरतिभूतेषुगुहायांविश्वमूर्तिषु ॥ त्वंयज्ञस्त्वंवषट्कारस्त्वमिंद्रस्त्वꣳरुद्रस्त्वंविष्णुस्त्वं ब्रह्मत्वंप्रजापतिः ॥ त्वंतदापआपोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ भोक्तुमुपविष्टेषुउपनिषन्मंत्राञ्छ्रावयेत् ॥ तृप्तेषुपुनरोंत द्ब्रह्मेत्यनुवाकंजपित्वा उत्तरापोशनमाचांतेषुविशिष्टतांवूलदक्षिणावस्त्रादिभिरभ्यर्च्य उपविष्टेष्वेवतेषुगुर्वाराधनांगभूतंतीर्थ पूजनंकरिष्येइतिसंकल्प्य चतुरस्रंमंडलंगोमयेनोपलिप्यतत्ररंगवल्यादिभिरलंकृत्यतन्मंडलेधान्योपरिपादोदककलशंसंस्थाप्य तत्रगंगादिसर्वतीर्थानिभावयित्वा पुरुषसूक्तेनप्रत्यृचंतीर्थराजायनमइत्यनेनषोडशोपचारैरभ्यर्च्यतत्पात्रंशिरसिधृत्वा॥ लोकःस रस्वत्यायांत्येषवैदेवयानःपंथास्तमेवान्वारोहंत्याक्रोशंतोयांत्यर्वतिमेवान्यस्मिन्प्रतिषज्यंप्रतिष्ठांगच्छंतियदादशंशतंकुर्वत्यथैकमु त्थानꣳशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठंतियदाशतꣳसहस्रंकुर्वत्यथैकमुत्थानꣳसहस्रसंमितोवाअसौलोकोमुमेवलो कमभिजयंतियदैषांप्रमीयेतयदावाजीयेरन्नथैकमुत्थानंतद्धितीर्थं ॥ १ ॥ भीषास्माद्वातःपवते ॥ भीषोदेतिसूर्यः ॥ भीषास्माद ग्निश्चेंद्रश्च ॥ मृत्युर्धावतिपंचमइति ॥ सैषानंदस्यमीमांसाभवति ॥ युवास्यात्साधुयुवाध्यायकः॥ आशिष्ठोदृढिष्ठोबलिष्ठः ॥ तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात् ॥ सएकोमानुषआनंदः॥ तेयेशतंमानुषाआनंदाः ॥ १ ॥ सएकोमनुष्यगंधर्वाणामानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ तेयेशतंमनुष्यगंधर्वाणामानंदाः ॥ सएकोदेवगंधर्वाणामानंदः ॥ श्रोत्रियस्य० ॥ तेयेशतंदेवगंध र्वाणामानंदाः ॥ सएकःपितृणांचिरलोकलोकनामानंदः ॥ श्रोत्रियस्य० ॥ तेयेशतंपितृणांचिरलोकलोकानामानंदाः ॥ सएक आजानजानांदेवानामानंदः ॥ श्रोत्रियस्य० ॥ २ ॥ तेयेशतमाजानजानांदेवानामानंदाः॥ सएकःकर्मदेवानांदेवानामानंदः॥

॥११९॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

येकर्मणादेवानांपियंति ॥ श्रोत्रियस्य० ॥ तेयेशतंकर्मदेवानांदेवानामानंदाः ॥ सएकोदेवानामानंदः ॥ श्रोत्रियस्य० शतंदेवानामानंदाः ॥ सएकइंद्रस्यानंदः ॥ ३ ॥ श्रोत्रियस्य० ॥ तेयेशतमिंद्रस्यानंदाः ॥ सएकोबृहस्पतेरानंदः ॥ श्रोत्रियस्य० ॥ तेयेशतंबृहस्पतेरानंदाः ॥ सएकःप्रजापतेरानंदः ॥ श्रोत्रियस्य० ॥ तेयेशतंप्रजापतेरानंदाः ॥ सएकोब्रह्मणआनंदः ॥ श्रोत्रियस्य० ॥ सयश्चायंपुरुषे ॥ यश्चासावादित्ये ॥ सएकः ॥ सयएवंवित् ॥ अस्माल्लोकात्प्रेत्य ॥ एतमन्नमयमात्मानमुपसंक्रामति ॥ एतंप्राणमयमात्मानमुपसंक्रामति ॥ एतंमनोमयमात्मानमुपसंक्रामति ॥ एतंविज्ञानमयमात्मानमुपसंक्रामति ॥ एतमानंदमयमात्मानमुपसंक्रामति ॥ तदप्येषश्लोकोभवति ॥ ४ ॥ यतोवाचोनिवर्तंते ॥ अप्राप्यमनसासह ॥ आनंदं ब्रह्मणोविद्वान् ॥ नबिभेतिकुतश्चनेति ॥ एतꣳहवाववनतपति ॥ किमहꣳसाधुनाकरवं ॥ किमहंपापमकरवमिति ॥ सयएवं विद्वानेतेआत्मानꣳस्पृणुते ॥ उभेह्येवैषएतेआत्मानꣳस्पृणुते ॥ यएवंवेद ॥ इत्युपनिषत् ॥ इतिजपित्वाहरिकीर्तनपुरःसरंसहर्ष नृत्यंकृत्वातत्पात्रंपुनःमंडलेसंस्थाप्यचंदनाक्षतपुष्पाणिपूजावशिष्टानिबंधुभिःसहस्वयंधृत्वाविप्रान्प्रदक्षिणीकृत्य आनंदमानंद करंप्रसन्नंज्ञानस्वरूपंनिजबोधरूपं ॥ योगींद्रमीड्यंभवरोगवैद्यंश्रीमद्गुरुंनित्यमहंनमामि ॥ गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः ॥ गुरुःसाक्षात्परंब्रह्मतस्मैश्रीगुरवेनमः ॥ इतिमंत्रैर्द्विजांस्तीर्थराजंचनमस्कृत्य ॥ गुर्वर्थेविप्रहस्तेपादोदकपात्रंदत्वातदाज्ञयातत्तीर्थ मंत्रेणगृह्णीयात् ॥ तन्मंत्रः ॥ अविद्यामूलशमनंसर्वपापप्रणाशनं ॥ गुरोःपादोदकंतीर्थसंसारद्रुमनाशनं ॥ पुत्रादिकामनायांतु ॥ शोषणंपापपंकस्यदीपनंज्ञानतेजसः ॥ गुरोःपादोदकंचित्रंपुत्रपौत्रप्रवर्धनं ॥ इतिगृह्णीयात् ॥ तान्पुनःप्रणम्यतानन्यांश्चदक्षि णादिभिस्तोषयित्वासन्मानपुरःसरंताननुव्रज्य ॥ अनेनकृतब्रह्मीभूतस्यगुरोःसमाराधनेनश्रीभगवान्नारायणस्वरूपीपरमेश्वरः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रीयतांनममेति ॥ कर्मेश्वरार्पणंकृत्वासुहृद्युतोभुंजीत ॥ ततःप्राप्तदर्शमहालयतीर्थप्रयुक्तानिश्राद्धानिकुर्यात् ॥ प्रतिमास मेवमेवाराधनं ॥ प्रत्यब्दंपार्वणोक्तरंचैवमेव ॥ इत्थंकरणाशक्तौयथाशक्तिब्राह्मणानाहूय पादप्रक्षालनपूर्वकंगंधादिभिरभ्यर्च्यभो जयेत् ॥ इतिनागरखंडानुसार्याचारानुगृहीतआराधनप्रयोगः ॥ ॥ श्र ॥ ॥ छ ॥

इतिहिरण्यकेशीयब्रह्मकर्मसमुच्चयेप्रथममाह्निकप्रकरणम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अथसंस्कारप्रकरणंद्वितीयम् ॥

॥ ८२ ॥ षोडशसंस्काराः ॥

श्रीगणेशायनमः ॥ प्रणम्यगोपालमनंतमाद्यंनेत्रांचलानंदितगोपवृंदं ॥ स्मार्तप्रयोगंविदधातियत्नाद्भिरण्यकेशीयविधौमहेशः ॥ १ ॥ सत्याषाढमुनिंवंदेस्वर्णकेशसमन्वितं ॥ योऽनुष्ठेयपदार्थानांक्रमकल्पमकल्पयत् ॥ २ ॥ यत्कृतांवेदवद्वृत्तिमाद्रियंते विपश्चितः ॥ मातृदत्तश्चिरंजीयाद्वृत्तिरूपेणतत्त्ववित् ॥ २ ॥ माहेश्वर्यामुक्तान्संस्कारान्षोडशापिसंगृह्य ॥ तदनुक्तानप्यंतः संगृह्णीमोऽत्ररत्नमालातः ॥ ४ ॥ जन्मनाजायतेशूद्रःसंस्काराद्द्विजउच्यतइतिमनुस्मरणादभ्यर्हितद्विजत्वाधायकानिषोडश कर्माण्यप्यखिलविप्राणामावश्यकान्येवेतिनिर्विवादं ॥ षोडशकर्माणिच—गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकर्मान्नप्रा शनचौलोपनयनवेदव्रतचतुष्टयगोदानसमावर्तनविवाहपितृमेधाख्यानि ॥ तत्रसंस्कारेषुगर्भाधानसंस्कारस्यप्राथम्यादनुष्ठान सौकर्यार्थंचसौत्रमुपनयनादिक्रममुत्सृज्यगर्भाधानादिक्रमेणसंस्काराणांप्रयोगाउच्यंतेइतिमहेश्वरभट्टप्रतिज्ञा ॥ तत्रांतरांतरा तीवोपयुक्ताअपितदनुपात्ताविशेषप्रयोगाःसंस्काररत्नमालास्थाअपियथाक्रमंसंगृह्यंते ॥ ॥ ७ ॥

॥ ८३ ॥ गणपतिपूजनम् ॥

श्रीः॥ कर्ताकृताभ्यंगस्नानःकृतमंगलतिलकःपत्न्यासहोपविश्याचम्यप्राणानायम्यइष्टदेवतांगुर्वादींश्चनमस्कृत्यदेशकालौनिर्दि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्यामुककर्मकरिष्यइतितत्कर्मप्रयोगाद्यथावत्संकल्प्यतदंगत्वेनगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये ॥ ॐ गणानांत्वागणपतिꣳहवामहेकविंकवीनामुपमश्रवस्तमं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं॥ॐ भूर्भुवःसुवःऋद्धिबुद्धिसहितंसांगंसपरिवारंसायुधंसशक्तिकंगणपतिंअस्मिन्नारीकेलफलेआवाहयामि ॥ गणपतयेनमइतिनाममंत्रेण वाऽऽवाहनासनपाद्यार्घ्याचमनस्नानवस्त्रगंधाक्षतपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणाप्रदक्षिणानमस्काराइतिषोडशोपचारैः गंधपुष्पधूपदीपनैवेद्याइतिपंचोपचारैर्वागणपतिंसंपूज्यगणानांत्वेतिपुष्पांजलिंदत्वा ॥ वक्रतुंडमहाकायकोटिसूर्यसमप्रभ ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा॥ अथवा कार्यमेसिद्धिमायातुप्रसन्नेत्वयिधातरि ॥ विघ्नानिनाशमायांतुसर्वाणिसुरनायक ॥ अनयाविघ्नेश्वरपूजयासकलविघ्नहर्तामहागणपतिःप्रीयतां ॥ इतिगणपतिपूजा ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ८४ ॥ पुण्याहवाचनेपृथग्देवताः ॥

श्रीः ॥ तत्रगर्भाधानादिसर्वकर्मसुआदावंतेचकेषुचित्पुण्याहवाचनंविहितं ब्राह्मणानन्नेनपरिविष्यपुण्याहꣳस्वस्त्ययनमृद्धिमितिवाचयित्वेत्यादिनासूत्रकृता ॥ तत्रदेवताकांक्षायांशास्त्रांतरोक्तादेवताउच्यंते ॥ गर्भाधानस्यादावंतेचब्रह्मा ॥ पुंसवनस्योभयत्रप्रजापतिः ॥ सीमंतस्योभयत्रधाता ॥ जातकर्मण्युभयत्रमृत्युः ॥ नामकरणस्यादौसवितांतेप्रजापतिः ॥ आयुर्वर्धापनस्योभयत्राग्निरायुष्मान् ॥ अन्नप्राशनस्योभयत्रसविता ॥ चौलस्यादौकेशिनःअंतेप्रजापतिः ॥ उपनयनस्यादाविंद्रअंतेश्रद्धामेधे ॥ उपनयनचतुर्थदिवसीयपुण्याहवाचनेसुश्रवाः ॥ पुनरुपनयनस्योभयत्राग्निः ॥ ब्रह्मचारिव्रतोपकरणविसर्गयोरुभयत्रसविता ॥ ब्रह्मचारिव्रतलोपप्रायश्चित्तस्योभयत्रसविता ॥ गोदोपकरणविसर्गयोरुभयत्रसविता ॥ समावर्तनस्योभयत्रश्री

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रिंद्रोवा ॥ विवाहस्योभयत्राग्निः ॥ औपासनस्योपक्रमेऽतेचाग्निसूर्यप्रजापतयः ॥ दर्शपूर्णमासस्थालीपाकयोरुभयत्राग्निः ॥ वास्तुहोमस्यादौवास्तोष्पतिरंतेप्रजापतिः ॥ शूलगवस्योभयत्रेशानः ॥ प्रदोषव्रतस्योभयत्रेशानः ॥ नक्षत्रहोमेचोभयत्रनक्षत्रदेवताः ॥ आग्रयणस्योभयत्राग्रयणदेवताः ॥ प्रत्येकंनवग्रहमखेऽभयत्रक्रमेणादित्यादिग्रहाः ॥ तंत्रेणग्रहमखेब्रह्मादयश्चोभयत्र ॥ कूष्मांडहोमेचांद्रायणेचोभयत्राग्न्यादयः ॥ सर्पबलेरुभयत्रसर्पाः ॥ नक्षत्रेष्टावुभयत्रनक्षत्रदेवताः ॥ तडागाद्युत्सर्गेऽभयत्रवरुणः ॥ एकोद्दिष्टस्योभयत्रप्रजापतिः॥ सूतकांतेप्रधामा ॥ अग्न्याधेयेऽभयत्राग्न्यादयः ॥ अग्निष्टोमऽभयत्रेंद्रः॥ अनादिष्टकर्मसुसर्वत्रप्रजापतिः ॥ यद्यपिप्रकृतप्रकरणेकासांचिदेवदेवतानामुपयोगस्तथापिप्रकरणांतरेपिकासांचिदुपयोगोभविष्यतीतिप्रसंगतःसर्वानिरूपिताइत्यभिधेयं ॥ इतिबौधायनोक्ताःपुण्याहवाचनदेवताः ॥ ॥ छ ॥

॥ ८५ ॥ पुण्याहवाचनम् ॥

श्रीः॥ कर्ताब्राह्मणानन्नादिनासंतर्प्यगंधादिनासंपूज्यतान्पुण्याहंवाचयेत् ॥ ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां ॥ पिपृतां नो भरीमभिः॥ इतिमंत्रावृत्त्यादक्षिणोत्तरतोभूमिंस्पृष्ट्वा ॥ ॐ ओषधयः संवदंते सोमेन सह राज्ञा ॥ यस्मै करोति ब्राह्मणस्त ꣳ राजन्पारयामसि ॥ तंडुलपुंजौकृत्वा॥ ॐ आर्जिघ्रकलशं मह्या रुधारापयस्वत्या विशंत्विंदवः समुद्रमिवसिंधवः सामासहस्र आभज प्रजया पशुभिः सह पुनर्मा विशताद्रयिः ॥ कलशौनिधाय ॥ ॐ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्णिया ॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया । तीर्थजलेनपूरयित्वा । ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीꣳ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सर्वेभूतानांतामिहोपह्वयेश्रियं॥ गंधंप्रक्षिप्य॥चंदनपुष्पादिनाभूषितौकृत्वा॥ ॐ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानो दूर्वेप्रतनुसहस्रेणशतेनच ॥ दूर्वानिक्षप्य ॥ ॐ अश्वत्थेवोनिषदनंपर्णेवोवसतिःकृता ॥ गोभाजइत्किलासथयत्सनवथपूरुषं ॥ पंचपल्लवान्कलशेनिक्षिप्य ॥ ॐ याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳहसः ॥ फलं ॥ ॐ अग्नेरेतश्चंद्रꣳहिरण्यं ॥ अद्भ्यःसंभूतममृतंप्रजासु ॥ तत्संभरन्नुत्तरतोनिधायं॥अतिप्रयच्छन्दुरितंतरेयं ॥ हिरण्यंनिधाय॥ ॐ बृहस्पतेजुषस्वनोहव्यानिंविश्वदेव्य ॥ रास्वरत्नानिदाशुषे ॥ रत्नानि ॥ ॐ युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजा यमानः ॥ तंधीरासःकवयउन्नयंतिस्वाधियोमनसादेवयंतः ॥ वस्त्रं ॥ ॐ पूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणाव हाइषमूर्जꣳशतक्रतो ॥ इतितंडुलपूरितफलसहितपात्राभ्याममाननेपिदध्यात् ॥ सर्वत्रप्रतिकलशंमंत्रावृत्तिःउत्तरसंस्थताच ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः ॥ (अस्मिन्क लशेवरुणंसांगंसपरिवारंसायुधमावाहयामि ॥ इतिउत्तरकलशेअक्षतैर्वरुणमावाह्य ॥ वरुणायनमइतिगंधपुष्पधूपदीपनैवे द्यादिभिःसंपूज्यदक्षिणांदत्वा तत्त्वायामीतिमंत्रपुष्पंसमर्प्यनमस्कृत्य) ॥ अनेनकृतपूजनेनश्रीवरुणःप्रीयतां ॥ ततःकलश स्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेत्वस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा ॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥ उत्तरकलशेअक्षतान्क्षिपेत्॥ मातृदेवोभव ॥ पितृदेवोभव॥ आचार्यदेवोभव॥ अतिथिदेवोभव॥ सर्वेभ्योदेवेभ्यःनमःसर्वेभ्यो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

[illegible] ॥ अथानकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयि
त्वाऽऽशिषःप्रार्थयते ॥ प्रार्थनामाह ॥ एताःसत्याआशिषःसंतु ॥ दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेन
पुण्याहंदीर्घमायुरस्तु ॥ शिवाआपःसंतु ॥ संतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनीयं ॥ अक्षतंचारिष्टंचास्तु ॥
अस्त्वक्षतमरिष्टंच ॥ गंधाःपांतु ॥ सौमंगल्यंचास्तु ॥ अक्षताःपांतु ॥ आयुष्यमस्तु ॥ पुष्पाणिपांतु ॥ सौश्रियमस्तु ॥
तांबूलानिपांतु ॥ ऐश्वर्यमस्तु ॥ दक्षिणाःपांतु ॥ बहुदेयंचास्तु ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ श्रीर्यशो
विद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु ॥ सर्वत्रब्राह्मणैरस्त्वितिप्रतिवचनंदेयं ॥ यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाः
शुभाःशोभनाःप्रवर्ततेतमहमोंकारमादिंकृत्वा ॥ ऋग्यजुःसामाशीर्वचनंबह्वृषिसंमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाच
यिष्ये ॥ वाच्यतामितिविप्रावदेयुः ॥ उत्तरत्रचयथायोग्यंप्रत्युत्तरंदद्युः ॥ यजमानः ॥ ॐ भद्रंकर्णेभिःशृणुयामदे
वाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवाँसस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ ॐ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाः
सनरस्यप्रयंसत् ॥ द्रविणोदावीरवतीमिषन्नोद्रविणोदारासतेदीर्घमायुः ॥ ॐ सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्स
विताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ ॐ नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रं ॥
भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः ॥ ॐ उच्चादिविदक्षिणावंतोअस्थुर्येअश्वदाःसहतेसूर्येण ॥ हिरण्यदाअ
मृतत्वंभजंतेवासोदाःसोमप्रतिरंतआयुः॥ ॐ आपउंदंतुजीवसेदीर्घायुत्वायवर्चसे ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यमर्त्योजोह

१ अत्रस्वर्णःपूर्णकलशंधारयित्वेतिपाठःश्रेयान् ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वीमि ॥ जातवेदोयशोऽस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां ॥ यस्मैत्वꣳसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं ॥ अश्विनꣳसपु त्रिणंवीरवँतंगोमँतꣳरयिंनशतेस्वस्ति ॥ संत्वासिंचामियजुषाप्रजामायुर्धनंच ॥ व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानांमनःसमाधीयतां ॥ (विप्राः) समाहितमनसःस्मः ॥ (यजमानः) प्रसीदंतुभवंतः ॥ (विप्राः) प्रसन्नाःस्मः ॥ (यज मानः) शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ अविघ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ शिवंकर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ वेदसमृद्धिरस्तु ॥ शास्त्रसमृद्धिरस्तु ॥ पुत्रसमृद्धिरस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ (वाक्यद्वयेनबहिर्देशेअपःक्षिपेत्) ॥ सर्वारिष्टनिरसनमस्तु ॥ यत्पापंतत्प्रतिहतमस्तु ॥ यच्छ्रेयस्तदस्तु ॥ उत्तरेकर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंतां ॥ तिथिकरणमुहूर्त नक्षत्रसंपदस्तु ॥ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां ॥ तिथिकरणेमुहूर्तनक्षत्रेसग्रहेसदैवतेप्रीयेतां ॥ दुर्गा पांचाल्यौप्रीयेतां ॥ अग्निपुरोगाविश्वेदेवाःप्रीयंतां ॥ इंद्रपुरोगामरुद्गणाःप्रीयंतां ॥ ब्रह्मपुरोगाःसर्वेवेदाःप्रीयंतां ॥ विष्णुपुरो गाःसर्वेदेवाःप्रीयंतां ॥ माहेश्वरीपुरोगाउमामातरःप्रीयंतां ॥ वसिष्ठपुरोगाऋषिगणाःप्रीयंतां ॥ अरुंधतीपुरोगाएकपत्न्यःप्री यंतां ॥ ऋषयश्छंदांस्याचार्यावेदादेवायज्ञाश्चप्रीयंतां ॥ ब्रह्मचब्राह्मणाश्चप्रीयंतां ॥ श्रीसरस्वत्यौप्रीयेतां ॥ श्रद्धामेधेप्रीयेतां ॥ भगवतीकात्यायनीप्रीयतां ॥ भगवतीमाहेश्वरीप्रीयतां ॥ भगवतीपुष्टिकरीप्रीयतां ॥ भगवतीतुष्टिकरीप्रीयतां ॥ भगवतीऋ द्धिकरीप्रीयतां ॥ भगवतीवृद्धिकरीप्रीयतां ॥ भगवंतौविघ्नविनायकौप्रीयेतां ॥ भगवान्त्स्वामीमहासेनःसपत्नीकःससुतःसपा र्षद्गःसर्वस्थानगतःप्रीयतां ॥ हरिहरहिरण्य[illegible]ग्रामदेवताःप्रीयंतां ॥ सर्वाःकुलदेवताःप्रीयंतां ॥ सर्वानस्त

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

देवताःप्रीयंतां ॥ (सप्तभिर्वाक्यैर्बहिरपःक्षिपेत्) ॥ हताब्रह्मद्विषः ॥ हताःपरिपंथिनः ॥ हताअस्यकर्मणोविघ्नकर्तारः ॥ शत्रवःपराभवंयांतु ॥ शाम्यंतुघोराणि ॥ शाम्यंतुपापानि ॥ शाम्यंत्वीतयः ॥ शुभानिवर्धतां ॥ शिवाआपःसंतु ॥ शिवाऋतवःसंतु ॥ शिवाअग्नयःसंतु ॥ शिवाआहुतयःसंतु ॥ शिवाओषधयःसंतु ॥ शिवावनस्पतयःसंतु ॥ शिवाअतिथयःसंतु ॥ अहोरात्रेशिवेस्यातां ॥ निकामेनिकामेनःपर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतांयोगक्षेमोनःकल्पतां ॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां ॥ भगवान्नारायणःप्रीयतां ॥ भगवान्पर्जन्यःप्रीयतां ॥ भगवान्त्स्वामीमहासेनःप्रीयतां ॥ पुण्याहकालान्वाचयिष्ये॥ वाच्यतां॥ ॐ उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ याज्ययायजतिप्रत्तिर्वैयाज्यापुण्यैवलक्ष्मीः पुण्यामेवतल्लक्ष्मींसंभावयतिपुण्यांलक्ष्मींसंस्कुरुते ॥ यत्पुण्यंनक्षत्रं ॥ तद्वदृक्कुर्वीतोपव्युषं ॥ यदावैसूर्योदेति ॥ अथनक्षत्रं नैति ॥ यावतितत्रसूर्योगच्छेत् ॥ यत्रजघन्यंपश्येत् ॥ तावतिकुर्वीतयत्कारीस्यात् ॥ पुण्याहएवकुरुते ॥ तानिवाएतानिय मनक्षत्राणि ॥ यान्येवदेवनक्षत्राणि ॥ तेषुकुर्वीतयत्कारीस्यात् ॥ पुण्याहएवकुरुते॥ मह्यंसकुटुंबायमहाजनान्नमस्कुर्वाणाया शीर्वचनमपेक्षमाणायामुककर्मकारिणेपुण्याहंभवंतोब्रुवंतुइतित्रिर्यजमानः ॥ ॐ पुण्याहमितित्रिर्विप्रावदेयुः ॥ अत्रपुण्याहाद यःशब्दाःप्रतिवचनेप्रथमैकवचनांताएवप्रयोक्तव्याः ॥ तेषांस्वपरत्वात् ॥ ॐ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्यय स्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः ॥ आदित्यउदयनीयःपथ्ययैवेतःस्वस्त्याप्रयंतिपथ्यांस्वस्तिम भ्युद्यंतिस्वस्त्येवेतःप्रयंतिस्वस्त्युद्यंतिस्वस्त्युद्यंति ॥ स्वस्तिनइंद्रोवृद्धश्रवाः॥ स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्ट

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नेमिः॥ स्वस्तिनोबृहस्पतिर्दधातु ॥ अष्टौदेवावसवःसोम्यासः॥ चतस्रोद्देवीरजराःश्रविष्ठाः॥ तेयज्ञंपांतुरजसःपरस्तात् ॥
संवत्सरीणममृतꣳस्वस्ति ॥ मह्यमित्यादिअमुककर्मकारिणेस्वस्तिभवंतोब्रुवंत्वितित्रिर्यजमानः ॥ ॐ स्वस्तीतिप्रतिवचनंत्रिः ॥
ॐ ऋध्यामस्तोमंसनुयामवाजमानोमंत्रैंसरथेहोपयातं ॥ यशोनपक्कंमधुगोष्वंतराभूतांशोअश्विनोःकाममप्राः ॥ सर्वामृद्धिमृध्नु
यामितिंतवैतेजसैवपुरस्तात्पर्यभवच्छंदोभिर्मध्यतोक्षैररुपरिष्टाद्गायत्र्यासर्वतोद्वादशाहंपरिभूयसर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नो
तियएवंवेद ॥ ऋध्यास्महव्यैर्नमसोपसद्य ॥ मित्रंदेवंमित्रधेयंनोअस्तु॥ अनूराधान्हविषावर्धयंतः॥ शतंजीवेमशरदꣳसवीराः॥
त्रीणित्रीणिवैदेवानामृद्धानि ॥ त्रीणिछंदाꣳसि॥ त्रीणिसवनानि ॥ त्रयइमेलोकाः॥ ऋध्यामेवतद्वीर्यंएषुलोकेषुप्रतितिष्ठति ॥
मह्यमित्यादिअमुककर्मकारिणेऋद्धिंभवंतोब्रुवंतुइतित्रिर्यजमानः ॥ ॐ ऋध्यतामितिप्रतिवचनंत्रिः ॥ ॐ श्रियेजातःश्रियआ
निरियायश्रियंवयोजरितृभ्योदधाति ॥ श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्वौ ॥ श्रियएवैनंतच्छ्रियामादधाति
संततमृचावषट्कृत्यंसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् ॥ अमुंचलोकमिदमूचसर्वं ॥ तन्नो
नक्षत्रमभिजिद्विजित्यं ॥ श्रियंदधात्वहृणीयमानं ॥ अहेर्बुध्नियमंत्रैंमेगोपाय ॥ यमृषयस्त्रयिविदाविदुः ॥ ऋचःसामानियजूꣳ
षि ॥ साहिश्रीरमृतासतां ॥ (एभिर्मंत्रैःसुवासिनीभिर्नीराजनंकारयंति) ॥ मह्यमित्यादिअमुककर्मकारिणेश्रीरस्त्वितिभवंतो
ब्रुवंतुइतित्रिर्यजमानः ॥ ॐ अस्तुश्रीरितिप्रतिवचनंत्रिः ॥ वर्षशतंपूर्णमस्तु ॥ शिवंकर्मास्तु ॥ गोत्राभिवृद्धिरस्तु ॥ ब्रह्माग्नी
यतां ॥ (कर्मांतरेपुण्याहवाचनेयथोक्तादेवताग्राह्याः) ॥ ॐ शुक्रेभिरंगैरजआततन्वान्कतुंपुनानःकविभिःपवित्रैः ॥ शोचिर्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सानः॒पयो॑युर॒पाश्रयामिमतिबृह॒तारनूनाः ॥ तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे ॥ आविक्षितस्यकाम
प्रे[illegible]वेदेवाःसभासदइति ॥ ततउत्तरकलशंदक्षिणहस्तेनदक्षिणकलशंवामहस्तेनगृहीत्वाताभ्यांधाराद्वयंसंततंपात्रेनिषिंचेदेभि
र्मंत्रैः ॥ ॐ वास्तो॑ष्पते॒प्रति॑जानीह्य॒स्मान्त्स्वा॑वे॒शोअ॑नमी॒वोभ॑वानः ॥ यत्त्वेम॑हे॒प्रति॒तन्नो॑जुषस्व॒शंनो॑भवद्वि॒पदे॒शंचतु॑ष्पदे ॥
वास्तो॑ष्पतेप्र॒तर॑णोनएधि॒गय॒स्फानो॒गोभि॒रश्वे॑भिरिंदो ॥ अ॒जरा॑सस्तेस॒ख्येस्या॑मपि॒तेव॑पु॒त्रान्प्रति॑नोजुषस्व ॥ वास्तो॑ष्पतेश॒ग्मया॑
सं॒सदा॑तेसक्षी॒महि॑र॒ण्वया॑गातु॒मत्या॑ ॥ पा॒हिक्षेम॑उ॒तयोगे॒वर॑न्नोयू॒यंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥ अ॒मी॒व॒हावा॑स्तोष्पते॒विश्वा॑रू॒पाण्या॑
वि॒शन् ॥ सखा॑सु॒शेव॑एधिनः ॥ शिवंशिवंशिवं ॥ ततःकर्तुर्वामतःपत्नीमुपवेश्य पात्रेपातितजलेनपल्लवदूर्वाभिरुदङ्मुखाविप्रा
अभिषिंचेयुस्तिष्ठंतः ॥ ॐ समु॒द्रज्ये॑ष्ठाःसलि॒लस्य॒मध्या॑त्पुना॒नायं॒त्यनि॑विशमानाः ॥ इंद्रो॒याव॒ज्रीवृ॑ष॒भोर॒राद॒ताआपो॑दे॒वीरि॒ह
माम॑वंतु ॥ याआपो॑दि॒व्याउ॒तवा॒स्रवं॑तिख॒नित्रि॑माउ॒तवा॒याःस्व॑यं॒जाः ॥ स॒मु॒द्रार्था॒याःशुच॑यःपाव॒कास्ताआपो॑दे॒वीरि॒हमाम॑वंतु ॥
यासां॒राजा॒वरु॑णो॒याति॒मध्ये॑सत्यानृ॒तेअ॑व॒पश्य॒न्जना॑नां ॥ म॒धु॒श्चुतः॒शुच॑यो॒याःपा॑व॒कास्ताआपो॑दे॒वीरि॒हमाम॑वंतु ॥ यासु॒राजा॒वरु॑
णो॒यासु॒सोमो॒विश्वे॑दे॒वायासूर्जं॒मदं॑ति ॥ वै॒श्वा॒न॒रोयास्व॒ग्निःप्रवि॑ष्ट॒स्ताआपो॑दे॒वीरि॒हमाम॑वंतु ॥ त्रायं॑तामि॒हदे॒वास्त्राय॑तांम॒रुतां॑
ग॒णः ॥ त्रायं॑तां॒विश्वा॑भू॒तानि॒यथा॒यम॑र॒पाअस॑त् ॥ आप॒इद्वाउ॑भेष॒जीरापो॑अमीव॒चात॑नीः ॥ आपः॒सर्व॑स्यभेष॒जीस्तास्ते॑कृण्वंतु
भेष॒जं ॥ हस्ता॑भ्यां॒दश॑शाखाभ्यांजि॒ह्वावा॒चःपु॑रोग॒वी ॥ अ॒ना॒म॒यि॒त्नुभ्यां॑त्वा॒ताभ्यां॒त्वोप॑स्पृशामसि ॥ इ॒माआ॑पःशि॒वत॑माइ॒माः
स॒र्वस्य॑भेष॒जीः ॥ इ॒मारा॒ष्ट्रस्य॒वर्ध॑नीरि॒मारा॒ष्ट्रभृ॑तो॒मृताः॑ ॥ याभि॒रिंद्र॑म॒भ्यषिं॑चत्प्र॒जाप॑तिः॒सोमं॒राजा॑नं॒वरु॑णं॒यमं॒मनुं॑ ॥ ताभि॑र॒
द्भिर॒भिषिं॑चामि॒त्वाम॒हंराज्ञां॒त्वम॑धि॒राजो॑भवे॒ह ॥ म॒हांतं॑त्वाम॒हीनां॑स॒म्राजं॑चर्षणी॒नां ॥ दे॒वीजनि॑त्र्यजीजनद्भ॒द्राजनि॑त्र्यजीजनत् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ देवस्यत्वासवितुःप्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णोहस्ताभ्यां ॥ अश्विनोर्भैषज्येन ॥ तेजसेब्रह्मवर्चसायाभिषिंचामि ॥ देवस्यत्वासवितुःप्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णोहस्ताभ्यां ॥ सरस्वत्यैभैषज्येन ॥ वीर्यायान्नाद्यायाभिषिंचामि ॥ देवस्य त्वासवितुःप्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णोहस्ताभ्यां ॥ इंद्रस्येंद्रियेण ॥ श्रियैयशसेबलायाभिषिंचामि ॥ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याꣳसरस्वत्यैवाचोयंतुर्यंत्रेणाग्नेस्त्वासाम्राज्येनाभिषिंचामींद्रस्यबृहस्पतेस्त्वासाम्राज्येनाभिषिं चामि ॥ पुराणोक्तमंत्रैः ॥ सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥ प्रद्युम्नश्चानि रुद्धश्चभवंतुविजयायते ॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा ॥ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिताः सर्वेदिक्पालाःपांतुतेसदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुःशांतिःकांतिस्तुष्टिश्चमातरः ॥ एता स्त्वामभिषिंचंतुदेवपत्न्यःसमागताः ॥ आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चपूजिताः ॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः ॥ ऋषयोमुनयोगावोदेवमातरएवच ॥ देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः ॥ अस्त्रा णिसर्वशस्त्राणिराजानोवाहनानिच ॥ औषधानिचरत्नानिकालस्यावयवाश्चये ॥ सरितःसागराःशैलास्तीर्थानिजलदानदाः ॥ एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये ॥ ॐ भूर्भुवःसुवः ॥ अमृताभिषेकोस्तु ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु ॥ ततआचामेत् ॥ आमूरंजप्रत्यावर्तयेमाःकेतुमद्दुंदुभिर्वावदीति ॥ समश्वपर्णाश्चरंतिनोनरोस्माकमिंद्ररथिनोजयंतु ॥ पुण्याहवाचनफलसमृद्धिर स्त्वितिभवंतोब्रुवंतु ॥ पुण्याहवाचनफलसमृद्धिरस्तु ॥ ततआचारप्राप्तंवस्त्रादिदानंतत्परिधानंचकुर्वंति ॥ ॐयुवासुवासाःपरिं वीतआगात् ॥ सउश्रेयान्भवतिजायमानः ॥ तंधीरासःकवयउन्नयंति ॥ स्वाधियोमनसादेवयंतः ॥ इतिपुण्याहवाचनप्रयोगः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ८६ ॥ मातृकापूजनम् ॥

श्रीः ॥ गौरीपद्माशचीमेधासावित्रीविजयाजया ॥ देवसेनास्वधास्वाहामातरोलोकमातरः ॥ धृतिःपुष्टिस्तथातुष्टिरात्मनःकुल देवता ॥ ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराहीचतथेंद्राणीचामुंडासप्तमातरः ॥ एताःगणपतिदुर्गाक्षेत्रपालवास्तो ष्पतिसहिताःसप्तविंशत्यक्षतपुंजेष्वावाह्य ॥ तदस्तुमित्रावरुणातदग्ने० ॥ नर्यप्रजांमेगोपाय ॥ अमृतत्वायजीवसे ॥ जाताजनि ष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ इतिप्रतिष्ठाप्य ॥ नाममंत्रैःषोडशोपचारैःपंचोपचारैर्वासंपूज्य ॥ ॐ गौरीर्मिमायसलि लानितक्षत्येकपदीद्विपदीसाचतुष्पदी ॥ अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् ॥ इतिपुष्पांजलिंदत्वा ॥ ॥ ७ ॥

॥ ८७ ॥ नांदीश्राद्धम् ॥

सदूर्वाकुरानक्षतान्जलंचादाय ॥ सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाःभूर्भुवःसुवःइदंवःपाद्यंस्वाहानमइयंचवृद्धिः ॥ मातृपि तामहीप्रपितामह्यःनांदीमुख्यःभूर्भुवःसुवःइदंवःपाद्यंस्वाहानमइयंचवृद्धिः ॥ पितृपितामहप्रपितामहाःनांदीमुखाःभूर्भुवःसुवः इदंवःपाद्यंस्वाहानमइयंचवृद्धिः ॥ मातामहमातुःपितामहमातुःप्रपितामहाःपत्नीसहितानांदीमुखाःभूर्भुवःसुवःइदंवःपाद्यंस्वा हानमइयंचवृद्धिः ॥ सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाःभूर्भुवःसुवःइदंवआसनगंधाद्युपचारकल्पनंस्वाहानमइयंचवृद्धिः ॥ मातृपितामहीप्रपितामह्यःनांदीमुख्यःभूर्भुवःसुवःइदंवआसनगंधाद्युपचारकल्पनंस्वाहानमइयंचवृद्धिः ॥ पितृपितामहप्रपि तामहानांदीमुखाःभूर्भुवःसुवरिदंवआसनगंधाद्युपचारकल्पनंस्वाहानमइयंचवृद्धिः ॥ मातामहमातुःपितामहमातुःप्रपितास

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हाःपत्नीसहितानांदीमुखाःभूर्भुवःसुवरिदंवआसनगंधाद्युपचारकल्पनंस्वाहानमइयंचवृद्धिः ॥ गौर्यादिषोडशमातरःब्राह्मया दिसप्तमातरःगणपत्यादिसहिताःभूर्भुवःसुवरिदंवोयुग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयीभूतांकिंचिद्व्यावहारिकद्रव्यंस्वाहानम इयंचवृद्धिः ॥ सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाःभूर्भुवःसुवरिदंवोयुग्मब्राह्मण० ॥ मातृपितामहीप्रपितामह्योनांदीमुख्योभू र्भुवःसुवरिदंवोयुग्म० ॥ पितृपितामहप्रपितामहानांदीमुखाःभूर्भुवःसुवरिदंवोयुग्म० ॥ मातामहमातुःपितामहमातुःप्रपिता महाःपत्नीसहितानांदीमुखाःभूर्भुवःसुवरिदंवोयुग्म० ॥ ततः उपास्मैगायतानरःपवमानायेंदवे ॥ अभिदेवाँइयक्षते ॥ अभितेमधुनापयोथर्वाणोअशिश्रयुः ॥ देवंदेवायदेवयु ॥ सनःपवस्वशंगवेशंजनायशमर्वते ॥ शंराजन्नोषधीभ्यः ॥ बभ्रवेनुस्वतंव सेरुणायदिविस्पृशे ॥ सोमायगाथमर्चत ॥ हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतन ॥ मधावाधावतामधु ॥ कृतस्यनांदीश्राद्ध स्यप्रतिष्ठाफलसिद्ध्यर्थंद्राक्षामलकानितन्निष्क्रयीभूतंवायथाशक्तिहिरण्यंदक्षिणात्वेनस्वाहानमइयंचवृद्धिः ॥ प्रजापतेनत्वदेता न्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणां ॥ मातापितामहीचैवतथैवप्रपिता मही ॥ पितापितामहश्चैवतथैवप्रपितामहः ॥ मातामहस्तत्पिताचप्रमातामहकादयः ॥ एतेभवंतुसुप्रीताःप्रयच्छंतुचमंगलं ॥ इतिसंप्रार्थ्य ॥ इडामग्नेपुरुदꣳसꣳसनिंगोःशश्वत्तमꣳहवमानायसाध ॥ स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ नाण कमादायपात्रेवादयेत् ॥ कृतेननांदीश्राद्धेननांदीमुखदेवताःप्रीयंतांवृद्धिः ॥ ततःकृतस्यकर्मणःसांगतासिद्धयेनानानामगोत्रा न्ब्राह्मणान्गंधादिभिःपूजयिष्ये ॥ तेभ्योभूयसींदक्षिणांदातुमहमुत्सृज्यइतिसंकल्प्य ॥ ततःप्रमादात्कुर्वतांकर्मप्रच्यवेता ध्वरे संपूर्णंस्यादितिश्रुतिरितिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

८८ ॥ नांदीश्राद्धेजीवत्पितृकनिर्णयः ॥

नांदीमुखेकर्मणिसंप्रवृत्तेपितर्यथोजीवतियस्यपुंसः ॥ येषांचकुर्यात्स्वपितास्वयंचेत्तेषांहिकुर्यादितिशास्त्रसिद्धं ॥ वृद्धौतीर्थेच संन्यस्तेतातेचपतितेसति ॥ येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः ॥ पितरिजीवतितुस्वमातरिमृतायामपिपितुरेवमातृमातामहयोःकुर्यात् ॥ अग्निपुराणे ॥ गणशःक्रियमाणानांमातृणांपूजनंसकृत् ॥ सकृदेवभवेच्छ्राद्धमादौनपृथगादिषु ॥ ततः ॥

॥ ८९ ॥ अंकुरारोपणम् ॥

श्रीः॥ कर्ताआचम्यप्राणानायम्यदेशकालौसंकीर्त्यामुककर्मसाफल्यनिरंतरशुभतासिद्धिद्वाराश्रीपर० अंकुरारोपणंकरिष्यइतिसंकल्प्यगणपतिंसंपूज्यषट्प्रभृतिसमसंख्यान्ब्राह्मणान्संपूज्यान्नेनपरिविष्यअंकुरारोपणकर्मणःपुण्याहंभवंतोब्रुवंतुस्वस्तिभवंतो० ऋद्धिं० इतित्रिस्त्रिर्विप्रान्वाचयेत्॥ ॐ पुण्याहं ॐ स्वस्ति ॐ ऋद्धिः ॐमृध्यतामितिवाविप्रास्त्रिस्त्रिर्ब्रूयुः ॥ ततःकर्ताब्रह्मादयः प्रीयंतामितिपात्रेजलंक्षिप्त्वाशुचौदेशेगोचर्ममात्रंचतुरस्रंस्थंडिलंगोमयेनविधायरंगवल्यादिभिरलंकृत्यश्वेताक्षतान्संप्रकीर्याद्भिरभ्युक्ष्यसुवर्णरजताताम्रान्यतमनिर्मिताअभावेमृन्मयीर्वापंचपालिकास्तत्रसंस्थापयेत् ॥ अत्रगोचर्मशब्दोयौगिकएवग्राह्यःनतु वृषभैकशतंयत्रगवांतिष्ठतिसंवृतं ॥ बालवत्साशतंचैवगोचर्मेतिबुधाविदुरितिपारिभाषिकःएतस्यदानविषयत्वात्प्रकृतेएतस्यासंभवाच्च ॥ एवंचगोर्यावत्प्रमाणंचर्मतदनुसारेणैवचतुरस्रस्थंडिलकरणमत्र ॥ ततोवल्मीकमृदंह्रदमृदंशुष्कगोमयचूर्णंचैकीकृ

---

१ अंकुरारोपणस्यक्वचिदकरणमप्युक्तं ॥ निषेकंगर्भसंस्कारंजातकर्मचनामच ॥ हित्वांकुरारोपणंस्यादन्यत्रशुभकर्मसुइति ॥ निषेकोगर्भाधानं।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्यमध्यमायांपालिकायांप्रक्षिप्यप्रागादिषुक्रमेणप्रक्षिपति ॥ ततस्तासामधोभागेषुदूर्वांकुराश्वत्थशिरीषबिल्वपत्राणिप्रक्षिप्यश्वे
तसूत्रेणपालिकाआवेष्टयतासुक्रमेणदेवताआवाहयेत् ॥ ॐ भूर्ब्रह्माणमावाहयामि ॐ भुवश्चतुर्मुखंब्रह्माण० ॐ सुवःप्रजापतिंब्र
ह्माण० ॐ भूर्भुवःसुवर्हिरण्यगर्भंब्रह्माणमा०इतिमध्यमपालिकायांब्रह्माणमावाह्य ॥ ॐ भूर्वज्रिणमा० ॐ भुवःशचीपतिमा०
ॐ सुवरिंद्रमा० ॐ भूर्भुवःसुवःशक्रमा० इतिपूर्वस्यांपालिकायांवज्रिणं ॥ ॐ भूर्यममा० ॐ भुवोवैवस्वतमा० ॐ सुवःपितृप
तिमा० ॐ भूर्भुवःसुवःप्रेतपतिमा० इतिदक्षिणस्यांपालिकायांयमं ॥ ॐ भूर्वरुणमा० ॐ भुवःप्रचेतसमा० ॐ सुवःसुरूपिणमा०
ॐ भूर्भुवःसुवरपांपतिमा० इतिपश्चिमायांपालिकायांवरुणं ॥ ॐ भूःशशिमा० ॐ भुवइंदुमा० ॐ सुवर्निशाकरमा० ॐ भूर्भु
वःसुवःसोममा०इत्युत्तरस्यांपालिकायांसोमं ॥ ततस्तत्तन्मंत्रैर्नाममंत्रैर्वाकांडानुसमयेनपदार्थानुसमयेनवापूजयेत् ॥ तत्रस्नापनं
आपोहिष्ठामयो० ३ हिरण्यवर्णाःशुचयः ४ पवमानःसुवर्जनःमोर्जयंत्यापुनातुइत्येतैःसर्वांतेब्रह्मादीन्संस्नापयेत् प्रतिमंत्रमिति
केचित् ॥ पुष्पांजलिसमर्पणांते ॥ दिशांपतीन्नमस्यामिसर्वकामफलप्रदान् ॥ कुर्वंतुसफलंकर्मकुर्वंतुसततंशुभं ॥ इतिपालिका
नांपश्चात्तिष्ठन्प्राङ्मुखउपतिष्ठेतेतिपूजनेविशेषः ॥ ततउपविश्यव्रीहियवतिलमुद्गसर्षपान्मिश्रीकृत्यक्षीरेणमध्यमपालिकादिक्रमे
णनिवपति ॐ ब्रह्मजज्ञानंप्रथमंपु० हिरण्यगर्भःसमवर्तताग्रे० विधेमइतिद्वाभ्यांमध्यमपालिकायांनिवपति ॥ ॐ यतइंद्रभया
महे० स्वस्तिदाविशस्पतिं० इतिद्वाभ्यांपूर्वस्यांपालिकायांनिवपति ॥ ॐ योस्यकौष्ठयजगतःपृथिवीदृढाइतिद्वाभ्यांदक्षिणस्यां
पालिकायांनिवपति ॥ ॐ इमंमेवरुण०प्रमोषीःइतिद्वाभ्यांपश्चिमायांपालिकायांनिवपति ॥ ॐ सोमोधेनुं० अषाढंयुत्सु०इति
द्वाभ्यामुत्तरस्यांपालिकायांनिवपति॥ व्रीहियवादीनामलाभेएतदन्यतममेकमेवद्रव्यंपालिकासुनिर्वपेत्॥ ततोयथाक्रमंशुद्धाभिः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सिकताभिःपालिकाःप्रच्छाद्यपंचगव्येनसंप्रोक्ष्य ॐ इति महतापात्रेणापिधायकर्मसमाप्तिपर्यंतंसुरक्षितंकुर्यात् ॥ अग्निशब्दवाच्यःपरमात्मादेवतेत्येवंवाप्रयोगः ॥ समाप्तेकर्मणिदेवताःसंपूज्यपूर्वोक्तैरोंभूर्ब्रह्माणमित्याद्यैर्मंत्रैरावाहयामीत्यस्यस्थानेउद्वासयामीत्यूहितैर्यथाक्रमंदेवताउद्वास्यकर्मेश्वरायार्पयेत् ॥ इतिबौधायनानुसारेणांकुरारोपणं ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ९० ॥ ग्रहयज्ञप्रयोगः(मात्स्यक्रमः) ॥

श्रीः ॥ कर्तानित्यकर्मनिर्वर्त्यआचम्यप्राणानायम्यदेशकालावुत्कीर्त्यअमुकशर्मणोमम(अमुककर्मणिवा)ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंग्रहयज्ञंकरिष्ये ॥ तदंगत्वेनगणपतिपूजनादिसंकल्प्यकृत्वाआचार्यादीन्पूजनपूर्वकंवृत्वाप्रार्थयेत् ॥ अथाचार्यःकर्मसंकल्प्ययदत्रसंस्थितं० अपक्रामंतु० इतिसर्षपान्विकीर्य शुचीवो० अग्निःशुचि० इतिपंचगव्येनप्रोक्ष्यआपोहिष्ठेतिशुद्धोदकेनप्रोक्ष्यभद्रंकर्णेस्वस्तिनइतिजस्वादेवाआयांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वेत्यग्न्यायतनस्यपश्चाद्भूमिमभिमृशेत्॥ ततोऽग्न्यायतनात्पूर्वेयथोक्तनिर्मितग्रहपीठमध्येवर्तुलेद्वादशांगुलेप्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैः॥ॐआसत्येनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनाविपश्यन् ॥ ॐ भूर्भुवःसुवः ॥ कलिंगदेशोद्भवकाश्यपसगोत्रसूर्येहागच्छेहतिष्ठसूर्यायनमःसूर्यमावाहयामि ॥ ततआग्नेय्येचतुरस्रेचतुर्विंशांगुलेप्रत्यङ्मुखंसोमंश्वेतपुष्पाक्षतैः ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ भूर्भुवःसुवः ॥ यमुनातीरोद्भवात्रेयसगोत्रसोमेहागच्छेह० सोमायनमःसोममावाहयामि ॥ ततोदक्षिणेत्रिकोणेत्र्यंगुलेदक्षिणाभिमुखंभौमंरक्तपुष्पाक्षतैः ॥ ॐ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥

१ केवलग्रहयज्ञेप्यग्निस्थापनांतेग्रहस्थापनंकेचिद्वदंतितदपिग्रंथसंमतम् ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अपाꣳरेताꣳसिजिन्वति ॥ भूर्भु० अवंतीसमुद्भवभारद्वाजसगोत्रभौमे० भौमाय० भौमं० ॥ ततःईशान्येबाणाकारेचतुरंगुलउदङ्मुखंबुधंपीतपुष्पाक्षतैः ॥ ॐ उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसꣳसृजेथामयंच ॥ पुनःकृण्वꣳस्त्वांपितरंयुवानमन्वाताꣳसीत्वयितंतुमेतं ॥ भूर्भु० मगधदेशोद्भवात्रेयसगोत्रबुधेहा० बुधाय० बुधं० ॥ उत्तरेदीर्घचतुरस्रेचतुर्विंशांगुलउदङ्मुखंबृहस्पतिंपीतपुष्पाक्षतैः॥ ॐ बृहस्पतेअतियदर्योअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु॥ यद्दीदयच्छवसर्तप्रजातदस्मासुद्रविणंधेहिचित्रं ॥ भूर्भु० सिंधुदेशोद्भवांगिरससगोत्रबृहस्पतइहागच्छ० बृह० बृहस्पतिं० ॥ ततःपूर्वेपंचकोणेनवांगुलेप्राङ्मुखंशुक्रंशुक्रपुष्पाक्षतैः॥ ॐ शुक्रंतेअन्यद्यजतंतेअन्यद्विषुरूपेअहनीद्यौरिवासि ॥ विश्वाहिमायाअवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु ॥ भूर्भु० भोजकटदेशोद्भवभार्गवसगोत्रशुक्रेहागच्छ० शुक्राय० शुक्रं० ॥ ततःपश्चिमेधनुषिक्र्यंगुलेप्रत्यङ्मुखंशनिंकृष्णपुष्पाक्षतैः ॥ ॐ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ भूर्भुवः० सौराष्ट्रदेशोद्भवकाश्यपसगोत्रशनैश्चरेहा० शनैश्चराय० शनैश्चरं० ॥ ततःनैर्ऋत्येशूर्पाकारेद्वादशांगुलेदक्षिणामुखंराहुंकृष्णपुष्पाक्षतैः ॥ ॐ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ भूर्भुवः० राठिनापुरोद्भवपैठिणसिसगोत्रराहविहागच्छ० राहवे० राहुमा० ॥ वायव्येध्वजाकारेषडंगुलेदक्षिणाभिमुखंकेतुंधूम्रपुष्पाक्षतैः ॥ ॐ केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे ॥ समुषद्भिरजायथाः ॥ भूर्भु० अंतर्वेदिसमुद्भवजैमिनिसगोत्रकेतविहाग० केतवे० केतुं० ॥ अथाधिदेवताः ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ भूर्भु० ईश्वरेहागच्छेहतिष्ठसूर्यदक्षिणपार्श्वेईश्वरायनमःईश्वरमावाहयामि ॥ ॐ गौरीर्मिमायसलिलानितक्षत्ये

१ अत्रयेषामीशेपशुपतिरितिमंत्रंकेचिदिच्छंति ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कपदाद्विपदासाचतुष्पदा ॥ अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् ॥ भूर्भुवःसुवः उमइहागच्छ० सोमदक्षिण पार्श्वेउमायैन०उमांआ० ॥ ॐ यदक्रंदःप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहि जातंतेअर्वन् ॥ भूर्भु० स्कंदेहा० ॥ भौमदक्षिणपार्श्वेस्कंदाय०स्कंदमा० ॥ ॐ विष्णोरराटमसिविष्णोःपृष्ठमसिविष्णोश्न्यप्त्रे स्थोविष्णोस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसिविष्णवेत्वा ॥ भूर्भु० नारायणेहा० बुधदक्षिणपार्श्वेनाराय० नारा० ॥ ॐ ब्रह्मादे वानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणां ॥ श्येनोगृध्राणाꣳस्वधितिर्वनानाꣳसोमःपवित्रमत्येतिरेभन् ॥ भूर्भु० ब्रह्मन्नि हागच्छ०बृहस्पतिदक्षिणपार्श्वेब्रह्मणे० ब्रह्माणमा० ॥ ॐ सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहन्च्छूरविद्वान् ॥ जहिशत्रूꣳ रपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥ भूर्भु०इंद्रे० शुक्रदक्षिणपार्श्वेइंद्राय०इंद्रमा० ॥ ॐ इमंयमप्रस्तरमाहिसीदांगिरोभिः पितृभिःसंविदानः ॥ आत्वामंत्राःकविशस्तावहन्त्वेनाराजन्हविषामादयस्व ॥ भूर्भु०यमेहा० ॥ शनिदक्षिणपार्श्वेयमायन० यममा० ॥ ॐ कार्षिरस्यपापांमृध्रं ॥ भूर्भु० कालेहा० राहुदक्षिणपार्श्वेकालायनमःकालमा० ॥ ॐ चित्रावसोःस्वस्तितेपारम शीय ॥ भूर्भु० चित्रगुप्तेहा० राहुदक्षिणपार्श्वेचित्रगुप्ताय०चित्रगुप्तमा० ॥ अथप्रत्यधिदेवताः ॥ ॐ अग्निंदूतंवृणीमहेहो तारंविश्ववेदसं ॥ अस्ययज्ञस्यसुक्रतुं ॥ भूर्भु० अग्नइहा० सूर्यवामपार्श्वेअग्नये०अग्निमा० ॥ ॐ अप्सुमेसोमोअब्रवीदंतर्वि श्वानिभेषजा ॥ अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः ॥ भूर्भु० आपःइहागच्छत० सोमवामपार्श्वेअद्भ्योनमःअपः आवा० ॥ ॐ स्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ भूर्भु० भूमइहा० भौम वामपार्श्वे

१ अत्र भूमिर्भूम्नेतिमंत्राचारोदृश्यते ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूम्यैनमःभूमिमा० ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपाꣳसुरे ॥ भूर्भु० विष्णविहा० बुधवाम पार्श्वेविष्णवेन० विष्णुमा० ॥ ॐ इंद्रैवोविश्वतस्परिहवामहेजनेभ्यः ॥ अस्माकमस्तुकेवलः ॥ भूर्भु० इंद्रेहा० बृहस्पति वामपार्श्वेइंद्राय० इंद्रं० ॥ ॐ इंद्राणीमासुनारिषुसुपत्नीमहमश्रवं ॥ नह्यस्याअपरंचनजरसामरतेपतिः ॥ भूर्भु० इद्राणी हाग० शुक्रवामपार्श्वेइंद्राण्यै० इंद्राणीमा० ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहु मस्तन्नोअस्तुवयꣳस्यामपतयोरयीणां ॥ भूर्भु०प्रजापतइहाग०शनिवामपार्श्वेप्रजापतये०प्रजापतिं० ॥ ॐ आयंगौःपृश्निरक्रमी दसनन्मातरंपुनः ॥ पितरंचप्रयन्त्सुवः ॥ भूर्भु०सर्पाइहागच्छतेहतिष्ठतराहुवामपार्श्वेसर्पेभ्योन०सर्पान्० ॥ ॐ ब्रह्मजज्ञानं प्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ भूर्भु०ब्रह्मन्निहागच्छ०केतु वामपार्श्वेब्रह्मणेन०ब्रह्माणमा० ॥ अथक्रतुसंरक्षकदेवताः ॥ ॐ गणानांत्वागणपतिꣳहवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं ॥ भूर्भु०गणपतइहाग० गणपतये०गणपतिमा० ॥ ॐ जातवेदसे सुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ भूर्भु०दुर्गइहागच्छ०दुर्गायैनमः दुर्गामावा०॥ ॐ वायोशतꣳहरीणांयुवस्वपोष्याणां ॥ उतवातेसहस्रिणोरथआयातुपाजसा ॥ भूर्भु०वायविहागच्छ०वायवे० वायुमा० ॥ ॐ घृतंघृतपावानःपिबतवसांवसापावानःपिबतांतरिक्षस्यहविरसिस्वाहात्वांतरिक्षाय ॥ भूर्भु० आकाशेहा० आकाशाय० आकाशं० ॥ ॐ यावांकाशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञंमिमिक्षतं ॥ भूर्भु० अश्विनाविहागच्छत मिहतिष्ठतमश्विभ्यांनमःअश्विनावावा० ॥ ॐ क्षेत्रस्यपतिनावयꣳहितेनेवजयामसि ॥ गामश्वंपोषयित्व्वासनोमृडातीदृशे ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूर्भु० क्षेत्रपालेहा० क्षेत्रपालायनमः क्षेत्रपालमा० ॥ ॐ वास्तोष्पतप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः ॥ यत्त्वे महेप्रतितन्नोजुषस्वशंनएधिद्विपदेशंचतुष्पदे ॥ भूर्भु० वास्तोष्पतइहा० वास्तोष्पतयेन० वास्तोष्पतिं० ॥ ततःअष्टौलोकपालान् ॥ ॐ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं ॥ हुवेनुशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः ॥ भूर्भु० इंद्रेहागच्छ० पूर्वस्यामिद्राय० इंद्रमा० ॥ ॐ अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम ॥ भूर्भु० अग्नइहा० आग्नेय्यांअग्नये० अग्निमा० ॥ ॐ सुगंनःपंथामभयंकृणोतुयस्मिन्नक्षत्रेयमएतिराजा ॥ यस्मिन्नेनमभ्यषिंचंतदेवास्तदस्यचित्रꣳहविषायजाम ॥ भूर्भु० यमेहा० दक्षिणस्यांयमायन० यममा० ॥ ॐ असुन्वंतमयजमानमिच्छस्तेनस्येत्यांतस्करस्यान्वेषि ॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ भूर्भु० निर्ऋतेइहा० नैर्ऋत्यांनिर्ऋतये० निर्ऋतिमा० ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः ॥ भूर्भु०वरुणेहा०पश्चिमायांवरुणाय० वरुणमा० ॥ ॐ वायोशतꣳहरीणांयुवस्वपोष्याणां ॥ उतवातेसहस्रिणोरथआयातुपाजसा ॥ भूर्भु०वायविहा०वायव्यांवायवे०वायुमा० ॥ ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावंतोअशीमहि ॥ भूर्भु०सोमेहा० उत्तरेसोमाय०सोममा० ॥ ॐ अभित्वादेवसवितरीशानंवार्याणां ॥ सदावन्भागमीमहे ॥ भूर्भु०ईशानेहा०ईशान्यांईशानाय०ईशानमा० ॥ ततःग्रहादीशान्यांमहीद्यौरित्यादिमंत्रैःकलशंसंस्थाप्यआवाहितदेवताःषोडशोपचारैःपूजयेत् ॥ वरुणप्रार्थना ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसि

१ लोकपालावाहनादौबौधायनसूत्रेमहान्यासादौयेमंत्राउक्तास्तएवग्राह्याइतिकेषांचिन्मतम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तदाकुंभविष्णुनाविधृतःस्वयं ॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥ आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सांनिध्यंकुरुदेवेशप्रसन्नोभवसर्वदा ॥ इतिप्रार्थ्य ॥ ततःग्रहान्नैर्ऋत्येस्थंडिलेउद्धननादिभूसंस्कारंविधाय ॥ सयथा ॥ ग्रहयज्ञहोमंकर्तुस्थंडिलादिसकलंकर्मकरिष्यइतिसंकल्प्य ॥ गोमयोपलेपादिवरदनामानमग्निंप्रतिष्ठाप्य ॥ ततोन्वाधानं ॥ श्रद्धएहीत्यादिव्याहृत्यंतमुक्त्वात्रप्रधानं॥ आदित्यंसोमंभौमंबुधंबृहस्पतिंशुक्रंशनैश्चरंराहुंकेतुं एताःप्रधानदेवताःअर्कादियथालब्धसमिच्चर्वाज्यद्रव्यैःप्रतिद्रव्यंअष्टाविंशतिसंख्याकाभिराहुतिभिः ॥ ईश्वरमुमांस्कंदंनारायणंब्रह्माणमिंद्रंयमंकालंचित्रगुप्तं॥ अग्निमपोभूमिंविष्णुमिंद्रमिंद्राणींप्रजापतिंसर्पान्ब्रह्माणंएताःअधिदेवताःप्रत्यधिदेवताश्चतैरेवद्रव्यैःअष्टाष्टसंख्याकाभिराहुतिभिः ॥ गणपतिंदुर्गांवायुमाकाशमश्विनौक्षेत्रपालंवास्तोष्पतिमिंद्रमग्नेयमंनिर्ऋतिंवरुणंवायुंसोममीशानं एताःक्रतुसाद्गुण्यकरदेवताःअष्टौलोकपालांश्चतैरेवद्रव्यैश्चतुश्चतुःसंख्याकाभिराहुतिभिर्यक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंहुत्वा ॥ गणाधिपतयेदेयाप्रथमातुवराहुतिरितिवाक्याच्चतुर्गृहीतेनाज्येनादौगणानांत्वेतिमंत्रेषुवराहुतिंदत्वायक्षमाणदेवताउद्दिश्यत्यागंकुर्यात् ॥ इमानिउपकल्पितानिहवनीयद्रव्याणियायायक्ष्यमाणादेवतास्ताभ्यस्ताभ्यो

---

१ ग्रहहोमस्तुसमिच्चर्वाज्यैःप्रतिद्रव्यंप्रतिग्रहमेकावराभिःसहस्रपराभिराहुतिभिर्निमित्तशक्त्यनुसारेणकार्यः । ग्रहाणांयदाऽष्टसहस्रपक्षमंगीकुर्वंतितदापार्श्वदेवतानामष्टशतमितरेषामष्टाविंशतिः । यदाग्रहाणामष्टशतंतदापार्श्वदेवतानामष्टाविंशतिरितरेषामष्टौ । ग्रहाणांयदाऽऽष्टाविंशतिस्तदापार्श्वदेवतानामष्टावितरेषांचतस्रः । यदाग्रहाणामष्टौतदापार्श्वदेवतानांचतस्रइतरेषांद्वेइतिसंप्रदायःशिष्टसंमतः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तु ॥ प्रधानहोमस्तुसमिच्चवाज्यैःपूर्वोक्ततत्तन्मन्त्रैरन्वाधानसंख्ययाआचार्यादयःकुर्युः॥
इमंमेवरुणेत्यादिप्रायश्चित्तहोमान्ते ॥ अद्यपूर्वोच्चरितवर्तमा०स्यर्थंग्रहयज्ञांगभूतंइंद्रादिलोकपालेभ्यआदित्यादिस्थापितदे
वताभ्यश्चतत्तन्मंत्रैर्माषभक्तबलिप्रदानंकरिष्ये ॥ ॐ त्रातारमिंद्रं०भूर्भुवःसुवःइंद्रायनमःसर्वोपचारार्थेगंधाक्षतान्त्समर्पयामि ॥
इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायइमंसदीपमाषभक्तबलिंसमर्पयामि ॥ भोइंद्रदिशंरक्षबलिंभक्षममसकुटुंबस्यसप
रिवारस्यआयुःकर्ताक्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तावरदोभव॥अनेनबलिदानेनइंद्रःप्रीयतां॥ॐ अग्नेनयसुपथाराये अस्मा
न् भूर्भु० अग्नये०सर्वो० गंधा०अग्नयेसांगाय०भोअग्नेदिशं०अनेनबलिदा० ॥ ॐ इमंयमप्रस्तर०भूर्भु०यमायन० यमायसां०
भोयमदिशंरक्ष० यमःप्रीयतां ॥ ॐ असुन्वंतमयज० भूर्भु० निर्ऋतयेन० निर्ऋतयेसांगा० भोनिर्ऋते दिशंरक्ष० निर्ऋतिः
प्रीयतां ॥ ॐ तत्त्वायामिब्रह्मणा० भूर्भु० वरुणायन० वरुणायसांगायस० भोवरुणदिशंरक्ष०अनेनबलि०वरुणःप्रीयतां ॥
ॐ वायोशतंह० भूर्भु०वायवे० वायवेसांगा० भोवायोदिशंरक्षब० वायुःप्रीयतां ॥ ॐ वयंसोमव्रते० भूर्भु० सोमाय०
सोमायसांगा० भोसोमदिशं०सोमःप्रीयतां ॥ ॐ अभित्वादेवस० भूर्भु०ईशानायसां०भोईशानदिशंरक्ष०ईशानःप्रीयतां ॥
ॐ घृतंपावानः० ॐ भूभुर्व० आकाशाय०सक० भोआकाशअमुं० आकाशःप्रीयतां ॥ ॐ स्योनापृथि० भूम्यैनमःस० भोभू
मेअमुं०अनने भूमिःप्रीयतां ॥ ॐ आसत्येनरजं० भूर्भु०सूर्यायनमःसर्वोप०सूर्यायसांगायसपरिवारायसायुधायसशक्तिकाय
ईश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहितायेमंसदीपमा० भोसूर्यअमुंबलिंगृहाणममसकुटुं० अनेनबलिदानेनसूर्यःप्रीयतां ॥
ॐ आप्यायस्वसमेतुते० भूर्भु० सोमायसां० उमाब्रूपाधिदेवताप्रत्यधि० भोसोमअमुंब० सोमःप्रीयतां ॥ ॐ अग्निर्मूर्धादि०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूर्भु० अंगारकाय० स्कंदभूमिरूपाधिदेवताप्र० भोअंगारकअमुंब० अंगारकःप्रीयतां ॥ ॐ उद्बुध्यस्वाग्ने० भूर्भु० बुधायसां गाय० नारायणविष्णुरूपाधिदेवताप्र० भोबुधअमुंबलिंगृ० बुधःप्रीयतां ॥ ॐ बृहस्पते० भूर्भु० बृहस्पतयेसां० ब्रह्मेंद्ररूपा धिदेवताप्र० भोबृहस्पतेअमुंबलिं० बृहस्पतिःप्रीयतां ॥ ॐ शुक्रंतेअन्य० भूर्भु० शुक्रायसांगा० इंद्रेंद्राणीरूपाधिदेवताप्रत्य० भोशुक्रअमुंबलिं० शुक्रःप्रीयतां ॥ ॐ शंनोदेवी० भूर्भु० शनैश्चरायसां० यमप्रजापतिरूपाधिदेवताप्रत्य० भोशनैश्चरअमुंब० शनैश्चरःप्रीयतां ॥ ॐ कयानश्चित्र० भूर्भु० राहवेसांगाय० कालसर्परूपाधिदेवताप्र० भोराहोअमुंब० राहुःप्रीयतां ॥ ॐ केतुं कृण्वन्न० भूर्भु० केतवेसांगाय० चित्रगुप्तब्रह्मरूपाधिदेवताप्र० केतुःप्रीयतां० ॥ ॐ गणानांत्वा० भूर्भु० गणपतयेसांगायस परिवारायसायुधायसशक्तिकायइमंस० भोगणपतेअमुंब० गणपतिःप्रीयतां ॥ ॐ जातवेदसे० भूर्भु० दुर्गायैन० सर्वोप० गंधाद्युप० दुर्गायैसांगायैसपरिवारायैसायुधायैसशक्तिकायैइमंसदी० भोदुर्गेअमुंबलिंभक्षदिशंरक्षममसकुटुंबस्यआयुःकर्त्रीक्षे मकर्त्रीशांतिकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीवरदाभव ॥ अनेनबलिदानेनदुर्गाप्रीयतां ॥ ॐ वायोशतꣳ० भूर्भु० वायवेसांगाय० भो वायोअमुंब० वायुःप्रीयतां ॥ ॐ घृतंघृतपा० भूर्भु० आकाशाय० भोआकाश० आकाशःप्रीयतां ॥ ॐ यावांकशाम० भूर्भु० अश्विभ्यांनमःसर्वोपचारार्थे० अश्विभ्यांसांगाभ्यांसपरिवाराभ्यांसायुधाभ्यांसशक्तिकाभ्यामिमं० भोअश्विनौअमुंबलिंगृह्णीतं ममस०आयुःक्षेमशांतिपुष्टितुष्टिकर्तारौवरदौभवतं ॥ अश्विनौप्रीयेतां॥ॐ क्षेत्रस्यपतिना० भूर्भु० क्षेत्रपालाय०भोक्षेत्रपा०क्षेत्र पालःप्रीयतां ॥ ॐ वास्तोष्पतेप्रति० भूर्भु० वास्तोष्पतये० भोवास्तोष्पतेअ० वास्तोष्पतिःप्रीयतां ॥ अद्येत्यादि०सर्वारिष्टो पशांतयेदिव्यभौमांतरिक्षत्रिविधोत्पातशमनार्थंसपरिकारक्षेत्रपालप्रीत्यर्थंसार्वभौतिकबलिदानंकरिष्ये ॥ ॐक्षेत्रस्यपतिनेतिमंत्रे

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णबलौक्षेत्रपालमावाह्यततःपूर्वादिक्रमेणचरक्यांद्याआवाहयेत् ॥ चरक्यैनमःचरकींआवा० विदार्यैनमःविदारींआवा० पूत
नायै० पूतनांआ० पापराक्षस्यैन० पापराक्षसींआ० भूतजृंभाय० भूतजृंभमा० विरूपाक्षाय० विरूपाक्षंआ० धूम्रजि
ह्वाय०धूम्रजिह्वंआ०महोरगाय० महोरगंआ० सुप्रतिष्ठिताःसंतु ॥ क्षेत्रपालाद्यावाहितदेवताःषोडशोपचारैःपूजयेत् ॥ ॐ क्षेत्र
स्यपतिनाव० भूर्भुव० क्षेत्रपालाद्यावाहितदेवताभ्यःसांगा० सपरिवारा० सायुधा० सशक्तिकाभ्योभूतप्रेतपिशाचब्रह्मरा
क्षसशाकिनीडाकिनीवेतालादिपरिवारयुताभ्यअमुंसदीपमाष० भोभोक्षेत्रपालाद्यावाहितदेवताःअमुंबलिंगृह्णीतममस० आयुः
कर्त्र्यःक्षेमकर्त्र्यःशांति० वरदाःभवत ॥ अनेनबलिदानेनक्षेत्रपालाद्यावा० प्रीयतां ॥ प्रार्थयेत् ॥ बलिंगृह्णंत्विमेदेवा
आदित्यावसवस्तथा ॥ मरुतश्चाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः ॥ असुरायातुधानाश्चपिशाचोरगराक्षसाः ॥ शाकिन्योयक्षवे
तालायोगिन्यःपूतनाःशिवाः ॥ जृंभकाःसिद्धगंधर्वानागाविद्याधरास्तथा ॥ दिक्पालालोकपालाश्चयेचविघ्नविनायकाः ॥ जग
तांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः ॥ माविघ्नंमाचमेपापंमासंतुपरिपंथिनः ॥ सौम्याभवंतुतृप्ताश्चदेवाभूतगणास्तथा ॥ चरकी
चविदारीचपूतनापापराक्षसी ॥ भूतजृंभोविरूपाक्षोधूम्रजिह्वोमहोरगः ॥ एतेरक्षंतुभवनंनगरंग्राममेवच ॥ येकेचइहयज्ञेस्मि
न्नागताबलिकांक्षिणः ॥ तेभ्योबलिंप्रयच्छामिनमस्कृत्वापुनःपुनः ॥ भूतानियानीहवसंतितानिबलिंगृहीत्वाविधिवत्प्रयुक्तं ॥
अन्यत्रवासंपरिकल्पयंतुक्षमंतुतान्यत्रनमोस्तुतेभ्यः ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तु
रुद्ररूपेभ्यः ॥ उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे ॥ उपप्रयंतुमरुतःसुदानवइंद्रप्राशूर्भवासचा ॥ प्रक्षालितपादपाणिः आचम्य ॥
शांतापृथिवीपृथिवीशांताइत्यादिजस्वाद्वादशाष्टचतुर्गृहीतेनवाज्येनपूर्णाहुतिंजुहुयात् ॥ अद्येत्यादिग्रहयज्ञांगभूतांसर्वकर्मप्रपू

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रणींभद्रद्रव्यदांद्वादशगृहीतेनाज्येनपूर्णाहुतिंहोष्ये ॥ अग्निंइलनामानंभावयामि । आचार्यः ॐ सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्तर्षयःसप्तधाम्प्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वाघृतेनस्वाहा ॥ सप्तवतेग्नयइदं० पूर्णाहुतिमुत्तमांजुहोतीतिशंसनंकृत्वाततःआचार्यादयःसपत्नीकंयजमानंग्रहकलशोदकेनाभिषिंचेयुः ॥ ग्रहाणामुत्तरपूजांविधायआचार्यायधेनुंदत्वाअग्निपूजनंकृत्वामानस्तोकइतिविभूतिंधृत्वागच्छगच्छेतिविसृज्यग्रहपीठंदत्वाब्राह्मणान्भोजयित्वाभूयसींदत्वायस्यस्मृत्येत्युक्त्वाविष्णुंस्मरेत् ॥ इतिग्रहयज्ञप्रयोगःसमाप्तः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ९१ ॥ अग्निनामानि ॥

श्रीः ॥ प्रयोगेषुतत्रतत्रतत्तन्नाम्नाहविर्भुजंस्थापयेदित्युक्तंतत्रकानिनामानीत्यपेक्षायांपारिजाते– पावकोलौकिकोह्यग्निःप्रथमःपरिकीर्तितः ॥ अग्निस्तुमारुतोनामगर्भाधानेभिधीयते ॥ पुंसवेपवमानस्तुशोभनःशुभकर्मसु ॥ सीमंतेमंगलोनामप्रबलोजातकर्मणि ॥ नाम्निवैपार्थिवोह्यग्निःप्राशनेतुशुचिःस्मृतः ॥ सभ्यनामातुचौलेस्याद्व्रतादेशेसमुद्भवः ॥ गोदानेसूर्यनामाग्निर्विवाहेयोजकःस्मृतः ॥ चतुर्थ्यांतुशिखीप्रोक्तोधृतिरग्निरथापिवा ॥ आवसथ्येद्विजोज्ञेयोवैश्वदेवेतुरुक्मकः ॥ प्रायश्चित्तेविटश्चैवपाकयज्ञेषुपावकः ॥ देवानांहव्यवाहश्चपितृणांकव्यवाहनः ॥ शांतिकेवरदःप्रोक्तःपौष्टिकेबलवर्धनः ॥ पूर्णाहुत्यामिडोनामक्रोधोग्निश्चाभिचारिके ॥ वश्यार्थेकामदोनामवनदाहेतुदूषकः ॥ कुक्षौतुजठरोज्ञेयःक्रव्यादोमृतदाहने ॥ वह्निनामालक्षहोमेकोटिहोमेहुताशनः ॥ वृषोत्सर्गेऽध्वरोनामसुचयेब्राह्मणःस्मृतः ॥ समुद्रेवाडवोह्यग्निःक्षयेसंवर्तकस्तथा ॥ ब्रह्मावैगार्हपत्यश्चईश्वरो

१ लौकिकेपावकोह्यग्निःइतिपाठः । २ ततःपुंसव[illegible]

CC-0 In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

[illegible]ग्निहोत्रत्रयोग्नयः ॥ ज्ञात्वैवमग्निनामानिगृह्यकर्मसमारभेत् ॥ इमानिसर्वसंस्कारशांति
कपौष्टिकानुष्ठानोपयुक्तानितत्रतत्रयोज्यान्यग्निनामानि ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ९२ ॥ वसोर्धारानुवाकः ॥

ॐ वसोर्धाराञ्जुहोतिवसोर्मेधारासदितिवाएषाहूयतेघृतस्यवाएनमेषाधारामुष्मिल्लोकेपिन्वमानोपतिष्ठतआज्येनजुहोतितेजोवा
आज्यंतेजोवसोर्धारातेजसैवास्मैतेजोवरुंधेथोकामावैवसोर्धाराकामानेवावरुंधेयंकामयेतप्राणान्स्यान्नाद्यंविच्छिद्यामितिविग्राहं
तस्यजुहुयात्प्राणानेवास्यान्नाद्यंविच्छिनत्तियंकामयेतप्राणान्स्यान्नाद्यꣳसंतनुयामितिसंततांतस्यजुहुयात्प्राणानेवास्यान्नाद्यꣳसं
तनोतिद्वादशद्वादशानिजुहोतिद्वादशमासाःसंवत्सरःसंवत्सरेणैवास्माऽअन्नमवरुंधेनैचमेक्षुचमइत्याहैतद्वाऽअन्नस्यरूपꣳरूपे
णैवान्नमवरुंधेग्निश्चमआपश्चमइत्याहैषावाअन्नस्ययोनिःसयोन्येवान्नमवरुंधेर्धेद्राणिजुहोतिदेवताएवावरुंधेयत्सर्वेषामर्धमिंद्रःप्र
तितस्मादिंद्रोदेवतानांभूयिष्ठभाक्तमइंद्रमुत्तरमाहेंद्रियमेवास्मिन्नुपरिष्टाद्धातियज्ञायुधानिजुहोतियज्ञोवैयज्ञायुधानियज्ञमेवाव
रुंधेथोऽएतद्वैयज्ञस्यरूपꣳरूपेणैवयज्ञमवरुंधेवभृथश्चमेस्वगाकारश्चमइत्याहस्वगाकृत्याअग्निश्चमेघर्मश्चमइत्याहैतद्ब्रह्मवर्चसस्य
रूपꣳरूपेणैवब्रह्मवर्चसमवरुंधऋक्चमेसामचमइत्याहैतद्वैछंदसाꣳरूपꣳरूपेणैवछंदाꣳस्यवरुंधेगर्भाश्चमेवत्साश्चमइत्याहैतद्वैप
शूनाꣳरूपꣳरूपेणैवपशूनवरुंधेकल्पांजुहोत्यकृप्तस्यकृप्त्यैयुग्मदयुजेजुहोतिमिथुनत्वायोत्तरावतीभवतोभिक्रांत्याएकांचमेतिस्र
श्चमइत्याहदेवछंदसंवाएकांचतिस्रश्चमनुष्यछंदसंचतस्रश्चाष्टौचदेवछंदसंचैवमनुष्यछंदसंचावरुंधऽआत्रयस्त्रिꣳशतोजुहोतित्र
यस्त्रिꣳशद्वैदेवतादेवताएवावरुंधऽआष्टाचत्वारिꣳशतोजुहोत्यष्टाचत्वारिꣳशदक्षराजगतीजागताःपशवोजगत्यैवास्मैपशूनव

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रुंधेवाजश्चप्रसवश्चेतिद्वादशंजुहोतिद्वादशमासाःसंवत्सरःसंवत्सरएवप्रतितिष्ठति ॥ इतिवसोर्धारानुवाकः ॥ १ ॥ ॥ छ ॥

॥ ९३ ॥ अभ्युपघातेप्रायश्चित्तानि ॥

श्रीः ॥ तत्रपूर्वमभ्युपघातेप्रायश्चित्तम् ॥ अस्मिन्कर्मणिस्वयंज्वलनादिनाभ्युपघातजनितप्रत्यवायपरिहारार्थंउक्तप्रायश्चित्तंकरिष्ये ॥ ॐ पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञैः॥ घृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुयजमानस्यकामाः॥ इतिमंत्रेणाग्नौसमिधमाधायतेनैवमंत्रेणस्रुवाहुतिंजुहुयात् ॥ आदित्यरुद्रवसुब्रह्मभ्यइदंनमम ॥ ॥ अस्मिन्क० आसादितप्रणीतास्कंदनशोषणप्रस्रवणादिजनितप्रत्य० विहितप्राय० ॥ आपोहिष्ठेतितृचेनप्रणीतायामुदकमापूर्यस्रुवाहुतिंजुहुयात् ॥ ॐ तंमआपस्तदुतायतेपुनःस्वादिष्टाधीतिरुचथायशस्यते ॥ अयश्संमुद्रउतविश्वभेषजःस्वाहाकृतस्यसमुतृप्णुतर्भुवःस्वाहा ॥ ऋभुभ्यइदं० ॥ ॥ अस्मिन्क० हवनीयद्रव्याणामग्नेश्चकेशनखकीटपिपीलिकामक्षिकाद्युपघातजनितप्रत्य० द्वेमिंदाहुतीहोष्ये ॥ ॐ यन्मआत्मनोमिंदाभूद्यज्ञस्तत्पुनराहार्जातवेदाविचर्षणिःस्वाहा ॥ मिंदवतेन्नयइदं० ॥ पुनरग्निश्चक्षुरदात्पुनरिंद्रोबृहस्पतिः॥ पुनर्मेअश्विनायुवंचक्षुराधत्तमक्ष्योःस्वाहा ॥ मिंदवतेन्नय०इदं ॥ ॥ अस्मिन्क० परिस्तरणबर्हिरादीनांदाहादिनाशजनितप्रत्यवाय० ॥ ॐ त्वमग्नेअयास्ययासन्मनसाहितः ॥ अयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा ॥ अयसेन्नयइदं० ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणांस्वाहा॥ प्रजापतय०॥ ॥

॥१३३॥

१ मिंदाहुतिद्वयंचैवव्याहृत्यःप्रणवादिकाः॥ वारुण्यस्तंतुमत्यश्चमुख्याचैवमनस्वती ॥ महाव्याहृतयःसप्ततेप्रजापतएवच ॥ एषमंत्रसमूहःस्यान्मिंदादिगणसंज्ञकः ॥ जातवेदसआद्यःस्यान्मनोज्योतिर्द्वितीयका ॥ महाव्याहृतयश्चैव एतेमिंदादिकोगणः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अस्मिन्क० आयतनाद्बहिरंगारपतनजनितप्रत्यवाय० ॥ ॐ इदंतएकंपरऊतएकंतृतीयेनज्योतिषासंविशस्व ॥ संवेशनस्तनुवै श्चारुरेधिप्रियोदेवानांपरमेसधस्थे॥ इतिमंत्रेणांगारानायतनेप्रक्षिप्य भूर्भुवःस्वःस्वाहाइतिस्रुवाहुतिंजुहुयात्॥ ॥ अस्मिन्क० स्वराक्षरपदवर्णभ्रेषजनितप्रत्यवायपरिहारार्थं आभिर्गीर्भिरित्येकामाज्याहुतिंहोष्ये ॥ ॐ आभिर्गीर्भिर्यदतोनऊनमाप्यायय हरिवोवर्धमानः ॥ यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्याम्स्वाहा॥ इंद्रायहरिवत०॥ ॥ अस्मिन्क०स्वाहाकारप्रदानासमकालताजनितप्रत्यवाय० मनोज्योतिरित्येकामाज्याहुतिंहोष्ये ॥ ॐ मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञꣳसमिमंदधातु ॥ याइष्टाउषसोनिस्तुचश्चताःसंदधामिहविषाघृतेनस्वाहा ॥ मनसेज्योतिषइदं० ॥ ॥ अस्मिन्क० नियमासनवाग्लोपजनितप्रत्यवाय० इदंविष्णुरित्यंबकमितिमंत्राभ्यांस्रुवाहुतीहोष्यामि ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ विष्णवइदं० ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा ॥ त्र्यंबकायेदं० ॥ ॥ अस्मिन्कर्मणिहौम्यद्रव्याणांसमिदादीनांमध्येउक्तसंख्यातोन्यूनातिरिक्तत्वजनितप्रत्यवाय० प्रायश्चित्तंकरिष्ये ॥ ॐ यत्पाकत्रामनसा० अग्नयइदं०॥ ॥ अस्मिन्कर्मणिदेवताद्व्योर्मध्येऋत्विगग्निमध्येचपुरुषांतरगमनजनितप्रत्य० पथिकृदग्निदेवताकांपूर्णाहुतिंहोष्ये ॥ जुह्वांचतुर्गृहीतमाज्यंगृहीत्वाजुहुयात् ॥ ॐ अग्नयेपथिकृतेस्वाहा अग्नयेपथिकृतइदं०॥ अस्मिन्क० प्रधानाहुत्युपरिस्विष्टकृदाहुतिप्रक्षेपजनितप्रत्यवाय० ॥ ॐ यत्रवेत्थवनस्पतेदेवानांगुह्यानामानि ॥ तत्रहव्यानिगामयस्वाहा ॥ इत्यनेनसमिधंहुत्वासमस्तव्याहृत्याज्यंजुहुयात् ॥ ॥ अस्मिन्क० ऋक्तोयज्ञभ्रेषप्राय० ॥ ॐ भूःस्वाहाअग्नयइदं ॥ ॥ यजुष्टोयज्ञभ्रेषप्रा० ॥ ॐ भुवःस्वाहावायवइदं० ॥ ॥ अ० सामतोयज्ञ० ॥ स्वःस्वाहासूर्या० ॥ ॥ अवि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ज्ञातप्रायश्चित्तं०॥ ॐ भूर्भुवःस्वःस्वाहा प्रजापतयइदं०॥ ॥ चरौश्रप्यमाणेतापादुत्सिक्ते चरूत्सेकजनितप्र०यदिपूर्वस्यांतदाइं द्रायस्वाहेतिस्रुवाहुतिः॥ दक्षिणस्यांयमायस्वा०॥ पश्चिमायांवरुणाय०॥ उत्तरस्यांसोमाय०॥ विदिक्षुभूर्भुवःस्वःस्वाहेति॥ एवंहु त्वा स्रुवगृहीतेनाज्येनचरुमाप्याययति॥ आप्यायस्वसंतेपयांसीत्याभ्यां॥ ततोमिंदाहुती॥ यन्मआत्मनो०पुनरग्निरितिद्वाभ्यां॥ ततःसर्वप्रायश्चित्तं भूर्भुवःस्वःस्वाहेति॥ ॥ अस्मिन्क०हूयमानाहुतिस्कंदनजनितप्रत्यवाय०॥ स्कन्नंहविरभिमृशेत्॥ भूपतयेस्वाहा॥ भुवनपतयेस्वाहा॥ भूतानांपतयेस्वाहा॥ यज्ञस्यत्वाप्रमयोन्मयाभिमयाप्रतिमया॥ ततः॥ द्रप्सश्चस्कंदपृथिवीमनुद्याम्मिं मंचयोनिमनुयश्चपूर्वैः॥ समानंयोनिमनुसंचरंतंद्रप्संजुहोम्यनुसप्तहोत्राःस्वाहाइत्याज्याहुतिंहुत्वाव्याहृतिभिश्च॥ ततःस्कन्नमग्नौ क्षिपेत्॥ ॥ व्रतलोप० व्रतपतिदेवताकांपूर्णाहु०॥ चतुर्गृहीतमाज्यं० अग्नयेव्रतपतयेस्वाहा॥ अग्नयेव्रतपतयइ०॥ अग्ने रुक्तस्थानादन्यत्रनासाकर्णादौकृताहुतिप्रक्षेपजनितप्रत्यवाय० मूलेनपंचविंशतिसंख्याज्याहुतीर्होष्ये॥ मूलमंत्रेणजुहुयात्॥ ॥ अस्मिन्कर्मणिमंत्रविपर्यासादिप्रत्यवायपरिहारार्थंत्वंनःसत्वन्नइतिद्वेआज्याहुतीहोष्यामि॥ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहे डोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा॥ अग्नयइदं॥ सत्वंनोअग्नेवमोभवोतीने दिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा॥ अग्नय०॥ अस्मिन्क० वेदिकाकुं डकलशप्रतिमादीनामुक्तप्रमाणाद्धीनाधिकताजनितप्रत्यवायपरि०अष्टाविंशतिवारंसमस्तव्याहृत्याज्याहुतीर्होष्यामि॥ ॐ भूर्भु वःस्वःस्वाहा प्रजापतयइदंनमम॥ ॥ सांगतासिद्ध्येसर्वप्रायश्चित्तंकरिष्ये॥ ॐ भूर्भुवःस्वःस्वाहा प्रजापतयइदंनमम॥ इतिसर्वसाधारणान्यग्न्युपघातकप्रायश्चित्तानि॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ९४ ॥ पुनराधानप्रयोगः ॥

श्रीः ॥ यजमानःपत्न्यासहकृतनित्यक्रियोदेशकालौसंकीर्त्यममप्रमादादेतावत्कालपर्यंतंगृह्याग्नित्यागजन्यदोषपरिहारद्वाराश्री परमेश्वरप्रीत्यर्थंप्रत्यब्दंप्राजापत्यप्रायश्चित्तंगोमूल्यप्रत्याम्नायेन० तथाअग्निविच्छेदेनलुप्तानांसायंप्रातर्होमानांदर्शपूर्णमासस्था लीपाकानांचपर्यायंव्रीह्यादिद्रव्यमाज्यंचतन्निष्क्रयीभूतद्रव्यंवाब्राह्मणेभ्योदास्ये ॥ प्रायश्चित्तीयद्रव्यत्यागांते पुनर्देशकालौनि र्दिश्यममविच्छिन्नस्यगृह्याग्नेःपुनःसंधानंकरिष्ये ॥ गणपतिपूजनंपंचवाक्यैःपुण्याहवाचनंस्थंडिलादिसकलंकर्मकरिष्ये ॥ गण तिपूजनादिकृत्वास्थंडिलंगोमयेनोपलिप्येतिस्वयोनितउत्पन्नमग्निमाहृत्यमृच्छरावेकृत्वाभूर्भुवःस्वरोमित्यायतनेप्रतिष्ठाप्यप्रज्वा ल्यअग्निध्यानांतंकृत्वासमित्त्रयमादाय ॥ ॐ श्रद्धएहीत्यादिप्राणायामांतंकृत्वापुनराधानहोमकर्मणियक्ष्यमाणदेवताःपरिग्रही ष्यामि॥जातवेदसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वा प्रधानहोमेमिंदवंतमग्निंद्विराज्येन तंतुमंतमग्निंत्रिराज्येनअभ्यावर्तिनमग्निं चतुराज्येन अग्निंवायुंसूर्यंप्रजापतिंप्रत्येकमाज्येनअयासमग्निमाज्येन मनस्वंतमग्निमाज्येनप्रजापतिमाज्येनसप्तवंतमग्निमाज्येन दशहोतारंवाचस्पतिंब्रह्माणमाज्येन अंगहोमेवरुणंद्विरित्यादिअग्निꣳस्विष्टकृतंहुतशेषेणेत्यंतमुक्त्वात्रिवृदन्नहोमेअग्निंत्रिवृदन्ने नसोमंत्रिवृदन्नेनअग्निमन्नादंत्रिवृ० अग्निमन्नपतिंत्रिवृ० प्रजापतिंत्रिवृ० विश्वान्देवांस्त्रिवृ० सर्वादेवतास्त्रिवृ० अग्निꣳस्विष्ट कृतंत्रिवृदन्नेनवास्तुपतिंबलीकरणेनप्रायश्चित्तहोमेअग्निंत्रिरित्यादिसमिधोग्नावाधायपरिसमूहनादिव्याहृतिहोमांतंतंत्रंविधायप्र धानहोमःकार्यः ॥ ॐ यन्म आत्मनो मिंदाभूद् अग्निस्तत्पुनराहार्जातवेदाविर्चर्षणिःस्वाहा ॥ मिंदवतेग्नयइदं ॥ ॐ पुनरग्निश्चक्षु रदात्पुनरिंद्रोबृहस्पतिः ॥ पुनर्मेअश्विनायुवंचक्षुराधत्तमक्ष्योःस्वाहा ॥ मिंदवतेग्नयइदं ॥ ॐ तंतुंतन्वन्नजसोभानुमन्विहिज्यो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिष्मतःपथोरक्षधियाकृतान् ॥ अनुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनꣳस्वाहा ॥ तंतुमतेन्नयइदं० ॥ ॐ उद्बुध्य स्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसꣳसृजेथामयंच ॥ पुनःकृण्वꣳस्त्वापितरंयुवानमन्वाताꣳसीत्वयितंतुमेतꣳस्वाहा ॥ तंतुमतेन्नय इदं ॥ ॐ त्रयस्त्रिꣳशत्तंतवोयेवितत्निरेयइमंयज्ञꣳस्वधयाददंतेतेषांछिन्नंप्रत्येतद्धामिस्वाहाघर्मोदेवाꣳअप्येतुस्वाहा ॥ तंतुम तेन्नयइदं० ॥ ॐ अग्नेभ्यावर्तिन्नभिनआवर्तस्वायुषावर्चसासन्यामेधयाप्रजयाधनेनस्वाहा ॥ अभ्यावर्तिनेन्नयइदं० ॥ ॐ अग्ने अंगिरःशतंतेसंत्वावृतःसहस्रंतउपावृतः ॥ तासांपोषस्यपोषेणपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधिस्वाहा ॥ अभ्यावर्तिनेन्नय इदं० ॥ पुनरूर्जानिवर्तस्वपुनरन्नइषायुषा ॥ पुनर्नःपाहिविश्वतःस्वाहा ॥ अभ्यावर्तिनेन्नयइदं० ॥ ॐ सहरय्यानिवर्तस्वाग्ने पिन्वस्वधारया ॥ विश्वप्स्न्याविश्वतस्परिस्वाहा॥ अभ्यावर्तिनेन्नयइदं०॥ ॐ भूःस्वाहा अन्नयइदं०॥ ॐ भुवःस्वाहा वायवइदं॥ ॐ सुवःस्वाहा सूर्यायेदं०॥ ॐ भूर्भुवःसुवःस्वाहा प्रजापतयइदं०॥ ॐ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि ॥ अयसाम नंसाधृतोयसाहव्यमूहिषेयानोधेहिभेषजꣳस्वाहा ॥ अयासेन्नयइदं० ॥ ॐ मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञꣳसमिमंदधातु॥ याइष्टाउषसोनिम्रुचश्चताःसंदधामिहविषाघृतेनस्वाहा ॥ मनसेज्योतिषइदं० ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरि ताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणाꣳस्वाहा ॥ प्रजापतयइदं० ॥ ॐ सप्ततेअग्नेसमिधःसप्तजिह्वाः सप्तर्षयःसप्तधाम्प्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वाघृतेनस्वाहा ॥ सप्तवतेन्नयइदं० ॥ ॐ चित्तिःस्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतंबर्हिः ॥ केतोअग्निः ॥ विज्ञातमग्निः ॥ वाक्पतिर्होता ॥ मनउपवक्ता ॥ प्राणोहविः ॥ सामाध्वर्युः ॥ इतिदशहोतारंमनसानुद्रुत्य ॥ वाचस्पतेविधेनामन् ॥ विधेमतेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्पतिः

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सोमंपिबतु ॥ आस्मासुनूम्णंधात्स्वाहा ॥ इं[तिपठन्जुहोति ॥ दशहोत्रेवाचस्पतयेब्रह्मणइदं० ॥ इत्यष्टादशप्रधानाहुतीर्हुत्वा॥
ततइमंमेवरुणेत्यादिस्विष्टकृदंतंसमाप्यत्रिवृद[न्नंसर्पिर्मिश्रंदर्व्यासकृत्सकृदवदायजुहोति ॥ ॐ अग्नयेस्वाहा अग्नयइदं॥ ॐ सो
मायस्वाहा सोमायेदं ॥ ॐ अग्नयेन्नादायस्वा[हा अग्नयेन्नादायेदं ॥ ॐ अग्नयेन्नपतयेस्वाहा अग्नयेन्नपतयइदं ॥ ॐ प्रजापतये
स्वाहा प्रजापतयइदं॥ ॐ विश्वेभ्योदेवेभ्यः[स्वाहा विश्वेभ्योदेवेभ्यइदं॥ ॐ सर्वाभ्योदेवताभ्यःस्वाहा सर्वाभ्योदेवताभ्यइदं॥
ॐ अग्नयेस्विष्टकृतेस्वाहा अग्नयेस्विष्टकृतइद[ं॥ ततोग्नेरुत्तरतःप्राग्ग्रान्कुशानास्तीर्यतूष्णीमुदकमासिच्यहुतशेषंत्रिवृदन्नंकिंचि
द्धस्तेनादायबलिंकरोति ॥ ॐ वास्तुपतयेस्वा[हा वास्तुपतयइदं ॥ तूष्णींसकृदंतेपरिषेकः ॥ ततःशुल्बप्रहरणं ॥ ॐ रुद्रायप
शुपतयेस्वाहा रुद्रायपशुपतयइदं॥ दर्व्यापरिधीन्[नुनक्तीत्यादिकर्मशेषंसमापयेत्॥ त्रिवृदन्नहोमशेषादिनाब्राह्मणान्संतोष्यपुण्या
हंवाचयेत् ॥ मह्यंसकुटुंबायमहाजनान्नमस्कुर्वाणाय[शीर्वचनमपेक्षमाणायपुनराधानकर्मकारिणेपुण्याहंभवंतोब्रुवंतु ३ मह्यं०
स्वस्ति० ३ मह्यं० ऋद्धिं० ३ ॥ इत्यादि ॥ ततआचम्य[प्राणानायम्यदेशकालौस्मृत्वाश्रीपरमेश्वरप्रीत्यर्थंपुनराधानांगभूताग्ने
यस्थालीपाकेनयक्ष्ये ॥ तथाचअग्निध्यानादिक० ॥ ॐ चत्व[रिशृंगा० सप्तहस्त० ॥ समिद्वयमादायाग्नेयस्थालीपाकहोमकर्म
णियक्ष्यमाणदेवताःपरिग्रहीष्यामि ॥ तूष्णीमिध्मेनअग्निंचरुणा[अग्निꣳस्विष्टकृतंचरुणा प्रायश्चित्तहोमेऽग्निंवायुंसूर्यंप्रजापतिंचा
ज्येनएतादेवताःसद्योयक्ष्ये ॥ ॐ भूर्भुवःसुवःस्वाहा ॥ ॐ यथाहतद्व[उत्तरेणकुशानास्तीर्यपात्रासादनंकार्यं ॥ दर्वीं आज्य
स्थालीं चरुस्थालीं प्रोक्षणीं इध्मं बर्हिः उपवेषं संमार्जनदर्भान् अवज्वलनदर्भान् उलूखलं मुसलं शूर्पं कृष्णा
जिनं तंडुलान् उद्धरणपात्रं मेक्षणं आज्यंचासाद्यप्रोक्षणीꣳसꣳस्कृत्यासादितानिप्रोक्ष्यउलूखलेव्रीहीनोप्यपत्न्यावघा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्यप्रक्षाल्योत्तरेणाग्निमासादितचरुस्थाल्यांतानोप्याग्नौश्रपयति ॥ ततोदर्वींनिष्टप्याज्यꣳसꣳस्कृत्यशृतंचरुमभिघार्योदगुद्वास्यो द्धरणपात्रेमेक्षणेनोद्धृत्याग्नेःपश्चान्निधायपरिषिच्य ॥ ॐ अदिते० समिद्द्वयात्मकमिध्ममंक्त्वातूष्णीमग्नावाधायचरुंदर्व्यापत्यसकृ दवदायजुहोति ॥ ॐ अग्नयेस्वाहाअग्नयइदं ॥ ॐ अग्नयेस्विष्टकृतेस्वाहाअग्नयेस्विष्टकृतइदं ॥ ॐ भूःस्वाहा अग्नयइदं ॥ भुवः स्वाहा वायवइदं ॥ सुवःस्वाहासूर्यायेदं ॥ ॐ भूर्भुवःसुवःस्वाहा प्रजापतयइदं ॥ ॐ अदितेन्व० ब्राह्मणभोजनंसंकल्प्यवि ष्णुंस्मरेत्वृषभदानंचकुर्यात् ॥ इतिविच्छिन्नस्याग्नेःपुनराधानंसंपूर्णं ॥ ॥ छ ॥ ॥ छ ॥

॥ ९५ ॥ ऋतुशांतिः ॥

श्रीः ॥ यजमानःकृतमंगलस्नानतिलकआचम्यप्राणानायम्यदेशकालौस्मृत्वाममपत्न्याःप्रथमरजोदर्शनेऽमुकदुष्टमासादिसूचि तसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांबौधायनोक्तांऋतुशांतिंकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंआ चार्यादिवरणंचकरिष्ये ॥ अत्रनांदीश्राद्धंकृताकृतं ॥ अमुकगोत्रोत्पन्नोमुकशर्माहं अमुकगोत्रोत्पन्नममुकशर्माणंअमुकशाखा ध्यायिनंऋतुशांत्याख्येकर्मणिआचार्यंत्वामहंवृणेइतिवृत्वा ॥ आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मि न्नाचार्योभवसुव्रतएवमेवब्रह्मादीन्वृत्वा ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्चितामया ॥ सुप्रसन्नैःप्रकर्तव्यंशांतिकंविधिपूर्वकं ॥ ततोगंधवस्त्रादिभिःयथाशक्तितानभ्यर्च्य ॥ ततःआचार्यःपवित्रपाणिःदेशकालौसंकीर्त्ययजमानेनवृतोहमाचार्यकर्मकरिष्येइ तिसंकल्प्य ॥ ततःसंभारान्संपाद्य पुरुषसूक्तेनशरीरशुद्धिंविधायसर्षपान्गृहीत्वा ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ इतिप्राच्यादिदिक्षुप्रादक्षिण्येनविकीर्य ॥ शुचीवइतिपंचगव्यंप्रोक्ष्य ॥ आपोहिष्ठे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तिष्ठन् भद्रकर्णेभिःस्वस्तिनइंद्रोवृद्धश्रवाः इतिमंत्रद्वयंपठेत् ॥ देवाआयांतु यातुधाना अपयांतु भूमौप्रादेशंकुर्यात् ॥ ततोदेशकालौनिर्दिश्यऋतुशांत्यंगभूतंमुख्यदेवतास्थापनंकरिष्येइतिसंकल्प्य ॥ गृहादीशान्यां गोमयेनोपलिप्तभूमौमहीद्यौःपृथिवीचनेतिभूमिंस्पृष्ट्वा॥ ओषधयःसंवदंतइतिप्रस्थाष्टमितैर्व्रीहिभिस्तदर्धैस्तंडुलैस्तदर्धैस्तिलैश्चपरि भावेनअरत्निमात्रांसमांचतुरस्रांवेदिंकृत्वा ॥ अशक्तश्चेद्यथाशक्तिवावेदिमध्येष्टदलकमलमुल्लिख्यकुशैर्दूर्वाभिर्वेदींप्रच्छाद्यवेद्युप रिआजिघ्रकलशमितितंतुवेष्टितंनवमव्रणंसुदृढंकुंभंनिधायकांडात्कांडादितिकूर्चमंतर्धायतस्मिन्आपोवाइदꣳसर्वमित्यनुवाके नआपोहिष्ठेतितिसृभिःकुंभेउदकंपूरयित्वामंत्रावृत्त्योपरिअश्वत्थेवइतिपंचपल्लवान्निक्षिप्य ॥ तेनैवमंत्रेणकपित्थाश्वत्थपलाश बिल्वोदुंबराणांत्वचश्चनिक्षिप्य ॥ बृहस्पतेजुषस्वनइतिपंचरत्नानियुवासुवासाइतिनववस्त्रयुग्मेनकलशंवेष्टयित्वायाःफलिनी र्याइतिनारीकेलफलंकुंभेनिधायतंकुंभंबिल्वपल्लवैश्चूतपल्लवैश्चावकीर्यगंधाक्षतपुष्पमालाभिःकलशंभूषयित्वा ॥ पुरुषंपुंडरीका क्षंध्यात्वाइतिबौधायनाचार्यः तदुपरितंदुलपूरितपूर्णपात्रंपूर्णादर्विंपरापतेतिसंस्थाप्यशिष्टाचाराद्यथाशक्तिसुवर्णादिनिर्मितांवि ष्णुप्रतिमांअश्मन्नूर्जमित्येतेनानुवाकेनाग्न्युत्तारणादिप्राणप्रतिष्ठापनपूर्वकांतद्विष्णोःपरममितिमंत्रेणप्रतिष्ठाप्ययथा ॥ एतत्कर्मा गप्रतिमानांतापताडनादिदोषोपशांतिपूर्वकंतासुदेवतासांनिध्यार्थमग्न्युत्तारणपूर्वकंप्राणप्रतिष्ठांकरिष्ये ॥ ॐ अश्मन्नूर्जपर्वतेशि श्रियाणांवातेपर्जन्येवरुणस्यशुष्मे॥ अद्भ्यओषधीभ्योवनस्पतिभ्योधिसंभृतांतांनइषमूर्जंधत्तमरुतःसꣳराणाः॥ अश्मꣳस्तेक्षुद् मुंतेशुगृच्छतुयंद्विष्मः॥समुद्रस्यत्वावाक्याग्नेपरिव्ययामसि॥पावकोअस्मभ्यꣳशिवोभव ॥ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसि॥

१ मंत्रावृत्त्याइत्यनेनप्रतिपल्लवप्रक्षेपेअश्वत्थेवइतिमंत्रोच्चारःकार्यइत्याशयोदृश्यते ॥ २ हवनत्रयसूक्तस्थाद्यमंत्रैरावाहनमितिप्रचुरआचारः॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पावकोअ०॥ उप ॥१॥ ज्मनुपवेतसेवत्तरंनदीष्वा॥ अग्नेपित्तमपामसि ॥ मंडूकिताभिरागहिसेमन्नोयज्ञं॥पावकवर्णश्शिवंकृधि ॥ पावकआचितयंत्याकृपा॥ क्षामन्रुरुचउषसोनभानुना॥ तूर्वनयामन्नेतशस्यनूरणआयोघृणे॥ नततृषाणोअजरः ॥ अग्नेपावकरोचिषामंद्रयादेवजिह्वया॥ आदेवान् ॥२॥ वक्षियक्षिच ॥ सनःपावकदीदिवोग्नेदेवाश्इहावह ॥ उपयज्ञश्हविश्चनः॥ अपामिदंन्ययनश्समुद्रस्यनिवेशनं॥ अन्यंतेअस्मत्तपंतुहेतयःपावकोअस्मभ्यश्शिवोभव॥ नमस्तेहरसेशोचिषेनमस्तेअस्त्वर्चिषे॥ अन्यंतेअस्मत्तपंतुहेतयःपावकोअस्मभ्यश्शिवोभव ॥ नृषदेवट् ॥३॥ अप्सुषदेवड्नसंदेवडर्हिषदेवट्सुवर्विदेवट्॥ येदेवादेवानांयज्ञियायज्ञियानाश्संवत्सरीणमुपभागमासते ॥ अहुतादोहविषोयज्ञेअस्मिन्त्स्वयंजुहुध्वंमधुनोघृतस्य ॥ येदेवादेवेष्वधिदेवत्वमायन्येब्रह्मणःपुरएतारोअस्य ॥ येभ्योनर्तेपवतेधामकिंचननतेदिवोनपृथिव्याअधिस्नुषु ॥ प्राणदाः ॥ ४ ॥ अपानदाव्यानदाश्चक्षुर्दावर्चोदावरिवोदाः ॥ अन्यंतेअस्मत्तपंतु०॥ अग्निस्तिग्मेनशोचिषायश्सद्विश्वंन्यत्रिणं ॥ अग्निर्नोवश्सतेरयिं ॥ सैनानीकेनसुविदत्रोअस्मेयष्टादेवाश्आयजिष्ठस्वस्ति ॥ अदब्धोगोपाउतनःपरस्पाअग्नेद्युमदुतरेवदिदीहि ॥ ५ ॥ उपदेवान्वट्प्राणदाश्चतुश्चत्वारिश्च ॥ १ ॥ (अस्यश्रीप्राणप्रतिष्ठेतिप्रतिष्ठांविधाय)तद्दक्षिणतोब्रह्मजज्ञानमितिब्रह्माणंतदुत्तरतस्त्र्यंबकमितिरुद्रंचपूर्ववत्प्रतिष्ठाप्यप्रतिष्ठामंत्रैरुक्तक्रमेणदेवतात्रयंकांडानुसमयेनपदार्थानुसमयेनवाषोडशोपचारैःसंपूज्य॥ ऋत्विग्भिःसहाचार्यःकुंभमन्वारभ्य ॥ नारायणायविद्महेवासुदेवायधीमहि ॥ तन्नोविष्णुःप्रचोदयात् ॥ इतिवैष्णवींगायत्रींअष्टोत्तरसहस्रंअष्टोत्तरशतंवाजपेत् ॥ तदंतेतत्सवितुरितिगायत्रींवेदादीनग्निमीळइत्येकामृचंइषेत्वोर्जेत्वेत्यनुवाकंअग्नआयाहिवीतयइत्येकांशंनोदेवीरित्येकांजस्त्वापोहिष्ठामयोभुवइति[illegible]चहिरण्यवर्णाःशुचयःपावकाइत्यनुवाकंयददइत्यनुवाकंपवमानःसुवर्जनइत्यनु

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाकंसहस्रशीर्षापुरुषइत्यनुवाकंऋचांप्राचीमहतीदिगुच्यतइत्यनुवाकचसकृत्पठत् ॥ यद्दःसंप्रयतीरहावनदताहते ॥ तस्मा दानद्योनामस्थतावोनामानिसिंधवः ॥ यत्प्रेषिंतावरुणेनताःशीभंऽसमवल्गत ॥ तदाग्नोदिंद्रोवोयतीस्तस्मादापोअनुस्थन ॥ अपकामंऽस्यंदमानाअवीवरतवोहिकं ॥ इंद्रोवःशक्तिभिर्देवीस्तस्माद्वार्णामवोहितं ॥ एकोदेवोअप्यतिष्ठत्स्यंदमानायथावशं ॥ उदानिषुर्महीरितितस्मादुदकमुच्यते ॥ आपोभद्राघृतमिदापआसुरग्नीषोमौबिभ्रत्यापइत्ताः ॥ तीव्रोरसोमधुपृचामरंगमआमा प्राणेनसहवर्चसागन् ॥ आदित्पश्याम्युतवाशृणोम्यामाघोषोगच्छतिवाङ्मआसां ॥ मन्येभेजानोअमृतस्यतर्हिहिरण्यवर्णाअतृपंयदावः ॥ आपोहिष्ठाऋ३आपोजनयथाचनः ॥ दिविश्रयस्वांतरिक्षेयतस्वपृथिव्यासंभवब्रह्मवर्चसमसिब्रह्मवर्चसायत्वा ॥ इत्यनुवाकं ॥ ॥ ऋचांप्राचीमहतीदिगुच्यते ॥ दक्षिणामाहुर्यजुषामपारां ॥ अथर्वणामंगिरसांप्रतीचीं ॥ साम्नामुदीचीमहतीदिगुच्यते ॥ ऋग्भिःपूर्वाह्णेदिविदेवईयते ॥ यजुर्वेदेतिष्ठतिमध्येअह्नः ॥ सामवेदेनास्तमयेमहीयते ॥ वेदैरशून्यस्त्रिभिरेतिसूर्यः ॥ ऋग्भ्योजाताऽसर्वशोमूर्तिमाहुः ॥ सर्वागतिर्याजुषीहैवशश्वत् ॥ १ ॥ सर्वतेजःसामरूप्यऽहशश्वत् ॥ सर्वंऽहेदं ब्रह्मणाहैवसृष्टं ॥ ऋग्भ्योजातंवैश्यंवर्णमाहुः ॥ यजुर्वेदंक्षत्रियस्याहुर्योनिं ॥ सामवेदोब्राह्मणानांप्रसूतिः ॥ पूर्वेपूर्वेभ्योवचएतदूचुः॥ आदर्शमग्निंचिन्वानाः ॥ पूर्वेविश्वसृजोमृताः ॥ शतंवर्षसहस्राणि॥ दीक्षिताःसत्रमासत ॥ २ ॥ तपआसीद्बृहस्पतिः॥ ब्रह्मब्रह्माभवत्स्वयं ॥ सत्यऽहहोतैषामासीत् ॥ यद्विश्वसृजआसत ॥ अमृतमेभ्यउदगायत् ॥ सहस्रंपरिवत्सरान् ॥ भूतऽहप्रस्तोतैषामासीत् ॥ भविष्यत्प्रतिचाहरत् ॥ प्राणोअध्वर्युरभवत् ॥ इदंऽसर्वऽसिषासतां ॥ ३ ॥ अपानोविद्वानावृतः॥ प्रतिप्रातिष्ठदध्वरे ॥ आर्तवाउपगातारः ॥ सदस्याऋतवोभवन् ॥ अर्धमासाश्चमासाश्च ॥ चमसाध्वर्यवोभवन् ॥ अशऽसद्ब्रह्मण

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तेजः ॥ अच्छावाकोभवद्यशः ॥ ऋतमेषांप्रशास्तासीत् ॥ यद्विश्वसृजआसत ॥ ४ ॥ ऊर्ग्राजानमुदवहत् ॥ ध्रुवगोपःसहो भवत् ॥ ओजोभ्यष्टौद्भाण्डः ॥ यद्विश्वसृजआसत ॥ अपचितिःपोत्रियामयजत् ॥ नेष्ट्रीयामयजत्विषिः ॥ आग्नीध्राद्विदुषी सत्यं ॥ श्रद्धाहैवार्यजत्स्वयं ॥ इरापत्नीविश्वसृजां ॥ आकूतिरपिनद्धविः ॥ ५ ॥ इध्मश्हश्रुच्चैभ्यउग्रे ॥ तृष्णाचावहतामुभे ॥ वागेषाश्सुब्रह्मण्यासीत् ॥ छंदोयोगान्विजानती ॥ कल्पतंत्राणितन्वानाहः ॥ सश्स्थाश्चसर्वशः ॥ अहोरात्रेपशुपाल्यौ ॥ मुहूर्ताःप्रेष्याअभवन् ॥ मृत्युस्तदभवद्धाता ॥ शमितोग्रोविशांपतिः ॥ ६ ॥ विश्वसृजःप्रथमाःसत्रमासत ॥ सहस्रसमंप्रसुतेनयंतः ॥ ततोहजज्ञेभुवनस्यगोपाः॥ हिरण्मयःशकुनिर्ब्रह्मनाम ॥ येनसूर्यस्तपतितेजसेद्धः ॥ पितापुत्रेणपितृमान्योनियोनौ ॥ नावेदविन्मनुतेतंबृहंतं ॥ सर्वानुभुमात्मानश्संपराये ॥ एषनित्योमहिमाब्राह्मणस्य ॥ नकर्मणावर्धतेनोकनीयान् ॥ ७ ॥ तस्यैवात्मापदवित्तावेदित्वा ॥ नकर्मणालिप्यतेपापकेन ॥ पंचपंचाशतस्त्रिवृतःसंवत्सराः ॥ पंचपंचाशतःपंचदशाः ॥ पंचपंचाशतःसप्तदशाः ॥ पंचपंचाशतएकविश्शाः ॥ विश्वसृजाश्सहस्रसंवत्सरं ॥ एतेनवैविश्वसृजइदंविश्वमसृजंत ॥ यद्विश्वमसृजंत ॥ तस्माद्विश्वसृजः ॥ ८ ॥ विश्वमेनाननुप्रजायते ॥ ब्रह्मणःसायुज्यश्सलोकतांयंति ॥ एतासामेवदेवतानाश्सायुज्यं ॥ सार्ष्टिताश्समानलोकताश्यंति ॥ यएतदुपयंति ॥ येचैनत्प्राहुः ॥ येभ्यश्चैनत्प्राहुः ॥ ९ ॥ ततःकुंभस्योत्तरतःमहतितृणमयेविष्टरेनववस्त्रकंचुक्यादिनालंकृतयावामभागस्थपत्न्यासहितंप्राङ्मुखंयजमानंसऋत्विगुदङ्मुखाचार्यःस्थापितकलशोदकंपात्रांतरे गृहीत्वातत्रस्थपंचपल्लवैःकुशदूर्वैश्चाशीर्वादपुरःसरंअभिषिंचेदेभिर्मंत्रैः ॥ तद्यथा ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ शिवमस्तुकल्याणंचास्त्वितिवाक्यंमंत्रांतेयोजनीयंइतिसर्वत्र ॥ आपोहिष्ठाइतितिसृभिःहिरण्यवर्णाइति

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ शिवमस्तुकल्याणंचास्तित्वितिमंत्रपरिगणनम् ॥

आपोहिष्ठा०क्षसे शिवमस्तु० १
योवशिव०तरः शिव० २
तस्माअरं० चनः शिव० ३
हिरण्यवर्णाः० भवंतु शिव०४
यासा ५ राजा० भवंतु शिव० ५
यासांदेवा० भवंतु शिव० ६
शिवेनमा० धत्त शि० ७
पवमानः० यःपोता० शि० ८
पुनंतुमा०पुनंतुम०आयवः शि० ९
जातवेदः०पवित्रे०शुक्रेण०रनु शि० १०
यत्तेपवित्र०अग्ने० नीमहे शि० ११
उभाभ्यां० पवित्रे० इदं०महे शि० १२
वैश्वदेवी० यस्यै० यीणां शि० १३
वैश्वानरो०वातः०द्या० नीतां शि० १४
बृहद्भिः० वर्षि० हिमा शि० १५
येनदेवा० येनापो० महे शिव० १६
यःपा० ऋषिभि० श्वना शि० १७
पावमा० ऋ० दकं शि० १८
पावमानीः० सुदु० हितं शि० १९
पावमानीः० भृताः शि० २०
पाव० हितं शि० २१
येनदेवाः० तुमा शि० २२
प्राजापत्यं० महे शि० २३
इंद्रःसु० नातु० शि० २४
सुरास्त्वा० प्रतिश्लोके शिव० २५

चतसृभिःपवमानःसुवर्जनइत्येतेनानुवाकेनसुरास्त्वामभिषिंचंत्वितिपौराणिकैर्मंत्रैश्च ॥ ततःकलशोदकेनान्येनचोष्णोदकेनतैलाभ्यंगपूर्वकंसुस्नातौदंपतीअभिषेककालीनवासांसिपरित्यज्याहतशुक्लवाससीपरिधायश्वेतचंदनकुंकुमपुष्पमालादिधारणंकुर्यातां ॥ त्यक्तवासांस्याचार्यायदद्यात् ॥ ततआचार्योविधिवत्पंचगव्यंकृत्वायजमानपद्यैदद्यात् ॥ साच ॥ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके ॥ प्राशनात्पंचगव्यस्यदहत्यग्निरिवेंधनं ॥ इतिप्राश्यआचामेत् ॥ अथाभिषेकानंतरंपत्न्यासहयजमानान्वारब्धाआचार्योवेद्याःपश्चिमतःस्थंडिलंकृत्वा तत्रभूसंस्काराद्यग्निप्रतिष्ठापनांतंविधायस्थापितकुंभस्येशान्यांवेद्यादौनवग्रहाणांतदधिदेवताप्रत्यधिदेवतानांचतत्तन्मंत्रैरावाहनपूजनादिपूर्वोक्तग्रहयज्ञरीत्याकुर्यात् ॥ अथान्वाधानं ॥ श्रद्धएहीत्यादिऋतुशांतिहोमाख्येकर्म

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णियायायक्ष्यमाणादेवताइत्यादिव्याहृत्यंतमुक्त्वातत्रादौआदित्यादिनवग्रहाणांयथासंभवंयथालाभसमिच्चर्वाज्यैरित्यादिप्रागुक्तरीत्यान्वाधानंकुर्यात् ॥ प्रधानहोमेऽन्वाधाने ॥ विष्णुसूक्तेनप्रत्यृचंविष्णुंअष्टोत्तरशतसंख्याकाभिःपलाशसमिधाहुतिभिर्यक्ष्ये॥ ब्रह्मसूक्तेनप्रत्यृचंब्रह्माणंअष्टोत्तरशतसंख्याकाभिःगृहसिद्धान्नाहुतिभिर्यक्ष्ये ॥ रुद्रसूक्तेनप्रत्यृचंरुद्रंअष्टोत्तरशतसंख्याकाभिः आज्याहुतिभिर्यक्ष्ये ॥ घृतसूक्तेनप्रत्यृचमेकावृत्त्याआयुष्यदेवतामाज्येनयक्ष्ये ॥ कृत्तिकानक्षत्रदेवतामग्निंअष्टाविंशतिसंख्याकाभिःसमिच्चर्वाज्याहुतिभिर्यक्ष्ये ॥ त्र्यंबकंअष्टोत्तरशतसंख्याकाभिस्तिलाज्याहुतिभिर्यक्ष्ये ॥ ततःइमंमेवरुणेत्यादिआज्यसंस्कारांतेसिद्धमन्नमग्नावधिश्रित्याद्भिःप्रोक्षेत्तदेवपवित्रमित्याचक्षतेइतिधर्मेस्मरणात्॥ ततःपरिधिदानाद्यन्वाधानादिक्रमेणग्रहहोमांतेप्रधानहोमःकार्यः॥ यथा ॥ ॐ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांस्यियोअस्कभायदुत्तरꣳसधस्थंविचक्रमाणस्त्रेधोरुगायःस्वाहा ॥१॥ ॐ तदस्यप्रियमभिपाथोअश्यांनरोयत्रदेवयवोमदंति॥ उरुक्रमस्यसहिबंधुरित्थाविष्णोःपदेपरमेमध्वउत्सःस्वाहा ॥ २ ॥ ॐ प्रतद्विष्णुस्तवतेवीर्यायमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वास्वाहा ॥ ३ ॥ ॐ परोमात्रयातनुवावृधाननतेमहित्वमन्वश्नुवंति ॥ उभेतेविद्मरजसीपृथिव्याविष्णोदेवत्वंपरमस्यवित्सेस्वाहा ॥ ४ ॥ ॐ विचक्रमेपृथिवीमेषएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् ॥ ध्रुवासोअस्यकीरयोजनासउरुक्षितिꣳसुजनिमाचकारस्वाहा ॥ ५ ॥ ॐ त्रिर्देवःपृथिवीमेषएतांविचक्रमेशतर्चसंमहित्वा ॥ प्रविष्णुरस्तुतवसस्तवीयान्त्वेषꣳह्यस्यस्थविरस्यनामस्वाहा ॥ ६ ॥ एवंसूक्तस्याष्टादशावृत्तिभिरष्टोत्तरशतसंख्याआहुतयोभवंति ॥ एवमेवब्रह्मसूक्तेनान्नं ॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ता

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्विसी॑म॒तः सु॒रुचो॑वे॒नआ॑वः ॥ सबु॒ध्निया॑उप॒माअ॑स्यवि॒ष्ठाः स॒तश्च॒योनि॒मस॑तश्च॒विवः॒स्वाहा॑ ॥१॥ ॐ पि॒ताविरा॒जा॑मृष॒भोर॑यी॒णामं॒त रि॑क्षंवि॒श्वरू॑प॒आवि॑वेश ॥ तम॒र्कैर॒भ्य॑र्चंतिव॒त्संब्रह्म॒संतं॒ब्रह्म॑णाव॒र्धयं॑तः॒स्वाहा॑ ॥ २ ॥ ॐ ब्रह्म॑दे॒वान॑जनय॒द्ब्रह्म॒विश्व॑मि॒दंजग॑त् ॥ ब्रह्म॑णः क्ष॒त्रंनिर्मि॑तं॒ब्रह्म॑ब्राह्म॒णआ॒त्मना॒स्वाहा॑ ॥३॥ ॐ अं॒तर॑स्मिन्नि॒मेलो॒काअं॒तर्विश्व॑मि॒दंजग॑त् ॥ ब्रह्मै॒वभू॒ताना॒ंज्येष्ठं॒तेन॒कोर्ह॑ति॒ स्पर्धि॑तु॒ꣳस्वाहा॑ ॥ ४ ॥ ॐ ब्रह्म॑न्दे॒वास्त्रय॑स्त्रिꣳश॒द्ब्रह्म॑न्निंद्रप्रजाप॒ती ॥ ब्रह्म॑न्ह॒विश्वा॑भू॒तानि॑ना॒वीवां॒तः स॒माहि॑ता॒स्वाहा॑ ॥ ५ ॥ ॐ चत॑स्र॒आशाः॒प्रच॑रंत्व॒ग्नय॑इ॒मंनो॑य॒ज्ञंन॑यतुप्रजा॒नन् ॥ घृ॒तंपिन्व॑न्न॒जरꣳसु॒वीरं॒ब्रह्म॑स॒मिद्भ॑व॒त्याहु॑तीना॒ꣳस्वाहा॑ ॥६॥ एवमेवाज्येन रुद्रसूक्तं ॥ ॐ परि॑णोरु॒द्रस्य॑हे॒तिर्वृ॑णक्तु॒परि॑त्वे॒षस्य॑दुर्म॒तिर॑घा॒योः ॥ अव॑स्थि॒राम॒घव॑द्भ्यस्तनुष्व॒मीढ्व॑स्तो॒काय॒तन॑यायमृडय॒स्वाहा॑ १ ॐ स्तु॒हिश्रु॒तंग॑र्त॒सदं॒युवा॑नंमृ॒गंनभी॒ममु॑पह॒त्नुमु॒ग्रं ॥ मृ॒डाज॑रि॒त्रेरु॑द्र॒स्तवा॑नोअ॒न्यंते॑अ॒स्मन्निव॑पंतु॒सेना॒ः स्वाहा॑ २ ॐ मीढु॑ष्टम॒ शिव॑तमशि॒वोन॑ः सु॒मना॑भव ॥ प॒र॒मेवृ॒क्षआयु॑धंनि॒धाय॒कृत्तिं॒वसा॑न॒आच॑र॒पिना॑कं॒बिभ्र॒दाग॑हि॒स्वाहा॑ ३ ॐ अर्ह॑न्बिभर्षि॒साय॑का नि॒धन्वार्ह॑न्नि॒ष्कंय॑ज॒तंवि॒श्वरू॑पं ॥ अर्ह॑न्नि॒दंद॑यसे॒विश्व॒मब्भु॑वं॒नवाओजी॑योरुद्र॒त्वद॑स्ति॒स्वाहा॑ ४ ॐ त्वम॑ग्नेरु॒द्रोअसु॑रोम॒होदि॒व स्त्वꣳशर्धो॒मारु॑तंपृ॒क्षई॑शिषे ॥ त्वंवातै॑ररु॒णैर्या॑सिशंग॒यस्त्वंपू॒षावि॑ध॒तः पा॑सि॒नुत्मना॒स्वाहा॑ ५ ॐ आवो॒राजा॑नमध्व॒रस्य॑रु॒द्रꣳहो ता॑रꣳसत्य॒यज॒ꣳरोद॑स्योः ॥ अ॒ग्निंपु॒रात॑नयि॒त्नोर॒चित्ता॒द्धिर॑ण्यरूप॒मव॑सेकृणुध्व॒ꣳस्वाहा॑ ६ ॥ अथायुष्यहोमंघृतसूक्तेनप्रत्यृचंजु हुयात् ॥ ॐ योब्रह्माब्रह्मणउज्जभारप्राणेश्वरः कृत्तिवासाः पिनाकी ॥ ईशानोदेवः सनआयुर्दधातुतस्मैजुहोमिहविषाघृतेनस्वाहा १ ॐ विभ्राजमानः सरिरस्यमध्याद्रोचमानाघर्मरुचिर्यआगात् ॥ समृत्युपाशानपनुद्यघोरामिहायुषेनोघृतमत्तुदेवास्वाहा २ ॐ ब्रह्म ज्योतिर्ब्रह्मपत्नीषुगर्भंयमोदधात्पुरुरूपंजयंतं ॥ सुवर्णरंभगृहमर्कमर्चंनमायुषेवर्धयामोघृतेनस्वाहा ३ ॐ श्रियंलक्ष्मीमंबिकामो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पलांगांषष्ठींचयामिंद्रसेनेत्युदाहुः ॥ तांविद्यांब्रह्मयोनिꣳसरूपामिहायुषेतर्पयामोघृतेनस्वाहा ४ ॐ दाक्षायण्यःसर्वयोन्यःसयो न्यःसहस्रशोविश्वरूपाविरूपाः ॥ ससूनवःसपतयःसयूथ्याआयुषेनोघृतमिदंजुषताꣳस्वाहा ५ ॐ दिव्यागणाबहुरूपाःपुराणा आयुश्छिंदोनःप्रथमंतुवीरान् ॥ तेभ्योजुहोमिबहुधाघृतेनमानःप्रजाꣳरीरिषोमोतवीरान्स्वाहा ६ ॐ एकःपुरस्ताद्यइदंबभूवय तोबभूवभुवनस्यगोपाः ॥ तमेष्यतिभुवनꣳसांपरायेसनोहविर्घृतमिहायुषेतुदेवःस्वाहा ७ ॐ वसून्रुद्रानादित्यान्मरुतोथसाध्यान् भून्यक्षान्गंधर्वाꣳश्चपितॄꣳश्चविश्वान् ॥ भृगून्त्सर्पाꣳश्चांगिरसोथसर्वान्घृतंहुत्वास्वायुष्यामहयामशश्वत्स्वाहा ८ ॥ अथनक्षत्रहोमः

नक्षत्रादिनक्षत्रदेवतानांमंत्रप्रतीकानि ।

१	कृत्तिका	ॐ अग्निर्नःपातुकृत्ति०	१०	उत्तरा	ॐ श्रेष्ठोदेवानांभगवो०	१९	उत्तराषा ॐ तन्नोविश्वेउपशृण्वं०ः
२	रोहिणी	ॐ प्रजापतेरोहिणीवे०	११	हस्तः	ॐ आयातुदेवःसवि०	२०	अभिजित् ॐ यस्मिन्ब्रह्माभ्यज०
३	मृगः	ॐ सोमोराजामृगशी०	१२	चित्रा	ॐ त्वष्टानक्षत्रमभ्येति०	२१	श्रवणः ॐ शृण्वंतिश्रोणाम०
४	आर्द्रा	ॐ आर्द्रयारुद्रःप्रथ०	१३	स्वाती	ॐ वायुर्नक्षत्रमभ्येति०	२२	धनिष्ठा ॐ अष्टौदेवावसवः०
५	पुनर्वसुः	ॐ पुनर्नोदेव्यदितिः०	१४	विशाखा	ॐ दूरमस्मच्छत्रवोयं०	२३	शतभिषा ॐ क्षत्रस्यराजावरुणो०
६	पुष्यः	ॐ बृहस्पतिःप्रथमं०	१५	अनूराधा	ॐ ऋद्ध्यास्महव्यैर्नम०	२४	पूर्वाभा० ॐ अजएकपादुदगा०
७	आश्रेषा	ॐ इदंꣳसर्पेभ्योहवि०	१६	ज्येष्ठा	ॐ इंद्रोज्येष्ठामनुनक्ष०	२५	उत्तराभा० ॐ अहिर्बुध्नियःप्र०
८	मघा	ॐ उपहूताःपितरोये०	१७	मूलं	ॐ मूलंप्रजांवीरवतीं०	२६	रेवती ॐ पूषारेवत्यन्वेतिपं०
९	पूर्वा	ॐ गवांपतिःफल्गु०				२७	अश्विनी ॐ तदश्विनावश्वयु०
						२८	भरणी ॐ अर्यपाप्यानंभरणी०

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

समिदन्नाज्यैःकार्यः ॥ यथा ॥ ॐ अग्निनेःपातुकृत्तिकानक्षत्रंदेवामेद्रिय ॥ इदमासाविचक्षणेहविरासंजुहोतन ॥ यस्यभांतिरश्मयोयस्यकेतवोयस्येमाविश्वाभुवनानिसर्वा ॥ सकृत्तिकाभिरभिसंवसानोग्निर्नोदेवःसुवितेदधातुस्वाहा ॥ १ ॥ ॐ ततस्तिलैः ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहेतिअष्टोत्तरशतंजुहुयात् ॥ इमंमेवरुणेत्यादिराष्ट्रभृदंतंहुत्वाहुतशेषद्रव्येणस्विष्टकृतंजुहुयात् ॥ हव्यवाहमितिपुरोनुवाक्यामनूच्ययाज्ययाजुहोति ॥ ॐ (हव्यवाहमभिमा० इतिपुरोनुवा० ॐ स्विष्टमग्नेअभि० इतियाज्या) ॥ ततइध्मसंनहनाद्युत्तरपरिषेकांते दिक्पालेभ्यःसदीपमाषभक्तबलीन्संकल्प्ययजमानद्वाराकारयेत् ॥ ततोग्न्यायतनस्यसमंतात्पूर्वादिदिक्षुप्रादक्षिण्येनदिक्पालेभ्यःत्रातारमिंद्रमित्यादिभिर्मंत्रैर्बलीन्दद्यात् ॥ ततआदित्यादिस्थापितग्रहदेवताभ्यःपीठदेवताभ्यश्चतत्तन्मंत्रैस्तदुद्देशेनबलीन्समर्प्य ॥ क्षेत्रपालाय ॥ क्षेत्रस्यपतिनावयंहितेनेवजयामसि ॥ गामश्वंपोषयित्ख्वासनोमृडातीदृशेइतिक्षेत्रपालभूतप्रेतपिशाचशाकिनीडाकिनीवेतालपरिवारयुताय इमंबलिमित्यादिसार्वभौतिकंबलिंदद्यात् ॥ ततःशूद्रादिनाबलिनयनेकृतेपृथिवीशांतिरितिप्रोक्ष्य ॥ ॐ पृथिवीशांतासाग्निनाशांतासामेशांताशुचंशमयतु ॥ अंतरिक्षंशांतंतद्वायुनाशांतंतन्मेशांतंशुचंशमयतु ॥ द्यौःशांतासादित्येनशांतासामेशांताशुचंशमयतु ॥ पृथिवीशांतिरंतरिक्षंशांतिर्द्यौःशांतिर्दिशःशांतिरवांतरदिशाःशांतिरग्निःशांतिर्वायुःशांतिरादित्यःशांतिश्चंद्रमाःशांतिर्नक्षत्राणिशांतिरापःशांतिरोषधयःशांतिर्वनस्पतयःशांतिर्गौःशांतिरजाशांतिरश्वःशांतिःपुरुषःशांतिर्ब्रह्मशांतिर्ब्राह्मणाःशांतिःशांतिरेवशांतिःशांतिर्मेअस्तुशांतिः ॥ तयाहंशांत्यासर्वशांत्यामह्यंद्विपदेचतुष्पदेचशांतिंकरोमिशांतिर्मेअस्तुशांतिः ॥ एहश्री

१ बौधायनसूत्रस्थप्रधानमात्रग्रहणात्स्वसूत्रानुसारिस्विष्टकृतंदद्यादित्येकंमतं ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्रद्ध्रीश्च धृतिश्च तपोमेधाप्रतिष्ठाश्रद्धासत्यंधर्मश्चैतानिमोत्तिष्ठंतमनूत्तिष्ठंतुमामाꣳश्रीश्च ह्रीश्च धृतिश्च तपोमेधाप्रतिष्ठाश्रद्धासत्यंधर्मश्चैतानिमामाहासिषुः॥ उदायुषास्वायुषोदोषधीनाꣳरसेनोत्पर्जन्यस्यशुष्मेणोदस्थाममृताꣳअनु॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्॥ पश्येमशरदः शतंजीवेमशरदः शतंनंदामशरदः शतंमोदामशरदः शतंभवामशरदः शतꣳशृणवामशरदः शतंप्रब्रवामशरदः शतमजीताःस्यामशरदः शतंज्योक्सूर्यंदृशे ॥ ५ ॥ यउदगान्महतोर्णवाद्विभ्राजमानःसरिरस्यमध्यात्समावृषभोलोहिताक्षः सूर्योविपश्चिन्मनसापुनातु ॥ ब्रह्मणश्चोतन्यसिब्रह्मणआणीस्थोब्रह्मणआवपनमसिधारितेयंपृथिवीब्रह्मणाम्हीधारितमेनेनम हदंतरिक्षंदिवंदाधारपृथिवीꣳसदेवांयद्हंवेद्तद्हंधारयाणिमामद्वेदोधिविस्रसत् ॥ मेधामनीषेमाविंशताꣳसमीचींभूतस्यभव्यस्यावरुध्यैसर्वमायुरयाणिसर्वमायुरयाणि ॥ आभिर्गीर्भिर्यदतोनऊनमाप्यायायहरिवोवर्धमानः ॥ यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्याम ॥ ब्रह्मप्रावादिष्मतन्नोमाहासीत् ॥ ॐ शांतिःशांतिःशांतिः॥ इतिजप्त्वा॥ सयजमानआचार्यःप्रक्षालितपाणिपादआचांतःस्रुचिद्वादशगृहीतमष्टगृहीतंवाआज्यंगृहीत्वातदुपरिचंदनादिभूषितफलंनिधाय सप्ततेअग्नेसमिधः० घृतेनस्वाहेतिपूर्णाहुतिंजुहुयात् ॥ ततःप्रणीतापर्याहृत्यादिपूर्णपात्रविमोकांतेआचार्योयजमानश्चसंस्राजपेनोपस्थायाग्नेः पश्चात्सपत्नीकोयजमानउपविश्यविभूतिधारणंकुर्यात् ॥ आचार्यायसवत्सांगांतदभावेयथाशक्तिसुवर्णंऋत्विग्भ्योयथाशक्तिदक्षिणांचदद्यात् ॥ ततोदेवतानामुत्तरपूजांविधायविसर्जनांतेआचार्यहस्तेसोपस्करांप्रतिमांप्रतिपाद्य अग्निपूजांतेगच्छगच्छेत्यग्निं विसृज्यपुण्याहंवाचयेत्॥ कर्मांगदेवतामुद्दिश्यदशाधिकान्ब्राह्मणान्भोजयिष्येइतिसंकल्प्यभूयसींदक्षिणांदद्यात् ॥ नीराजना दिशांतिपाठंब्राह्मणैःसहपठेत् ॥ कर्मसंपूर्णमस्त्विति ब्राह्मणैरुक्तेयजमानःकर्मसंपूर्णतायै विष्णुंस्मरेत् ॥ इतिसंस्का० ऋतुशांतिः ॥

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ९६ ॥ गर्भाधानम् ॥

श्रीः ॥ सपत्नीकोयजमानआचम्यप्राणानायम्यदेशकालावुत्कीर्त्यअस्याःममभार्यायाःप्रतिगर्भसंस्कारातिशयद्वाराअस्यांजनिष्यमाणसर्वगर्भाणांबीजगर्भसमुद्भवैनोनिबर्हणद्वाराक्षेत्रसंस्कारद्वाराचाद्यगर्भाधानाख्यसंस्कारंकरिष्ये ॥ तदंगभूतंगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये॥ इतिसंकल्प्यकुर्यात्॥ अत्रनांदीश्राद्धेक्रतुदक्षसंज्ञकाविश्वेदेवाः॥ ततःरात्रौकृतावश्यकक्रियआचम्यस्वलंकृतांस्वच्छवस्त्रपरिधानांभार्यांसम्यगास्तृतेपर्यंकेशयनार्थमुपह्वयतेनवभिर्मंत्रैः॥ ॐ विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु ॥ आसिंचतुप्रजापतिर्धातागर्भंदधातुते ॥ १ ॥ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति॥ गर्भंतेअश्विनावुभावाधत्तांपुष्करस्रजौ ॥ २ ॥ हिरण्ययीअरणीयंनिर्मंथतोअश्विना ॥ तंतेगर्भंहवामहेदशमास्यायसूतवै ॥ ॥ ३ ॥ यथाग्निगर्भापृथिवीद्यौर्यथेंद्रेणगर्भिणी ॥ वायुर्यथादिशांगर्भएवंगर्भंदधामिते ॥ ४ ॥ यस्ययोनिंप्रतिरेतोगृहाणपुमान्पुत्रोजायतांगर्भोअंतः ॥ तंमातादशमासोबिभर्तुसजायतांवीरतमःस्वानां ॥ ५ ॥ आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं ॥ आवीरोअत्रजायतांपुत्रस्तेदशमास्यः ॥ ६ ॥ करोमितेप्राजापत्यमागर्भोयोनिमेतुते ॥ अनूनःपूर्णोजायतामनंधोश्लोणोपिशाचधीरः ॥ ७ ॥ यानिप्रभूणिवीर्याण्यृषभाजनयंतिनः ॥ तैस्त्वंगर्भिणीभवसजायतांवीरतमःस्वानां ॥ ८ ॥ योवशायांगर्भोयश्वेवहतींद्रस्तंनिदधेवनस्पतौ ॥ तेनत्वंगर्भिणीभवसाप्रसूर्धेनुगाभव ॥ ९ ॥ ततउपयच्छते ॥ सन्नाम्नःसंहृदयानिसन्नाःसंत्वचः ॥ संत्वाकामस्ययोक्रेणयुंजान्यविमोचनायेति ॥ ततस्तांपर्यालिंगयति ॥ मामनुव्रताभवसहचर्यामयाभव ॥ यातेपतिघ्नीतनूर्जारघ्नींत्वेताकरोमिशिवात्वंमह्यमेधिक्षुरपविर्जारेभ्यःइति ॥ अथास्यैमुखेनमुखमीप्सतेमधुहेमध्विदंमधुजिह्वामेमधुवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दिनी ॥ मुखेमेसारघंमधुदत्सुसंवननंकृतं ॥ चक्रवाकश्संवननंयन्नदीभ्यउदाहृतं ॥ यद्युक्तोदेवगंधर्वस्तेनसंवनिनौस्वकइति ॥ ततोमंत्रत्रयेणवारत्रयंरेतोवस्कंदनंकार्यं ॥ भूःप्रजापतिनात्यृषभेणस्कंदयामिवीरंधत्स्वासौ ॥ भुवःप्रजापतिनात्यृषभेणस्कंदयामिवीरंधत्स्वासौ ॥ सुवःप्रजापतिनात्यृषभेणस्कंदयामिवीरंधत्स्वासौ ॥ अधिकंचेत्तूष्णीमेवयथेच्छमवस्कंदयेत् ॥ अत्रमंत्रेषुसर्वत्रासाविति पदंपरित्यज्यसंबुद्ध्यासंस्कार्यायानामग्राह्यं ॥ क्षेत्रसंस्कारत्वात्सकृदयंसंस्कारःकार्यः ॥ (आशीर्मंत्रः ॥ ॐ नेष्टः पत्नींमुदानयेत्याहाग्नीदेवनेष्टरिरेतोदधातिनेष्टापत्नियामुद्गात्रासंख्यापयतिप्रजापतिर्वाएषयद्दुद्गाताप्रजानांप्रजननायापउपप्रवर्तयतिरेतएवतत्सिंचत्यूरुणोपप्रवर्तयत्यूरुणाहिरेतःसिच्यतेनग्नंकृत्योरुमुपप्रवर्तयतियदाहिनग्नऊरुर्भवत्यथमिथुनीभवतोथरेतःसिच्यतेथप्रजाःप्रजायंते ॥) ॥ इतिगर्भाधानप्रयोगः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ९७ ॥ नारायणबलिः ॥

श्रीः ॥ एवंकृतेपिगर्भाधानेयदिगर्भोनोत्पद्यतेतदाप्रतिबंधकीभूतप्रेतनिवृत्त्यर्थंनारायणबलिनागबलीकार्यौ ॥ तत्रयद्यपिबौधायनसूत्रस्यैवयजुर्वेदिनामभ्यर्हितत्वेनग्राह्यत्वंतथापिनागबलिसूत्रस्येदानीमत्रानुपलंभाद्बाह्वृच्यएवनागबलिप्रयोगःप्रदर्श्यते ॥ बौधायनोक्तनारायणबलिविधिसत्वेपिसंनियोगशिष्टत्वाद्बाह्वृच्यएवोचितः॥बौधायनसूत्रोक्तरीत्याक्रियमाणेतुअर्धजरतीयन्यायआपद्येतेति ॥ कर्ताशुक्लैकादश्यांनदीतीरादिशुचौदेशेस्नानादिनित्यक्रियांतेआचम्यप्राणानायम्यदेशकालौसंकीर्त्य मदीयकुलाभिवृद्धिप्रतिबंधकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंनारायणबलिंकरिष्यइतिसंकल्प्य महीद्यौरित्यादिविधिनास्थापितकलशद्वयेसुवर्णनिर्मितप्रतिमयोर्विष्णुमावाहयामियममावाहयामीतिक्रमेणावाह्यपुरुषसूक्तेनयमायसोममितिचक्रमेणषोडशोपचारैःपूजयेत् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णाग्रान्कुशानास्तीर्यतेषु शुधतांविष्णुरूपीप्रेतइतिदशसुस्थानेषुदक्षिणसंस्थमपोनिनीय मधुघृतप्लुतान्दशपिंडान्सतिलान् काश्यपगोत्रअमुकप्रेतविष्णुदैवतायंतेपिंडइतिदक्षिणामुखःप्राचीनावीतीदक्षिणाग्रेषुकुशेषुप राचीनेनपाणिनासव्यंजान्वाच्यविष्णुरूपंप्रेतंध्यायन्ददद्यात् ॥ ततोगंधादिभिस्तानभ्यर्च्यप्रवाहणांतंकृत्वानद्यादौक्षिपेत् ॥ तस्या मेवरात्रौश्वःकरिष्यमाणश्राद्धेक्षणःक्रियतामित्येवंपंचत्रीनेकंवेत्येवमयुग्मान्ब्राह्मणान्श्राद्धोद्देशेननिमंत्र्योपोषणंकुर्यात् ॥ श्वो भूतेमध्याह्नेविष्णुमभ्यर्च्यप्रेतंविष्णुरूपिणमुद्दिश्यएकोद्दिष्टविधिनापादप्रक्षालनादितृप्तिप्रश्नांतंकृत्वा ब्राह्मणसमीपेपिंडपितृय ज्ञवदुल्लेखनाद्युदकनिनयनांतंतूष्णींकृत्वा विष्णवे ब्रह्मणे शिवाय सपरिवाराययमायच नाममंत्रैःविष्णोअयंतेपिंडइतिचतुरःपिं डान्दत्वा विष्णोअयंतेपिंडइतिविष्णुरूपप्रेतंध्यायन्पंचमंपिंडंचदत्वार्चनादिप्रवाहणांतंतूष्णींकृत्वा आचांतान्ब्राह्मणान्दक्षि णादिभिःसंतोष्यतेष्वेकस्मैगुणवतेप्रेतबुद्ध्यावस्त्राभरणगोहिरण्यादीनिदत्वा एकपक्षेतस्माएवदत्वा भवंतःप्रेतायतिलोदकांज लिदानंकुर्वंत्वितिब्राह्मणान्वदेत् ॥ तेचपवित्रपाणयःसकुशतिलतुलसीपत्रयुततोयांजलिं प्रेतायकाश्यपगोत्रायअमुकशर्मणेवि ष्णुरूपिणेयंतिलोदकांजलिरितिदद्युः ॥ ततोब्राह्मणान्वाचयेत् अनेननारायणबलिकर्मणाभगवान्विष्णुरिमंप्रेतंशुद्धमपापमर्ह करोत्विति ॥ ततोविप्रास्तथास्त्वितिप्रत्यूचुः ॥ ततःकर्तास्नात्वाभुंजीतेति ॥ इतिसंस्काररत्नमालायांनारायणबलिः ॥ ॥४॥

॥ ९८ ॥ नागबलिः ॥

श्रीः ॥ गुरुशुक्रास्तादिरहितेकालेअयनद्वयेपौर्णमास्याममावास्यायांपंचम्यामाश्लेषायुक्तदिनेवाकुर्यात् ॥ तत्राधिकारार्थंचतुर्द शकृच्छ्रात्मकंप्रायश्चित्तंचरेत् ॥ यथा ॥ उक्तदिनात्पूर्वेद्युस्तदहरेववासमस्तसंपदितिपर्षदंप्रदक्षिणीकृत्यनत्वागोवृषनिष्क्रयंनि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्कत्रयंनिष्कद्वयंनिष्कंवापापतारतम्येनपर्षदग्रेनिधाय अनुमत्यादिकर्तृत्वेनिष्कमर्धंतदर्धंवाशक्त्यनुसारेणनिधाय ॥ अमुकश
र्मणामयाइहजन्मनिजन्मांतरेवाज्ञानादज्ञानाद्वाकृतेनसर्पवधेनजनितस्यदोषस्यपरिहारार्थंअनुग्रहंकृत्वाप्रायश्चित्तमुपदिशंतुभ
वंतःइतिप्रार्थयेत् ॥ तेचउपदिशामइतिप्रतिब्रूयुः॥ततःकर्तासर्वेधर्मविवेक्तारइतिश्लोकान्पठित्वामामनुगृह्णंतुभवंतइतिप्रणमेत्॥
तैश्चतुर्दशकृच्छ्रप्रायश्चित्तेनामुकप्रत्याम्नायद्वारापूर्वोत्तरांगसहितेनाचरितेनतवशुद्धिर्भविष्यतीत्युपदिष्टोदेशकालौसंकीर्त्यपर्षदु
पदिष्टंचतुर्दशकृच्छ्रप्रायश्चित्तंयथोक्तप्रत्याम्नायेनाचरिष्येइतिसंकल्पपूर्वंकंवपनादिविधिनातदाचरेत् ॥ वपनासंभवेद्विगुणः
कृच्छ्रप्रत्याम्नायः ॥ पूर्वोच्चरितएवंगुणविशिष्टायांपुण्यतिथौममसर्पवधदोषपरिहारार्थंब्राह्मणायलोहदंडदानंतन्मूल्यदानंवाक
रिष्यइतिसंकल्प्यब्राह्मणंसंपूज्यस्वस्त्यस्तु इमंलोहदंडंसर्पवधदोषहरंसदक्षिणंअमुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्र
ददे प्रतिगृह्यतां देवस्त्वासवितुः०॥ प्रतिगृह्णामीतिविप्रः ॥ ततोदशदानान्यपिकुर्यात् ॥ इत्थंपूर्वदिनेविधायउक्तदिनेसर्पसं
स्कारंकुर्यात् ॥ कर्ताप्रातःकृतनित्यक्रियःसंभृतसंभारःपुण्यतीर्थादिप्रशस्तदेशंगत्वासपत्नीकःपरिहितधौतवासाःप्राणानायम्यगु
र्वाज्ञांलब्ध्वामिश्रितैःप्रियंगुव्रीहिगोधूमतिलपिष्टैरेतदन्यतमपिष्टेनसर्पाकृतिंकृत्वाशूर्पेनिधायसर्पंप्रार्थयेत् ॥ एहिपूर्वमृतःसर्पअ
स्मिन्पिष्टेसमाविश ॥ संस्कारार्थमहंभक्त्याप्रार्थयामिसमाहितः ॥ ततः ॥ भुजंगेशायविद्महेसर्पजातायधीमहि॥ तन्नोनागःप्र
चोदयादितिभुजंगगायत्र्याऽऽवाहनादिषोडशोपचारैःपूजांकृत्वापुष्पांजलिंदत्वाप्रणिपत्य भोसर्पइमंबलिंगृहाणममाभ्युदयंकुरु
इतिपायसादिनाबलिंसमर्प्यहस्तौपादौप्रक्षाल्याचामेत् ॥ ततःशुद्धभूमौस्थित्वाप्राणानायम्यसंकल्पंकुर्यात् ॥ सभार्यस्यममेह

१ सर्वप्रायश्चित्तप्रयोगोग्रेत्यप्रकरणारंभेदशदान्यादीत्यपिपठ्यते।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जन्मनिजन्मांतरेवाज्ञानादज्ञानाद्वाकृतनसर्पवधनजनितस्यदोषस्यपरिहारार्थंसर्पसंस्कारकर्मकरिष्येइतिसंकल्प्य उल्लेखनादिसं
स्कृतेदेशेलौकिकाग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्रयमादाय श्रद्धएहीत्यादिप्राणायामांतंकृत्वासर्पसंस्कारहोमकर्मणियायक्ष्यमाणा
इत्यादिप्रसाधनीदेव्यंतंव्याहृत्यंतंवोक्त्वा प्रधानहोमेअग्नौअग्निंवायुंसूर्यंचैकैकयाज्याहुत्यायक्ष्ये सर्पमुखेसमस्तव्याहृतिभिःप्रजा
पतिमेकयाज्याहुत्यायक्ष्येइत्युक्त्वासमिधोन्नावाधायाग्नेराग्नेय्यांदिशिभूमिंप्रोक्ष्यतत्रचितिंकृत्वाग्निंचितिंचतूष्णींपरिषिच्यदक्षि
णाप्रागग्रैर्दर्भैःपरिस्तीर्यअग्नेरुत्तरतोदर्भानास्तीर्यतत्रपात्राण्यासादयेत् दर्वीं आज्यस्थालीं प्रोक्षणीपात्रं उपवेषं इध्मं बर्हिः संमार्ग
दर्भान् अवज्वलनदर्भान् आज्यमित्यासाद्यपवित्रेकृत्वाप्रोक्षणींसंस्कृत्यपात्राणिप्रोक्ष्यदर्वींसंमृज्याज्यꣳसंस्कृत्यपरिधीन्परिधाय
अदितइतिपरिषिच्यइध्मंमंत्रेणाभ्याधायआघारादिअन्वाधानोत्कीर्तनानुसारेणप्रसाधनीदेवीहोमांतंव्याहृतिहोमांतंवाकुर्यात् ॥
ततःसर्पंगृहीत्वाचित्यामारोप्यापःस्पृष्ट्वाश्रोत्रंचस्पृष्ट्वापउपस्पृश्यअग्निसमीपमेत्यप्रधानहोमंकुर्यात्॥ भूःस्वाहा अग्नयइदं ॥ भुवः
स्वाहा वायवइदं ॥ सुवःस्वाहा सूर्यायेदं॥इतिदर्व्याग्नौव्याहृतिभिराज्येनाहुतित्रयंजुहुयात् ॥ भूर्भुवःसुवःस्वाहाइतिचतुर्थींसर्प
मुखेजुहुयात् प्रजापतयइदं॥ ऋष्यादिस्मरणंपूर्ववत्व्यस्तानांव्याहृतीनांहोमेविनियोगः समस्तव्याहृतीनांसर्पमुखेआज्यहोमेवि
नियोगःइतिविनियोगवाक्ये ॥ आज्यशेषंदर्व्यैवसर्पदेहेनिषिंचेत् ॥ ततःसमस्तव्याहृतीनांप्रजापतिःप्रजापतिर्बृहतीअभ्युक्ष
णेवि० ॥ हस्तगृहीतैश्चमसजलैःसमस्तव्याहृतिभिःपाणिनाभ्युक्ष्य ॥ अग्नेरक्षणाइत्यस्यविश्वेदेवारक्षोहाग्निर्गायत्रीचितावग्नि
प्रक्षेपेवि० ॥ अग्नेरक्षाणोअंहसःप्रतिष्मदेवरीषतः ॥ तपिष्ठैरजरोदह ॥ इतिआयतनस्थमग्निंसर्वंचितौप्रक्षिपेत् ॥ ततोदर्वीप
रिधीन्पात्राणिबर्हिश्चाग्नौप्रहृत्यतमग्निंप्रदक्षिणीकृत्यसर्पनमस्कृत्यसर्पक्षमस्वेतिक्षमाप्यउपस्थानंकुर्यात्॥नमोअस्तुसर्पेभ्यइतिमं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्रत्रयस्याग्निःसर्पागायत्रीसर्पोपस्थानेवि० ॥ नमोऽस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येऽअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥ येदो रोचनेदिवोयेवासूर्यस्यरश्मिषु ॥ येषामप्सुषदःकृतंतेभ्यःसर्पे० ॥ याइषवोयातुधानानांयेवावनस्पतीरनु ॥ येवावटेषुशेरतेते भ्यःसर्पेभ्योनमः ॥ इतित्रिभिर्मंत्रैरुपतिष्ठते ॥ ज्ञानतोज्ञानतोवापिकृतःसर्पवधोमया ॥ पूर्वजन्मनिवासर्पतत्सर्वंत्वंक्षमस्वमे ॥ इतिप्रार्थयेत् ॥ ततःपौराणमंत्राः ॥ कर्कोटकनमस्तेस्तुशंखपालनमोस्तुते ॥ नागराजमहादेवदिव्यरूपायतेनमः ॥ अफणाः फणिनोयेचसविषानिर्विषाश्चये ॥ सर्वेवटेशयाःसर्पाःपुण्यमूर्तेनमोस्तुते ॥ त्वयेयंजगतीस्वामिन्स्वफणामंडलोपरि ॥ धृतैक देशेह्यणुवत्तस्मैतुभ्यंनमोनमः ॥ त्वयाभगवतेश्रीमद्वासुदेवायनिर्मितं ॥ स्वभोगेनैवपर्यंकमायतंभोगिनांवर ॥ इतिदह्यमानं सर्पमुपस्थाय ॥ त्राहित्राहिमहाभोगिन्सर्पोपद्रवदुःखतः ॥ संततिंदेहिमेपुण्यांनिर्दुष्टांदीर्घदेहिनीम् ॥ प्रपन्नंपाहिमांभक्त्याकृ पालोदीनवत्सल ॥ ज्ञानतोऽज्ञानतोवापिकृतःसर्पवधोमया ॥ जन्मांतरेतथैतस्मिन्मत्पूर्वैरथवाविभो ॥ तत्पापंनाशयक्षिप्रम पराधंक्षमस्वमे ॥ इतिप्रार्थ्यसचैलंस्नात्वाग्निसमीपमागत्यसमस्तव्याहृतीनांप्र० बृहती चित्यग्निप्रोक्षणेवि० ॥ भूर्भुवःसुवरिति क्षीराज्येनाग्निंसंप्रोक्ष्यसर्पेहुतेजलेनतमुपशमयित्वाजलेप्रवाहयेत् ॥ नात्रास्थिसंचयनं ॥ ततःस्नात्वाचम्यगृहंव्रजेत् ॥ कर्ता सभार्यस्त्रिरात्रमाशौचंब्रह्मचर्यंचकुर्यात् ॥ बौधायनमतेत्वेकाहमाशौचमितिग्रंथकृतः ॥ अत्रकर्तुरेवाशौचं ॥ अस्मिन्कर्मणिन प्राचीनावीतं ॥ ततश्चतुर्थेहनिएकाहपक्षेत्वपरेद्युःप्रातःसचैलंस्नातःकृतनित्यक्रियःसुस्नातानष्टौब्राह्मणानाहूय ॥ सर्पस्थानेक्ष णःक्रियतां ॥ ॐ तथा ॥ प्राप्नोतुभवान् ॥ प्राप्नवानि ॥ एवमग्रेपि अनंतस्थाने० शेषस्थाने० कपिलस्थाने० नागस्थाने० क्रालिकस्थाने० शंखपालस्थाने० भूधरस्थाने० इतिक्षणंदत्वाचतुरस्रमंडलोपरिगंधाक्षतयुतजलेनएतैरेवनामभिःपाद्यंतद्यात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Siddhanta eGangotri Gyaan and Vishvabharati Trust Foundation, Delhi and eGangotri

सर्पइदंपाद्यमित्यादि ॥ ततस्तेषुआचांतेषुस्रुक्स्रुवौप्रोक्ष्यपात्राणिप्रोक्षणीमुद्दंकस्थानुपवेश्य भूर्भुवःसुवःसर्पइदमासनंआस्यता
दिसर्वत्रदर्भद्वयरूपमेवासनंदत्वादर्भद्वयांतर्हितेष्वष्टसुपात्रेष्वपआसिच्यगायत्र्यायुगपदभिमंत्र्यतूष्णींयवान्गंधंपुष्पंच
प्रक्षिप्यस्वाहार्घ्याइतिनिवेद्यसर्पइदंतेर्घ्यंइतिअर्घ्योदकंदेवतीर्थेनदद्यात् ॥ एवंअनंतेदमर्घ्यमित्यादि॥सर्पएषतेगंधःअनंतएषतेगं
धइत्यादि ॥ सर्पइमानिपुष्पाणिइत्यादि ॥ सर्पएषधूपइत्यादि॥ सर्पएषदीपइत्यादि ॥ सर्पइदंवस्त्रमित्यादि ॥ ततःपात्रेषुअन्ना
दिपरिविष्यपरिवेष्यवागायत्र्याप्रोक्ष्यकुशयवजलंगृहीत्वासर्पायइदमन्नंपरिविष्टंपरिवेक्ष्यमाणंचआतृप्तेर्दास्यमानंस्वाहासंपद्यतां
नमम ॥ एवमनंतादिभ्यः ॥ ब्रह्मार्पणं० ॥ येषामन्नमुद्दिष्टंतेषामक्षय्यातृप्तिरस्तु ॥ अनेनब्राह्मणभोजनेनसर्पादयःप्रीयंतांन
मम ॥ इतिसकुशयवजलमुत्सृजेत् ॥ ततोब्राह्मणाभुंजीरन् ॥ नात्रबलिदाननिषेधः ॥ ततःकर्ताआचांतेषुविप्रेषुप्रागग्रान्दर्भा
न्संस्तीर्यतेषुदुग्धमिश्रौदनेनसर्पायइमंबलिंसमर्पयामि अनंतायइमंबलिमित्यादिपिंडरूपान्बलीन्दद्यात् ॥ ततोबलीन्गंधपुष्पव
स्त्रादिभिःपूजयेत् ॥ ततोब्राह्मणेभ्यःतांबूलसुवर्णादिदक्षिणादानं ॥ ततस्तान्क्षमाप्यप्रणम्यानुव्रज्यअप्रतीक्षमेत्यसुवर्णनाग
दानंकुर्यात् ॥आचार्यसंपूज्यमहीद्यौरित्यादिविधिनास्थापितकलशोपरितनपूर्णपात्रेस्वर्णनागमावाहनादिषोडशोपचारैःसंपूज्य
प्रार्थयेत् ॥ ब्रह्मलोकेचयेसर्पाःशेषनागपुरोगमाः ॥ नमोस्तुतेभ्यःसुप्रीताःप्रसन्नाःसंतुमेसदा ॥ विष्णुलोकेचयेसर्पावासुकिप्र
मुखाश्चये ॥ नमोस्तुतेभ्यः० ॥ रुद्रलोकेचयेसर्पास्तक्षकप्रमुखास्तथा ॥ नमोस्तुतेभ्यः० ॥ खांडवस्यतथादाहेस्वर्गयेचसमा
श्रिताः ॥ नमोस्तुतेभ्यः० ॥ सर्पसत्रेचयेसर्पाआस्तिकेनाभिरक्षिताः ॥नमोस्तुतेभ्यः०॥ मलयेचैवयेसर्पाःकर्कोटप्रमुखाश्चये॥
नमोस्तुतेभ्यः० ॥ धर्मलोकेचयेसर्पावैतरण्यांसमाश्रिताः ॥ नमोस्तुतेभ्यः० ॥ समुद्रेचैवयेसर्पाःपातालेचैवसंस्थिताः ॥ नमो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तुतेभ्यः० ॥ येसर्पाःपर्वतीयेषुदरीसंधिषुसंस्थिताः ॥ नमोस्तुतेभ्यः० ॥ ग्रामेवायदिवारण्येयेसर्पाःप्रचरंतिहि ॥ नमोस्तुतेभ्यः० ॥ पृथिव्यांचैवयेसर्पायेसर्पाबिलसंस्थिताः ॥ नमोस्तुतेभ्यः० ॥ रसातलेचयेसर्पाअनंताद्यामहाबलाः ॥ नमोस्तु० ॥ एवंस्तुत्वादेशकालौसंकीर्त्यकृतस्यसर्पसंस्कारकर्मणःसांगतासिद्ध्यर्थंइमंसुवर्णनागंसकलशंसवस्त्रंसदक्षिणंतुभ्यमहंसंप्रददेनमम इतिदत्वा ॥ अनेनस्वर्णनागदानेनअनंतादयोनागाःप्रीयंतां ॥ ततआचार्यायगोदानंदेयं॥ गांआचार्यंचसंपूज्यइमांसवत्सांकृष्णां गांसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठांकांस्यदोहांसवस्त्रांसदक्षिणांवृषभयुतांतुभ्यमहंसंप्रददेइत्याचार्यायदद्यात् ॥ अनेनानंतादयः प्रीयंतामितिवदेत् ॥ गोरभावेमूल्यंदेयं ॥ ततआचार्यःशुद्धोदकेनसकुटुंबंयजमानमभिषिंचेत् ॥ ततःकर्तामयायत्कृतंकर्मतत्सर्वमच्छिद्रमस्त्वितिभवंतोब्रुवंतुइतिप्रार्थ्यअच्छिद्रमस्त्वितितैःप्रत्युक्तेकृतस्यकर्मणःसांगतासिद्धयेब्राह्मणभोजनंभूयसीदानंच विधाययस्यस्मृत्या०प्रमादादितिविष्णुंसंस्मृत्यअनेनसर्पसंस्काराख्येनकर्मणासर्पाधिनाथोनंतःप्रीयतामितिवदेत् ॥ ततःसुहृद्भुतोभोजनंकुर्यात् ॥ जीवत्पितृकस्यनारायणबलिनागबलीनभवतः ॥ इतिसंस्काररत्नमालायांनागबलिप्रयोगः ॥ ॥ ७ ॥

॥ ९९ ॥ दत्तपुत्रविधानम् ॥

श्रीः ॥ पूर्वेद्युःकृतोपवासःवाससीकुंडलेअंगुलीयकंछत्रंउष्णीषंआचार्यंधर्मसंयुक्तंवेदपारगंकुशमयंबर्हिःपालाशमिध्मंअन्यांहोमसामग्रींचसंपाद्यशिष्टान्इष्टान्ज्ञातीन्बंधूंश्चाहूयतान्संपूज्यतत्समक्षंराज्ञिसभासत्सुचनिवेद्यतैरनुज्ञातःपवित्रपाणिराचम्यप्राणानायम्यदेशकालौसंकीर्त्यममाप्रजत्वप्रयुक्तपैतृकर्णापाकरणपुंनामनरकत्राणसिद्धिद्वाराश्रीपरमे० पुत्रप्रतिग्रहंकरिष्यइतिसंकल्प्यतदंगत्वेनगणपतिंसंपूज्यबंधुवर्गेभ्योब्राह्मणेभ्यश्चान्नदानंकृत्वापुण्याहवाचनमातृकापूजननांदीश्राद्धाचार्यवरणमधुपर्का

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्हणानिकुर्यात् ॥ पुत्रप्रतिग्रहांगभूतहोमार्थमाचार्यत्वामहंवृणइतिआचार्यवरणवाक्येविशेषः ॥ स्त्रीकर्तृकप्रतिग्रहेतुमद्भर्तुर्मम
चेतिसंकल्पवाक्येविशेषः ॥ गणपतिपूजनाद्याचार्यवरणांतमन्येनकारयेत् ॥ ततआचार्यआचम्यप्राणानायम्यउल्लेखनादिसं
स्कारंविधायतत्रबलवर्धननामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यध्यात्वासमित्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वापुत्रप्र
तिग्रहांगभूतहोमकर्मणियायक्ष्यमाणादेवताइत्यादिप्रसाधनीदेव्यंतंव्याहृत्यंतंवोक्त्वावैशेषिकप्रधानहोमेअग्निंचर्वाहुत्यायक्ष्येअ
ग्निंवायुंसूर्यप्रजापतिंचैकैकयाज्याहुत्यायक्ष्येअग्नि९स्विष्टकृतंचरुशेषाहुत्यायक्ष्येइत्यादि अंगहोमेवरुणंद्वाभ्यामित्यादिवा॥पात्रा
सादनेस्रुवंदर्वीआज्यस्थालींप्रणीताप्रणयनंप्रोक्षणीपात्रंचरुस्थालींमेक्षणंशूर्पंकृष्णाजिनंउलूखलंमुसलंउपवेशंवासोद्वयंकुंडलेअं
गुलीयकेछत्रंउष्णीषंसंमार्गदर्भानवज्वलनदर्भान्पर्णमयमेवेध्मंकुशमयमेवबर्हिराज्यंचसहैवासादयेत् ॥ ततःपवित्रकरणादिप्र
णीताप्रणयनांतंकृत्वाविरमति ॥ ततःप्रतिग्रहीताब्राह्मणैर्बंधुवर्गैश्चसहदातुःसमक्षंगत्वातत्समीपेतिष्ठन्पुत्रंमेदेहीतिभिक्षेत् ॥
ततोदाताददामीत्युक्त्वाचम्यप्राणानायम्यदेशकालौसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थंपुत्रदानमहंकरिष्येइतिसंकल्प्यगणपतिंसंपूज्य
यथाविभवंवस्त्रगंधादिभिःप्रतिग्रहीतारंसंपूज्यइमंपुत्रंतवपैतृकर्णापाकरणपुंनामनरकत्राणसिद्ध्यर्थंआत्मनश्चश्रीपरमे०तुभ्यमहं
संप्रददेनममप्रतिगृह्णातुपुत्रंभवान्इत्यंतेप्रतिग्रहीतृहस्तेसाक्षतंसतुलसीपत्रंजलंक्षिपेत्त्रिरितिकेचित् ॥ स्त्रियैदानेतुइमंपुत्रंत्व
द्भर्तुस्तवचेतिदानवाक्येदात्रोहःकार्यः ॥ ततःप्रतिग्रहीतादेवस्यत्वासवितुः० हस्ताभ्यांधर्मायत्वागृह्णामिसंतत्यैत्वागृह्णामिइति
हस्तद्वयेनप्रतिगृह्यस्वांकउपवेश्यमूर्ध्न्याजिघ्रेत् ॥ ततः॥ युवंवस्त्राणिपीवसा० सचेथेइत्यासादितयोर्वाससोर्मध्येएकंपरिधाप्यै
तेनैवमंत्रेणद्वितीयमुत्तरीयंकारयित्वातूष्णीमुष्णीषंबध्वाकुंकुमादिनातिलकंकृत्वाकुंडलाभ्यामंगुलीयकेनचालंकृत्यसतिविभवे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्यैरपिभूषयित्वाछत्रेणाच्छादितंबालंनृत्यगीतवाद्यैःस्वस्तिनइंद्रोवृद्ध०अष्टौदेवावसवःइतिद्वाभ्यांस्वगृहमानीयहस्तपादान्प्रक्षाल्याचम्याग्नेःपश्चान्मातुरुत्संगउपवेशयेत् ॥ ततआचार्यःशूर्पेचतुरोमुष्टीन्निरुप्येत्यादिचरुकल्पेनचरुंश्रपयित्वाभिघार्योद्वास्यपरिषेकादिअन्वाधानोत्कीर्तनानुसारेणप्रसाधनीदेवीहोमांतंव्याहृतिहोमांतंवाकृत्वाप्रधानहोमंकुर्यात्॥ दर्व्यास्रुवेणोपस्तीर्यचरुमवदानविधिनामेक्षणेनैवद्विरवदायावत्तमभिघार्यशिष्टंहविरग्रत्यज्य यस्त्वाहृदाकीरिणा०मह्यांइतिपुरोनुवाक्यामनूच्ययस्मैत्वꣳसुकृतेजातवेद०नशतेस्वस्तिस्वाहाइतियाज्ययाजुहोति ॥ अग्नयइदं॥अथवाग्निद्वयसंसर्गोक्तेनपुरोनुवाक्यायाज्याधर्मेणहोमः॥ ततआज्येनव्यस्तसमस्तव्याहृतिभिश्चतस्रआज्याहुतीर्जुहुयात् ॥ ततःस्विष्टकृदादिअंगहोमादिवाहोमशेषंसमाप्याचार्यायधेनुंदद्यात् ॥ तेएववाससीकुंडलेअंगुलीयकंच धेनुदानंनवा॥ ततोदशत्रीन्वाब्राह्मणान्भोजयेत् ॥ ततोग्निंसंपूज्यकर्मणःसंपूर्णतांवाचयित्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ एवंदत्तपुत्र्याअपिस्वीकारउक्तविधिनाकार्यः ॥ दानपरिग्रहविधिषूद्देश्यगतपुंस्त्वाविवक्षणात्इतिहासपुराणेषुकुंत्यादीनांदत्तकत्वोक्तेश्च ॥ इतिपुत्रप्रतिग्रहविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ १०० ॥ पुंसवनप्रयोगः ॥

श्रीः ॥ तृतीयेमासिशुक्लपक्षेपुनर्वसुपुष्याभिजिद्धस्तप्रोष्ठपदानूराधाश्विनीमूलश्रवणरेवतीरोहिणीमृगसंज्ञकान्यतमेपुंनक्षत्रेचंद्रानुकूल्येपुंसवनंकार्यं ॥ कर्ताकृतनित्यक्रियःप्राङ्मुखउपविश्यदक्षिणतोभार्यांचोपवेश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यांभार्यायांविद्यमानगर्भस्यपुंस्त्वप्रतिपादनद्वारावीजगर्भसमुद्भवैनोनिबर्हणद्वाराक्षेत्रसंस्कारद्वाराचश्रीपरमेश्वरप्रीत्यर्थंपुंसवनाख्यंकर्मकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यपूर्वोक्तरीत्यातानि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कुर्यात् ॥ ततःपुंसवनांगमुद्धननादिकरिष्येइतिसंकल्प्य ॥ शकरास्थ्यादिरहितहस्तमात्रायतंपंचप्रस्थमितसिकतादिनिर्मितं चतुरंगुलोच्छ्रायंसमचतुरस्रंप्रागुदग्वाप्रवणंसमंवास्थंडिलंहस्तमात्रंबाहुमात्रंवाविधायाग्निमादायतूष्णीमुद्धत्यसमंत्रंवाचारात्॥ ॐ उद्धन्यमानमस्याअमेध्यं ॥ अपपाप्मानंयजमानस्यहंतु ॥ शिवानःसंतुप्रदिशश्चतस्रः ॥ शंनोमातापृथिवीतोकसाता ॥ प्रागादिक्रमेणोद्धत्य ॥ ततस्तिस्रःप्राचीस्तिस्रउदीचीरेखाःकृत्वा ॥ (रेखासाधनमुत्तरतःस्थंडिलेनिधाय) ॥ शंनोदेवीरभिष्टय आपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ इतिकृत्स्नमग्न्यायतनंन्युब्जेनपाणिनाऽऽचारादवोक्ष्य(शकलमाग्नेय्यांनिरस्यापउपस्पृश्य) ॥ ततःप्रागारभ्येंद्राद्यष्टौलोकपालानावाहयति ॥ इंद्रायनमःअग्नये०यमाय०निर्ऋतये० वरुणाय०वायवे०सोमाय० ईशानायनमःइति ॥ मध्ये ॥ ॐ वैश्वानरस्यरूपं ॥ पृथिव्यांपरिस्रसा ॥ स्योनमाविशंतुनः ॥ ॐ भूर्भुवःसुवरों ३ पवमानामानमग्निंप्रतिष्ठापयामीतिप्रतिष्ठाप्यप्रोक्षितेंधनानिक्षिप्यवेणुधमन्याप्रबोध्यध्यायेत् ॥ (यत्राग्निमुपसमाधायेतिसूत्रकृदाह तत्रउद्धननाद्यग्निप्रतिष्ठांतोविधिरितिवृत्तिकृत् ॥ अन्यत्रायतनेपरिसमूहनपरिस्तरणादिकृत्वाकर्मकार्यं ॥) प्रज्वाल्यसमित्र यमादायश्रद्धए३हिसत्येनत्वाह्वयामि ॥ इतित्रिरुच्चार्य ॥ याःपुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्चयाः ॥ ताभीरश्मिपवित्राभिःश्रद्धांयज्ञमारभे ॥ आकूत्यैत्वाकामायत्वासमृधेत्वापुरोदधेअमृतत्वायजीवसे ॥ आकूतिमस्यावसेकाममस्यसमृध्यै ॥ इंद्रस्ययुंजतेधियः ॥ आकूतिंदेवींमनसःपुरोदधेयज्ञस्यमातासुहवामेअस्तु ॥ यदिच्छामिमनसासकामोविदेयमेनद्धृदयेनिविष्टं ॥ इति हृदयमपश्चसंस्पृश्य ॥ प्राणानायम्य ॥ पुंसवनहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि ॥ जातवेदसमग्निमिध्मेन ॥ आघारहोमे ॥ प्रजापतिंमनुमिंद्रंचाज्येन ॥ आज्यभागहोमे ॥ अग्निंसोमंचाज्येन ॥ सामान्यप्रधानहोमे ॥ अग्निंजा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तवेदसꣳसꣳराधनींसꣳराधनींदेवींप्रसाधनींदेवींव्याहृतीनामग्निंवायुंसूर्यप्रजापतिंचाज्येन ॥ प्रधानहोमे ॥ धातारंचतुराज्येन ॥ अंगहोमे ॥ वरुणंद्विःअग्नीवरुणौद्विःअयासमग्निंप्रजापतिंचाज्येन ॥ जयहोमे ॥ चित्तं चित्तिं आकूतं आकूतिं विज्ञातं विज्ञानं मनः शक्करीः दर्शं पूर्णमासं बृहत् रथंतरं प्रजापतिं चाज्येन ॥ अभ्यातानहोमे ॥ अग्निंभूतानामधिपतिं इंद्रंज्येष्ठानामधिपतिं यमंपृथिव्याअधिपतिं वायुमंतरिक्षस्याधिपतिं सूर्यंदिवोधिपतिं चंद्रमसंनक्षत्राणामधिपतिं बृहस्पतिंब्रह्मणोधिपतिं मित्रंसत्या नामधिपतिं वरुणमपामधिपतिं समुद्रंस्रोत्यानामधिपतिं अन्नꣳसाम्राज्यानामधिपति सोममोषधीनामधिपतिं सवितारंप्रस वानामधिपतिं रुद्रंपशूनामधिपतिं ॥ उदकस्पर्शः ॥ त्वष्टारंरूपाणामधिपतिं विष्णुंपर्वतानामधिपतिं मरुतोगणानामधि पतीन् ॥ प्राचीनावीती ॥ पितॄन्पितामहान्परानवरांश्चप्रत्येकमाज्येन ॥ यज्ञोपवीत्यपउपस्पृश्य ॥ राष्ट्रभृद्धोमे ॥ अ ग्निंगंधर्वंओषधीरप्सरसः सूर्यंगंधर्वंमरीचीरप्सरसः चंद्रमसंगंधर्वंनक्षत्राण्यप्सरसः यज्ञंगंधर्वंदक्षिणाअप्सरसः मनोगंधर्वं ऋक्सामान्यप्सरसः वातंगंधर्वंअपोप्सरसः भुवनस्यपतिं मृत्युंगंधर्वंविश्वमप्सरसः पर्जन्यंगंधर्वंविद्युतोप्सरसः अमृड यंमृत्युंगंधर्वंप्रजाअप्सरसः कामंगंधर्वंआधीरप्सरसः भुवनस्यपतिं प्रत्येकमाज्येन ॥ स्विष्टकृद्धोमे ॥ अग्निꣳस्विष्टकृतं हुतशेषेण ॥ प्रायश्चित्तहोमे ॥ अग्निंत्रिः अग्नीवरुणौद्विः इंद्रंद्विः त्र्यंबकं विष्णुं अग्निं वायुं सूर्यं बृहस्पतिं वरुणं इंद्रं विश्वान्देवान् प्रत्येकमाज्येन ॥ सꣳस्रावहोमे ॥ वसून्रुद्रानादित्यान्त्सꣳस्रावाज्येन ॥ एतादेवताःसद्योयक्ष्ये ॥ ॐ भूर्भुवः सुवःस्वाहा ॥ इत्युक्त्वान्वाधानसमिधोऽग्नावाधाय ॥ प्रजापतयइदंनममेतित्यागः ॥ एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःस उगर्भेअंतः ॥ सविजायमानःसजनिष्यमाणःप्रत्यङ्मुखास्तिष्ठतिविश्वतोमुखः ॥ इत्यग्निमाचारात्संमुखीकृत्य ॥ यथाहतद्वसवो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गौर्यंचित्पदिषिताममुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यꣳहःप्रातीयग्नेप्रतरानआयुः ॥ इतिहस्तेनईशानीमारभ्यसर्वतःपरि समुह्य ॥ ततःप्रागादिक्रमेणसर्वतःप्रागग्रैर्दर्भैरग्निंपरिस्तीर्य ॥ अथवाप्राक्पश्चादुदगग्रान्दक्षिणतउत्तरतश्चप्रागग्रान् ॥ दक्षिणानुत्तरान्करोत्युत्तरानधरांश्चकृत्वाप्रदक्षिणमग्निंपरिस्तीर्यदक्षिणतोब्रह्मायतनेकुशानास्तीर्य ॥ सकुशंदक्षिणहस्तंहृदिकृत्वात्मीयमग्निमात्मनिध्यायति ॥ ॐमयिगृह्णाम्यग्रेअग्निꣳरायस्पोषायसुप्रजास्त्वायसुवीर्याय ॥ मयिप्रजांमयिवर्चोदधाम्यरिष्टाःस्यामतनुवासुवीराः ॥ योनोअग्निःपितरोहृत्स्वंतरमर्त्योमर्त्याꣳआविवेश ॥ तमात्मन्परिगृह्णीमहेवयंमासोअस्माꣳअवहायपरागात्इति ॥ ततउत्तरेणाग्निंदर्भानास्तीर्यपात्रासादनंकार्यं ॥ अत्रस्थालीपाकसमावर्तनाष्टकादिदैवमानुषपित्र्यसर्वस्मार्तकर्म (सकृदेव)सहैवपात्राण्युदक्संस्थान्यासादयति ॥ येतुद्वंद्वंसहएकैकमितिदैवमानुषपित्र्यभेदेनविदधिरेतच्छ्रौतविषयमेव ॥ स्मार्तेतुसकृदेवसर्वाणीति ॥ एवकारसर्वशब्दयोर्विधानात्सहैव सर्वाणियथासंभवंवाउदक्संस्थान्यासादयति ॥ दर्वीमाज्यस्थालींप्रणीतांप्रोक्षणीमिध्मंबर्हिरुपवेषꣳसंमार्गदर्भानवज्वलनदर्भानाज्यं इतिसाधारणानि प्रादेशमात्राःसमिधः यवसर्षपगोदधिद्रप्सवटांकुररसादीनिप्रकृतोपयोगीनिचासाद्य ॥ ईशान्यांप्रवरगोत्रनामोपेतंयुजर्वेदस्यतैत्तिरीयशाखांतर्गतहिरण्यकेशीशाखाध्यायिनममुकशर्माणममुककर्मणिब्रह्माणंत्वामहंवृणइतिवृणुयात् ॥ ब्रह्मावृतोस्मीत्युक्त्वाचम्योत्तरेणपात्राणिअपरेणाग्निंपूर्वेणाचार्यंदक्षिणातिक्रम्यब्रह्मसदनात्तृणंनिरस्यापउपस्पृश्याग्निमभिमुखउपविशति॥ब्रह्माभावेकूर्चंयज्ञोपवीतंदंडंकमंडलुंवास्थापयेत् ॥ द्वौदर्भौसमौसाग्रौअंतर्गर्भरहितौप्रादेशपरिमितौपवित्रेकृत्वानखादन्येनछित्त्वाप्रणीतापात्रंत्रिःप्रक्षाल्यप्रागग्रपवित्रांतर्हितमद्भिःपूरयित्वापवित्रमुदगग्रंकरयोरंगुष्ठोपकनिष्ठिकाभ्यांधृत्वात्रिरुत्पूयदक्षिणोत्तराभ्यांपाणिभ्यांसमंप्राणैर्धृत्वाअविषिंचन्नग्नेर्दक्षिण

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तोहृत्वाउत्तरेणाग्निंदर्भेषुनिधायदर्भैरपिधाय ॥ पवित्रेप्रोक्षणीपात्रेउदगग्रेन्यस्याद्भिरापूर्यपूर्ववत्रिरुत्पूयपात्राण्युत्तानानिकृत्वा इध्मंविस्रस्यप्राक्संस्थंत्रिःसर्वाभिःप्रोक्षति ॥ तेपवित्रेआज्यपात्रेनिदध्यात् ॥ ततोदर्वीमग्नौनिष्टप्यसंमार्गकुशानादायदर्वीप्राची मग्रैरंतरतोभ्याकारंप्रतीचींमध्यैर्बाह्यतोमूलैर्दंडंसंमृज्यपुनर्निष्टप्यापरेणाग्निंबर्हिषिनिधायसंमार्गकुशानभ्युक्ष्याग्नावाधायाज्यंवि लाप्यपवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरुप्योपवेषेणाग्न्यायतनादुत्तरतोंगारान्कृत्वातेष्वाज्यस्थालीमधिश्रित्यदर्भैराज्यम वद्योत्यसजलंदर्भाग्रद्वयमाज्येन्यस्यप्रज्वलितैर्दर्भैरवाग्ज्वालैस्त्रिःपर्यग्निकृत्वाउल्मुकंनिरस्यापउपस्पृश्योत्तरतआज्यमुद्वास्यांगा रानायतनेप्रत्यूह्यापरेणाग्निंबर्हिरास्तीर्यतत्राज्यंनिधायउदगग्राभ्यांपवित्राभ्यांपुनराहारमाज्यंत्रिरुत्पूय ॥ पश्चादारभ्यप्राङ्नी त्वोत्पूयनिमज्यपश्चादानयतीत्येवंत्रिःकृत्वापवित्रेप्रोक्ष्याग्नावाधायपरिधिमपरेणाग्निंचतुस्त्रिंशदंगुलमुदगग्रंनिधाय ॥ दक्षिणेना ग्निंषट्त्रिंशदंगुलंप्रागग्रंमध्यमेनसंस्पृष्टं॥ उत्तरेणाग्निंद्वात्रिंशदंगुलंप्रागग्रंपरिस्तरणोपरिपरिस्तरणवत्परिदधाति॥ इतिपरिधिपरि धानांतंकृत्वा॥ यजमानोभार्यान्वारब्धःसन्परिधिदेशाद्बहिःपरिषिंचति॥ अदि॒तेनु॑मन्यस्व॥ दक्षिणतःप्राक्संस्थं ॥ अनु॑म॒तेनु॑म न्यस्व ॥ पश्चादुदक्संस्थं ॥ सर॑स्व॒तेनु॑मन्यस्व ॥ उत्तरतःप्राक्संस्थं ॥ देव॑सवि॒तः प्रसु॑वेतीशान्यादीशान्यंतंसर्वतश्चप्रदक्षिणं परिषिंचति ॥ ततोदर्व्याज्यमादायेध्ममभिघार्य ॥ ॐ अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेंधिवर्धयचास्मान्प्रजयापशु भिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहा ॥ इतिहस्तेनेध्मंजुहोति ॥ जातवेदसेग्नयइदंनमम ॥ ततोदर्व्याज्यस्थालीस्थमाज्यमादा योत्तरपरिधिसंधिमभिलक्ष्यप्राग्दक्षिणापवर्गंसंततमग्न्यायतनेजुहोति ॥ प्रजापतयेमनवेस्वाहेतिमनसामंत्रमुच्चारयन् ॥ प्रजा पतयेमनवइदं० ॥ दक्षिणंपरिधिसंधिमभिलक्ष्यप्रागुदगपवर्गंसंततमग्न्यायतनेइंद्रायस्वाहेतिपठन्जुहोति ॥ इंद्रायेदं० ॥ इत्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अग्नयेस्वाहा ॥ अग्नयइदं० ॥ दक्षिणार्धपूर्वार्धे ॥ सोमायस्वाहा ॥ सोमायेदं० ॥ त्याज्यभागौहुत्वा ॥ ततआज्यभागयोर्मध्येवक्ष्यमाणाआहुतीर्जुहोति ॥ अथसामान्यप्रधानहोमः ॥ युक्तोवहजातवेदःपुरस्ता दग्नेविद्धिकर्मक्रियमाणंयथेदं ॥ त्वंभिषक्भेषजस्यासिकर्तात्वयागाश्वान्पुरुषान्त्सनेमस्वाहा ॥ जातवेदसेग्नयइदं० ॥ यातिर श्वीनिपद्यसेहंविधरणीइति ॥ तांत्वाघृतस्यधारयाग्नौसꣳराधनीयजेस्वाहा ॥ सꣳराधन्याइदं० ॥ सꣳराधन्यैदेव्यैस्वाहा ॥ सꣳराधन्यैदेव्याइदं० ॥ प्रसाधन्यैदेव्यैस्वाहा ॥ प्रसाधन्यैदेव्याइदं० ॥ भूःस्वाहा ॥ अग्नयइदं० ॥ भुवःस्वाहा ॥ वायव इदं ॥ सुवःस्वाहा ॥ सूर्यायेदं० ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ इतिसामान्यप्रधानहोमः ॥ अथप्रधानहोमः ॥ ॐ धातादददातुनोरयिमीशानोजगतस्पतिः ॥ सनःपूर्णेनवावनत्स्वाहा ॥ धात्रइदं० ॥ धाताप्रजायाउतरायईशेधातेदंविश्वं भुवनंजजान ॥ धातापुत्रंयजमानायदातातस्माउहव्यंघृतवद्विधेमस्वाहा ॥ धात्रइदं० ॥ धातादददातुनोरयिंप्राचींजीवातुम क्षितां ॥ वयंदेवस्यधीमहिसुमतिꣳसत्यराधसःस्वाहा ॥ धात्रइदं० ॥ धातादददातुदाशुषेवसूनिप्रजाकामायमीढुषेदुरोणे ॥ तस्मै देवाअमृताःसंव्ययंतांविश्वेदेवासोअदितिःसजोषाःस्वाहा ॥ धात्रइदं० ॥ इतिप्रधानाहुतिचतुष्टयंहुत्वा ॥ अथांगहोमः ॥ ॐ इमं मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचकेस्वाहा ॥ वरुणायेदं० ॥ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीःस्वाहा ॥ वरुणायेदं० ॥ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ अग्नीवरुणाभ्यामिदं० ॥ सत्त्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधिस्वाहा ॥ अग्नीवरुणाभ्यामिदं० ॥ त्वमग्नेअयास्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यासन्मनसाहितः ॥ अयासन्हव्यमूहिषेयानोधेहिभेषजꣳस्वाहा ॥ अयसेग्नयइदं० ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानि परिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणाꣳस्वाहा ॥ प्रजापतयइदं० ॥ इतिषडंगहोमः ॥ अथजयाद्युपहोमः ॥ चित्तंचस्वाहा ॥ चित्तायेदं० ॥ चित्तिश्चस्वाहा ॥ चित्तयइदं० ॥ आकूतंचस्वाहा ॥ आकूतायेदं० ॥ आकूतिश्चस्वाहा ॥ आकूत्याइदं० ॥ विज्ञातंचस्वाहा ॥ विज्ञातायेदं० ॥ विज्ञानंचस्वाहा ॥ विज्ञानायेदं० ॥ मनश्चस्वाहा ॥ मनसइदं० ॥ शक्वरीश्चस्वाहा ॥ शक्वरीभ्यइदं० ॥ दर्शश्चस्वाहा ॥ दर्शायेदं० ॥ पूर्णमासश्चस्वाहा ॥ पूर्णमासायेदं० ॥ बृहच्चस्वाहा ॥ बृहतइदं० ॥ रथंतरंचस्वाहा ॥ रथंतरायेदं० ॥ प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाज्येषुतस्मैविशःसमनमंतसर्वाःसउग्रःसहिहव्योबभूवस्वाहा ॥ प्रजापतयइदं० ॥ इतिजयहोमः ॥ अथाभ्यातानहोमः ॥ ॐ अग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याꣳस्वाहा ॥ अग्नयेभूतानामधिपतयइदं० ॥ इंद्रोज्येष्ठानामधिपतिःसमावत्वस्मिन्ब्र०त्याꣳस्वाहा ॥ इंद्रायज्येष्ठानामधिपतयइदं० ॥ यमःपृथिव्याअधिपतिःसमावत्वस्मिन्ब्र०त्याꣳस्वाहा ॥ यमायपृथिव्याअधिपतयइदं० ॥ वायुरंतरिक्षस्याधिपतिःसमावत्वस्मिन्ब्र०त्याꣳस्वाहा ॥ वायवेअंतरिक्षस्याधिपतयइदं० ॥ सूर्योदिवोधिपतिःसमावत्वस्मिन्ब्र०त्याꣳस्वाहा ॥ सूर्यायदिवोधिपतयइदं० ॥ चंद्रमानक्षत्राणामधिपतिःसमावत्वस्मिन्०त्याꣳस्वाहा ॥ चंद्रमसेनक्षत्राणामधिपतयइदं० ॥ बृहस्पतिर्ब्रह्मणोधिपतिःसमावत्वस्मिन्०स्वाहा ॥ बृहस्पतयेब्रह्मणोधिपतयइदं० ॥ मित्रःसत्यानामधिपतिःस०हा ॥ मित्रायसत्यानामधिपतयइदं० ॥ वरुणोपामधिपतिःसमाव०हा ॥ वरुणायाधिपतयइदं० ॥ समुद्रःस्रोत्यानामधिपतिःस०हा ॥ समुद्रायस्रोत्यानामधिपतयइदं० ॥ अन्नꣳसाम्राज्यानामधिपतितन्माव०

CC-0. In Public Domain. Funding by MoE-IKS

Digitized By Sarayu Trust Foundation, Delhi and eGangotri

हा ॥ अन्नायसाम्राज्यानामधिपतयइदं० ॥ सोमओषधीनामधिपतिःसमाव०हा ॥ सोमायओषधीनामधिपतयइदं० ॥ सवि
ताप्रसवानामधिपतिःसमाव०हा ॥ सवित्रेप्रसवानामधिपतयइदं० ॥ रुद्रःपशूनामधिपतिःसमावत्व०हा ॥ रुद्रायपशूनामधि
पतयइदं॥ उदकस्पर्शः॥ त्वष्टारूपाणामधिपतिःस०हा॥ त्वष्ट्रेरूपाणामधिपतयइदं०॥ विष्णुःपर्वतानामधिपतिःसमावत्व०हा॥
विष्णवेपर्वतानामधिपतयइदं०॥ मरुतोगणानामधिपतयस्तेमावंत्व०हा॥ मरुद्भ्योगणानामधिपतिभ्यइदं०॥ प्राचीनावीतीजुहो
ति ॥ पितरःपितामहाःपरेवरेततास्तामहाइहमावत ॥ अस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहू
त्याꣳस्वाहा ॥ (इतिजुहोतिस्वाहाकारवर्जमुपतिष्ठतेवा ॥ उपस्थानपक्षेनान्वाधानेउत्कीर्तनं) पितृभ्यःपितामहेभ्यःपरेभ्यो
वरेभ्यइदं० ॥ उपवीत्यपउपस्पृश्य ॥ अथराष्ट्रभृतः॥त्रिविधोराष्ट्रभृतांमंत्राणांविभागः॥ ऋतषाडितियथापाठमारभ्यतस्मैस्वा
हेत्यंतापूर्वाहुतिः ॥ ताभ्यःस्वाहेत्येतावत्येवापरा ॥ इत्येकःपक्षः ॥ ऋतषाडृतधामाग्निर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥
तस्यौषधयोप्सरसऊर्जोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा॥ इत्येवमपरः॥ ऋतषाडितियथापाठंपठित्वातस्मैस्वाहेत्युक्त्वापूर्वा
हुतिः ॥ पुनर्यथापाठंपठित्वाताभ्यःस्वाहेत्युक्त्वाउत्तराहुतिः ॥ इत्येवंतृतीयः ॥ पक्षत्रयेपिदशभिःपर्यायैर्विंशतिर्मंत्राः ॥ सप्त
मोत्तमावेकैकाहुतिकाविंशतिर्मंत्राः ॥ ऋतषाडृतधामाग्निर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ ऋतसहेऋतधाम्नेअग्न
येगंधर्वायेदं० ॥ तस्यौषधयोप्सरसऊर्जोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ ओषधीभ्योप्सरोभ्यऊर्ग्भ्यइदं० ॥ सꣳहितोवि
श्वसामासूर्योगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ सꣳहितायविश्वसाम्नेसूर्यायगंधर्वायेदं० ॥ तस्यमरीचयोप्सरसआयुवोना
मताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ मरीचिभ्योप्सरोभ्यआयुभ्यइदं० ॥ सुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मै

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वाहा ॥ सुषुम्नायसूर्यरश्मयेचंद्रमसेगंधर्वायेदं० ॥ तस्यनक्षत्राण्यप्सरसोबेकुरयोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ नक्ष
त्रेभ्योप्सरोभ्योबेकुरिभ्यइदं० ॥ भुज्युःसुपर्णोयज्ञोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ भुज्यवेसुपर्णाययज्ञायगंधर्वायेदं० ॥
तस्यदक्षिणाअप्सरसस्तवानामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ दक्षिणाभ्योप्सरोभ्यःस्तवाभ्यइदं० ॥ प्रजापतिर्विश्वकर्मामन
नोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ प्रजापतयेविश्वकर्मणेमनसेगंधर्वायेदं० ॥ तस्यक्सामान्यप्सरसोवह्नयोनामताइदं
ब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ ऋक्सामेभ्योप्सरोभ्योवह्निभ्यइदं॥ इषिरोविश्वव्यचावातोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥
इषिरायविश्वव्यचसेवातायगंधर्वायेदं० ॥ तस्यापोप्सरसोमुदानामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ अद्भ्योप्सरोभ्योमुदा
भ्यइदं० ॥ भुवनस्यपतेयस्यतउपरिंगहाइहचं ॥ सनोरास्वाज्यानिꣳरायस्पोषꣳसुवीर्यꣳसंवत्सरीणाꣳस्वस्तिꣳस्वाहा ॥ भुवन
स्यपत्यइदं० ॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ परमेष्ठिनेधिपतयेमृत्यवेगंधर्वायेदं० ॥ तस्यवि
श्वमप्सरसोभुवोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ विश्वस्माअप्सरोभ्योभूभ्यइदं० ॥ सुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्ज
न्योगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ सुक्षितयेसुभूतयेभद्रकृतेसुवर्वतेपर्जन्यायगंधर्वायेदं० ॥ तस्यविद्युतोप्सरसोरुचोना
मताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ विद्युद्भ्योप्सरोभ्योरुग्भ्यइदम् ॥ दूरेहेतिरमृडयोमृत्युर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वा
हा ॥ दूरेहेतयेअमृडयायमृत्यवेगंधर्वायेदं० ॥ तस्यप्रजाअप्सरसोभीरुवोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ प्रजाभ्योप्स
रोभ्योभीरुभ्यइदं०॥ चारुःकृपणकाशीकमोगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा ॥ चारवेकृपणकाशिनेकामायगंधर्वायेदं० ॥
तस्याधयोप्सरसःशोचयंतीनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ॥ आधिभ्योप्सरोभ्यःशोचयंतीभ्यइदं० ॥ सनोभुवनस्यपते

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यस्यतऽपारगृहाइहच ॥ उरुव्रह्मणेरन्तरिक्षायमाहिशमयच्छस्वाहा ॥ भुवनस्यपत्यइदं० ॥ ऋताषाट्सꣳहितःसुषुम्नोभुज्युः प्रजापतिरिषिरोभुवनस्यपरमेष्ठीसुक्षितिर्दूरेहेतिश्चारुःसनोभुवनस्येतिदशभिःपर्यायैःसहद्वाविंशतीराष्ट्रभृतइत्युपहोमः ॥ यदस्य कर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वꣳस्विष्टꣳसुहुतंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वहुत आहुतीनांकामानाꣳसमर्धयित्रेस्वाहा ॥ अग्नेरुत्तरार्धस्यपूर्वार्धेपूर्वाहुतीरतिहायहोमाहुतीर्जुहोति ॥ अग्नयेस्विष्टकृतइदं० ॥ ततइध्मसन्नहनंतूष्णीमग्नौप्रास्य रुद्रायपशुपतयेस्वाहा ॥ पशुपतयेरुद्रायेदं० ॥ दर्व्यापरिधीननक्तिमध्यमंदक्षिणमुत्तरंच ॥ ततो यथाहुतद्धसवोगौर्यमित्यग्निंपरिसमुह्यबर्हिर्भ्यःपरिस्तरणेभ्यश्चकानिचित्तृणान्यादायदर्व्यामग्राण्यनक्ति ॥ मध्यानिमूलानिचाज्यस्थाल्यां एवंद्वितीये तृतीयेतुमूलानिमध्यानिचाज्यस्थाल्यांदर्व्यामग्राणि ॥ ततश्चैकंतृणमवस्थाप्योत्तरंपरिधिसंधि मनुप्रहृत्यत्रिरंजलिनोर्ध्वमुद्यौति ॥ ततआत्तंतृणं ॥ ॐ सर्पेभ्यःस्वाहा ॥ इतिप्रहृत्यांगुल्यात्रिर्निर्दिश्य घ्राणंचक्षुःपृथिवीं चालभ्यापउपस्पृश्य ॥ परिधिंमध्यममग्नौप्रहृत्यसहेतरौप्रहरतिमध्यमंमध्येकरोति ॥ ॥ ॥ अथप्रायश्चित्तहोमः ॥ ॐ अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा ॥ अग्नयइदं० ॥ पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा ॥ अग्नयइदं० ॥ यत्पाकत्रामनसादीनदक्षा नयज्ञस्यमन्वतेमर्तासः ॥ अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाꣳऋतुशोयजातिस्वाहा ॥ अग्नयइदं० ॥ त्वंनोअ ग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ अग्नीवरु णाभ्यामिदं० ॥ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वाहा॑ ॥ अग्नीवरुणाभ्यामिदं० ॥ यत॑इंद्र॒भया॑महे॒ततो॑नो॒अभ॑यंकृधि ॥ मघ॑वन्च्छ॒ग्धितव॒तन्न॑ऊ॒तये॒विद्विषो॒विमृधो॑जहि॒ स्वाहा॑ ॥ इंद्रायेदं० ॥ स्व॒स्ति॒दावि॒शस्पति॑र्वृत्र॒हाविमृधो॑व॒शी ॥ वृषेंद्रः॑पु॒रए॑तुनःस्वस्ति॒दाअ॑भयंक॒रःस्वाहा॑ ॥ इंद्रायेदं० ॥ त्र्यं॑बकंयजामहेसुगं॒धिंपु॑ष्टि॒वर्ध॑नं ॥ उ॒र्वा॒रु॒कमि॑व॒बंध॑नान्मृ॒त्योर्मु॑क्षीय॒मामृता॒त्स्वाहा॑ ॥ त्र्यंबकायेदं० ॥ इ॒दंविष्णु॒र्विच॑क्रमेत्रे॒धानिद॑धेप॒दं ॥ समू॑ढमस्यपाꣳसु॒रेस्वाहा॑ ॥ विष्णवइदं० ॥ भूः॒स्वाहा॑ ॥ अग्नयइदं० ॥ भुवः॒स्वाहा॑ ॥ वायवइदं० ॥ सुवः॒स्वाहा॑ ॥ सूर्यायेदं० ॥ मह॒ःस्वाहा॑ ॥ बृहस्पतयइदं० ॥ जनः॒स्वाहा॑ ॥ वरुणायेदं० ॥ तपः॒स्वाहा॑ ॥ इंद्रायेदं० ॥ स॒त्यꣳस्वाहा॑ ॥ विश्वेभ्यो देवेभ्यइदं ॥ कर्ममध्येकालानुसारविशेषप्रायश्चित्तानिकुर्यात् ॥ वसु॑भ्योरु॒द्रेभ्य॑आदि॒त्येभ्यः॒स्वाहा॑ ॥ वसुभ्योरुद्रेभ्यआदित्येभ्यःसꣳस्रावभागेभ्यइदं० ॥ ततउत्तरपरिषेकः ॥ अदि॒तेन्व॑मꣳस्थाः ॥ अनु॑म॒तेन्व॑मꣳस्थाः ॥ सर॑स्व॒तेन्व॑मꣳस्थाः ॥ देव॑सवितः॒ प्रासा॑वीः ॥ इतिपूर्ववत्परिषेकेणविसर्गंकृत्वा ॥ यथेतंप्रणीताःपर्याहृत्याꣳपरेणाग्निंनिधाय ॥ सद॑सि॒सन्मे॑भूया॒ःसर्व॑मसि॒सर्व॑मेभूयाःपू॒र्णम॑सिपू॒र्णंमे॑भूया॒अक्षि॑तमसि॒मामे॑क्षेष्ठाः ॥ प्राच्यां॑दि॒शिदे॒वाऋ॒त्विजो॑मार्जयंतां ॥ दक्षि॑णायांदि॒शिमासाः॑पि॒तरो॑मार्जयंतां ॥ अपःस्पृष्ट्वा ॥ प्र॒तीच्यां॑दि॒शिगृ॒हाःप॒शवो॑मार्जयंतां ॥ उदी॑च्यांदि॒श्याप॒ओष॑धयो॒वन॒स्पत॑योमार्जयंतां ॥ ऊ॒र्ध्वायां॑दिशिय॒ज्ञःसं॑वत्स॒रोय॒ज्ञप॑तिर्मार्जयतां ॥ इतिप्रागारभ्यदिक्चतुष्टयेऊर्ध्वमधश्चजलमासिच्य ॥ स॒मु॒द्रंवः॒प्रहि॑णो॒म्यक्षि॑ताः॒स्वांयोनि॒मपि॑गच्छत ॥ अच्छि॑द्रःप्र॒जया॑भूयासं॒मापरा॑सेचि॒मत्पयः॑ ॥ इतिभूमौनिनीयात्मानंमार्जयित्वामुखंसंमृज्य ॥ यथाश्रद्धंब्रह्मणेदक्षिणांदद्यात् ॥ इदंपूर्णपात्रंतत्प्रतिनिधिभूतंवायथाशक्तिहिरण्यंब्रह्मणेसंप्रददेइत्युक्त्वानममेतिवदेत् ॥ ब्रह्मास्वस्तीत्युक्त्वायथेतंप्रतिनिष्क्रामति ॥ ततःसंस्थाजपेनोपतिष्ठते ॥ यज्ञनम॑स्तेयज्ञ ॥ नमोनम॑श्चतेयज्ञ ॥ शि॒वेन॑मे॒संति॑ष्ठस्वस्यो॒नेन॑मे॒संति॑ष्ठस्वसु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूतेनमेसंतिष्ठस्वब्रह्मवर्चसेनमेसंतिष्ठस्वयज्ञस्यर्धमनुसंतिष्ठस्वोपतयज्ञनमउपतेनमःउपतेनमः ॥ इदमिध्मसंनहनप्रहरणादिकं आधारवतिदर्वीहोमेगृह्यांतरेदृष्टत्वेनवृत्तिकृदुक्तेःशिष्टपरिगृहीतत्वाच्चकर्तव्यं ॥ यावदुक्तमेवस्वगृह्योक्तंकर्तव्यमितिवदंतःकेचिन्नेच्छंति ॥ केचित्त्रिवृदन्नहोमानंतरंकुर्वंति ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ १०१ ॥ त्रिवृदन्नहोमः ॥

श्रीः ॥ यत्रहोमोब्राह्मणभोजनंचोक्तंतत्रत्रिवृदन्नहोमः ॥ गृह्यांतरोक्तकर्णवेधतडागोत्सर्गादौहोमब्राह्मणभोजनवतिअतिप्रसंग वारणायोक्तंयत्राचारोप्यस्तितत्रैवत्रिवृदन्नहोमइतिवृत्तिकृता ॥ अतस्तत्राचाराभावान्नातिप्रसंगः ॥ उत्सर्जनेतुहोमोब्राह्मणभो जनमनादिशिष्टाचारश्चास्तिअतोभवतित्रिवृदन्नहोमः ॥ एतेनउत्सर्जनेत्रिवृदन्नहोमोनास्तीतिनास्तिकोवदन्निरस्तः ॥ वक्ष्यतेचो त्सर्जनप्रयोगेविशेषः ॥ नात्रावदानधर्मः ॥ आहुतिपरिमाणश्चेध्माभवति ॥ यावदुक्तेवक्रियाभवति ॥ त्रिवृदन्नहोमस्यापूर्वि कत्वात् ॥ ब्राह्मणभोजनार्थमुपनिष्पन्नाद्धोमः ॥ होमशेषादिनासंतुष्टान्पुण्याहंवाचयेत् ॥ ओदनापूपसक्तुरूपादाज्याभिघारि तैकीकृतादन्नाद्द्व्यासकृदवदायहोमःकार्यः ॥ अत्रओदनस्यापूपानाꣳसक्तूनामितिसूत्रेपृथङ्निर्देशःस्वरूपज्ञानार्थः ॥ सूत्रांतरे षुत्रिवृच्छब्देननिर्देशोलाघवार्थः ॥ अंतेउत्सर्जनसूत्रेअपूपैःसक्तुभिरोदनेनेतिव्युत्क्रमेणनिर्देशस्त्ववदेयक्रमबाधार्थः ॥ तेनद्र व्यत्रयंकथमप्येकीकृत्यहोतव्यमन्यथाओदनादिपाठक्रमेणादायहोतव्यमितिस्यात्तन्नेष्टमितिव्युक्रमेणसूत्रितमाचार्येण ॥ ॥ अथप्रयोगः ॥ कर्ताअमुककर्मांगंत्रिवृदन्नहोमंपुण्याहवाचनंचकरिष्यइतिसंकल्प्यपरिसमुह्यपरिस्तीर्योत्तरेणाग्निंकुशानास्तीर्य ॥ तत्रपात्राणिसादयति ॥ प्रोक्षणीं पवित्रे दर्वीं घृतं त्रिवृदन्नं प्रादेशमात्राष्टसमित्कमिध्मं कुशांश्चासाद्यप्रोक्षणीःसꣳस्कृत्यपात्रा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णिप्रोक्ष्यदर्वींनिष्टप्यसंमृज्याज्यंसंस्कृत्यदर्भेष्वपरेणाग्निंनिधायओदनापूपसक्तवइतित्रिवृदन्नंबहिर्निष्पन्नत्वादन्नावधिश्रित्योद
गुद्वास्यावोक्ष्याभिघार्यैवंसर्वत्रायतनाद्बहिर्निष्पन्नान्नेदेवपवित्राख्यसंस्कारंकृत्वाग्नेःपश्चान्निधायपरिषिच्यतूष्णीमष्टसमित्कमि
ध्ममन्नावाधायत्रिवृदन्नंसर्पिर्मिश्रंदर्व्यासकृत्सकृदवदायजुहोति ॥ अग्नयेस्वाहा ॥ अग्नयइदं० ॥ सोमायस्वाहा ॥ सोमायेदं० ॥
अग्नयेन्नादायस्वाहा ॥ अग्नयेन्नादायेदं० ॥ अग्नयेन्नपतयेस्वाहा ॥ अग्नयेन्नपतयइदं० ॥ प्रजापतयेस्वाहा ॥ प्रजापतयइदं० ॥
विश्वेभ्योदेवेभ्यःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ सर्वाभ्योदेवताभ्यःस्वाहा ॥ सर्वाभ्योदेवताभ्यइदं० ॥ अग्नयेस्विष्टकृते
स्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ इत्यष्टाहुतीर्हुत्वा ॥ ततोग्नेरुत्तरतःप्रागग्रान्कुशानास्तीर्यतूष्णीमुदकमासिच्य ॥ हुतशेषंत्रि
वृदन्नंकिंचिद्धस्तेनादायबलिंकरोति ॥ वास्तुपतयेस्वाहा ॥ वास्तुपतयइदं० ॥ तूष्णींसकृदंतेपरिषेकः॥ ततोन्यूनातिरिक्तदो
षपरिहारार्थंसर्वप्रायश्चित्तंकरिष्येइतिसंकल्प्य ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ ततःअदितेन्वमꣳस्थाइत्याद्युत्तरपरि
षेकंकृत्वात्रिवृदन्नहोमशेषादिनाब्राह्मणान्तंतोष्यतान्पुण्याहंवाचयेत् ॥ यत्पुण्यंनक्षत्रमित्यादिप्रजापतिःप्रीयतामित्यंतंवदेत्॥
मह्यंसकुटुंबायमहाजनान्नमस्कुर्वाणायआशीर्वचनमपेक्षमाणायामुककर्मकारिणेपुण्याहंभवंतोब्रुवंतु ॥ इतित्रिर्यजमानः ॥ ॐ पु
ण्याहमितीतरेत्रिः ॥ मह्यमित्यादिपूर्ववत् ॥ स्वस्तिभवंतोब्रुवंत्वितित्रिर्यजमानः ॥ ॐ स्वस्तीतिप्रतिवचनंत्रिः ॥ मह्यं० ॥ ऋद्धिं
भवंतोब्रुवंत्वितित्रिः ॥ ॐ ऋद्धिरितिप्रतिवचनंत्रिः ॥ इतित्रिवृदन्नहोमप्रयोगः ॥ ततःकर्ताऽपरेणाग्निमुपरिबद्धशुभ्रवर्तुलवि
तानस्याधोदेशेभार्याप्राङ्मुखीमुपवेश्य ॥ तस्यादक्षिणहस्तेयवंनिदधाति । वृषासीति ॥ ततःसकृदुक्तेनमंत्रेणयवस्यदक्षिणत
रस्तरतश्चसर्षपौनिदधाति । आंडौस्थइति ॥ [illegible]दधाति । श्वावृत्तदिति ॥ ततस्तूष्णींप्राशयति ॥ कृत

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शुद्धाचमनाय तस्याउदरहस्ताभ्यामाममृशति ॥ अभिष्ट्वाहंदशभिरभिमृशामिदशमास्यायसूतवैइति ॥ अत्रन्यूनाधिकांगुलेः कर्तुर्दशभिरि[illegible]पदंलुप्यते ॥ स्मार्ताग्न्युपस्थानेगार्हपत्यपदलोपवत् ॥ ततोवटांकुरंप्रपीड्यरसंनिष्कास्यघृतेनसंमिश्रंकृत्वाकृत स्वोरुमूलोपधानायास्तस्यादक्षिणेनासापुटेतूष्णींसेचयेत् ॥ ततोविभूतिंधृत्वाकृतस्यकर्मणःसांगतासिद्ध्यर्थंदशाधिकान्ब्राह्मणा न्यथाकालंयथोपपन्नेनान्नेनभोजयिष्येइतिसंकल्प्य पुनःकर्मसांगतासिद्ध्यर्थंगंधतांबूलादिभिर्ब्राह्मणपूजनंभूयसींदक्षिणांचदातु महमुत्सृज्येइतिसंकल्प्यगंधादिनासंपूज्यदक्षिणांदद्यात् ॥ ततःप्रमादात्कुर्वतांकर्मेतिविष्णुंस्मरेत् ॥ ततोब्राह्मणेभ्यआशिष मेवैतामाशास्तइत्याद्यामंत्रोक्ताआशिषोग्राह्याः ॥ ततोब्राह्मणान्नमस्कृत्यशिष्टैरिष्टैश्चसहभोजनंकुर्यात् ॥ इतिसत्याषाढ० पुंस०

॥ १०२ ॥ गर्भस्रावेस्तंभनविधिः ॥

श्रीः ॥ आर्द्रेणपाणिनामंत्रावृत्त्यानाभेरूर्ध्वंत्रिरुन्मार्ष्टि ॥ परांचंत्वानार्वांचंत्वष्टाबध्नातुबंधने ॥ सऋतूनुपवेश्यदशमासोअवी रहेति ॥ अत्रगर्भस्रावहरंस्त्रीकर्तृकंकांचनयज्ञोपवीतदानंमहार्णवोक्तंकार्यं ॥ एतस्यसविस्तरोविधिर्धर्मसिंधुसारेस्ति ॥ अपिच स्वर्णधेनुदानहरिवंशश्रवणघृतपूर्णताम्रकलशादानादिविधानान्यन्यत्रोक्तानिसंति तानितत्रतत्रालोचनीयानि ॥ ॥ छ ॥

॥ १०३ ॥ सीमंतोन्नयनप्रयोगः ॥

श्रीः ॥ चतुर्थेमासिषष्ठेष्टमेनवमेवामासिशुक्लपक्षेरविगुरुशुक्रवारेषुपुनर्वसुपुष्याभिजिद्धस्तप्रोष्ठपदानूराधाश्विनीमूलश्रवणरेवती रोहिणीमृगसंज्ञकपुन्नक्षत्रेषुमध्यपादद्वयेषष्ठ्यष्टमीद्वादशीचतुर्दश्यमावास्यादिव्यतिरिक्ततिथौशुभलग्नादौकार्यं ॥ यजमानः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृतावश्यकक्रियःवस्त्राच्छादितेपीठेप्राङ्मुखउपविश्यस्वदक्षिणतःपत्नीमुपवेश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यांभार्यायांविद्यमानगर्भस्यबैजिकगार्भिकदोषपरिहारद्वाराक्षेत्रसंस्कारद्वाराचश्रीपरमेश्वरप्रीत्यर्थंसीमंतोन्नयनाख्यंकर्मकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्योक्तरीत्याकुर्यात् ॥ (अत्रक्रतुदक्षसंज्ञकाविश्वेदेवाः) सीमंतोन्नयनांगत्वेनोद्धननादिभूसंस्कारंविधायतत्रमंगलनामानमौपासनाग्निंप्रतिष्ठाप्यायतनस्थेतुमंगलनाम्नाभावयित्वाग्निंप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिसामान्यप्रधानांतमुक्त्वा प्रधानहोमे ॥ धातारंचतुराज्येनांगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंहुत्वा ॥ ततोधाताददातुनोरयिमित्यादिप्रधानाहुतिचतुष्टयंहुत्वासंस्थाजपांतंसर्वंसमाप्यत्रिवृदन्नहोमंबलिकरणांतंकृत्वापुण्याहवाचनंकुर्यात् ॥ ततस्तामपरेणाग्निंपूर्ववन्मंडलवितानस्याधोदेशेप्राङ्मुखीमुपवेश्यत्रेण्याशलल्यासहोदुंबरस्तबकमुपसंगृह्यतस्याःपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्त्सीमंतमुन्नयेत् ॥ ॐ भूर्भुवःसुवः ॥ राकामहꣳसुहवाꣳसुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना ॥ सीव्यत्वपःसूच्याच्छिद्यमानयाददातुवीरꣳशतदायमुक्थ्यं ॥ यास्तेराकेसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि ॥ ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषꣳसुभगेरराणा ॥ इतिद्वाभ्यां ॥ ततःसीमंतमभिमंत्रयति ॥ सोमएवनोराजेत्याहुर्ब्राह्मणीःप्रजाविवृत्तचक्राआसीनास्तीरेतुभ्यंगंगे ॥ विश्वाउतत्वयावयंधाराउदन्याइव ॥ अतिगाहेमहिद्विषः ॥ इति ॥ अत्रमंत्रस्थंगंगापदंत्यक्त्वायस्यानद्याःसमीपेनिवासस्तन्नामसंबुद्ध्यंतंप्रक्षिपेत् ॥ ततोब्राह्मणभोजनंभूयसींदक्षिणांचसंकल्प्यदद्यात् ॥ ततआशिषोवाचयित्वाकर्मसाद्गुण्यायविष्णंस[illegible] ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १०४ ॥ पुंसवनसीमंतयोस्तंत्रप्रयोगः ॥

श्रीः ॥ तत्रादावालस्यादिनाऽकृतपुंसवनस्यसूत्रविहितकालातिक्रमदोषपरिहारार्थंलौकिकाग्नौव्याहृतिहोमादिभिःसहितेनरहितेनवाधारवत्तंत्रेणापूर्विकतंत्रेणवात्वंनःसत्वंनइत्याद्याःपूर्ववत्सप्ताहुतीःसमस्तव्याहृतिभिरेकामाहुतिंचहुत्वाअशक्तौकेवलांसमस्तव्याहृतिभिरेकामेववाहुत्वागोदानाद्यन्यतमप्रत्याम्नायेनपादकृच्छ्रंआलस्येनाकरणेर्धकृच्छ्रंप्रायश्चित्तंचरित्वापुंसवनंसीमंतेन सहकुर्यात् ॥ तस्यापिसूत्रोक्तकालातिक्रमेतस्मिन्नेवाग्नौद्विवारंपूर्वोक्ताआहुतीर्हुत्वाप्रतिसंस्कारंपादकृच्छ्रंअर्धकृच्छ्रंवाप्रायश्चित्तं कुर्यात् ॥ ततआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यांभार्यायांविद्यमानगर्भस्यपुंस्त्वप्रतिपादनबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीप०पुंसवनं ममास्यांभार्यायांविद्यमानस्यास्यप्रथमगर्भस्यजनिष्यमाणसर्वगर्भाणांचबीजगर्भसमुद्भवैनोनिर्ब्रहणद्वाराक्षेत्रसंस्कारद्वाराचश्रीपरमेश्वरप्रीत्यर्थंसीमंतोन्नयनंचतंत्रेणकरिष्यइतिसंकल्पः ॥ पुंसवनसीमंतोन्नयनकर्मणोःपुण्याहंभवंतोब्रुवंतुपुंसवनसीमंतोन्नयनकर्मणोःस्वस्तिभ०पुंस०ऋद्धिंभ० पुंस० श्रीर०इतिपुण्याहादिवाक्यानि ॥ द्वितीयेप्रतिवचनवाक्येऋध्येतामितिविशेषः ॥ नांदीश्राद्धेक्रतुदक्षादेवाःमंगलोग्निः ॥ पुंसवनसीमंतोन्नयनकर्मणोर्यायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामीत्यन्वाधानवाक्ये ॥ गणेशपूजनादिबलिकरणपुण्याहादिवाचनांतंतंत्रेणैव ॥ वैशेषिकधात्रीचतुष्टयहोमस्यापिनावृत्तिःसंप्रतिपन्नदेवतत्वात् ॥ ततोदधिद्रप्सादिप्राशनंसीमंतोन्नयनादिकंचक्रमेणकार्यं ॥ आसन्नेप्रसवेएतयोर्मुख्यकालातिपन्नयोरपिमलमासादौक्रियाभवत्येवअनन्यगतिकत्वात् ॥ इतिपुंसवनसीमंतोन्नयनयोस्तंत्रेणप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १०५ ॥ सुखप्रसवोपायाः ॥

श्रीः ॥ सूतिकायाःशिरःसमीपेउदकुंभंनिदधातिपादयोःसमीपेतूर्यतींनिधायतूष्णीमुदरंस्पृष्ट्वार्द्रेणपाणिनानाभेरधस्त्रिरवाङ्मंत्रावृत्त्यावमार्ष्टि ॥ यथैववायुःपवतेयथासमुद्रएजति ॥ एवंतेगर्भएजतुसहजरायुणावसर्पतुइति ॥ उपायांतरमृग्विधाने ॥ प्रमंदिनेप्रसूयंत्यांजपेद्गर्भप्रमोचनीं ॥ इंद्रंचमनसाध्यायेन्नारीगर्भप्रमुंचतीति ॥ मंत्रस्तु–प्रमंदिनेपितुमर्दर्चतावचोयःकृष्णगर्भानिरहन्नृजिश्वना ॥ अवस्यवोवृषणंवज्रदक्षिणंमरुत्वंतंसख्यायहवामहे ॥ इति ॥ उपायांतरं ॥ हिमवत्युत्तरेपार्श्वेशबरीनामयक्षिणी ॥ तस्यानूपुरशब्देनविशल्याभवतुगर्भिणी ॥ ॐ क्षीं ॐ स्वाहा ॥ अनेनैरंडतैलंमहिषीक्षीरमिश्रितमभिमंत्र्यपाययेदुदरेलापयेच्च ॥ ग्रंथांतरेतुहिमवत्युत्तरेपार्श्वइत्यमुंमंत्रंजपन्नेकविंशतिदूर्वाकुरैस्तिलतैलमेकपलंप्रदक्षिणमावर्तयन्नष्टशतंजपित्वातत्तैलंकिंचित्पाययित्वाशेषंयोनौनिषिच्यदूर्वाकुरान्केशेषूपगूहेदित्युक्तं ॥ वृषस्यमूलंयदिनाभियोनौप्रलेपितंस्त्रीझटितिप्रसूयते ॥



तथाकटिस्थःकदलीसुकंदोवेगात्प्रसूतिंकुरुतेंगनानामिति ॥ (वृषःअडुळसाइतिप्रसिद्धः) ॥ यंत्रमप्युक्तंयंत्रप्रकाशे ॥ गजाग्निवेदाउडुराट्शरांकारसर्क्षिपक्षाइतिहिक्रमेण ॥ लिखेत्प्रसूतेःसमयेगृहेदःसुखेननार्यःप्रसवंतिशीघ्रं ॥ इति ॥ इदंयंत्रंप्रसूतिसमयेसूतिकागृहेगर्भिण्याद्दष्टिगोचरेदेशेलिखेत् ॥ एतद्दर्शनेनसुखेनशीघ्रंनार्यःप्रसवंतीति ॥ इतिसुखप्रसवोपायाः ॥ ॥ छ ॥

१ तूर्यतीअवकातांनिदधाति । केचित्तुओषधिविशेषमाहुः । २ अस्यपाठांतरं—हिमवत्युत्तरेपार्श्वेसुरथानामयक्षिणी । तस्याःस्मरणमात्रेण विशल्यागर्भिणीभवेत् ॥ इति ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १०६ ॥ जातकर्मप्रयोगः ॥

श्रीः ॥ जातमात्रेपुत्रेपितातस्यमुखं(कुलदेवतावृद्धप्रणामपूर्वकं)निरीक्ष्यनद्यादौस्नात्वाऽसंभवेशीताभिरद्भिःसुवर्णयुताभिर्गृहेवा (उदङ्मुखः)स्नात्वासितचंदनमाल्यादिभिरलंकृतोनालच्छेदनात्प्राक् अश्मानंपरशुंसुवर्णंसर्षपान्कणांश्चोष्णशीताअपःगोघृतमु दकुंभंचसंभृत्यप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यकुमारस्यगर्भाबुपानजनितसकलदोषनिबर्हणायुर्व र्चोभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंजातकर्मकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापू जनंहिरण्येननांदीश्राद्धंचकरिष्येइतिसंकल्प्यकुर्यात् ॥ ततोश्मनिपरशुंतदुपरिहिरण्यंचनिधायतानिव्यत्यस्तानिकृत्वातदुपरि कुमारंपूर्वंसम्यक्प्रक्षालितंहस्ताभ्यांप्राक्शिरसंधारयति ॥ अश्माभवपरशुर्भवहिरण्यमस्तृतंभव ॥ वेदोवैपुत्रनामासिसजीव शरदःशतं ॥ अंगादंगात्संभवसिहृदयादधिजायसे ॥ आत्मावैपुत्रनामासिसजीवशरदःशतमिति ॥ यद्यस्यांकश्चिज्जरायुभाग स्तिष्ठतितदाअंजलिनोदकमादायमूर्धानमस्याअवसिंचति ॥ तिलदेवपद्यस्वनमाऽसमसिनोदलमवपद्यस्वस्यादिति ॥ नैमित्ति कमिदं ॥ ततऔपासनाग्निंसूतिकागाराद्बहिरुद्धननादिसंस्कृतेदेशेसंस्थाप्यउत्तपनीयमग्निंतुसूतिकागारेसंस्थाप्य(तत्रएकंकपा लंसंतप्तंकृत्वातस्मिन्शुष्कगोमयंप्रक्षिप्यप्रज्वाल्यैषउत्तपनीयःपचनाग्निर्वा) प्राङ्मुखउपविश्यदेशकालौसंकीर्त्यास्यकुमारस्यशं डामर्कादिरक्षोगणेभ्यःसंरक्षणार्थंसर्षपमिश्रैःकणैःसायंप्रातरुद्धूपनंभूम्यालंभनंचकरिष्येइतिसंकल्प्यपरिसमुह्यपरिस्तीर्यतूष्णीं परिषिच्यहस्तेनजुहुयान्नात्रत्यागः ॥ सायमेवोपक्रम्यसायंप्रातर्दशाहंउद्धूपनंभूम्यालंभनंचबालरक्षणार्थंकर्तव्यंसायंसायंवा ॥

१ इदंमूलाश्लेषाज्येष्ठाव्यतीपातवैधृत्यादिकुयोगेजन्मनिनभवतिकिंतुसुतमुखमदृष्ट्वैवस्नानं । २ अत्रनांदीश्राद्धंरात्रावपिभवति ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यदातुपचनाग्नावुद्धूपनंतदातत्कालमेवोभेसकृदेवकर्तव्येइतिवृत्तिकृत् ॥ शंडोमर्कउपवीरःशांडिकेरउलूखलः ॥ च्यवनोनश्य तादितःस्वाहा ॥ आलिखन्विलिखन्ननिमिषन्किंवदंतउपश्रुतिःस्वाहा ॥ अर्यम्णःकुंभीशत्रुःपात्रपाणिर्निपुणिःस्वाहा ॥ आंत्री मुखःसर्षपारुणोनश्यतादितःस्वाहा ॥ केशिनीश्वलोमिनीबजाबोजोपकाशिनी ॥ अपेतनश्यतादितःस्वाहा ॥ कौबेरकाविश्व वासोरक्षोराजेनप्रेषिताः ॥ ग्रामान्त्सजातयोयंतीप्संतःपरिजाकृतान्त्स्वाहा ॥ एतान्हतैतान्बध्नीतेत्ययंब्रह्मणोदूतस्तानग्निःपर्य सरत् ॥ तानिंद्रस्तान्बृहस्पतिस्तानहंवेदब्राह्मणःप्रमृशतःकूटदंतान्विकेशान्लंबस्तनान्स्वाहा ॥ नक्तंचारिणउरस्पेशाञ्छूलहस्ता न्कपालपान्त्स्वाहा ॥ पूर्वेषांपितेत्युच्चैःश्राव्यकर्णकः ॥ माताजघन्यागच्छंतीग्रामेविखुरमिच्छंतीस्वाहा ॥ नक्तंचारिणीस्व सासंधिनाप्रेक्ष्यतेकुलं ॥ यास्वपत्सुजागर्तियस्यैविजातायांमनःस्वाहा ॥ तासांत्वंकृष्णवर्त्मनेक्लोमानंहृदयंयकृत् ॥ अग्नेयक्षि णीनिर्दहस्वाहेति ॥ एतैरेकादशभिर्मंत्रैर्निर्धूमेष्वंगारेष्वावापेनकुमारमुद्धूपयेत् ॥ नात्रत्यागः ॥ ततःपाणीप्रक्षाल्यभूमिमाल भते ॥ यत्तेसुशीमेहृदयंदिविचंद्रमसिश्रितं ॥ तस्यामृतत्वस्यनोधेहिमाहंपौत्रमघंरुदं ॥ वेदतेभूमिहृदयंदिबिचंद्रमसिश्रितं ॥ तथामृतत्वस्येशानोमाहंपौत्रमघंरुदमिति ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १०७ ॥ मेधाजननम् ॥

श्रीः ॥ देशकालौसंकीर्त्यास्यकुमारस्यधियोधारणाभिवृद्ध्यर्थंमेधाजननंकरिष्यइतिसंकल्प्य ॥ दर्भेणहिरण्यंबध्वातदंतर्धायप्रा क्शिरसंकुमारंसंस्थाप्यप्रतिमंत्रंगोघृतंप्राशयति ॥ प्राशनसूत्रेमंत्राणांसमुच्चयद्योतकपदाभावात् ॥ भूर्ऋचस्त्वयिजुहोमिस्वाहा ॥ भुवोयजूंषित्वयिजुहोमिस्वाहा ॥ सुवःसाम[illegible] ॥ भूर्भुवःसुवरथर्वांगिरसस्त्वयिजुहोमिस्वाहेति ॥ नात्र

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्यागः ॥ इतिमेधाजननम् ॥ ततःकुमारमुष्णशीताभिरद्भिःस्नापयति ॥ क्षेत्रीयैत्वानिर्ऋत्यैत्वाद्रुहोमुंचामिवरुणस्यपाशात् ॥ अनागसंब्रह्मणेत्वाकरोमिशिवेतेद्यावापृथिवीउभेइमे ॥ शंतेअग्निःसहाद्भिरस्तुशंद्यावापृथिवीसहौषधीभिः ॥ शमंतरिक्षꣳसह वातेनतेशंतेचतन्नःप्रदिशोभवंतु ॥ सूर्यंमृतंतमसोग्राह्यायदेवाअमुंचन्नसृजन्व्यंनसः ॥ एवमहमिमंक्षेत्रियाज्जामिशꣳसात्द्रुहो मुंचामिवरुणस्यपाशादिति ॥ ततःकुमारंमातुरुत्संगेआदधाति ॥ यादेवीश्चतन्नःप्रदिशोवातपत्नीरभिसूर्योविचष्टे ॥ तासांत्वा जरसआदधामिप्रयक्ष्मएतुनिर्ऋतिंपराचैरिति ॥ ततःकुमारमभिमंत्रयते ॥ मातेपुत्रꣳरक्षोहिꣳसीन्माधेनुरतिसारिणी ॥ प्रिया धनस्यभूयाएधमानास्त्वेवशेइति ॥ ततोतूष्णींप्रक्षालितंदक्षिणंस्तनंसव्यंचमंत्रावृत्त्यापाययति ॥ अयंकुमारोजरांधयतुसर्वमायुरे तुतस्मैस्तनंप्रप्यायस्वायुःकीर्तिर्वर्चोयशोबलमिति ॥ ततोमंत्रावृत्त्याउभौस्तनावभिमृशति ॥ नामयतिनरुदतियत्रवयंवदामो यत्रवाभिमृशामसीति ॥ ततोस्याःशिरःसमीपेउदकपूर्णंकुंभंपिहितमुखंनिदधाति ॥ (क्षिप्रप्रसवार्थकात्कुंभाद्भिन्नएवकुंभोयं) आपोगृहेषुजाग्रतयथादेवेषुजाग्रथ ॥ एवमस्यैसुपुत्रायैजाग्रतेति ॥ ततोजन्मलग्नेदुष्टस्थानस्थितग्रहजनितपीडानिरासार्थंदान जपादिकारयेत् ॥ ततोब्राह्मणेभ्योगोभूहिरण्यादियथाशक्तिदत्वागंधादिनासंपूज्यभूयसींदक्षिणांदत्वाशिषोवाचयेत्अग्नेतेज स्विन्नित्यादिमंत्रैः ॥ ततोनालच्छेदनादियथाचारंकार्यं ॥ इदंचरात्रौसंध्यायांग्रहणेजननमरणाशौचमध्येआशौचांतेवापितरि ग्रामांतरगतेपितृव्यादिर्जातकर्मकुर्यात् ॥ इतिसत्याषाढहि० जातकर्मप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

---

१ ततःकुमारस्यगुह्यंनामवक्ष्यमाणप्रकारेणविधातव्यं ॥ इदंमातापितरावेवजानीयातां ॥ व्रतबंधेऽनेनाभिवादनंकारयेत् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १०८ ॥ षष्ठीपूजा ॥

श्रीः ॥ पंचमेषष्ठेपिचदिनेपूर्वरात्रौ(प्रदोषसमयेस्नात्वागंधमाल्यभूषितः)पित्रादिराचम्यदेशकालौसंकीर्त्यसूतिकायाःशिशोश्च सकलारिष्टशांतिद्वारायुरारोग्याभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थंविघ्नेशजन्मदाषष्ठीदेवीजीवंतिकानांयथामिलितोपचारैःपूज नमहंकरिष्येइतिसंकल्प्यपूजनस्थानेपीठादौयथाचारंविघ्नेशंजन्मदाःषष्ठीदेवींजीवंतिकांस्कंदंभगवतींचावाह्यषोडशोपचारैःपं चोपचारैर्वा ॥ सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतस्याम ॥ अद्धितृणमद्ध्येविश्वदानींपिबशुद्धमुदकमाचरंती ॥ इतिमंत्रेणपूज यित्वाप्रार्थनाकार्या ॥ (विघ्नेशस्य–सर्वविघ्नहरोसित्वमेकदंतगजानन ॥ षष्ठीगृहेर्चितःप्रीत्याबालंदीर्घायुषंकुरु ॥ लंबोदरमहाभा गसर्वोपद्रवनाशन ॥ त्वत्प्रसादादविघ्नेशचिरंजीवतुबालकः ॥ जन्मदानां–वरदाःसायुधायूयंजन्मदाइतिविश्रुताः ॥ शक्ति भिःसहबालंमेरक्षतात्राह्निजागरे) ॥ षष्ठीदेव्याः–शक्तिस्त्वंसर्वदेवानांलोकानांहितकारिणी ॥ मातर्बालमिमंरक्षमहाषष्ठिनमो स्तुते ॥ गौरीपुत्रोयथास्कंदःशिशुत्वेरक्षितःपुरा ॥ तथाममाप्ययंबालःषष्ठिकेरक्ष्यतांनमः ॥ स्कंदस्य–कार्तिकेयमहाबाहोगौरी हृदयनंदन ॥ कुमाररक्षभीतिभ्यःपाहिदेवनमोस्तुते ॥ (भगवत्याः–अस्मिंस्तुसूतिकागारेदेवीभिःपरिवारिता ॥ रक्षांकुरुमहा भागेसर्वोपद्रवनाशिनी ॥ अयंममकुलोत्पन्नोरक्षार्थंपादयोस्तव ॥ नीतोमातर्महाभागेचिरंजीवतुबालकः ॥ रूपंदेहिजयंदेहि भगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे ॥ शांतिरस्तुशुभंचास्तुप्रणम्यत्वांसुखाययत् ॥ यतःसमागतंपापं तत्रैवप्रतिगच्छतु ॥) ततःषष्ठीस्कंदभगवतीभ्यःमाषभक्तबलिंसमर्पयामि ॥ इतिबलिंदत्त्वाब्राह्मणान्गंधतांबूलदक्षिणादिभिः

१ अत्रगोपीनाथपद्धतौजीवंतिकोत्तरंस्कंदस्यशस्त्रे

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संपूज्याशिषोवाचयित्वास्वसबांधवांश्चादिभिःसहापूपखाद्यादिभक्षणंकुर्यात् ॥ जननाशौचमध्येप्रथमषष्ठदशमदिनेषुचनाशौचदोषः ॥ अन्नग्रहणेदोषएव ॥ पुरुषाःशस्त्रहस्ताःस्त्रियोगीतिकारिण्योस्यांरात्रौजागरणंकुर्युः ॥ सूतिकागृहंचधूपाग्निदीपशस्त्रमुसलविभूतियुतंकार्यं ॥ सर्षपादिविकिरणमन्यदपिब्राह्मणद्वाराशांतिसूक्तपाठादियथाचारंकार्यं ॥ इतिषष्ठीपूजासमाप्ता॥

॥ १०९ ॥ नामकरणम् ॥

श्रीः ॥ अत्रमातापुत्रयोःपितुश्चत्रयाणांद्वादश्यामेवाशौचनिवृत्तिःनत्वेकादश्यां ॥ स्नानागारशुद्ध्योर्द्वादश्यांविधानात् ॥ तेनशाखांतरेविहितमपिऔपासनहोमोनामकरणश्राद्धादिकंचास्माकमेकादश्यांनभवति ॥ इदंचनामकरणंजन्मतोद्वादशेदिवसेकर्तव्यं ॥ तच्चस्वकालप्राप्तमपिविष्टिवैधृतिव्यतीपातग्रहणसंक्रांत्यमावास्यापितृश्राद्धदिनेषुनकार्यं ॥ स्वकालेक्रियमाणस्यगुरुशुक्रास्तबाल्यवार्धकवक्रातिचारमलमासादिनिषेधोनास्ति ॥ मातापुत्रयोःपितुश्चस्नानंखननलेपनादिनागारशुद्धिंचकारयित्वासूतिकाग्निंबहिःपरिहृत्यौपासनमग्निमानीयायतनेसंस्थाप्यप्राङ्मुखउपविश्यदक्षिणतःकुमारसहितांभार्यामुपवेश्यआचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्यशिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुर्वर्चोभिवृद्धिव्यवहारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनामकर

---

१ यदाजननकालेकुयोगस्तदातद्दोषशमनायशांतिंकृत्वाजातकर्मनामकरणंचकुर्यात् । जननशांतयःसंस्कारप्रकरणांतेवक्ष्यंते । आलस्यादिनाजातकर्मण्यकृतेतुनामकर्मदिने—जातकर्मकालात्ययनिमित्तंलौकिकाग्नौव्याहृतिहोमवारुणीहोमादिभिःसहितेनरहितेनवाघारवत्तंत्रेणापूर्विकतंत्रेणवात्वंनःसत्वंनइत्याद्याःसप्ताहुतीःसमस्तव्याहृतिभिरेकामाहुतिंचहुत्वागोदानाद्यन्यतमप्रत्यान्नायेनार्धकृच्छ्रंप्रायश्चित्तंचरित्वानंतरमुभयंकुर्यात् । उभयोःसहकरणेपिगणपतिपूजनादिचतुर्णांतंत्रमेव इति सं०र०।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णाख्यंकर्मकरिष्येइतिसंकल्प्य ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्योक्तरीत्याकुर्यात् ॥ (पुण्याहेसवितापीयतामितिविशेषः) नामदानांगत्वेनोद्धननादिकर्मकरिष्येइतिसंकल्प्यगृह्याग्निंपार्थिवनामानमुपसमाधायसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा ॥ नामकरणहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमुक्त्वा ॥ वैशेषिकप्रधानहोमेधातारंचतुरनुमतिंचतूराकांद्विःसिनीवालींद्विःकुहूंचाज्येनअंगहोमेवरुणंद्विरित्यादिसंस्रावेणेत्यंतमुक्त्वासमिधोग्नावाधायव्याहृत्यंतंहुत्वा ॥ प्रधानहोमे ॥ धातारददातुनोरयिमितिचतस्रोधात्रीर्हुत्वा ॥ ॐ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां ॥ अग्निश्चहव्यवाहनोभवतांदाशुषेमयःस्वाहा ॥ अनुमत्याइदं० ॥ ॐ अन्विदनुमतेत्वंमन्यासैशंचनःकृधि ॥ ऋत्वेदक्षायनोहिनुप्रणआर्यंषितारिषःस्वाहा ॥ अनुमत्याइदं०॥ ॐ अनुमन्यतामनुमन्यमानाप्रजावंतंरयिमक्षीयमाणं ॥ तस्यैवयंहेडसिमार्पिभूमसानोदेवीसुहवाशर्मयच्छतुस्वाहा ॥ अनुमत्याइदं० ॥ ॐ यस्यामिदंप्रदिशियद्विरोचतेनुमतिंप्रतिभूषत्यायवः ॥ यस्याउपस्थउर्वंतरिक्षंसानोदेवीसुहवाशर्मयच्छतुस्वाहा ॥ अनुमत्याइदं ॥ ॐ राकामहंसुहवांसुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना ॥ सीव्यत्वपःसूच्याच्छिद्यमानयाददातुवीरंशतदायमुक्थ्यंस्वाहा ॥ राकायाइदं०॥ ॐ यास्तेराकेसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि ॥ ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषंसुभगेरराणास्वाहा ॥ राकायाइदं० ॥ ॐ सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा ॥ जुषस्वहव्यमाहुतंप्रजांदेविदिदिढिनःस्वाहा ॥ सिनीवाल्याइदं०॥ ॐ यासुपाणिःस्वंगुरिःसुषूमाबहुसूवरी॥ तस्यैवित्पत्नियैहविःसिनीवाल्यैजुहोतनस्वाहा॥सिनीवाल्याइदं०॥ॐ कुहूमहंसुभगांविद्मनापसमस्मिन्यज्ञेसुहवांजोहवीमि ॥ सानोददातुश्रवणंपितृणां [illegible] स्वाहा ॥ कुहूइदं० ॥ इतिद्वादशत्रयोदशवाहुती

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

र्हुत्वा ॥ ततइमंमेवरुणेत्यादित्रिवृदन्नहोमंकुर्य्याद्वाचनांतंशुल्बप्रहरणादिसंस्थाजपांतंसमाप्यनामदानं ॥ तत्रप्रथमंकुलदेवता नाममहालक्ष्मीभक्तइत्यादि ॥ ततोजन्मकालीनमासनाम ॥ तच्च ॥ कृष्णोनंतोच्युतश्चक्रीवैकुंठोथजनार्दनः ॥ उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः ॥ योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात् ॥ अत्रयथाचारंचैत्रादिर्मार्गशीर्षादिर्वाक्रमः ॥ ततोव्यावहारिकंनाम ॥ अत्रैवंव्यवस्था ॥ वक्ष्यमाणप्रकारेणकृत्रिमंनामद्वयंकार्यं ॥ एकंगुप्तमपरंव्यवहाराय ॥ व्यावहारिकान्नाक्षत्रनामद्वितीयमितिद्रष्टव्यं ॥ एवंसोमयाजीतृतीयमित्यपि ॥ गुप्तंतुनामपुण्याहवाचनात्पूर्वंशुभेकालेकार्यं ॥ तच्चमातापितरावेवजानीतोयावज्जीवंगुप्तंवा मौंजीबंधनेपुत्रोवाजानीते ॥ सगुरोरभिवादनंतेनकुर्यात् ॥ तच्चनामस्वत्रिपुरुषवाचिऋषिवाचिदेवतावाचिवाथवास्वेष्टं ॥ द्व्यक्षरंप्रतिष्ठाकामः चतुरक्षरंब्रह्मवर्चसकामः ॥ तच्चघोषवदाद्यंतरंतस्थंदीर्घात्परंविसर्गांतंवासूपसर्गवानामकार्यं ॥ ततोनाक्षत्रंनामज्योतिःशास्त्रोक्तावकहडाचक्रानुसारेणजन्मनक्षत्रपादप्रयुक्ताक्षरादिनाम चुचेचोलेत्यादि ॥ एतच्चसर्वं

---

१ चैत्रादिक्रमेतु—चैत्रादिमासनामानिवैकुंठोथजनार्दनः ॥ उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः ॥ योगीशःपुंडरीकाक्षोकृष्णोनंतोच्युतस्तथा ॥ चक्रीतिद्वादशैतानिक्रमादाहुर्मनीषिणः ॥ इतिधर्माब्धिसारे ॥ एवंचचैत्रमार्गशीर्षयोर्मध्येकस्यापिक्रमग्रहणेननामवैपरीत्यंनभवति ॥ २ सं. र. नाक्षत्रंनामत्रिविधंजन्मनक्षत्रनाम-जन्मनक्षत्रदेवतानाम-जन्मनक्षत्रपादचतुष्टयभूताक्षराद्याक्षरकंनामेति । तत्राद्यंजन्मनक्षत्रप्रकृतिकंतत्रजातार्थतद्धितांतंयथारौहिणइत्यादि । तत्रोक्तद्धितांतानांनक्षत्रनाम्नांसंग्रहार्थःश्लोकःप्रयोगवैजयंत्यांसुदर्शनभाष्येविद्यारण्यकृतबौधायनीयदर्शपूर्णमाससूत्रभाष्येचोदाहृतः—रोरेममृज्येचिषुवृद्धिरादौठात्पेचवांत्यश्रवशाश्वयुश्रु ॥ शेषेषुनाम्वोःकपरःस्वरोंत्यःस्वाप्वोरदीर्घःसविसर्गइष्टः ॥ इति ॥ अश्वयुक् आश्वयुजः, अपभरणः आपभरणः, कृत्तिकः, रोहिणः रौहिणः, मृगशीर्षः मार्गशीर्षः, आर्द्रकः आर्द्रः, पुनर्वसुः, तिष्यः, आश्लेषः, मघः माघः, पूर्वाफल्गुनः उत्तराफल्गुनः, हस्तः, चित्रः चैत्रः, स्वातिः, विशाखः, अनूराधः, ज्येष्ठः ज्यैष्ठः, मूलः मूलकः, अषाढः (आषाढः आषाढिनः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नामशर्मांतंब्राह्मणस्यकार्यं ॥ अत्रायंशिष्टाचारः॥ तंडुलान्कांस्यादिपात्रेप्रसार्यतदुपरिसुवर्णशलाकयाश्रीगणपतयेनमइतिलि
खित्वानामानिलिखेत्॥ प्रथमंकुलदेवतानाम ततोमासनाम ततोव्यावहारिकंनाम ततोनाक्षत्रंचेतिचतुष्टयंलिखित्वानामदेवता
भ्योनमःइतिगंधादिदक्षिणांतोपचारैःसंपूज्य ॥ ततःकर्ताकुलदेवतानाम्नामहालक्ष्मीभक्तोसीतिस्वदक्षिणेविद्यमानस्यमातुरुत्सं
गस्थस्यशिशोर्दक्षिणेकर्णेकथयित्वानर्यप्रजामित्यादिनाप्रतिष्ठाप्य ॥ विप्रैर्नामसुप्रतिष्ठितमस्त्वित्युक्ते ॥ महालक्ष्मीभक्तोयंभव
तःसर्वान्ब्राह्मणानभिवादयते ॥ विप्रैरायुष्मान्भवतुमहालक्ष्मीभक्तःइत्युक्ते ॥ अस्मैमहालक्ष्मीभक्तायपुण्याहंभवंतोब्रुवंत्विति
त्रिः ॥ ॐपुण्याहमितित्रिर्विप्राः ॥ एवंस्वस्तिऋद्धिमितित्रिर्वाचयेत् ॥ एवंशिष्टनामत्रयेपिपुण्याहवाचनांतंकार्यं ॥ ततोनीरा
जनंकारयित्वाश्रीरस्त्वित्याद्युक्त्वाप्रजापतिःप्रीयतामित्युक्त्वा ॥ कर्मांतेपिपुण्याहवाचनचिकीर्षायांपुण्याहवाचनमभिषेचनंच
कारयेत् ॥ ततःकर्मांगत्वेनदशाधिकब्राह्मणभोजनंसंकल्प्यब्राह्मणान्गंधादिनासंपूज्यभूयसींदक्षिणांदत्त्वाब्राह्मणेभ्योममना
मप्रथमंजातवेदइत्याशिषोग्राह्याः॥ ततःकर्मसाद्गुण्यायविष्णुंस्मृत्वाशिष्टैरिष्टैश्चसहभोजनंकुर्यात् ॥ इतिसत्याषाढ०नामकरणं

आषाढियः), अभिजित् आभिजितः, श्रवणः श्रावणः, श्रविष्ठः (श्राविष्ठीयः,) शतभिषक् शातभिषजः, (शातभिषः) प्रोष्ठपादः प्रोष्ठपदः, रेवतः रैवतः इति । ३ चुचेचोलाअश्विनी, लिलुलेलोभरणी, अइउएकृत्तिका, ओवाविवुरोहिणी, वेवोकाकिमृगशिरः, कुघङ्छआर्द्रा, केकोहाहिपुनर्वसु, हुहेहोडापुष्य, डिडुडेडोआश्लेषा, मामिमुमेमघा, मोटाटिटुपूर्वाफल्गुनी, टेटोपापिउत्तराफल्गुनी, पुषाणाठाहस्त, पेपोरारिचित्रा, रुरेरोतास्वाती, तितु तेतोविशाखा, नानिनुनेअनूराधा, नोयायियुज्येष्ठा, येयोभाभिमूळ, भुधाफाढापूर्वाषाढा, भेभोजाजिउत्तराषाढा, जुजेजोखाअभिजित्,

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ११० ॥ शिशोःपर्यंकारोपणम् ॥

अथस्वगृह्यानुक्ताअपिकेचनसंस्काराःशिष्टपरिगृहीतत्वेनावश्यकत्वात्स्मार्तालिख्यंते ॥

श्रीः ॥ जन्मदिनाद्वादशेषोडशेद्वाविंशेअन्यस्मिन्वाज्योतिःशास्त्रोक्तमृदुक्षिप्रनक्षत्रादियुतेशुभेकालेयथाचारंकुलदेवतापूजां विधायालंकृतंशिशुंहरिद्राद्यलंकृतेपर्यंकेमात्राद्याःसौभाग्ययुताःस्त्रियोजलशायिनंहरिंसंस्मृत्यगीतवाद्यादिसमकालंप्राक्शिरसं स्थापयेयुः ॥ यथाचारंकुलदेवताश्चपूजयेत् ॥ इतिपर्यंकारोपणविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ १११ ॥ दुग्धपानम् ॥

श्रीः ॥ एकत्रिंशद्दिनेद्वितीयजन्मनक्षत्रेजन्मदिनेवायथाचारमन्यस्मिन्प्राशननक्षत्रयुतेशुभेकालेवाकुलदेवतापूजांविधायगो क्षीरंशंखेनमातान्यावासुभगाकुमारंदक्षिणशिरसंप्राक्शिरसंवापाययेदिति ॥ ॥ ॥

॥ ११२ ॥ कर्णवेधः ॥

श्रीः ॥ जन्मदिनाद्वादशेषोडशेवादिनेषष्ठसप्तमाष्टममासान्यतममासेदंतजननात्पूर्वमेवजोतिर्विदादिष्टेशुभेकालेपूर्वाह्णेमध्याह्ने वाविष्णुशिवब्रह्मचंद्रसूर्यदिगीशनासत्यसरस्वतीकुलदेवतागोब्राह्मणान्यथाविभवंसंपूज्यमातुरुत्संगस्थस्यशुभासनस्थस्यवालं कृतस्यशिशोःप्राङ्मुखस्योदङ्मुखस्यवाकुशलेनसुवर्णादिसूच्याकर्णौवेधयेदनावृतेसूर्यरश्मिपातस्थलेंगणादौकुमारस्यपूर्वंदक्षिणः कुमार्यावामः ॥ वेधनर्क्षात्तृतीयनक्षत्रेकर्णक्षालनंकार्यं ॥ आभरणधारणक्षमताभवतितथावर्धनीयौ ॥ पुंसःसूर्यरश्मिप्रवेशयो ग्यरंध्रपर्यंतंवर्धयेत् लंबकर्णतातुनिषिद्धा ॥ स्त्रीणांतुयथेष्टम् ॥ ॥ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ११३ ॥ सूर्यावलोकनंनिष्क्रमणंच ॥

श्रीः ॥ तृतीयेमासिजन्मदिनेजन्मभेवाइष्टदेवतापूजनपूर्वकंशिशुनासोत्सवंसूर्यदर्शनंकारयित्वा ॥ चतुर्थेमासिशुभेकालेवाचंद्रंधेनुंचदर्शयेत् ॥ अथवासूर्यावलोकनंनिष्क्रमणेनसहैवकार्यं ॥ चतुर्थेषष्ठेवामासिशुक्लपक्षेशुभतिथ्यादौपितासभार्यःसशिशुश्च अभ्यंगस्नातःकृतकौतुकश्चप्राङ्मुखउपविश्यदेशकालौसंकीर्त्यममास्यशिशोरायुरभिवृद्धिद्वाराबीजगर्भसमुद्भवैनोनिबर्हणद्वारा चश्रीपरमेश्वरप्रीत्यर्थंसूर्याद्यवलोकनंनिष्क्रमणंचकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंचकरिष्येइतिसंकल्प्यकृत्वा ॥ तत इंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानानांप्राच्याद्यष्टदिक्पालानांदिशांचंद्रार्कवाय्वादिदेवानांचयथाक्रमंपूजांकृत्वा ब्राह्मणान्तसंभोज्यशिशुमलंकृत्याग्निसूर्यचंद्रधेनूनांदर्शनंकारयित्वामंत्रान्पठेत् ॥ चंद्रार्काग्निदिगीशानांदिशांचवरुणस्यच ॥ निक्षेपार्थमिमंदक्षितेत्वांरक्षंतुसर्वदा ॥ अप्रमत्तंप्रमत्तंवादिवारात्रमथापिवा ॥ रक्षंतुसततंसर्वेदेवाःशक्रपुरोगमाः ॥ एवंशिशुरक्षार्थंदेवान्संप्रार्थ्यविष्णुशिवालययोरन्यतरद्वंधुगृहंवागत्वातत्रतत्रदेवंपुष्पोपहारादिभिःसंपूज्य गोमयाद्युपलिप्तेचतुरस्रेदेशेधान्यादिनिधायतत्रशिशुमासयित्वामंत्रेणरक्षांकुर्यात् ॥ ॐ हौं जूं सः ॐ भूर्भुवःस्वः ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॐ स्वःभुवःभूः ॐ सः जूं हौं ॐ ॥ इत्येवंरूपंमृतसंजीवनमंत्रंपठन्विभूत्याऽक्षतैर्वामूर्ध्निललाटेच

१ सं. र. मालयांतु–ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ सुवः ॐ त्र्यंबकं० मृतात् ॐ सुवः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं इतिचतुर्दशप्रणवमंत्रउक्तः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रक्षांकृत्वा ॥ अपूपादिभिर्भूतेशानंगणेशंचसमभ्यर्च्यशिशुंभक्ष्यादिमातोषयित्वादेवताप्रणामंप्रदक्षिणात्रयंचशिशुनाकारयित्वा मातुलाद्यासन्नबंधुगृहंपूर्ववन्नीत्वातत्रशिशुंतोषयित्वास्वगृहंगत्वाब्राह्मणेभ्योदक्षिणांदत्त्वाशिषोवाचयेत् ॥ इतिनिष्क्रमणम् ॥

॥ ११४ ॥ उपवेशनम् ॥

पंचमेमासिशुक्लपक्षेपूर्वाह्णेज्योतिर्विदुक्तेमुहूर्तेगणेशंपूजयित्वापुण्याहंवाचयित्वावराहपृथिवीगुरुदेवद्विजान्पूजयित्वाभूमिमुपलिप्यतत्ररंगवल्यामंडलंकृत्वाशंखतूर्यादिमांगलिकध्वनौक्रियमाणेशिशुमुपवेशयेदेभिर्मंत्रैः ॥ रक्षैनंवसुधेदेविसर्वदासर्वगंशिशुं ॥ आयुःप्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये ॥ अचिरादायुषस्त्वस्ययेकेचित्परिपंथिनः ॥ जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान् ॥ धारिण्यशेषभूतानांमातस्त्वमधिकाह्यसि ॥ कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां ॥ ततोब्राह्मणान्संपूज्याशिषोग्राह्याः ॥ कर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ कुमार्याअप्येवमेवकुर्यात् ॥ इतिस्मार्तानि ॥ ॥ छ ॥ ॥ छ ॥

॥ ११५ ॥ अन्नप्राशनम् ॥

श्रीः ॥ जन्मतःषष्ठेमास्यष्टमेवादंतेषुजातेषुवाज्योतिर्विदादिष्टेमुहूर्तेशुक्लपक्षेपूर्वाह्णेपित्रादिःशिशोरन्नप्राशनंकुर्यात् ॥ षष्ठेमासेक्रियतेचेत्तदागुरुशुक्रबाल्यस्थविरवक्रातिचारमौढ्यादिनिषेधोधिमासनिषेधश्चनास्ति ॥ अन्नप्राशनचूडाकरणगोदानादिषुवैशेषिकहोमोनास्तिअनुक्तत्वात् ॥ नामकरणस्थोवैशेषिकहोमःकैश्चिदत्रक्रियतेतत्तुसुतरामशुद्धंप्रापकाभावात् ॥ जयादीनामुपहोमसंज्ञांकुर्वतान्नप्राशनादिषुनास्तिप्रधानहोमइतिसूचितंच ॥ उपप्रधानसमीपेहूयंतइत्युपहोमाः ॥ यत्रनास्तिप्रधानहोमस्त

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्रव्याहृत्यंतःसामान्यप्रधानहोमःप्रधानहोमत्वेनविवक्षितइति ॥ अतएवयुक्तोवहइत्यादिव्याहृत्यंतेषुसामान्यप्रधानमितिशिष्टा
नांव्यवहारश्च ॥ कर्ताकृतमांगलिकःप्राङ्मुखउपविश्यस्वदक्षिणतःसंस्कार्यसहितांभार्यांचोपवेश्यदेशकालौसंकीर्त्यममास्यशि
शोर्मातृगर्भमलप्राशनैनोनिबर्हणबीजगर्भसमुद्भवैनोनिबर्हणद्वारान्नाद्यब्रह्मवर्चसतेजइंद्रियायुरभिवृद्धिद्वाराचश्रीपरमेश्वरप्री
त्यर्थंअन्नप्राशनाख्यंकर्मकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्यइतिसंकल्प्यकुर्यात् ॥
(पुण्याहेसवितापीयतामितिविशेषः) ततउद्धननादिसंस्कृतायांभुविऔपासनाग्निंपित्रतिरिक्तेकर्तरिलौकिकंवाशुचिनामानंप्रति
ष्ठाप्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाअन्नप्राशनहोमकर्मणियायक्ष्यमाणादेवताइ[1]त्यादिजातवेदसमग्निमिध्मे
नेत्यादिसामान्यप्रधानांतंहुत्वा ॥ नात्रवैशेषिकप्रधानहोमः ॥ अंगहोमादिसंस्थाजपांतंकृत्वात्रिवृदन्नहोमंपुण्याहवाचनांतंस
माप्य ॥ ततःस्वदक्षिणेमातुरुत्संगस्थंप्राङ्मुखंशिशुंदधिमधुघृतमितित्रिवृन्मिश्रं[2]कृत्वाप्रतिमंत्रंप्राशयति ॥ प्राशनसूत्रेमंत्राणांस
मुच्चयद्योतकपदाभावात् ॥ भूस्त्वयिदधामि ॥ भुवस्त्वयिदधामि ॥ सुवस्त्वयिदधामीति ॥ ततोन्नमेकवारंप्राशयति ॥ अपां
त्वौषधीनाꣳरसंप्राशयामिशिवास्तआपओषधयःसंत्वनमीवास्तआपओषधयोभवंत्विति ॥ ततोयथेष्टंप्राशयित्वामुखंप्रक्षाल्यबा
लकंभूमावुपवेश्यतदग्रेपुस्तकवस्त्रशस्त्रादिशिल्पानिविन्यस्यस्वेच्छयाशिशुर्यत्स्पृशेत्सास्यजीविकेतिपरीक्षांकुर्यात् ॥ ततःकर्मा

---

१ अत्र सं०र० इत्यादिव्याहृत्यंतमुक्त्वाअंगहोमेवरुणंद्विरित्यादि । पात्रासादनेदधिमधुघृतंपायसमन्नमाज्यासादनोत्तरंसादयेत् । ततोब्रह्मवरणा
दित्रिवृदन्नहोमीयपुण्याहवाचनांतंकुर्यात् । अस्मिन्पुण्याहेप्रजापतिःप्रीयतांमितिविशेषः । अत्रजयादयःकृताकृताः । २ तत्रविषममानेनैवमधुसर्पि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गत्वेनदशाधिकब्राह्मणभोजनंभूयसींदक्षिणांचसंकल्प्यदत्वाऽऽशिषोवाचयित्वाकर्मसाङ्गुण्यायविष्णुंस्मरेत् ॥ कुमार्याअप्यमं त्रकमिदंकुर्यात् ॥ इतिसत्याषाढहिरण्यकेशी० अन्नप्राशनप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

॥ ११६ ॥ आयुर्वर्धापनविधिः ॥

श्रीः ॥ जन्मनक्षत्रेप्राक्संवत्सरात्प्रतिमासंनक्षत्रहोमः ॥ ऊर्ध्वंसंवत्सरेसंवत्सरेबाल्येपित्रादिःकुर्यात् ॥ ऊर्ध्वंस्वयमेववाकुर्यात्सौ रमानेन ॥ यजमानःकृतावश्यकक्रियःसर्वौषधियुतजलपूरितकलशंसंपूज्यतदुदकेनस्नात्वाशुक्लांबरधरोलंकृतःकौतुकमाबध्य प्राङ्मुखउपविश्यदेशकालौसंकीर्त्यममाब्दपूर्तिंजन्मदिवसेआयुरभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंआयुर्वर्धापनाख्यंकर्मकरिष्ये इतिसंकल्प्य ॥ गणपतिंसंपूज्यपुण्याहंवाचयित्वा ॥ आयुर्वर्धापनांगत्वेनोद्धननादिकर्मकरिष्येइतिसंकल्प्योद्धननादिभूसं स्कारंविधायतत्रबलवर्धननामानमौपासनमग्निंलौकिकमग्निंवाप्रतिष्ठाप्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा ॥ आयुर्वर्धापनहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामीत्यादिसामान्यप्रधानांतमुक्त्वावैशेषिकप्रधानहोमे ॥ अमु कजन्मनक्षत्रंतद्देवतांवाअष्टोत्तरशतसंख्ययाष्टाविंशतिसंख्ययावाचरुणायक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिव्याहृत्यंतंहुत्वाज न्मनक्षत्रंतद्देवतांवाचरुणातत्तन्नाममंत्रेणहुत्वाहोमशेषंसमाप्यनात्रित्रिवृदन्नहोमः ॥ स्वजननक्षत्रंतद्देवतांचंद्रंवरुणंचयथोप चारैःसंपूज्यकृताभिषेकोयथाशक्तिस्वजनबंधुसुहृत्पूजांस्ववाहनादिपूजांचकृत्वाब्राह्मणान्भोजयित्वागंधवस्त्रादिभिरलंकृतः ॥

---

१ नक्षत्रदेवतामंत्रप्रतीकानिऋतुशांतिप्रकरणेउक्तानिसंति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पतिपुत्रवतीभिर्नीराजितोब्राह्मणाशिषोगृहीत्वाहविष्याशीजितेंद्रियःस्यात् ॥ उपहोमेषुनास्तित्रिवृदन्नहोमःआचाराभावात् ॥ यदिसिद्धश्चरुर्गृह्यतेतदादेवपवित्राख्यसंस्कारसंस्कृतोग्राह्यः ॥ आपूर्विकपक्षेणवाचरुहोमःकार्यः ॥ इत्यायुर्वर्धापनप्रयोगः ॥

॥ ११७ ॥ प्रवासागतविधिः ॥

श्रीः ॥ प्रवासादागतेपुत्रेपितरिवापुत्रदर्शनेसतिपितुरेवनैमित्तिकंकर्मोच्यते ॥ पितापुत्रमभिमृशति ॥ सोमस्त्वाद्युम्नेनाभिमृशाम्यग्नेस्तेजसासूर्यस्यवर्चसेति ॥ ततोमूर्ध्न्याजिघ्रति ॥ पशूनांत्वाहुंकारेणाभिजिघ्राम्यमुकशर्मन्नायुषेवर्चसेहुमिति ॥ ततःस्वदक्षिणेनहस्तेनपुत्रस्यदक्षिणंहस्तमुत्तानंसांगुष्ठंगृह्णाति ॥ अग्निरायुष्मानितिपंचभिःपर्यायैः ॥ अग्निसोमयज्ञब्रह्मदेवाइतिमंत्रक्रमः ॥ ततआयुष्टेविश्वतोदधदितिअग्नौपृथिव्यांप्रतितिष्ठेतिमंत्रद्वयंपुत्रस्यदक्षिणकर्णेजपति ॥ ततआयुर्दाअग्नेइतिअग्नौपृथिव्यांप्रतितिष्ठेतिमंत्रद्वयंचोत्तरेकर्णेजपति ॥ इदंयावज्जीवंयावदुपनयनंवापितुर्नैमित्तिकं ॥ इदंकुमार्याअपितूष्णींभवति ॥

॥ ११८ ॥ चूडाकरणम् ॥

श्रीः ॥ गर्भतोजन्मतोवातृतीयेवर्षेपंचमेवाअगर्भिण्यांमातरिपंचमवर्षादूर्ध्वंगर्भिण्यामपिगुरुशुक्रवार्धकाद्यभावेअक्षयेऽनधिकेचमासिउदगयनेशुक्लपक्षेज्योतिर्विदुक्तेकालेचूडाकर्मकार्यं ॥ यदिगर्भाधानादयःसंस्काराःस्वकालेनजातास्तदाचौलात्प्राग्गर्भाधानादिसंस्काराणामकरणजन्यदोषपरिहारायप्रायश्चित्तंकृत्वागर्भाधानादयःसंस्कारास्तंत्रेणवक्ष्यमाणप्रकारेणसर्वेकर्तव्याः ॥ चौलंतुउपनयनात्प्राक्संस्कारेभ्यःपृथगुपनयनदिवसेवाउपनयनात्पूर्वकार्यं ॥ (अंतरितसंस्कारप्रायश्चित्तसंकल्पः ॥ देशकालौ

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संकीर्त्यगर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकर्मान्नप्राशनचौलोपनयनसंस्काराणांस्वकालेअकरणप्रत्यवायपरिहारार्थंप्रतिसं
स्कारंपादकृच्छ्रममुकप्रत्याम्नायेनाहमाचरिष्ये ॥ तथागर्भाधानाद्यन्नप्राशनांतसंस्कारसिद्ध्यर्थंप्रतिसंस्कारंपादप्राजापत्यप्रायश्चि
त्तमहमाचरिष्येइतिसंकल्प्यकृत्वा) ॥ यजमानःकृतमांगलिकःप्राङ्मुखउपविश्यदक्षिणतःकुमारसहितांभार्यांचोपवेश्यदेश
कालौसंकीर्त्यास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणद्वाराऽऽयुर्वर्चोभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थंचूडाकरणाख्यंकर्मकरि
ष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंअंकुरारोपणंचकरिष्यइतिसंकल्प्यकुर्यात् ॥ (पुण्याहेकेशिनः
प्रीयंतामितिविशेषः) ॥ उद्धननादिभूसंस्कारंविधायसभ्यनामानमौपासनाग्निंप्रतिष्ठाप्यायतनस्थेतुसभ्यनाम्नाभावयित्वाग्निं
प्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाचौलहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ जातवेदसमग्नि
मिध्मेनेत्यादिव्याहृत्यंतमुक्त्वा ॥ नात्रप्रधानहोमः ॥ अंगहोमेवरुणंद्विरित्यादि ॥ पात्रप्रयोगकालेक्षुरंआनडुहंशकृत् शीतो
ष्णाअपःओषधीश्चासाद्य ॥ संस्थाजपांतंकृत्वात्रिवृदन्नहोमंपुण्याहवाचनांतंकृत्वा ॥ अग्नेःपश्चादक्षिणतःकुमारःमध्येआचार्यः
उत्तरतोमाताब्रह्मचारीवाकश्चित्केशसंयमनार्थंआनडुहंगोमयंधारयन्नुपविशति ॥ बहिस्तप्साअपःशीतासुसंसृज्यताआदायदक्षि
णंगोदानमुनत्ति आपऽउंदंतुजीवसेंदीर्घायुत्वायवर्चसइति ॥ (गविपृथिव्यांदीयतेस्वापार्थंअंगंतद्गोदानं तानिमनुष्येचत्वारि
तेषांउंदनंजलेनार्द्रीकरणं ॥) तस्मिन्गोदानेऊर्ध्वाग्रान्कुशान्निदधाति ओषधेत्रायस्वैनमिति ॥ तेषुक्षुरंनिदधाति स्वधितेमै
नꣳहिꣳसीरिति ॥ ततःप्रवपति देवश्रूरेतानिप्रवपेइति ॥ एवमवशिष्टगोदानत्रयेपिउंदनादिवपनांतंसमानंकर्म ॥ वपनेपृथ
ङ्मंत्राः ॥ प्रदक्षिणंवपनंकार्यं ॥ ततःपश्चाद्वपति येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान् ॥ तेनब्रह्मणोवपतेद

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मस्योर्जेमꣳरय्यावर्चसासꣳसृजाथेति ॥ ततउत्तरतोवपति येनपूषाबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत् ॥ तेनतेहंवपाम्यमुकश
र्मन्निति संबुद्ध्यंतंसंस्कार्यनामगृह्णाति ॥ ततःपुरस्ताद्वपति यथाज्योक्सुमनाअसत् ॥ ज्योक्सूर्यंदृशइति ॥ समग्रवपनं ॥
वपनानंतरंनापितेनचूडाश्चकारयेयुः ॥ एकाद्वेतिस्रःपंचवायथाप्रदेशंकुलधर्मानुसारेणचूडाःकार्याः ॥ अथवाएकार्षेयस्यैका ॥
द्व्यार्षेयस्यद्वे ॥ त्र्यार्षेयस्यतिस्रः ॥ पंचार्षेयस्यपंच ॥ एकाचेन्मध्येकार्या ॥ द्वेचेन्मध्येपश्चात् ॥ तिस्रश्चेन्मध्येपुरस्ताद्दक्षि
णतः ॥ पंचचेत्प्रतिदिशंमध्येचचूडाःकार्याः ॥ कुमारस्यावश्यकःकश्चित्तान्गोमयाच्छादितान्केशानादायगोष्ठउदुंबरेदर्भस्तं
बेवाअवटंकृत्वानिदधाति ॥ यत्रपूषाबृहस्पतिःसवितासोमोअग्निः ॥ तेभ्योनिधानंबहुधाव्यैच्छन्तराद्यावापृथिवीअपःसुवरि
ति ॥ ततःकृतशुद्धस्नानःकुमारआचार्यादीन्प्रणमेत् ॥ सर्पिष्मंतमोदनंनापितायदत्त्वाब्राह्मणभोजनंभूयसींदक्षिणांचदत्त्वा
शिषोवाचयित्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ इतिसत्याषाहिरण्यकेशी०चूडाकरणप्रयोगःसमाप्तः ॥ ॥ छ ॥

॥ ११९ ॥ अक्षरस्वीकारः ॥

श्रीः ॥ कुमारमभ्यंगस्नानपूर्वकंस्नापयित्वागंधादिभिरलंकृत्ययथोक्तेमुहूर्तेआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यामुक
शर्मणःपुत्रस्याक्षरारंभार्थंमार्कंडेयगर्गाद्युक्तविधिंकरिष्यइतिसंकल्प्यगणपतिपूजनंविधायपुनःकुमारेणसहस्नात्वाशुचौसमेदेशे
गोचर्ममात्रंयथापर्याप्तंवास्थलंगोमयेनोपलिप्यतत्रसैकतंस्थंडिलंकृत्वापलाशशाखामूलेनस्थंडिलमध्येमृदंखनित्वापलाशशाखां
तत्रैवरोपयित्वातत्रसरस्वतीमावाहयेत् ॥ भुवनमातःसर्ववाङ्मयरूपेआगच्छागच्छेतिमंत्रेण ॥ ततःप्रणवेनासनाद्यर्घ्यादिनम
स्कारांतानुपचारान्दद्यात् ॥ अत्रनैवेद्यंपाय[illegible]

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वविद्यायैनमः ॥ इतिनाममंत्राभ्यांतौसंपूज्यस्थंडिलकरणादि ॥ बलवर्धननामाग्निः ॥ समित्त्रयमादायेत्यादिप्राणायामांतं कृत्वाअक्षरारंभार्थकर्मणिइत्यादिप्रसाधनीदेव्यंतंव्याहृत्यंतंवोक्त्वाप्रधानहोमेसरस्वतींहरिंलक्ष्मींविघ्नेशंस्वविद्यासूत्रकारान्स्वविद्यांचअष्टाष्टसंख्याभिर्घृताहुतिभिर्यक्ष्यइत्युक्त्वाअंगहोमेवरुणंद्विरित्यादिअग्निंस्विष्टकृतमित्यादिवापूर्वोक्तानुसारेणोक्त्वासमिदभ्याधानादिप्रसाधनीदेवीहोमांतंव्याहृतिहोमांतंवान्वाधानोत्कीर्तितपक्षानुसारेणकृत्वाप्रधानहोमंकुर्यात् ॥ सरस्वत्यैस्वाहा हरयेस्वाहा लक्ष्म्यैस्वाहा विघ्नेशायस्वाहा स्वविद्यासूत्रकारेभ्यःस्वाहा स्वविद्यायैस्वाहा इत्येतैर्नामभिस्तत्तद्देवतोद्देशेनाष्टाष्टसंख्याकाघृताहुतीर्जुहुयात् ॥ अंत्ययोर्नवाहोमः ॥ ततोंगहोमादिस्विष्टकृदादिवापूर्वातानुसारेणहोमशेषंसमापयेत् ॥ नत्रिवृदन्नहोमःआपूर्विकतंत्रेणवासर्वोहोमः ॥ स्वस्यकर्तुमसंभवेआचार्यंवृत्वातेनहोमंकारयेत् ॥ ततोक्षरप्रवक्तारंप्राङ्मुखमासीनंशक्तितोवस्त्रालंकारादिभिर्यथाविभवंसंपूज्यशिष्टान्ब्राह्मणांश्चसंपूज्यतेभ्योयथाविभवंदक्षिणांदत्वाकुमारेणसहसर्वाआवाहितदेवताःस्त्रिःप्रदक्षिणीकृत्यकुमारेणाक्षरप्रवक्त्रभिवंदनंकारयित्वाक्रमेणावाहितदेवताउद्वासयेत् ॥ ततःकुमारोब्राह्मणान्पित्रादीन्गुरूंश्चसंपूज्यनमस्कृत्यप्राङ्मुखस्याक्षरप्रवक्तुःसमीपेप्रत्यङ्मुखउपविश्याक्षरप्रवक्तारंनमस्कुर्यात् ॥ ततोऽक्षरप्रवक्ताआयुष्मान्विद्यावान्भवसौम्या ३ इत्याशिषोदत्वाप्रणवपूर्वकंलेखयेच्च ॥ ॐ नमःसिद्धंइतिपूर्वंपाठयित्वालेखयित्वाअकाराद्यक्षराणिपाठयेल्लेखयेच्चेतिसंप्रदायः ॥ इतिसंस्काररत्नमालायामक्षरारंभः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १२० ॥ बालानांवाक्शुद्ध्युपायः ॥

श्रीः ॥ वचाब्राह्मीचमंडूकाघनंकुष्टंसनागरं ॥ घृतेनपरिदेयंचचूर्णंवाक्पटुकारणं ॥ गुडूचिकामपामार्गविडंगंशंखपुष्पिका ॥ विष्णुक्रांतावचापथ्यानागरंचशतावरी ॥ चूर्णंघृतेनसंमिश्रंलिह्यात्प्रज्ञांविवर्धयेत् ॥ त्रिभिर्दिनैःसहस्रैकंश्लोकानामवधार्यते ॥ त्रिकटुत्रिफलाधन्यायवानीशतमूलिका ॥ वचाब्राह्मीतथाभार्ङ्गीचूर्णंसमधुलेहितं ॥ वाक्पटुत्वंचबालानांवीणावाद्यसमस्वरं ॥

॥ १२१ ॥ गर्भाधानाद्यंतरितसंस्कारनिर्णयः ॥

श्रीः ॥ प्रतिबंधवशात्उपनयनात्प्रागंतरितान्तसंस्कारान्प्रारब्धेनसंस्कारेणसहतत्तत्कालातिक्रमप्रायश्चित्तंकृत्वासर्वांस्तंत्रेणकुर्यात् ॥ चौलंतुसंस्कारेभ्यःपृथगुपनयनदिवसेवाकृत्वाउपनयनंकार्यं ॥ गर्भाधानादिचौलांतसंस्काराणामत्यगतौप्रायश्चित्तेनापिचरितार्थत्वं ॥ उपनयनप्रभृतिसंस्काराणामत्यगतावपिकालातिक्रमेसतितत्तत्कालातिक्रमप्रायश्चित्तंकृत्वोपनयनादयःसंस्कारास्त्ववश्यंकर्तव्याः ॥ प्रायश्चित्तंतुप्रतिसंस्कारंपादप्राजापत्यः ॥ चूडायामर्धप्राजापत्यः ॥ आलस्यादिनालोपेद्विगुणंकार्यं ॥ तच्चजपहोमब्राह्मणभोजनगोदानाद्यन्यतमप्रत्याम्नायेनकार्यं ॥ प्रणवव्याहृतिसहितयागायत्र्यासहस्रंतिलहोमः ॥ सप्रणवसमस्तव्याहृतिभिर्वाकेवलेनप्रणवेनवासहस्रंतिलहोमः ॥ अयुतंगायत्रीजपोवाद्वादशब्राह्मणभोजनंवारुद्रैकादशिनीज

१ वचावेखंडं, ब्राह्मीप्रसिद्धा, मंडूका मंडूकपर्णी दिंडाइतिभाषायां, घनोमुस्ता, कुष्टंप्रसिद्धं, नागरंशुंठी, गुडूचिकागुळवेली, अपामार्गआघाडा, विडंगंवायविडंग, शंखपुष्पीश्वेतपुष्पीप्रसिद्धा, विष्णुक्रांताप्रसिद्धा, पथ्याहरीतकी, सर्वत्रहरीतकीग्रहणेतस्यादलंग्राह्यं । त्रिकटुसुंठमिरेपिंपळी, धन्याधणे, यवानीओवा, अन्यानिप्रसिद्धानि. त्रिफलादिचूर्णंवाकल्पोक्तमात्रं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पोवाएकंगोदानंवाप्राजापत्यप्रत्यान्नायः॥ तीर्थयात्राद्यन्यदपिययासंभवदेशकालकर्तृतारतम्येनप्रायश्चित्तंप्रकल्प्यकृत्वासंस्का
राःकार्याः ॥ गर्भाधानाद्यन्नप्राशनांतानांतंत्रं ॥ तत्रसंस्कारेषुहोमस्त्वंगं॥ अंगजातंचसकृदनुष्ठितंसर्वत्रोपकरोति॥ यदपिवैशे
षिकमंगंसंप्रतिपन्नदेवताकंचेत्सकृदेवानुष्ठेयं ॥ यच्चविरुद्धधर्मकंवैशेषिकमंगंतदनुष्ठेयमेवनतस्यप्रसंगसिद्धिः ॥ अंगभूतेपिहो
मेकिंचिदंगंकिंचित्प्रधानमितितुव्यवहारः ॥ प्रतिकर्मसाधारणंयत्तदंगं ॥ यत्कर्मविशेषंप्रतिविशिष्यविधीयतेतद्वैशेषिकंप्रधान
मितिचव्यवहारः ॥ वस्तुतस्तुतद्वैशेषिकंमुख्यकर्मणोंगमेव ॥ यथाजयाद्यंगभूतोहोमोविधीयतेतत्रयद्वैशेषिकमंगंतदन्वाधा
नादौप्रधानमितिचोच्यते ॥ तत्सर्वमप्यंगमेव ॥ एवमन्यत्रापिअंगंप्रधानमितिचद्रष्टव्यं ॥ एवंचहोमांगगर्भाधानादीनिप्रधा
नानिअन्वर्थनामधेयानि ॥ गर्भआधीयतेयेनकर्मणातत्समंत्ररेतःसेकादिगर्भाधानं ॥ पुमान्सूयतेयेनकर्मणातत्पुंसवनंदधिद्र
प्सादिप्राशनं ॥ सीमंतउन्नीयतेयेनकर्मणात्रेण्याशलल्यायत्क्रियतेतत्सीमंतोन्नयनं ॥ अन्नंप्राश्यतेयेनतदन्नप्राशनं ॥ उपआ
चार्यस्यसमीपंनीयतेयेनकर्मणातत्समंत्रंप्रधानोपनयनमित्येवमादीनिप्रधानानिपृथक्पृथगनुष्ठेयानि ॥ तत्रयःसंस्कारोनिष्पन्न
स्तत्रापिमंत्राःपठनीयाः ॥ तावतैवसंस्कारइतिप्रयोगपारिजातेऽन्यत्रच ॥ गर्भाधानस्यजातत्वाच्छयनाह्वानमंत्रारेतोवस्कंद
नमंत्राश्चपठनीयाः ॥ पुंसवनेसीमंतेचहोमेधात्रीचतुष्टयरूपंवैशेषिकमंगमुक्तंतदेकवारमनुष्ठितंसत्पुंसवनेसीमंतेचोपकरोतीतिन
तस्यावृत्तिः ॥ संप्रतिपन्नदेवताकत्वात्तंत्रेणैवसिद्धेः ॥ दधिद्रप्सादिप्राशनंसीमंतोन्नयनादिकंचप्रधानंसमंत्रंपूर्ववदेवकुर्यात् ॥
जातकर्मणितु ॥ जातेश्मनिपरशुमित्यादिकाक्रियायाशक्यतेसासमंत्राकार्या ॥ अन्यत्रमंत्रपाठमात्रं ॥ मेधाजननेघृतप्राशना
दिसर्वंपूर्ववदेवकुर्यात् ॥ नामकर्मणिचहोमेवैशेषिकमंगमुक्तं ॥ धातारददातुनोरयिमितिद्वादशाहुतीर्जुहोतित्रयोदशेत्येकेषा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मिति ॥ तत्तथैवहोतव्यं ॥ तंत्रत्वेपिकेषांचिद्विरुद्धधर्मत्वात्केषांचिदप्राप्तविधानाच्चयथाप्राप्तएवहोमः॥ नामदानादिकंचसर्वं पूर्ववदेवकुर्यात् ॥ अन्नप्राशनहोमेतुवैशेषिकमंगमेवनास्ति ॥ त्रिवृत्प्राशनमन्नप्राशनंचसमंत्रंपूर्ववदेवकार्यम् ॥ ॥ छ ॥

॥ १२२ ॥ संस्कारलोपप्रायश्चित्तहोमः ॥

श्रीः ॥ उपनयनदिनात्पूर्वदिनेपद्व्याकुमारेणचसहकृतमंगलस्नानःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यकुमारस्यगर्भा धानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलसंस्काराणांकालातिपत्तिजनितप्रत्यवायपरिहारद्वाराश्रीपरमेश्वरप्री त्यर्थप्रायश्चित्तहोमंकरिष्येइतिसंकल्प्योल्लेखनादिविधिनाग्न्यायतनंसंस्कृत्यविटनामानंश्रोत्रियागारादाहृतंलौकिकमग्निंप्रतिष्ठा प्यप्रज्वाल्यध्यात्वाग्निंपरिस्तीर्योत्तरेणाग्निंदर्भान्संस्तीर्यतेषु दर्वींआज्यस्थालींप्रोक्षणीपात्रंउपवेषंसमार्गदर्भानवज्वलनदर्भानेकां समिधंआज्यंचेतिपात्राण्यासाद्यपवित्रेकृत्वाप्रोक्षणीःसंस्कृत्यपात्राणिप्रोक्ष्यदर्वीनिष्टपनादिपवित्रेअग्नावाधायेत्यंतंकृत्वाअग्निं अदितइत्याद्यैःपरिषिच्यासादितांसमिधमाधाय ॥ ॐ त्वंनोअग्ने० मुग्ध्यस्मत्स्वाहा अग्नयेवरुणायचेदं ॥ सत्वंनोअग्ने० एधि स्वाहा अग्नयेवरुणायचेदं ॥ इमंमेवरुण० चकेस्वाहा वरुणायेदं॥ येतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितताःपुरुत्रा ॥ तेभ्यो नइंद्रःसवितोतविष्णुर्विश्वेदेवामुंचंतुमरुतःस्वस्त्यास्वाहा वरुणायेंद्रायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यश्चेदं ॥ अयाश्चा ग्नेस्य० भेषजंस्वाहा अयासेग्नयइदं ॥ उदुत्तमंवरुण० स्यामस्वाहा वरुणायेदं ॥ अवतेहेडोव० कृतानिस्वाहा वरुणायेदं ॥

CC-0. In Public Domain Funding by MoE-IKS

ॐ भूर्भुवःसुवःस्वाहा प्रजापतयइदं ॥ इतिनिविष्टसमिधावाज्यंसंस्कृत्यस्रुचावाधायाज्यस्थालीमधिश्रित्य ॥ ततःपरिस्तरणानिविसृज्यअदितेऽनुमंसे

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

स्थाः इत्याद्यैरुत्तरपरिषेकंकृत्वाग्निंपूजयेत् ॥ ॥ अथयाम्रातसंस्कारसमस्तव्याहृतिभिरेकैकामेवाज्याहुतिंजुहुयात्नेतराःसप्ता हुतयः ॥ ॥ इतिसंस्काररत्नमालायांसंस्कारलोपप्रायश्चित्तहोमः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १२३ ॥ लुप्तसंस्कारप्रायश्चित्तम् ॥

श्रीः ॥ आचमनादिदेशकालोत्कीर्तनांतेममपुत्रस्यगर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनांतसंस्कारकर्मणां स्वकालेअकरणजनितप्रत्यवायपरिहारार्थं[1]पादकृच्छ्रंप्रायश्चित्तंतथाममपुत्रस्यचौलसंस्कारकर्मणःस्वकालेअकरणजनितिप्रत्यवा यपरिहारार्थंअर्धकृच्छ्रंप्रायश्चित्तंकरिष्ये इतिसंकल्पपूर्वकंविप्रभोजनहोमाद्यन्यतमद्वाराकुर्यात् ॥ सूर्यावलोकननिष्क्रमणयोः शास्त्रांतरोक्तत्वेनानावश्यकत्वान्नतदकरणेप्रायश्चित्तं ॥ एवंप्रायश्चित्तंविधायातीतान्संस्कानुपनयनदिनेतत्पूर्वदिनेवातंत्रेण कुर्यात् ॥ चौलंतूपनयनदिनएव ॥ प्रायश्चित्तेकृतेपश्चादतीतमपिकर्मवै ॥ कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितइति ॥

---

१ एतच्चालस्यादिनाऽकरणेर्धकृच्छ्रंचूडायांकृच्छ्रंज्ञेयं ॥ मुख्यकल्पासंभवेसहस्रसंख्यतिलहोमायुतगायत्रीजपद्वादशब्राह्मणभोजनाद्यन्यतमप्रत्या म्नायेनकुर्यात् ॥ पादकृच्छ्रेब्राह्मणत्रितयभोजनंअर्धकृच्छ्रेषड्ब्राह्मणभोजनंक्रमेणप्रत्याम्नायौ ॥ पादकृच्छ्रार्धकृच्छ्रयोर्गोदानरुद्रैकादशिनीजपादिरूपप्र त्याम्नायासंभवात्तिलहोमाद्यन्यतमएवप्रत्याम्नायः ॥ सचतुरीयांशरूपोर्धरूपइतिपादकृच्छ्रार्धकृच्छ्रानुसारेणकल्पनीयः ॥ पादकृच्छ्रेवस्त्रादानंकृच्छ्रा र्धेतैलकांचनं ॥ पादोनकृच्छ्रेगोदानंकृच्छ्रेगोमिथुनंस्मृतं ॥ इतिविष्णूक्तोवाप्रत्याम्नायःकल्पयितव्यः ॥ तैलयुक्तंकांचनंतैलकांचनमितिसमासः ॥ सहस्रसंख्यतिलहोमस्तुप्रणवव्याहृतिसहितयागायत्र्या–प्रणवसहितसमस्तव्याहृतिभिर्वा–केवलेनप्रणवेनवा ॥ अयुतगायत्रीजपस्तूपनयनोपदि ष्टतृतीयपाठेनकार्यः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १२४ ॥ गर्भाधानाद्यंतरितसंस्काराणांतंत्रम् ॥

श्रीः ॥ शुभेमुहूर्तेकृतमांगलिकोवस्त्राच्छादितेपीठेप्राङ्मुखउपविश्यस्वदक्षिणतःपत्नींसंस्कार्यंचोपवेश्यआचम्यप्राणानायम्यदे
शकालौसंकीर्त्यास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणद्वाराक्षेत्रसंस्कारव्यवहारान्नाद्यतेजआयुर्वर्चोभिवृद्धिद्वाराचश्रीपरमेश्व
रप्रीत्यर्थंअंतरितान्गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनसंस्कारांस्तंत्रेणकरिष्ये॥ अथवानामकर्मांतसंस्का
रानन्नप्राशनेनचौलेनवासहकरिष्ये॥ अन्यसंस्कारेणसहकरणेतुसंकल्पेऊहसंपादनंयथासंभवंद्रष्टव्यं॥ पृथक्संकल्पास्तु—सं०र०
ममास्याभार्यायाःप्रतिगर्भसंस्कारातिशयद्वारास्यांजनिष्यमाणगर्भाणांचबीजगर्भसमुद्भवैनोनिबर्हणक्षेत्रसंस्कारसिद्धिद्वाराश्रीप
रमेश्वरप्रीत्यर्थंगर्भाधानाख्यंकर्म, अस्यजातस्यबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्री० पुंसवनाख्यंकर्म, अस्यजातस्यजनिष्यमा
णगर्भाणांचबैजिकगार्भिकैनोनिबर्हणद्वाराश्री० सीमंतोन्नयनाख्यंकर्म, अस्यकुमारस्यगर्भोबुपानजनितदोषनिबर्हणबीजगर्भ
समुद्भवैनोनिबर्हणद्वाराश्री० जातकर्म, अस्यपुत्रस्यबीजगर्भसमुद्भवैनोनिबर्हणायुर्वर्चोभिवृद्धिव्यवहारसिद्धिद्वाराश्री० नाम
कर्म, अस्यशिशोरायुरभिवृभिद्वाराश्री० सूर्यावलोकनं, अस्यशिशोरायुःश्रीवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्री० निष्क्र
मणं, अस्यपुत्रस्यमातृगर्भमलप्राशनशुद्धिबीजगर्भसमुद्भवैनोनिबर्हणान्नाद्यब्रह्मवर्चसतेजइंद्रियायुरभिवृद्धिद्वाराश्री० अन्नप्रा
शनाख्यंकर्मचाद्य ॥ अस्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृद्धिद्वाराश्री० चौलाख्यंकर्म, अस्यामुकशर्मणः
कुमारस्यद्विजत्वसिद्धिपूर्वकवेदाध्ययनाधिकारसिद्धिद्वाराश्री० आचार्यपैतृकसावित्रीमातृकमुपनयनाख्यंकर्मचश्वस्तंत्रेणकरि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यकृत्वा ॥ उद्धननादिनाभूसंस्कारंविधायतत्रौपासनाग्निंप्रतिष्ठाप्यासंभवेलौ
किकंवायतनेनिधायप्रज्वाल्यसमित्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा ॥ पुंसवनसीमंतोन्नयननामकरणान्नप्राशनहोम
कर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमुक्त्वावैशेषिकहोमे ॥ धातारंचतुःपुनर्धातारंचतुरनुमतिंच
तूराकांद्विःसिनीवालींद्विःकुहूंचाज्येनांगहोमेवरुणंद्विरित्यादिसꣳस्रावेणेत्यंतमुक्त्वासमिधोग्नावाधाय ॥ व्याहृत्यंतंहुत्वावैशेषि
कहोमः ॥ पुंसवनसीमंतयोस्तंत्रेणधात्रीचतुष्टयंहुत्वा धा॒ताद॑दातुनोर॒यिमीशा॑० धा॒ताप्र॒जाना॑० धा॒ताद॑दातुनोर॒यिंप्राचीं॑०
धा॒ताद॑दातुदा॒शुषे॒० ॥ ततोनामकरणस्यद्वादशत्रयोदशवाहुतीर्हुत्वा ॥ तत्रधात्रीणांविरुद्धधर्मत्वान्नप्रसंगसिद्धिः ॥ अनु॑नो
द्यानु॑मति० अन्विद॑नुमते॒० अनु॑मन्यतामनु॒० यस्या॑मिदंप्र॒दिशि॒० रा॒काम॒हꣳ० यास्ते॑राके० सिनी॑वालि॒पृथु॑ष्टुके॒० यासु॑पा
णिः० कु॒हूम॒हꣳ० ॥ इमंमेवरुणेत्यादिसंस्थाजपांतंसमाप्यत्रिवृदन्नहोमंबलिकरणांतंसमाप्यपुण्याहवाचनेमह्यमित्यादिगर्भाधा
नपुंसवनसीमंतजातकर्मान्नप्राशनकर्मकारिणेपुण्याहंभवंतोब्रुवंत्वितित्रिर्यजमानः ॥ ॐ पुण्याहमितिविप्राः ॥ एवंस्वस्तिऋद्धि
मित्यपि ॥ एवंपुण्याहांतंहोमविधिंसमाप्य ॥ ततःक्रमेणप्रधानानि ॥ तत्रगर्भाधानमंत्रान्पठित्वापुंसवनस्योक्तरीत्यादधिद्रप्सा
दिप्राशयित्वासीमंतंचोन्नीयजातकर्ममंत्रान्पठित्वामेधाजननेपूर्ववत्समंत्रंघृतंप्राश्यपूर्ववन्नामदानादिकंचकृत्वाअन्नप्राशनरीत्या
त्रिवृत्समंत्रंप्राश्यअन्नप्राशनंचपूर्ववदेवकार्यं ॥ ततोभिषेकंकृत्वाकर्मसांगतासिद्धयेब्राह्मणभोजनंसंकल्प्यब्राह्मणान्संपूज्याशि
षोवाचयित्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ गर्भाधानादिविवाहांताःप्रजासंस्काराः ॥ केचनक्षेत्रसंस्कारा
अपि ॥ तेचगृह्याग्नौकर्तव्याः ॥ गृह्याग्न्यभावेलौकिकाग्नौ ॥ उपनयनादिविवाहांताःसंस्कारालौकिकाग्नावेव ॥ उपनयनादि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संस्काराणांतंत्रंनभवति ॥ पूर्वसंस्कारसंस्कृतएवोत्तरसंस्कारेऽधिकारी ॥ गर्भाधानादिक्रमंविहायोपनयनमुखेनसंस्काराम्ना नंकुर्वताचार्येणोपनयनादीनांप्राधान्यस्योक्तत्वात् ॥ अत्रपितर्यसन्निहितेपिपितृव्यादिर्भ्रात्रादिर्वासंस्कारान्कुर्यात् ॥ इतिस त्याषाढहिरण्यकेशी० अंतरितसंस्काराणांतंत्रेणप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

॥ १२५ ॥ नांदीश्राद्धोपयोगीविचारः ॥

श्रीः ॥ वृद्धिश्राद्धंतुगर्भाधानादिगर्भसंस्कारेषुजातकर्मादिष्वपत्यसंस्कारेषुअग्न्याधानादिषुश्रौतकर्मसुश्रवणाकर्मादिषुवापीकूप तडागारामाद्युद्यापनादिषुदेवप्रतिष्ठायांवानप्रस्थाश्रमसंन्यासस्वीकारेतुलापुरुषादिमहादानादौनवगृहप्रवेशेमहानाम्न्यादिवेद व्रतेषुराजाभिषेकशांतिकपौष्टिकेषुसर्वेषुउपाकर्मोत्सर्जनयोरप्येकेनवीनयोर्वातयोरन्यत्राप्येवंविधेकार्यं ॥ इदमाभ्युदयिकश्रा द्धंमातृपूजनंचैकस्यानेकसंस्कारेष्वेककर्तृकेषुयुगपदुपस्थितेषुसर्वादौसकृदेवतंत्रेणकार्यं ॥ नतुप्रतिसंस्कारमावृत्त्या ॥ दैवाद कृतजातकर्मादिकस्योपनयनकालेजातकर्माद्यनुष्ठानेदेशांतरगतस्यमृतबुद्ध्याकृतौर्ध्वदैहिकस्यागतस्यपुनर्जातकर्मादिसंस्कारा णांविहितानांयुगपदनुष्ठाने कर्मनाशाजलस्पृष्टादीनांप्रायश्चित्ततयापुनःसंस्काराणांयुगपदनुष्ठानेवा ॥ तदुक्तंब्रह्मपुराणे ॥ गणशःक्रियमाणानांमातृभ्यः(मातृणां)पूजनंसकृत् ॥ सकृदेवभवेच्छ्राद्धमादौनपृथगादिषु ॥ वृद्धिश्राद्धंनवदैवेत्यं ॥ पार्वण त्रयात्मकं ॥ तत्रक्रममाहाश्वलायनाचार्यः ॥ मातापितामहीचैवसंपूज्याप्रपितामही ॥ पित्रादयस्त्रयश्चैवमातुःपित्रादयस्त्रयः ॥ एतेनवार्चनीयाःस्युःपितरोभ्युदयेद्विजैः ॥ अत्रसत्यवसूविश्वेदेवौसोमयागगर्भाधानपुंसवनसीमंतोन्नयनाधानादिकर्मांगभूतवृ द्धिश्राद्धेकृतदक्षसंज्ञकौविश्वेदेवौ ॥ इतिसिंध्वा[illegible]पाणिग्रहेपुनः ॥ अतऊर्ध्वंप्रकुर्वीतस्वयमेवा

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

थनांदिकम् ॥ कात्यायनः॥ स्वपितृभ्यः पितादद्यात्सुतसंस्कारकर्मसु ॥ पिंडानोद्वाहमात्तेषांतस्याभावेतुतत्क्रमात् ॥ जीवेत्तुयदि वर्गाद्यस्तंवर्गंतुपरित्यजेत् ॥ गौर्यादिमातृकापूजनंनांदीश्राद्धांगं ॥ यत्रनांदीश्राद्धंनक्रियतेतत्रमातृकापूजनमपिनकार्यं ॥ ॥

॥ १२६ ॥ नांदीश्राद्धाधिकारिणः ॥

श्रीः ॥ प्रथमविवाहांतेषुसुतसंस्कारेषुपितावृद्धिश्राद्धंकुर्यात् ॥ द्वितीयादिविवाहेतुवरएवकुर्यात् ॥ प्रथमविवाहेयदिपित्रादीनांसर्वेषांवक्ष्यमाणानामधिकारिणामभावस्तदापिस्वयमेव ॥ प्रवासादिनापितुरभावेनज्येष्ठभ्राताकुर्वन्स्वपितुःपितृभ्योदद्यात् ॥ यदितुपितानजीवतिपितामहस्तुप्रवासस्थितःतदापितृपितामहप्रपितामहवृद्धप्रपितामहानुद्दिश्यपार्वणंकुर्यात् ॥ एवंमातृमातामहपार्वणयोरपिद्रष्टव्यं ॥ सर्वेषांजीवनेनांदीश्राद्धलोपएवनित्यवन्नांदीश्राद्धविधिनैवकुर्यादितिलोपशास्त्रसहकृतेनतत्प्रापणात् ॥ सर्वेषांयथोक्ताधिकारिणामभावेनयदिमातापुत्र्यादिविवाहंकुर्यात्तदास्वयंसंकल्पमात्रंकृत्वास्वस्तिवाचननांदीश्राद्धादिकंसर्वंब्राह्मणद्वाराकारयेदितिप्रयोगपारिजाते ॥ समावर्तनेनांदीश्राद्धंपितैवकुर्यात् ॥ प्रवासादिनापितुरभावेस्वयमेवेतिकेचित् ॥ अत्रपितरिविद्यमानेपिस्वयमेवकुर्यादित्यन्ये ॥ सुतसंस्कारेषुअजीवन्मातृपितृमातामहःपितास्वमात्राद्युद्देश्यकंपार्वणत्रयंकुर्यात् ॥ मातरिजीवत्यांतत्पार्वणलोपः मातामहेजीवतितत्पार्वणस्य तदापार्वणद्वयेनैवनांदीश्राद्धसिद्धिः ॥ मातृमातामहजीवनेपितृपार्वणेनैवनांदीश्राद्धसिद्धिः पितृमातृजीवनेमातामहपार्वणेनैव॥ पितृमातामहजीवनेदेवरहितेनमातृपार्वणेनैव ॥ जीवत्प्रपितामहःपितृपितामहवृद्धप्रपितामहानुद्दिश्यपितृपार्वणंकुर्यात् ॥ जीवत्पितामहप्रपितामहःपितृवृद्धप्रपितामहातिवृद्ध

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रपितामहानुद्दिश्यपितृपार्वणंकुर्यात् ॥ एवंमातृमातामहपार्वणयोरपिद्रष्टव्यं ॥ सापत्नमातरिमृतायांतयासहैवमातृपार्वणं कार्यं ॥ सपत्न्योःपितामहीप्रपितामह्योरपिस्वपितामहीप्रपितामहीभ्यांसह ॥ स्वमातरिजीवत्यामपिसापत्नमात्रामातृपार्वणनिर्वाहइतिकेचित् ॥ तन्न ॥ तस्याएकोद्दिष्टदेवतात्वेनपार्वणेनुप्रवेशाभावात् ॥ आपरपक्षिकान्वष्टक्यादिश्राद्धवत्प्रापकवचनाभावाच्च ॥ मातामहपार्वणेमुख्यमातामह्यादिषुजीवतीषुतत्सपत्नीभिःसपत्नीकत्वगुणोपपत्तिर्द्रष्टव्येतिकेचित् ॥ वर्गत्रयाद्यानां जीवनेसुतसंस्कारेषुनांदीश्राद्धलोपएव ॥ एवंस्वस्यद्वितीयादिविवाहांगत्वेननांदीश्राद्धंकुर्वन्जीवत्पितृकस्तुपितुःपित्रादीनुद्दिश्यपार्वणंकुर्यात् ॥ जीवत्पितृपितामहस्तुपितामहस्यपित्रादीनुद्दिश्यपार्वणंकुर्यात् ॥ एवंमातृमातामहपार्वणयोरपीतिकेचित् ॥ अन्येतुअस्मिन्विषयेतत्तद्वर्गाद्यजीवनेतत्तत्पार्वणलोपएवेतिवदंति ॥ आत्मीकृत्यसुवर्णेनपरकीयांतुकन्यकां ॥ धर्म्येणविधिना दातुमसगोत्रोपियुज्यतइतिस्कांदात् ॥ अनाथांकन्यकांदत्वासदृशेनाधिकेवरे ॥ द्विगुणंफलमाप्नोतिकन्यादानेयदीरितमिति विष्णुधर्मोत्तरवचनाद्वाकेनापिहेतुनाकन्यांदातुमशक्नुवतादानाधिकारिणात्वंकन्यादानंकुर्वितिप्रार्थनाद्वायःपरकन्यांदातुमिच्छतिसोपिसंस्कार्यकन्यायाःपित्रादीनुद्दिश्यतस्याजीवत्पितृकत्वेतदीयमात्राद्युद्देश्यकपार्वणानुष्ठानंयथासंभवंकुर्यात् ॥ दत्तकपुत्रस्तुयदिलब्धबीजिरिक्थस्तदोभौपितरौपितामहौप्रपितामहौचोद्दिश्यकुर्यात् ॥ एवमितरयोःपार्वणयोर्बोध्यं ॥ यदितुबीजिरिक्थग्रहणेधिकार्यतरसंभवाद्गोत्ररिक्थेजनयितुर्नभजेद्दत्रिमःसुतइतिशास्त्रादलब्धतद्रिक्थस्तदाप्रतिगृहीतकुलसंबद्धपित्रा

CC-0. In Public Domain.Funding by MoE-IKS

॥ ६२ ॥ ॥ ६३ ॥

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १२७ ॥ नांदीश्राद्धप्रयोगः ॥

श्रीः ॥ तत्रायंविशेषः ॥ सर्वंपितृकर्मापियज्ञोपवीतिनैवयवैस्तिलैःकार्यं ॥ प्रदक्षिणमुपचारःअमूलादर्भाः अत्रप्राङ्मुखोदङ्मुख तएव देवतीर्थमेव प्रागग्राएवआसनादिषुदर्भाः रेखाअपिप्राग्ग्राः नतिलोदकं नसव्यजानुनिपातनं ननामग्रहणं नास्मद्गोत्रव सुरूपादिशब्दाः स्वधाशब्दस्थानेस्वाहाशब्दः संस्कारांगनांदीश्राद्धेदर्भस्थानेदूर्वाः आधानसोमाद्यंगभूतेतुदर्भाएव नात्ररक्तचं दनपुष्पमालानिषेधः आदौमातृवर्गः मध्येपितृवर्गः मातामहवर्गःसपत्नीकः पूर्वाह्णएवश्राद्धारंभः ॥ निहन्मिसर्वइति यवार क्षंत्व० येराक्षसाःयवप्रकि० इतियवानेवविकिरेत् ॥ ततःअपवित्रःपवित्रोवा० इतिपुंडरीकाक्षंध्यात्वादेशकालौसंकीर्त्यसत्यवसु संज्ञकाविश्वेदेवाःनांदीमुखाः मातृपितामहीप्रपितामह्यःनांदीमुखाः (नांदीमुख्यइत्यपि) पितृपितामहप्रपितामहाःनांदीमुखाः मातामहमातुःपितामहमातुःप्रपितामहाःसपत्नीकाःनांदीमुखाः एतानुद्दिश्यश्वोद्यवाकरिष्यमाणामुककर्मांगत्वेनविहितंनांदी श्राद्धमद्यकरिष्यइतिसंकल्पंकुर्यात्॥जीवत्पितृकस्यपितुःमातृपितामहीत्यादि॥ जीवदुभयादेस्तुपितामहस्यमातृपितामहीत्यादि यथायथमुल्लेखः ॥ अस्मिन्नांदीश्राद्धेसत्यसंज्ञकानांविश्वेषांदेवानांस्थानेयुवांनिमंत्रयेइतिनिमंत्र्ययुवाभ्यांक्षणःकरणीयइतिप्रथ मदेवार्थंब्राह्मणद्वयंनिमंत्र्य वसुसंज्ञकानांविश्वेषांदेवानांस्थानेयुवामित्यादिविप्रद्वयनिमंत्रणं ॥ अस्मिन्नांदीश्राद्धेमातृपितामही

---

१ शुभायप्रथमांतेनवृद्धौसंकल्पमाचरेत् ॥ नषष्ठ्यायदिवाकुर्यान्महादोषोभिजायते ॥ अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम् ॥ अनाम्नांचा-तिलाद्यैश्चनांदीश्राद्धंचसव्यवत् ॥ संबंधनामगोत्राणिवर्जयेदत्रकर्मणि ॥ पिंडनिर्वपणंकुर्यान्नवाकुर्यान्नराधिप ॥ दधिकर्कंधुसंमिश्रान्पिंडान्दद्याद्यथा-क्रमम् ॥ एकंनाम्नापरंतूष्णींदद्यात्पिंडद्वयंबुधः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रपितामहीनांनांदीमुखानांस्थानेयुवांनिमंत्रयेयुवाभ्यांक्षणःकरणीयइतिद्वयं॥ अस्मिन्० पितृपितामहप्रपितामहानांनांदीमुखा
नांस्थानेयुवामित्यादिद्वयं ॥ अस्मिन्० मातामहमातुःपितामहमातुःप्रपितामहानांनांदीमुखानांस्थानेयुवामित्यादिविप्रद्वयंनि
मंत्र्यपाकसिद्ध्युत्तरं पाकःसिद्धआगम्यतांदैवेक्षणःक्रियतांइतियथायथंयज्ञोपवीत्येवनिमंत्र्यप्रातःषट्घटिकानंतरंस्नात्वाचम्य
प्राणानायम्य समस्तसंपदितिब्राह्मणान्प्रदक्षिणीकृत्येत्यादिअग्नौकरणांतंमासिश्राद्धवत्कुर्यात्॥ मातृपार्वणेविप्राभावेपूजनपूर्व
कंस्त्रियोभोज्याः देवपाद्यदानोत्तरंमात्रादीनामपिचतुरस्रमंडलएवपाद्यदानं ॥ प्राप्नुतांभवंतौप्राप्नवाव इतिप्रश्नप्रतिवचनयो
रूहः ॥ आसनेऋजवएवदर्भाः प्रदक्षिणमेवकुशासनं यवोसियवयेत्यनेनैवयवप्रक्षेपणं तत्तद्युग्माद्यविप्रकराग्रंतत्तद्द्वितीयविप्र
करेसंस्थाप्यकराग्रेणपवित्राग्रंतेनतेनधारयित्वातत्रतत्रतंत्रेणार्घ्यंदेयं ॥ नांदीमुखान्पितॄनावाहयिष्येइत्यावाहनानुज्ञावाक्यं ॥
मध्यमयांगुल्यैवगंधदानंद्विर्द्विरेव ॥ पुष्पाणिमालतीशतपत्रीमल्लिकाकुब्जकेतकीपाटलानिमालाश्चैषामेवपुष्पाणामिति ॥ तत
श्चतुरस्राण्येवमंडलानिविधायतेषुसर्वेष्वपिसौवर्णान्येवसर्वाणिभोजनपात्राणि अलाभेमधुकपलाशग्राम्यकदल्याद्यन्यतमपत्रा
णिसंस्थाप्यसर्वपात्राणांपरितःबृहत्सामेतिप्रदक्षिणमेवभस्ममर्यादांकृत्वाकरशुद्धिंचविधाय आसादितेषुपात्रेषूपस्तीर्य होमार्था
न्नोद्धरणार्थंपात्रमुपस्तीर्यगृहीत्वाउद्धरिष्याम्यग्नौचकरिष्यामिइतिब्राह्मणानामंत्रयते ॥ काममुद्ध्रियतांकाममग्नौचक्रियतामिति
विप्राअनुज्ञांदद्युः ॥ ततःकर्ताअपांमेध्यमितिमंत्रेणतूष्णीमेववाअमूलमेवमहद्बर्हिराच्छिद्यतूष्णींपरिस्तरणार्थानमूलानेवदर्भाना
च्छिद्यउभयंबद्ध्वानधोनिदधाति ॥ ततःदक्षिणाग्निमौपासनाग्निंवातदभावेअयाश्चेत्यादिविधिनोत्पादितमग्निंप्रागुदगग्रैर्दर्भैःपरि
स्तीर्यतूष्णीमेवप्रदक्षिणंपरिषिच्यपिंडदानार्थंपृ[illegible]दधनितदर्धमाज्यमानीयालोडयेत्तत्पृषदाज्यं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भवति ॥ अत्रासंस्कृतमेवाज्यं ॥ ततउत्पूतेननवनीतेनानुत्पूतेनाज्येनवाभिघार्योद्धास्याग्नेःपश्चान्निधायदक्षिणंजान्वाच्यमेक्षणे नोद्धृतान्नैकदेशमुपहत्यसोमायपितृपीतायस्वाहा सोमायपितृपीतायेदं ॥ पुनरुपहत्य यमायांगिरस्वतेपितृमतेस्वाहा इतितृती याहुत्यर्थंकानिचित्सिक्थान्यवशेष्यद्वितीयामाहुतिंजुहोति॥अग्नयेकव्यवाहनायेदं०॥ततस्तूष्णींमेक्षणमनुप्रहरति ॥ ततःपात्रेषु मधुरद्रव्यसहितंअनम्लद्रव्यव्यंजनसहितमन्नंपरिविष्यहुतावशिष्टंकिंचित्पितृपात्रेषुपरिविष्यदेवेभ्योनैवेद्यंसमर्प्य सत्यंत्वर्तेन० परिषिच्यपृथिवीतेपात्रमित्याद्युक्त्वा सत्यसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनांदीमुखेभ्यइदमन्नंसोपस्करंस्वाहाहव्यंनममइतिविप्रद्व यहस्तयोःउदकंदत्त्वा वसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनांदीमुखेभ्यइदमन्नंसोपस्करंस्वाहाहव्यंनममेतिद्वितीयदेवविप्रद्वयहस्त योरुदकंदत्वायेदेवादिवीत्युपतिष्ठते ॥ ततःसत्यं० परिषिच्यपृथिवीतेपात्रंद्यौ० म्यक्षितमसिमामातृपितामहीप्रपितामहीनांनांदी मुखानांक्षेष्ठाअमुत्रामुष्मिन्लोके इतिमातृवर्गीयविप्रपात्रद्वयस्थमन्नंमंत्रावृत्त्याभिमृश्यइदंविष्णु० विष्णोहव्यंरक्षस्वइतितयोरं गुष्ठमनखंमंत्रावृत्त्यातत्तदन्नेनिवेश्यमातृपितामहीप्रपितामहीभ्योनांदीमुखाभ्यइदमन्नंसोपस्करंस्वाहाहव्यंनममइतिमातृवर्गी यविप्रहस्तयोरुदकंदद्यात् ॥ एवमूहेनपितृपार्वणे ॥ मातामहपार्वणेनांदीमुखशब्दात्पूर्वंसपत्नीकशब्दप्रयोगः ॥ एवमन्नंनिवेद्य कुलदेवतांसंपूज्ययंतुनदयइतिपठित्वानांदीमुखाःपितरःप्रीयंतामितिवाचयित्वा प्रीयंतांनांदीमुखाःपितरइतितैरुक्तेतान्नमस्कृ त्यब्रह्मार्पणंकृत्वापरिविष्टान्नेषुसर्पिरासिच्यअपोशानोदकदानादियथासुखंजुषध्वमित्युक्त्वाअपेक्षितंयाचितव्यमितिविप्रप्रार्थ नांतंकुर्यात् ॥ विप्राःपरिषेकबलिदानवर्जविधिनाभुंजीयुः ॥ तेषुभुंजानेषुराक्षोघ्नंपवमानानुवाकं आशुःशिशानइत्यनुवाकं इंद्रं वोविश्वतस्परिहवामहइत्यादीनैंद्रमंत्रांश्चाभिश्रावयेत् ॥ भोजनांतेमधुवाताइत्येतस्यस्थानेउपास्मैगायतानरइतिपंचर्चःश्रावये

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्अक्षन्नमीमदंतेतिच ॥ ततःसत्यसंज्ञकाविश्वेदेवानांदीमुखाः नांदीश्राद्धंरुचितं वसुसंज्ञकावि० नांदी० रुचितं मातृपितामही प्रपितामह्यः नांदीमुखाः नांदी० पितृपितामहप्रपितामहा नांदीमु० मातामहमातुःपितामहमातुःप्रपितामहाः सपत्नीकानांदीमुखाः संपन्नंइतितत्तद्विप्रंप्रतिवदेत् ॥ सुरुचितमितिदेवविप्रौप्रतिब्रूयुः ॥ सुसंपन्नमितिपितृविप्राःप्रतिब्रूयुः ॥ एतावेवात्रतृप्तिप्रश्नौ ॥ ततउच्छिष्टभाग्भ्योन्नंदीयतामित्यादिविप्राचमनांतंसमानं ॥ आचांतेषुविप्रेषुशीघ्रमुच्छिष्टंनिष्काश्यभूमिंसंमार्ज्यपिंडदानंकुर्यात् ॥ तत्रायंविशेषः ॥ मार्जयंतांमातरोनांदीमुखाःसोम्यासः मार्जयंतांपितामह्योनांदीमुखाःसोम्यासः मार्जयंतांप्रपितामह्योनांदीमुखाःसोम्यासः मार्जयंतांपितरोनांदीमुखाःसोम्यासः मार्जयंतांपितामहानांदी० सो० मार्जयंतांप्रपिता० नां० सो० मार्ज० मातामहानां० सो० मार्ज० मातुःपिताम० नां० सो० मार्ज० मातुःप्रपितामहानां० सो० इत्येतैर्यथायथंतत्तद्रेखायांदेवतीर्थेनैवोदकांजलिनिनयनं ॥ प्रतिपिंडंतूष्णींद्वितीयःपिंडःतत्तत्पिंडसमीपेतत्तद्द्वितीयपिंडार्थंउदकांजलिदानमपिकर्तव्यं ॥ सर्वमंत्रेषुसपत्नीकत्वाभिध्यानमात्रंनतुतच्छब्दस्योल्लेखः ॥ एतत्तेमातर्नांदीमुखेयंतेपिंडःस्वाहा ॥ एतत्तेपितामहिनांदीमुखेयंतेपिंडःस्वाहा एतत्तेप्रपितामहिनांदी० एतत्तेपितर्नांदीमुख० एतत्तेपितामहनांदीमुख० एतत्तेप्रपितामहनांदी० एतत्तेमातामहनांदी० एतत्तेमातुःपितमहनांदी० एतत्तेमातुःप्रपितामहनांदीमुखायंतेपिंडःस्वाहाइत्येतैर्यथायथंतत्तद्रेखास्थबर्हिषिदेवतीर्थेनैवपृषदाज्यदधिबदराक्षतयवैरुद्धृतमन्नंमिश्रयित्वातेनपिंडान्दद्यात् ॥ अत्रापिसपत्नीकत्वाभिध्यानमात्रं ॥ सर्वाभावेपृषदाज्ययवमात्रमिश्रणं ॥ प्रतिपिंडंतूष्णींद्वितीयपिंडदानं ॥ आपोदेवी० स्वाहया० गच्छंतुपितरोनांदीमुखाःस्योनाः० तमेपितृन्नांदीमुखान् अत्रपितरोनांदीमुखायथा० [illegible] मा० आंक्ष्वमातर्नांदीमुखेइत्याद्यूहेनअंजनंद

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्यात् ॥ अभ्यंक्ष्वमातर्नांदीमुखेइत्याद्यूहेनअभ्यंजनंदद्यात् ॥ एतानिवः पितरोनांदीमुखावासांसिइत्येवमूहितेनदशामूर्णास्तु कांश्छित्वाछित्वापिंडेषुक्षिपतिपूर्ववेवयसि उत्तरेवयसितुदक्षिणप्रकोष्ठस्थंहृदयस्थंलोमछित्वाछित्वातेनैवमंत्रेणप्रक्षिपति ॥ दशा वोर्णास्तुका० ॥ ततःपितृभ्योनांदीमुखेभ्योनमइतिगंधादिभिःपूजयेत् ॥ अत्रआरक्तगंधारक्तपुष्पाक्षतमालाद्यपिदेयं ॥ ततो नमोवःपितरोरसायेत्यादिषुपितृशब्दोत्तरंनांदीमुखशब्दप्रयोगः नमोवःपितरोनांदीमुखारसायपितरोनांदीमुखानमोवोयएत स्मिन्० नमोवःपितरोनांदी० शुष्मा० पितरोनांदी० नमोवःपितरो० नां० जीवाय० नमोवःपितरोनांदीमुखाःस्वाहायैपि० नां० नमोवःपितरोनांदीमुखामन्यवे० नमोवःपितरोनांदीमुखाघोरायपितरोनांदीमुखानमोवोयएतस्मिन्लोके० ऊर्जस्वतीस्वाहयावं दमानास्ता० उत्तिष्ठतपितरोनांदीमुखाःप्रेतपूर्वे० परेतपितरोनांदीमुखाःसोम्या० अथापितृन्नांदीमुखान्सुविदत्रान्० यंतुपित रोनांदी० मुखामनसाजवेन ॥ मनोन्वा० स्तोमेन पितृणांनांदीमुखानांचमन्मभिः० पुनर्नःपितरोनांदीमुखामनोददातु० पात्रो त्सर्गांतंसमानं ॥ निरग्निकस्यात्रपिंडदानंकुलधर्मानुसारेणकृताकृतंसाग्निकस्यतुनियतमेव ॥ ततःशिवाआपःसंत्वित्यादिअस्मि न्श्राद्धेदत्तैरन्नोदकादिभिर्नांदीमुखाःपितरःप्रीयंतामितिभवंतोब्रुवंत्वित्यक्षय्यंदत्वा प्रीताःसंत्वितितैरुक्तेसर्वेभ्योविप्रेभ्योद्राक्षा मलकमूलयवान्निष्क्रयंवादक्षिणाःपांत्वितिदक्षिणांदद्यात्तांबूलंच ॥ ततोदातारोनोभिवर्धंतामिति विप्राःप्रतिब्रूयुः ॥ ततो नांदीमुखाःपितरःप्रीयंतामितिभवंतोब्रुवंत्वितिकर्तावदेत् ॥ प्रीयंतांनांदीमुखाःपितरइतिविप्राः ॥ मद्गृहेसततंशोभनमस्त्विति भवंतोब्रुवंत्वितिकर्तावदेत् ॥ त्वद्गृहेसततंशोभनमस्त्वितिविप्राःप्रतिब्रूयुः ॥ अत्रसर्वान्पिंडान्त्यमूषुवाजिनमितिमंत्रेणोद्धृत्या प्सुक्षिपति ब्राह्मणंवाभोजयतीत्यादिप्रतिपत्त्यंतरंतुदर्शश्राद्धवत् ॥ नात्रपिंडप्राशनंपत्न्याः ॥ ततोबर्हिरग्नौप्रहरति ॥ येसमा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नाःसमनसःपितरोनांदीमुखायमराज्ये० ॥ पिंडस्थानेजलमासिच्य वाजेवाजेइत्यस्यस्थाने ॥ त्यमूषुवाजिनंदेवजूतंसहावानंतरुतारंरथानां ॥ अरिष्टनेमिंपृतनाजमाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम ॥ इतिमंत्रमुक्त्वापितॄन्देवांश्चविसर्जयेत् ॥ ततःकूर्चद्वयंविस्रस्य आमावाजस्य० आमागंतांपितरानांदीमुखामातरानांदीमुखाश्चामासो० स्वादुषꣳसदःपितरोनांदीमुखावयोधाः ब्राह्मणासःपितरोनांदीमुखाःसोम्यासःशिवेनो० इत्यूहेनमंत्रान्वदेत् ॥ ततोविप्राः इहैवस्तंमा० आयुःप्रजां० प्रीतास्तुभ्यंपितामहानांदीमुखाःइत्याशिषोदद्युः ॥ ततोयजमानःमातापितामहीचैव० प्रमातामहकस्तथा ॥ एतेभवंतु० मंगलमितिविप्रान्वदेत् ॥ विप्राःमात्रादयःप्रीताःमंगलंप्रयच्छंतुइतिप्रतिब्रूयुः ॥ तत्तत्पार्वणाद्यजीवनवशेनयस्यकस्यचित्पार्वणलोपेतत्तत्पार्वणविषयकश्लोकैकदेशलोपः ॥ केवलमातृपार्वणकरणेएताभवंतुसुप्रीताइत्यूहः देवाअप्यत्रनकार्याः ॥ ततःइडामग्ने० इत्यनेनमंत्रेणआचारात्पात्रेणकिंचिद्द्रव्यंसंघट्टयेत् ॥ ततःअद्यमेसफलमित्यादियस्यस्मृत्येत्येतदंतंकृत्वाअनेननांदीश्राद्धाख्येनकर्मणापरमेश्वरःप्रीयतांनमम इतिकर्मसमर्प्यविष्णुंसंस्मृत्यपवित्रेविसृज्याचम्यमातृन्विसर्जयेत् ॥ निरग्निकस्यपिंडदानाकरणकल्पेसांकल्पिकविधिः ॥ अत्र वैश्वदेवआदावंतेचकर्तव्यइतिकेचित् नचब्रह्मचर्यादिनियमाः अत्रतर्पणेविशेषः ॥ पितरंनांदीमुखंतर्पयामिपितामहंनांदीमुखं तर्पयामीत्येवंकेवलजलेनतर्पणं ननामग्रहणंनप्राचीनावीतंतर्पणाभावएववा ॥ इतिसंस्काररत्नमालायांवृद्धिश्राद्धप्रयोगः ॥

॥ १२८ ॥ उपनयनपूर्वदिनकृत्यं ॥

श्रीः ॥ उद्धननादिचतुर्थदिवसीयसावित्रीव्रतविसर्गांतमुपनयनं ॥ ज्योतिर्विदादिष्टेसुमुहूर्तेकुमारस्योपनयनंकर्तव्यं ॥ ततः

प्राग्दिनेतद्दिनेवाकृतमांगलिकआचार्यःवस्त्रान्वितोभोजनपात्रसहितःसपवित्रपाणिरुदक्प्रवणदक्षिणतःपत्नीतदक्षिणतःसंस्कार्यंचोपवेश्यआच CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

म्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यामुकशर्मणःपुत्रस्यद्विजत्वसिद्धिपूर्वकवेदाध्ययनाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंआचार्यपैतृकसावित्रीमातृकसंस्काररूपमुपनयनाख्यंकर्मकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंग्रहाणामानुकूल्यार्थंग्रहमखंमंडपदेवताप्रतिष्ठापनंचकरिष्येइतिसंकल्प्योक्तरीत्याकुर्यात् ॥ ततःषोडशद्वादशाष्टहस्तान्यतमपरिमितःसमद्वारिमंडपःकार्यः ॥ तत्रसमवामभागेसंस्कार्यचतुर्हस्तायताहस्तमात्रोच्छ्रायासुलक्षणावेदिःकार्या ॥ ॥

॥ १२९ ॥ मंडपदेवताप्रतिष्ठा ॥

श्रीः ॥ दूर्वाशमीपल्लवकुलदेववृक्षपल्लवांस्तच्छाखावाऽऽम्रादिप्रशस्तवृक्षपत्रवेष्टितान्सूत्रेणषोढावेष्टयेत् ॥ तत्रएकत्रमुसलमेकत्रक्षुरिकादिशस्त्रंमध्येप्रक्षिप्यवेष्टयेत् ॥ तान्षट्वंशपात्रेनिधायउदक्संस्थेषुचतुर्षुक्रमेणनंदिनीनलिनीमैत्रोमास्तदुत्तरस्थमुसलगर्भेपशुवर्धिनींततउत्तरस्थशस्त्रगर्भेभगवतींचसूक्ष्ममृन्मयकलशद्वयेएकस्मिन्वायथाचारंतंडुललड्डुकपूर्णेहिरण्यहरिद्रापूगफलयुतेन्युब्जशरावपिहितेसूत्रवेष्टितेअविघ्नपसंज्ञकंगणपतिंचावाह्ययथा ॥ नंदिन्यैनमःनंदिनींआवाहयामि ॥ नलिन्यैनमःनलिनीआ० ॥ मैत्रायैनमःमैत्रामा० ॥ उमायैनमःउमामा० ॥ पशुवर्धिन्यैनमःपशुवर्धिनीमा० ॥ शस्त्रगर्भाभगवत्यैनमःशस्त्रंगर्भां० ॥ अविघ्नपसंज्ञकगणपतयेनमः ॥ अविघ्नप० ॥ एताःपात्रांतरेआवाह्य ॐ नर्यप्रजांमेंगोपाय ॥ अमृतत्वायजीवसें ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ नंदिन्याद्यावाहितदेवताःसुप्रतिष्ठिताःसंतु० ॥ नंदिन्याद्यावा० ॐ ध्यायामि ॥ आसनं० पाद्यं० अर्घ्यं० आचमनीयं० ॥ तैलोद्वर्तनोष्णोदकैरभ्यंगस्नानंषण्णांवेष्टितानामविघ्नपस्यचकारयित्वा ॥ कनिक्रद

१ महेश्वरभट्टैर्विवाहप्रकरणेनांदीश्राद्धात्पूर्वमविघ्नसंज्ञकगणपतिमावाह्येत्युक्तंपक्षांतरमनुकल्पेनोपनयनेपियोज्यं ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेवनावं ॥ सुमंगलश्चशकुनेभवासिमात्वाकाचिदबिभाविश्व्यावदत् ॥ मात्वाश्येनउद्वधीन्मासु
पर्णोमात्वाविददिषुमान्वीरोअस्ता ॥ पित्र्यामनुप्रदिशंकानिक्रदत्सुमंगलोभद्रवादीवदेह ॥ अवक्रंददक्षिणतोगृहाणांसुमंग
लोभद्रवादीशकुंते ॥ मानस्तेनईशतमाघशंसोबृहद्वदमविदथेसुवीराः ॥ प्रदक्षिणिदभिगृणंतिकारवोवयोवदंतऋतुथाशकुंतयः॥
उभेवाचौवदतिसामगाइवगायत्रंचत्रैष्टुभंचानुराजति ॥ उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशु
मतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचींकिद्धि
नः ॥ यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराः ॥ नंदिन्याद्यावाहितदे० मांगलिकस्नानं० ॥ वस्त्रं० गंधं०अक्षतान्०
पुष्पाणि० धूपं० दीपं० नैवेद्यं० तांबूलं० फलं० दक्षिणांपुष्पांजलिं० इत्यादिपूजांसमाप्यवस्त्राच्छादितवंशपात्रेआग्नेयकोणे
नंदिनीनामवेष्टितंनंदिन्यैनमःनंदिनींस्थापयामीतिप्रतिष्ठाप्य ॥ समुद्रज्येष्ठाःसलिलस्य० आपोहिष्ठा० इतिद्वाभ्यांप्रोक्ष्य ॥ गंध
द्वारांदुराधर्षा० इतिगंधाक्षतान्समर्प्य ॥ दधिक्राव्णइतिदधि ॥ कांडात्कांडादितिदूर्वापुष्पाणिचसमर्पयेत् ॥ १ ॥ नलिन्यै
नमःनलिनींस्थापयामि ॥ याआपोदिव्या० ॥ आपोहिष्ठा० ॥ प्रोक्ष्य॥गंधद्वारांदु० गंधाक्षतान्० दधिक्राव्ण० इतिदधि ॥
कांडात्कांडा० दूर्वापुष्पाणि ॥ २ ॥ मैत्रायै० मैत्रांस्था० ॥ यासांराजावरु० आपोहिष्ठा० प्रोक्ष्य गंधद्वारांदुरा० गंधाक्षतान्
दधिक्राव्ण० दधि ॥ कांडात्कांडा० दूर्वापुष्पाणि ॥ ३ ॥ उमायै० उमांस्था० ॥ यासुराजावरु० आपो० प्रोक्ष्य गंधद्वारां० गंधा
क्षतान् ॥ दधिक्राव्ण० दधि ॥ कांडात्कांडा० दूर्वापुष्पाणि ॥ ४ ॥ पशुवर्धिन्यै० पशुवर्धिनीं० समुद्रज्येष्ठा० याआपो०
यासांराजा० यासुराजा० आपोहि० प्रोक्ष्य गंधद्वारां० गंधाक्षतान् ॥ दधिक्राव्ण० दधि ॥ कांडात्कांडा० दूर्वापुष्पाणि ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ५ ॥ शस्त्रगर्भाभग० शस्त्रग० प्रोक्षणादिसर्वतूष्णीकृत्वा ॥ अविघ्नपसङ्गकगणपतये अविघ्न० स्थाप० तदस्तुमित्रा० गृहावैप्रतिष्ठा० मंडपदेवताभ्यो० गंधाक्षतपुष्पाणिसमर्प्य० ॥ तद्वंशपा त्रंस्वयंगृहीत्वा अविघ्नपसंज्ञकगणपतिं पद्यायाग्राह यित्वागृहांतःरंगवल्ल्यादिनापूजिते (घंटादिवाद्यघोषेणसहितःसब्राह्मणः ॥ इयमेवसायाप्रथमाव्यौच्छदंतरस्यांचरतिप्रविष्टा ॥ वधूर्जीजाननवगज्जनित्रीत्रयएनांमहिमानःसचंते ॥ छंदस्वतीउषसापेपिशानेसमानंयोनिमनुसंचरंती ॥ सूर्यपत्नीविचरतःप्रजानतीकेतुंकृण्वानेअजरेभूरिरेतसां ॥ ऋतस्यपंथामनुतिस्रआगुस्त्रयोघर्मासोअनुज्योतिषागुः ॥ प्रजामेकारक्षत्यूर्जमेका १ व्रतमेकारक्षतिदेवयूनां ॥ चतुष्टोमोअभवद्यातुरीयायज्ञस्यपक्षावृषयोभवंती ॥ गायत्रींत्रिष्टुभंजगतीमनुष्टुभंबृहदर्कंयुंजानाःसुवरा भरन्निदं ॥ पंचभिर्धातावितदधावितदंयत्तासाश्स्वसृरजनयत्पंचपंच ॥ तासामुयंतिप्रयवेणपंचनानारूपाणिक्रतवोवसानाः ॥ त्रिश्शत्ससारउपयंतिनिष्कृतश्समानंकेतुंप्रतिमुंचमानाः २ ॥ ऋतूश्स्तन्वतेकवयःप्रजानतीर्मध्यैछंदसःपरियंतिभास्वतीः ॥ ज्योतिष्मतीप्रतिमुंचतेनभोरात्रींदेवीसूर्यस्यव्रतानि ॥ विपश्यंतिपशवोजायमानानानारूपामातुरस्याउपस्थे ॥ एकाष्टकातपसातप्त्यमानाजजानगर्भंमहिमानमिंद्रं ॥ तेनदस्यून्व्यसहन्तदेवाहंतासुराणामभवच्छचीभिः ॥ अनानुजामनुजांमामकर्तसत्यंवदंत्यन्विच्छएतत् ॥ भूयास ३ मस्यसुमतौयथायूयमन्यावोअन्यामतिमाप्रयुक्त ॥ अभून्ममसुमतौविश्ववेदोआष्टप्रतिष्ठामविदद्धिगाधं ॥ भूयासमस्यसुमतौयथायूयमन्यावोअन्यामतिमाप्रयुक्त ॥ पंचव्युष्टीरनुपंचदोहागांपंचनाम्नीमृतवोनुपंच ॥ पंचदिशःपंचदशेनक्लृप्ताःसमानमूर्ध्नीरभिलोकमेकं ४ ॥ ऋतस्यगर्भःप्रथमाव्यूषुष्यपामेकांमहिमानंबिभर्ति ॥ सूर्यस्यैकाचरतिनिष्कृतेषुघर्मस्यैकासवितैकांनियच्छति ॥ याप्रथमाव्यौच्छत्साधेनुरभवद्यमे ॥ सानःपयस्वतीदुक्ष्वोत्तरामुत्तराश्समां ॥ शुक्रर्षभानभसाज्योति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षागा॑द्वि॒श्वरू॑पाशब॒लीर॒ग्निके॑तुः ॥ स॒मा॒नमर्थं॑ꣳस्वप॒स्यमा॑ना॒बिभ्र॑तीज॒राम॑जरउष॒आगाः॑ ॥ ऋ॒तू॒नांपत्नी॑ ५ प्रथ॒मेयमागा॒दह्नां॑ने॒त्रीज॑नि॒त्रीप्र॒जानां॑ ॥ एका॑स॒तीब॑हु॒धोषो॒व्यु॑च्छ॒स्यजी॑र्णा॒त्वंज॑रयसि॒सर्व॑म॒न्यत् ॥ इत्यादिसूक्तेनस्वस्तिनइंद्रो०अष्टौदेवावसवः० ऋद्ध्यास्महव्यैः० इतिमंत्रान्पठन्) देशेऽक्षतपुंजेषुनर्यप्रजामितिप्रतिष्ठाप्यसंपूज्यततोयावन्मंडपोद्वासनंप्रत्यहंपूजयेत् ॥ आचारात्वस्त्रादिदानंतत्परिधानंचयुवा॑सु॒वासा॒० ॥ कु॒र्वा॒णाचीर॑मा॒त्मनः॑ ॥ वासा॑ꣳसि॒मम॒गाव॑श्च ॥ अ॒न्न॒पा॒नेच॑सर्व॒दा ॥ ततो॑मे॒श्रिय॒माव॑ह ॥ यु॒वंवस्त्रा॑णिपीव॒साव॑साथे ॥ यु॒वोरच्छि॑द्रा॒मंत॑वोह॒सर्गाः॑॥अवा॑तिरत॒मनृ॑तानि॒विश्वा॑ ॥ ऋ॒तेन॑मित्रावरुणासचेथे ॥ एतत्कर्मणःसांगतासिध्यर्थंनानानामगोत्रान्ब्राह्मणान्गंधादिभिःपूजयिष्ये तेभ्योभूयसींदक्षिणांदातुमहमुत्सृजे ॥ तेनश्रीकर्मांगदेवतारूपीपरमेश्वरःप्रीयतां ॥ यांतुदेवगणाःसर्वे इतिविसृज्यद्विराचामेत् ॥ ॥

॥ १३० ॥ उपनयनप्रयोगः ॥

श्रीः ॥ ततआचार्यःदेशकालौसंकीर्त्यममसावित्र्युपदेशाधिकारसिद्ध्यर्थंअमुकप्रत्याम्नायेनप्राजापत्यत्रयपरिमितंप्रायश्चित्तंकरिष्येइतिसंकल्प्यकुर्यात् ॥ बटुनापिसावित्रीग्रहणाधिकारसिद्ध्यर्थंतावदेवकारिणीयं ॥ ततःकृतभोजनो[1]बटुराचम्य[2]देश

१ ततोद्वितीयदिनेप्रातराचार्यःषट्प्रभृतिसमसंख्यान्ब्राह्मणान्संभोज्यपुण्याहस्वस्तिऋद्धीर्वाचयित्वेंद्रःप्रीयतामितिवदेत् । ततःकृतमंगलस्नानमलंकृतंकुमारंमात्रासहभोजयेत् । मातुरभावेऽन्ययावाऽप्रत्याख्यायिन्या । तस्याअप्यभावेएकाकिनंभोजयेत् ॥ २ पौराणाचमनं ॥ तद्यथा ॥ केशवाद्यैस्त्रिभिर्नामभिरुदकंपिबेत् ॥ चतुर्थपंचमाभ्यांकरतलेस्पृशेत् ॥ षष्ठसप्तमाभ्यामोष्ठौस्पृशेत् ॥ अष्टमनवमाभ्यांमुखंसंमृजेत् ॥ दशमेनवामहस्तंप्रोक्ष्य एकादशेनपादौप्रोक्ष्य द्वादशेनशिरःस्पृष्ट्वा त्रयोदशेनोर्ध्वोष्ठमंगुल्यग्रैःस्पृष्ट्वा चतुर्दशेनदक्षिणनासारंध्रमंगुष्ठतर्जनीभ्यां पंचदशेनवामनासारंध्रंताभ्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कालौसंकीर्त्योपनयनांगंवपनंकरिष्येइतिसंकल्प्यकुर्यात् ॥ ततोयथाचारंस्नानंयथाशक्त्यलंकरणंअहतवस्त्रपरिधानंचकर्तव्यं ॥ ततआचार्यउपनयनहोमांगंउद्धननादिकरिष्यइतिसंकल्प्य ॥ उद्धननेनभूसंस्कारंविधायतत्रमथितंश्रोत्रियागारादाहृतंवास मुद्भवनामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्रंयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वोपनयनहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ जातदेवसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वाप्रधानहोमे ॥ आयुर्दामग्निंआयुर्दादेवमग्निंचाज्येन ॥ अंगहोमेवरुणंद्विरित्यादिएतादेवताःसद्योयक्ष्यइत्यंतमुक्त्वासमिधोग्नावाधायप्राकृतानिवैकृतानिचपात्राण्यासादयति ॥ दर्वीं आज्यस्थालींप्रणीतापात्रंप्रोक्षणीपात्रंइध्मंबर्हिःदर्भान्उपवेषंकटिसूत्रंकच्छंयज्ञोपवीतंमेखलांअश्मानंकूर्चंदंडंअजिनंभिक्षापात्रं सप्तपलाशसमिधश्चवाससीगांआज्यंचासाद्यपरिधिपरिधानांतमाचार्यःसमापयेत् ॥ अथभुक्तंकृतवपनंस्नातमलंकृतंकृताहतवस्त्रपरिधानंबटुंअग्नेरुत्तरतःसमानीयप्राङ्मुखंकृत्वाकटिसूत्रंकच्छंचतूष्णींदत्वाचमनंकारयेत् ॥ ततोब्रह्मचारीश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतधारणंकरिष्येइतिसंकल्प्यमंत्रंपठन्यज्ञोपवीतंधारयति ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः ॥ इत्याचार्यदत्तोपवीतनकुमारोयज्ञोपवीतीभूत्वा

मेव षोडशसप्तदशाभ्यांयथाक्रमंदक्षिणवामनेत्रेंगुष्ठानामिकाभ्यां अष्टादशैकोनविंशाभ्यांदक्षिणवामश्रोत्रेंगुष्ठकनिष्ठिकाभ्यां विंशेननाभिताभ्यामेव एकविंशेनहृदयंपाणितलेन द्वाविंशेनशिरःपाणिना त्रयोविंशचतुर्विंशाभ्यांयथाक्रमंदक्षिणवामभुजौअंगुल्यग्रैःस्पृशेदिति ॥ केशवादिनामानिनमो तानिप्रथमांतानिवासंबुद्ध्यंतानिवा संबुद्ध्यंतपक्षेकेचिद्विष्णुपदंहरिपदंचाविभक्तिकमेवोच्चारयंतितत्साधूनेवप्रयुंजीतेतिनियमात्तुच्छं॥ गायत्र्युपदेशात्प्राक्तनानिसर्वाण्यप्याचमनान्येवमेव ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्राङ्मुखोद्विराचम्यपूर्वेणाचार्यमपरेणाग्निंगत्वाचार्यादक्षिणतःप्राङ्मुखउपविश्यान्वारभते ॥ ततआचार्यःपरिषेचनादिसामा
न्यप्रधानांतंहुत्वाप्रधानहोमंकरोति ॥ ॐ आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि ॥ घृतंपीत्वामधुचारुगव्यंपितेव
पुत्रमभिरक्षतादिमꣳस्वाहा ॥ आयुर्देग्नयइदं० ॥ ॐ आयुर्दादेवजरसंगृणानोघृतप्रतीकोघृतपृष्ठोअग्ने ॥ घृतंपिबन्नमृतंचारुग
व्यंपितेवपुत्रंजरसेनयेमꣳस्वाहा ॥ आयुर्देदेवायाग्नयइदं० ॥ इतिप्रधानाहुतिद्वयंहुत्वा ॥ ततइमंमेवरुणेत्यादिस्विष्टकृदंतं
हुत्वा ॥ उत्तरपरिधिसंधेरुत्तरतोऽश्मानंनिधाय ॥ कुमारमात्माग्न्योरंतरानीत्वादक्षिणेनपादेनोपक्रम्यप्राङ्मुखंपद्भ्यामवस्थापय
ति ॥ आतिष्ठेममश्मानमश्मेवत्वꣳस्थिरोभव ॥ प्रमृणीहिदुरस्यून्त्सहस्वपृतनायतइति ॥ ततःपरिधापितंवासःप्रज्ञातंनिधाय ॥
ततोहतंवासःप्राङ्मुखस्यपरिधापयति ॥ याअकृंतंनवयन्याअतन्वतयाश्चदेवीरंतानभितोददंत ॥ तास्त्वादेवीर्जरसासंव्ययंत्वा
युष्मानिदंपरिधत्स्ववासः ॥ परिधत्तधत्तवाससैनꣳशतायुषंकृणुतदीर्घमायुः ॥ बृहस्पतिःप्रायच्छद्वासएतत्सोमायराज्ञेपरिदा
तवाउ ॥ जरांगच्छासिपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावा॥ शतंचजीवशरदःसुवर्चारायश्चपोषमुपसंव्ययस्वेति ॥ ततो
द्विराचांतमभिमंत्रयते ॥ परीदंवासोधिधास्वस्तयेभूरापीणामभिशस्तिपावा ॥ शतंचजीवशरदःपुरूचीर्वसूनिचाय्योविभजास
जीवन्निति ॥ ततस्त्रिगुणयामेखलयाप्रदक्षिणंत्रिःपरिव्ययतिद्विरित्येके ॥ यादुरितापरिबाधमानाशर्मवरूथेपुनतीनआगात् ॥
प्राणापानाभ्यांबलमावहंतीस्वसादेवानाꣳसुभगामेखलेयमिति ॥ उत्तरतोनाभेस्त्रिवृतंग्रंथिंकृत्वादक्षिणतोनाभेःपरिकर्षति ॥
ततोजिनमुत्तरीयंकरोति ॥ मित्रस्यचक्षुर्धरुणंधरीयस्तेजोयशस्विस्थविरꣳसमिद्धं ॥ अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनं

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सर्वत्रासावितिपदंपरित्यज्यसंस्कार्यस्यसंबुद्ध्यानामग्राह्यं ॥ ततःइंद्रायत्वांपरिददेइतिवदेत् ॥ परिदेहीतिमाणवकः ॥ परीम
मिंद्रब्रह्मणेमहेश्रोत्रायदध्मस्यथैनंजरिमाणयेज्योक्श्रोत्रेधिजागरदिति ॥ ततोमाणवकमपरेणाग्निमुदङ्मुखमुपवेश्यहुतशेषमा
ज्यंमंत्रत्रयेणैकवारंप्राशयति ॥ सूत्रेएतैःसन्नतैरितिबहुवचनेनप्राशनेमंत्राणांसमुच्चयस्योक्तत्वात् ॥ हुतशेषेआज्येदधिप्रक्षिप्य
पृषदाज्यंकृत्वावाप्राशयति ॥ त्वयि॑मे॒धांत्वयि॑प्र॒जांत्वय्य॒ग्निस्तेजो॑दधातु ॥ त्वयि॑मे॒धांत्वयि॑प्र॒जांत्वयींद्र॑इंद्रि॒यंद॑धातु ॥ त्वयि॑मे॒
धांत्वयि॑प्र॒जांत्वयि॒सूर्यो॒भ्राजो॑दधातु ॥ योगेयोगेइममग्नइतिमंत्राभ्यामाचार्यःप्राश्नंतꣳसमीक्षते ॥ योगे॑योगेत॒वस्त॑रं॒वाजे॑वाजे
हवामहे ॥ सखा॑य॒इंद्र॑मू॒तये॑ ॥ इ॒मम॑ग्न॒आयु॑षे॒वर्च॑सेकृधिप्रि॒यꣳरेतो॑वरुणसोमराजन् ॥ मा॒तेवा॑स्माअदिते॒शर्म॑यच्छ॒विश्वे॑देवा॒जर॑
दष्टि॒र्यथास॑दिति ॥ अथवाहुतशेषमाज्यंपृषदाज्यंवाआभ्यामेवमंत्रभ्यांप्राशयति ॥ तदाईक्षणेनास्तिमंत्रः ॥ अत्रकेचित्सूत्रार्थ
ज्ञानाभावेनत्रिभिर्मंत्रैःप्राशनत्रयंकारयंतितदशुद्धं ॥ प्राशनसूत्रेत्वेतैःसंनतैरितिबहुवचनात् प्राशनेमंत्राणांसमुच्चयस्योक्तत्वात्
त्रिभिरेकवारंप्राशनंकार्यं ॥ ततःकृतशुद्धाचमनःकुमारआचार्यंतूष्णींस्पृशति ॥ आचार्यश्चैनमभिमंत्रयते ॥ श॒तमिन्नुश॒रदो॒
अंति॑देवा॒यत्रा॑नश्च॒क्राज॒रसं॑त॒नूनां॑ ॥ पु॒त्रासो॒यत्र॑पि॒तरो॒भवं॑ति॒मानो॑म॒ध्यारी॑रिष॒तायु॒र्गंतो॑रिति ॥ ततःप्रदक्षिणमग्निंचरंतंबटुमभि
मंत्रयते ॥ आगंतासमगन्महिप्रसमृत्युंयुयोतन ॥ अरिष्टाःसंचरेमहिस्वस्तिचरतादिहस्वस्त्यागृहेभ्यइति ॥ ततोबटुंउपनय
नार्थंवाचयति ॥ ब्रह्मचर्यमागामुपमानयस्वब्रह्मचारीभवानिदेवेनसवित्राप्रसूतइति ॥ ततआचार्यःपृच्छतिकोनामासीति ॥
ततोमाणवकः व्यावहारिकंनामनाक्षत्रंनामचवदति ॥ गिरिधरशर्मास्मिरौहिणशर्मास्मीत्येवंप्रकारेण ॥ ततआचार्यः ॥ स्वस्ति
देवसवितरहमनेनामुनोदृचमशीय ॥ अत्रमंत्रेअमुनेतिपदंनिष्काश्यबटोर्व्यावहारिकंनाक्षत्रंचशर्मांतंनामद्वयंप्रक्षिप्यमंत्रःपठ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नीयः ॥ सच ॥ स्वस्तिदेवसवितरहमनेनगिरिधरशर्मणारौहिणशर्मणोद्दचमशीयेत्येवंप्रकारेणनामनीगृह्णाति ॥ ततःकुशैरुभावात्मानंमार्जयतः ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनइति ॥ मार्जनांतंसर्वंकृत्वासुमुहूर्तोपनयनसमयं प्रतीक्षेत् ॥ अथप्रधानोपनयनं ॥ प्राप्तब्रह्मचर्यस्यकृतमार्जनस्यस्वस्थानस्थितस्याचार्यस्यचांतरास्वस्तिकांकितमंतःपटंप्राक्छदं आचारान्मध्येकृत्वामंगलपद्यपाठेवाद्यादिघोषेचक्रियमाणेसुलग्नसमयेअंतःपटंप्रागपसार्यप्राङ्मुखआचार्यःवक्ष्यमाणोपनयन धर्मेणउदङ्मुखस्यबटोरुपनयनंकुर्यात् ॥ इदंमुख्यमुपनयनशब्दवाच्यंज्योतिर्विदादिष्टेसुमुहूर्तेकर्तव्यम् ॥ ॥ ७ ॥

॥ १३१ ॥ उपनयनमंत्राः ॥

श्रीः ॥ ॐ अग्नेतेजस्विन्तेजस्वीत्वंदेवेषुभूयास्तेजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरुदीक्षायैचत्वातपसश्चतेजसेजुहोमितेजो विदसितेजोमामाहासीन्माहंतेजोहासिषंमामान्तेजोहासीदिंद्रौजस्विन्नोजस्वीत्वंदेवेषुभूयाओजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरुब्रह्मणश्चत्वाक्षत्रस्यच ॥ १ ॥ ओजसेजुहोम्योजोविदस्योजोमामाहासीन्माहमोजोहासिषंमामामोजोहासीत्सूर्यभ्राजस्विन्भ्राजस्वीत्वंदेवेषुभूयाभ्राजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरुवायोश्चत्वापांचभ्राजसेजुहोमिसुवर्विदसिसुवर्मामाहासीन्माहꣳसुवर्हासिषंमामाꣳसुवर्हासीन्मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयिप्रजांमयींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु ॥ २ ॥ सांग्रहण्येष्ट्वायजते ॥ इमांजनताꣳसंगृह्णानीति ॥ द्वादशारत्नीरशनाभवति ॥ द्वादशमासाःसंवत्सरः ॥ संवत्सरमेवावरुंधे ॥ मौंजीभवति ॥ ऊर्ग्वैमुंजाः ॥ ऊर्जमेवावरुंधे ॥ चित्रानक्षत्रंभवति ॥ चित्रंवाएतत्कर्म ॥ यद

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

याः ॥ सुवर्गस्यलोकस्यसमष्ट्यै ॥ केशश्मश्रुवपते ॥ नखानिनिकृंतते ॥ दतोधावते ॥ स्नाति ॥ अहतंवासःपरिधत्ते ॥ पाप्मनो
पहत्यै ॥ वाचंयत्वोपवसति ॥ सुवर्गस्यलोकस्यगुप्त्यै ॥ रात्रिंजागरयंतआसते ॥ सुवर्गस्यलोकस्यसमष्ट्यै ॥ २ ॥ नर्यप्रजांमेंगो
पाय ॥ अमृतत्वायजीवसे ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ इत्युपनयनमंत्राः ॥ अथोपनयनं ॥
तच्चेत्थं ॥ आचार्यःकुमारस्यदक्षिणमंसंस्वदक्षिणेनहस्तेनसव्यंसव्येनतूष्णीमन्वारभ्यात्मनोदक्षिणेनहस्तेनब्रह्मचार्यभिमुखेनत
स्यहृदयंस्पृष्ट्वासमीपमुपनयति ॥ भूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ देवस्यत्वासवितुः
प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामुपनयेमुकशर्मन्निति ॥ इदंप्रधानोपनयनंब्रह्मचारीनविस्मरेत् ॥ विस्मरणेत्वखिलंकर्मावर्त
तेइतिमातृदत्तः ॥ ततआचार्यःस्वदक्षिणहस्तेनबटोर्दक्षिणंहस्तंसांगुष्ठमुत्तानंगृह्णाति ॥ अग्निष्टेहस्तमग्रभीत्सोमस्तेहस्तमग्रभी
त्सवितातेहस्तमग्रभीत्सरस्वतीतेहस्तमग्रभीत्पूषातेहस्तमग्रभीद्बृहस्पतिस्तेहस्तमग्रभीन्मित्रस्तेहस्तमग्रभीद्वरुणस्तेहस्तमग्रभीत्त्व
ष्टातेहस्तमग्रभीद्धातातेहस्तमग्रभीद्विष्णुस्तेहस्तमग्रभीत्प्रजापतिस्तेहस्तमग्रभीदिति ॥ ततोबटुंसंशास्ति ॥ सवितात्वाभिरक्षतु
मित्रस्त्वमसिधर्मणाग्निराचार्यस्तवदेवेनसवित्राप्रसूतोबृहस्पतेर्ब्रह्मचारीभवामुकशर्मन् ॥ अपोशानसमिधआधेहिकर्मकुरुमादि
वास्वाप्सीरिति ॥ ततःस्वहस्तेनब्रह्मचारिणोदक्षिणमंसंउपर्युपरितूष्णीमन्ववमृश्यहृदयदेशमभिमृशति ॥ ममहृदयेहृदयंतेअ
स्तुममचित्तंचित्तेनान्वेहिममवाचमेकमनाजुषस्वबृहस्पतिस्त्वानियुनक्तुमह्यंमामेवानुसंरभस्वमयिचित्तानिसंतुतेमयिसामी
च्यमस्तुतेमह्यंवाचंनियच्छतादिति ॥ ततोनाभिदेशमभिमृशति ॥ प्राणानांग्रंथिरसिसमाविस्रसइति ॥ ततःकुमारमभिमंत्र
यते ॥ भूर्भुवःसुवःसुप्रजाःप्रजयाभूयासंसुवीरोवीरैःसुवर्चावर्चसासुपोषःपोषैःसुमेधामेधयासुब्रह्माब्रह्मचारिभिरिति ॥ ततः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पुनःकुमारमभिमंत्रयते ॥ भूर्ऋक्षुत्वाग्नौपृथिव्यांवाचिब्रह्मणिददेमुकशर्मन् ॥ भुवोयजुःषुत्वावायावंतरिक्षेप्राणेब्रह्मणिददेमुक शर्मन् ॥ सुवःसामसुत्वासूर्येदिविचक्षुषिब्रह्मणिददेमुकशर्मन् ॥ इष्टतस्तेप्रियोसानिअमुकशर्मन् ॥ अनलस्यतेप्रियोसानिअमु कशर्मन् ॥ इदंवत्स्यावःप्राणआयुषिवत्स्यावःप्राणआयुषिवसामुकशर्मन् ॥ ततोब्रह्मचारिणोदक्षिणंहस्तमुत्तानंसांगुष्ठमग्निरायु ष्मानितिपंचभिःपर्यायैर्गृह्णाति ॥ अग्निरायुष्मान्त्सवनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ॥ सोमआयुष्मान्त्सओषधी भिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ॥ यज्ञआयुष्मान्त्सदक्षिणाभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि ॥ ब्रह्मायुष्मत्तद्ब्राह्मणै रायुष्मत्तेनत्वायुषायुष्मंतंकरोमि ॥ देवाआयुष्मंतस्तेमृतेनायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ॥ ततोमंत्रद्वयंवटोर्दक्षिणेकर्णेज पति ॥ आयुष्टेविश्वतोदधदयमग्निर्वरेण्यः ॥ पुनस्तेप्राणआयतिपरायक्ष्मꣳसुवामिते ॥ अग्नौपृथिव्यांप्रतितिष्ठवायावंतरिक्षेसू र्येदिवियाꣳस्वस्तिमग्निर्वायुरादित्यश्चंद्रमाआपोनुसंचरंतिताꣳस्वस्तिमनुसंचरामुकशर्मन् ॥ प्राणस्यब्रह्मचार्यभूरमुकशर्मन्इति ॥ ततोमंत्रद्वयमुत्तरेकर्णेजपति ॥ आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि ॥ घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्ष तादिमं ॥ अग्नौपृथिव्यांप्रतितिष्ठ० ॥ ततोब्रह्मचारिणोमुखेनमुखꣳसन्निधायजपति ॥ मेधांतइंद्रोददातुमेधांदेवीसरस्वती ॥ मेधांतेअश्विनावुभावाधत्तांपुष्करस्रजाविति ॥ ततोबटुमुत्थाप्य ॥ कषकादिदेवेभ्यस्त्वांपरिददे ॥ परिदेहीतिबटूक्तौ ॥ आचा र्योददाति ॥ कषकायत्वापरिददामि ॥ अंतकायत्वापरिददामि ॥ अघोरायत्वापरिददामि ॥ गदायत्वापरिददामि ॥ यमायत्वा परिददामि ॥ मखायत्वापरिददामि ॥ वशिन्यैत्वापरिददामि ॥ पृथिव्यैत्वासवैश्वानरायैपरिददामि ॥ अद्भ्यस्त्वापरिददामि ॥

ओषधीभ्यस्त्वापरिददामि ॥ वनस्पतिभ्यस्त्वा CC-0. In Public Domain. Funding by MoE-IKS ंत्वापरिददामि ॥ सभृतायत्वापरिददामि ॥

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ब्रह्मवर्चसायत्वापरिददामि ॥ विश्वेभ्यस्त्वादेवेभ्यःपरिददामि ॥ सर्वेभ्यस्त्वाभूतेभ्यःपरिददामि ॥ सर्वाभ्यस्त्वादेवताभ्यः परिददामि ॥ इतिपरिदानं ॥ पुनरुपनयनेपरिदानानंतरंसावित्रीवाचनं ॥ पुनरुपनयनप्रयोगमग्रेवक्ष्यामः ॥ प्रथमोपनयने परिदानांतंकृत्वाऽक्षारलवणादिकंव्रतंकुमारस्यदिनत्रयमग्निसन्निधौकारयित्वाऽन्यहेतीतेचतुर्थदिवसेप्रातःसावित्रीवाचनंकृत्वा सप्तपलाशसमिद्धोमादिक्रमेणाखिलंकार्यमित्येकंमतं ॥ पौष्करसादेरपरंमतं ॥ सद्यःपौष्करसादिरितिसमानेह्यिसद्यःव्रतमुपेत्य सावित्रीग्रहणं ॥ तदुच्यते ॥ परिदानानंतरंमाणवकः ॥ देशकालौसंकीर्त्यममेधाद्यभिवृद्धिद्वाराब्रह्मचर्यव्रतग्रहणांगंसप्तप लाशसमिद्धोमंकरिष्येइतिसंकल्प्याचार्यःकारयति ॥ घृतान्वक्तंसाग्रंपलाशसमित्सप्तकमादाय ॥ अग्नयेसमिधमाहार्षंबृहतेजा तवेदसे ॥ यथात्वमग्नेसमिधासमिध्यसएवंमांमेधयाप्रज्ञयाप्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहेत्येकांसमिधंजुहोति॥ अग्नयइदं० ॥ अग्नयेसमिधावाहार्षंबृहते० स्वाहेतिद्वेजुहोति ॥ अग्नयइदं० ॥ अग्नयेसमिधआहार्षमितिसर्वमंत्रमुच्चार्यचतस्रो जुहोति ॥ अग्नयइदं० ॥ ततआचार्यःइध्मसन्नहनादिसंस्थाजपांतंकर्मसमापयेत् ॥ अथब्रह्मचर्याश्रमव्रतग्रहणंकुर्यात् ॥ आ चार्यः ब्रह्मचारिणाकर्तव्यानिव्रतान्युपदिशति ॥ ब्रह्मचारीनगायेन्नरोदेन्ननृत्यदशींस्यादित्यादीनिब्रह्मचारिप्रकरणस्थधर्मोक्ता निश्रुत्वा देशकालौसंकीर्त्यममब्रह्मचर्याश्रमविहितसकलव्रतानांग्रहणंयावत्समावर्तनंयथाशक्तिकरिष्येइतिसंकल्प्योपस्थेयदेव ताअभिसंधायोपतिष्ठते ॥ अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां ॥ वायोव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेरा ध्यतां ॥ आदित्यव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां ॥ व्रतानांव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां ॥ एवंप्रकारेणव्रतग्रहणंकृत्वा ॥ समावर्तनेएतद्व्रतत्यागोवक्ष्यमाणप्रकारेणकार्यः ॥ अंतराम्नातविशेषव्रतानांग्रहणंत्यागश्च

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्रतत्रवक्ष्यते ॥ ततोगुरवेवरंददाति ॥ गुरोवरंतेददामीति ॥ वरोत्रगौःअभावेगुंजापरिमितंसुवर्णंवा ॥ पितुरपिस्याद्व
रदानं ॥ ततआचार्योमंत्रंवाचयित्वामाणवकमुत्थापयति ॥ उदायु॑षास्वा॒युषोदोष॑धीना॒ꣳरसे॒नोत्प॒र्जन्य॑स्य॒शुष्मे॒णोद॑स्थाम॒मृता॒ꣳ
अनु॑इति ॥ ततःसूर्यायत्वांपरिददे ॥ परिदेहीतिमाणवकः ॥ आचार्यः ॥ सूर्यैषतेपुत्रस्तंतेपरिददामीति ॥ ततआचार्योब्रह्म
चारीवाआदित्यमुपतिष्ठते ॥ तच्चक्षु॑र्दे॒वहि॑तंपु॒रस्ता॑च्छु॒क्रमु॒च्चर॑त् ॥ पश्ये॑मश॒रदः॑श॒तंजीवे॑मश॒रदः॑श॒तंनंदा॑मश॒रदः॑श॒तंमोदा॑
मश॒रदः॑श॒तंभवा॑मश॒रदः॑श॒तꣳशृ॒णवा॑मश॒रदः॑श॒तंप्रब्र॑वामश॒रदः॑श॒तमजी॑तास्यामश॒रदः॑श॒तंज्योक्च॒सूर्यं॑दृ॒शेइति ॥ ततआचा
र्योदंडंप्रयच्छति ॥ अग्निष्टआयुःप्रतरांकृणोत्वग्निष्टेपुष्टिंप्रतरांदधात्विंद्रोमरुद्भिरिहतेदधात्वादित्यस्तेवसुभिरादधात्विति ॥ तत
स्तूष्णींभिक्षापात्रमरिक्तंप्रदायाह ॥ भिक्षाचर्यंचरेति ॥ ततोब्रह्मचारीओमित्याज्ञामादायप्रथमंमातरंमातृसमांवाऽप्रत्याख्या
यिनींभिक्षेत ॥ भवतिभिक्षांदेहीति ॥ भवान्भिक्षांददात्वितिपुमांसं ॥ प्रथमंभिक्षितमादायाऽऽचार्यायनिवेदयति भैक्ष्यंभो
इति ॥ आचार्यस्तत्प्रतिगृह्णाति ॥ ततोरातिकुलेषुभिक्षेत ॥ ततआचार्यःबटोःपूर्वंप्रज्ञातंनिहितंवासःप्रतिगृह्णाति ॥ यस्यतेप्र
थमवास्यꣳहरामस्तंत्वाविश्वेअवंतुदेवाः ॥ तंत्वाभ्रातरःसुहृदोवर्धमानमनुजायतांबहवःसुजातमिति ॥ ततउपनयनांगंत्रिवृद
न्नहोमंपुण्याहवाचनंचकरिष्येइतिसंकल्प्योक्तरीत्याकृत्वाश्रद्धामेधेप्रीयेतामितिवदेत् ॥ ततःसावित्रीग्रहणांगंत्र्यहव्रतमुपदिश
ति ॥ इक्षुविकारलवणमाषमुद्गादिधान्यमधुमांसानिनभोक्तव्यानि ॥ उपरिशयनंमृन्मयेनजलपानंशूद्रायस्वोच्छिष्टदानंदिवा
स्वापादिवर्जनीयानि ॥ उभौकालौभिक्षाचर्यं ॥ सायमुपक्रम्यउभौकालौसायꣳसायंवाअग्निकार्यंकार्यमिति ॥ ब्रह्मचारीश्रुत्वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ताअभिसंधायोपतिष्ठते ॥ अग्नेव्रतपतेव्रतंचरिष्यामीत्यादित्यहव्रतंस्वीकृत्यचतुर्थदिवसेउक्तरीत्याविसर्गःकार्यः॥ ततआचार्यो
गायत्र्युपदेशार्थमुदगग्रेकूर्चेप्राङ्मुखउपविशति ॥ राष्ट्रभृदस्याचार्यासंदीमात्वद्योषमिति ॥ ततोब्रह्मचारीआदित्यायांजलिना
नमस्कारंविधाय आचार्यस्यदक्षिणंपादंसकुक्षिकंसव्यान्वारब्धेनदक्षिणेनहस्तेनावमृशतीत्युपसंग्रहणंकार्यं ॥ अथाभिवादनं ॥
दक्षिणंबाहुंसव्यान्वारब्धंश्रोत्रममंप्रसार्यामुकप्रवरान्वितामुकगोत्रोमुकशर्माहंभोअभिवादयेइत्युच्चारयन्शिरोवनतिपूर्वकमा
चार्यस्यनमस्कारकरणमभिवादनंव्यावहारिकेणनाम्नाकार्यं ॥ ततआचार्येणायुष्मान्भवामुकशर्मन् ३ इतिप्लुतांत्यस्वरोच्चारणे
नप्रयुक्ताशीर्वादोविनयावनतोभूत्वा ॥ सर्ववेदारंभार्थत्वेनसावित्र्युपदेशंवांछन्नध्येषमाणावचनद्वयात्मकेनमंत्रेणैकश्रुत्याह ॥
अधीहिभोःसावित्रींभोअनुब्रू ३ हीति ॥ ततआचार्यःबटुमभिमंत्रयति ॥ गणानांत्वागणपतिꣳहवामहेकविंकवीनामुपमश्रवं
स्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनमिति ॥ ततःसर्ववेदारंभार्थत्वेनसावित्रींपच्छोर्धर्चशोनवा
नमितिवाचयति ॥ ॐ भूस्तत्सवितुर्वरेण्यं ॥ भुवोभर्गोदेवस्यधीमहि ॥ सुवर्धियोयोनःप्रचोदयात् ॥ ॐ भूर्भुवस्तत्सवितुर्वरे
ण्यंभर्गोदेवस्यधीमहि ॥ सुवर्धियोयोनःप्रचोदयात् ॥ ॐ भूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचो
दयात्इति ॥ एवमुच्चारणाशक्तौयथाशक्तिवाचयति ॥ तैत्तिरीयकाणांगायत्र्यारंभेणैवसर्ववेदारंभोभवति ॥ ततःकर्मांगदेव
ताप्रीत्यर्थंशतद्वयंशतंवाऽत्यशक्तौदशाधिकान्ब्राह्मणान्यथाकालंयथोपपन्नेनान्नेनभोजयिष्यइतिसंकल्प्यभोजयेत् ॥ पुनःकर्मां
गदेवताप्रीत्यर्थंगंधतांबूलादिभिर्ब्राह्मणपूजनंभूयसीदक्षिणादानंचकरिष्यइतिसंकल्प्यकृत्वा ॥ अग्नेतेजस्विन्अवरुंधेमुंजाइत्या
दिभिर्मंत्रैराशिषोग्राह्याः ॥ ततःप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायाचार्योबटुश्चविष्णुंस्मरेत् ॥ इतिगायत्र्युपदेशांतंकर्मस० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १३२ ॥ अग्निकार्यम् ॥

श्रीः ॥ तच्चप्रातःकालस्यातीतत्वादर्थात्सायमुपक्रम्योभौकालौसायंसायंवाकरोति ॥ आचम्यप्राणानायम्यममोपात्तदुरितक्षय द्वाराश्रीपरमेश्वरप्रीत्यर्थंसायमग्निकार्यंकरिष्येइतिसंकल्प्य ॥ यथाहुतद्वंसवोगौर्यंमित्यग्निंपरिसमुह्यपरिस्तीर्य अदितेनुन्यस्वे त्यादिपूर्ववत्परिषेकंकृत्वाष्टौसमिधआदायव्यस्ताभिर्व्याहृतिभिस्तिस्रःसमस्ताभिश्चैकेतिचतस्रोहुत्वोत्तरैश्चतुर्भिर्मंत्रैश्चतस्रोजुहो ति ॥ एषातेअग्नेसमित्तयावर्धस्वचाचप्यायस्व ॥ वर्धिषीमहिचवयमाचप्यासिषीमहिस्वाहा ॥ अग्नयइदं० ॥ मेधांमइंद्रोददा तुमेधांदेवीसरस्वती ॥ मेधांमेअश्विनावुभावाधत्तांपुष्करस्रजौस्वाहा ॥ इंद्रायसरस्वत्याअश्विभ्यामिदं० ॥ अप्सरासुचयामे धागंधर्वेषुचयन्मनः ॥ दैवींमेधामनुष्यजासामांमेधासुरभिर्जुषताꣳस्वाहा ॥ मेधायाइदं० ॥ आमांमेधासुरभिर्विश्वरूपाहिरण्यवर्णाजगतीजगम्या॥ ऊर्जस्वतीपयसापिन्वमानासामांमेधासुप्रतीकाजुषंताꣳस्वाहा॥ मेधायाइदं० ॥ ततःपूर्ववत्परिसमुह्यप रिषेकपरिस्तारणविसर्गांतंकृत्वाग्निमुपतिष्ठते ॥ यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासंयत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासंयत्तेअग्नेहरस्ते नाहꣳहरस्वीभूयासं ॥ मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयिप्रजांमयींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसू र्योभ्राजोदधातुइति ॥ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषंयद्देवानांत्र्यायुषंतन्मेअस्तुत्र्यायुषमित्याचाराङ्गस्मधृत्वा ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनेत्यग्निंप्रार्थयित्वाप्रमादात्कुर्वतांकर्मेतिकर्मसा द्गुण्यायविष्णुंस्मरेत् ॥ ततउक्तप्रकारेणोपसंग्रहणंअभिवादनंचस्वसन्निहितानांपित्रोर्गुर्वादीनांचसायंप्रातश्चकुर्यात् ॥ प्रत्यभि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १३३ ॥ चतुर्थदिवसकृत्यम् ॥

श्रीः ॥ चतुर्थदिवसेप्रातराचार्यःकृतनित्यक्रियःब्रह्मचारिसहितःप्राङ्मुखउपविश्यदेशकालौसंकीर्त्योपनयनांगंत्रिवृदन्नहोमंपुण्याहवाचनंचकरिष्यइतिसंकल्प्याचार्यएवकुर्यात् ॥ अत्रकश्चिदाह त्र्यहव्रतंचरतीत्यतोब्रह्मचारिणःस्वप्रकरणत्वेनोपस्थितत्वात्व्रतविसर्गेचावश्यकत्वात्क्त्वाप्रत्ययेनसमानकर्तृत्वलाभाच्चाखिलंचतुर्थदिनकृत्यंब्रह्मचारिकर्तृकमिति ॥ तदशुद्धं ॥ त्र्यहे पर्यवेतेतथैवेत्यतिदेशेनपुण्याहांतस्त्रिवृदन्नहोमआचार्यकर्तृकोतिदिष्टस्तस्यब्रह्मचार्यवांतरप्रकरणप्राप्तत्वेनबलवत्त्वात् ॥ समानकर्तृत्वस्यचौत्सर्गिकत्वात् ॥ पुण्याहंवाचयित्वात्र्यहव्रतंचरतीत्यादाविहैवानंतर्यमात्रार्थेक्त्वोदर्शनात्ब्रह्मचारिणश्चअवैधत्वात्सर्वमाचार्यकर्तृकं ॥ यावदुक्तमेवकुमारस्य ॥ अवैधत्वादितिमातृदत्तोक्तेश्चपुण्याहांतस्त्रिवृदन्नहोमकर्ताआचार्यएवनब्रह्मचारी ॥ किंचत्र्यहव्रतंचरतीत्यत्रब्रह्मचारिणोव्रतग्रहणेसाक्षाद्विध्यभावात्व्रतंचरिष्यामीतिमंत्रलिंगात्ब्रह्मचर्यव्रतग्रहणंबटुःकुर्यादित्येवविधिकल्पनंनतुत्रिवृदन्नहोममपिबटुःकुर्यादितिकल्पकाभावात् ॥ अतोपिनब्रह्मचारीत्रिवृदन्नहोमकर्ता ॥ नचतथैवेत्यतिदेशादेवपुण्याहांतसर्वत्रिवृदन्नहोमप्राप्तौत्रिवृदन्नेनेत्याद्यंशानुवादोव्यर्थइतिवाच्यं ॥ तस्यपूर्वोत्तरावध्यर्थत्वात् ॥ व्याख्यातश्चायमर्थोमातृदत्तेनतथैवेत्येतावक्रियमाणेसर्वमुपनयनमावर्तेततच्चनेष्टमित्यादिनाग्रंथेन ॥ किंच ॥ यदिब्रह्मचारिकर्तृकोहोमइष्टःस्यात् ॥ परिवेषणवचनादेवसिद्धेहोमेतिदेशवचनमनर्थकंस्यात् ॥ पूर्वत्रहोमेदृष्टस्योपनयनाग्नेरतिदेशार्थतदितिचेत् ॥ तर्हिनिर्णीतएवतत्राचार्यःकर्तासचन्यायादत्रप्राप्नोतिनातिदिश्यतइत्यत्रयुष्मदाशयएवशरणं ॥ व्याख्यातंचवृत्तिकृद्भिः ॥ अग्न्याद्यर्थमतिदेशवचनमिति ॥ तदग्न्यर्थमेवेतिचेन्न ॥ एकदेशातिदेशेप्रमाणाभावात् ॥ एवंआचार्यएवत्रिवृदन्नहोमकर्ता ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अपिचव्रतंचरतिव्रतंविसृजतइत्यादौकुमारस्यावैधत्वेनप्रयोजकव्यापारस्यावश्यकत्वात् ॥ चारयतिविसर्जयतिइत्यादिण्यर्थवि
वक्षयाप्राप्तएवाचार्यःकर्तेति ॥ दृश्यंतेचशिष्टपरंपरयानुष्ठातारस्तथेति ॥ तस्मात्ब्रह्मचारिकर्तृकस्त्रिवृदन्नहोमस्त्वशुद्धएवेत्य
लंविस्तरेण ॥ ततोब्रह्मचारीदेशकालौसंकीर्त्यस्वीकृतस्यत्र्यहव्रतस्यविसर्गकरिष्येइतिसंख्योपस्थेयदेवताअभिसंधायोपतिष्ठते ॥
अग्नेव्रतपतेव्रतमचारिषंतदशकंतन्मेराधि ॥ वायोव्रतपतेव्रतमचारिषंतदशकंतन्मेराधि ॥ आदित्यव्रतपतेव्रतमचारिषंतदशकं
तन्मेराधि ॥ व्रतानांव्रतपतेव्रतमचारिषंतदशकंतन्मेराधि ॥ इतिव्रतविसर्गः ॥ ॥ ॥

॥ १३४ ॥ मंडपदेवतोत्थापनम् ॥

श्रीः ॥ ततआचार्यःगौर्यादिमंडपदेवतास्थापितवंशपात्रंस्वयंगृहीत्वाअविघ्नपकलशंपत्न्याग्राहयित्वामंडपांतरागत्यप्राङ्मुखउप
विश्यदेशकालौसंकीर्त्योपनयनांगत्वेनस्थापितानांदेवतानामुत्थापनंकरिष्येइतिसंकल्प्य ॥ तैलोद्वर्तनोष्णोदकैर्यथाचारंनंदि
न्याद्याःस्नापयित्वाषोडशोपचारैःगौर्याद्याःसर्वाःसंपूज्यविसृजेत् ॥ उत्तिष्ठब्राह्मणस्पतेदेवयंतस्त्वेमहे ॥ उपप्रयंतुमरुतःसुदान
वइंद्रप्राशूर्भवासचा ॥ यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं ॥ इष्टकामप्रसिद्ध्यर्थंपुनरागमनायचेतिमंडपदेवताश्चविसृज्य
(अत्रस्वस्तिवाचनंकुर्यात्)ब्राह्मणान्गंधादिनासंपूज्यआचार्यायदक्षिणांदत्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत्॥

॥ १३५ ॥ ब्रह्मचारिधर्माः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

येन्नरोदेदित्यादीन्याचरन्गुरोरनुकूलंकुर्वन्कांडव्रतोपाकरणविधिनाकांडव्रतान्युपाकृत्याध्ययनंकुर्यात् ॥ आचार्यःश्रुताध्ययनसंपन्नःसदाचारःसएवोपनयेत्सएवाध्यापयेत् ॥ नतुपितैवोपनयेदितिनियमः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १३६ ॥ ब्रह्मचर्याग्निनाशप्रायश्चित्तं ॥

श्रीः ॥ देशकालौसंकीर्त्यब्रह्मचर्याग्निनाशजनितदोषपरिहारार्थंप्रायश्चित्तंकरिष्येइतिसंकल्प्यउद्धननादिभूसंस्कारंविधायश्रोत्रियागारादाहृतंलौकिकमग्निंमथितंवाप्रतिष्ठाप्यपरिसमुह्यपरिषिच्यदर्वींनिष्टप्याज्यंसंस्कृत्यदर्व्याज्यमादाय ॥ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि ॥ अयासावयसाकृतोयासन्हव्यमूहिषेयानोधेहिभेषजꣳस्वाहा इत्येकाज्याहुतिर्होतव्या ॥ प्रातरग्निनाशेब्रह्मचारिणआसायमुपवासः ॥ सायमग्निनाशेआप्रातरुपवासइत्यग्निनाशप्रायश्चित्तं ॥ ॥ इतिसत्याषा० वैशं० महेशभट्टकृतावुपनयनप्रयोगः ॥ ॥ ॥ ॥ ॥

॥ १३७ ॥ चतुर्वेदव्रतनिर्णयः ॥

श्रीः ॥ उपनयनवद्वेदव्रतानामावश्यकत्वम् ॥ अत्रप्राजापत्यसौम्याग्नेयवैश्वदेवकांडानांतत्तत्कांडाख्यव्रतानांचारंभसमापनयोःस्वरूपमुच्यते ॥ उपनयनानंतरंविद्यारंभानुकूलेमुहूर्तेहोमपूर्वकमेवकांडाध्ययनोपक्रमः ॥ कांडाध्ययनेसमाप्तेहोमपूर्वकमेवोत्सर्गः ॥ व्रतानामप्येतेएवारंभसमापनेभवतोनभेदेन ॥ अध्ययनांगत्वात्सर्वब्रह्मचारिव्रतानां ॥ कांडानांसंकीर्णत्वेनयथाकांडमध्ययनासंभवात्कांडानुक्रमणेचसंप्रतिसारस्वतपाठस्याभ्यनुज्ञातत्वात्सारस्वतपाठेनैवाध्यापनंसंप्रत्यस्ति ॥ अतःप्राजाप

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्यादिकांडव्रतान्येवोदगयनेशुभेदिनेकांडवदेकशउपाकृत्यतंत्रेणसर्वाणिकांडव्रतान्युपाकृत्यवायथाशक्त्याऽऽचरन्नध्ययनंकुर्यात् ॥ कांडोत्सर्गविधिनाचोत्सृजेत् ॥ उपाकरणोत्सर्गयोर्ग्रहणत्यागरूपयोस्तंत्रंनैवकुर्यात्स्वरूपविरोधात् ॥ अतएवमातृदत्तेनापिकांडोपाकरणकांडविसर्गशब्दौव्रतपरौव्याख्यातौ ॥ कांडोपाकरणेकांडव्रतोपाकरणेकांडोत्सर्गेकांडव्रतोत्सर्गइत्यर्थइति ॥ अतश्चकांडव्रतानामेवोपाकरणोत्सर्जनेभवतः ॥ यत्तुकांडानामुपाकरणमुत्सर्जनंचोक्तंतदज्ञानप्रलपितमित्युपेक्षणीयं ॥ नन्वव्रतानिकांडव्रतानि ॥ सर्वब्रह्मचारिव्रतानीतिचेन्न ॥ तेषामारंभस्यजातत्वात् ॥ तद्विसर्गश्चसमावर्तनेभविष्यति ॥ कांडर्षिहोमएवेष्यतइतिचेन्न॥ सचव्रतारंभेकारणंनतुव्रतानितानिचविशिष्यतोक्तानि ॥ अतश्चगृह्यांतरेप्रजापतिसोमाग्निविश्वेदेवहोमानांकांडव्रतत्वेनग्रहणादस्माकंचतत्समानाध्ययनत्वेनाविरोधाच्चतएवकांडव्रतशब्देनोच्यंते ॥ एतेनकांडव्रतोपाकरणेतिरिक्तहोमकरणमशुद्धमितिवदन्निरस्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ १३८ ॥ वेदव्रतोपाकरणप्रयोगः ॥

श्रीः ॥ समावर्तनप्राक्तनान्याचार्यकर्तृकाणिकर्माणि ॥ यावदुक्तमेवब्रह्मचारीकरोति ॥ आचार्यःब्रह्मचारिसहितोनद्यादौस्नात्वाकृतनित्यक्रियःप्राङ्मुखउपविश्यदक्षिणतोब्रह्मचारिणमुपवेश्यदेशकालौसंकीर्त्यास्यामुकशर्मणोब्रह्मचारिणोवेदाध्ययनाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्राजापत्यसौम्याग्नेयवैश्वदेवाख्यचतुर्णांकांडव्रतानामुपाकरणानितंत्रेणकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यकृत्वा ॥ ब्रह्मचारिणःकांडव्रतोपाकरणांगत्वेनवपनंस्नानं

चकारयित्वानतनकटिसूत्रकृच्छ्रोपनीताग्नि[illegible] ॥ उद्वर्तनादिभूसंस्कारंविधायसमुद्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वनामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमिन्त्रयमादायश्रद्धेहीत्यादिप्राणायामांतकृत्वाकांडव्रतोपाकरणहोमकर्मणियक्ष्यमाणादेवताइत्यादिसामान्यप्रधानांतमुक्त्वावैशेषिकप्रधानहोमे सदसस्पतिमाज्येनप्रजापतिंकांडर्षिसोमंकांडर्षिअग्निंकांडर्षिविश्वान्देवान्कांडर्षींश्चाज्येनप्रजापतिंसोमंअग्निंविश्वान्देवान्प्रत्येकंषडाहुतीराज्येन ॥ अंगहोमेवरुणंद्विरित्यादिसंस्रावेणेत्यंतमुक्त्वान्वाधानसमिधोग्नावाधायसामान्यप्रधानांतंहुत्वा ॥ वैशेषिकहोमे ॥ सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं ॥ सनिंमेधामयासिषꣳस्वाहा ॥ सदसस्पतयइदं० ॥ प्रजापतयेकांडर्षयेस्वाहा ॥ प्रजापतयेकांडर्षयइदं० ॥ सोमायकांडर्षयेस्वाहा ॥ सोमायकांडर्षयइदं० ॥ अग्नयेकांडर्षयेस्वाहा ॥ अग्नयेकांडर्षयइदं० ॥ विश्वेभ्योदेवेभ्यःकांडर्षिभ्यःस्वाहा ॥ विश्वेभ्योदेवेभ्यःकांडर्षिभ्यइदं० ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणाꣳस्वाहा ॥ प्रजापतयइदं० ॥ रयीणांपतिंयजतंबृहंतमस्मिन्भरेनृतमंवाजसातौ ॥ प्रजापतिंप्रथमजामृतस्ययजामदेवमधिनोब्रदेवीतुस्वाहा ॥ प्रजापतयइदं० ॥ प्रजापतेत्वंनिधिपाःपुराणोदेवानांपिताजनिताप्रजानां ॥ पतिर्विश्वस्यजगतःपरस्पाहुविनोंवविहवेजुषस्वस्वाहा ॥ प्रजापतयइदं०॥ तवेमेलोकाःप्रदिशोदिशश्चपरावतोनिवतउद्वतश्च ॥ प्रजापतेविश्वसृज्जीवधन्यइदंनोदेवप्रातिर्हयहव्यꣳस्वाहा ॥ प्रजापतयइदं० ॥ प्रजापतिंप्रथमंयज्ञियानांदेवानामग्रेयजतंयजध्वं ॥ सनोंददातुद्रविणꣳसुवीर्यꣳरायस्पोषंविष्यतुनाभिमस्मेस्वाहा ॥ प्रजापतयइदं० ॥ योरायईशेशतदायउक्थ्योयःपशूनाꣳरक्षितावीष्टितानां ॥ प्रजापतिःप्रथमजाऋतस्यसहस्रधामाजुषताꣳहविर्नःस्वाहा ॥ प्रजापतयइदं० ॥ ६ ॥ सोमोधेनुꣳसोमोअर्वंतमाशुꣳसोमोवीरंकर्मण्यंददातु ॥ सादन्यंविदथ्यꣳसभेयंपितृश्रवणंयोददाशदस्मैस्वाहा ॥ सोमायेदं० ॥ अषाढंयुत्सुपृतनासुपप्रिꣳसुवर्षामप्सांवृ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जनस्यगोपां ॥ भरेषुजाꣳसुक्षितिꣳसुश्रवसंजयंतंत्वामनुमदेमसोमस्वाहा ॥ सोमायेदं० ॥ त्वꣳसोमक्रतुभिःसुक्रतुर्भूस्त्वंदक्षैःसुदक्षोविश्ववेदाः ॥ त्वंवृषावृषत्वेभिर्महित्वाद्युम्नेभिर्द्युम्न्यभवोनृचक्षाःस्वाहा ॥ सोमायेदं० ॥ यातेधामानिहविषायजंतितातेविश्वापरिभूरस्तुयज्ञं ॥ गयस्फानःप्रतरणःसुवीरोवीरहाप्रचरासोमदुर्यान्त्स्वाहा ॥ सोमायेदं० ॥ त्वमिमाओषधीःसोमविश्वास्त्वमपोअजनयस्त्वंगाः ॥ त्वमाततंथोर्वंतरिक्षंत्वंज्योतिषावितमोववर्थस्वाहा ॥ सोमायेदं० ॥ यातेधामानिदिवियापृथिव्यांयापर्वतेष्वोषधीष्वप्सु ॥ तेभिर्नोविश्वैःसुमनाअहेडन्राजन्त्सोमप्रतिहव्यागृभायस्वाहा ॥ सोमायेदं० ॥ ६ ॥ अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेमस्वाहा ॥ अग्नयइदं० ॥ प्रवःशुक्रायभानवेभरध्वꣳहव्यंमतिंचाग्नयेसुपूतं ॥ योदैव्यानिमानुषाजनूꣳष्यंतर्विश्वानिविद्मनाजिगातिस्वाहा ॥ अग्नयइदं० ॥ अच्छागिरोमतयोदेवयंतीरग्निंयंतिद्रविणंभिक्षमाणाः ॥ सुसंदृशꣳसुप्रतीकꣳस्वंचꣳहव्यवाहमरतिंमानुषाणाꣳस्वाहा ॥ अग्नयइदं० ॥ अग्नेत्वमस्मद्युयोध्यमीवाअनग्नित्राअभ्यमंतकृष्टीः ॥ पुनरस्मभ्यꣳसुवितायदेवक्षांविश्वेभिरजरेभिर्यजत्रस्वाहा ॥ अग्नयइदं० ॥ अग्नेत्वंपारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा ॥ पृश्चपृथ्वीबहुलानउर्वीभवातोकायतनायशंयोःस्वाहा ॥ अग्नयइदं० ॥ प्रकारवोमननावच्यमानादेवद्रीचींनयथदेवयंतः ॥ दक्षिणावाड्वाजिनीप्राच्येतिहविर्भरंत्यग्नयेघृताचीस्वाहा ॥ अग्नयइदं० ॥ ॥ ६ ॥ आनोविश्वेअस्क्रांगमंतुदेवामित्रोअर्यमावरुणःसजोषाः ॥ भुवन्यथानोविश्वेवृधासःकरंन्त्सुषाहाविथुरन्नशेवः स्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ शंनोदेवाविश्वदेवाभवंतुशꣳसरस्वतीसहधीभिरस्तु ॥ शमभिषाचःशमुरातिषाचःशन्नोदिव्याःपार्थिवꣳशंनोअप्याःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ तेसौभगंवीरवद्गोमद

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोदधातनद्रविणंचित्रमस्मेस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ अग्नेयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषिप्रियोदेवाऽअच्छाब्रह्मकृतागणेन ॥ सरस्व तींमरुतोऽअश्विनापोयक्षिदेवान्रत्नधेयायविश्वान्त्स्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ द्यौःपितःपृथिविमातरध्रुगग्नेभ्रातर्वसवो मृडतानः ॥ विश्वआदित्याअदितेसजोषाअस्मभ्यऽशर्मबहुलंवियन्तःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ विश्वेदेवाःशृणुतेमऽह वंमेयेअंतरिक्षेयउपद्यविष्ठ ॥ येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वऽस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ ६ ॥ इतिप्रजापतिसोमाग्निविश्वदेवेभ्यःप्रत्येकंषट्षडाहुतीर्हुत्वा ततइमंमेवरुणेत्यादिदेवसवितःप्रासावीरितिपरिषेकविसर्गांतमाचा र्यःसमापयेत् ॥ ततोब्रह्मचारीउपस्थेयदेवताअभिसंधायोपतिष्ठते ॥ अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां ॥ वायो व्रत० ॥ आदित्यव्रत० ॥ व्रतानांव्रतपते० ॥ तां० ॥ एवंउक्तरीत्यादेवताउपस्थायगुरवेवरंदद्यात् ॥ उक्तोवरः ॥ ततआचार्यः यथेतंप्रणीताःपर्याहृत्यसंस्थाजपांतंकर्मसमापयेत् ॥ नात्रत्रिवृदन्नहोमः ॥ ब्राह्मणभोजनंसंकल्प्यगंधादिनासंपूज्यभूयसींदक्षि णांदत्वाग्निंविसृज्यप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ब्रह्मचारीस्वविहितानिव्रतान्याचरन्यथाशास्त्रंस्वतपाठेना ध्ययनंकुर्यात् ॥ इतिहिरण्यकेशीय स्मा० सं० वैशं० म० वेदव्रतोपाकरणप्रयोगःसमाप्तः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १३९ ॥ वेदव्रतोत्सर्जनम् ॥

श्रीः ॥ आचार्यश्चंद्रानुकूल्येसतिनद्यादौप्रशस्तेदेशेकृतनित्यक्रियःप्राङ्मुखउपविश्यस्वदक्षिणतोब्रह्मचारिणमुपवेश्यदेशकालौ संकीर्त्यास्यब्रह्मचारिणोवेदाध्ययनांगत्वेनस्वीकृतानांप्राजापत्यसौम्याग्नेयवैश्वदेवकांडाख्यव्रतानामुत्सर्जनंतंत्रेणकरिष्येतदंगं गणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यो क्तरीत्याकुर्यात् ॥ ततोब्रह्मचारिणोवपनंस्नानंनूतन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कटिसूत्रकच्छोपवीताजिनोत्तरीयदंडानांधारणंचकारयित्वापुराणानिकटिसूत्रादीन्यप्सुनिक्षिप्योद्धननादिनाभूसंस्कारंविधाय तत्रसमुद्भवनामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वावेदव्रतोत्सर्जनहोमकर्मणि यक्ष्यमाणादेवताःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमुक्त्वावैशेषिकहोमेसदसस्पतिंप्रजापतिंकांडर्षिसोमंकांडर्षिअग्निंकांडर्षिविश्वा न्देवान्कांडर्षींश्चाज्येन प्रजापतिंसोममग्निंविश्वान्देवांश्चप्रत्येकंषड्भिराज्याहुतिभिर्यक्ष्ये॥ अंगहोमेवरुणंद्विरित्यादिसंस्रावेणेत्यं तमुक्त्वासमिधोऽग्नावाधायपरिसमूहनादिव्याहृत्यंतंहुत्वावैशेषिकहोमादिपरिषेकविसर्गांतमुपाकरणवत्कुर्यात् ॥ ततोब्रह्मचारी उपस्थेयदेवताअग्न्याद्याश्चतस्रोभिसंधायोपतिष्ठते॥ अग्नेव्रतपतेव्रतमचा० धि ॥ वायोव्र०आदित्य०व्रतानां०धि ॥ इतिव्रतवि सर्गंकृत्वागुरवेवरंदद्यात् ॥ आचार्यःप्रणीताःपर्याहृत्यसंस्थाजपांतंसमाप्यनात्रित्रिवृदन्नहोमः ॥ ब्राह्मणभोजनंसंकल्प्यतत्पूज नंभूयसीदक्षिणादानमाशीःप्रार्थनंचकृत्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ इतिवेदव्रतोत्सर्गः ॥ ॥

॥ १४० ॥ शुक्रियव्रतोपाकरणम् ॥

श्रीः ॥ शुक्रियव्रतंसूत्रवृत्तिकृद्भ्यामस्पृष्टमपिबौधायनेदृष्टत्वेनकारिकाकृतोक्तत्वाच्चक्तौकर्तव्यमापूर्विकपक्षेण॥ तस्यप्रयोगः॥ आचार्यश्चंद्रानुकूल्येसतिशुभदिनेप्राङ्मुखउपविश्यदक्षिणतःब्रह्मचारिणंप्रातरग्निकार्योत्तरंचोपवेश्यदेशकालौसंकीर्त्यास्यब्रह्म चारिणोवेदाध्ययनाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसौम्यव्रतांतर्गतशुक्रियव्रतोपाकरणंकरिष्येतदंगंगणपतिपूजनंपुण्या हवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यकृत्वाब्रह्मचारिणोवपनंकटिसूत्रादिपूर्ववद्दत्त्वासायंहोमानंतरमस्तमिते

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by eGangotri Trust Foundation, Delhi. CC-0. In Public Domain.

ष्येइतिसंकल्प्यगणेशंसंपूज्योद्धननादिनाभूसंस्कारंविधायसमुद्भवनामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्रयमादायश्रद्ध
एहीत्यादिप्राणायामांतंकृत्वाशुक्रियव्रतोपाकरणहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ तूष्णीमग्निंसमिद्भिःअग्निंवायु
मादित्यंप्रजापतिंचौदुंबरसमिद्भिर्यक्ष्ये ॥ प्रायश्चित्तहोमेव्याहृतिदेवताश्चाज्येनयक्ष्ये ॥ इत्युक्त्वासमिधोन्नावाधाय ॥ प्रोक्षणीं
दर्वींआज्यस्थालींऔदुंबरीश्चतस्रःसमिधःवासःकुशाद्यासाद्यप्रोक्षणीसंस्कारादिपरिषेकांतंकृत्वा ॥ समिद्धोमः ॥ पृथिवीस्
मित् ॥ तामग्निःसमिंधे ॥ साग्निरसमिंधे ॥ तामहरसमिंधे ॥ सामासमिद्धा ॥ आयुषातेजसा ॥ वर्चसाश्रिया ॥ यशसाब्र
ह्मवर्चसेन ॥ अन्नाद्येनसमिंताःस्वाहा ॥ अग्नयइदं० ॥ अंतरिक्षरसमित् ॥ सावायुरसमिंधे ॥ तामहरसमिंधे ॥ सामास
मिद्धा ॥ आयुषातेजसा ॥ वर्चसाश्रिया ॥ यशसाब्रह्मवर्चसेन ॥ अन्नाद्येनसमिंताःस्वाहा ॥ वायवइदं० ॥ द्यौःसमित् ॥
तामादित्यःसमिंधे ॥ सादित्यरसमिंधे ॥ तामहरसमिंधे ॥ सामासमिद्धा ॥ आयुषातेजसा ॥ वर्चसाश्रिया ॥ यशसाब्रह्म
वर्चसेन ॥ अन्नाद्येनसमिंताःस्वाहा ॥ आदित्यायेदं० ॥ प्राजापत्यामेसमिदसिसपत्नक्षयणी ॥ भ्रातृव्यहामेसिस्वाहा ॥
प्रजापतयइदं०॥ ततःकृतस्यकर्मणोन्यूनातिरिक्तदोषपरिहारार्थंव्याहृतिहोमंकृत्वा ॥ ततोब्रह्मचारीवेदाध्ययनांगंअध्यादिसन्नि
धौशुक्रियव्रतग्रहणंकरिष्येइतिसंकल्प्यचतस्रोदेवताअभिसंधायोपतिष्ठते ॥ अग्नेव्रतपतेव्रतंचरिष्यामीत्यादिनाव्रतंस्वीकृत्यसौ
म्यानुवाकानामादितःकिंचित्किंचिदधीत्यवाससाशिरःसमुखंवेष्टयित्वाग्रामंप्रविश्यतांरात्रिंवाग्यतस्तिष्ठेत् ॥ उदितआदित्ये
शिरोमुखवेष्टनेविमुच्यकृतनित्यक्रियोग्निकार्यंकृत्वाआदित्यमुपतिष्ठते ॥ वयंःसुपर्णाउपसेदुरिंद्रंप्रियमेधाःकृष्योनाधमानाः ॥
अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान्॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतंजीवेम०सूर्यदृशे॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इत्यादित्यमुपस्थाय ॥ ततआदित्यमग्निमश्मानंकुंभंवत्संहिरण्यंचदृष्ट्वाचार्यायवरंदत्त्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ इतिशुक्रियव्रतोपाकरणप्रयोगः ॥ सौम्यकांडांतर्गतशुक्रियदृष्टंवेदभागमधीत्योत्सर्जनंकुर्यात् ॥ इतिशुक्रियव्रतोपाकरणम् ॥ ॥

॥ १४१ ॥ शुक्रियव्रतोत्सर्जनम् ॥

श्रीः ॥ आचार्योब्रह्मचारिसहितःकृतनित्यक्रियःप्राङ्मुखउपविश्याचम्यअस्यब्रह्मचारिणोवेदाध्ययनांगत्वेनस्वीकृतस्यशुक्रियव्रतस्योत्सर्जनंकरिष्येइतिसंकल्प्यगणेशपूजनादिकृत्वापरिषेकांतंपूर्ववदापूर्विकपक्षेणकृत्वासमिद्धोमेविशेषःद्यौःसमिदितिविलोमपाठेनऔदुंबरीश्चतस्रःसमिधोहुत्वाऽऽदित्यव्रतपतेव्रतमचारिषमित्यादिव्युत्क्रमपाठेनोपस्थानादिविष्णुस्मरणांतंसमानं॥ पृथक्कांडव्रतोपाकरणपक्षेसौम्योपाकरणानंतरंशुक्रियव्रतोपाकरणोत्सर्जनेकृत्वासौम्योत्सर्जनंकुर्यात् ॥ इतिशुक्रियव्रतोत्सर्जनम् ॥

॥ १४२ ॥ गोदानप्रयोगः ॥

श्रीः ॥ गविपृथिव्यांदीयंतेस्वापार्थंयानिमस्तकस्यचत्वार्यंगानितेषांवपनादिरूपंकर्मगोदानकर्मेत्युच्यते ॥ तच्चद्विविधं ॥ एकमुपनयनस्यादौचूडाकरणरूपंद्वितीयमुपनयनानंतरंक्रियमाणं ॥ तच्चगोदानमुपनयनवदावश्यकं ॥ तच्चगर्भतोजन्मतोवाषोडशवर्षेसमावर्तनात्प्राक्कार्यं ॥ ब्रह्मचर्यादिव्रतेनाधीत्यसमावर्तितव्यं ॥ ब्रह्मचर्यकालोष्टाचत्वारिंशद्वर्षाणिचतुर्विंशतिर्द्वादशवर्षाणियावत्ग्रहणंवा ॥ अशक्तत्वादनित्यत्वाच्चयथाशक्त्यधीत्यवास्नानंकरोति ॥ तदागोदानकर्माकृष्यसमावर्तनात्प्रागेवोदगयनेशुक्लपक्षेगुरुशुक्रवार्धकाद्यभावेअक्षयेऽन[illegible]धिकेचमासिज्योतिर्विदुक्तकालेदिवसेचौलवत्कार्यं ॥ कर्तांप्राङ्मुखउपविश्य

CC-0. In Public Domain.Funding by MoE-IKS

चोपवेश्यआचम्यप्राणानायम्यदेशकालौसंकीर्त्यास्यब्रह्मचारिणआयुर्वर्चोभिवृद्धिद्वारा
श्रीपरमेश्वरप्रीत्यर्थंगोदानकर्मकरिष्ये ॥ तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धमंकुरारोपणंचकरिष्यइतिसंक
ल्प्यकृत्वा॥ उद्धननादिभूसंस्कारंविधायतत्रसूर्यनामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणाया
मांतंकृत्वागोदानहोमकर्मणियक्ष्यमाणादेवताइत्यादिसामान्यप्रधानांतंकृत्वानात्रप्रधानहोमः ॥ अंगहोमादिसंस्थाजपांतंकर्म
समाप्य ॥ अग्नेःपश्चात्कर्तादक्षिणतोब्रह्मचारीउत्तरतःकेशसंयमनार्थंमाताब्रह्मचारीवाकश्चिदानड्डहंगोमयंधारयन्नुपविशति ॥
ततश्चौलोक्तप्रकारेणोष्णशीताभिरद्भिरुंदनादिवपनांतंआचार्यःनापितोवाचौलवत्कुर्यात् ॥ चूडाकरणकालेयथाचारंधृताभिः
शिखाभिःसहमध्यशिखासहितंतद्रहितंवावपनमितिविशेषः ॥ गर्तेकेशसंयमनादिकंचौलवत्कृत्वाचार्यायवरंदक्षिणांसर्पिष्मंत
मोदनंनापितायचदत्वाकर्मांगदशाधिकब्राह्मणभोजनंभूयसींदक्षिणांदत्त्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाङ्गुण्यायविष्णुंस्मरेत् ॥
इतिश्रीसत्याषाढ० प्रथमेसं० वै० महेशभट्टकृतौगोदानप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

॥ १४३ ॥ ब्रह्मचारिणोवेदव्रतातिरिक्तसाधारणव्रतलोपेप्रायश्चित्तम् ॥

श्रीः ॥ कृतनित्यक्रियआचार्यःप्रातरग्निकार्योत्तरंब्रह्मचारीचप्राङ्मुखउपविश्यदेशकालौसंकीर्त्यास्यब्रह्माचरिणःशौचाचमनसं
ध्यावंदनदर्भधारणभिक्षाग्निकार्यरहित्यशूद्रादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनत्यागदिवास्वापछत्रधारणपा
दुकाध्यारोहणमालाधारणोद्वर्तनानुलेपनांजनाभ्यंजनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरतिपाखंडादिसंभाषणपर्युषितभोजना
दिब्रह्मचारिव्रतलोपजनितदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंहोमपूर्वकंकृच्छ्रत्रयमितममुकप्रत्याम्नायेनप्रायश्चित्तंकरिष्येइति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संकल्प्योद्धननादिभूसंस्कारंविधायतत्रलौकिकमग्निंविष्णामानंप्रतिष्ठाप्यप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतं
कृत्वाब्रह्मचारिप्रायश्चित्तहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमुक्त्वाप्रधानहोमेअग्निंवायुंसूर्यंप्रजापतिं
चैकैकयाहुत्याआज्येनयक्ष्ये ॥ अग्निंपृथिवींमहांतंवायुमंतरिक्षंमहांतं आदित्यंदिवंमहांतं प्रजापतिंचंद्रमसंनक्षत्राणिदिशोमहांतं
प्रत्येकमेकैकयाहुत्याआज्येन ॥ अग्निंविश्ववेदसंविभावसुंशतक्रतुंचैकैकयाहुत्याआज्येन ॥ अग्निंद्वाभ्यामाज्याहुतिभ्यां ॥ अग्निं
वायुंसूर्यंप्रजापतिंचैकैकयाज्याहुत्यायक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंहुत्वावैशेषिकहोमः ॥ व्यस्तसमस्तक्रमे
णव्याहृतिचतुष्टयंहुत्वा ॥ भूरग्नयेचपृथिव्यैचमहतेचस्वाहा ॥ अग्नयेपृथिव्यैमहतइदं० ॥ भुवोवायवेचांतरिक्षायचमहतेच
स्वाहा ॥ वायवेंतरिक्षायमहतइदं० ॥ सुवरादित्यायचदिवेचमहतेचस्वाहा ॥ आदित्यायदिवेमहतइदं० ॥ भूर्भुवःसुवश्चंद्र
मसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा ॥ प्रजापतयेचंद्रमसेनक्षत्रेभ्योदिग्भ्योमहतइदं० ॥ पाहिनोअग्नएनसेस्वाहा ॥ अग्न
यइदं० ॥ पाहिनोविश्ववेदसेस्वाहा ॥ विश्ववेदसइदं० ॥ यज्ञंपाहिविभावसोस्वाहा ॥ विभावसवइदं० ॥ सर्वंपाहिशतक्रतो
स्वाहा ॥ शतक्रतवइदं० ॥ पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा ॥ पुनर्नःपाहिविश्वतःस्वाहा ॥ अग्नयइदं० ॥ सहरय्यानिवर्त
स्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्ययाविश्वतस्परिस्वाहा ॥ अग्नयइदं० ॥ भूःस्वाहा ॥ अग्नयइदं० ॥ भुवःस्वाहा ॥ वायव
इदं० ॥ सुवःस्वाहा ॥ सूर्यायेदं० ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ इत्यष्टादशाहुतीर्हुत्वा ॥ ततःकृच्छ्रत्रयप्रत्या
म्नायत्वेनकल्पितजपहोमाद्यन्यतमप्रायश्चित्तंकृत्वा ॥ इमंमेवरुणेत्यादिसंस्थाजपांतंसर्वंसमाप्याचार्यायवरंदक्षिणांदत्त्वाप्रमा
दात्कर्त्तव्यतांकर्मैतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ इतिबौधायनोक्तप्रायश्चित्तलोपप्रायश्चित्तम् ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

॥ १४४ ॥ वेदव्रतानाकालातिक्रमप्रायश्चित्तम् ॥

श्रीः ॥ कृतनित्यक्रियःआचार्योब्रह्मचारीचप्राङ्मुखउपविश्यदेशकालौसंकीर्त्यास्यब्रह्मचारिणोवेदव्रतानांकालातिक्रमजन्यदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंहोमपूर्वकंकृच्छ्रत्रयमितंअमुकप्रत्याम्नायेनप्रायश्चित्तंकरिष्ये ॥ तदंगमुद्धननादिकरिष्येइतिसंकल्प्यकृत्वाभूसंस्कारंविधायतत्रलौकिकमग्निंविष्णामानंप्रतिष्ठाप्यसमिन्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा ॥ वेदव्रतकालातिक्रमप्रायश्चित्तहोमकर्मणियक्ष्यमाणादेवताइत्यादिसामान्यप्रधानांतमुक्त्वाप्रधानहोमे ॥ गायत्र्यासहस्रमष्टोत्तरंशतमष्टोत्तरंअष्टाविंशतिसंख्ययावासवितारमाज्येनयक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंहुत्वावैशेषिकप्रधानहोमः ॥ यथोदिष्टसंख्ययागायत्र्याहुत्वा ॥ सवित्रइदं० ॥ ततोजपहोमगोदानाद्यन्यतमप्रत्याम्नायेनप्रायश्चित्तंकृत्वा ॥ ततइमंमेवरुणेत्यादिसंस्थाजपांतंसर्वसमाप्याचार्यायदक्षिणांदत्त्वाब्राह्मणभोजनादिसंकल्प्यकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ इतिकालातिक्रमप्रायश्चित्तंकृत्वाशुभदिनेवेदव्रतोपाकरणंयथाकालमुत्सर्जनंचकृत्वैवसमावर्तनंकार्यं ॥ उपनयनप्रभृतिसंस्काराणांप्रायश्चित्तेनाचरितार्थत्वात्आवश्यकंचेत्युपनयनमुखेनसंस्काराम्नानंवदतासूत्रकृतैवायमर्थउक्तइति ॥ इतिबौधायनोक्तंवेदव्रतकालाति० ॥

॥ १४५ ॥ समावर्तनम् ॥

श्रीः ॥ उद्धननादिमधुपर्कसमाप्त्यंतंसमावर्तनं ॥ पूर्वोक्तव्रताचरणपूर्वकंयथाशक्तिवेदमधीत्यगोदानकर्मकृत्वागुरुंदक्षिणादिनासंतोष्यतमनुज्ञाप्योदगयनेसितेपक्षेरोहिणीमृगतिष्योत्तराफल्गुनीहस्तचित्राविशाखाद्यन्यतमेनक्षत्रेचंद्रानुकूल्येशुभेदिनेउप

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नयनोक्तेकालेसमावर्तनंकार्यं ॥ समावर्तनप्राक्तनान्याचार्यकर्तृकाणिकर्माणियावदुक्तंब्रह्मचारीकरोति ॥ समावर्तनंतुब्रह्मचारिकर्तृकमेव ॥ अधीत्यवेदꣳस्नानमितिसूत्रेअधीत्येत्यत्रसमानकर्तृकक्रियाविहितक्त्वाप्रत्ययेनाध्ययनस्नानयोरेककर्तृकत्वस्योक्तत्वात्समावर्तनापरपर्यायंस्नानंब्रह्मचारिकर्तृकमेव ॥ ब्रह्मचारीकृतनित्यक्रियःप्रातरग्निकार्यानंतरंआचार्यसहितअपांसमीपेशुचौदेशेगत्वाथवागोष्ठंसूर्यरश्मिदर्शनरहितंसम्यगाच्छाद्यरात्रावेवब्रह्मचारीतत्रगत्वाप्रातरग्निकार्यानंतरंप्राङ्मुखउपविश्यदेशकालौसंकीर्त्यममगृहस्थाद्याश्रमसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसमावर्तनाख्यंकर्मकरिष्ये ॥ तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यकृत्वा ॥ उद्धननादिभूसंस्कारंविधायतत्रपावकनामानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वासमावर्तनहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमुक्त्वा ॥ प्रधानहोमे ॥ जातवेदसमग्निंपलाशसमिधायक्ष्ये ॥ व्याहृतीनामग्निंवायुंसूर्यंप्रजापतिंअग्निंचाज्येन ॥ अंगहोमेवरुणंद्विरित्यादिपात्रासादनात्प्राक्कृत्वा प्राकृतानिदर्व्यादीन्यासाद्यपालाशींसमिधंदंतधावनमौदुंबरकाष्ठमार्द्रंउष्णशीताअपःक्षुरंआनडुहंगोमयं सौरभयुक्तंचंदनं वाससी कुंडले मणिं आदर्शं छत्रं दंडं उपानहौ स्रजं आंजनं ग्रामप्रवेशार्थंरथादियानंचेतिवैकृतान्यासाद्यसामान्यप्रधानहोमांतंकृत्वाप्रधानहोमः ॥ इमꣳस्तोममर्हतेजातवेदसेरथमिवसंमहेमामनीषया ॥ भद्राहिनः प्रमतिरस्यसꣳसद्यग्नेसख्येमारिषामावयंतवस्वाहा ॥ इतिपालाशींसमिधंजुहोति ॥ जातवेदसेग्नयइदं० ॥ ततोव्यस्तसमस्तक्रमेणव्याहृतीराज्येनहुत्वा ॥ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषंयद्देवानांत्र्यायुषंतन्मेअस्तुत्र्यायुषꣳस्वाहा ॥ अग्नयइदं० ॥ इति षट्प्रधानाहुतीर्हुत्वा ॥ ततइमंमेवरुणेत्यादित्रिवदत्रहोमंपुण्याहवाचनांतंकृत्वा ॥ ततउपनयनेस्वीकृतानांसकलब्रह्मचारित्र

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तानांविसर्गंकरिष्येइतिसंकल्प्याग्निपुरोगाश्चतस्रोदेवताअभिसंधायोपतिष्ठते ॥ अग्नेव्रतपतेव्रतमचारिषंतदशकंतन्मेराधि ॥ एवं वायोव्र० आदित्यव्रत० व्रतानांव्रत० इत्याद्युक्तरीत्याव्रतविसर्गंकृत्वा ॥ ततउदुत्यंचित्रमितिद्वाभ्यामादित्यमुपस्थाय ॥ उत्तरीयमजिनरूपंवासोनिदधाति ॥ उदुत्तमंवरुणपाशमस्मच्छ्रथायेति ॥ ततोंतरीयंकच्छोपरिकटिप्रदेशेवेष्टितंवासोनिदधाति ॥ अवाधमंवरुणपाशमस्मच्छ्रथायेति ॥ अन्यद्वासःपरिधायद्विराचम्य ॥ ततोमेखलांनिदधाति ॥ विमध्यमंवरुणपाशमस्मच्छ्रथायेति ॥ ततोदंडंनिदधाति ॥ अथावयमादित्यव्रतेतवानागसोअदितयेस्यामेति ॥ ततोऽजिनंवासोमेखलांदंडंचाप्सु तूष्णींप्रक्षिप्यापरेणाग्निंप्राङ्मुखउपविश्यक्षुरꣳसंमृशति ॥ क्षुरोनामासिस्वधितिस्तेपितानमस्तेअस्तुमामाहिꣳसीरिति ॥ ततस्तूष्णींवप्त्रेप्रदायशीतास्वप्सुउष्णाआनीयाभिमृशति ॥ शिवानोभवथसꣳस्पृशेइति ॥ ततोदक्षिणंगोदानमुंदति ॥ आपउंदंतुजीवसेदीर्घायुत्वायवर्चसइति ॥ गोदानेऊर्ध्वाग्रान्कुशान्निदधाति ॥ ओषधेत्रायस्वैनमिति ॥ कुशोपरिक्षुरंनिदधाति ॥ स्वधितेमैनꣳहिꣳसीरिति ॥ ततोगोदानस्थान्त्सकेशान्कुशान्वपति ॥ देवश्रूरेतानिप्रवपेइति ॥ उंदनादिवपनांतंवसुःकर्मवचनसामर्थ्यादाचार्यस्यवा ॥ ततोवप्तारंसमीक्षते ॥ यत्क्षुरेणमर्चयथासुपेशसावप्तर्वपसिकेशश्मश्रुवर्चयामुखंमानआयुःप्रमोषीरिति ॥ ततःश्मश्रूपपक्षक्रमेणमुखस्यसर्वंश्मश्रूणांवपनंशिखांविहायशिरःस्थसर्वकेशानांबाहुमूलमारभ्यसर्वलोम्नांनखानांचवपनंकारयेत् ॥ स्नातकस्यबंधुजनःकश्चिदानडुहेगोमयेश्मश्रुलोमनखान्यंतर्धायगोष्ठउदुंबरेदर्भस्तंबेवाऽवटंकृत्वातत्रनिदधाति ॥ इदमहममुष्यामुष्यायणस्यपाप्मानमवगूहामीति ॥ अत्रमंत्रेअमुष्यामुष्यायणस्येतिपदद्वयंनिष्काश्यस्नातकस्यव्यावहारिकंशर्मातंनामगोत्रनामधेयंचप्रक्षिप्यमंत्रंपठेत् ॥ इदमहंगिरिधरशर्मणोनैतुंदनस्यपाप्मानमवगूहामीत्येवंप्रकारेणमंत्रंपठित्वा श्मश्वाद्यवटे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

निधायावटंमृत्तिकयापिधाय करंजकल्काद्युद्वर्तनेनशरीरमलमुत्साद्यऔदुंबरकाष्ठेनार्द्रेणदंतान्प्रक्षालयति ॥ अन्नाद्यायव्यूह ध्वंदीर्घायुत्वायव्यूहध्वंब्रह्मवर्चसायव्यूहध्वंदीर्घायुरहमन्नादोब्रह्मवर्चसीभूयासमिति ॥ अथप्रधानस्नानं ॥ शीतमिश्राभिरु ष्णाभिरद्भिःसर्वमंत्रांतेएकवारंस्नाति ॥ आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेनचेति ॥ चकारेणस्नानेमंत्राणांसमुच्चयस्योक्तत्वात्सर्वमंत्रांतेएकंस्नानंकृत्वाद्विराचम्यशुक्लेवाससीपरिधायद्विराचम्यबंधुजनैरानीतंसर्वसु गंधयुतंद्रव्यंचंदनपिष्टंवा तज्जलेनाभ्युक्ष्यतेनपाणीप्रलिप्य देवेभ्यःप्राचीनंनमस्कारांजलिंकरोति ॥ नमोग्रहायचाभिग्रहायच नमःशाकजंजभाभ्यांनमस्ताभ्योदेवताभ्योयाअभिग्रहिणीरिति ॥ ततस्तेनैवांजलिनामुखमारभ्यानुलोममात्मानमनुलिंपति ॥ अप्सरासुचयोगंधोगंधर्वेषुचयद्यशः ॥ दैव्योयोमानुषोगंधःसमामाविशतादिहेति ॥ ततअहतेवाससीतूष्णींजलेनाभ्युक्ष्य ॥ अंतरीयंवासःअधोनाभिउपरिजानुपरिदधाति ॥ सोमस्यतनूरसितनुवंमेपाहिस्वामातनूराविशशिवामातनूराविशेति ॥ ततो द्विराचम्यमंत्रावृत्त्याउत्तरीयंवासश्चपरिधायद्विराचम्य ॥ कटिसूत्रंकच्छंचपरित्यज्य ॥ इतःपरंकटिसूत्रंकच्छधारणंचप्रतिषि ध्यते ॥ ततोपरेणाग्निंप्राङ्मुखउपविश्यसुवर्णाच्छादितंचंदनकाष्ठकृतंबादरंवामणिंकुंडलेचसूत्रप्रोतेदर्भेणप्रबध्याग्नावुपरिधारय न्तत्रदर्व्याजुहोतिपंचभिर्मंत्रैः ॥ ॐ आयुष्यंवर्चस्यꣳरायस्पोषमौद्भिदं ॥ इदꣳहिरण्यमायुषेवर्चसेजैत्रायाविशतांमाꣳस्वाहा ॥ हिरण्यायेदं० ॥ १ ॥ उच्चैर्वाजिपृतनासाहꣳसभासाहंधनंजयं ॥ सर्वाःसमग्राऋद्धयोहिरण्येस्मिन्त्समाभृताःस्वाहा ॥ हिरण्या येदं० ॥ २ ॥ शुनमहꣳहिरण्यस्यपितुरिवनामाग्रभीषं ॥ तंमाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोतुस्वाहा ॥ हिरण्यायेदं० ॥ ३ ॥ प्रियंमाकुरुदेवेषुप्रियंमा[illegible] ॥ प्रियंविश्वेषुशूद्रेषुप्रियंमाकुरुराजसुस्वाहा ॥ हिरण्यायेदं० ॥ ४ ॥

CC-0 In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इयमोषधेत्रायमाणासहमानासहस्वती ॥ सामाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोतुस्वाहा ॥ हिरण्यायेदं० ॥ ५॥ इतिपंचाहुतीर्हुत्वा ॥ ततःस्वाहाकारवर्जितैरेतैरेवपंचभिर्मंत्रैर्मणिंकुंडलेचोदपात्रेत्रिःप्रदक्षिणमावर्त्यसम्यक्प्रक्षाल्य ॥ ततोदक्षिणेकर्णेकुंडलंनिदधाति ॥ विराजंचस्वराजंचाभिष्टिर्यांचनोगृहे॥ लक्ष्मीराष्ट्रस्यायामुखेतयामासꣳसृजामसीति ॥ मंत्रावृत्त्यासव्येनिदधाति ॥ ततोदक्षिणकर्णस्थंकुंडलंयथानपततितथानिदधाति ॥ ऋतुभिष्ट्वार्तवैरायुषेवर्चसेसंवत्सरस्यधायसातेनसन्ननुगृह्णासीति ॥ पुनर्मंत्रंपठित्वासव्यकर्णस्थंपिदधाति ॥ ततोग्रीवायांमणिंबध्नाति ॥ इयमोषधेत्रायमाणासहमानासहस्वती ॥ सामाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोत्वपाशोसीति ॥ ततोद्वाभ्यांस्रजंधारयति शुभिकेशोभमारोहशोभयंती मुखंमम ॥ मुखंचममशोभयभूयाꣳसंचभगंकुरु ॥ यामाहरज्जमदग्निःश्रद्धायैकामायास्यै ॥ इमांतांप्रतिमुंचेहंभगेनसहवर्चमयिपर्वतपूरुषमिति ॥ १ ॥ ततस्त्रैककुदेनांजनेनान्येनकज्जलादिनावासकृदुक्तेनमंत्रेणहस्ताभ्यांबहुकृत्वोयुगपदनक्ति ॥ यदांजनंत्रैककुदंजातꣳहिमवतउपरि॥ तेनवामांजेहंभगेनसहवर्चसामयिपर्वतपूरुषमिति॥ युगपदशक्तौसव्यमंक्त्वादक्षिणमनक्ति॥ तदाद्विवचनांतेपिमंत्रेचक्षुःसंस्कारत्वान्मंत्रावृत्तिः ॥ ततआत्मानमादर्शेवेक्षते ॥ यन्मेमनःपरागतंयद्वामेअपरागतं ॥ राज्ञासोमेनतद्वयमस्मासुधारयामसीति ॥ ततोवैणवंदंडंप्रतिगृह्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि इतिततोदंडंसकृन्मंत्रमुक्त्वात्रिरुन्मार्ष्टि ॥ इंद्रस्यवज्रोस्यश्विनौमापातमिति ॥ ततःसकृदुक्तेनमंत्रेणदंडंत्रिःप्रदक्षिणमुपरिशिरोभ्रामयति ॥ वेगवेजयास्मत्द्विषतस्तस्करान्त्सरीसृपान्छापदान्रक्षाꣳसिपिशाचान्पौरुषेयाद्भयान्नोदंडरक्षविश्वस्माद्भयाद्रक्षसर्वतोजहितस्करानन्नमःसर्ववृक्षेषुजायसेत्वꣳसपत्नहा ॥ जहिशत्रुगणान्त्सर्वान्त्संमतंमघवानिवेति ॥ यदिप्रमादाद्भस्तादंडः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पततितंपुनरादत्ते ॥ योमेदंडःपरापतद्धिहायसोधिभूम्यां ॥ इमंतंपुनराददेयमायुषेचबलायचेति ॥ इदंचदंडधारणंयावज्जीवं मधुपर्कांतकर्मसमाप्त्यंतंवाआवश्यकं ॥ ततःसकृन्मंत्रेणपादयोरुपानहावबध्ययुगपदवरोहति ॥ युगपदशक्तौमंत्रावृत्तिः ॥ प्रतिष्ठेस्थोदेवतेमामासंतास्तमिति ॥ ततश्छत्रंप्रतिगृह्णाति ॥ प्रजापतेःशरणमसिब्रह्मणश्छदिरिति ॥ ततश्छत्रधारणानंतरंग्रा मप्रवेशार्थंरथादियानमारुह्ययत्रपूजांकरिष्यंतोभवंतिमातुलाद्याः यथावास्वस्यपूजाभवतितथावेदनंकृत्वापितद्गृहंमधुपर्कपू जार्थंस्नातकोगच्छेत् ॥ यदातुगोष्ठेसमावर्तनकर्मक्रियतेतदारात्रिपर्यंतंतत्रैवस्थित्वारात्रौरथाद्यारुह्यगच्छेत् ॥ सूर्यरश्मिदर्शन प्रतिषेधस्तुगोष्ठेकरणपक्षएव ॥ आनयंत्यस्मैरथंग्रामप्रवेशार्थमश्वंहस्तिनंवा ॥ स्नातकोरथमारोहति ॥ रथंतरमसिवामदेव्य मसि ॥ बृहदस्यंकौन्यंकावभितोरथंयौध्वांतंवाताग्रमनुसंचरंतौदूरेहेतिरिंद्रियावान्पतत्रीतेनोग्नयःपप्रयःपारयंतु ॥ अयंवाम श्विनारथोमादुःखेमासुखेरिषत् ॥ अरिष्टःस्वस्तिगच्छतुविविघ्नन्नभिदासतः ॥ इहधृतिरिहविधृतिरिहरंतिरिहरमतामितिरथं॥ अश्वमारोहति ॥ अश्वोसिहयोसिमयोस्यत्योसिनरोस्यर्वासिसप्तिरसिवाज्यसिवृषासिनृमणाअसिययुर्नामासीति ॥ एकादशभि रश्वनामभिरश्वं ॥ गजमारोहति ॥ इंद्रस्यत्वावज्रेण्यभ्युपविशामिवहकालवहश्रियंमाभिवहहस्त्यसिहस्तियशसमसिहस्तिवर्च समसिहस्तियशसीहस्तिवर्चसीभूयासमिति॥ आरोहणानंतरमेवसकृन्मंत्रमुक्त्वादिशउपस्थायगच्छति ॥ गच्छन्वाउपतिष्ठते ॥ सꣳस्रवंतुदिशोमयिसमागच्छंतुसूनृताः ॥ सर्वेकामाअभियंतुनःप्रियाअभिस्रवंतुनःप्रियाइति ॥ ततःपूजकगृहंप्राप्ययानादव रुह्यानवरुह्यवास्वसंमुखमागच्छंतंस्वयंवाभिमुखंगत्वा [illegible] ॥ यदोसियशोहंत्वयिभूयासमिति ॥

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्रीः ॥ पूजकःसमावर्तनदिनेस्वगृहमागतायस्नातकायशयनासनादिसन्निवासस्थानंसंपाद्यपूज्यंप्राङ्मुखमुपवेश्यस्वयंचोदङ्मुखउपविश्यपरिकर्मिभिर्मधुपर्कपात्राणिसहैवासादयति ॥ तद्यथा ॥ ह्रसीयःसुचतुर्षुपात्रेषुकूर्चमुपवेशार्थंपाद्यार्घ्याचमनीयार्थां अपश्चपृथक्पृथक्संस्थाप्यवर्षीयसापिधायतथाह्रसीयसिकांस्येदधिमधुघृतमितित्रिवृद्दधिमधुघृतमापःसक्तवइतिपक्तंवाकांस्ये कृत्वावर्षीयसापिधायसूत्रेणावेष्ट्यइतिपंचपात्राणिगांचयथाशक्तिवस्त्रयज्ञोपवीताभरणानिचासाद्य ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यउपस्थितंस्नातकंमधुपर्केणपूजयिष्यइतिसंकल्प्य ॥ अर्घइतित्रिःप्राह ॥ पूज्यःकुरुतेतिप्रत्याह ॥ पूजकःकूर्चइतित्रिःप्राह ॥ पूज्यःसुकूर्चइत्युक्त्वाहस्ताभ्यांप्रतिगृह्यपद्भ्यामाक्रम्योदगग्रेकूर्चेप्राङ्मुखउपविशति ॥ राष्ट्रभृदस्याचार्यासंदीमात्वद्योषमिति ॥ पूजकःपाद्यमितित्रिःप्राह ॥ पूज्यःसुपाद्यमितिप्रत्याह अस्मिन्राष्ट्रेश्रियमावेशयाम्यतोदेवीःप्रतिपश्याम्यापः ॥ दक्षिणंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंदधामि ॥ सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंवर्धयामि ॥ पूर्वमन्यमपरमन्यंपादाववनेनिजे ॥ देवाराष्ट्रस्यागुप्त्याअभयस्यावरुध्यै ॥ आपःपादावनेजनीर्द्विषंतंनिर्दहंतुमे ॥ चरणंपवित्रंविततंपुराणं ॥ येनपूतस्तरतिदुष्कृतानि ॥ तेनपवित्रेणशुद्धेनपूताः ॥ अतिपाप्मानमरातिंतरेम ॥ लोकस्यद्वारमर्चिमत्पवित्रं ॥ ज्योतिष्मद्राजमानंमहस्वत् ॥ अमृतस्यधारांबहुधादोहमानं ॥ चरणंनोलोकेसुधितांदधातु ॥ अग्निर्मूर्धाभुवः ॥ अनुनोद्यानुमतिरन्विदनुमतेत्वं ॥ हव्यवाहश्स्विष्टं ॥ पूजकस्यशूद्रःशूद्रावासव्यंपादमग्रेब्राह्मणस्यप्रक्षालयतिब्राह्मणोदक्षिणमग्रेप्रक्षाल्यसव्यंप्रक्षालयति ॥ ततः पूज्यःपूजकस्यहस्तावभिमृशति ॥ विराजोदोहोसिमयिदोहःपाद्यायैविराजइति ॥ ततआत्मानमभिमृशति ॥ मयितेजइंद्रियं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वीर्यमायुःकीर्तिर्वर्चोयशोबलमिति ॥ ततःपूजकःवस्त्रालंकारादिसहितमर्घ्यजलमादायार्घ्यमितित्रिःप्राह ॥ पूज्यःस्वर्घ्यमित्युक्त्वापूजकदत्तमर्घ्यजलसहितंवस्त्रालंकारादिसर्वंप्रतिगृह्णाति ॥ आमागन्यशसासꣳसृजतेजसावर्चसापयसाच ॥ तंमाकुरुप्रियंप्रजानामधिपतिंपशूनामिति ॥ अर्घ्यजलंपूजकेनदीयमानंकिंचित्तूष्णींप्रतिगृह्यावशिष्टंप्रदात्रेप्रदायतेनभूमौनिनीयमानमनुमंत्रयते ॥ समुद्रंवःप्रहिणोम्यक्षिताःस्वांयोनिमपिगच्छत ॥ अच्छिद्रःप्रजयाभूयासंमापरासेचिमत्पयइति ॥ ततःप्रतिगृहीतेनवस्त्रालंकारादिनात्मानमलंकरोति ॥ द्विराचम्य ॥ पूजकआचमनीयमितित्रिःप्राह ॥ पूज्यःस्वाचमनीयमित्युक्त्वा ॥ अमृतोपस्तरणमसीतिसकृदर्धजलमाचामति ॥ नात्रशुद्धाचमनं ॥ ततःपूजकोमधुपर्कमादायमधुपर्कइतित्रिःप्राह ॥ पूज्यःसुमधुपर्कइत्युक्त्वाहस्ताभ्यामाकाशांजलिनाप्रतिगृह्णाति ॥ देवस्यत्वेत्यादिप्रतिगृह्णामीत्यंतेन ॥ ततस्तंपृथिव्यांप्रतिष्ठापयति ॥ पृथिव्यास्त्वानाभौसादयामीडायाःपदेइति ॥ दक्षिणकरस्यांगुष्ठेनोपमध्यमयाचसकृदुक्तेनमंत्रेण त्रिःप्रदक्षिणमालोडयति ॥ यन्मधुनोमधव्यंपरममन्नाद्यꣳरूपं ॥ तेनाहंमधुनोमधव्येनपरमेणरूपेणपरमोमधव्योन्नादोभूयासमिति ॥ ततोमंत्रावृत्त्यांगुष्ठोपमध्यमाभ्यामेवत्रिःप्राश्नाति ॥ तेजसेत्वाश्रियैयशसेबलायान्नाद्यायप्राश्नामीति ॥ रातयेतच्छिष्टंप्रदायअभावेसर्वंप्राश्य ॥ ततःअमृतापिधानमसीतिआचमनीयशेषेणसकृदाचम्यमुखंप्रक्षाल्यविधि[1]वदाचामति ॥ ततःपूजकोगौरितित्रिःप्राह ॥ पूज्यःसुगौरित्युक्त्वागामुत्सृजति ॥ गौर्धे॒नुर्भ॒व्या मा॒तारु॒द्राणां॑दुहि॒तावसू॑ना॒ꣳस्वसा॑दि॒त्याना॑म॒मृत॑स्य॒नाभिः॑ ॥ प्रणुवो॑चंचिकि॒तुषे॒जना॑य॒मागामना॑गा॒मदि॑तिंवधिष्ट ॥ पिबतूदकंतृणान्यत्तुओमुत्सृजतेति ॥ ततःपूजकःसिद्धेन्नेभूतमितित्रिःप्राह ॥ पूज्यः ॥ तत्सुभूतंवि

१ विध्युक्ताचमनंश्रुत्युक्तं "केशवाद्यैस्त्रिभिःपित्वे"

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

राडन्नंतन्माक्षायैतन्मेशीयतन्मऊर्जधास्तत्सुभूतामितिप्रत्याह ॥ पुनःपूज्यआह ॥ ब्राह्मणान्भोजयतेति ॥ ततःपूजकःब्राह्मण भुक्तशेषमन्नंपूज्यायददाति ॥ पूज्यस्तत्प्रतिगृह्णाति ॥ द्यौस्तेददातुपृथिवीप्रतिगृह्णातुपृथिवीतेददातुप्राणःप्रतिगृह्णातुप्राणस्त्वा श्नातुप्राणःपिबतुइति ॥ ततोयावत्कामंप्राश्नाति ॥ इंद्राग्नीमेवर्चैःकृणुतांवर्चःसोमोबृहस्पतिः ॥ वर्चोमेविश्वेदेवावर्चोमेधत्तम श्विना ॥ ततःशुद्धाचमनोत्तरंद्विराचम्यकल्पितेतस्मिन्नावसथेरात्रिश्चेत्स्थित्वास्वगृहंगच्छति ॥ यदातुपित्रादिरध्यापयति त दाग्रामात्बहिर्नद्यादौगोष्ठेवाविधिवत्स्नातेनछत्रधारणांतकर्मानंतरंरथादियानमारुह्यपितृगृहमागच्छति ॥ तदापित्रादिरेवमधु पर्केणार्हयति ॥ पितैवैनंमधुपर्केणार्हयेदितिमनुस्मरणात् ॥ ततःकर्मांगंब्राह्मणभोजनंदशाधिकंदक्षिणांचसंकल्प्यदत्त्वाकर्म साद्गुण्यायविष्णुंस्मरेत् ॥ यदिदंरथगजाश्वारोहणंदिशामुपस्थानंपूजकनिरीक्षणंचसमंत्रमुक्तंतत्समावर्तनांगत्वात्स्नातकस्यैव भवति ॥ अथास्माआवसथमित्यथशब्दादधिकारवचनात् ॥ ऋत्विगाचार्यश्वशुरमातुलविवाह्यादीनामेवंमधुपर्कपूजाकार्या ॥ विशेषविचारोवगंतव्यःप्रमाणभागात् ॥ इतिसमावर्तनप्रयोगः ॥ ॥ ॥ ॥ छ ॥

॥ १४७ ॥ विवाहविचारः ॥

श्रीः ॥ (तत्राष्टौविवाहाः "ब्राह्मोदैवस्तथाचार्षःप्राजापत्यस्तथासुरः ॥ गांधर्वोराक्षसश्चैवपैशाचस्त्वष्टमोमतः ॥ अस्यव्याख्या ग्रंथांतरे तेषुब्राह्मादिषुमुख्यंब्राह्मविवाहपक्षमंगीकृत्यवदंति ॥) कन्यावरणंवाङ्निश्चयोनांदीश्राद्धादिकंचवरपित्रादिनाक्रिय ते ॥ तच्चकन्यादानादिकंकन्यापित्रा ॥ विवाहहोमादिकंचवरेण ॥ अंगंवाप्रधानंवायस्ययद्विधितःप्राप्तंतत्तेनक्रियते इत्यनेक

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कर्तृककर्मसमुदायविशेषोविवाहसंस्कारः ॥ तेनचकन्यापुत्रयोःसंस्कारोभवतीति विवाहस्यास्तिगर्भाधानादिसंस्कारेष्वंतर्भावः ॥ तथाहि ॥ अत्रेयंप्रयोगपारिजातस्थव्याख्यालिख्यते ॥ नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहेपुनः ॥ अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकम् ॥ चंद्रिकायांकात्यायनस्तुस्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्मसु ॥ पिंडानोद्वहनात्तेषांतस्याभावेतुतत्क्रमादिति ॥ इदंवचनंखंडशोनिबंधकारैःप्रयोगपारिजातेचव्याख्यातं ॥ प्रकृतोपयोगिकिंचिदुच्यते ॥ पिंडान्आउद्वहनात्उद्वाहंअभिव्याप्यगर्भाधानादिविवाहांतेषुसुतसंस्कारकर्मसुपितास्वपितृभ्योदद्यादिति ॥ सुतशब्देनपुत्र्यपिगृह्यते ॥ विवाहश्चावश्यंसुतादीनांसंस्कारोभवतीति ॥ उपस्थितेविवाहेअमुकस्यविवाहसंस्कारंकरिष्येइतिसंकल्पस्त्ववश्यंकर्तव्यः ॥ पित्रादयःसंस्कारकाः ॥ पुत्रादयःसंस्कार्याः ॥ विवाहश्चसंस्कारइतिनबुध्यंतेभ्रांतास्तन्नकुर्वंति ॥ प्रयोगकारैर्नलिखितस्तेषामनुपस्थितिर्विस्मरणंवामूलमिति ॥ विवाहसंकल्पमारभ्यचतुर्थीहोमांतोवाग्गृहप्रवेशनीयस्थालीपाकांतोवाद्विविधोविवाहः ॥ तत्रपाणिग्रहणंप्रधानं ॥ पाणिग्रहणाद्धिसहत्वमितिधर्मेस्मरणात् ॥ शाखांतरीयंकन्यावरणंवाग्दानंस्वकल्पविहितंगृहप्रवेशादिचांगमेव ॥ प्रथमपक्षेपाणिग्रहणप्रभृत्यौपासनहोमस्त्रिरात्रव्रतंच ॥ पाणिग्रहणदिनमादायैवतृतीयस्याह्नस्त्रिभागशेषायांरात्रौचतुर्थीकर्मचभवति ॥ गृहप्रवेशकर्मतुविवाहहोमोत्तरमेवदूरदेशत्वेनाशक्तौ ॥ शक्तौतुचतुर्थीहोमात्पूर्वंपश्चाद्वास्वगृहंगत्वैवकर्तव्यम् ॥ गृहप्रवेशांतोविवाहइतिद्वितीयःपक्षः ॥ तत्रगृहप्रवेशस्थालीपाकानंतरमौपासनोपक्रमः ॥ नपूर्वंपाणिग्रहणप्रभृति ॥ गृहप्रवेशदिनोत्तरंदिनत्रयंत्रिरात्रव्रतंगृहप्रवेशदिनमादायैवतृतीयस्याह्नस्त्रिभागशेषायांरात्रौचतुर्थीकर्मसंगमार्थं ॥ नविवाहांगं ॥ त्रिविधेपिविवाहेपार्वणस्थालीपाकानंतरमेवचतुर्थीहोमात्पूर्वमपिचभवति ॥

CC-0. JSPublic Domain Fundimg by MoF IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri
सर्वस्थालीपाकानांप्रकृतिर्गृह्यप्रवेशस्थालीपाकः ॥ इदंचपक्षद्वयंनित्योध्वग्रहणव्याख्यानव्यवस्थयाविवाहप्रकरणेवृत्तिकारेणदर्शितमित्यलंविस्तरेण ॥ ॥ ॥ ॥ ७ ॥

॥ १४८ ॥ कन्यावरणम् ॥

श्रीः ॥ ज्योतिर्विदादिष्टेविवाहनक्षत्रयुतेशुभेकालेद्वौचत्वारोष्टादयोवाब्राह्मणाःप्रशस्तवेषाःवरेणतत्पित्रादिनावाप्रेषिताः ॥ अनृक्षराक्रुजवंःसंतुपंथायेभिःसखायोयंतिनोवरेयं ॥ समर्यमासंभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः ॥ इतिमंत्रपाठपुरःसरंमांगल्यद्रव्यगंधतांबूलवस्त्राभरणयुतप्रशस्तवेषाभिःपुरंध्रीभिःसहगीतवाद्यादिघोषेणवरयुतास्तदयुतावाकन्यागृहमेत्यशुभेवस्त्राच्छादितेपीठेप्राङ्मुखींसालंकृतांसुवेषांकन्यामुपवेश्यगंधतांबूलादितद्धस्तेवरपित्रादिर्दत्त्वातत्पित्रादयःगणपतिपूजनपूर्वकंप्राङ्मुखासीनाः ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकशर्मणेवराय ॥ अमुकप्रवरोपेताममुकगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नींकन्यांभार्यात्वायवृणीमहेइतिब्रूयुः ॥ अथकन्यादाताभार्याज्ञातिबंधवनुमतिंकृत्वायथोक्तमनूद्यानूद्यवावृणीध्वमितिवदेत् ॥ एवंपुनर्द्विःप्रयुज्यप्रदास्यामीतित्रिरुच्चैर्वदेत् ॥ ततोवरपित्रादिर्गंधाक्षतशुभवस्त्रयुग्मभूषणतांबूलपुष्पादिभिःकन्यांपूजयेत्संप्रदायागतैर्मंत्रैर्देवींवाचमित्यादिभिः ॥ इतिबौधायनोक्तं ॥

॥ १४९ ॥ वाग्दानम् ॥

श्रीः ॥ कन्यादाताप्राङ्मुखउपविश्यकन्यांवामतउपवेश्यआचम्यप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणविवाहांगभूतंवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ग्दानमहंकरिष्ये ॥ तदंगंगणपतिपूजनंवरुणपूजनंचकरिष्यइतिचसंकल्प्यगंधादिदक्षिणांतोपचारैर्गणपतिंसंपूज्ययथाचारंक
लशपूजनादिकृत्वा ॥ स्वस्थानेकन्यापूजयितारमुपवेश्यस्वयंतत्प्राच्यांप्रत्यङ्मुखउपविश्यगंधतांबूलादिनापूजयेत् ॥ सचदा
तारं ॥ तौचस्वस्वमान्यान्यथाचारंगंधादिदापयित्वागृह्णीयातां ॥ ततोकन्यादाताहरिद्राखंडंपंचदृढपूगीफलानिगंधाक्षतसहि
तानिचआचारात्गृहीत्वा ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकशर्मणेवराय ॥ अमु
कप्रवरान्वितामुकगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नींकन्यांज्योतिर्विदादिष्टेमुहूर्तेदास्येवाचासंप्रददेइति
चोक्त्वा ॥ अव्यंगेऽपतितेऽक्लीबेदशदोषविवर्जिते ॥ इमांकन्यांप्रदास्यामिदेवाग्निद्विजसंनिधौ ॥ इतिपठित्वा॥ वरपित्रादिव
स्त्रप्रांतेतानिपूगफलानिप्रक्षिप्यनर्यप्रजामितिप्रतिष्ठामंत्रेणवस्त्रप्रांतेबध्वाग्रंथिंचंदनादिनाचर्चयेत् ॥ ततोहरिद्राखंडंपंचपूगफ
लानितथैववरपित्रादिर्गृहीत्वामुकप्रवरान्वितामुकगोत्रोत्पन्नामुकवरविषयेभवंतोनिश्चिताभवंत्वितिदातृवस्त्रप्रांतेप्रक्षेपादिकंकु
र्यात् ॥ ततोकन्यादाता ॥ वाचादत्तामयाकन्यापुत्रार्थंस्वीकृतात्वया ॥ कन्यावलोकनविधौनिश्चितस्त्वंसुखीभव ॥ इतिवरपि
तरंप्रतिपठेत् ॥ सच ॥ वाचादत्तात्वयाकन्यापुत्रार्थंस्वीकृतामया ॥ वरावलोकनविधौनिश्चितस्त्वंसुखीभव ॥ इतिकन्यापि
तरंप्रतिपठेत् ॥ भ्रात्रादौकर्तरिभ्रात्रर्थमित्यूहःकर्तव्यः ॥ ब्राह्मणाः ॥ शिवाआपःसंतु ॥ सौमनस्यमस्तु ॥ अक्षतंचा
रिष्टंचास्तु ॥ दीर्घमायुःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ एतद्वःसत्यमस्तु ॥ इत्युक्त्वा ॥ समानीवआकूतिःसमानाहृदयानिवः ॥
समानमस्तुवोमनोयथावःसुसहासतिइतिपठेयुः ॥ ततोकन्यादाताकन्यायाःविवाहसौभाग्याद्यभिवृद्ध्यर्थंशचीपूजनमहंकरिष्ये

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इतिसंकल्प्य ॥ पात्रस्थसिततंडुलपुंजेशचीमावाह्यषोडशोपचारैःपंचोपचारैर्वापूजयेत् ॥ देवेंद्राणिनमस्तुभ्यंदेवेंद्रप्रियभामिनि ॥ विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमे ॥ इतिशचींकन्याप्रार्थयेत् ॥ ततःसुवासिनीभिर्नीराजनादिमांगलिकंकार्यं ॥ विप्राश्चगंधतांबूलादिभिःपूजिताःसौभगायपदांतान्आशीर्मंत्रान्पठेयुः ॥ तेचमंत्राः ॥ (समिद्धस्यवनस्पतेसंदिव्येनबृहस्पतेचतुःशिखंडानर्यप्रजामितिषण्मंत्रादयः)॥ समि॑द्धस्य॒श्रय॑माणःपु॒रस्ता॒द्ब्रह्म॑वन्वा॒नोअजर॑ꣳसु॒वीरं॑ ॥ आ॒रेअ॒स्मदम॑तिं॒बाध॑मान॒उच्छ्र॑यस्वमह॒तेसोभ॑गाय ॥ १ ॥ वन॑स्पतेश॒तव॑ल्शो॒विरो॑हस॒हस्र॑वल्शा॒विव॒यꣳरु॑हेम ॥ यंत्वा॒वयꣳस्वधि॑ति॒स्तेति॑जानःप्रणि॒नाय॑मह॒तेसौभ॑गाय ॥ २ ॥ संदि॒व्येन॒दीदि॑हिरोच॒नेन॒विश्वा॒आभा॑हिप्र॒दिशः॑पृथि॒व्याः ॥ संचे॒ध्यस्वा॑ग्ने॒प्रच॑बोधयैन॒मुच्च॑तिष्ठमह॒तेसौभ॑गाय ॥ ३ ॥ बृह॑स्पतेसवितर्बो॒धयै॑न॒ꣳसꣳशि॑तंचित्संत॒राꣳसꣳशि॑शाधि ॥ व॒र्धयै॑नंमह॒तेसौभ॑गाय ॥ ४ ॥ चतुः॑शिखंडायुव॒तिःसु॒पेशा॑घृ॒तप्र॑तीका॒भुव॑नस्य॒मध्ये॑ ॥ म॒र्मृ॒ज्यमा॑नामह॒तेसौभ॑गाय ॥ ५ ॥ नर्यप्रजामितिच ॥ ततोगंधतांबूलादिभिर्ब्राह्मणान्संपूज्यतेभ्यश्चाशिषोगृह्णीयात् ॥ अस्मेदेवासइत्याद्याआशीर्मंत्राः ॥ इतिवाग्दानप्रयोगः ॥ ततोयथाकालंवैवाहिकेशुभेमुहूर्तेवधूवरयोस्तैलहरिद्रारोपणादियथाचारंकार्यं ॥ गृहांगणेषोडशद्वादशाष्टान्यतमारत्निर्मंडपःकार्यः ॥ ॥

॥ १५० ॥ विवाहप्रयोगः ॥

श्रीः ॥ तत्रसद्मवामभागेसंस्कार्यचतुर्हस्तायताहस्तमात्रोच्छ्रायासुलक्षणावेदिःकार्या ॥ ततोवधूपितावरपिताचविवाहदिनात्पूर्वेद्युस्तद्दिनेवापूर्वाह्णेपत्नीसहितःकृताभ्यंगःकृतमांगलिकवेषःकृतलेपनरंगमालिकेप्रांगणेशुभासनेप्राङ्मुखउपविश्यस्वदक्षिणतः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पत्नींतद्दक्षिणतःसंस्कार्यंचोपवेश्यआचम्यप्राणानायम्यइष्टदेवतागुर्वादीन्नमस्कृत्यदेशकालौसंकीर्त्य ममास्यामुकशर्मणःपुत्रस्य अमुकनाम्न्याःकन्यकायाःभ्रातृपुत्रस्यवाविवाहसंस्कारंकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंन वग्रहमखंमंडपदेवताप्रतिष्ठापनंचकरिष्ये इतिसंकल्प्योक्तरीत्यागणपतिपूजनंपुण्याहवाचनंचकृत्वानांदीश्राद्धात्पूर्वंअविघ्नपसं ज्ञकंगणपतिंकलशेआवाह्यवस्त्राच्छन्नवंशपात्रस्थतंडुलपुंजेषुगौर्यादिषोडशब्राह्म्यादिसप्तमातृकाःकुलदेवतागणपत्यादिसहिता उपनयनोक्तरीत्यापूजयित्वानांदीश्राद्धंचकृत्वामंडपदेवताआवाह्यसंपूज्यमंडपदेवताप्रतिष्ठांमंडपेविधायमंडपाभावेगौर्यादिस्था पितवंशपात्रेवाकृत्वा ॥ तद्वंशपात्रंस्वयंगृहीत्वाअविघ्नपकलशंपद्भ्याग्राहयित्वा इयमेवसायाप्रथमेतिमंत्रंपठन्गृहांतःपूजितेदे शेनीत्वानर्यप्रजामितिप्रतिष्ठाप्ययावन्मंडपोद्वासनंप्रत्यहंपूजयेत् ॥ अन्यदपियथाकुलधर्मंसर्वंकुर्यात् ॥ ततोविवाहांगदेवता कुलदेवताप्रीत्यर्थंद्विजसुवासिनीकुमारिकादीन्यथाचारंयथाकालंयथोपपन्नेनान्नेनभोजयेत् ॥ ॥ ॥

॥ १५१ ॥ लग्नघटीस्थापनम् ॥

श्रीः ॥ प्रागुदक्प्रवणेदेशेगोमयेनोपलेपिते ॥ मृन्मयंकुंडिकायुग्मंस्थापयेदव्रणंशुभं ॥ कुंकुमाक्तेनसूत्रेणपरिवेष्ट्यपरस्परं ॥ स्वच्छेनवारिणापूर्णंतंडुलानामथोपरि ॥ निश्चलेसलिलेपश्चात्कुंडिकायांजलोपरि ॥ स्थापयेद्घटिकायंत्रंसूर्यबिंबानुदर्शनात् ॥ ताम्रपात्रेवारिपूर्णेमृत्पात्रेप्यथवाशुभे ॥ मंडलार्धोदयंवीक्ष्यरवेस्तत्रविनिक्षिपेत् ॥ कर्तादेशकालावुत्कीर्त्यअद्यकरिष्यमाणवि

१ ममास्यपुत्रस्यदैवपित्र्यपाकरणहेतुधर्मप्रजोत्पादनसिद्धिद्वाराविवाहसंस्कारंकरिष्ये ममास्याःकन्यायाःभर्त्रासहधर्मप्रजोत्पादनगृह्यपरिग्रहध

CC-0.In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

वाहेशुभकालज्ञानार्थंघटीस्थापनंकरिष्यइतिसंकल्प्यगणपतिंसपूज्यमहाद्यारित्यादिविधिनास्थापितभांडेवरुणंसंपूज्यतत्रजले॥ मुख्यंत्वमसियंत्राणांब्रह्मणानिर्मितंपुरा ॥ भवभावायदंपत्योःकालसाधनकारणं ॥ इतिमंत्रेणघटिकापात्रंनिक्षिपेत् ॥ ॥

॥ १५२ ॥ सीमांतपूजनम् ॥

श्रीः ॥ अथकन्यादातावरगृहमागतःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणकन्याविवाहांगत्वेनवरस्यसीमांतपूजनंकरिष्यइतिसंकल्प्य गणेशवरुणपूजनेकृत्वा अस्मिन्राष्ट्रेश्रियमितिपत्नीप्रक्षिप्तजलेनतदीयदक्षिणवामपादौप्रक्षाल्याचाम्यगंधपुष्पनीराजनवस्त्रैर्यथासंभवंसंपूज्ययथाचारंदुग्धादिप्राशनंकारयेत् ॥ इतिसीमांतपूजा ॥ ॥ छ ॥ ॥ छ ॥

॥ १५३ ॥ वरस्यवधूगृहगमनं ॥

श्रीः ॥ वरःकृतनित्यक्रियःस्वलंकृतःस्रग्वीइष्टदेवतागुर्वादींश्चनमस्कृत्यतैरनुज्ञातोयथाविभवमश्वादियानंतूष्णीमारुह्यधृतसितच्छत्रःस्वर्चितैर्ज्ञातिबांधवैःकनिक्रदादिमंगलसूक्तपठनपरैर्ब्राह्मणैःपुरंध्रीभिःपूर्णकलशदर्पणकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यघोषैश्चसहवधूगृहमेत्यतद्वारदेशेप्राङ्मुखउदङ्मुखोवास्थितोनीराजनपूर्णकुंभयुतैःपुरंध्रीजनैःप्रत्युद्यातोनीराजितोंतर्गृहंप्रविश्यमंडपांतःसम्यगास्तृतेपीठेप्राङ्मुखउपविशेत् ॥ ॥ ॥ ॥ ॥

॥ १५४ ॥ मधुपर्केणवरस्यपूजा ॥

श्रीः ॥ कन्यादाताउदङ्मुखउपविश्यस्वदक्षिणतःपत्नीमुपवेश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यविवाहार्थमुपस्थितंवरंमधु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पत्नींतदक्षिणतःसंस्कार्यंचोपवेश्यआचम्यप्राणानायम्यइष्टदेवतागुर्वादीन्नमस्कृत्यदेशकालौसंकीर्त्य ममास्यामुकशर्मणःपुत्रस्य अमुकनाम्न्याःकन्यकायाःभ्रातृपुत्रस्यवाविवाहसंस्कारंकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंन वग्रहमखंमंडपदेवताप्रतिष्ठापनंचकरिष्ये इतिसंकल्प्योक्तरीत्यागणपतिपूजनंपुण्याहवाचनंचकृत्वानांदीश्राद्धात्पूर्वंअविघ्नपसं ज्ञकंगणपतिंकलशेआवाह्यवस्त्राच्छन्नवंशपात्रस्थतंडुलपुंजेषुगौर्यादिषोडशत्राह्ययादिसप्तमातृकाःकुलदेवतागणपत्यादिसहिता उपनयनोक्तरीत्यापूजयित्वानांदीश्राद्धंचकृत्वामंडपदेवताआवाह्यसंपूज्यमंडपदेवताप्रतिष्ठांमंडपेविधायमंडपाभावेगौर्यादिस्था पितवंशपात्रेवाकृत्वा ॥ तद्वंशपात्रंस्वयंगृहीत्वाअविघ्नपकलशंपत्न्याग्राहयित्वा इयमेवसायाप्रथमेतिमंत्रंपठन्गृहांतःपूजितेदे शेनीत्वानर्यप्रजामितिप्रतिष्ठाप्ययावन्मंडपोद्वासनंप्रत्यहंपूजयेत् ॥ अन्यदपियथाकुलधर्मंसर्वंकुर्यात् ॥ ततोविवाहांगदेवता कुलदेवताप्रीत्यर्थंद्विजसुवासिनीकुमारिकादीन्यथाचारंयथाकालंयथोपपन्नेनान्नेनभोजयेत् ॥ ॥ ॥

॥ १५१ ॥ लग्नघटीस्थापनम् ॥

श्रीः ॥ प्रागुदक्प्रवणेदेशेगोमयेनोपलेपिते ॥ मृन्मयंकुंडिकायुग्मंस्थापयेदव्रणंशुभं ॥ कुंकुमाक्तेनसूत्रेणपरिवेष्ट्यपरस्परं ॥ स्वच्छेनवारिणापूर्णंतंडुलानामथोपरि ॥ निश्चलेसलिलेपश्चात्कुंडिकायांजलोपरि ॥ स्थापयेद्घटिकायंत्रंसूर्यबिंबानुदर्शनात् ॥ ताम्रपात्रेवारिपूर्णेमृत्पात्रेप्यथवाशुभे ॥ मंडलार्धोदयंवीक्ष्यरवेस्तत्रविनिक्षिपेत् ॥ कर्तादेशकालावुत्कीर्त्यअद्यकरिष्यमाणवि

१ ममास्यपुत्रस्यदैवपित्र्यर्णापाकरणहेतुधर्मप्रजोत्पादनसिद्धिद्वाराविवाहसंस्कारंकरिष्ये ममास्याःकन्यायाःभर्त्रासहधर्मप्रजोत्पादनगृह्यपरिग्रहध र्माचरणेष्वधिकारसिद्धिद्वाराविवाहसंस्कारंकरिष्य इतिधर्माब्धिसारेकौस्तुभेच ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाहेशुभकालज्ञानार्थंघटीस्थापनंकरिष्यइतिसंकल्प्यगणपतिंसंपूज्यमहीद्यौरित्यादिविधिनास्थापितभांडेवरुणंसंपूज्यतत्रजले॥ मुख्यंत्वमसियंत्राणांब्रह्मणानिर्मितंपुरा ॥ भवभावायदंपत्योःकालसाधनकारणं ॥ इतिमंत्रेणघटिकापात्रंनिक्षिपेत् ॥ ॥

॥ १५२ ॥ सीमांतपूजनम् ॥

श्रीः ॥ अथकन्यादातावरगृहमागतःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणकन्याविवाहांगत्वेनवरस्यसीमांतपूजनंकरिष्यइतिसंकल्प्य गणेशवरुणपूजनेकृत्वा अस्मिन्राष्ट्रेश्रियमितिपत्नीप्रक्षिप्तजलेनतदीयदक्षिणवामपादौप्रक्षाल्याचाम्यगंधपुष्पनीराजनवस्त्रैर्यथासंभवंसंपूज्ययथाचारंदुग्धादिप्राशनंकारयेत् ॥ इतिसीमांतपूजा ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १५३ ॥ वरस्यवधूगृहगमनं ॥

श्रीः ॥ वरःकृतनित्यक्रियःस्वलंकृतःस्रग्वीइष्टदेवतागुर्वादींश्चनमस्कृत्यतैरनुज्ञातोयथाविभवमश्वादियानंतूष्णीमारुह्यधृतसितच्छत्रःस्वर्चितैर्ज्ञातिबांधवैःकनिक्रदादिमंगलसूक्तपठनपरैर्ब्राह्मणैःपुरंध्रीभिःपूर्णकलशदर्पणकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यघोषैश्चसहवधूगृहमेत्यतद्द्वारदेशेप्राङ्मुखउदङ्मुखोवास्थितोनीराजनपूर्णकुंभयुतैःपुरंध्रीजनैःप्रत्युद्यातोनीराजितोंतर्गृहंप्रविश्यमंडपांतःसम्यगास्तृतेपीठेप्राङ्मुखउपविशेत् ॥ ॥ ॥ ॥ ॥

॥ १५४ ॥ मधुपर्केणवरस्यपूजा ॥

श्रीः ॥ कन्यादाताउदङ्मुखउपविश्यस्वदक्षिणतःपत्नीमुपवेश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यविवाहार्थमुपस्थितंवरंमधु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पर्केणपूजयिष्येइतिसंकल्प्यकूर्चादिसकलमधुपर्कपूजासामग्रीमासाद्यपूज्यशाखयासमावर्तनोक्तरीत्यामधुपर्कपूजांकुर्यात् ॥ अत्रवरस्यविवाह्यत्वेनमधुपर्कपूजा ॥ शाखांतरेमधुपर्कार्हेषुविवाह्यस्यपृथगुपादानात् ॥ स्नातकस्यतुस्नानदिनेउपस्थितस्यैवय द्गृहंगच्छतिसकुर्यात् ॥ अन्यथासर्वेषांस्नातकत्वेनातिप्रसंगःस्यात् ॥ अथकन्यास्नातापरिधृताहतवस्त्रागृहांतःपूजितस्थानेसू त्रवेष्टितोपलसहितदृषदुपरिहरिद्रादिनिर्मितौगौरीहरौसौभाग्यादिकामनयापूजयित्वादेवेंद्राणींतत्रैवाक्षतपुंजेपूजयित्वाप्रार्थये त्॥ देवेंद्राणिनमस्तुभ्यंदेवेंद्रप्रियभामिनि ॥ विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमेइति ॥ ततोगौरींसौभाग्यादिप्रार्थयमाना तत्रैवतिष्ठेत् ॥ (मुहूर्तपत्रिकापूजनं॥ कर्तादेशकालौसंकीर्त्यवधूवरयोःमुहूर्तदेवताप्रसादसिद्धिद्वारामुहूर्तपत्रिकापूजांकरिष्ये ॥ ॐ प्रणोदेवीसरस्वति० ॥ इतिषोडशोपचारैःसंपूज्यगणकमभ्यर्च्यतस्मैविभवेवस्त्रादिदत्वाततःइष्टकालंश्रुत्वासमयंप्रतीक्षेत् इत्याचारपरं) ॥ ततोब्राह्मणाःस्वलंकृतेवेश्मनिवादित्रादिघोषेक्रियमाणेपूर्वापरभागयोर्धान्यराशीकृत्वाकुंकुमकृतस्वस्तिकांकित मंतःपटंराश्योर्मध्येउत्तरदशंधारयेयुः ॥ पूर्वराशावश्मनिप्रत्यङ्मुखींकन्यांपश्चिमराशौपीठेप्राङ्मुखमेववरंकृत्वातंडुलजीरकयु तांजलीउभाववस्थाप्यद्विजामंत्रपठनंपुरंध्योमंगलगीतीश्चकुर्युः ॥ वधूवरौचमनसेष्टदेवतांध्यायंतौसमाहितौतिष्ठेतां ॥

॥ १५५ ॥ मंगलाष्टकानिललितंच ॥

श्रीः ॥ नत्वास्वांकुलदेवतांचकमलांविघ्नेश्वरंशारदांवक्ष्येकृष्णविवाहकौतुकमिदंचेतोहरंशृण्वतां ॥ स्वस्यैवान्यगुणानुवर्णनप रिश्रांतस्यविश्रांतयेनित्यंस्वोदरपूर्तयेकुहकवत्कुर्यात्सदामंगलं ॥ १ ॥ देवोविघ्नविनाशनोगणपतिर्ध्यातश्चचिंतापहृद्यन्नत्याहृत विघ्नकाअपिसुराजाताहराजादयः ॥ योत्राविघ्नसुसंज्ञयाचकलशेसंस्थापितोमंडपेसिद्ध्याश्लेषणहर्षितःसउभयोःकुर्यात्सदामं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गलं ॥ २ ॥ वात्सल्यात्पिरौकपोलयुगुलंस्वस्यागतौचुंबितुंदृष्ट्वाकुंचितमास्यपद्ममलंसेषत्स्मितंसत्वरं ॥ अन्योन्यंशिवयोस्ततः
सुवदनेयुक्तेअभूतांतयोरित्थंयेनविनोदितौसभगवान्कुर्यात्सदामंगलं ॥ ३ ॥ विघ्नेशोविबुधर्षिभिर्गणपतिर्दैतेयजोपद्रवाद्भीतैः
प्रार्थितईश्वरोपिकुतुकाद्धृत्वावपुःशैशवं ॥ पार्वत्योकसिशैशवानिचरितान्यत्युत्कटान्याचरन्देवोहर्षयतीश्वरौसभगवान्कुर्यात्स
दामंगलं ॥ ४ ॥ श्रीमान्काश्यपगोत्रजोरुणरुचिर्यःसिंहराशीश्वरःषट्त्र्याशस्थसुशोभनोगुरुकुजाज्ञानांचमित्ररविः ॥ दैत्येष्मं
दरिपुःकलिंगजननश्चाग्नीश्वरौदेवतेमध्येवर्तुलगैंद्रिकासुवदनःकुर्यात्सदामंगलं ॥ ५ ॥ ॥ विवाहललितं ॥ अविरलमदधारा
धौतकुंभःशरण्यःफणिवरवृतगात्रःसिद्धसाध्यादिवंद्यः ॥ त्रिभुवनजनविघ्नध्वांतविध्वंसदक्षोवितरतुगजवक्त्रःसंततंमंगलंवां
॥ १ ॥ विघ्नेश्वरोविघ्नविनाशकारीनिर्विघ्नकार्येसकलार्थसिद्धिः ॥ विघ्नेश्वरोविघ्ननरेशपूज्योवधूवराभ्यांशुभमादधातु ॥ २ ॥
सकलभुवनवृंदानंदसंदोहकंदःफणिवरवृतगात्रःसिद्धसाध्यादिवंद्यः ॥ असुरसुरमुनींद्रैःपूजितोविघ्नहर्तासकलगणनाथोमंगलं
वांददातु ॥ ३ ॥ यन्मंगलंप्रवरशंखगदाधरस्यरामस्यरावणजयायसमुत्थितस्य ॥ जित्वानिशाचरपुरींपुनरागतस्यतन्मंगलंभ
वतुवांविजयायनित्यं ॥ ४ ॥ सकलभुवनचंचद्भ्रांतविध्वंसदीपस्त्रिदशपतिदिशोयःस्वर्णताटंकपत्रं ॥ सकलभुवनलक्ष्मीदाय
कोनायकोह्लांसकलविविधमूर्तिर्मंगलंवांददातु ॥ ५ ॥ ॥ उपनयनललितं ॥ मंदमंदगमनोभवपुत्रःसर्वविघ्नशमनोगणराजः ॥
ऋद्धिबुद्धिसहितःफलदाताब्रह्मचारिबटवेवरदोस्तु ॥ १ ॥ धुंढिराजजननीगिरिपुत्रीभक्तदोषशमनीहितदात्री ॥ शंकरप्रियत
मातनुगौरीब्रह्मचारिबटवेवरदास्तु ॥ २ ॥ मेखलाजिनकमंडलुदंडीयज्ञसूत्रकनकांबरखड्गी ॥ कामनाकृतिहरिर्बलिदंडीब्रह्म
चारिबटवेवरदोस्तु ॥ ३ ॥ अजिनदंडकमंडलुमेखलारुचिरपावनवामनमूर्तये ॥ हितजगत्त्रितयायजितारयेनिगमवाक्पटवे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

बटवेनमः ॥ ४ ॥ यःपितुर्वचनपालनकामःकामनांतकरणोरणधीरः ॥ रावणांतकसलक्ष्मणरामोब्रह्मचारिबटवेवरदो ॥ ॥ ५ ॥ यावद्वीचीस्तरंगान्वहतिसुरनदीजाह्नवीपुण्यतोयायावच्चाकाशमार्गेतपतिहिमकरोभास्करोलोकपालः ॥ यावद्वज्रेंद्र नीलस्फटिकमणिशिलावर्ततेमेरुशृंगेतावत्त्वंपुत्रपौत्रैःस्वजनपरिवृतोजीवशंभोःप्रसादात् ॥ ६ ॥ अत्यासन्नतयाघंटारवग्रामाण्यज्योतिःशास्त्रोक्तसुलग्नसमयेसुतिथिःसुवारःसुनक्षत्रंसुयोगःसुकरणंहोराद्रेष्काणनवांशद्वादशांशात्रिंशांशत्रिंशदंशांशानिरंतरमनुकूलाःस्वस्तिसर्वेग्रहाःशुभाएकादशस्थानस्थितफलदाःवरदाभवंतु ॥ ॥ ततोज्योतिर्विदामंगलपद्यपाठपूर्वकंतदेवलग्नमितिपठितेप्रदिष्टेकालेसुमुहूर्तमस्त्विवत्युक्तेसद्योतःपटमुदगपसार्यवधूवराभ्यांपरस्परंनिरीक्षणंपरस्परस्मिन्नंजलिस्थतंडुलजीरकावकिरणंकन्यापूर्वकंकार्यमाचारात् ॥ पाणिग्रहणाद्धिसहत्वमितिधर्मेस्मरणात् विवाहेपाणिग्रहणंप्रधानं ॥ तद्यथासुमुहूर्तेभवतितथाकर्तव्यं ॥ शोभार्थंस्वमंत्रान्त्स्वल्पानृक्ववादिब्राह्मणखंडांश्चपठेत् ॥ ततस्त्रिवारंपंचवारंवापीताक्षतारोपणंवरपूर्वकंकुर्वंति ॥

॥ १५६ ॥ विवाहमंत्राः ॥

श्रीः॥नयेदैभ्योवृश्चेतयद्वैश्वकर्मणानिजुहोतिसद्स्यानेवतत्प्रीणात्यस्मेदेवासोवपुषेचिकित्सतयमाशिराद्दंपतीवामम॑श्नुतः॥ पुमान्पुत्रोजायतेविंदतेवस्वथविश्वेअरपाएधतेगृहः ॥ आशीर्दायादंपतीवामम॑श्नुतामीरष्टोरायःसचताꣳसमोकसा ॥ यआसिंचत्संदुग्धंकुंभ्यासहेष्टनयामन्नमतिंजहातुसः ॥ सर्पिर्ग्रीवीपीवर्यस्यजायापीवानःपुत्राअकृशासोअस्य ॥ सहजानिर्यःसुमखस्यमानइंद्रायाशिरꣳसहकुंभ्यादात् ॥ आशीर्मऊर्जमुतसुप्रजास्त्वमिषंदधातुद्रविणꣳसवर्चसं ॥ संजयन्क्षेत्राणिसहसाहमिंद्रकृण्वानोअ

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्याꣳअधरान्त्सपत्नान् ॥ १ ॥ प्रजापतिꣳसोमꣳराजानमसृजत ॥ तंत्रयोवेदाअन्वसृज्यंत ॥ तान्हस्तेंकुरुत ॥ अथहसीतासावित्री ॥ सोमꣳराजानंचकमे ॥ श्रद्धामुसचंकमे ॥ साहपितरंप्रजापतिमुपससार ॥ तꣳहोवाच ॥ नमस्तेअस्तुभगवः ॥ उपत्वायानि ॥ प्रत्वापद्ये ॥ सोमंवैराजानंकामये ॥ श्रद्धामुसकामयतइति ॥ तस्याउहस्थागरमलंकारंकल्पयित्वा ॥ दशहोतारंपुरस्ताद्व्याख्याय ॥ चतुर्होतारंदक्षिणतः ॥ पंचहोतारंपश्चात् ॥ षड्होतारमुत्तरतः ॥ सप्तहोतारमुपरिष्टात् ॥ संभारैश्चपात्रिभिश्चमुखेलंकृत्य ॥ आस्यार्धंव्रज ॥ ताꣳहोदीक्ष्योवाच ॥ उपमावर्तस्वेति ॥ तꣳहोवाच ॥ भोगंतुमआचक्ष्व ॥ एतन्मआचक्ष्व ॥ यत्तेपाणाविति ॥ तस्याउहत्रीन्वेदान्प्रददौ ॥ तस्मादुहस्त्रियोभोगमेवहारयंते ॥ सयःकामयेतप्रियःस्यामिति ॥ यंवाकामयेतप्रियःस्यादिति ॥ तस्मैएतꣳस्थागरमलंकारंकल्पयित्वा ॥ दशहोतारंपुरस्ताद्व्याख्याय ॥ चतुर्होतारंदक्षिणतः ॥ पंचहोतारंपश्चात् ॥ षड्होतारमुत्तरतः ॥ सप्तहोतारमुपरिष्टात् ॥ संभारैश्चपात्रिभिश्चमुखेलंकृत्य ॥ आस्यार्धंव्रजेत् ॥ प्रियोहैवभवति ॥ नर्यंप्रजांमेगोपाय ॥ अमृतत्वायजीवसे ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १५७ ॥ कन्यादानम् ॥

श्रीः ॥ ततःकन्यादातावरदत्तवस्त्राभरणादिरहितांस्वदेयाभरणाद्यलंकृतामहतवस्त्रपरिधानांकन्यांवरायदद्यात् ॥ तत्रायंक्रमः ॥ दातावधूवरदक्षिणतउदङ्मुखउपविश्यस्वदक्षिणतःपत्नीमुपवेश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममसमस्तपितॄणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्याप्रतिपादनकल्पोक्तफलावाप्तयेअनेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसंतत्याद्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमात्मनश्चलक्ष्मीनारायणप्रीतयेब्राह्मविवाहविधिनाकन्याप्रतिपादनमहंकरिष्येइतिसंक

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ल्प्य ॥ सपत्नीकउत्थायोदङ्मुखएवप्रत्यङ्मुखींकन्यांसंप्रगृह्य ॥ कन्यांकनकसंपन्नांकनकाभरणैर्युतां ॥ दास्यामिविष्णवेतुभ्यं ब्रह्मलोकजिगीषया ॥ विश्वंभरःसर्वभूताःसाक्षिण्यःसर्वदेवताः ॥ इमांकन्यांप्रदास्यामिपितॄणांतारणायच ॥ इतिमंत्रौपठित्वा ॥ कांस्यपात्रेकन्यांजल्युपरिस्थवरांजलिदक्षिणहस्तेस्वदक्षिणेनहस्तेनभार्यादत्तसंततजलधारोदकंक्षिपन्वदेत् ॥ कन्यातारयतु ॥ पुण्यंवर्धतां ॥ शिवाआपःसंतु ॥ सौमनस्यमस्तु ॥ अक्षतंचारिष्टंचास्तु ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ यच्छ्रेयस्तदस्तु ॥ यत्पापंतत्प्रतिहतमस्तु ॥ पुण्याहंभवंतोब्रुवंतु ॥ स्वस्तिभवंतोब्रुवंतु ॥ ऋद्धिंभवंतोब्रुवंतु ॥ श्रीरस्त्विति भवंतोब्रुवंतु ॥ ॐ पुण्याहमित्यादिवरोवदेत् ॥ दाताअग्निःप्रीयतामित्युक्त्वा ॥ अमुकप्रवरान्वितामुगोत्रोमुकशर्माहं ममसमस्तेत्यादिप्रीतयेइत्यंतमुक्त्वा ॥ अमुकप्रवरोपेतायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकशर्मणेकन्यार्थिनेश्रीधररूपिणेवराय ॥ कमुकप्रवरोपेतामुकगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नींकन्यांवरार्थिनींश्रीरूपिणींप्रजापतिदैवत्यांप्रजासहत्वकर्मभ्यस्तुभ्यमहंप्रतिपादयेइत्युक्त्वादद्यात् ॥ ततोवरः ॥ ॐतथेतिप्रतिगृह्णाति ॥ एवंकन्यातारयत्वित्यादिॐतथेत्यंतंवारत्रयमुक्त्वाकन्याप्रतिपादनंकार्यं ॥ अत्रधर्मार्थकामरूपफलत्रयोद्देशेनैवकन्याप्रतिपादनस्यधर्मसूत्रेउक्तत्वात्सप्रतिबंधदानत्वेनदातुर्नममेतित्यागःप्रतिग्रहीतुःप्रतिग्रहणमंत्रश्चनभवति ॥ ततोदाता ॥ गौरींकन्यामिमांविप्रयथाशक्तिविभूषितां ॥ गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय ॥ कन्येममाग्रतोभूयाःकन्येमेदेविपार्श्वयोः ॥ कन्येमेपृष्ठतोभूयास्त्वदानान्मोक्षमाप्नुयां ॥ ममवंशकुलेजातापालितावत्सराष्टकं ॥ तुभ्यंविप्रमयादत्तापुत्रपौत्रप्रवर्धिनी ॥ धर्मेचार्थेचकामेचनातिचरि

१ अत्रकेचिद्वासिष्ठगोत्रायविष्णुशर्मणेइत्यादितत्तद्गोत्रनाम्नोरूहंकुर्वंतितन्निर्मूलं ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तव्यात्वयेयं ॥ नातिचरामीतिवरः ॥ ततोदातादेशकालौसंकीर्त्यकृतस्यकन्याप्रतिपादनस्यसांगतासिद्ध्यर्थंयथाशक्तिदक्षिणां संप्रददइत्युक्त्वावरहस्तेदत्वानममेतिवदेत् ॥ ततोवरः ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि राजात्वावरुणोनयतुदेविदक्षिणेग्नयेहिरण्यंतेनामृतत्वममंश्यांवयोदात्रेमयोमह्यमस्तुप्रतिग्रहीत्रेकइदंकस्माअदात्कामःकामायकामोदाताकामःप्रतिग्रहीताकामंऽसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामेतत्तएषातेकामदक्षिणोत्तानस्त्वांगीरसःप्रतिगृह्णात्विति पठित्वा ॥ ॐस्वस्तीतिवरः ॥ ततोदाताजलपात्रभोजनपात्रगोमहिष्यश्वगजदासदासीभूवाहनालंकारादियथाविभवंसंकल्पपूर्वकंवरायदद्यात् ॥ तत्रमंत्राः ॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ गोः ॥ १ ॥ सर्वसस्याश्रयाभूमिर्वराहेणसमुद्धृता ॥ अनंतसस्यफलदाममशांतिंप्रयच्छतु ॥ भूमेः ॥ २ ॥ इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता ॥ सर्वकर्मकरीह्यायथेष्टंभद्रमस्तुते ॥ दास्याः ॥ ३ ॥ अशून्यंशयनंनित्यमनूनांश्रियमुन्नतिं ॥ सौभाग्यंदेहिमेनित्यंशय्यादानेनकेशव ॥ शय्यायाः ॥ ४ ॥ हिरण्यगर्भसंभूतंसौवर्णंचांगुलीयकं ॥ सर्वप्रदंप्रयच्छामिप्रीणातुकमलापतिः ॥ अंगुलीयकस्य ॥ ५ ॥ क्षीरोदमथनेपूर्वमुद्धृतंकुंडलद्वयं ॥ श्रियासहसमुद्भूतंददेश्रीःप्रीयतामिति ॥ कुंडलयोः ॥ ६ ॥ इदंगृहंगृहाणत्वंसर्वोपस्करसंयुतं ॥ तवविप्रप्रसादेनममास्त्वभिमतंफलं ॥ गृहस्य ॥ ७ ॥ इंद्रादिलोकपालानांयाराजमहिषीप्रिया ॥ महिषासुरस्यजननीसास्तुमेसर्वकामदा ॥ महिष्याः ॥ ८ ॥ परापवादपैशून्यादभक्ष्यस्यचभक्षणात् ॥ उत्पन्नपापंदानेनताम्रपात्रस्यनश्यतु ॥ ताम्रपात्रस्य ॥ ९ ॥ यानिपापान्यनेकानिकामोत्थानिकृतानिच ॥ कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा ॥ कांस्यपात्रस्य ॥ १० ॥ ततःकुशदूर्वापल्लवैरभिषिंचेत्पुरोधाः ॥ आनःप्रजांजनयतुप्रजापतिराजरसायुसमनक्त्वर्यमा ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अदुर्मंगलीःपतिलोकमाविंशशंनोभवद्विपदेशंचतुष्पदे ॥ अघोरचक्षुरपतिघ्येधिशिवापशुभ्यःसुमनाःसुवर्चाः ॥ वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदे ॥ इमांत्वमिंद्रमीढःसुपुत्रांसुभगांकृणु ॥ दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि ॥ सम्राज्ञी श्वशुरेभवसम्राज्ञीश्वश्वांभव ॥ ननांदरिसम्राज्ञीभवसम्राज्ञीअधिदेवृषु ॥ समंजंतुविश्वेदेवाःसमापोहृदयानिनौ ॥ संमातरिश्वासंधातासमुदेष्ट्रीदधातुनौ ॥ समुद्रज्येष्ठाइतिचतसृभिः ॥ आपोहिष्ठेतितिसृभिः ॥ ततोदुग्धाक्तेनद्विगुणसूत्रेणदंपतीकंठदेशेकटिदेशेचैशानीमारभ्यपंचवारंचतुर्वारंवाप्रदक्षिणंवेष्टयेत्पुरोधाएभिर्मंत्रैः ॥ परित्वागिर्वणोगिरइमाभवंतुविश्वतः ॥ वृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयः ॥ तान्वोमहोमरुतएवयाम्नोविष्णोरेषस्यप्रभृथेहवामहे ॥ हिरण्यवर्णान्ककुहान्यतःस्रुचोब्रह्मण्यंतःशंस्यंराधईमहे ॥ दशावनिभ्योदशकक्ष्येभ्योदशयोक्रेभ्योदशयोजनेभ्यः ॥ दशाभीशुभ्योअर्चताजरेभ्योदशधुरोदशयुक्तावहद्भ्यः ॥ तेअद्रयोदशयंत्रासआशवस्तेषामाधानंपर्येतिहर्यतं ॥ तऊसुतस्यसोम्यस्यांधसोंशोःपीयूषंप्रथमस्यभेजिरे ॥ तेसोमादोहरीइंद्रस्यनिंसतेशुंदुहंतोअध्यासतेगवि ॥ तेभिर्दुग्धंपपिवान्त्सोम्यंमध्विंद्रोवर्धतेप्रथतेवृषायते ॥ वृषावोअंशुर्नकिलारिषाथनेळावंतःसदमित्स्थनाशिताः ॥ रैवत्येवमहसाचारवस्थनयस्यग्रावाणोअजुषध्वमध्वरं ॥ ततःकंठदेशस्थंसूत्रमधोनिष्काश्यकुंकुमाक्तमूर्णास्तुकायुतंचकृत्वा तेनहरिद्राखंडंबध्वातद्वधूवामहस्तप्रकोष्ठेवरोबध्नीयात् ॥ विश्वेत्तातेसवनेषुप्रवाच्यायाचकर्थमघवन्निंद्रसुन्वते ॥ पारावतंयत्पुरुसंभृतंवस्वपावृणोःशरभायऋषिबंधवे ॥ ततःकटिदेशस्थंसूत्रमुपरिनिष्काश्योर्णास्तुकांहरिद्राखंडंचबध्वावरदक्षिणहस्तप्रकोष्ठेवधूर्बध्नीयात् ॥ नीललोहितंभवतिकृत्यासक्तिर्व्यज्यते ॥ एधंतेअस्याज्ञातयःपतिर्बंधेषुबध्यतेइति ॥ ततोवधूवरौपरस्परमायुर्वर्धनकामावक्षतारोपणंकुर्यातां ॥ तैजसपात्रस्थगव्यक्षीरेघृतमासिच्यपात्रांतरेणार्द्राक्षतशु

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कुशालितंडुलानादाय ॥ वरःक्षालितपाणिःप्रक्षालितवध्वंजलौक्षीरघृतेनस्वहस्तद्वयांगुलिभिर्द्विरुपस्तीर्यद्विवारंतथैवतंदुलानो
प्यतेनतथैवद्विरभिघारयेत् ॥ ततोवरांजलावप्येवमेवदात्राअन्येनवापूरितेदातातदंजल्योःसुवर्णंनिधायवरांजलिंकन्यांजल्यु
परिनिधाय ॥ कन्यातारयतु ॥ दक्षिणाःपांतु ॥ बहुदेयंचास्तु ॥ पुण्यंवर्धतां ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु ॥ तिथिकरणमुहूर्त
नक्षत्रसपंदस्तु ॥ इत्युच्चार्यकन्यामुद्धृत्यतयांजलिस्थानक्षतान्वरमूर्धन्यारोपयेत् ॥ भगोमेकामःसमृद्ध्यतां ॥ ततोवरःस्वांज
लिस्थतंडुलान् ॥ यज्ञोमेकामःसमृद्ध्यतां ॥ कन्यामूर्धनि ॥ वधूः श्रियोमेकामःसमृद्ध्यतां ॥ वरः धर्मोमेकामःसमृद्ध्यतां ॥
वधूः प्रजामेकामःसमृद्ध्यतां ॥ वरः यशोमेकामःसमृद्ध्यतां ॥ ततःकन्यावरांजलिंद्विरुपस्तीर्यद्विस्तंडुलैरापूर्यद्विरभिधारयेत् ॥
दात्रान्येनवापूर्ववत्कन्यांजलौसंपूरितेदातापूर्ववद्धिरण्यंनिधायकन्यांजलिंवरांजलौनिधायपूर्ववत्कन्यातारयत्वित्यादिवाक्य
षट्कंवदेत् ॥ ततोवरः ॥ यज्ञोमेकामःसमृद्ध्यतां ॥ कन्या भगोमेकामःसमृद्ध्यतां ॥ वरः धर्मोमेकामःसमृद्ध्यतां ॥
वधूः श्रियोमेकामःसमृद्ध्यतां ॥ वरः यशोमेकामःसमृद्ध्यतां ॥ वधूः प्रजामेकामःसमृद्ध्यतां ॥ सप्तमंवधूपूर्वकंकार्यं
तूष्णीं ॥ ततोवरः स्वशिरःपुष्पमादायक्षीरघृतेनाप्लाव्यकन्यालललाटेतिलकंकरोति ॥ एवंकन्यापिवरललाटेकरोति ॥ ततःपुष्प
मालांवरकंठेनिदधाति ॥ वरोपिवधूकंठे ॥ ततोवरपक्षसुवासिन्योवधूवरौप्राङ्मुखावुपवेश्याचारप्राप्ताष्टपुत्रीसंज्ञकंवस्त्रद्वयंस
कंचुकंकृष्णमणियुतंदोरकंचवध्वैसमर्प्यतांसकंचुकमेकंपरिधाप्यान्यतरमुत्तरीयंकुर्वंति ॥ ततोवरस्तत्सूत्रंइष्टदेवतास्मरणपूर्वकं
वधूकंठेबध्नाति ॥ मांगल्यतंतुनानेनभर्तृजीवनहेतुना ॥ कंठेबध्नामिसुभगेसाजीवशरदांशतमिति ॥ ततोलंकारादिभिर्वधूंभूष
यतिआयुष्यंवर्चस्यमितिपंचभिर्मंत्रैः ॥ ततोहरिद्राखंडपूगफललड्डुकान्पात्रेनिधाय ॥ दंपतीदेशकालौसंकीर्त्यविवाहव्रतरक्ष

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णार्थंगणपतिपूजनंकरिष्यावहे इतिसंकल्प्यवधूवराभ्यांआवाहनादिदक्षिणांतोपचारैःपूजाकार्या ॥ ततःपुरोधाः विवाहव्रतसा
क्षिणंगणपतिमनुस्मृत्यसपूगहरिद्राखंडलड्डुकौतयोर्वस्त्रप्रांतेपृथक्पृथक्गणानांत्वाआतूनइंद्रेतिबध्नीयात् ॥ वधूवरौविवाहस
मास्यंतंग्रंथिद्वयंनविसृजेयातां ॥ ततःपुरोधाः ॥ नीललोहितमितिमंत्रेणतयोरुत्तरीयांतौमिथोबध्नीयात् ॥ ततःसभार्योदाता
वृद्धाःस्त्रियोज्ञातिबांधवाश्चक्रमादार्द्राक्षतारोपणंकुर्युः॥ ततोदंपतीदेशकालौसंकीर्त्यसौभाग्यादिप्राप्त्यर्थमहालक्ष्मीपार्वतीशची
पूजनंकरिष्यावहेइतिसंकल्प्यपात्रस्थसिततंडुलपुंजत्रयेउदक्संस्थानामावाहनादिदक्षिणांतोपचारैःपूजाकार्या ॥ ततोदंपतीदेश
कालौसंकीर्त्यचतुर्थदिनपर्यंतंअक्षारादिकंविवाहव्रतंकरिष्यावहेइतिसंकल्प्येक्षुविकारादिसामुद्रादिलवणवर्जमशनंकुर्वाणौवस्त्रा
भरणादिनाअलंकुर्वाणौमैथुनवर्जंसहवसतः॥ ततोवधूर्देशकालौसंकीर्त्यसौभाग्यादिप्राप्तिपूर्वकंलक्ष्मीपार्वतीशचीप्रीत्यर्थहरिद्रा
जीरकादिमांगल्यद्रव्यपरिपूरितवंशपात्रवायनदानंकरिष्यइतिसंकल्प्यसुवासिनीभ्योदद्यात् ॥ ततोद्विजैराशिषोदेयाः ॥ तत्र
मंत्राः ॥ भद्रंकर्णेभिःशृणुयामदेवाः ॥ भद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिः ॥ व्यशेमदेवहितंयदायुः ॥
॥ १ ॥ नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रे ॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः ॥ २ ॥ यथाह
तद्वसवोगौर्यंचित्पदिषिताममुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यꣳहःप्रातार्यग्नेप्रतरान्नआयुः ॥ ३ ॥ मानोअरातिरघशꣳ
सागन् ॥ क्षत्रस्यराजावरुणोधिराजः ॥ नक्षत्राणामशतभिषग्वसिष्ठः ॥ तौदेवेभ्यःकृणुतोदीर्घमायुः ॥ ४ ॥ इत्यायुःपदांताः ॥
ततोवरोमंडपांतस्थांवेदिमागत्यप्राङ्मुखउपविशति ॥ इतिकन्यादानम् ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १५८ ॥ विवाहहोमः ॥

श्रीः ॥ प्राङ्मुखोवरआचम्यप्राणानायम्यदेशकालौसंकीर्त्यपरिगृहीतायांवध्वांभार्यात्वसिद्धिद्वाराग्नावौपासनत्वसिद्धिद्वाराच श्रीपरमेश्वरप्रीत्यर्थंविवाहहोमंकरिष्ये ॥ तदंगमुद्धननादिकरिष्येइतिसंकल्प्य ॥ उद्धननादिनाभूसंस्कारंविधायतत्रयोजकना मानंलौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसंमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा विवाहहोमकर्मणियायक्ष्यमाणादेवता स्ताःसर्वाःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमुक्त्वाप्रधानहोमे॥ अग्नीवरुणावाज्येन ॥ अग्निंगार्हपत्यमाज्येन ॥ अग्निमाज्येन ॥ दिवं वायुमश्विनौसवितारंबृहस्पतिंविश्वान्देवानाज्येन ॥ अग्निंद्विराज्येन॥ अंगहोमे ॥ वरुणंद्विः॥ अग्नीवरुणौद्विः ॥ अयासमग्निं प्रजापतिंचाज्येन ॥ लाजहोमे अग्निंत्रिर्लाजैः ॥ स्विष्टकृद्धोमे अग्निꣳस्विष्टकृतमाज्येन ॥ जयाभ्यातानराष्ट्रभृत्देवताःसामा न्यप्रायश्चित्तदेवताश्चाज्येन ॥ वसून्रुद्रानादित्यान्तसꣳस्रावाज्येन एतादेवताःसद्योयक्ष्यइत्युक्त्वासमिधोन्नावाधायपात्रासाद नेप्राकृतानिदर्व्यादीन्यासाद्य ॥ अश्मानंलाजान्व्रीह्यादिबीजान्यभिषेकार्थंकलशंचासाद्यपरिधिपरिधानांतंकृत्वा ॥ ततोवधू मीशानदेशतोबांधवैःसमानीयमानांवरःसमीक्षते ॥ सुमंगलीरियंवधूरिमाꣳसमेतपश्यत ॥ सौभाग्यमस्यैदत्वायाथास्तंविपरे तनेति ॥ ततोवधूरुत्तरेणपात्राणिअग्निस्वामिनोरंतरागत्वादक्षिणतःपतिमुपविश्याचम्यान्वारभते ॥ ततोवरःपरिषेकादिसामा न्यप्रधानांतंहुत्वाप्रधानहोमंकरोति ॥ अग्निरैतुप्रथमोदेवतानाꣳसोस्यैप्रजांमुंचतुमृत्युपाशात् ॥ तदयꣳराजावरुणोनुमन्यतांय थेयꣳस्त्रीपौत्रमघंनरोदात्स्वाहा ॥ अग्नीवरुणाभ्यामिदं० ॥ १ ॥ इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः ॥ अशू न्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिप्रबुध्यतामियꣳस्वाहा ॥ अग्नयेगार्हपत्यायेदं० ॥ २ ॥ मातेगृहेनिशिघोषउत्थादन्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्रत्वद्रुदत्यःसंविशंतु ॥ मात्वंबिकेश्युरआवधिष्टाजीवपत्नीपतिलोकेविराजप्रजांपश्यंतीसुमनस्यमानाऽस्वाहा ॥ अन्नयइदं० ॥ १ ॥ द्यौस्तेपृष्ठऽरक्षतुवायुरूरूअश्विनौचस्तनंधयतस्तेपुत्रान्त्सविताभिरक्षतु ॥ आवाससःपरिधानाद्बृहस्पतिर्विश्वेदेवाअभिरक्षंतुपश्चात्स्वाहा ॥ दिवेवायवेअश्विभ्यांसवित्रेबृहस्पतयेविश्वेभ्योदेवेभ्यइदं० ॥ ४ ॥ अप्रजस्तांपौत्रमृत्युंपाप्मानमुतवाघं ॥ शीर्ष्णःस्रजमिवोन्मुच्यद्विषद्भ्यःप्रतिमुंचामिपापऽस्वाहा ॥ अन्नयइदं० ॥ ५ ॥ देवकृतंब्राह्मणंकल्पमानंतेनहन्मियोनिषदः पिशाचान् ॥ क्रव्यादोमृत्यूनधरान्पादयामिदीर्घमायुस्तवजीवंतुपुत्राःस्वाहा ॥ अन्नयइदं०॥ ६ ॥ ततःइमंमेवरुण० ॥ तत्त्वा यामि० ॥ त्वंनोअग्ने० ॥ सत्वंनोअग्ने० ॥ त्वमग्नेअयासि० ॥ प्रजापते० ॥ इतिषडाहुतीर्हुत्वा ॥ उत्तरपरिधिसंधिमश्मानं निधायतत्रदक्षिणपादोपक्रमेणपद्भ्यांवधूंप्राङ्मुखीमवस्थापयति ॥ आतिष्ठेममश्मानमश्मेवत्वंस्थिराभव ॥ प्रमृणीहिदुरस्यून्त्सहस्वपृतनायतइति ॥ ॥ इतिविवाहहोमः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ १५९ ॥ पाणिग्रहणम् ॥

श्रीः ॥ अपरेणाग्निंद्वयान्दर्भान्पूर्वापरानुदगग्रान्निधाय ॥ तत्रपूर्वदर्भेषुस्वयंप्रत्यङ्मुखस्तिष्ठन् अपरदर्भेषुतिष्ठंत्याःप्राङ्मुख्यास्तस्याःसांगुष्ठंसलोममुत्तानंहस्तंगृह्णीयात् ॥ सरस्वतिप्रेदमिवसुभगेवाजिनीवति ॥ तांत्वाविश्वस्यभूतस्यप्रजायामस्यग्रतः ॥ गृह्णामितेसुप्रजास्त्वायहस्तंमयापत्याजरदष्टिर्यथासत् ॥ भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाइति ॥ ततस्तामग्रेणदक्षिणमंसंप्रदक्षिणमावृत्यस्वदक्षिणतःप्रत्यङ्मुखींकृत्वाभिमंत्रयतेषड्भिः ॥ अघोरचक्षुरपतिघ्नियेधिशिवापशुभ्यःसुमनाःसुवर्चाः ॥ जीवसूर्वीरसूःस्योनाशंनएधिद्विपदेशंचतुष्पदे ॥ तान्नःपूषंच्छिवतमामेरयस्वयस्यांबीजंमनुष्यावपंति ॥ यानऊरूउश

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तीविस्रयातेयस्यामुशंतःप्रहरेमशेपं ॥ सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः ॥ तृतीयोअग्निष्टेपतिस्तुरीयोहंमनुष्यजाः ॥ सोमो ददद्गंधर्वायगंधर्वोग्नयेददात् ॥ पशूꣳश्चमह्यंपुत्राꣳश्चाग्निर्ददात्यथोत्वां ॥ अमुहमस्मिसात्वंद्यौरहंपृथिवीत्वꣳसामाहमृक्त्वंतावेहि संभवावसहरेतोदधावहैपुꣳसेपुत्रायवेत्तवैरायस्पोषायसुप्रजास्त्वायसुवीर्याय ॥ इमांत्वमिंद्रमीढ्वःसुपुत्राꣳसुभगांकुरु ॥ दशास्यां पुत्रानाधेहिपतिमेकादशंकुरुइति ॥ ततस्तांयथायतनंदक्षिणतउपवेश्यस्वयंचोपविश्यतदंजलावाज्येनतूष्णीमुपस्तीर्य ॥ तत्रमंत्रावृत्त्याअस्याभ्रात्रादिर्वरोवायथाचारंलाजान्द्विरावपति ॥ त्रिःपंचावत्तिनः ॥ इमाँल्लाजानावपामिसमृद्धिकरणान्मम ॥ तुभ्यंच संवननंतदग्निरनुमन्यतामयं ॥ तूष्णीमभिघार्य ॥ दर्वीस्थानीयंतदंजलिमादायवरोजुहोति ॥ इयंनार्युपब्रूतेग्नौलाजानावपंती दीर्घायुरस्तुमेपतिरेधंतांज्ञातयोममस्वाहा ॥ अग्नयइदं० ॥ ततोवधूमुत्थापयति ॥ उदार्युषास्वायुषोदोषधीनाꣳरसेनोत्पर्जन्यस्यशुष्मेणोदस्थाममृताꣳअनुइति ॥ ततस्तयासहप्रदक्षिणमग्निमनुपरिक्रामति ॥ विश्वाउतत्वयावयंधाराउदन्याइव ॥ अतिगाहेमहिद्विषइति ॥ पुनस्तथैवतामुपवेश्यतदंजलावुपस्तीर्यद्विर्लाजानोप्याभिघार्यतथैवहुत्वोत्थाप्यप्रदक्षिणमग्निंपरिक्रम्यतथैवलाजानांतृतीयाहुतिंहुत्वातृतीयंपरिक्रम्यआज्येनैवसौविष्टकृतंहुत्वापश्चाज्जयादिहोमःकार्यः ॥ अत्रयथापुरस्तादितिसूत्रेणसिद्धस्यस्विष्टकृतःपुनरत्रविधानंकालपरं ॥ तेनतृतीयपरिक्रमणानंतरंस्विष्टकृत् ॥ पश्चाज्जयादिहोमः ॥ यत्तुसामान्यतोदृष्टत्वेनकारिकाकृतोक्तं जयादिस्विष्टकृत्ततइतितत्सूत्रवृत्तिविरुद्धत्वादशुद्धमित्युपेक्षणीयं ॥ अन्यथातृतीयंपरिक्रम्यसौविष्टकृतंजुहोतीतिसूत्रमनर्थकंस्यात् ॥ सिद्धत्वात्स्विष्टकृतस्तृतीयपरिक्रमणस्यदृष्टधर्मवत्तालाभाच्च ॥ ततइध्मसन्नहनप्रहरणादिसंस्थाजपांतंकर्मसमापयेत् ॥ नात्रत्रिवृदन्नहोमः ॥ ततःअपरेणाग्निंसप्ताक्षतपुंजान्प्राक्संस्थानुदक्संस्थान्वाकृत्वा ॥ दक्षिणेनपादेन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रक्रम्यसव्येनानुप्रक्राममासव्येनदक्षिणमतिक्रामीरितिभार्यांसंशास्यतस्याअर्थावबोधंकृत्वादक्षिणपादंप्रगृह्याप्रगृह्यवासप्ताक्षत पुंजेषुवक्ष्यमाणमंत्रैःप्रतिमंत्रंसप्तविष्णुक्रमान्क्रामयति ॥ एकमिषेविष्णुस्त्वान्वेतु ॥ द्वेऊर्जेविष्णुस्त्वान्वेतु ॥ त्रीणिव्रतायविष्णुस्त्वान्वेतु ॥ चत्वारिमायोभवायविष्णुस्त्वान्वेतु ॥ पंचपशुभ्योविष्णुस्त्वान्वेतु ॥ षडृायस्पोषायविष्णुस्त्वान्वेतु ॥ सप्तसप्तभ्योहोत्राभ्योविष्णुस्त्वान्वेतु ॥ सप्तमेधान्यराशौस्थितवधूपादेवरोजपति ॥ सखायौसप्तपदावभूवसख्यंतेगमेयंसख्यात्तेमायोषंसख्यान्मेमायोष्ठाइति ॥ ततोस्यादक्षिणंपादंस्वदक्षिणेनपादेनाक्रम्यदक्षिणेनहस्तेनास्यादक्षिणमंसमुपर्युपर्यन्ववमृश्य हृदयदेशमभिमृशति ॥ ममहृदयेहृदयंतेअस्तुममचित्तंचित्तेनान्वेहीत्युपनयनपाठपठितेनमंत्रेण ॥ ततोनाभिदेशंस्पृशति ॥ प्राणानांग्रंथिरसिसमाविस्रसइति ॥ ततस्तामपरेणाग्निंप्राङ्मुखीमुपवेश्यतस्याःपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेनचकलशस्थाद्भिःकुशैस्तांमार्जयति ॥ ततोवृद्धाब्राह्मणाज्ञातिबांधवाःसुवासिन्यश्चाशीःपूर्वकंवधूमस्तकेव्रीह्यादिबीजानियथाचारमारोपयंति ॥ याजाताओषधयइत्यादिमंत्रैः ॥ अन्यदपियथाचारप्राप्तंविवाहेतत्सर्वंकर्तव्यं ॥ ततःकृतस्यविवाहहोमस्यसांगतासिद्ध्येआचार्यादीन्गंधतांबूलादिनासंपूज्य ॥ अस्मेदेवासोवपुषेचिकित्सतेत्यादिनातेभ्यश्चाशिषःसंप्राप्यप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ॥ इतिविवाहहोमः ॥

॥ १६० ॥ गृहप्रवेशः ॥

श्रीः ॥ विवाहहोमानंतरमेववधूबांधवाःपितृगृहात्तांभार्यांरथादियानेनभर्तृगृहंप्रापयंति ॥ विवाहाग्निंसर्वमेकस्मिन्पात्रेकृत्वाजायापत्योःपृष्ठतोनुहरंति ॥ वरःस्वगृहद्वारंप्राप्यभार्यांसंशास्ति ॥ दक्षिणंपादमग्रेतिहरदेहलिंमाधिष्ठाइति ॥ सायथाशासनंदक्षि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णंपादमग्रेकृत्वादेहलिंचानधिष्ठायगच्छति ॥ ततोगृहपूर्वार्धशालायांसभार्यःप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौसं
कीर्त्यममविवाहाग्नेर्गृह्यत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंविवाहांगभूतंगृहप्रवेशनीयाख्यंकर्मकरिष्येइतिसंकल्प्यगणेशपूजांकृ
त्वाउद्धननादिभूसंस्कारंविधायतत्रविवाहाग्निंप्रतिष्ठाप्यापरेणाग्निंलोहितमानडुहंचर्मप्राचीनग्रीवमुत्तरलोमास्तृणाति ॥ तदभा
वेकुशानास्तीर्यतेषुप्राङ्मुखउपविश्यस्वदक्षिणतोभार्यांचोपवेश्य ॥ उदङ्मुखौवोपविशतः ॥ तदापश्चाद्भार्योपविशति ॥ इहगावो
निषीदंत्विहाश्वाइहपूरुषाः ॥ इहोसहस्रदक्षिणोपिपूषानिषीदत्विति ॥ ततोनक्षत्रोदयपर्यंतंवाग्यतौभवतः ॥ नक्षत्रोदयेसति
प्राचीमुदीचींवादिशंगृहान्निष्क्रम्ययस्मिन्देशेध्रुवदर्शनंभवतितस्मिन्देशेप्राङ्मुखउदङ्मुखोवाभूत्वावध्वासहदिशमुपतिष्ठते ॥
देवीःषडुर्वीरुरुणःकृणोतविश्वेदेवासइहवीरयध्वमिति ॥ ततोनक्षत्राणि ॥ माहास्महिप्रजयामातनूभिरिति ॥ ततश्चंद्रमसं ॥
मारधामद्विषतेसोमराजन्निति ॥ ततःसप्तर्षीन् ॥ सप्तर्षयःप्रथमांकृत्तिकानामरुंधतीं ॥ येध्रुवताऽहनिन्युः ॥ षट्कृत्तिकामुख्य
योगंवहंतीयमस्माकंभ्राजत्वष्टमीति ॥ ततोध्रुवं ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसिध्रुवतस्थितं ॥ त्वंनक्षत्राणांमेथ्यसिसमापाहिपृत
न्यतः ॥ नमोब्रह्मणेध्रुवायाच्युतायास्तुनमोब्रह्मणःपुत्रायप्रजापतयेनमोब्रह्मणःपुत्रेभ्योदेवेभ्यस्त्रयस्त्रिंशेभ्योनमोब्रह्मणःपु
त्रपौत्रेभ्योंगिरोभ्योयस्त्वांध्रुवमच्युतंसपुत्रंसपौत्रंब्रह्मवेदध्रुवाअस्मिन्पुत्राःपौत्राभवंतिप्रेष्यांतेवासिनोवसनंकंबलानिकंसं
हिरण्यंस्त्रियोराजानोन्नमभयमायुःकीर्तिर्वर्चोयशोबलंब्रह्मवर्चसमन्नाद्यमित्येतानिमयिसर्वाणिध्रुवाण्यच्युतानिसंतु ॥ ध्रुवंत्वा
ब्रह्मवेदध्रुवोहमस्मिन्लोकेस्मिंश्चजनपदेभूयासमच्युतंत्वाब्रह्मवेदमाहमस्माल्लोकादस्माच्चजनपदाच्चोषिद्विषन्मेभ्रातृव्योस्माल्लो
कादस्माच्चजनपदात्च्यवतामचेष्टंत्वाब्रह्मवेदमाहमस्माल्लोकादस्माच्चजनपदाच्चेष्टिषिद्विषन्मेभ्रातृव्योस्माल्लोकादस्माच्चजनप

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दाच्चेष्टतामव्यथमानंत्वाब्रह्मवेदमाहमस्माल्लोकादस्माच्चजनपदाद्व्यथिषिद्विषन्मेभ्रातृव्योस्माल्लोकादस्माच्चजनपदाद्व्यथतां ॥ न भ्यंत्वासर्वस्यवेदनभ्यमहमस्यजनपदस्यभूयासंमध्यंत्वासर्वस्यवेदमध्यमहमस्यजनपदस्यभूयासंतंतिंत्वासर्वस्यवेदतंतिरहमस्यज नपदस्यभूयासंमेथींत्वासर्वस्यवेदमेथ्यमहमस्यजनपदस्यभूयासंनाभिंत्वासर्वस्यवेदनाभिरहमस्यजनपदस्यभूयासंयथानाभिःप्रा णानांविषूवानेवमहंविषूवानेकशतंतंपाप्मानमृच्छतुयोस्मान्द्वेष्टियंचवयंद्विष्मोभूयाꣳसिमामेकशतात्पुण्यान्यागच्छंतु ॥ इति मंत्रैर्ध्रुवमुपतिष्ठते ॥ नक्षत्राणामभ्रादिप्रतिबंधेनादर्शनेपितस्यांदिश्युपस्थानंकर्तव्यं ॥ ततउपस्थानदेशेमनसआह्लादकेनव चसाभार्यांसंभाष्य ॥ पुनःशालांप्रविशति ॥ ॥ इतिगृहप्रवेशः ॥ ॥ छ ॥ ॥ छ ॥

॥ १६१ ॥ गृहप्रवेशस्थालीपाकप्रयोगः ॥

श्रीः ॥ द्विविधःस्थालीपाकः आधारवान्आपूर्विकश्च ॥ सर्वस्थालीपाकप्रकृतिभूतआद्योयंस्थालीपाकः ॥ अत्रपक्षद्वयेपिपरि गृहीतपक्षःस्यात्तत्रापूर्विकपक्षेणप्रयोगः ॥ अयंचनक्षत्रोपस्थानानंतरंरात्रावेवकार्यः ॥ अग्नेःपश्चात्वध्वासहप्राङ्मुखउपवि श्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यगृहप्रवेशांगभूताग्नेयस्थालीपाकेनयक्ष्येइतिसंकल्प्यसमिद्द्वयमादायगृहप्रवेशस्थाली पाकहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ अग्निंसमिद्ध्यांतूष्णीं ॥ अग्निंचरुणा ॥ अग्निꣳस्विकृष्टतंचरुणा ॥ प्रा यश्चित्तहोमेअग्निंवायुंसूर्यंप्रजापतिंचाज्येनएतादेवताःसद्योयक्ष्यइत्युक्त्वासमिधावघ्नावाधाय । यथाहतद्धसवइत्यग्निंपरिसमु ह्यपरिस्तीर्योत्तरेणकुशानास्तीर्य यथोपयोगंपात्राणिसादयति दर्वीआज्यस्थालींचरुस्थालींप्रोक्षणीपात्रोलूखलमुसलत्रीह्याज्यसं मार्गदर्भोद्धरणपात्रमेक्षणपवित्राद्यासाद्यप्रोक्षणीःसꣳस्कृत्यासादितानिप्रोक्ष्यउलूखलेत्रीहीनोप्यपह्यावघात्यप्रक्षाल्योत्तरेणाग्नि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मासादितचरुस्थाल्यांतानोप्याग्नौश्रपयति ॥ ततोदर्वीनिष्टप्याज्यꣳसꣳस्कृत्यश्रृतंचरुमभिघार्योदगुद्वास्योद्धरणपात्रेमेक्षणे नोद्धृत्याग्नेःपश्चान्निधायपरिषिच्य समिद्द्वयात्मकमिध्ममंक्त्वा तूष्णीमग्नावाधाय चरुंदर्व्योपहत्यसकृदवदायजुहोति ॥ अग्नयेस्वाहा ॥ अग्नयइदंनमम ॥ पुनर्भूयाꣳसमुपहत्योत्तरार्धस्यपूर्वार्धंजुहोति ॥ अग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदंनमम ॥ कृतस्यकर्मणोन्यूनातिरिक्तदोषपरिहारार्थंप्रायश्चित्तहोमंकरिष्यइतिसंकल्प्यव्याहृतिचतुष्टयंहुत्वापरिषेकविसर्गंकृत्वास्थालीपाकशेषेणब्राह्मणंविद्यावंतंभोजयेत् ॥ ततःकृतस्यविवाहकर्मणःसांगतासिद्ध्यर्थमाचार्यायवृषभंतत्प्रतिनिधिभूतंहिरण्यंवादत्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ आपूर्विकहोमेष्वाहुतिपरिमाणकइध्मःकार्यः ॥ अत्रवृत्तिकृताआघारपक्षोप्युक्तोस्ति ॥ इत्यापूर्विकस्थालीपाकप्रयोगः ॥ एकग्रामेचेद्विवाहस्तदाऽगारंप्राप्यैवगृहप्रवेशनीयहोमः ॥ देशांतरेचेद्विवाहस्तदास्वगृहागमनकालेऽग्निरजस्रंप्रागुक्तरीत्यानेयः ॥ समारोपणंकृत्वावानेयः ॥ सर्वथानाशेसतिगृहमागत्य श्रोत्रियागारादाहृतमग्निंउक्तदेशउक्तरीत्याप्रतिष्ठाप्याग्निनाशप्रायश्चित्तंकृत्वापूर्वोक्तप्रकारेणगृहप्रवेशनीयंकर्मसमाचरेत् ॥ गृहप्रवेशस्थालीपाकानंतरमेवदर्शपूर्णमासस्थालीपाकारंभःकार्यः ॥ समाप्तंगृहप्रवेशकर्म ॥ ॥ ॥

॥ १६२ ॥ औपासनहोमः ॥

श्रीः ॥ सचपाणिग्रहणोत्तरंयावज्जीवंनक्षत्रंदृष्ट्वाप्रदोषेवानवघटिकात्मकेगौणेपिवाकालेसायंहोमः ॥ उषसिपुरोदयंयर्हिवाक् प्रवदेत् ॥ उदितेवासूर्येप्रातर्होमः ॥ सायमेवोपक्रम्यसायंप्रातश्चविवाहाग्नौगौणेपिहोमकालेहोमःकार्यः ॥ गृहप्रवेशांतविवाहपक्षेगृहप्रवेशस्थालीपाकादूर्ध्वमेवस्वकालेहोमोपक्रमःकार्यः ॥ होमद्रव्यंतुमाषवर्जंकामंत्रीहियवतिलादिकमग्निहोत्रद्रव्यंग्राह्यं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अग्निहोत्रभक्तित्वात् ॥ असमाप्तेश्रौतेमध्येस्मार्ताग्नानंकुर्वतःसूत्रकारस्यायमर्थोभिप्रेतःक्वचित्स्मार्तेपिश्रौतधर्मप्राप्तिरस्तीति ॥ तत्रातिप्रसंगेशिष्टाचारदर्शनान्निर्णयः ॥ अतएवान्वारंभणस्थालीपाकादीनामुपपत्तिः ॥ तत्रशिष्टपरंपरयानुष्ठानदर्शनात् ॥ एतच्चवृत्तिकृतोप्यभिप्रेतं ॥ उत्सर्गतःप्राप्तार्थस्याचारान्निर्णयइतित्रिवृदन्नहोमप्रसंगेदर्शितं ॥ यत्रहोमोब्राह्मणभोजनंचोक्तंतत्र त्रिवृदन्नहोमः ॥ गृह्यांतरोक्तहोमब्राह्मणभोजनवत्सुकर्णवेधतडागोत्सर्जनादिषुचातिप्रसंगःस्यात्तद्वारणायचोक्तंयत्राचारोप्य स्तितत्रैवत्रिवृदन्नहोमः ॥ आचाराभावादभावःस्यादिति ॥ अतएवोत्सर्जनेचैतत्रितयदर्शनात्त्रिवृदन्नहोमोनास्तीतिवदन् भ्रांतःपरास्तः ॥ ॥ अथप्रयोगः ॥ उपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंसायंप्रातरौपासनहोमौहोष्ये ॥ इदानीं सायमौपासनहोमंहोष्येइतिसंकल्प्य ॥ चत्वारिशृंगेतिध्यात्वापरिसमुह्यपरिस्तीर्यपरिषिच्य ॥ यस्त्वाहृदाकीरिणामन्यमानइ त्यभ्यर्च्यव्रीह्यादिद्रव्यंद्वादशपर्वपूरितमादायहस्तेनजुहोति ॥ ॐ अग्नयेस्वाहा ॥ अग्नयइदं० ॥ प्रजापतयेस्वाहा ॥ प्रजाप तयइदं० ॥ तथैवपरिसमुह्यपरिषेकविसर्गंकृत्वाअग्निमुपतिष्ठते ॥ ॐ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥ अपाꣳरेताꣳ सिजिन्वति ॥ त्वामग्नेपुष्करादध्यथर्वानिरमंथत ॥ मूर्ध्नोविश्वस्यवाघतः ॥ अयमग्निःसहस्रिणोवाजस्यशतिनस्पतिः ॥ मूर्धा कवीरयीणामितिउपस्थाय ॥ ततोविभूतिंधारयति ॥ त्र्यायुषंजमदग्नेरित्यादि ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रि यंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनेत्यग्निंप्रार्थ्य ॥ प्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ इतिसायं होमः ॥ प्रातर्होमेतुसूर्यायस्वाहा ॥ सूर्यायेदं० ॥ प्रजापतयेस्वाहा ॥ प्रजापतयइदं० ॥ उद्वयंतमसस्परिपश्यंतोज्योतिरु० ॥ उदुत्यंजा० ॥ चित्रंदे० ॥ तस्थुषश्चेत्युपस्थानमंत्रत्रयेणोपस्थानं ॥ अग्निहोत्रवत्त्यैतद्धोमकालेप्युदितानुदितव्यवस्थाग्राह्या ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इत्यौपासनहोमः ॥ ततःसायमौपासनहोमानंतरंवधूवरौप्राङ्मुखावुपविश्यदेशकालौसंकीर्त्यविवाहांगभूतंत्रिरात्रव्रतंचरिष्यावहेइतिसंकल्प्येक्षुविकारान्सामुद्रादिलवणमभुंजानौवस्त्राभरणादिनाचात्मानमलंकुर्वाणौमैथुनवर्जंचाधःशायिनौसहवसतइत्यादित्रतंपाणिग्रहणदिनमादायगृहप्रवेशादूर्ध्ववात्रिरात्रव्रतंवधूवराभ्यांकर्तव्यं ॥ अग्निनाशेप्रायश्चित्तंतुपुनराधानप्रयोगोक्तं ॥

॥ १६३ ॥ आशौचेहोमविधिः ॥

श्रीः ॥ जननशावाशौचयोर्ऋत्विगादिनासायंप्रातर्होमौकारयेत् ॥ स्वयंद्रव्यत्यागंकुर्यात् ॥ ऋत्विगाद्यभावेतुआशौचपातात्पूर्वंहोमांतेवक्ष्यमाणप्रकारेणाग्निसमारोपणंकृत्वासूतकनिवृत्तौउद्धननादिभूसंस्कारंविधायतत्रस्वयोनितउत्पन्नमग्निंप्रतिष्ठाप्यतत्रसमारूढमग्निंवक्ष्यमाणप्रकारेणावरोप्यप्राणानायम्यदेशकालौसंकीर्त्यममामुकनिमित्तेननित्यहोमातिक्रमजन्यदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रायश्चित्तपूर्वकमतिक्रांतहोमान्करिष्यइतिसंकल्प्याऽऽज्यꣳसꣳस्कृत्यदर्व्यामाज्यमादायजुहोति॥ मनो ज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञꣳसमिमंदधातु ॥ याइष्टाउषसोनिमुचꣳश्चताःसंदधामिहविषाघृतेनस्वाहा ॥ मनसेज्योतिष इदं० ॥ ततोहोमार्थंव्रीह्यादिद्रव्यमादायपरिसमूहनादिकृत्वाअतीतकालादारभ्यक्रमेणद्वेद्वेआहुतीहुत्वापश्चात्तत्कालहोमंचकृत्वापरिषेकविसर्गांतंकर्मशेषंसमापयेत् ॥ इत्याशौचहोमविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ १६४ ॥ चतुर्थदिनेऐरिणीपूजनम् ॥

श्रीः ॥ चतुर्थदिनेरात्रौतत्रभद्रादिसंभवेदिनएववाशिष्टाचारप्राप्तंवरमात्रेतत्समायैवाऐरिण्याख्यंक्षुद्रषोडशवंशशूर्पयुतंमहावं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शपात्रदानंकार्यकन्यादात्रा ॥ वस्त्रतांबूलसंयुक्तंदंपत्योर्वंशवर्धनं ॥ ऐरिण्याख्यंवंशपात्रंपक्वान्नैःपरिपूरितं ॥ १ ॥ करकैरु द्रसंख्याकैःसुवर्णपरिपूरितैः ॥ एतावदैरिणीरूपंकर्तव्यंकिलसूरिभिः ॥ २ ॥ एवंसंपाद्यकन्यादातासभार्योदेशकालौसंकीर्त्य विवाहसंपूर्णफलावाप्तयेवरस्यतत्पितृमात्रादीनांतत्पक्षीयाणांचयथाविभवंवस्त्रादिभिःपूजनमहंकरिष्येइतिसंकल्प्यवरादिभ्यः यथाविभवंवस्त्रादिकंदत्वापुनस्तिथ्यादिसंकीर्त्यममकन्यादानसंपूर्णफलावाप्तिद्वाराश्रीउमामहेश्वरप्रीत्यर्थंऐरिणीपूजनंवरमात्रे ऐरिणीदानंचकरिष्येइतिसंकल्प्य ॥ ऐरिणित्वमुमादेवीमहेशोगिरिजापतिः ॥ अतस्त्वांपूजयिष्यामिऐरिणींसर्वकामदां ॥ सव स्त्रांचसदीपांचशूर्पैःषोडशभिर्युतां ॥ वरमात्रेप्रदास्यामिकन्यादानस्यसिद्धये ॥ २ ॥ इतिसंकल्प्य ॥ महावंशपात्रेउमामहे श्वरौषोडशोपचारैःसंपूज्यवंशपात्रंवरमात्रेदत्वामंत्रान्पठेत् ॥ वंशोवंशकरःश्रेष्ठोवंशोवंशसमुद्भवः ॥ अनेनवंशदानेनतुष्टऋद्धिं करोतुमे ॥ १ ॥ वंशपात्रमिदंपुण्यंवंशजातसमुद्भवं ॥ वंशानामुत्तमंदानमतःशांतिंप्रयच्छमे ॥ २ ॥ वंशपात्राणिसर्वाणिमया संपादितानिवै ॥ उमाकांतायदत्तानिममगोत्राभिवृद्धये ॥ ३ ॥ वंशवृद्धिकरंदानंसौभाग्यादिसमन्वितं ॥ वस्त्रेणाच्छादितं पूगफलहेमसमन्वितं ॥ ४ ॥ सर्वपापक्षयकरंनानाद्रव्यैस्तुपूरितं ॥ दानानामुत्तमंदानमतःशांतिंप्रयच्छमे ॥ ५ ॥ इति ॥ ततस्तत्सदीपवंशपात्रंसकुटुंबस्ययजमानस्यशिरसिधारयंतिस्वस्तिनोमिमीतामित्यादिना स्वस्तिनोमीमितामश्विनाभगंःस्वस्ति देव्यदितिरनर्वणः ॥ स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ॥ ततःकन्यापित्रादिर्वरस्यमातृपित्रादीनामुत्संगेक न्यामुपवेश्यप्रार्थयेत् ॥ सप्तवर्षात्वियंकन्यापुत्रवत्पालितामया ॥ इदानींतवपुत्रायदत्तास्नेहेनपाल्यतामिति ॥ ततोवरमात्रा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वधूमातृतत्पक्षीयसुवासिनीभ्यःसकंचुकक्षुद्रवंशशूर्पवायनदानानिवध्वाकारणीयानीत्याद्याचारप्राप्तंयथाचारंज्ञेयं ॥ इदंऐरिणी पूजनादिवधूपितृभ्यामभुक्तवन्ध्यांकृत्वाभोजनंकार्यं ॥ इत्यैरिणीपूजनं ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १६५ ॥ चतुर्थीकर्म ॥

श्रीः ॥ तच्चतुर्थीकर्मातोविवाहइतिपक्षेविवाहदिनमादायचतुर्थस्याह्नस्त्रिभागशेषायांरात्रौचतुर्थीकर्मकार्यं ॥ गृहप्रवेशांतोविवाहइतिपक्षेतुगृहप्रवेशदिनमादायचतुर्थस्याह्नस्त्रिभागशेषायांरात्रौचतुर्थीकर्मसंगमार्थमेवनविवाहांगमितिपूर्वमुक्तमेव ॥ वरः वधूसहितःप्राङ्मुखउपविश्यआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्याःभार्यायाःसोमाद्युपभुक्तिदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंचतुर्थीकर्मतदंगंप्रायश्चित्तहोमंचकरिष्येतदंगंगणेशपूजनंकरिष्यइतिसंकल्प्यकृत्वाग्निंप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाप्रायश्चित्तहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ जातवेदसमग्निमिध्मेनेत्यादिसामान्यप्रधानांतमुक्त्वाप्रधानहोमे ॥ वरुणंद्विराज्येनअग्नीवरुणौद्विराज्येन ॥ अग्निंप्रायश्चित्तिं ॥ वायुंप्रायश्चित्तिं ॥ आदित्यंप्रायश्चित्तिं ॥ आदित्यंप्रायश्चित्तिं ॥ वायुंप्रायश्चित्तिं ॥ अग्निंप्रायश्चित्तिं ॥ अग्निंप्रायश्चित्तिं ॥ वायुंप्रायश्चित्तिं ॥ आदित्यंप्रायश्चित्तिं चाज्येन ॥ मूर्ध्निसꣳस्रावहोमेअग्निंवायुंसूर्यंप्रजापतिंसꣳस्रावाज्येनअयासमग्निंप्रजापतिंचाज्येनजयाभ्यातानराष्ट्रभृद्देवताश्चाज्येनसामान्यप्रायश्चित्तदेवताश्चाज्येनेत्यादिएतादेवतायक्ष्यइत्युक्त्वासमिधोऽग्नावाधायसामान्यप्रधानांतंहुत्वाप्रधानहोमः ॥ इमंमेवरुणतत्त्वायामित्वंनोअग्नेसत्वंनोअग्नइतिचतस्रआहुतीर्हुत्वा ॥ अग्नेप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैघोरातनूस्तामितोनाशयस्वाहा ॥ अग्नयेप्रायश्चित्तयइदं० ॥ वायोप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथका

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मउपधावामियास्यैनिंदितातनूस्तामितोनाशयस्वाहा ॥ वायवेप्रायश्चित्तयइदं० ॥ आदित्यप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मण
स्त्वानाथकामउपधावामियास्यैपतिघ्नीतनूस्तामितोनाशयस्वाहा ॥ आदित्यायप्रायश्चित्तयइदं० ॥ पुनर्व्युत्क्रमेण ॥ आदित्य
प्रायश्चित्ते० पतिघ्नी० आदित्यायप्रायश्चित्तयइदं० ॥ वायोप्रायश्चित्ते० निंदितात० वायवेप्रायश्चित्तयइदं० ॥ अग्नेप्रायश्चित्तेत्वं
प्रायश्चित्तिर० घोरातनूस्तामितो० अग्नयेप्रायश्चित्तयइदं० ॥ पुनरनुक्रमेण ॥ अग्नेप्रा० वायोप्रा० आदित्यप्रा० इतिनवाहुति
होमकालेसꣳस्रावाज्यंपात्रांतरेधृत्वातदेवसꣳस्रावाज्यंदर्व्यातस्यामूर्ध्निंजुहोतिभूर्भगंत्वयिजुहोमिस्वाहा ॥ अग्नयइदं० ॥ भूवो
यशस्त्वयिजुहोमिस्वाहा ॥ वायवइदं०॥ सुवःश्रियंत्वयिजुहोमिस्वाहा ॥ सूर्यायेदं० ॥ भूर्भुवःसुवस्त्विषिंत्वयिजुहोमिस्वाहा ॥
प्रजापतय० ॥ इत्याहुतिचतुष्टयंमूर्ध्निहुत्वाग्नौजुहोति ॥ त्वमग्नेअयासीत्यादिक्रमेणसंस्थाजपांतंसमाप्य ॥ नात्रत्रिवृदन्नहोमः ॥
ततःकर्मणःसांगतासिद्ध्येआचार्यायदक्षिणांदत्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ततःकुंभमुदकपूर्णमग्नि
समीपेनिधायअग्निंउदकुंभंचप्रदक्षिणीकृत्वापरेणाग्निंतांभार्यांसम्यगास्तृतेपर्यंकेप्राक्शिरसमुदक्शिरसंवाशाययित्वा तस्यायो
निंदक्षिणेनपाणिनाभिमृशति ॥ अभित्वापंचशाखेनशिवेनाभिद्विषावता ॥ सहस्त्रेणयशस्विनाहस्तेनाभिमृशामसिसुप्रजास्त्वा
येति ॥ ततस्तस्यायोनौस्वप्रजननंप्रवेशयति ॥ सन्नाह्नासꣳहृदयानिसन्नाभिःसंत्वचः ॥ संत्वाकामस्ययोक्रेणयुंजान्यविमोच
नायेति ॥ ततस्तांपर्यालिंगयति ॥ मामनुव्रताभूत्वासहचर्यामयाभव ॥ यातेपतिघ्नीतनूर्जारघ्नीत्वेतांकरोमिशिवात्वंमह्यमेधिक्षु
रपविर्जारेभ्यइति ॥ ततोस्यामुखंस्वमुखेनजुषति ॥ मधुहेमध्विदंमधुजिह्वामेमधुवादिनी ॥ मुखेमेसारघंमधुदत्सुसंवननंकृतं ॥ ॥२०१॥
चाक्रवाकꣳसंवननंयन्नदीभ्यउदाहृतं ॥ यद्युक्तोदेवगंधर्वस्तेनसंवनिनौस्वकइति ॥ इतिचतुर्थीकर्म ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १६६ ॥ देवकोत्थापनंमंडपोद्वासनंच ॥

श्रीः ॥ तंचअभुक्त्वाषष्ठातिरिक्तसमेदिवसेकुर्यात् ॥ विषमेतुसप्तमपंचमयोःकुर्यात् ॥ यजमानःसपत्नीकःप्राङ्मुखउपविश्यदे
शकालौसंकीर्त्यविवाहांगत्वेनस्थापितदेवतानामुद्वासनंमंडपोद्वासनंचकरिष्यइतिसंकल्प्यगंधाद्युपचारैर्देवताःसंपूज्यउत्तिष्ठब्र
ह्मणस्पतइत्युत्थाप्यानीयभगवत्यादीनांमंडपदेवतानांतैलोद्वर्तनोष्णोदकस्नानानिकारयित्वासंपूज्य यांतुदेवगणाइतिविसृज्य
वेष्टनसूत्रमुन्मुच्यपुण्याहवाचनंकुर्यात् ॥ ततोद्विजैरभिषेकःकार्यः ॥ अभिषेकांतेपुरोधास्तच्छाखादिकंवंशपात्रेनिधायतदुप
रिप्रक्षिप्ताभिषेकजलंसकुटुंबयजमानशिरसिकिंचित्किंचित्स्रावयन्पठति ॥ ॐ प्रेतिचेत्येतद्वैसर्वंस्वस्त्ययनंयत्प्रेतिचेतिचेतित
द्योस्यप्रियःस्यात्तमेतेनानुमंत्रयेतप्रेतिचेतिचेतिस्वस्त्येवगच्छतिस्वस्तिपुनरागच्छति ॥ ततःकर्ताशिरसिबद्धांजलिः ॥ अस्मत्
गोत्रेषट्सुषट्सुमासेषुशोभनानिभवंत्वित्युक्त्वा ॥ ब्राह्मणास्तथास्त्वितिब्रूयुरेवंत्रिःकार्य ॥ ततोद्विजांश्चंदनतांबूलादिनापूज
यित्वातदाशिषश्चगृह्णीयात् ॥ ततश्चान्यदपिस्वस्वकुलधर्मानुसारिसर्वंकुर्यात् ॥ इतिविवाहप्रयोगः ॥ ॥ ७ ॥

॥ १६७ ॥ द्विभार्यस्याग्निसंसर्गविधिः ॥

श्रीः ॥ कर्ताविवाहहोमकालेउद्धननादिनाभूसंस्कारंविधायतत्रपूर्वभार्यायागृह्याग्निंप्रतिष्ठाप्यतत्रद्वितीयभार्यायाविवाहहोमंकु
र्यात्सएवगृह्याग्निः ॥ यस्यतुलौकिकाग्नौद्वितीयविवाहहोमोभवति तेननवाहमग्निद्वयस्यपृथगुपासनाकार्या ॥ ततोदशमेद्वादशे
त्रयोदशेवाहनिप्रातरुभयत्रहोमानंतरंप्राङ्मुखउपविश्याग्निद्वयंपत्नीभ्यामानाय्य ॥ दक्षिणतउत्तरतश्चपात्रद्वयेसंस्थाप्यतत्राग्नि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्वयमध्येउद्धननेनभूसंस्कारेणस्थंडिलंविधायपत्नीभ्यामन्वारब्धआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममगृह्याग्निसाध्यानांकर्मणांतंत्रेणानुष्ठानसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थमौपासनाग्न्योःसंसर्गंकरिष्येतदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्य) ॥ ततोमंत्रद्वयेनतौप्रत्यक्षौपासनाग्नीस्वयंपत्नीभ्यांवास्वस्वौपासनाग्निंयुगपदेवमध्यमेस्थंडिलेस्थापयेत् ॥ भवतंनःसमनसौसमोकसावरेपसौ ॥ मायज्ञइंहिंसिष्टंमायज्ञपतिंजातवेदसौशिवौभवतमद्यनः ॥ अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिराजएषः ॥ स्वाहाकृत्यब्रह्मणातेजुहोमिमादेवानांमिथुयाकर्भागधेयंइतिद्वाभ्यां ॥ ततस्तमग्निंप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाऔपासनाग्न्योःसंसर्गहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ जातवेदसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वाप्रधानहोमे ॥ तंतुमंतमग्निंत्रिश्चरुणायक्ष्ये ॥ ततःवरुणंद्विरित्यादिदेवतायक्ष्यइत्यंतमुक्त्वासमिधोन्नावाधाय ॥ उक्तप्रकारेणचरुंश्रपयित्वाआघारवतातंत्रेणहोमःकार्यः ॥ व्याहृत्यंतंहुत्वाप्रधानहोमः ॥ तंतुंतन्वन्नजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधियाकृतान् ॥ अनुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनंस्वाहा ॥ तंतुमतेन्नयइदं० ॥ उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसंसृजेथामयंच ॥ पुनःकृण्वंस्त्वापितरंयुवानमन्वातांसीत्वयितंतुमेतंस्वाहा ॥ तंतुमतेन्नयइदं० ॥ त्रयस्त्रिंशत्तंतवोयेवितन्निरेयइमंयज्ञंस्वधयाददंतेतेषांछिन्नंप्रत्येतद्दधामिस्वाहाघर्मोदेवांअप्येतुस्वाहा ॥ तंतुमतेन्नय० ॥ इतिचरोराहुतित्रयंहुत्वा॥ ततइमंमेवरुणेत्यादिसंस्थाजपांतंकर्मसमापयेत् ॥ नात्रत्रिवृदन्नहोमः॥ कर्मांगत्वेनब्राह्मणभोजनंसंकल्प्य ॥ आचार्यायदक्षिणांदत्वातेभ्यश्चाशिषःसंप्राप्यप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ततोयावज्जीवमेतस्याग्नेःपरिचर्याकार्या ॥ अग्न्युपघातेपुनराधानप्राप्तौसत्यांभार्याद्वयान्वारंभेणपुनराधानोक्तरीत्याअ

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ग्नेरुत्पत्तिःकार्या ॥ अग्न्योःसंसर्गस्यजातत्वान्नपृथगग्न्योरुत्पत्तिः ॥ केचित्तुपुनराधानेनाग्निद्वयंपृथगुत्पाद्याऽग्न्योःसंसर्गविधि
नासंसर्गंकुर्यादितिवदंति ॥ तृतीयभार्यादावप्येवमेवविधिः ॥ इतिश्रीरुद्रस्वामिमतानुसारीद्विभार्याग्न्योःसंसर्गप्रयोगः ॥ ॥

॥ १६८ ॥ अन्वारंभणीयस्थालीपाकः ॥

श्रीः ॥ अयंसूत्रानुक्तोपिशिष्टाचारदर्शनाल्लिख्यते ॥ सचगृहप्रवेशस्थालीपाकानंतरंपूर्णमास्याःपूर्वंचतुर्दश्यांपूर्वाह्णेकार्यः ॥
गृह्याग्नेःपश्चात्सपत्नीकःप्राङ्मुखउपविश्यदेशकालौसंकीर्त्यदर्शपूर्णमासस्थालीपाकंकर्तुंदशहोतृसारस्वतहोमपूर्वकंअन्वारंभणी
यस्थालीपाकंकरिष्येइतिसंकल्प्यगणेशपूजादिकृत्वा अग्निंप्रज्वाल्यसमिद्वयमादायश्रद्धएहीत्यादिअन्वारंभणीयस्थालीपाकहो
मकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ अग्निंसमिद्भिःवाचस्पतिंब्रह्माणंचाज्येनपूर्णमासममावास्यांचाज्येन ॥ अग्नाविष्णू ॥
सरस्वतीं सरस्वंतं अग्निंभगिनं अग्निंस्विष्टकृतंचचरुणायक्ष्ये ॥ सामान्यप्रायश्चित्तदेवताश्चाज्येनएतादेवतायक्ष्यइत्युक्त्वासमि
धावग्नावाधायपरिसमुह्यपरिस्तीर्यउपयुक्तानिपात्राण्यासाद्यप्रोक्षणीसंस्कारादिकृत्वादिशंसंस्कृत्यआपूर्विकत्वादाहुतिपरिमाण
मष्टसमित्कमिध्मंतूष्णींहुत्वा ॥ दर्व्याज्यमादाय ॥ चित्तिस्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतंबर्हिः ॥ केतोअग्निः ॥
विज्ञातमग्निः ॥ वाक्पतिर्होता ॥ मनउपवक्ता ॥ प्राणोहविः ॥ सामाध्वर्युः ॥ इतिदशहोतारंमनसाअनुद्रुत्य ॥ वाचस्पतेवि
धेनामन् ॥ विधेमतेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्पतिःसोमंपिबतु ॥ आस्मासुनूम्णंधात्स्वाहाइत्यंतंपठन्जुहोति ॥
वाचस्पतयेब्रह्मणइदं० ॥ ततःसारस्वतहोमः ॥ पूर्णापश्चादुतपूर्णापुरस्तादुन्मध्यतःपौर्णमासीजिगाय ॥ तस्यांदेवाआधिसंवसं
तउत्तमेनाकंइहमादयंताश्स्वाहा ॥ पूर्णमासायेदं० ॥ यत्तेदेवाअदधुर्भागधेयममावास्येसंवसंतोमहित्वा ॥ सानोयज्ञंपिपृहि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विश्ववारेरयिंनोधेहिसुभगेसुवीरꣳस्वाहा॥ अमावास्यायाइदं० ॥ ततउक्तरीत्याचरुश्रपणंकृत्वाचरुहोमः॥दर्व्यासकृदवदायजुहोति ॥ अग्नाविष्णुभ्याꣳस्वाहा अग्नाविष्णुभ्यामिदं० ॥ सरस्वत्यैस्वाहा ॥ सरस्वत्याइदं० ॥ सरस्वतेस्वाहा सरस्वतइदं० ॥ अग्नयेभगिनेस्वाहा अग्नयेभगिनइदं० ॥ अग्नयेस्विष्टकृतेस्वाहा अग्नयेस्विष्टकृतइदं० ॥ ततःसर्वप्रायश्चित्तंव्याहृतिचतुष्टयंहुत्वाचार्यायदक्षिणांदत्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाङ्गुण्यायविष्णुंस्मरेत् ॥ इत्यन्वारंभणीयस्थालीपाकः ॥ ॥ ७ ॥

॥ १६९ ॥ दर्शपूर्णमासस्थालीपाकप्रयोगः ॥

श्रीः ॥ तस्यचायंक्रमः ॥ गृहप्रवेशस्थालीपाकानंतरंपौर्णमासंपर्वयदाभवतितदाचतुर्दश्यांदशहोतृसारस्वतहोमपूर्वकंअन्वारंभणस्थालीपाकंकृत्वापौर्णमास्याःस्थालीपाकःस्वकालेकार्यः ॥ श्रौतभक्तित्वादिष्टिकालोस्यकालः ॥ अथप्रयोगः ॥ सपत्नीकोगृह्याग्नेःपश्चादुपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यदर्शपूर्णमासस्थालीपाकाभ्यांयक्ष्ये ॥ तत्राद्यपौर्णमासस्थालीपाकेनयक्ष्येइतिपौर्णमास्यां ॥ पूर्वसंकल्पितदर्शस्थालीपाकेनयक्ष्यइत्यमावास्यायामितिसंकल्प्यगणेशपूजनादिकृत्वाग्निंप्रज्वाल्यसमिद्वयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वापौर्णमासस्थालीपाकहोमकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामि ॥ अग्निंसमिद्भ्यां अग्निंचरुणाअग्निꣳस्विष्टकृतंचरुणा ॥ प्रायश्चित्तदेवताश्चाज्येयक्ष्यइत्युक्त्वासमिधावघ्नावाधायपरिसमूहनादिकृत्वाशृतंचरुंबर्हिष्याधायसमिद्वयात्मकंइध्मंतूष्णींहुत्वादर्व्याचरोःसकृदवदायजुहोति ॥ अग्नयेस्वाहा ॥ अग्नयइदं० ॥ अग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ ततःसामान्यप्रायश्चित्तंचाज्येनहुत्वा परिषेकविसर्गांतंकृत्वाविष्णुंस्मरेत् ॥ इतिपौर्णमासस्थालीपाकः ॥ एवमेवदर्शस्थालीपाकः ॥ ॥ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १७० ॥ आग्रयणस्थालीपाकः ॥

श्रीः ॥ अयंसूत्रानुक्तोपिशिष्टपरिगृहीतत्वाल्लिख्यते ॥ सचशरदिवसंतेचकार्यः ॥ अग्नेःपश्चात्प्राङ्मुखःसपत्नीकउपविश्यदेशकालौसंकीर्त्यव्रीह्यादिधान्यानांप्राशनाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंपंचाज्यानिकाहोमपूर्वकंआग्रयणस्थालीपाकंकरिष्येइतिसंकल्प्यगणेशपूजादिकृत्वाऽग्निंप्रज्वाल्यसमिद्व्यमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा आग्रयणस्थालीपाकहोमकर्मणि यायक्ष्यमाणदेवतास्ताःपरिग्रहीष्यामि ॥ तूष्णीमग्निमिध्मेन ॥ इंद्रंद्यावापृथिव्यौऋतून् इदुवत्सरपरिवत्सरसंवत्सरान् देवांश्चाज्येन ॥ इंद्राग्नी विश्वान्देवान् द्यावापृथिव्यौचरुणायक्ष्ये ॥ अगिꣳस्विष्टकृतंचरुणा सामान्यप्रायश्चित्तदेवताश्चाज्येनयक्ष्यइत्युक्त्वासमिधावग्नावादध्यात् ॥ अयमापूर्विकपक्षेणकार्यः ॥ परिसमूहनादिकृत्वातूष्णीमिध्मंहुत्वापंचाज्यानीराज्येनजुहोति ॥ शꣳतायुधायशꣳतवीर्यायशꣳतोतयेभिमातिषाहे ॥ शꣳतंयोनःशꣳरदोअजीꣳतानिंद्रोनेषदतिदुरितानिविश्वास्वाहा ॥ इंद्रायेदं० ॥ येचत्वारःपथयोदेवयानाअंतराद्यावापृथिवीवियंति ॥ तेषांयोअज्यानिमजीतिमावहात्तस्मैनोदेवाःपरिदत्तेहसर्वेस्वाहा ॥ द्यावापृथिवीभ्यामिदं० ॥ ग्रीष्मोहेमंतउतनोवसंतःशरद्वर्षाःसुवितंनोअस्तु ॥ तेषामृतूनाꣳशतशारदानांनिवातएषामभयेस्यामस्वाहा ॥ ऋतुभ्यइदं० ॥ इदुवत्सरायपरिवत्सरायसंवत्सरायकृणुतावृहन्नमः ॥ तेषांवयꣳसुमतौयज्ञियानांज्योगजीताअहतास्यामस्वाहा ॥ इदुवत्सरपरिवत्सरसंवत्सरेभ्यइदं० ॥ भद्रान्नःश्रेयःसमनैष्टदेवास्त्वयावसेनसमशीमहित्वा ॥ सनोमयोभूःपितोआविशस्वशंतोकायतनुवेस्योनःस्वाहा ॥ देवेभ्यइदं० ॥ इतिपंचाज्याहुतीर्हुत्वा ॥ ततःपूर्ववच्चरुंशृतमुदगुद्वास्यबर्हिष्याधायदर्व्योपहत्य सकृदवदायजुहोति ॥ इंद्राग्निभ्याꣳस्वाहा इंद्राग्निभ्यामिदं० ॥ विश्वेभ्योदेवेभ्यꣳस्वाहा विश्वेभ्योदेवेभ्यइदं० ॥ द्यावापृथि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वीभ्याश्स्वाहा ॥ द्यावापृथिवीभ्यामिदं० ॥ अग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ ततःआज्येनव्याहृतिचतुष्टयंसर्वप्रायश्चित्तंहुत्वाग्निंप्रार्थ्याचार्यायदक्षिणांदत्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ततःहुतशेषेणब्राह्मणान्तसंभोज्यस्वयंनवान्नप्राशनंकुर्यात् ॥ यद्यप्याग्रयणस्थालीपाकादिकंसूत्रेकंठतोनोक्तंतथापिश्रौतमध्येस्मार्तान्नानंकुर्वतासूत्रकृतोक्तप्रायमेव ॥ श्रौतभाक्त्वेपिस्थालीपाकानांदर्वीहोमत्वान्नसर्वातिदेशः ॥ आग्रयणस्थालीपाकत्वादेवब्राह्मणपरिवेषणोत्तरंभोजनात्प्रागेवपुरोडाशवत्स्वयंप्राश्यपत्नींचप्राशयित्वाशुद्धाचमनोत्तरंभोजनंकार्यं ॥ तथैवसकलहिरण्यकेशीशिष्टानुष्ठानपरंपरादर्शनंच ॥ इत्याग्रयणस्था० ॥

॥ १७१ ॥ सभार्यस्यप्रवासविधिः ॥

श्रीः ॥ यदिसभार्यःप्रयास्यंस्तर्ह्यग्निंसमारोप्यगच्छेत् ॥ अथसमित्समारोपः ॥ अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः ॥ तंजानन्नग्नआरोहार्थानोवर्धयारयिं ॥ इतिसमिधमग्नौप्रताप्यशुचिर्धारयति ॥ अथात्मसमारोपः ॥ हस्तंप्रताप्यमुखेननासिकयावाऊष्माकर्षणंकरोति ॥ ॐ यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानं ॥ अच्छावसूनिकृण्वन्नस्मेनर्यापुरूणि ॥ यज्ञोभूत्वायज्ञमासीदस्वांयोनिं ॥ जातवेदोभुवआजायमानःसक्षयएहीति ॥ प्रत्यक्षस्याग्नेःसकाशाद्देवतारूपस्याग्नेररण्योरात्मनिवाऽऽनयनंसमारोपणं ॥ तद्यजमानोध्वर्युर्वाकुर्यात् ॥ आत्मसमारोपणंतुयजमानस्यैव ॥ नद्युत्तरणेग्रामसीमातिक्रमेचदंपत्योरन्वारंभः ॥ आत्मसमारोपपक्षेसर्वदाअस्पृश्यस्पर्शनंजलेनिमज्यस्नानंस्त्रीगमनंचाकुर्वन्मूत्रपुरीषोत्सर्गेशौचमकृत्वाचिरकालंनतिष्ठेत् ॥ यत्रगत्वावसतितत्रउद्धननादिसंस्कृतायतनेश्रोत्रियागारादाहृतमग्निंसंस्थाप्यप्रज्वाल्यतत्रसमित्स्थमग्निमवरोपयति ॥ आजुह्वानःसुप्रतीकःपुरस्तादग्नेस्वांयोनिमासीदसाध्या ॥ [illegible] देवायजमानश्चसीदत ॥ उद्बुध्यस्वाग्नेप्रतिजा

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गृह्येनमिष्टापूर्तेसꣳसृजेथामयंच ॥ पुनःकृण्वꣳस्त्वापितरंयुवानमन्वातांꣳसीत्वयितंतुमेतमितिद्वाभ्यामवरोप्यौपासनादिकंकुर्यात् ॥ अथात्मारूढाग्न्यवरोपः ॥ उद्धननादिसंस्कृतायतनेग्निमानीयप्रज्वाल्यतत्रमुखेननासिकयावाश्वासमवरोपयति ॥ उपावरोहजातवेदःपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजाननन् ॥ आयुःप्रजाꣳरयिमस्मासुधेह्यजस्रोदीदिहिनोदुरोणइति ॥ इतिसभा०

॥ १७२ ॥ अर्कविवाहः ॥

श्रीः ॥ कर्ताआदित्यवारेहस्तनक्षत्रेशनिवासरेवायस्मिन्कस्मिंश्चिच्छुभदिनेवापूर्वाह्णेग्रामात्प्राच्यामुदीच्यांवादिशिविद्यमानंसुपुष्पपलाशशाखाढ्यंसलक्षणमेकमर्कपरीक्ष्यस्नात्वालंकृतोऽहतवासाआरक्तगंधादिभूषितःअर्कसंनिधिमागत्यतंसंस्राप्यवाससासंवेष्ट्यआरक्तगंधादिभिर्भूषयित्वाअर्ककन्यादानार्थमेकंविप्रमाचार्यत्वेनपरिकल्प्यअर्कसमीपएवमधुपर्कपर्यंतंसयथादृष्टिगोचरोनभवेत्तथोपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममतृतीयमानुषीविवाहसूचितदोषनिरसनपूर्वकतृतीयमानुषीविवाहाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंस्वस्यतृतीयमर्कविवाहंकरिष्येइतिसंकल्प्यतदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंहिरण्येननांदीश्राद्धंचविधायअर्कस्योत्तरतःहोमार्थंस्थंडिलमुपकल्पयेत् ॥ ततोदातावरेणोपकल्पितयामधुपर्कसामग्र्याउष्णीषादिभिर्हस्तकर्णादिभूषणैश्चार्कप्रतिग्रहीतारंपूजयेत् ॥ दातृशाखयैवमधुपर्कः ॥ ततःप्रतिग्रहीता ॥ त्रिलोकवासिन्सप्ताश्वछायासहितोरवे ॥ तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु ॥ इत्यर्कस्यपुरतस्तिष्ठन्सूर्यंसंप्रार्थ्यश्वेतवस्त्रेणकार्पासतंतुभिश्चतंसंवेष्ट्यआसत्येनरजसा० विपश्यन् इतिछायासहितंरविंतत्रावाह्यतेनैवमंत्रेणासनाद्याचमनीयांतानुपचारान्समर्प्य आसत्येनरजसा० विपश्यन् १ आपोहिष्ठा० इतिसर्वांतेभिषिच्यआसत्येनेत्यनेनैवमंत्रेणवस्त्रोपवीतमाल्यगंधपुष्पधूपदीपैःसंपूज्यगुडौदनंनिवे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्यतांबूलादिसमर्पयेत् ॥ ममप्रीतिकरायेयंमयास्पृष्टापुरातनी ॥ अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षतु ॥ इत्यर्कंप्रदक्षिणीकुर्व
न्पठित्वा ॥ नमस्तेमंगलेदेविनमःसवितुरात्मजे ॥ त्राहिमांकृपयादेविपत्नीत्वंमइहागता ॥ अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहिता
यच ॥ वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्धनः ॥ तृतीयोद्वाहजंपापंमृत्युंचाशुविनाशय ॥ आयुर्देहियशोदेहिप्रजांदेहिपशू
नपि ॥ देहिमेर्कश्रियंपुष्टिंस्वस्थानेर्कस्थिरोभव ॥ इतिपुनःप्रदक्षिणीकुर्यात् ॥ ततोर्ककन्यावरणं ॥ प्रतिग्रहीतृपक्षीयाअमुक
प्रवरान्वितामुकगोत्रोत्पनायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायकाश्यपगोत्रांआदित्यस्यप्रपौत्रींसवितुःपौत्रींअर्कस्यपुत्रीमिमा
मर्ककन्यांवृणीमहेइतिवदेयुः ॥ वृणीध्वमित्याचार्यःप्रतिवदेत् एवंपुनर्द्विः ॥ ततोवरःसुमुहूर्तेस्वस्तिनइंद्रोवृद्धश्रवाः अष्टौदेवा
वसवःसोम्यासइतिमंत्रौपठन्नर्ककनिरीक्षेत् ॥ ततआचार्यप्रमुखैराशीर्घोषवद्भिर्द्विजैर्युतः अर्ककन्यादानार्थकल्पितमाचार्यस्वस
मीपआहूयोपवेश्यतस्मात्तांविधिवत्प्रतिगृह्णीयात् ॥ सविधिर्यथा ॥ आचार्यःसंकल्पपूर्वकंपूर्ववन्नामगोत्रादिकमुच्चार्यइमामर्क
नाम्नींकन्यांतृतीयमानुषीविवाहसूचितदोषनिरसनपूर्वकतृतीयमानुषीविवाहाधिकारसिद्ध्येतुभ्यमहंसंप्रददेइतिदद्यात्॥ प्रति
ग्रहीताप्रतिगृह्णामीतिप्रतिगृह्णीयात् ॥ एवंपुनर्द्विः ॥ ततआचार्यःप्रतिग्रहीतारंप्रार्थयेत् ॥ अर्ककन्यामिमांविप्रयथाशक्तिवि
भूषितां ॥ अमुकगोत्रायामुकशर्मणेतुभ्यंदत्तांविप्रसमाश्रयेति ॥ ततःप्रतिग्रहीतातूष्णीमेवविवाहवत्कंकणबंधनपूर्वकंअंजल्य
क्षतारोपणंकृत्वायावत्पंचवृतंसूत्रंतावदासत्येनेतिमंत्रेणगायत्र्यावासंवेष्टयेत् ॥ एतस्यर्ग्यादिकंपूर्ववत् ॥ ततस्तत्सूत्रंपुनःपंचधा
कृत्वार्कस्यवामस्कंधे बृहत्सामक्षत्रभृद्वृद्धवृष्णियंत्रिष्टुभौजःशुभितमुग्रवीरं ॥ इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्षेति
बध्वैतेनैवतस्मिन्सूत्रेभस्मप्रक्षिपेत् ॥ ततस्तांनीराज्ययथाविभवंभूषणैर्भूषयेत् ॥ ततोर्कस्यप्रागादिदिक्षुक्रमेणमहीद्यौरित्यादि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूमिंस्पृष्ट्वा ओषधयइतितंडुलपुंजान्कृत्वा आजिघ्रेतिकलशान्संस्थाप्यतथैवाग्नेयादिदिक्षुसंस्थापयेत् ॥ ततःस्थापितानष्टौकल
शान्प्रत्येकंवस्त्रसूत्राभ्यांवेष्टयित्वा इमंमेगंगइतिहरिद्रागंधयुक्तशीतलजलेनापूर्यतेषुप्रत्येकंगंधादिकंतत्तन्मंत्रैर्निक्षिप्यपूर्णपात्रै
रपिदधाति सर्वत्रमंत्रावृत्तिः ॥ ततस्तेषुनाममंत्रेणैवमहाविष्णुमावाह्यासनाद्यैरुपचारैःपूजयेत् ॥ ततअर्कस्योत्तरतउपकल्पित
स्यस्थंडिलस्यपश्चादुपविश्यअर्कंसंस्पृशन्स्थंडिलस्योल्लेखनादिविधिनासंस्कारंविधायतत्रयोजकनामानंलौकिकाग्निंप्रतिष्ठाप्यप्र
ज्वाल्यध्यात्वासमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाअर्कविवाहकर्मणियायक्ष्यमाणाइत्यादिव्याहृत्यंतंप्रसाधनीदेव्यं
तंवोक्त्वाप्रधानहोमेबृहस्पतिंअग्निंवायुंसूर्यप्रजापतिंचैकैकयाज्याहुत्यायक्ष्येइत्युक्त्वा अंगहोमेवरुणंद्वाभ्यामित्यादिअग्निꣳस्वि
ष्टकृतंहुतशेषाज्याहुत्यायक्ष्येइत्यादिवाव्याहृतिहोमांतंप्रसाधनीदेवीहोमांतंवान्वाधानोत्कीर्तितपक्षानुसारेणकुर्यात् ॥ ततःप्रधा
नहोमः ॥ ॐ संगोभिरांगिरसोनक्षमाणोभगंइ॒वेद॑र्य॒मणंनिनाय ॥ जनेमि॒त्रोनद॑पतीअनक्ति॒बृह॑स्पतेवा॒जया॒शूरि॑वा॒जौस्वाहा॑ ॥
बृहस्पतयइदं ॥ यस्मैत्वाकामकामायवयꣳसम्राज्यजामहे ॥ तमस्मभ्यंकामंदत्वाथेदंत्वंघृतंपिबस्वाहा ॥ अग्नयइदं ॥ भूःस्वा
हा अग्नयइदं ॥ भुवःस्वाहा वायवइदं ॥ स्वःस्वाहा सूर्यायेदं ॥ भूर्भुवःस्वःस्वाहा प्रजापतयइदं ॥ ततोन्वाधानोत्कीर्तितप
क्षानुसारेणअंगहोमादिस्विष्टकृदादिवासर्वंहोमशेषंसमापयेत् ॥ नात्रत्रिवृदन्नहोमः ॥ ततोर्कंप्रदक्षिणीकृत्य ॥ मयाकृतमिदं
कर्मस्थावरेषुजरायुणा ॥ अर्कापत्यानिनोदेहितत्सर्वंक्षंतुमर्हसि ॥ इतितंसंप्रार्थ्यशंनोवातइतिशांतिंपठित्वागोयुग्ममाचार्यायद
त्वेतरेभ्योपिविप्रेभ्योयथाशक्तिदक्षिणांदद्यात् ॥ ततआचार्यःस्थापितकुंभस्थाभिरद्भिःसार्कंप्रतिग्रहीतारमभिषिंचेत् ॥ ततः
प्रतिग्रहीतातानिवासांसित्यक्त्वान्यानिधारयेत् ॥ त्यक्तानिवासांस्याचार्यस्य ॥ ततःपंचमदिवसेपूर्ववदर्कंसंपूज्यविसृज्यअग्निं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संपूज्यपुण्याहादिवाचयित्वाब्राह्मणान्संभोज्यभूयसींदत्वार्कभूषणवस्त्रादिब्राह्मणायदत्वाकर्मसाङ्गुण्यायविष्णुंस्मरेत् ॥ ततोमा
नुषींविधिनोद्वहेत् ॥ अयंबह्वृचोक्तोहोमविधिरिदानींबौधायनोक्तहोमविधेरनुपलंभादुक्तः ॥ अयंचार्कविवाहःकाश्यपगोत्रि
णोनभवतिगोत्रैक्यात् ॥ अथवासूर्येणचंद्रायदत्तांआचार्योविभाव्यवरणादौकाश्यपगोत्रस्थानेअत्रिगोत्रंकन्याविशेषणत्वेनसं
कीर्त्यआदित्यसवित्रर्कस्थानेचंद्रसोमेंदुशब्दानुच्चारयेत् ॥ लौकिकेलौकिकंचरेदितिवचनमत्रप्रमाणंइतिकेचित् ॥ अत्रगोत्रंन
दोषायेत्यन्ये ॥ काश्यपगोत्रोवरःस्वगोत्राविरुद्धगोत्रिणमाचार्यपरिकल्प्यतस्मादर्कंप्रतिगृह्णीयात् ॥ आचार्यस्तुसूर्येणदत्तांवि
भाव्यवरणादौकाश्यपगोत्रस्थानेस्वगोत्रंकन्याविशेषणत्वेनसंकीर्त्यआदित्यसवित्रर्कशब्दस्थानेस्वपितामहपित्रोः स्वस्यचक्रमेण
नामानिसंकीर्तयेत् ॥ एवंरीत्यैवकाश्यपगोत्रवरस्यार्कविवाहोनिवाह्योभवतीतियुक्तंचेत्स्वीकार्यसूरिभिः ॥ इतिसंस्काररत्न० ॥

॥ १७३ ॥ मोटनंमेरुतंत्रे ॥

श्रीः ॥ अथमोटनकंवक्ष्येदेवाविर्भावकारणं ॥ पाकक्रियाप्रकर्तव्याचतुर्भक्ष्यसमन्विता ॥ भार्ययासाधकेंद्रस्यपातिव्रत्यादियु
क्तया ॥ अप्रसूताःस्त्रियःपंचआहूयसकुमारिकाः ॥ अलंकृताःपवित्राश्चएकपंक्त्योपवेशयेत् ॥ तत्रादौविघ्नपस्थानमन्नेतुबटु
कस्यच ॥ चकारात्कुलदेवतायाः ॥ ताःसंपूज्यमहत्पात्रेपवित्रेतत्रचार्पयेत् ॥ क्रमाद्द्विगुणमानेनमध्वाज्येचसितादधि ॥ दुग्धं
चनिक्षिपेत्तत्रनैवेद्यंतत्रनिःक्षिपेत् ॥ कुमारिकायाहस्तेनमंथयेयुस्त्रियश्चतत् ॥ स्त्रीभिस्तस्मिन्मथ्यमानेदेवावेशःप्रजायते ॥
देवावेशेजायमानेसुगंधोवातिमारुतः ॥ सर्वमनोगतंवक्तिदेवताशुप्रसीदति ॥ सिद्ध्यंतिसर्वकार्याणिमोटनानांशतेनच ॥ नखैर्भ
वेद्द्विवाहस्तुपंचाशद्भिःसुतस्तथा ॥ नखैर्विंशैरित्यर्थः ॥ पंचाशद्भिःसुतलाभइत्यर्थः ॥ *अशीत्यागतराज्यास्तिर्विंशत्यालभतेधनं* ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अष्टोत्तरशतेनापिअसाध्येनतुमेलयेत् ॥ अष्टोत्तरशतसंख्यैरसाध्येनकार्येणापिमेलयेत् ॥ असाध्यमपिकार्यंसाधयेदित्यर्थः ॥ कौमारिकाचेष्टदेवंकौमार्याईरितोविधिरिति ॥ कौमारिकाचेष्टदेवमुद्दिश्यउत्तमपतिलाभार्थमिमंविधिंकुर्यात् ॥ अयंविधिःकौमार्याएवईरितःकुमारिकांविनाविधिर्नभवतीत्यर्थः ॥ कौमारीयोगेश्वरी॥ तन्माहात्म्येतस्यास्तथैववर्णितत्वात् ॥ तदुद्देशेनायंविधिर्भवतीत्यर्थः ॥ एवमन्येष्वपिसंस्कारेष्वाचारश्चेत्कार्यं॥ इतिसंस्काररत्नमालायांमोटनविधिः ॥ अस्यैवबोडनइतिरूढंनाम

॥ १७४ ॥ कूष्मांडहोमः ॥

श्रीः॥ यजमानःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यकुमारस्यकरिष्यमाणउपनयने कन्यायाविवाहेवामंगलारंभात्पूर्वं मध्येवाउपस्थितसूतकनिवृत्तिपूर्वकंशरीरशुद्ध्याप्राप्तकर्मण्यधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंजमदग्निप्रोक्तंकूष्मांडहोमंकरिष्ये ॥ तदंगंगणपतिपूजनादिकरिष्ये ॥ इतिसंकल्प्यकृत्वाचार्यवृत्वाआचार्यस्तुयथास्वर्गेइत्यादिसंप्रार्थयेत् ॥ अथाचार्यआचम्यप्राणानायम्यदेशकालादिनिर्दिश्ययजमानेनकूष्मांडहोमकर्मणिवृतोहमाचार्यकर्मकरिष्येइतिसंकल्प्य आसनस्थलशुद्धिसर्षपविकिरणांतंकृत्वा ॥ तदंगहोमंकर्तुंस्थंडिलादिसकलंकर्मकरिष्यइतिसंकल्प्य॥ स्थंडिलसंस्कारंकृत्वापावकनामानमग्निंप्रतिष्ठाप्यचत्वारिशृंगेत्यादिभिर्ध्यात्वान्वादध्यात् ॥ समिन्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाकूष्मांडहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि जातवेदसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वावैशेषिकप्रधानहोमे 'चरुपक्षेसवितारंचरुणायक्ष्येअग्नेऽस्विष्टकृतंचरुणायक्ष्ये देवानादित्यान् । विश्वान्देवान् । द्यावापृथिव्यौसरस्वतींच । इंद्राग्नीमित्रावरुणौसोमंधातारंबृ

१ आरब्धमांगलिककर्मण्याशौचादिसंपातेसंस्कार्यमातूरजआद्यन्योपघातकप्राप्तौवाप्तसंगानुरोधेनसंकल्पेतत्तदूहःप्रायश्चित्तीयेस्मिन्नेवहोमेपूर्वक्षौरादि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हस्पतिंच । जातवेदसं । अग्निंगार्हपत्यं । ज्योतिः । अग्निं । अग्निंगार्हपत्यं । अग्निं । अग्निंगार्हपत्यंद्विः । अग्निं । अग्निंगार्हपत्यं । अपः शुंधनीः । अपोहिरण्यवर्णाः । वरुणंद्विः । अग्नीवरुणौद्विः । अयासमग्निं । अग्निमिंद्रंच । उग्रंपश्याश्राष्ट्रभृतमप्सरसौच । उग्रंपश्याश्राष्ट्रभृतंयमंच । वरुणंचतुः । अग्नीवरुणौद्विः । संकुसुकंविकुसुकंनिर्ऋथंनिःस्वनंच । कृत्यांनिर्ऋतिंच । दुःशंसानुशंसघणानुघणांश्च । त्वष्टारं । आयुष्टमग्निं । आयुर्दामग्निं । अग्निंवरुणमदितिंविश्वान्देवांश्च । अग्निंपवमानंत्रिः । अग्निंजातवेदसं । जातवेदसं । अग्निंवृत्रहणं । अग्निं । उषसंनिस्रुचंच । देवान् । जातवेदसमग्निं । अग्निं । ब्रह्माणंद्विः । वैश्वानरं ५१ चैताःप्रधानदेवताआज्येन । 'चरुपक्षे त्विषिंदेवींचतुः । अभ्यावर्तिनमग्निंचतुर्वारमाज्येन । अग्निंवैश्वानरंसमिधायक्ष्ये' ॥ अंगहोमेवरुणंद्विरित्यादिसंस्रावांतमुक्त्वासमिधोग्नावाधायपरिषेकादिसामान्यप्रधानांतंकृत्वा अवदानधर्मेणचरुमवदायसावित्रींपुरोनुवाक्यामनूच्यसावित्र्यैवयाज्ययास्वाहांतयाजुहुयात् ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयादोंतत्सवितु० प्रचोदयात्स्वाहा ॥ सवित्रइदं० ॥ ततःस्विष्टकृतमवदायहव्यवाहमितिपुरोनुवाक्यामनूच्यस्विष्टमग्नइतियाज्ययाजुहुयात् ॥ ॐ हव्यवाहमभिमातिषाहंरक्षोहणंपृतनासुजिष्णुं ॥ ज्योतिष्मंतंदीद्यतंपुरंधिमग्निंस्विष्टकृतमाहुवेमोंस्विष्टमग्नेअभितत्पृणाहिविश्वादेवपृतनाअभिष्य ॥ उरुंनःपंथांप्रदिशन्विभाहिज्योतिष्मद्धेह्यजरंनआयुःस्वाहा ॥ अग्नयेस्विष्टकृतइदं ॥' अथप्रधानहोमः ॥ ॐ यद्देवादेवहेळंनंदेवासश्चकृमावयं ॥ आदित्यास्तस्मान्मामुंचतर्तस्यर्तनमामितस्वाहा ॥ देवेभ्यआदित्येभ्यइदं० ॥ ॐ देवाजीवनकाम्यायद्वाचानृतमूदिम ॥ तस्मान्नइहमुंचतविश्वेदेवाःसजोषसःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ ॐ कृतेनद्यावापृथिवीकृतेनत्वꣳसरस्वति ॥ कृतान्नःपाह्येनसोयत्किंचानृतमूदिमस्वाहा ॥ द्यावापृथिवीभ्यांसरस्वत्यैचेदं० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ इंद्राग्नीमित्रावरुणौसोमोधाताबृहस्पतिः ॥ तेनोमुंचंत्वेनसोयदन्यकृतमारिमस्वाहा ॥ इंद्राग्नीमित्रावरुणसोमधातृबृहस्पतिभ्यइदं० ॥ ॐ सजातश्श्सादुतजामिश्श्साज्यायसःश्श्सादुतवाकनीयसः ॥ अनाधृष्टंदेवकृतंयदेनस्तस्मात्त्वमस्मान्जातवेदोमुमुग्धिस्वाहा ॥ जातवेदसइदं० ॥ ॐ यद्वाचायन्मनसाबाहुभ्यामूरुभ्यामष्ठीवद्भ्याश्शिश्नैर्यदनृतंचकृमावयं ॥ अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुचकृमयानिदुष्कृतास्वाहा ॥ अग्नयेगार्हपत्यायेदं० ॥ ॐ येनत्रितोअर्णवान्निर्बभूवयेनसूर्यतमसोनिर्मुमोच ॥ येनेंद्रोविश्वाअजहादरातीस्तेनाहंज्योतिषाज्योतिरानशानआक्षिस्वाहा ॥ ज्योतिषइदं० ॥ ॐ यत्कुसीदमप्रतीत्तंमयेहयेनयमस्यनिधिनाचरामि ॥ एतत्तदग्नेअनृणोभवामिजीवन्नेवप्रतितत्तेदधामिस्वाहा ॥ अग्नयइदं० ॥ ॐ यन्मायमातागर्भंसत्येनश्चकारयत्पिता ॥ अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिंचकृमकरोतुमामनेनसश्स्वाहा ॥ अग्नयेगार्हपत्यायेदं० ॥ ॐ यदापिपेषमातरंपितरंपुत्रःप्रमुदितोधयन् ॥ अहिंश्सितौपितरौमयातत्तदग्नेअनृणोभवामिस्वाहा ॥ अग्नयइदं० ॥ ॐ यद्दंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिंश्सिम ॥ अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिंचकृमकरोतुमामनेनसश्स्वाहा ॥ अग्नयेगार्हपत्यायेदं० ॥ ॐ यदाशसानिशसायत्पराशसायदेनश्चकृमानूतनंयत्पुराणं ॥ अग्निर्मा० नेनसश्स्वाहा ॥ अग्नयेगार्हपत्यायेदं० ॥ ॐ अतिक्रामामिदुरितंयदेनोजहामिरिप्रंपरमेसधस्थे ॥ यत्रयंतिसुकृतोनापिदुष्कृतस्तमारोहामिसुकृतांनुलोकश्स्वाहा ॥ अग्नयइदं० ॥ ॐ त्रितेदेवाअमृजतैतदेनस्त्रितएतन्मनुष्येषुमामृजे ॥ ततोमायदिकिंचिदानशेग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिंचकृमकरोतुमामनेनसश्स्वाहा ॥ अग्नयेगार्हपत्यायेदं० ॥ ॐ दिविजाताअप्सुजातायाजाताओषधीभ्यः ॥ अथोयाअग्निजाआपस्तानःशुंधंतुशुंधनीःस्वाहा ॥ अद्भ्यःशुंधनीभ्यइदं० ॥ ॐ यदापोनक्तंदुरितंचरामयद्वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दिवानूर्तनयत्पुराणं ॥ हिरण्यवर्णास्ततउत्पुनीतनस्वाहा ॥ अद्भ्योहिरण्यवर्णाभ्यइदं० ॥ ॐ इममेवरुणश्रुधीहवमद्याचमृडय॥ त्वामवस्युराचकेस्वाहा ॥ वरुणायेदं० ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीःस्वाहा ॥ वरुणायेदं० ॥ ॐ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा॥ अग्नीवरुणाभ्यामिदं० ॥ ॐ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधिस्वाहा ॥ अग्नीवरुणाभ्यामिदं० ॥ ॐ त्वमग्नेअयास्ययासन्मनसाहितः ॥ अयासंन्हव्यमूहिषेयानोधेहिभेषजꣳस्वाहा ॥ अयासेग्नयइदं० ॥ १ ॥ ॐ यददीव्यंनृणमहंबभूवादित्सन्वासंजगरजनेभ्यः ॥ अग्निर्मातस्मादिद्रश्मसंविदानोप्रमुंचताꣳस्वाहा ॥ अग्नींद्राभ्यामिदं० ॥ ॐ यद्धस्ताभ्यांचकरकिल्बिषाण्यक्षाणांवमुमुपजिघ्नमानः ॥ उग्रंपश्याचराष्ट्रभृच्चतान्यप्सरसावनुदत्तामृणानिस्वाहा ॥ उग्रंपश्यायैराष्ट्रभृतेप्सरोभ्यइदं० ॥ ॐ उग्रंपश्येराष्ट्रभृत्किल्बिषाणियदक्षवृत्तमनुदत्तमेतत् ॥ नेन्नक्रुणानृणवइत्समानोयमस्यलोकेअधिरज्जुरायस्वाहा ॥ उग्रंपश्यायैराष्ट्रभृतेयमायचेदं० ॥ ॐ अवतेहेडोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः॥ क्षयन्नस्मभ्यमसुरप्रचेतोराजन्नेनाꣳसिशिश्रथःकृतानिस्वाहा॥ वरुणायेदं० ॥ ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा ॥ वरुणायेदं० ॥ ॐ इममेवरुणश्रुधी० ॥ वरुणायेदं० ॥ ॐ तत्त्वायामि० ॥ वरुणायेदं० ॥ ॐ त्वंनोअग्नेवरुणस्यविद्वान्० ॥ अग्नीवरुणाभ्यामिदं० ॥ ॐ सत्वंनोअग्ने० ॥ अग्नीवरुणाभ्यामिदं० ॥ ॐ संकुसुकोविकुसुकोनिर्ऋथोयश्चनिःस्वनः॥ तेयेस्मद्यक्ष्ममनागसोदुरादुरमचीचतꣳस्वाहा ॥ संकुसुकविकुसुकनिर्ऋथनिःस्वनेभ्यइदं० ॥ ॐ निर्यक्ष्ममचीचतेकृत्यांनिर्ऋतिंच ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तनयो१स्मत्समृच्छातैतमस्मैप्रसुवामसिस्वाहा ॥ कृत्यायैनिक्रृतयेचदं० ॥ ॐ दुःशꣳसानुशꣳसाभ्यांघृणेनानुघृणेनच ॥ तेना न्यो१स्मत्समृच्छातैतमस्मैप्रसुवामसिस्वाहा ॥ दुःशꣳसानुशꣳसघणानुघणेभ्यइदं० ॥ ॐ संवर्चसापयसासंतनूभिरगन्महिम नासासꣳशिवेन ॥ त्वष्टानोअत्राविदधातुरायोनुमार्ष्टुतन्वो१यद्विलिष्टꣳस्वाहा ॥ त्वष्टृइदं० ॥ २ ॥ ॐ आयुष्टेविश्वतोदधद्ब्र मन्निर्वरेण्यः ॥ पुनस्तेप्राणआयातिपरायक्ष्मꣳसुवामितेस्वाहा ॥ आयुष्टेग्नयइदं० ॥ ॐ आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीको घृतयोनिरेधि ॥ घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्षतादिमꣳस्वाहा ॥ आयुर्देग्नयइदं० ॥ ॐ इममग्नआयुषेवर्चसेकृधि प्रियंरेतोवरुणसꣳशिशाधि ॥ मातेवास्माअदितेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत्स्वाहा ॥ अग्नयेवरुणायादितयेविश्वेभ्यो देवेभ्यइदं० ॥ ॐ अग्नआयूꣳषिपवसआसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनाꣳस्वाहा ॥ अग्नयेपवमानायेदं० ॥ ॐ अग्नेपव स्वस्वपाअस्मेवर्चःसुवीर्यं ॥ दधद्रयिंमयिपोषꣳस्वाहा ॥ अग्नयेपवमानायेदं० ॥ ॐ अग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः ॥ तमीमहेमहागयꣳस्वाहा ॥ अग्नयेपवमानायेदं० ॥ ॐ अग्नेजातान्प्रणुदानःसपत्नान्प्रत्यजातान्जातवेदोनुदस्व ॥ अस्मेदीदि हिसुमनाअहेळन्छर्मन्तेस्यामत्रिवरूथउद्भौस्वाहा ॥ अग्नयेजातवेदसइदं० ॥ ॐ सहसाजातान्प्रणुदानःसपत्नान्प्रत्यजाता न्जातवेदोनुदस्व ॥ आधिनोब्रूहिसुमनस्यमानोवयꣳस्यामप्रणुदानःसपत्नान्स्वाहा ॥ जातवेदसइदं० ॥ अग्नेयोनोभितोजनो वृकोवारोजिघाꣳसति ॥ ताꣳस्त्वंवृत्रहन्जहिवस्वस्मभ्युमाभरस्वाहा ॥ अग्नयेवृत्रघ्नइदं० ॥ अग्नेयोनोभिदासतिसमानोय श्वनिष्ट्यः ॥ तंवयꣳसमिधंकृत्वातुभ्यमग्नेपिदध्मसिस्वाहा ॥ अग्नयइदं० ॥ ॐ योनःशपादशपतोयश्चनःशपतःशपात् ॥ उषा श्वतस्मैनिम्रुक्सर्वंपापꣳसमूहताꣳस्वाहा ॥ उषसेनिम्रुचइदं० ॥ ॐ योनःसपत्नोयोरणोमर्तोभिदासतिदेवाः ॥ इध्मस्येबप्रक्षा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यतोमातस्योच्छेषिकिंचनस्वाहा ॥ देवेभ्यइदं० ॥ ॐ योमाद्वेष्टिजातवेदोयंचाहंद्वेष्मियश्चमां ॥ सर्वाꣳस्तानग्नेसंदहयाꣳश्चाहं द्वेष्मियेचमाꣳस्वाहा ॥ जातवेदसेऽग्नयइदं० ॥ ॐ योऽस्मभ्यमरातीयाद्यश्चनोद्वेषतेजनः ॥ निंदाद्योऽस्मान्दिप्साच्चसर्वाꣳस्तान्मꣳष्मषाकुरुस्वाहा ॥ अग्नयइदं० ॥ ॐ सꣳशितंमेब्रह्मसꣳशितंवीर्यं१बलं ॥ सꣳशितंक्षत्रंमेजिष्णुयस्याहमस्मिपुरोहितःस्वाहा ॥ ब्रह्मणइदं० ॥ ॐ उदेषांबाहूअतिरमुद्वर्चोऽअथोबलं ॥ क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वाँअहꣳस्वाहा ॥ ब्रह्मणइदं० ॥ ॐ पुनर्मनःपुनरायुर्मआगात्पुनश्चक्षुःपुनःश्रोत्रंमआगात्पुनःप्राणःपुनराकूतंमआगात्पुनश्चित्तंपुनराधीतंमआगात् ॥ वैश्वनरोमे दग्धस्तनूपाअवबाधतांदुरितानिविश्वास्वाहा ॥ वैश्वानरायेदंनमम ॥५१॥ इतिप्रधानहोमः ॥ ॐ सिꣳहेव्याघ्रउतयापृदाकौ ॥ त्विषिꣳरश्वौब्राह्मणेसूर्येया ॥ इंद्रंयादेवीसुभगाजजान ॥ सानआगन्वर्चसासंविदानास्वाहा ॥ त्विष्यैदेव्याइदं० ॥ ॐ यारांज न्येंदुंदुभावार्यतायां ॥ अश्वस्यक्रंद्येपुरुषस्यमायौ ॥ इंद्रंया० ॥ सानआगन्व० दानास्वाहा ॥ त्विष्यैदेव्या० ॥ ॐ याहस्तिनि द्वीपिनियाहिरण्ये ॥ त्विषिरश्वेषुपुरुषेषुगोषु ॥ इंद्रं० सान० ॥ त्विष्यै० ॥ ॐ रथेअक्षेषुवृषभस्यवाजे ॥ वातेपर्जन्येवरुणस्य शुष्मे ॥ इंद्रंयादेवीसुभगाजजान ॥ सानआगन्वर्चसासंविदानास्वाहा ॥ त्विष्यैदेव्याइ० ॥ ॐ अग्नेभ्यावर्तिन्नभिनआवर्तस्वा युषावर्चसासन्यामेधयाप्रजयाधनेनस्वाहा ॥ अभ्यावर्तिनेऽग्नयइदं० ॥ ॐ अग्नेअंगिरःशतंतेसंत्वावृतःसहस्रंतउपावृतः ॥ तासां पोषस्यपोषेणपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधिस्वाहा ॥ अभ्या० ॥ ॐ पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा ॥ पुनर्नःपाहिविश्व तःस्वाहा ॥ अभ्या० ॥ ॐ सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्ययाविश्वतस्परिस्वाहा ॥ अभ्यावर्तिनेऽग्नय० ॥ तत उपस्थानं ॥ ॐ वैश्वनरायप्रतिवेदयामोयदीनृणꣳसंगरोदेवतासु ॥ सएतान्पाशान्प्रमुचन्प्रवेदसनोमुंचातुदुरितादवद्यात् ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वैश्वानरःपवयान्नःपवित्रैर्यत्सँगरमभिधावाम्याशा ॥ अनाजानन्मनसायाचमानोयदत्रैनोअवतत्सुवामि ॥ अमीयेसुभगेदिवि विचृतौनामतारके ॥ प्रेहामृतस्ययच्छतामेतद्बुध्नकमोचनं ॥ विजिहीर्ष्वलोकान्कृधिबंधान्मुंचासिबद्धकं ॥ योनेरिवप्रच्युतोगर्भः सर्वान्पथोअनुष्व ॥ सप्रजानन्प्रतिगृभ्णीतविद्वान्प्रजापतिःप्रथमजाऋतस्य ॥ अस्माभिर्दत्तंजरसःपरस्तादच्छिन्नंतंतुमनुसंचरेम ॥ ततंतंतुमन्वेकेअनुसंचरंतियेषांदत्तंपित्र्यमायनवत् ॥ अबंध्वेकेददतःप्रयच्छादातुंचेच्छक्नवाऽसःस्वर्गएषां ॥ आरभेथा मनुसऽरभेथाऽसमानंपंथामवथोघृतेन ॥ यद्वांपूर्तपरिविष्टंयदग्नौतस्मैगोत्रायेहजायापतीसऽरभेथां ॥ यदंतरिक्षंपृथिवीमुतद्यां यन्मातरंपितरंवाजिहिꣳसिम ॥ अग्निर्मातस्मादेनसोगार्हपत्यउन्नोनेषदुरितायानिचकृम ॥ भूमिर्मातादितिर्नोजनित्रंभ्रातांतारिं क्षमभिशस्तएनः ॥ द्यौर्नःपितापितृयाच्छंभवासिजामिमित्वामाविंवित्सिलोकात् ॥ यत्रसुहार्दःसुकृतोमदंतेविहायरोगंतन्वꣳस्वायां ॥ अश्लोणांगैरहुताःस्वर्गेतत्रपश्येमपितरंचपुत्रं ॥ यदन्नमद्मयनृतेनदेवादास्यन्नदास्यन्नुतवाकरिष्यन् ॥ यद्देवानांच क्षुष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतु ॥ यदन्नमद्मिबहुधाविरूपंवासोहिरण्यमुतगामजामिवं ॥ यद्देवा नां०कृणोतु ॥ ३ ॥ इत्युपस्थाय ॥ त्रयोदश्यासमिधमादध्यात् ॥ ॐ यन्मयामनसावाचाकृतमेनःकदाचन ॥ सर्वस्मात्तस्मा न्मोळितोमोग्धित्वऽहिवेत्थयथातथऽस्वाहा ॥ अग्नयेवैश्वानरायेदं० ॥ इतिसमिधंहुत्वाप्रधानहोमात्पूर्वस्विष्टकृद्धोमाकरणपक्षे पूर्ववत्तेनहविषास्विष्टकृतंजुहोति ॥ पूर्वोक्तमंत्रौग्राह्यौ ॥ कर्मसमृद्ध्यर्थेजयादिहोमःकार्यः ॥ ततःत्वंनोअग्नेइत्यादिसऽस्रावां तंहुत्वाकर्मशेषसमापनाग्र्यर्चनाचार्यपूजनदक्षिणादानसमंत्रपंचगव्यप्राशनकर्मेश्वरार्पणाद्यंतंकर्मशेषंसमापयेत् ॥ अयंहोमोब्रौ धायनमतेनपक्कचरुसहितोगुरुः जमदग्निप्रोक्तस्तद्रहितोलघुरिति ॥ इतिकूष्मांडहोमः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १७५ ॥ बृहस्पतिशांतिः ॥

श्रीः ॥ आचम्यपवित्रपाणिःप्राणानायम्यदेशकालौसंकीर्त्य ॥ अस्यकुमारस्योपनयनकाले (कन्यकायाविवाहकालेवा) बृहस्पत्यानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंबृहस्पतिशांतिंकरिष्ये ॥ इतिसंकल्प्यगणेशपूजनाद्याचार्यवरणांतंकुर्यात् ॥ तत आचार्यः यथाशक्तिनिर्मितप्रतिमायामग्युत्तारणांतंकृत्वा ॥ यदत्रसंस्थितंभूतमित्यादिदेशसंस्कारांतेहोमदेशस्यैशानदेशेमहीद्यौरितिस्पृष्टभुविओषधयइतिधान्यंप्रक्षिप्याजिघ्रकलशमितिधवलकुंभंस्थाप्येमंमेगंगेइतितीर्थोदकेनापूर्याश्वत्थेवोनिषदनमितिअश्वत्थपल्लवान् गायत्र्यादिमंत्रैःपंचगव्यं देवस्यत्वा० भिर्षिंचामीतिकुशोदकंनिक्षिप्य युवासुवासाइतिपीतवस्त्रेणसंवेष्ट्यबृहस्पतेजुषस्वनइतिपंचरत्नानिप्रक्षिप्ययाओषधीरितिवक्ष्यमाणान्सर्वान्निक्षिपेत् यूथिकांदमनंमधुपुष्पाणिपत्रं (भाषायांपत्रजमितिप्रसिद्धं) पलाशंसर्षपान्जटामांसींगुडूचींअपामार्गंविडंगंशंखिनींवचांसहदेवीं विष्णुक्रांतांशतावरींकुष्टंमांसीं हरिद्रेद्वेमुराशैलेयचंदनंवचांकचोरंमुस्तांचेतिनिक्षिप्यपीतवस्त्रेणावेष्ट्य ॥ ततश्चंदनादिनाकुंभमभ्यर्च्यपूर्णादर्वीतियथाविभवंसौवर्णादिपूर्णपात्रंनिधायतत्राष्टदलोत्तरदलेहरिताक्षतनिर्मितदीर्घचतुरस्रपीठे हैमींबृहस्पतिप्रतिमांस्थापयित्वा स्थंडिलेऽग्निप्रतिष्ठापनादिअन्वाधानेव्याहृत्यंते बृहस्पतिमष्टोत्तरशतसंख्याभिरश्वत्थसमिद्भिस्तावतीभिराज्याहुतिभिस्तावतीभिःसर्पिर्मिश्रपायसाहुतिभिःतावतीभिःसाज्ययवव्रीहितिलाहुतिभिश्च अंगहोमेवरुणंद्विरित्यादिसंस्रावांतमुक्त्वासमिधोग्नावाधायसामान्यप्रधानहोमांतेकुंभोपरिस्थापितप्रतिमायामावाहनादिषोडशोपचारैर्बृहस्पतिंपूजयेत् ॥ तत्रविशेषः ॥ पीतवस्त्रयुग्मंपीतंयज्ञोपवीतंपीतंचंदनंपीताक्षतान् ॥ चंपकादिपीतपुष्पं ॥ बिल्वमज्जाधूपं ॥ घृतदीपं ॥ हव्योदनंनैवेद्यं ॥ दक्षिणायांपुष्परागोमाणिक्यंयथा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शक्तिहेमवा ॥ पूजांतेऽब्लिंगाभिर्वारुणीभिःपावमानीभिश्चकुंभानुमंत्रणं ॥ ततोयजमानोयथान्वाधानंबृहस्पतयइदंनममेति त्यागंकुर्यात् ॥ अथाचार्योबृहस्पतिमंत्रेणप्रणवादिनादधिमध्वाक्ताअष्टोत्तरशतमश्वत्थसमिधोजुहुयात् ॥ तावतीराज्याहुतीः सर्पिर्मिश्रलोकसिद्धपायसाहुतीः साज्ययवव्रीहितिलाहुतीश्च ॥ ततः इमंमेवरुणेत्यादिसंस्रावहोमांते परिस्तरणविसर्जना ग्न्यर्चनांतंकुर्यात् ॥ ततोबृहस्पतेःगंधादिभिःपूर्वोक्तैःफलतांबूलांतैःपूजनंकृत्वासयजमानोनमस्कुर्यात् ॥ ततस्ताम्रपात्रेशु द्धोदकंप्रक्षिप्यतत्रपीतानिगंधाक्षतपुष्पाणिफलंचप्रक्षिप्यार्घ्यंदद्यात् ॥ गंभीरदृढरूपांगदेवेज्यसुमतेप्रभो ॥ नमस्तेवाक्पतेशां तगृहाणार्घ्यंबृहस्पते ॥ इति ॥ ततोयजमानोबृहस्पतयेकृतकर्मार्पणंकुर्यात् ॥ भक्त्यायत्तेसुराचार्यहोमपूजादिकंकृतं ॥ तत्त्वंगृ हाणशांत्यर्थंबृहस्पतेनमोनमः ॥ इति ॥ ततःप्रार्थयेत् ॥ जीवोबृहस्पतिःसूरिराचार्योगुरुरंगिराः ॥ वाचस्पतिर्देवमंत्रीशुभंकुर्या त्सदाममेति ॥ ततोविसर्जनंकृत्वाचार्यंप्रणम्यसर्वोपचारसंयुक्तांगोयुक्तामिमांप्रतिमांतुभ्यमहंसंप्रददे ॥ इतितादृशप्रतिमांद द्यादभिषेकोत्तरंवाप्रतिमादानं ॥ कुंभोदकेनाचार्यःपुत्रदारसमेतंयजमानमभिषिंचेत् ॥ आपोहिष्ठेति० ३ ॥ समुद्रज्येष्ठा० ४॥ इदमापः० १ ॥ तामग्निवर्णा० १ ॥ याओषधीः० १ ॥ अश्वावतीर्गोमती० १ ॥ यद्देवादेवहेडनंयददीव्यमायुष्टेविश्वतोदध दित्याद्यनुवाकैश्चतच्छंयोरावृणीमहइति ॥ ततोब्राह्मणाश्चसंपूज्यतेभ्योभूयसींदक्षिणादत्वाशिषोवाचयित्वाकर्मेश्वरेसमर्प्य यथाशक्तिब्राह्मणान्भोजयेत् ॥ इतिबृहस्पतिशांतिः ॥ ॥ छ ॥ ॥ छ ॥

॥ १७६ ॥ विनायकशांतिर्बौधायनतंत्रे ॥

श्रीः ॥ अथातोविनायककल्पंव्याख्यास्यामोमासिमासिचतुर्थ्यांशुक्लपक्षस्यपंचम्यांवाभ्युदयादौसिद्धिऋद्धिकामःपशुकामोवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विनायकस्यबलिंहरेत् ॥पूर्वेद्युःकृतैकभक्तोपआचम्यदेवयजनोल्लेखनाद्यग्निमुखांतंकृत्वादक्षिणामुखंहस्तिमुखंदैवतमावाहयति॥ विघ्नविघ्नेश्वरागच्छविघ्नेत्येवनमस्कृत ॥ अविघ्नायभवास्माकंसदास्माकंभवोद्भवेत्यथदूर्वाक्षतासुमनोमिश्रमर्घ्यंददातिइमाआपः शिवतमाःपूताःपूततमामेध्यामेध्यतमाअमृताअमृतरसाः(तमाः) पाद्याअर्घ्याअर्हणीयाअभिषेचनीयाआचमनीयामार्जनीयाश्च प्रतिगृह्यतांभगवन्विनायकोमित्यथतूष्णींगंधपुष्पधूपदीपैरभ्यर्च्योपतिष्ठते ॥ नमोभूपतयेनमोभुवनपतयेनमोभूतानांपतयेन मइत्यथतिस्रस्तिस्रोविनायकाहुतीर्जुहोति ॥ विनायकायभूपतयेनमोविनायकायस्वाहा ॥ एवंविनायकायभुवनपतयेनमोवि नायकायस्वाहा ॥ विनायकायभूतानांपतयेनमोविनायकायस्वाहा॥ जयप्रभृतिसिद्धमाधेनुवरप्रदानादपूपंकरंभोदकसक्तून्पा यसमित्यथास्माउपकिरति ॥ विघ्नायस्वाहा ॥एवंविनायकाय वीराय शूरायोग्रायभीमायहस्तिमुखायवरदायविघ्नपारिषदेभ्यः स्वाहेत्यथभूतेभ्योबलिमुपहरेत् ॥ येभूताःप्रचरंतीत्यथपंचसूत्रंकंकणंहस्तेबध्नाति ॥ विनायकमहाबाहोविघ्नमेतत्तवाज्ञया ॥ कामामेसाधिताःसर्वेइदंव्याहृतिभिराबध्नामिकंकणमित्यथाग्निप्रदक्षिणंकृत्वाप्रणम्याभिवाद्यविनायकंविसर्जयति ॥ कृतंयदिम याप्राप्तंमहाभागगणेश्वर ॥ उत्तिष्ठसगणःसाधुयाहिभद्रंप्रसीदतामिति ॥ दधिमधुपयआज्यविसर्जनंकल्पयति ॥ ॥ छ ॥

॥ १७७ ॥ विनायकशांतिः[1] ॥

श्रीः ॥ पूर्वोक्तशुभदिनेकर्तादेशकालौस्मृत्वाविनायकोपसर्गशांत्यर्थंअमुककर्मणिनिर्विघ्नतासिद्ध्यर्थंअमुकफलसिद्ध्यर्थंलक्ष्मीप्रा

१ संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना ॥ शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेत् ॥ अकृत्वाशांतिकंयस्तुनिषिद्धेसतिदारुणे ॥ प्रकरोतिशुभं कर्मविघ्नस्तस्यपदेपदे ॥ बौधायनीयेस्मिन्प्रयोगेपूर्वनिर्दिष्टेपिसौकर्यार्थमयंपुनःशांतिरुक्तःप्रयोगःसंगृहीतः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्थंवाविनायकशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनपुण्याहवाचनमातृकापूजावृद्धिश्राद्धानिकृत्वाचार्यंवृत्वाचतुरः विज्ञाने श्वरमतेपराशरमतेष्टौवाऋत्विजोवृणुयात् ॥ तेषुचत्वारःस्वस्तिवाचकाइतिमदनरत्ने ॥ अपरेपुण्याहवाचनंनेच्छंति अग्रेतस्यक र्तव्यत्वात् ॥ अस्मिन्पक्षेमातृकार्चावृद्धिश्राद्धयोर्लोपआर्थिकः ॥ अथाचार्यःपंचवर्णैःशुक्लैर्वापिष्टैर्मध्येस्वस्तिकंकृत्वातदुपरिरक्त मानडुहंचर्मप्राग्ग्रीवमुत्तरलोमास्तीर्यतत्रश्रीपर्णीकाष्ठजंपीठंसंस्थाप्यतत्रश्वेतवस्त्रमाच्छाद्यतच्चतुर्दिक्षुचत्वारिस्वस्तिकानिकृत्वा तेषुप्रागादितः महीद्यौरित्यादिनाकांडानुसमयेनएकवर्णांश्चतुरःकुंभान्धान्यराशौनिधायह्रदोदकेननदीसंगमोदकेनवापूर्य ॥ उद्धृतासिवराहेणकृष्णेनशंतबाहुना ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमितिमंत्रेणतेषुपंचमृदःक्षिप्त्वा ॥ गंधद्वारामितिचं दनागुरुकेशरकस्तूरीकर्पूरादीन्गंधान्गोरोचनांगुग्गुलुंचक्षिप्त्वा ॥ अश्वत्थेइतिपंचपल्लवान्निक्षिप्यचंदनमालाभूषितान्कृत्वा याःफलिनीरितिफलं बृहस्पतेजुष०पंचरत्नानि अग्नेरेतइतिहेमक्षिप्त्वा युवासुवासाइतिवस्त्रेणावेष्ट्य पूर्णादर्वीतिपूर्णपात्रंनि धायैवंचतुर्दिक्षुकृत्वा प्रतिकलशंकलशस्यमुखे० देवदानवेत्यादिपठेत् ॥ ततश्चतुर्दिक्षुचत्वारऋत्विजः त्वंनोअग्ने० इतिवरुण मावाह्य षोडशोपचारैः(महार्णवेतुवरुणप्रकाशकमंत्रांतरैर्वाव्याहृतिभिर्वानाममंत्रेणवापूजापंचोपचारैर्वेतिच)संपूज्य आनोभद्राः शंनोवातःपवतामित्यादिस्वस्वशाखोक्तांशांतिंपठेयुः आचार्योभद्रासनस्यपूर्वतोहोमार्थंस्थंडिलंकृत्वातदैशान्यांहस्तमात्रवेदिका यांपीठेवस्त्रादौ तत्पुरुषायविद्महेवक्रतुंडायधीमहि। तन्नोदंतिःप्रचोदयात् इतिविनायकं ॥सुभगायैविद्महेकाममालिन्यैधीमहि॥ तन्नोगौरीप्रचोदयात् ॥ इत्यंबिकांचहैमप्रतिमायामावाहयेत् ॥ तत्परितोयथावकाशंप्रतिमास्वक्षतपुंजेषुवा व्योमकेशं पार्वतीं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भीमजं वसुदेवं अर्कं मंगलं शुक्रं बृहस्पतिं बुधं शनैश्चरं चंद्रं राहुं बाहुलेयं विष्णुं एतान् इंद्रादिलोकपालांश्चावाह्यासनादिनै
वेद्यांतैरुपचारैःसंपूज्यभद्रासनस्यपूर्वतःस्थंडिलेगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ केचित्तुग्रहमखेतत्समानतंत्रंकुर्वंति ।
तत्रविनायकादुत्तरेग्रहावाहनंकुर्यात् ॥ तत्रान्वाधानेसामान्यप्रधानोत्कीर्तनांते । ग्रहान्समिदाज्यचरुभिः । मितं संमितं शालं
कटंकटं कूष्मांडं राजपुत्रं चैकैकयाचर्वाहुत्या व्योमकेशादीनेकैकयाचर्वाहुत्या वरुणंद्विरित्याद्यंतेचरुंश्रपयित्वाबर्हिष्यासाद्य
गव्याज्यलोलितेन (गोघृतमिश्रेण) गौरसर्षपकल्केनोद्वर्तितसर्वांगंपूर्वोक्तैःसर्वौषधैःसर्वगंधैश्चविलिप्तशिरसंयजमानमाचार्यो
मंगलवेदघोषैर्भद्रासनेउपवेशयेदितिविज्ञानेश्वरमहार्णवादयः । (बृहत्पराशरोप्येवमाह । उपवेश्योद्वर्तयेदितिमदनरत्नेउक्तं) ॥
ततोयजमानःपूर्ववृतैश्चतुर्भिरष्टभिर्वाब्राह्मणैःसहस्वगृह्योक्तविधिनास्वस्तिवाचनंकुर्यात् । ततोजीवत्पतिपुत्राभिःसुवेषाभिः
स्त्रीभिर्नीराजनंकार्यं । ताभ्यश्चयजमानोवस्त्राणिकंचुकानिचदद्यादित्याचारः ॥ ततआचार्यःपूर्वदेशस्थंकलशमादाय ॥ सह
स्राक्षंशतधारमृषिभिःपावनंकृतं ॥ तेनत्वामभिषिंचामिपावमान्यःपुनंतुते ॥ इतिमंत्रेणयजमानमभिषिंचेत् ॥ भगंतेवरुणोरा
जाभगंसूर्योबृहस्पतिः ॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः ॥ इतिदक्षिणकुंभेन ॥ ततः-यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि ॥
ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा ॥ इतिपश्चिमकुंभेन ॥ ततउत्तरकलशमादाय सहस्राक्षमित्याद्यैस्त्रिभिर्मंत्रैरभिषिंचेत् ॥
अपरार्कमतेतुत्रिभिरेकैककुंभेनाभिषेकः ॥ ततश्चतुर्भिर्मिलितैःकुंभैर्बृहत्पराशरोक्तैरभिषिंचेत् ॥ एतद्वैपावनंस्नानंसहस्राक्षमृ
षिस्मृतं ॥ तेनत्वाशतधारेणपावमान्यःपुनंत्विमाः(त्वमूः) ॥ शक्रादिदशदिक्पालाब्रह्मेशाःकेशवादयः ॥ आपस्तेघ्नंतुदौर्भाग्यं
शांतिंददतुसर्वदा ॥ सुमित्र्यानआपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मः ॥ समुद्रागिरयोनद्योमुनयश्च

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पतिव्रताः ॥ दौर्भाग्यंघ्नंतुतेसवशातयच्छंतुसर्वदा॥ पादगुल्फोरुजंघास्यनितंबोदरनाभिषु॥ स्तनोरोवाहुहस्तानांग्रीवास्कंधांग संधिषु ॥ नासाललाटकर्णभ्रूकेशांतेषुचयत्स्थितं॥ तदापोघ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा॥ (मिलितकुंभैरभिषेकइतिकेचित्॥ चतुर्थकलशाभिषेचनएवैतेमंत्राःपठनीयाइतिमयूखे) ॥ ततआचार्यःप्राङ्मुखोयजमानस्यपश्चात्तिष्ठन्सव्यपाणिनाकुशान्यजमा नस्यमूर्धनिनिधायतत्रसार्षपंतैलंऔदुंबरेणस्रुवेणादाय ॐ मितायस्वाहा मितायेदमितियजमानः। एवमग्रेपित्यागः ॥ ॐ संमि तायस्वाहा ॥ ॐ शालायस्वाहा ॥ ॐ कटंकटायस्वाहा॥ ॐ कूष्मांडायस्वाहा॥ ॐ राजपुत्रायस्वाहेति षडाहुतीर्जुहुयात् ॥ अप रार्कमतेतुशालकटंकटाभ्यामेका कूष्मांडराजपुत्रायचैकाहुतिरितिचतस्रः॥ आथर्वणकौशिकगृह्यपशिष्टयोरप्येवं ॥ ततोवह्वा विध्माधानादिकृत्वापूर्वोक्तैःषड्भिर्मंत्रैरग्नौचरुंहुत्वाव्योमकेशादिभ्यश्चैकैकामाहुतिंहुत्वा इममेवरुणेत्यादिसंस्रावहोमांतेपूर्वादि दिक्षुइंद्रादिदशलोकपालेभ्योनाममंत्रैश्चरुशेषेणबलिंदत्वाशुद्धोदकेनस्नातोधौतांबरधरोयजमानः साचार्योविनायकमंबिकांचपु र्वोक्तदृायत्रीभ्यांषोडशोपचारैःसंपूज्य कृताकृततंडुलान् तिलयुक्तौदनंपक्वापक्वमत्स्यान्त्रिविधसुरांतदभावेसैंधवयुतंपात्र त्रयेक्षीरं पक्वापक्वमांसं मूलकापूपपूरिकोंडेरकस्रग्दध्यन्नपायसगुडमिश्रपिष्टमोदकलड्डुकचित्रसुगंधपुष्पकुल्माषफलानिचैकपा त्रेशूर्पेवाकृत्वा पूर्वोक्तमंत्रेण विनायकायैतमुपहारंनिवेदयामीत्युपहारंविनायकाय एवमंबिकायैचदत्वा कुसुमगंधदूर्वासर्षप सहितेनोदकेनांजलिमापूर्यप्रत्येकंपूर्वोक्तमंत्राभ्यामर्घ्यंदत्वादूर्वासर्षपपुष्पांजलिंचमंत्राभ्यांदत्वाभूमौशिरःकृत्वा ॥ रूपंदेहिय शोदेहिभगंभगवन्देहिमे ॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे ॥ इतिविनायकं ॥ रूपंदेहिजयंदेहिभगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे ॥ (अचलांकुरुमेदेविविपुलांख्यातिसंभवामित्यर्धमधिकंहेमाद्रौभविष्ये ॥ ख्यातिसंभ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वालक्ष्मीः) इत्यंबिकांचोपतिष्ठेत ॥ बृहत्पाराशरोमंत्रांतरमाह ॥ सौभाग्यमंबिकेदेहिभगंरूपंयशोपिच ॥ स्त्रियंपुत्रांश्चकामां श्चतथाशौर्यंचदेहिमे ॥ गणेशमातरंबालेयत्किंचिन्मदभीप्सितं ॥ एकनाम्नैवतद्देविदेहिगौरिवरान्मम ॥ इति ॥ (अर्घ्यदान मुपस्थानंचचतुष्पथेबल्यनंतरंकार्यमितिमदनरत्ने ॥ युक्तंचेदं पराशरयाज्ञवल्क्याभ्यांतथैवोक्तत्वात्) ततआचार्यःशूर्पेकुशाना स्तीर्यकृताकृताद्युपहारंतत्रनिधायचतुष्पथेभूमिमभ्युक्ष्यकुशानास्तीर्यतत्रशूर्पंनिधायबलिंदद्यात् ॥ मंत्रास्तु ॥ बलिंगृह्णंत्विमंदे वाआदित्यावसवस्तथा ॥ मरुतोथाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः ॥ असुरायातुधानाश्चपिशाचामातरोरगाः ॥ शाकिन्योय क्षवेतालायोगिन्यःपूतनाःशिवाः ॥ जृंभकाःसिद्धगंधर्वानागाविद्याधरानगाः ॥ दिक्पालालोकपालाश्चयेचविघ्नविनायकाः ॥ जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः ॥ माविघ्नंमाचमेपापंमासंतुपरिपंथिनः ॥ सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः ॥ (ततस्तुवाससीशुक्लेपरिधायाहतेशुभे ॥ सितचंदनलिप्तांगःसितस्रग्भूषणान्वितः ॥ तानन्यांश्चद्विजान्सर्वान्भोजयेद्विविधा शनैः ॥ वस्त्रयुग्मंगुरोर्दद्यंतेतुतस्यवराशिषः ॥ इत्युपस्थानानंतरंपराशरोक्तेः) ॥ ततोयजमानोगृहमागत्यपादौप्रक्षाल्याचम्य पूर्णाहुतिंहुत्वाआचार्यसंपूज्यतस्मैवस्त्रयुगंहेमचदक्षिणांदत्वाऋत्विग्भ्योयथाशक्त्यन्येभ्यश्चभूयसींदक्षिणांदत्वाविनायकांविक योरुत्तरपूजांकृत्वाविसृज्याचार्यायदत्वाग्निंसंपूज्यविभूतिंधृत्वाग्निंविसृज्यब्राह्मणान्भोजयित्वाकर्मेश्वरार्पणंकुर्यात् ॥ ॥

॥ १७८ ॥ श्रीपूजनादिशांतिः ॥

श्रीः ॥ यजमानःआचम्यपवित्रपाणिःप्राणानायम्यदेशकालौसंकीर्त्य अस्यकुमारस्योपनयनेकन्यायाउद्वाहेवासंस्कारात्पूर्वमं

१ चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि । भार्यारजस्वलायस्यप्रायस्तस्यनशोभनं । आपदि । श्रियंसंपूज्यविधिवत्ततोमंगलमारभेत् । अलाभेसुमुहूर्तस्य रजोदोषेचसंगते । श्रियंसंपूज्यतत्कुर्यात्पाणिग्रहणमंगलं ॥ आपदि देवतानिमित्तेजाते शुद्ध्यंतेऽसंभवेपूर्ववाऐरिणीदानदेवतोत्थापनेकार्ये ।

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तेवामातूरजोदोषोपस्थितिसूचितसकलानिष्टनिरासपूर्वकशुभफलप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंश्रीपूजनादिशांतिंकरिष्ये ॥ आ
दौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंपुण्याहवाचनंचकरिष्येइतिसंकल्प्यकृत्वा ॥गोत्रोच्चारपूर्वकमाचार्यंवृत्वासंपूज्यआचार्यःकर्म
संकल्प्यप्रादेशकरणांतंकृत्वा रंगवल्याद्यलंकृतेऐशानप्रदेशे मही द्यौः० इत्यादिभिर्मंत्रैर्विधिवत्कलशंसंस्थाप्यतदुपरिपूर्णादर्वी
तिपात्रंनिधायतदुपर्यग्न्युत्तारणपूर्वकंसौवर्णप्रतिमायां ॥ ॐहिरण्यवर्णा० ऋ० १ ॥ ॐभूर्भुवःसुवःश्रियैनमःश्रियमावाहयामीति
श्रियमावाह्यश्रीसूक्तेनषोडशोपचारैःपूजयेत् ॥ ततःस्थंडिलोल्लेपनाद्यग्निप्रतिष्ठांतंकृत्वासमित्त्रयमादाय श्रद्धएहीत्यादिसामा
न्यप्रधानांतमुक्त्वात्रप्रधानं ॥ श्रियंश्रीसूक्तेनप्रत्यृचंपायसाहुत्याअंगहोमेवरुणंद्विरित्याद्युक्त्वासामान्यप्रधानहोमांतेप्रधानहो
मः॥ ॐ हिरण्यवर्णा० १५ ॥ इत्यादिपंचदशर्ग्भिःप्रत्यृचमेकैकांपायसाहुतिंहुत्वा इमंमेवरुणेत्यादिसंस्रावांतंहुत्वाकर्मणिस्था
पितकलशोदकेनश्रीसूक्तेनयजमानमभिषिच्यआवाहितदेवताःपंचोपचारैःसंपूज्याचार्यायगांदक्षिणांचदत्वापीठदानादिचकृ
त्वायस्यस्मृत्येतिविष्णुस्मरणपूर्वकंकर्मेश्वरार्पणंकृत्वायथाशक्तिभूयसींदक्षिणांदत्वाशिषोग्राह्याः ॥ इतिश्रीपूजनादिशांतिः ॥

॥ १७९ ॥ प्रतिकूलशांतिः ॥

श्रीः ॥ कर्ताआचमनादिदेशकालस्मरणांतेममपुत्रस्यकन्यायावाविवाहनिश्चयोत्तरंअमुकस्यमृत्युवशेनोपस्थितप्रतिकूलदोषसू
चितसकलारिष्टपरिहारपूर्वकंदीर्घायुःपुत्रपौत्रादिसुखैश्वर्यप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंगर्गोक्तांशांतिंकरिष्ये ॥ तदंगगणपति
पूजनपुण्याहवाचनाचार्यवरणानिकृत्वाआचार्यःप्रादेशकरणांतेपीठादौप्रतिमासुमध्ये ॥ हिरण्यवर्णामितिश्रीसूक्तेनश्रियं ॥
इदंविष्णुरिति विष्णुं ॥ गौरीर्मिमायेति गौरीं ॥ त्र्यंबकमिति रुद्रं ॥ परंमृत्योरिति मृत्युं चावाह्यषोडशोपचारैःसंपूज्यतत्पश्चि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मतःस्थंडिलेग्निंप्रतिष्ठाप्यध्यात्वान्वाधानेश्रद्धएहीत्यादिसामान्यप्रधानांते अग्निंप्रधानदेवंदूर्वातिलाज्यचरुभिःप्रतिद्रव्यमष्टोत्त रशतसंख्याहुतिभिःअग्निंवायुंसूर्यप्रजापतिंचाज्येनअंगहोमेवरुणंद्विरित्यादिसꣳस्रावांतमुक्त्वासमिधोग्नावाधायसामान्यप्रधा नहोमांते ॥ ॐ भूःस्वाहामृत्युर्नꣳयतुसुखायवर्धतांस्वाहा इतिमंत्रेणोक्तद्रव्यैरुक्तसंख्यहोमंकृत्वाव्यस्तसमस्तव्याहृतिभिराज्यंहु त्वाइमंमेवरुणेत्यादिसꣳस्रावांतंहुत्वाकर्मशेषंसमाप्यदेवतोत्तरपूजांकुर्यात् ॥ ततोयजमानःआचार्यंसंपूज्यगांविसर्जितदेवतापी ठंचतस्मैदत्त्वाविप्रान्संभोज्यभूयसींदत्त्वाशांतिंवाचयित्वाकर्मसमापयेत् ॥ इतिप्रतिकूलदोषशांतिः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १८० ॥ गोमुखप्रसवशांतिः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्यशिशोःअमुकनक्षत्रजननसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं बौधायनोक्तांगोप्रसवशांतिंकरिष्ये ॥ तदंगंगणेशपूजनंपंचशब्दैःपुण्याहवाचनंआचार्यवरणंचकरिष्येइतिसंकल्प्यगणेशपूजना दिकुर्यात् ॥ अथवृताचार्यआचम्यप्राणानायम्यदेशकालावुत्कीर्त्यगोप्रसवशांतिंकर्तुआचार्यकर्मकरिष्ये पुरुषसूक्तजपंयदत्रेति सर्षपविकिरणंचकृत्वा पंचगव्येनशुद्धोदकेनचभूमिंप्रोक्ष्य ॥ ततोगृहस्यैशानभागेगोमयेनोपलिप्तभूमौश्वेतरजोभिःकर्णिकायु क्तंपंकजंकृत्वातत्रप्रस्थमात्रान्व्रीहीन्प्रक्षिप्यतेषुरक्तवस्त्रप्रसारितंनववैणवंशूर्पंसंस्थाप्यतत्रतिलान्विकीर्यतस्मिन्शूर्पेप्राङ्मुखंशि शुंनिधायद्वितीयशूर्पेणाच्छाद्यरक्तसूत्रेणशूर्पद्वयंवेष्टयित्वाशूर्पसंनिधौगामानीयगोमुखसांनिध्यंकृत्वागोमुखात्प्रसवंविभाव्य आ चार्यःपूर्वकृतपंचगव्येनशिशुंप्रोक्षेदेभिर्मंत्रैः॥ ॐविष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिꣳशतु ॥ आसिंचतुप्रजापतिर्धातागर्भंदधातु

१ मूलाश्रेषाज्येष्ठान्यतमनक्षत्रेष्वतिगंडेवैधृतौपातेअ[illegible]र्यादित्याहभगवान्बौधायनः ।

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ते॥ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति ॥ गर्भंतअश्विनावुभावाधत्तांपुष्करस्रजा ॥ हिरण्ययीअरणीयंनिर्मथतोअश्विना ॥ तंतेगर्भंऽहवामहेदशमेमासिसूतवै॥ यथाग्निगर्भापृथिवीद्यौर्यथेंद्रेणगर्भिणी ॥ वायुर्यथादिशांगर्भएवंतंगर्भंदधामिते॥ यस्ययोनिंप्रतिरेतोगृहाणपुमान्पुत्रोजायतांगर्भेअंतः॥ तंमातादशमासेबिभर्तुसजायतांवीरतमःस्वानां॥५॥ आपोहिष्ठेतितृसृभिःशुद्धोदकेनचस्नापयित्वा गोमाऽअग्नेविमाऽअश्वीयज्ञोनृवत्सखासदमिदंप्रमृष्यः ॥ इडावाऽएषोऽसुरप्रजावान्दीर्घोरयिःपृथुबुध्नःसभावान्॥ इतिमंत्रेणगांवामांगेषुसर्वांगेवास्पृशेत् ॥ ॐ विष्णोरराटमसिविष्णोःपृष्ठमसिविष्णोस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसिविष्णवेत्वा॥ इतिमंत्रेणपिताशिशुमादायमात्रेदद्यात् मातापित्रेदद्यात् पितामात्रेदद्यात्॥ ततःपितातूष्णींपुत्रस्यमुखमीक्षते ॥ ॐअंगादंगात्संभवसिहृदयादधिजायसे॥ आत्मावैपुत्रनामासिसजीवशरदःशतं॥ इतिशिशुमूर्धनित्रिरवघ्राय गोमुखप्रसवाख्यस्यकर्मणःपुण्याहंभवंतोब्रुवंतुअस्तुपुण्याहं॥ स्वस्ति० आयुष्मतेस्वस्ति॥ ऋद्धि० कर्मऋद्ध्यतां॥ इतिवाचयित्वाततस्तांगांयस्मैकस्मैब्राह्मणायदद्यात् ॥ ततआचार्यःअद्यपू० गोप्रसवशांत्यंगंस्थंडिलादिकंकर्मकरिष्येतदंगउद्धननादिकर्मकरिष्ये ॥ स्थंडिलंगोमयेनोपलिप्यतत्सवि० उद्धन्यमा०वरदनामानमग्निंप्रतिष्ठा चत्वारिशृंगेत्यादिध्यात्वा वरदोभव॥ अस्यांशांतौग्रहहोमःकृताकृतइतिरुद्रधरः ॥ तदभावेपूजनमपिकृताकृतं ॥ कर्तव्यमित्यन्ये ॥ अग्नेःपूर्वतःव्रीहिमयंस्थंडिलंकृत्वामध्येष्टदलंकृत्वातत्रमहीद्यौरित्यादिनाकलशंसंस्थाप्यतस्मिंऽस्तिरःपवित्रमंतर्धाय ॐआपोवाइद२० सुवरापओमितुदकमासिच्यसर्वौषधीःपंचरत्नकुशदूर्वागंधान्निक्षिप्यवस्त्रयुग्मेनसंवेष्ट्यकुंभमलंकृत्यकुंभाभ्यंतरेजलमध्येएवक्रमेणदेवताआवाहयेत्॥ मध्ये ॐसद्योजातं० ॐभू०

१ अन्यस्मिन्पुस्तकेतुकलशमध्येएवपूर्वेसद्योजातंदक्षिणेवामदेवंप्रतीच्यांअघोरंउदीच्यांतत्पुरुषमितिक्रमोदृश्यते ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सद्योजातायनमः सद्योजातमावाहयामि ॥ पूर्वे ॐ वामदेवायनमो० ॐ भू० वामदेवायनमःवामदेवं० ॥ दक्षिणे ॐ अघोरेभ्योथ० ॐ भू० अघोरायनमःअघोरं० ॥ पश्चिमे ॐ तत्पुरुषाय० ॐ भू० तत्पुरुषायनमःतत्पुरुषं० ॥ उत्तरे ॐ ईशानःसर्वे० ॐ भू० ईशानायनमःईशानं० नर्यप्रजां० ॐ भूर्भुवःसुवःपंचास्यरुद्रायनमइतिचंदनादिभिःसंपूज्य ॥ कुंभमुखेबिल्वपल्लवनिर्मितंमंडलाकारंकृत्वातदुपरिपूर्णपात्रंनिधायतत्राष्टदलंकृत्वा सुवर्णनिर्मितावरुणविष्णुयक्ष्मप्रतिमाः अश्मन्नूर्जमित्यनुवाकेनसंततधारयाश्युत्तारणप्राणप्रतिष्ठादिनासंस्कृत्य उक्तरीत्यातस्मिन्नुदकसंस्था० ॐ इमंमेवरुण० ॐ भू० वरुणायनमःवरुणंआ० ॥ ॐ इदंविष्णुर्वि० ॐ भू० विष्णवेनमःविष्णुमा० ॥ ॐ अक्षीभ्यांते० ॐ भू० यक्ष्मणेनमःयक्ष्माणंइतिसंस्थाप्यषोडशोपचारैःसंपूज्यऋत्विक्सहाचार्यः कुंभमन्वारभ्यन्यासपूर्वकंरुद्रैकादशिनींरुद्रंवाजपेत् ॥ शतायुधायेतिपंचाज्यानीमंत्रान् ॥ ॐ शतायुधाय० तानिविश्वा १ येचत्वारः० हसर्वे २ ग्रीष्मोहेमंत० येस्याम ३ इदुवत्सराय० स्याम ४ भद्रांनःश्रेयः० स्योनः ५ आशुःशिशानइत्यनुवाकं कृणुष्वपाजइत्यनुवाकं तन्मध्येमदेचिदस्येतिवर्जं दधिक्राव्णइतिसुरभिमतिंआपोहिष्ठेतित्रीन् हिरण्यवर्णाःशुचयइत्यनुवाकं पवमानःसुवर्जनइत्यनुवाकं ऋचांप्राचीमहतीत्यनुवाकंचाभिमृश्यजपेत् ॥ ततोन्वाधानं ॥ समित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा गोमुखप्रसवशांत्याख्येकर्मणियायक्ष्यमाणादेवता० जातवेदसमग्निमिध्मेनेत्यादिसामान्यप्रधानांतमुक्त्वाप्रधानहोमे वरुणंषडृचात्मकवरुणसूक्तेनप्रतिमंत्रमष्टादशावृत्तिभिरष्टोत्तरसंख्याभिराहुतिभिः दधिमध्वाज्यसंसृष्टद्रव्येण विष्णुंषडृचात्मकविष्णुसूक्तेनप्रतिमंत्रमष्टादशावृत्तिभिरष्टोत्तरसंख्याकाभिराहुतिभिःदधिमध्वा० यक्ष्मांषडृचात्मकयक्ष्मसूक्तेनप्रतिमंत्रमष्टादशावृत्तिभिरष्टोत्तरसंख्याकाहुतिभिःदधिमध्वाज्यद्रव्येणयक्ष्ये ॥ अंगहोमेवरुणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्विः० स्विष्टकृद्भ्योमेअग्निꣳस्विष्टकृतंहुतꣳसृष्ण० प्रायश्चित्तहोमआग्नेत्रिः० ॥ ॐ भूर्भुवःसुवःस्वाहा प्रजा० ॥ एषहिदेवःप्र०॥ सामान्यप्रधानांतंहुत्वाअन्यस्मिन्पात्रेदधिमध्वाज्यानिसꣳसृज्यप्रधानहोमंकुर्यात् तत्रवरुणसूक्तं ॥ ॐ अवतेहेडोवरुणनमोभिर वयꣳइभिरीमहेहविर्भिः ॥ क्षयन्नस्मभ्यमसुरप्रचेतोराजन्नेनाꣳसिशिश्रथःकृतानिस्वाहा ॥ १ ॥ उदुत्तमंवरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा ॥ २ ॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरा मसि ॥ अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषःस्वाहा ॥ ३ ॥ कितवासोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्न विद्म ॥ सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासःस्वाहा ॥ ४ ॥ इमंमेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ ५ ॥ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीःस्वाहा ॥ ६ ॥ यथादैवतंत्यागः ॥ अथविष्णुसूक्तं ॥ ॐ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजाꣳसि ॥ योअस्कभायदुत्त रꣳसधस्थंविचक्रमाणस्त्रेधोरुगायःस्वाहा ॥ १ ॥ तदस्यप्रियमभिपाथोअश्यांनरोयत्रदेवयवोमदंति ॥ उरुक्रमस्यसहिबंधुरि त्थाविष्णोःपदेपरमेमध्वउत्सःस्वाहा ॥ २ ॥ प्रतद्विष्णुस्तवतेवीर्यायमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणेष्व धिक्षियंतिभुवनानिविश्वास्वाहा ॥ ३ ॥ परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवंति ॥ उभेतेविद्मरजसीपृथिव्याविष्णो देवत्वंपरमस्यवित्सेस्वाहा ॥ ४ ॥ विचक्रमेपृथिवीमेषएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् ॥ ध्रुवासोअस्यकीरयोजनासउरुक्षितिं सुजनिमाचकारस्वाहा ॥ ५ ॥ त्रिर्देवःपृथिवीमेषएतांविचक्रमेशतर्चसंमहित्वा ॥ प्रविष्णुरस्तुतवसस्तवीयान्त्वेषंह्यस्यस्थविर स्यनामस्वाहा ॥ ६ ॥ यक्ष्मसूक्तं ॥ ॐ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि ॥ यक्ष्मंशीर्ष्ण्यंमस्तिष्काज्जिह्वायाविवृहा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मितेस्वाहा ॥ १ ॥ ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनूक्यात् ॥ यक्ष्मंदोषण्यंमंसाभ्यांबाहुभ्यांविवृहामितेस्वाहा ॥२॥ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि ॥ यक्ष्मंमतस्नाभ्यांयकृःप्लाशिभ्योविवृहामितेस्वाहा ॥ ३ ॥ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंश्रोणिभ्यांभासदाङ्गंसंसोविवृहामितेस्वाहा ॥ ४ ॥ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामितेस्वाहा ॥ ५ ॥ अंगादंगाल्लोम्नोलाम्नोजातंपर्वणिपर्वणि ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदं विवृहामितेस्वाहा ॥ ६ ॥ ततइमंमेवरुणेत्यादिस्विष्टकृतमवदायहव्यवाहमभिमाति०वेमेतिपुरोनुवाक्यामनूच्यस्विष्टमग्नेअ० आयुस्वाहेतियाज्ययाजुहोति ॥ अग्नयेस्विष्टकृतइदं० ॥ ततःशुल्बप्रहरणादिसंस्थाजपांतंसमाप्य ॥ ततःप्रधानकलशोदकंपात्रांतरेगृहीत्वातेनसर्त्विगाचार्यःसपत्नीकंयजमानमभिषिंचेदेभिर्मंत्रैः ॥ आपोहिष्ठेति ३ हिरण्यवर्णाइति ४ पवमानःसुवर्जन इत्यनुवाकेन इमंमेवरुण० १ इदंविष्णु० १ अक्षीभ्यांते०१ देवस्यत्वा० इत्यादिमंत्रैःसपत्नीकंयजमानंशिशुंचाभिषिंचेत् स्थापितदेवतानामुत्तरपूजांकृत्वादेवताविसृज्यआचार्यायदत्वाअग्निपूजांकृत्वा ॥ यजमानःअद्येत्यादिमयाआचार्यादिद्वाराकृतस्य गोप्रसवशांतिकर्मणःसांगतासिद्ध्यर्थंआचार्यायगोप्रदानंब्रह्मणेवृषदानंऋत्विग्भ्योदक्षिणाप्रदानंचकरिष्ये ॥ ब्राह्मणान्संपूज्य नमोस्त्वनंताय० इदंआवाहितदेवतापूजापीठंसोपस्करंआचार्यायतुभ्यमहंसंप्रददेदानसांगतार्थंदक्षिणां० प्रतिगृह्यतां ॥ कर्मणः सांगतासिद्धयेब्राह्मणान्भोजयिष्येतेभ्योभूयसींदक्षिणांदातुमहमुत्सृजे ॥ अनेनगोप्रसवशांत्याख्येनकर्मणाश्रीपरमेश्वरःप्रीयतां ॥ वषट्तेवि० ॥ गच्छगच्छसुरश्रेष्ठ० ॥ इति[illegible]

CC-0. In Public Domain. Funding by MOE-IKS

॥ छ ॥

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १८१ ॥ मूलनक्षत्रशांतिः ॥

श्रीः ॥ अभुक्तमूलोत्पत्तौवर्षाष्टकांतेभुक्तमूलोत्पत्तावव्यवहितागामिमूलर्क्षेएकादशाहेद्वादशाहेवान्यतमेवाशुभदिवसेगोमुख
प्रसवशांतिंविधाययजमानःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्यशिशोः मूलनक्षत्रजन्मसूचितसकलारिष्टनिरसनद्वारा
श्रीपरमेश्वरप्रीत्यर्थंबौधायनोक्तांसग्रहमखांमूलशांतिंकरिष्ये ॥ तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धमाचार्य
र्त्विग्वरणंचकरिष्यइतिसंकल्प्योक्तरीत्याकुर्यात् ॥ वृताचार्यःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यअमुकगोत्रेणामुकशर्मणा
यजमानेनवृतोहंमूलशांतिंकर्तुंआचार्यकर्मकरिष्ये ॥ शरीरशुद्ध्यर्थंपुरुषसूक्तंजप्त्वायदत्रेतिसर्षपान्विकीर्यपंचगव्यशुद्धोदकाभ्यां
भूमिंप्रोक्षेत् ॥ ततोगोमयेनगोचर्ममात्रमुपलिप्यतन्मध्येहस्तमात्रंस्थंडिलंविधाय आचार्यःअद्यपू० मूलशांत्यंगत्वेनस्थंडिलादि
सकलंकर्मकरिष्येइतिसंकल्प्य उद्धननादिभूसंस्कारंविधायतत्रवरदनामानमग्निंप्रतिष्ठाप्यप्रोक्षितैंधनानिनिक्षिप्यवेणुधमन्याप्र
बोध्यध्यायेत् ॥ चत्वारिशृंगा० वरदोभव ॥ स्थंडिलस्यपूर्वभागेवेदिद्वयंप्रकल्प्यतत्रदक्षिणवेद्यांग्रहमखोक्तविधानेनग्रहानावाह्य
संपूज्यतदीशान्यांकलशंसंस्थाप्यपूजयेत् ॥ उत्तरवेद्यांचतुर्विंशतिदलान्वितंसकर्णिकंपंकजंनिर्मायसितासितरक्तपीतरजोभीरं
जितंकृत्वामध्यकर्णिकायांद्रोणपरिमितान्व्रीहीन्तदर्धंतंडुलान्तदर्धंतिलांश्चान्योन्योपरिप्रसार्यचतुरस्रंविधायतत्राव्रणंतंतुवे
ष्टितानंतैजसंकलशंमहीद्यौरित्यादिगोमुखप्रसवशांतिवत्संस्थाप्य॥तद्यथा॥महीद्यौ० ओषधयःसं० आजिघ्र० इमंमे० आपोवा
इद२० उदकेनपूरयेत् ओषध्यादिक्षिपेत् ॥ तस्मिन्कुंभेजलमध्येएवक्रमेणदेवताआवाहयेत् ॥ मध्येसद्योजातंप्र० ॐ सद्योजा
तायनमः सद्योजातंआ० ॥ पूर्वे वामदेवाय० वामदेवंमा० ॥ दक्षिणस्यां अघोरेभ्यो० अघोरायनमःअघोरं० ॥ प्रतीच्यां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्पुरुषाय० तत्पुरुषायनमः तत्पुरुषमा० ॥ उदीच्यां ईशानःसर्व० ईशानायनमःईशानं० ॥ नर्यप्रजां० ॐ भूर्भुवःसुवःपं चास्यरुद्रायनमःइतिमंत्रेणगंधाद्युपचारैःपूजयेत् ॥ कुंभमुखेबिल्वपल्लवनिर्मितंमंडलाकारंकृत्वातत्रपूर्णपात्रंनिधायतस्मिन्सु वर्णनिर्मिताःनिर्ऋतींद्रापांप्रतिमाःअभ्युत्तारणप्राणप्रतिष्ठादिनासंस्कृत्यवक्ष्यमाणमंत्रैरावाहयेत् ॥ ॐ मूलंप्रजांवीरवतीं० इत्यष्टवाक्यात्मकमंत्रेणपूर्णपात्रोपरिमध्येप्रतिमायांनिर्ऋतिमावाहयेत् ॥ तदक्षिणतःइंद्रोज्येष्ठामनु० इत्यष्टौवाक्यात्मकमंत्रे णप्रतिमायांइंद्रमावाहयेत् ॥ तदुत्तरतः यादिव्याआपःपयसा० इत्यष्टौवाक्यात्मकमंत्रेणअपआवाह्य प्रागादिचतुर्विंशतिभूमि स्थदलेषुप्रदक्षिणंप्रतिमास्वक्षतपुंजेषुवाउत्तराषाढाद्यनूराधांतनक्षत्रदेवताः तत्तन्मंत्रेणनाममंत्रेणवाआवाहयेत् ॥ तद्यथा ॥ ॐ विश्वेभ्योदेवेभ्योनमः विश्वान्देवानावाहयामि १ विष्णवे० २ वसुभ्यो० ३ वरुणाय० ४ अजैकपदे० ५ अहयेबुध्नियाय० ६ पूष्णे० ७ अश्विभ्यां० ८ यमाय० ९ अग्नये० १० प्रजापतये० ११ सोमाय० १२ रुद्राय० १३ अदितये० १४ बृहस्पतये० १५ सर्पे भ्यो० १६ पितृभ्यो० १७ अर्यम्णे० १८ भगाय० १९ सवित्रे० २० त्वष्ट्रे० २१ वायवे० २२ इंद्राग्निभ्यां० २३ मित्राय० २४ ॥ ॐ भूर्भुवःसुवःनिर्ऋत्यादिदेवताभ्यइतिषोडशोपचारैःपूजयेत् ॥ तदुत्तरतःशतच्छिद्रकलशंसंस्थाप्यतत्रवरुणमावाह्य नात्रजलपूरणं ॥ न्यासपूर्वकरुद्रैकादशिनीमावर्तनंवाजपेत् ततःसऋत्विगाचार्यःप्रधानकलशमन्वारभ्यवक्ष्यमाणान्मंत्रान्ज पेत् ॥ शतायुधायेतिपंचमंत्राः ५ आशुःशिशानो० अनुवाकं १ कृणुष्वपाजः० अनु० मदेचिदस्येतिवर्जं २ ममाग्नेवर्चो० ३ प्र जापतेरक्ष्यश्वयत्तत्प० ४ पवमानःसुवर्जनः० ५ सर्वेषुवाएषुलोकेषु० ६ एताननुवाकान्जपेत् ॥ हरिंहरंत० शुक्लैरग्निमिंधान०

१ पूर्वोफल्गुन्याभगदेवतात्वादुत्तरायाश्चार्यमदेवत्वाद्वैलक्षण्यंप्रतीयतइतिचेन्नैवंविधेलिंगादत्रयथान्यासएवसाधुः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

माछिदोमृ० मानोमहांतमुत० मानस्तोकेत० प्रजापतेनत्व० स्वस्तिदाविश० त्र्यंबकंयजामहे० अपमृत्युमुपक्षुधं० (ज्येष्ठाशांत्यां विशेषः ॥ येतेसहस्रम०) इतिमंत्रान्जपेत् ॥ प्रजापतेरक्ष्यश्वयत्तत्परापतत्तदश्वोभवयदश्वंयत्तदश्वस्याश्वत्वंतद्देवाअश्वमेधे नैवप्रत्यदधुरेषवैप्रजापतिरसर्वंकरोतियोश्वमेधेनयजतेसर्वएवभवतिसर्वस्यवाएषाप्रायश्चित्तिःसर्वस्यभेषजंसर्ववाएतेनपाप्मानं देवाअतरन्नपिवाएतेनब्रह्महत्यामतरन्तसर्वपाप्मानं ॥ १ ॥ तरतितरतिब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेववदोत्तरंवैतत्प्रजाप तेरक्ष्यंश्वयत्तस्मादश्वस्योत्तरतोवद्यतिदक्षिणतोन्येषांपशूनांवैतसःकटोभवत्यप्सुयोनिर्वाअश्वोप्सुजोवैतसस्स्वएवैनंयोनौप्रतिष्ठा पयतिचतुष्टोमस्तोमोभवतिसरङ्ववाअश्वस्यसक्थ्यावृहत्तद्देवाश्चतुष्टोमेनैवप्रत्यदधुर्यच्चतुष्टोमोभवत्यश्वस्यसर्वत्वाय ॥ २ ॥ सर्व पाप्मानमवृहद्वादशच ॥ ॥ सर्वेषुवाएषुलोकेषुमृत्यवोन्वायत्ताः ॥ तेभ्योयदाहुतीर्नजुहुयात् ॥ लोकेलोकएनंमृत्युर्विंदेत् ॥ मृत्य वेस्वाहामृत्यवेस्वाहेत्यभिपूर्वमाहुतीर्जुहोति ॥ लोकाल्लोकादेवमृत्युमवजयते ॥ नैनंलोकेलोकेमृत्युर्विंदति ॥ यदमुष्मैस्वाहामु ष्मैस्वाहेतिजुह्वत्संचक्षीत ॥ बहुंमृत्युमित्रंकुर्वीत ॥ मृत्यवेस्वाहेत्येकस्माएवैकांजुहुयात् ॥ एकोवाअमुष्मिन्लोकेमृत्युः ॥ १ ॥ अशनयामृत्युरेव ॥ तमेवामुष्मिन्लोकेवयजते ॥ भ्रूणहत्यायैस्वाहेत्यवभृथआहुतिंजुहोति ॥ भ्रूणहत्यामेवावजयते ॥ तदाहुः॥ यद्भ्रूणहत्यापाऽन्याथ ॥ कस्माद्यज्ञेपिक्रियतइति ॥ अमृत्युर्वाअन्योभ्रूणहत्यायाइत्याहुः ॥ भ्रूणहत्यावावमृत्युरिति ॥ यद्भ्रूण हत्यायैस्वाहेत्यवभृथआहुतिंजुहोति ॥ २ ॥ मृत्युमेवाहुत्यातर्पयित्वापरिपाणंकृत्वा ॥ भ्रूणघ्नेभेषजंकरोति ॥ एताश्हवैमुंडि भऔदन्यवः ॥ भ्रूणहत्यायैप्रायश्चित्तिंविदांचकार ॥ योहास्यापिप्रजायांब्राह्मणश्हंति ॥ सर्वस्मैतस्मैभेषजंकरोति ॥ जुंबका यस्वाहेत्यवभृथउत्तमामाहुतिंजुहोति ॥ वरुणोवैजुंबकः ॥ अंततएववरुणमवयजते ॥ खलतेविक्रिधस्यशुक्लस्यपिंगाक्षस्यमूर्ध

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्जुहोति ॥ एतद्वैवरुणस्यरूपं ॥ रूपेणैववरुणमवयजते ॥३॥ लोकेमृत्युर्जुहोतिमूर्धन्जुहोतिद्वेच ॥ मृत्युर्नश्यत्वायुर्वर्धतांभूः स्वाहा ॥ मृत्युर्न०भुवःस्वाहा ॥ मृत्यु०सुवःस्वाहा ॥ मृत्यु०भूर्भुवःसुवःस्वाहा इतिजपेत् ॥ ततआचार्यःअग्नेःपश्चादुपविश्यकृष्णव्रीहितंडुलचरुंतदभावेकृसरंवादेवतात्रयहोमपर्यासंनवग्रहहोयार्थचशालाग्नौपरिकर्मादिनापचेत् ॥ तिलमिश्रौदनःकृसरः ॥ समित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वासग्रहमखमूलशांतिहोमकर्मणियायक्ष्यमाणादेवताइत्यादिसामान्यप्रधानांत मुक्त्वावैशेषिकप्रधानहोमे सवितारं०एताआदि० नवग्रहदेवताअष्टाष्टसंख्याकाभिःअर्कादिजातीययथालाभसमित्कृसराज्याहुतिभिःईश्वरंउमां० एताअधिदेवताःप्रत्यधिदेवताश्चतैरेवद्रव्यैश्चतुश्चतुःसंख्याकाभिराहुतिभिः गणपतिंदु० इंद्रंअग्निं० एताः क्रतुसाद्गुण्यदेवताः दिक्पालदेवताश्चतैरेवद्रव्यैः द्वाभ्यांद्वाभ्यामाहुतिभ्यां निर्ऋतिंइंद्रंअपःअष्टवाक्यात्मकैस्तत्तन्मंत्रैश्चरुणाकृसरान्नेनवाप्रत्येकमष्टोत्तरशतसंख्याभिराहुतिभिःअष्टाविंशतिभिर्वा ॥ देवतात्रयोपहोमान्एकैकयाहुत्याआज्येननवर्चात्मकनिर्ऋतिसूक्तेनप्रतिमंत्रमेकैकयाहुत्याआज्येन द्वादशर्चात्मकइंद्रसूक्तप्रतिमंत्रेणएकैकयाहुत्याआज्येन नवर्चात्मकअप्सूक्तप्रतिमंत्रेणएकैकयाहुत्याआज्येन उत्तराषाढादिअनूराधांतानक्षत्रदेवताःनाममंत्रेणएकैकयाहुत्याआज्येन अंगहोमेवरुणं द्विरित्यादिसामान्यप्रधानांतंहुत्वाअन्वाधानोक्तसंख्ययाग्रहहोमंकुर्यात् ॥ ततःप्रधानहोमःकृसरान्नेनमूलंप्रजामितिपुरोनुवाक्यामनूच्यअहर्नोअद्येतियाज्ययास्वाहाकारांतेनजुहोतितद्यथा ॥ ॐ मूलंप्रजांवीरवतीं० ८ मह्यो३अहर्नोअद्य० मह्य४स्वाहा १०८ वा २८ कृसरान्नेन॥इंद्रोज्येष्ठामनु०रिष्यो३पुरंदरायवृष०८ लोक४स्वाहा१०८ वा २८॥यादिव्याआपः०भवतो३याश्चकूप्याया०८ भवंतुस्वाहा १०८ वा २८॥ उपहोमआज्येन [illegible] प्रजायै०१इंद्रायस्वा०ज्येष्ठायै० ज्यैष्ठ्याय०

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अभिजित्यै० २ अद्भ्यः० अषाढाभ्यः० समुद्रायस्वाहा० कामाय० अभिजित्यै० ३ इतिदेवतात्रयोपहोमः ॥ अथनिर्ऋति सूक्तं ॥ चक्षुषोहेते० कृणुस्वाहा १ योमाचक्षुषा० कृणुस्वाहा २ यत्किंचासौ० हंतुस्वाहा ३ यातुधानानि० करोतिस्वाहा ४ हन्मितेहं० स्यꣳस्वाहा ५ अपनह्यामि० तꣳस्वाहा ६ पुरामुष्यव० तयस्वाहा ७ अंतिदूरेस० महꣳस्वाहा ८ योमानक्कं० मसिस्वाहा ९ ॥ अथेंद्रसूक्तं ॥ तिष्ठाहरीरथ० दायस्वाहा १ कस्यवृषा० धनेस्वाहा २ इंद्रमर्भेह० ऋतुस्वाहा ३ उपनो हरि० अर्कैःस्वाहा ४ व्युस्निधोअस्रो० दयत्स्वाहा ५ भेरेष्विंद्रꣳ० येस्वाहा ६ महिक्षेत्रं० मग्निꣳस्वाहा ७ उरुंनोलोक० हं तास्वाहा ८ आनोविश्वाभि० मिंद्रस्वाहा ९ इंद्रायगावआ० नस्वाहा १० गभस्तयो० महिꣳस्वाहा ११ अस्यस्तो० नुस्वा हा १२ ॥ अप्सूक्तं ॥ हिरण्यवर्णा० तुस्वाहा १ यासाꣳरा० तुस्वाहा २ यासांदेवा०तुस्वाहा ३ शिवेनमा० धत्तस्वाहा ४ आपोभद्रा० गन्तस्वाहा ५ आदित्यश्याम्यु० दावस्वाहा ६ आपोहिष्ठा० सेस्वाहा ७ योवःशिव० रःस्वाहा ८ तस्माअरं ग० नस्वाहा ९ ॥ इतिसूक्तत्रयेणहुत्वा यथादैवतंत्यागःकार्यः॥ ततश्चतुर्विंशतिदेवताभ्योनाममंत्रैर्होमः ॥ विश्वेभ्योदेवेभ्यः स्वाहा० विष्णवे० वसुभ्यः० वरुणाय० अजायैकपदे० अहयेबुध्नियाय० पूष्णे० अश्विभ्यां०यमाय० अग्नये० प्रजापतये० सोमाय० रुद्राय० अदित्यै० बृहस्पतये० सर्पेभ्यः० पितृभ्यः० अर्यम्णे० भगाय० सवित्रे० त्वष्ट्रे० वायवे० इंद्राग्निभ्याꣳ० मित्रायस्वाहा ॥ यथादैवतंत्यागः ॥ ततःइमंमेवरुणेत्यादिस्विष्टकृदंतंहुत्वा शुल्बप्रहरणे० प्रायश्चित्तहोमांतंकृत्वा० सत्यꣳ स्वाहा ॥ विश्वेभ्योदेवेभ्यःस्वाहा ॥ ततोबलीन्द्यात् ॥ यजमानआचम्यप्राणानायम्यअद्यपू० मयाकृतस्यआचार्यादिद्वारारा ग्रहमखमूलजननशांतिकर्मणःसांगतासिद्धये इंद्रादिलोकपालेभ्यआदित्यादिदेवताभ्यः मुख्यदेवताभ्यःक्षेत्रपालायचबलि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रदानमहंकरिष्ये तदंगंबलिपूजनंक० ॥ ॐ त्रातारमिंद्र० भूर्भुवःसुवःइंद्रायनमः सर्वोपचारार्थेगंधाक्षतान्समर्पयामि ॥ इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायेमंसदीपमाषभक्तबलिंसमर्पयामि ॥ भोइंद्रदिशंरक्षबलिंभक्षमम्मसकुटुंबस्यायुःकर्ताक्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्ताआरोग्यकर्तावरदोभवअनेनबलिदानेनेंद्रःप्रीयतां ॥ १ ॥ एवंपूर्वंग्रहयज्ञोक्तप्रकारेणलोकपालेभ्योग्रहेभ्यश्चबलीन्दत्वा मूलंप्रजांवीरवतीं० ८ निर्ऋत्याद्यावाहितदेवताभ्योनमः सर्वोपचारार्थेगंधाक्षतान्समर्प० निर्ऋत्याद्यावाहितदेवताभ्यःसांगाभ्यः० ॥ भोनिर्ऋत्याद्यावाहितदेवताःअमुंबलिंगृह्णीतममसकुटुंबस्यायुःकर्त्र्यः० वरदाभवतअनेननिर्ऋत्याद्यावाहितदेवताःप्रीयंतां० पुनःसंकल्पपूर्वकंक्षेत्रपालायचपूजनपूर्वकंबलिंदत्वा बलौनीतेहस्तौपादौप्रक्षाल्यब्राह्मणैर्दशशांतिंपठेत् ॥ अद्यपूर्वो० मयाकृतस्यआचार्यादिद्वारासग्रह० मूलशांति० सर्वकर्मप्रपूरणींभद्रद्रव्यदांपूर्णाहुतिंहोष्यामि ॥ आज्यंद्वादशवारंगृहीत्वा ॐ सप्ततेअग्नेसमिधः० घृतेनस्वाहा ॥ सप्तवतेग्नयइदं० ॥ पूर्णाहुतिमुत्तमांजुहोति ॥ सर्वंवैपूर्णाहुतिः ॥ सर्वंमेवाप्नोति ॥ अथोइयंवैपूर्णाहुतिः ॥ अस्यामेवप्रतितिष्ठति ॥ पूर्णाहुतिमुत्तमांजुहोति ॥ प्रत्युत्तब्ध्यैसयत्वार्य ॥ वसुभ्योरुद्रेभ्यआदित्येभ्यःस्वाहा ॥ वसुभ्योरुद्रे० ॥ कर्मपरिपूरणार्थंप्रायश्चित्ताहुतिंहुत्वाबर्हिषिपूर्णपात्रंनिनयेत् ॥ सदसि० यज्ञनमस्ते० उपतेनमः ॥ कर्मशेषंसमापयेत् ॥ अद्यपू० स्थापितदेवतानामुत्तरपूजांकरिष्यइतिसं० गंधाद्युपचारैःपूजयेत् ॥ ततःकलशोदकंपात्रांतरेगृहीत्वासार्त्विगाचार्यःशतच्छिद्रकलशेनसकुटुंबंयजमानमभिषिंचेद्वक्ष्यमाणैर्मंत्रैः ॥ तेचमंत्राः ॥ मूलंप्रजांवीर० ८ इंद्रोज्येष्ठाम० ८ यादित्याआप० ८ चक्षुषोहेतेइतिनवर्गिभः(वाक्यानि ३६)

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिष्ठाहरीर० अनुवाकेन ॥ हिरण्यवर्णाःशु० ऋ० १३ शतायुधायेतिपंचमंत्रैः ॥ योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः ॥ प्रशामयतुमूलोत्थंदोषंगंडांतसंभवं १ योसौवज्रधरोदेवोमहेंद्रोगजवाहनः ॥ मूलजातशिशोर्दोषंमातापित्रोर्व्यपोहतु २ योसौ निधिपतिर्देवोखड्गधृग्वाजिवाहनः ॥ प्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः ३ योसौदंडधरोदेवोधर्मोमहिषवाहनः ॥ मूल जातशिशोर्दोषंव्यपोहतुयमोमम ४ योसौशक्तिधरोदेवोहुतभुञ्जेषवाहनः ॥ सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु ५ योसौपा शधरोदेवोवरुणश्चजलेश्वरः ॥ नक्रवाहश्चेकितानोमूलदोषंव्यपोहतु ६ योसौदेवोजगत्प्राणोमारुतोमृगवाहनः ॥ मातापित्रोः शिशोश्चैवमूलदोषंव्यपोहतु ७ योसौपशुपतिर्देवःपिनाकीवृषवाहनः ॥ आश्रेषामूलगंडांतदोषमाशुव्यपोहतु ८ विघ्नेशःक्षे त्रपोदुर्गालोकपालानवग्रहाः ॥ सर्वदोषप्रशमनंशीघ्रंकुर्वंतुशांतिदाः ९ इतिपौराणमंत्रैः ॥ देवस्यत्वास० अश्विनो० पूष्णो हस्ता० अश्विनोर्भै० इत्यादिमंत्रैरभिषिंचेत् ॥ ततोयजमानःस्नात्वाधौतवाससीपरिधायाचम्यविभूतिधारणंकुर्यात् ॥ तिष्ठ तीमे० अग्निंपूजयेत्॥प्रमादात्कुर्व० ॥ अनेनआचार्यादिद्वारामत्कृतेनमूलशांतिहोमाख्येनकर्मणायज्ञभोक्तापरमेश्वरःप्रीयतां॥ पुनरद्येत्यादिमयाकृतस्यसग्रहमखमूलशांत्याख्यस्यकर्मणःसांगतासिद्ध्यातत्संपूर्णफलावाप्त्यर्थंआचार्यायकृष्णधेनुनिष्क्रयद्रव्यं ब्रह्मणेकृष्णानड्वाहनिष्क्रयद्रव्यंरुद्रजापिनेहवनकर्तृभ्यऋत्विग्भ्योयथाशक्तिसुवर्णनिष्क्रयद्रव्यदानंचकरिष्ये ॥ आचार्यादीन्पू जयिष्ये ॥ नमोस्त्वनंतायेतिसंपूज्य ॥ सतिसंभवेदशदानानिदद्यात् ॥ पीठदेवताःयांतुदेवेतिविसृज्यआचार्यायदत्वा आचा र्योंदेवस्यत्वासवितुः० प्रतिगृह्णामि॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणभोजनंनानानामगोत्रेभ्योब्राह्मणेभ्योभूयसी

१ एषक्रमोदिक्क्रमेणायुक्तोभाति ॥ शौनकादिकैस्तुयोसौवज्रध० १ योसौशक्तिधरोदेवोहुतभु० २ योसौदंडधरोदे० ३ योसौखड्गधरोदेवोनिर्ऋ० ४ योसौपाशधरो० ५ योसौदेवोजगत्प्राणो० ६ योसौनिधिपतिर्दे० ७ योसौपशुपतिर्दे० ८ इतिक्रमउक्तः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दक्षिणाप्रदानंचकरिष्ये ॥ नमोस्त्वनंताय० ॥ अनेनसग्रहमखमूलशांत्याख्येनकर्मणा० ॐ तत्सत्० वषट्ते० कर्मातेद्विरा चमनं ॥ तस्मिन्नेवदिनेन्यस्मिन्वाशुभेह्निजातकर्मादिकुर्यात् ॥ इतिसंस्कारनिर्णयेबौधायनोक्तामूलशांतिःसमाप्ता ॥ ॥ छ ॥

॥ १८२ ॥ ज्येष्ठाजननशांतिः ॥

श्रीः ॥ तत्रएतावान्विशेषः ॥ आचमनादिदेशकालोत्कीर्तनांतेममास्यशिशोःज्येष्ठानक्षत्रजननसूचितसकलारिष्टनिरसनद्वारा शुभतासिद्धयेश्रीपरमेश्वरप्रीत्यर्थबौधायनोक्तांसग्रहमखांज्येष्ठाजननशांतिंकरिष्ये ॥ तदंगंगणेशपूजनस्वस्तिवाचनमातृका पूजननांदीश्राद्धाचार्यवरणादि ॥ अस्यांशांतौप्रधानदेवताइंद्रःअधिदेवतामित्रःप्रत्यधिदेवतानिर्ऋतिः ॥ एवंप्रकारेणदेवता स्थापनेहोमेउपहोमेसूक्तोपहोमेअभिषेकेचतत्तन्मंत्राःपठनीयाः ॥ इंद्रोज्येष्ठम० ८ ऋद्ध्यास्महव्यै० ८ ॥ मूलंप्रजांवीर० ८ मित्रदेवतामंत्राः ॥ उपहोमेनक्षत्रदेवताअबादिइंद्राग्निभ्यामित्यंताः (इंद्रायस्वाहा ज्येष्ठायैस्वाहा ज्यैष्ठ्यायस्वाहा) अभिजि त्यैस्वाहा मित्रायस्वाहा अनूराधेभ्यःस्वाहा मित्रधेयायस्वाहा अभिजित्यैस्वाहा (प्रजापतयेस्वाहा मूलायस्वाहा प्रजायै स्वाहा)॥ सूक्तहोमे॥ मित्रोजनान्यातयति० प्रसमित्र० अयंमित्रो० अनमीवासइडया० मित्रंनरꣳशिम्या० महाꣳआदित्यो० जुहोत ॥ अन्यत्सर्वंमूलशांतिवत् ॥ (मित्रोजनान्प्रसमित्र० यज्ञियस्वाहा १ अपिभद्रेसौ० क्ष्यंतस्वाहा २ वयंमित्रस्य० गिरा स्वाहा ३ प्रतिप्रियं० जुष्टꣳस्वाहा ४ अग्नौमित्राय० ऋचानस्वाहा ५ इषांवोढा० देवयंतीस्वाहा ६) देवताहोमअन्यःस्वा हाइंद्राग्निभ्याꣳस्वाहाइतिचतुर्विंशतिनाममंत्रैर्मूलशांतिवज्जुहुयात् ॥ इतिबौधायनोक्ताज्येष्ठाजननशांतिः ॥ ॥ छ ॥

१ अस्मिन्प्रयोगेधनुश्चिह्नांतर्गतोविशेषस्तथामित्रोजनान्प्रसमित्र० यज्ञियस्वाहा १ अपिभद्रेसौ० क्ष्यंतस्वाहा २ वयंमित्रस्य० गिरा स्वाहा ३ प्रतिप्रियं० जुष्टꣳस्वाहा ४ अग्नौमित्राय० ऋचानस्वाहा ५ इषांवोढा० देवयंतीस्वाहा ६ इत्यादिरन्यांशोऽत्रत्यपुस्तके । एतत्सद्भिर्विचारणीयं ।

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १८३ ॥ अथाश्रेषाशांतिः ॥

श्रीः ॥ तत्रसर्पाःप्रधानदेवताअधिदेवताबृहस्पतिः प्रत्यधिदेवतापितरश्च ॥ तेषामष्टवाक्यात्मकमंत्राश्चइदꣳसर्पेभ्यो० मधुम ज्जुहोमीत्यंतंसर्पाणां ॥ बृहस्पतिःप्रथमं० पतयःस्यामेतिबृहस्पतेः ॥ उपहूताःपितरोये० जुषंतामितिपितृणां ॥ बृहस्पतयेस्वा हातिष्यायस्वा० ब्रह्मवर्चसायस्वा० सर्पेभ्यःस्वाहाश्रे० पितृभ्यःस्वाहामघा० इत्युपहोमः ॥ बृहस्पतेजुषस्व० शुषेस्वा० १ एवापित्रे० यीणाꣳस्वा० २ बृहस्पतेअतिय० चित्रꣳस्वा० ३ इतिऋक्त्रयात्मकंबृहस्पतिसूक्तं ॥ नमोअस्तुसर्पेभ्यो० इतिऋ क्त्रयात्मकंसर्पसूक्तं ॥ उशंतस्त्वेतिऋक्त्रयात्मकंपितृसूक्तं ॥ अर्यम्णेस्वाहेत्यादिअदित्यैस्वाहेत्यंतनक्षत्रदेवताहोमइतिविशेषः ॥ अन्यत्सर्वंमूलशांतिवत् ॥ इत्याश्रेषाशांतिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ १८४ ॥ आश्लेषाशांतिः(स्फुटा) ॥

श्रीः ॥ जन्मतएकादशेद्वादशेन्यतमेवाशुभेदिवसेगोमुखप्रसवशांतिंविधाययजमानआचम्यप्राणानायम्यदेशकालौस्मृत्वाम मास्यशिशोःआश्रेषानक्षत्रजन्मसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांबौधायनोक्तांआश्रेषानक्षत्रशांतिं करिष्ये ॥ तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंआचार्यवरणंचकरिष्यइतिसंकल्प्यउक्तरीत्याकुर्यात् ॥ अथा चार्यःअमुकगोत्रेणशर्मणावृतोहंआचार्यकर्मकरिष्येइतिसंकल्प्यशरीरशुद्धयेपुरुषसूक्तंजप्त्वासर्षपान्विकीर्यपंचगव्यशुद्धोदका भ्यांभुवंप्रोक्ष्य ॥ आश्रेषाशांत्यंगंस्थंडिलादिसर्वंकर्मकरिष्ये ॥ गोमयेनोपलिप्यउद्धननादिभूसंस्कारंविधायवरदनामानमग्निंप्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिष्ठाप्यचत्वारिशृंगेतिप्रार्थ्यवरदोभव ॥ स्थंडिलस्यपूर्वभागेग्रहानावाह्यपूजयेत् ॥ ग्रहमंडलस्योत्तरतश्चतुर्विंशतिदलान्वितंपंकजंविलिख्यसितासितरक्तपीतरजोभिःरंजितंकृत्वातदुपरिद्रोणपरिमितान्व्रीहीन्निधायतदुपरिद्रोणार्धपरिमितांस्तंदुलान्निधायतदुपरिद्रोणपापरिमितांस्तिलान्प्रसार्यचतुरस्रंकृत्वातत्रअव्रणंनवंतंतुवेष्टिताननंकलशंमहीद्यौरित्यादिप्रतिष्ठापयेत् ॥ महीद्यौः० ओषधयः० आजिघ्र० इमंमेगंगे० आपोवाइदꣳ० उदकेनपूरयेत् ॥ ओषध्यादिक्षिप्त्वातस्मिन्कुंभेजलमध्यएवक्रमेणदेवताआवाहयेत् ॥ मध्येसद्योजातं० इतिमंत्रेणसद्योजातंआवाहयामि ॥ पूर्वेवामदेवाय० वामदेवं० ॥ दक्षिणे अघोरेभ्यो० अघोरं० ॥ प्रतीच्यांतत्पुरुषाय० तत्पुरुषं० ॥ उदीच्यांईशानःसर्व० ईशानंआवाहयामीत्यावाह्यनर्यप्रजामितिप्रतिष्ठाप्य ॐ भूर्भुवःसुवःपंचास्यरुद्रायनमः इतिगंधाद्युपचारैःपूजयेत् ॥ कुंभमुखेबिल्वपत्राणिनिधायपूर्णादर्वि० इतिपूर्णपात्रंनिधायतत्रसुवर्णादिनिर्मितास्तिस्रःप्रतिमावक्ष्यमाणमंत्रैःप्रतिष्ठाप्य प्रधानदेवतासर्पाः ॐ इदꣳसर्पेभ्यो० मधुमज्जुहोमि ॥ अस्यांप्रतिमायांसर्पेभ्योनमःसर्पानावाहयामि ॥ अधिदेवताबृहस्पतिः ॐ बृहस्पतिःप्रथमं० पतयःस्याम ॥ दक्षिणेबृहस्पतिमावाहयामि ॥ प्रत्यधिदेवतापितरः ॐ उपहूताःपितरोयेमघासु० सुकृतंजुषंतां ॥ पितृभ्योनमः पितॄनावाहयामि ॥ ततःप्रागादिचतुर्विंशतिदलेषुप्रदक्षिणंप्रतिमासुअक्षतपुंजेषुवाअर्यमादिअदित्यंताश्चतुर्विंशतिदेवताआवाहयेत् ॥ ॐ अर्यम्णे[1]० १ भगाय० २ सवित्रे० ३ त्वष्ट्रे० ४ वायवे० ५ इंद्राग्निभ्यां० ६ मित्राय० ७ इंद्राय० ८ निर्ऋतये० ९ अद्भ्यो० १० विश्वेभ्योदेवेभ्यो० ११ विष्णवे० १२ वसुभ्यो० १३ वरुणाय० १४ अजैकपदे० १५ अहयेबुध्नियाय० १६ पूष्णे० १७ अश्विभ्यां० १८ यमाय०

१ अत्रलिखितःक्रमएवसुवचः अर्यमाराजाजरस्तु[illegible]

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

१९ अग्नये० २० प्रजापतये० २१ सोमाय० २२ रुद्राय० २३ अदितये० २४ तत्तन्मंत्रेणनाममंत्रेणवा ॥ सर्पादिदेवता भ्योनमःइतिषोडशोपचारैःपूजयेत् ॥ ततःसर्त्विगाचार्यःकुंभमन्वारभ्यमंत्रान्जपेत् ॥ शतायुधायेतिपंच आशुःशिशान० १ कृणुष्वपाजः० २ मदेचिदस्येतिवर्ज ममाग्नेवर्चो० ३ प्रजापतेरक्ष्य० ४ पवमानःसुव० ५ सर्वेषुवाएषुलोके० ६ एताननुवा क्रान्जपेत् ॥ हरिꣳहरंत० शल्कैरग्नि० माछिदोमृ० मानोमहांत० मानस्तोके० प्रजापतेन० स्वस्तिदावि० त्र्यंबकंयजा० येते सहस्र० इतिमंत्रान्जपेत् ॥ मृत्युर्नꣳयत्वायुर्वर्धतांभूःस्वाहा मृत्युरित्यादिसर्वत्र भुवःस्वाहा सुवःस्वाहा भूर्भुवःसुवःस्वाहा ॥ एकादशावृत्तिभिःसकृद्वारुद्रंजपेत् ॥ ततआचार्योग्नेःपश्चादुपविश्यक्रियमाणेसग्रहमखाश्रेषाशांतिहोमेदेवता० करिष्ये ॥ समित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा सग्रहमखआश्रेषाशांतिहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रही ष्यामि० ॥ वैशेषिकहोमेआदित्यादिनवग्रहदेवताःअष्टाष्टसंख्याकाभिःसमिच्चर्वाज्याहुतिभिः ईश्वराद्याअधिदेवताः प्रत्य धिदेवताश्चतैरेवद्रव्यैश्चतुश्चतुःसंख्याकाहुतिभिः गणपत्यादिदेवतादिक्पालदेवताश्चतैरेवद्रव्यैःद्वाभ्यांद्वाभ्यामाहुतिभ्यां ॥ सर्पान्बृहस्पतिंपितॄन् आवाहनोक्तमंत्रैः कृसरान्नेनप्रत्येकंअष्टोत्तरशतसंख्याकाहुतिभिः देवतात्रयोपहोमेमंत्रोक्तदेवताःएकैक याहुत्याआज्येन ॥ सर्पान्सर्पसूक्तेनप्रत्यृचमेकैकयाहुत्याआज्येन बृहस्पतिंबृहस्पतिसूक्तेनप्रत्यृचमेकैकयाहुत्याआज्येन पितॄन् पितृसूक्तेनप्रत्यृचमेकैकयाहुत्याआज्येन ॥ अर्यमादिअदित्यंतानक्षत्रदेवताः नाममंत्रेणएकैकयाहुत्याआज्येन ॥ अंगहोमेव रुणंद्विरित्यादि ॥ सामान्यप्रधानांतंहुत्वाग्रहहोमंकुर्यात् ततःप्रधानहोमःकृसरान्नेन इदꣳसर्पेभ्यो० मधुमज्जुहोमिस्वाहा १०८ बृहस्पतिःप्रथमं० पतयःस्यामस्वाहा १०८ उपहूताःपितरो० सुकृतंजुषंताꣳस्वाहा १०८ ॥ उपहोमआज्येनैकैकयाहुत्या सर्पे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भ्यःस्वाहा आश्रेषाभ्यः० दंदशूकेभ्यः० बृहस्पतये० तिष्याय० ब्रह्मवर्चसाय० पितृभ्यः० मघाभ्यः० नघाभ्यः० गदाभ्यः० अरुंधतीभ्यः० ॥ आज्येनसूक्तहोमः ॥ सर्पसूक्तं ॥ ॐ भूमिर्भूम्नाद्यौ० उपस्थेतेदे० दधेस्वाहा १ आयंगौःपृ० पितरं० सुवः स्वाहा २ त्रिꣳश्रद्धामवि० प्रत्य० द्युभिःस्वाहा ३ अस्यप्राणाद० व्यख्य० षःसुवःस्वाहा ४ नमोअस्तुसर्पेभ्यः सर्पेभ्योनमः स्वाहा ५ येदोरोचने० सर्पेभ्योनमःस्वाहा ६ याइषवोयातु० सर्पेभ्योनमःस्वाहा ७ इतिसर्पसूक्तं ॥ बृहस्पतिसूक्ते १ आज्येन बृहस्पतिःप्रथमंजायमानः ॥ महोज्योतिषःपरमेव्योमन् ॥ सप्तास्यस्तुविजातोरवेण ॥ विसप्तरश्मिरधमत्तमाꣳसिस्वाहा १ बृहस्पतिःसमजयद्वसूनि ॥ महोव्रजान्गोमतोदेवएषः ॥ अपःसिषासन्त्सुवरप्रतीतः ॥ बृहस्पतिर्हंत्यमित्रमर्कैःस्वाहा २ बृहस्पतेपरिदीयारथेनरक्षोहामित्राꣳअपबाधमानः ॥ प्रभंजन्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यवितारथानाꣳस्वाहा ३ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेमनमसाहविर्भिः ॥ बृहस्पतेसुप्रजावीरवंतोवयꣳस्यामपतयोरयीणाꣳस्वाहा ४ आनोदिवःपर्वतादासरस्वती यजतागंतुयज्ञं ॥ हवंदेवीजुजुषाणाघृताचीशग्मान्नोवाचमुशतीशृणोतुस्वाहा ५ पावीरवीकन्याचित्रायुःसरस्वतीवीरपत्नीधियंधात् ॥ ग्नाभिरच्छिद्रꣳशरणꣳसजोषादुराधर्षंगृणतेशर्मयꣳसत्स्वाहा ६ इतिबृहस्पतिसूक्तं ॥ अथपितृसूक्तं १ आज्येन ॥ ॐ उशंतस्त्वाहवामह० अत्तवेस्वाहा १ आनोअग्नेसुकेतुना ॥ रयिंविश्वायुपोषसं ॥ मार्डीकंधेहिजीवसेस्वाहा २ त्वꣳसोममहेभगं ॥ त्वंयूनऋतायते ॥ दक्षंदधासिजीवसे ॥ रथंयुंजंतेमरुतःशुभेसुभगꣳस्वाहा ३ त्वꣳसोमप्रचिकितोम० तधीराःस्वाहा ४ त्वयाहिनःपितरःसो० भवानःस्वाहा ५ त्वꣳसोमपितृभिःसं० रयीणाꣳस्वाहा ६ बर्हिषदःपितरऊ० दधातस्वाहा ७ आहंपितृन्सुविदत्राꣳगमिष्ठाःस्वाहा ८ उपहूताःपितरःसो० [illegible] ष्वात्ताः पितरए० दधातनस्वाहा १० आग्नि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्वात्तानृतुमतोहवामहे ॥ नराशꣳसेसोमपीथंयदाशुः ॥ तेनोअर्वतःसुहवाभवंतु ॥ शंनोभवंतुद्विपदेचतुष्पदेस्वाहा ११ येअ
ग्निष्वात्तायेनग्निष्वात्ताः ॥ अꣳहोमुचःपितरःसोम्यासः॥ परेवरेमृतासोभवंतः ॥ अधिब्रवंतुतेअवंत्वस्मान्स्वाहा १२ वान्या
यैदुग्धेजुषमाणाःकरंभं ॥ उदीराणाअवरेपरेच ॥ अग्निष्वात्ताऋतुभिःसंविदानाः ॥ इंद्रवंतोहविरिदंजुषंताꣳस्वाहा १३ यदग्ने
कव्यवा० पितृभ्यआस्वाहा १४ त्वमग्नईडितोजातवेदो० हवीꣳषिस्वाहा १५ मातलीकव्यैर्य० मदंतिस्वाहा० १६ येतातृपू
र्देवत्राजेहमानाः ॥ होत्रावृधाःस्तोमतष्टासोअर्कैः ॥ आग्नेयाहिसुविदत्रेभिरर्वाङ् ॥ सत्यैःकव्यैःपितृभिर्घर्मसद्भिःस्वाहा १७
हव्यवाहमजरंपुरुप्रियं ॥ अग्निंघृतेनहविषासपर्यन् ॥ उपासदंकव्यवाहंपितृणां॥ सनःप्रजांवीरवतीꣳसमृण्वतुस्वाहा १८ इति
पितृसूक्तं ॥ ततश्चतुर्विंशतिनक्षत्रदेवतानांनाममंत्रैरेकैकयाहुत्याआज्येन यथालिंगंत्यागः ॥ ॐ अर्यम्णेस्वाहा १ भगाय० २
सवित्रे० ३ त्वष्ट्रे० ४ वायवे० ५ इंद्राग्निभ्यां० ६ मित्राय० ७ इंद्राय० ८ निर्ऋतये० ९ अद्भ्य० १० विश्वेभ्योदेवेभ्य०
११ विष्णवे० १२ वसुभ्यः० १३ वरुणाय० १४ अजैकपदे० १५ अहयेबुध्नियाय० १६ पूष्णे० १७ अश्विभ्यां० १८
यमाय० १९ अग्नये० २० प्रजापतये० २१ सोमाय० २२ रुद्राय० २३ अदित्यै० २४ इतिनक्षत्रहोमः ॥ ततइमंमेव
रुणेत्यादिस्विष्टकृदंतंहुत्वाशुल्बप्रहरणंप्रायश्चित्तांतंकृत्वा ॥ इंद्राग्निदेवताभ्योबलीन्दत्वाक्षेत्रपालायबलिंदद्यात् ॥ पूर्णाहुतिं
हुत्वाकर्मप्रपूरणार्थंप्रायश्चित्ताहुतीर्जुहुयात्॥ वसुभ्योरुद्रे० वसुभ्योरुद्रेभ्यआदित्येभ्यः सꣳस्रावभाग्भ्यइदं॥ ततोबर्हिषिपूर्ण
पात्रंनिनयेत् ॥ यज्ञनमस्तेयज्ञ० कर्मसमापयेत् ॥ स्थापितदेवतानामुत्तरपूजांविधायकलशोदकंपात्रांतरेगृहीत्वायजमाना
याभिषेकःकार्योवक्ष्यमाणमंत्रैः ॥ ॐ इदंꣳसर्पेभ्यो० ८ बृहस्पतिःप्रथमं० ८ उपहूताःपितरो० ८ सर्पसूक्तेनबृहस्पतिसूक्तेन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पितृसूक्तेनशतायुधायेतिपंचमंत्रैः ॥ योसौपशुपतिर्देवःपिनाकीवृषवाहनः ॥ आश्रेषामूलगंडांतदोषमाशुव्यपोहतु ॥ विघ्नेशः क्षेत्रपोदुर्गालोकपालानवग्रहाः ॥ सर्वदोषप्रशमनंशीघ्रंकुर्वंतुशांतिदाः ॥ देवस्यत्वा० आसत्येनेति ९ मंत्रैः समुद्रज्येष्ठाइत्यादिमंत्रैः ॥ अग्निपूजांकृत्वाप्रमादात्० विष्णुंस्मृत्वा ॥ अनेनसग्रहमखाश्रेषाशांतिहोमेनभगवान्यज्ञनारायणःप्रीयतां ॥ यजमानःअद्येत्यादिमयाकृतस्यआचार्यद्वारासग्र० आश्रेषाशांतिकर्मणःसांगतासिद्ध्यर्थं आचार्यायकृष्णधेनुनिष्क्रयद्रव्यंब्रह्मणेकृष्णवृषनिष्क्रयद्रव्यंहवनकर्तृभ्योजपकर्तृभ्यऋत्विग्भ्यः सुवर्णनिष्क्रयद्रव्यदानंआचार्यादीनांपूजन आवाहितदेवतानांपीठदानं पंचाधिकब्राह्मणभोजनंतेभ्योभूयसीदक्षिणादानंचकरिष्ये ॥ नमोस्त्वनंताय पीठदानसांगतार्थमाचार्यायदक्षिणादानं ॥ गच्छगच्छ० ॥ अनेनकर्मणाभगवान्परमेश्वरःप्रीयतांनमम ॐ तत्सद्ब्रह्मार्पणमस्तु वषट्ते० इतिबौधायनोक्ताआश्रेषाशांतिः ॥

॥ १८५ ॥ कृष्णचतुर्दशीजननशांतिः ॥

श्रीः ॥ कर्ताआचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्यशिशोःकृष्णचतुर्दश्याअमुकांशजननसूचितसर्वारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांगर्गोक्तांकृष्णचतुर्दशीजननशांतिंकरिष्ये ॥ तदंगत्वेनगणपतिपूजनंआचार्यर्त्विग्वरणंचकरिष्ये ॥ वृतानांपूजनं ॥ अग्न्युत्तारणं ॥ आचार्यःकर्मकरिष्येइतिसंकल्प्य ॥ यदत्रसंस्थितमित्यादिप्रादेशकरणांते स्थंडिलपूर्वभागेमहीद्यौरित्यादिमंत्रावृत्त्यापदार्थानुसमयेनमध्येशतच्छिद्रं तस्यआग्नेय्यादिविदिक्षुचतुरःकलशांश्चस्थाप्यशतच्छिद्रेस्योनापृथिवीतिसप्तमृदःअश्वत्थेवइतिपंचपल्लवान् बृहस्पतेजुषस्वनइतिपंचरत्नानि रुवतिभीमेतिपंचत्वचः ओषधयःसमितिपंचधान्यानि अग्नेरेतइतिसुवर्णं याऔषधीरिति [illegible] युवासुवासाइतिश्वेतवस्त्रैःश्वेतपुष्पैश्चसंवेष्ट्यपू

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्णादर्वीतिपूर्णपात्रनिधानांतेरुद्रप्रतिमांकर्षतदर्धतदर्धान्यतमपरिमितहेमनिर्मितांवराभयांकितहस्तद्वयांवृषभारूढांस्थापयित्वा ॐ त्र्यंबकंयजामहे० ऋक् १ ॥ शुद्धस्फटिकसंकाशंश्वेतमाल्यांबरावृतंतंध्यात्वा एकादशिन्यभिषेकघटितोपचारैरुद्रंसंपूज्य आग्नेय्यादिचतुर्षुकलशेषुइमंमेगंगेइत्यपःगंधद्वारामितिगंधमोषधयइतियवान् अश्वत्थेवइतिपंचपल्लवान् कांडात्कांडादितिदूर्वाः बृहस्पतेजुषस्वनइतिपंचरत्नानि अग्नेरेतइतिहिरण्यं याःफलिनीरितिफलम् युवासुवासाइतिवस्त्रवेष्टनं पूर्णादर्वीतिपूर्णपात्रनिधानं एतावत्कांडानुसमयेनकृत्वा आग्नेयकुंभेइमंमेवरुणइतिसर्वेसमुद्राइतिचसमुद्रादिसहितंवरुणमावाहयेत्॥ ॐ इमंमेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ ॐ भूर्भुवःस्वःवरुणायनमःवरुणमावाहयामीति समुद्रादिसहितंवरुणंसंपूज्य उत्तरकलशेष्वपिसमुद्रानावाह्यनदीसहितवरुणपूजनेक्रमेणतत्त्वायामित्वंनोअग्नेसत्वंनोअग्नेइत्यादयोमंत्राः ॥ नैर्ऋते ॥ ॐ तत्त्वायामि० ॥ वायव्ये ॥ ॐ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॥ ऐशाने ॥ ॐ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधि ॥ सर्वपूजांतेदेवदानवइतिप्रतिकलशंप्रार्थना ॥ तत्रक्रमेणचतुर्षुकलशेषुसूक्तजपः ॥ ॐ आनोभद्राःक्रतवोयंतु० ऋचः १० ॥ ॐ भद्राअग्नेर्वेध्यश्वस्य० ऋचः १२ ॥ सहस्रशीर्षा० ऋचः १८ ॥ ॐ कद्रुद्रायप्रचेतसे० इतिसूक्तम् ॥ ततोग्निंवेद्यांग्रहांश्चप्रतिष्ठाप्यान्वाधानंकुर्यात् ॥ समित्त्रयमादायश्रद्धएहीत्यादिव्याहृत्यंतेवैशेषिकप्रधानहोमे ॥ आदित्यादिग्रहान्अष्टाष्टसंख्याभिःअर्कादिजातीयसमिदाहुतिभिश्चर्वाहुतिभिराज्याहुतिभिश्च अधिदेवताप्रत्यधिदेवताद्याग्रहपीठदेवता एकैकसंख्याकाभिःसमिच्चर्वाज्याहुतिभिः रुद्रंप्रत्येकमष्टोत्तरशतसंख्याकाभिरश्वत्थप्लक्षपलाशखदिरजातीयसमिदाहुतिभिश्चर्षाहु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिभिराज्याहुतिभिः संमिश्राभिस्तिलमाषसर्षपाहुतिभिश्च अग्निवायुसूर्यप्रजापतीनष्टोत्तरशतसंख्याभिस्तिलाहुतिभिरंगहोमे वरुणंद्विरित्यादिसामान्यप्रधानहोमांते यजमानोयथादैवतंत्यागंकुर्यात् ॥ ततःप्रधानहोमानंतरंप्रायश्चित्तहोमांतेवलिदानंपूर्णा हुतिःप्रणीतानिनयनांतंसंस्थाजपः दंपत्योरभिषेकःधौतवस्त्रचंदनादिधारणंविधिनाऽऽज्यमवलोक्यसदक्षिणंदत्वाकृतंकर्मरुद्रा र्पणंकृत्वा आचार्यायवस्त्रयुग्मसहितोपस्करगोनिष्क्रयदानंऋत्विग्भ्यःहिरण्यनिष्क्रयदानं स्थापितदेवतानांपूजनविसर्जने आ चार्यहस्तेप्रतिपादनंचअग्नेःपूजनविसर्जनेयथाशक्तिब्राह्मणभोजनस्यसंकल्पः ॥ इतिकृष्णचतुर्दशीजननशांतिः ॥ ॥ ७ ॥

॥ १८६ ॥ सिनीवालीकुहूजननशांतिः ॥

श्रीः ॥ कर्ताआचम्यप्राणानायम्यदेशकालौनिर्दिश्यअस्यशिशोःसिनीवालीजननसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्य र्थंसिनीवालीजननशांतिंकरिष्ये ॥ इतिसंकल्प्यगणेशपूजनाद्याचार्यवरणांतंकुर्यात् ॥ कुहूजननेकुहूजननसूचितेत्यूहः ॥ वेध द्वयरहितोदर्शः ॥ ततआचार्यःसर्षपविकिरणादिप्रार्थनांतंकृत्वोक्तप्रतिमानामभ्युत्तारणंकृत्वा स्थंडिलपूर्वभागेविदिक्षुआग्नेयी मारभ्यमहीद्यौरित्यादिमंत्रैःपदार्थानुसमयेनचतुरःकुंभानासाद्यमध्येशतच्छिद्रंसंस्थाप्यचतुर्षुजलसेचनगंधक्षेपांते तत्सवितुरि त्यादिभिःपंचगव्यानिस्योनापृथिवीतिसप्तमृदः बृहस्पतेजुषस्वनइतिपंचरत्नानि रुवतिभीमइतिपंचत्वचः ओषधयःसंवदंतइति सप्तधान्यानिअग्नेरेतइतिहिरण्यंप्रक्षिप्य ॥ पंचस्वपिपूर्णादर्वीतिपूर्णपात्रनिधानांतेमध्यमेयथाशक्तिनिर्मितामुक्तलक्षणांरुद्रप्रति मांनिधाय॥ॐ त्र्यंबकंयजा० ॥ इतिमंत्रेणरुद्रंश्वेतगंधपुष्पादिभिःसंपूज्यतद्दक्षिणतः॥ ॐ यतइंद्रभयामहेततोनोअभयंकृधि॥ मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥ ॐ भूर्भु० इतिइंद्रंसंपूज्य॥ ॐ येचेहपितरोयेचने० ॥ ॐ भूर्भु० इत्युत्तरतः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पितृनावाह्यसंपूज्यचतुर्षुकुंभेषुवरुणंसंपूज्य आनोभद्राइतिपठेद्ऋग्वेदी ॥ यजुर्वेदीनमोवाचइति ॥ गवामंगेष्वितिगांदद्यात् ॥ शरण्यंसर्वलोकानांलज्जायारक्षणंपरं ॥ सुवेषधारिवस्त्रत्वमतःशांतिंप्रयच्छमेइतिवस्त्रम् ॥ हिरण्यगर्भगर्भस्थमितिसुवर्णम् ॥ सर्वभूताश्रयाभूमिर्वराहेणसमुद्धृता ॥ अनंतस्यफलदाअतःशांतिंप्रयच्छमेइतिभूमिं ॥ ततोदशदानानि गोभूतिलहिरण्याज्य वासोधान्यगुडानिच ॥ रौप्यंलवणमित्याहुर्दशदानानिपंडिताः ॥ गांभुवंचोक्तमंत्राभ्यांपुनर्दत्वातिलान्दद्यात् ॥ महर्षेर्गोत्रसं भूताःकश्यपस्यतिलाःस्मृताः ॥ तस्मादेषांप्रदानेनममपापंव्यपोहत्विति ॥ उक्तमंत्रेणपुनर्हिरण्यंदत्वाज्यंदद्यात् ॥ कामधेनु षुसंभूतंसर्वक्रतुषुसंस्थितम् ॥ देवानामाज्यमाहारमतःशांतिंप्रयच्छमे ॥ उक्तमंत्रेणवासःपुनर्दत्वाधान्यंदद्यात् ॥ सर्वदेवमयं धान्यंसर्वोत्पत्तिकरंमहत् ॥ प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमेइति ॥ यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः ॥ सामवेद स्तुवेदानांमहादेवस्तुयोगिनाम् ॥ प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा ॥ तथारसानांप्रवरःसदैवेक्षुरसोमतः ॥ ममतस्मात्प रांशांतिंददस्वगुडसर्वदेतिगुडम् ॥ प्रीतिर्यतःपितृणांचविष्णुशंकरयोःसदा ॥ शिवनेत्रोद्भवंरूप्यमतःशांतिंप्रयच्छमेइतिरू प्यम् ॥ यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना ॥ शंभोःप्रीतिकरंनित्यमतःशांतिंप्रयच्छमेइतिलवणम् ॥ इतिदशदानानि ॥ ततःक्षीरंदद्यात् ॥ क्षीरजातास्तथाशंखाःक्षीरादमृतसंभवः ॥ क्षीरात्क्षीरोदवत्कीर्तिःक्षीरेप्राणस्यसंभवः ॥ तस्मात्क्षीरप्रदानेन ह्यतःशांतिंप्रयच्छमेइति ॥ आज्यगुडावुक्तमंत्राभ्यांपुनर्दत्वाज्यपूर्णेकांस्यपात्रेविधिनासहकुटुंबःप्रतिरूपंवीक्ष्यदद्यात् ॥ आज्यं तेजःसमुद्दिष्टमाज्यंपापहरंस्मृतम् ॥ आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताइति ॥ आचार्योग्निंप्रतिष्ठाप्यग्रहानावाह्यसंपूज्या

१ लक्ष्मींददस्वेतिप्रचुरःपाठः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्वाधानंकुर्यात् ॥ व्याहृत्यंतेवैशेषिकप्रधानहोमे ॥ ग्रहानर्कादिसमिदाज्याहुतिभिःविवक्षितसंख्याभिः ॥ त्र्यंबकंअश्वत्थप्ल
क्षपलाशखदिरसमिदाहुतिभिः प्रत्येकमष्टोत्तरशतसंख्याभिराज्याहुतिभिश्चर्वाहुतिभिः सर्षपतिलमाषाहुतिभिश्चप्रत्येकंताव
तीभिः इंद्रंपितॄंश्चप्रत्येकमष्टाविंशतिसंख्याभिरष्टसंख्याभिर्वोक्तद्रव्याहुतिभिः रुद्रंत्र्यंबकमितिमंत्रेण २८ वा ८ तिलाहुतिभिः
प्रजापतिं २८ वा ८ अंगहोमेवरुणंद्विरित्यादियथान्वाधानंत्यागेकृतेसꣳस्रावहोमांतेबलिदानम् ॥ मूर्धानमितिपूर्णाहुतिश्च ॥
ततोग्रहकुंभसहितचतुःकुंभजलयुतशतच्छिद्रेणमातृपितृशिशूनामभिषेकः ॥ ॐ तत्त्वायामि० ॥ इत्यभिषिच्य ॥ ततोविभू
तिधारणांतेषोडशोपचारैरुद्रस्येतरेषांपंचोपचारैःपूजनम् ततोविसृज्यताःप्रतिमाआचार्यहस्तेप्रतिपाद्याऽग्निंसंपूज्यविसृज्ययथा
शक्तिद्विजानुज्ञयाब्राह्मणानन्यांश्चांधपंग्वादीन्भोजयेदिति ॥ इतिसिनीवालीकुहूजननशांतिः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १८७ ॥ दर्शजननशांतिः ॥

श्रीः ॥ कर्ताकृतनित्यक्रियःपवित्रपाणिःसपत्नीकःस्वासनेउपविश्यदेशकालसंकीर्तनांते अस्यबालस्यदर्शजननसूचितसर्वारिष्ट
निरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंदर्शजननशांतिंकरिष्ये ॥ (अखंडाऽमाजननेइत्थंसंकल्पः ॥ अमायाःखंडतिथित्वेउत्तरविद्धा
माजननेकुहूजननशांतिंकरिष्येइतिसंकल्पेविशेषः) ॥ ततोगणेशपूजनपुण्याहवाचनाचार्यर्त्विग्वरणाचार्यादिपूजनानिकुर्यात् ॥
ततआचार्योयदत्रसंस्थितमित्यादिस्वस्त्ययनंताक्ष्यमितिप्रार्थनांतंकुर्यात् ॥ ततःकुंडात्स्थंडिलाद्वापूर्वेसर्वतोभद्रपर्यासंस्थलम
तिक्रम्यमहीद्यौरित्यादिनाकुंभस्थापनादिजलसेचनांतंकृत्वा तत्रआप्यायस्वेत्यादिमंत्रैःक्षीरदधिघृतानिप्रक्षिप्य गायत्र्यागंधद्वा
रामितिचगोमूत्रगोमयेप्रक्षिप्य न्यग्रोधोदुंबराश्वत्थचूतनिंबमूलानांत्वचोरुवतिभीमइति तत्पलवानश्वत्थेवइति बृहस्पतेजुष

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वनइतिनिक्षिप्य युवासुवासाइतिवस्त्रयुग्मनावेष्ट्य ॥ सर्वसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुयजमानस्यदुरितक्ष
यकारकाः ॥ इतिसमुद्रादिदेवतासहितंवरुणमावाह्यसंपूज्यकलशोदकं आपोहिष्ठेतितृचेनकयानश्चित्रइत्यृचायत्किंचेदमिति
समुद्रज्येष्ठाइतिऋग्भ्यांअभिमंत्र्य ॥ तत्पश्चिमेअग्नेःपूर्वभागेकृष्णनीलरक्तादिवर्णतंडुलैःयथोचितंपूरितंश्रृंखलावलीभद्रादिग
र्भंसर्वतोभद्रंअग्रेनिर्दिश्यमानत्रतोद्यापनोक्तरीत्याकृत्वा तत्रब्रह्मादिप्रसिद्धदेवतापूजांतेमध्येसुवर्णप्रतिमायांपितॄनावाहयेत् ॥
ॐ येचेहपितरो० १ ॥ दक्षिणतः रजतप्रतिमायांसोमम् ॥ उत्तरतःताम्रप्रतिमायांसूर्यंचावाहयेत् ॥ ॐ आप्यायस्व०
ऋक् १ ॥ ॐ सविताप्रश्चातात्० ऋक् १ ॥ ततोदेवतात्रयंसंपूज्याऽग्निंप्रतिष्ठाप्यसर्वतोभद्रस्यैशान्यांग्रहप्रतिष्ठापनादिवरुण
पूजांतंकृत्वाऽन्वादध्यात् ॥ व्याहृत्यंतेआदित्यादिग्रहान्चिकीर्षितसंख्याभिःसमिच्चर्वाज्याहुतिभिः पितृनष्टाविंशतिसंख्याका
भिःसमिच्चर्वाज्याहुतिभिः सोमंसूर्यंचप्रत्येकंअष्टोत्तरशतसंख्याकाभिस्तदाहुतिभिः अंगहोमेवरुणंद्विरित्यादि ॥ ततःआज्येन
सहचरोःपर्यग्निकरणादिकालेकुर्यात् ॥ व्याहृतिहोमांतेआयुरारोग्यमितिमंत्राभ्यांयजमानेननहोमसंकल्पपूर्वकंत्यागेकृतेसर्त्विगा
चार्यःप्रधानहोमंकुर्यात् ॥ तदंतेस्विष्टकृतःपूर्वंहिरण्यवर्णामितिआयुष्यंवर्चस्यमितिसूक्ताभ्यांसमुद्रज्येष्ठाइत्यृचाचसबालौपित
रावभिषिच्यस्विष्टकृदादिकुर्यात् ॥ ततोबलिदानपूर्णाहुतीकृत्वाहोमशेषंसमापयेत् ॥ ततोयजमानःहिरण्यरजतेसदक्षिणांकृ
ष्णांधेनुंचआचार्यायदत्वाऋत्विग्भ्यश्चयथाशक्तिदक्षिणांदत्वास्थापितदेवतोत्तरपूजाविसर्जनेकृत्वाप्रतिमांआचार्यायप्रतिपाद्य
अग्निंसंपूज्यविसृज्यशांतीःपाठयित्वाब्राह्मणान्भोजयित्वातेभ्योदक्षिणादानांतेस्वस्तिभवंतोब्रुवंत्वितिवाचयेत् ॥ तेचस्वस्ती० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १८८ ॥ व्यतीपातसंक्रमणजननशांतिः ॥

श्रीः ॥ गोमुखप्रसवमुक्तविधिनाकृत्वादेशकालौसंकीर्त्याऽस्यशिशोर्व्यतीपातजन्मसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंव्यतीपातशांतिंकरिष्यइतिसंकल्प्य ॥ गणेशपूजनाद्युक्तलक्षणाचार्यवरणंकुर्यात् ॥ वृतायतस्मैपट्टवस्त्रयुगंकुंडलयुगमंगुलीयकंचदद्यात् ॥ आचार्योयदत्रसंस्थितमितिसर्षपविकिरणंशुचीवइतिपंचगव्येनआपोहिष्ठेत्यद्भिश्चगृहपूर्वदिग्भागंप्रोक्ष्यभद्रंकर्णेस्वस्तिनइतिमंत्राभ्यांप्रार्थ्य तत्रैवगोमयलिप्तेरंगवल्लयाद्यलंकृतेसमदेशेमहीद्यौरितिभुवमभिमृश्य ओषधयःसमितिपंचद्रोणपरिमितव्रीहिराशिंकृत्वातदुपरिसार्धद्रोणद्वयमिततंडुलराशिं तदुपरिसपादद्रोणमितातिलराशिंचकृत्वोपरिभागंसमंकृत्वातत्राऽष्टदलंकृत्वाआजिघ्रकलशमितितत्राऽव्रणंकुंभंप्रतिष्ठाप्य ॥ इमंमेगंगेइतितीर्थोदकेनापूर्य स्योनापृथिवीतिसप्तमृदः याओषधीरितिसर्वौषधीरश्वत्थेवइतिपंचपल्लवान् गायत्र्यागंधद्वारामाप्यायस्वदधिक्राव्णःशुक्रमसीतिपंचगव्यानि गंधद्वारामितिगंधंबृहस्पतेजुषस्वनइतिपंचरत्नानितत्रनिक्षिप्य वस्त्रयुग्मेनावेष्टयतदुपरिसूक्ष्मवस्त्रयुतंपूर्णपात्रंपूर्णादर्वीतिनिधायतदुपरिनिष्कतदर्धतदर्धान्यतममानेनहेमनिर्मितांसूर्यप्रतिमांनिधायतत्रसूर्यमावाहनाद्युपचारैःपूजयेत् ॥ ॐ भूर्भुवःसुवः उत्सूर्योबृहद्र्चो० ऋक् १ ॥ तदक्षिणतोग्निमावाहयेत् ॥ ॐ भूर्भुवःसुवः अग्निंदूतं० ऋक् १ ॥ उत्तरतोरुद्रमावाहयेत् ॥ ॐ भूर्भुवःसुवः त्र्यंबकंयजामहे० ऋक् १ ॥ एवमेवसंक्रांतिशांतौसंक्रांतिशांतिंकरिष्यइतिसंकल्पेविशेषः ॥ व्यतीपातसंक्रमणयोर्जन्मनितुव्यतीपातसंक्रांतिशांतीतंत्रेणकरिष्येइतिसंकल्पः ॥ तिस्रोदेवताःषोडशोपचारैःवस्त्रयुग्मसहितैःपंचोपचारैर्वासंपूज्यगंधपुष्पाद्यर्चितेफलनैवेद्यंसमर्प्यप्रधानप्रतिमांस्पृशन्सर्वसौरमंत्रान्जपेत् ॥ ततोरुद्रप्रतिमांस्पृशन्मृत्युंजयमंत्रमष्टोत्तरसहस्रमष्टोत्तरशतमष्टा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विंशतिवारंवाजपेत् ॥ ततश्चत्वारऋत्विजश्चतुर्दिक्षुकुंभंस्पृष्ट्वाक्रमेणसूक्तानिजपेयुः ॥ पूर्वस्याम् ॥ ॐ आनोभद्राः० ऋचः१० दक्षिणस्याम् ॥ ॐ भद्राअग्नेर्वेध्यश्वस्य० ऋचः १२ ॥ प्रतीच्यां ॥ ॐ सहस्रशीर्षा० ऋचः १८ ॥ उत्तरस्याम् ॥ ॐ त्र्यंबकं यजा० १ ॥ अथकुंभपश्चिमदेशेस्थंडिलेऽग्निंस्वगृह्योक्तविधिनाप्रतिष्ठाप्यकुंभस्योत्तरतोग्रहाणामावाहनादिपूजांकृत्वातदीशान्यांकलशस्थापनंकृत्वाऽग्नेःपश्चिमतउपविश्यान्वादध्यात् ॥ व्याहृत्यंतेवैशेषिकप्रधानहोमे आदित्यादिग्रहांश्चिकीर्षितसंख्याकाभिःअर्कादिजातीयसमिच्चर्वाज्याहुतिभिः ॥ ग्रहपीठदेवताअमुकसंख्याभिःसमिच्चर्वाज्याहुतिभिः ॥ सूर्यप्रत्येकमष्टोत्तरशतसंख्याभिःसमिच्चर्वाज्याहुतिभिः ॥ अग्निंरुद्रंचप्रत्येकमष्टाविंशतिसंख्याभिस्तदाहुतिभिः ॥ मृत्युंजयंअष्टोत्तरशतसंख्याभिस्तिलाहुतिभिः ॥ अंगहोमेवरुणंद्विरित्यादि० प्रायश्चित्ताहुत्यंतेबलिदानं ततःपूर्णाहुतिःप्रणीताविमोकःसंस्थाजपेनोपस्थानंच ॥ ततोधृतनूतनवस्त्रयोर्दंपत्योःसबालयोरभिषेकः ॥ तत्रसमुद्रज्येष्ठा० ४ आपोहिष्ठा ३ अक्षीभ्यांते० ६ स्वादिष्ठयेति १० ॐ उत्सूर्यो० १ अग्निंदूतं० १ त्र्यंबकं० १ ॥ सुरास्त्वामभिषिंचंत्वित्यादिपौराणमंत्रैश्चाभिषेकांतेऽभिषेकवासआचार्यायसमर्पयेत् ॥ सपत्नीकःश्वेतवस्त्रचंदनादिधृत्वाभूषणमालादिनालंकृत्यआज्यमवेक्ष्यतत्पात्रंसदक्षिणंब्राह्मणायदत्वा वस्त्रहेमांगुलीयकैःआचार्यंसंपूज्यव्यतीपातजननदोषशांत्यर्थंगोवस्त्रस्वर्णानितुभ्यंसंप्रददेइतिआचार्यायतानिदत्वातदर्थंप्रच्छादनपटंतथैवदद्यात् ॥ ऋत्विग्भ्योयथाशक्तिदक्षिणांदत्वादीनांधकृपणेभ्योभूयसींदत्वाशतंब्राह्मणान्ऋत्विग्भिःसहमिष्टान्नैर्भोजयित्वाकर्मेश्वरार्पणंकृत्वाबंधुभिःसहभुंजीत ॥ इतिव्यतीपातसंक्रांतिशांतिः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १८९ ॥ वैधृतिजननशांतिः ॥

श्रीः ॥ वैधृतिशांतौतुसंकल्पेवैधृतेरुल्लेखः ॥ आवाहनेमध्येसव्याहृतिकेनत्र्यंबकमितिमंत्रेणरुद्रमावाह्यदक्षिणेउत्सूर्योबृहदर्चींषी तिसूर्यंउत्तरतश्चाप्यायस्वेतिसोममावाह्यपूजनम् ॥ रुद्रप्रतिमांस्पृष्ट्वामृत्युंजयमंत्रमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिवारंवा जपः ॥ सूर्यप्रतिमांस्पृष्ट्वासर्वसौरजपः ॥ सोमप्रतिमांस्पृष्टाआप्यायस्वेतिजपः ॥ अन्वाधानेरुद्रंसमिच्चर्वाज्यैःप्रत्येकमष्टोत्तर शतसंख्याहुतिभिः ॥ सूर्यसोमौप्रत्येकमष्टाविंशतिसंख्याभिस्तदाहुतिभिः ॥ मृत्युंजयमष्टोत्तरसहस्रशतविंशत्यन्यतमसंख्याभि स्तिलाहुतिभिः ॥ अंगहोमेवरुणंद्विरित्यादितथैवहोमःकार्यइतिविशेषः ॥ अंतेकर्मेश्वरार्पणंकुर्यात् ॥ इतिवैधृतिशांतिः ॥ ॥

॥ १९० ॥ भद्राजननशांतिः ॥

श्रीः ॥ कर्ताउक्तकालेगोमुखप्रसवंकृत्वादेशकालौसंकीर्त्यअस्यशिशोःभद्राजननसूचितसकलारिष्टपरिहारद्वारा० सग्रहमखांग र्गोक्तांशांतिंक० इतिसंकल्प्यगणेशपूजनपुण्याहवाचनांतेआचार्यादीन्वृणुयात् ॥ ततआचार्यःप्रादेशकरणांतेगृहस्यपूर्वभागेस्थं डिलात्प्राच्यांमहीद्यौरित्यादिमंत्रावृत्त्यामध्येएकंपूर्वादिदिक्षुचतुरइत्येवंपंचकुंभान्संस्थाप्य तत्रजलपूरणादिपूर्णपात्रनिधानांते प्रतिमासुदेवताआवाहयेत् ॥ मध्यकुंभे ॐ भ॒द्राअ॒ग्नेर्व॑ध्र्य॒श्वस्य॑सं॒दृशो॑वा॒मीप्रणी॑तिःसु॒रणा॒उपे॑तयः ॥ यदीं॑सुमि॒त्राविशो॒अग्र॑इं॒ध ते॑घृ॒तेनाहु॑तोजरते॒दवि॑द्युतत् ॥ इतिभद्रां ॥ पूर्वेआसत्येनरजसा० इतिसूर्यं ॥ दक्षिणे कद्रुद्रायेतिरुद्रं ॥ पश्चिमे गणानांत्वेतिगणप तिं ॥ उत्तरे ॐ तत्पुरु॑षायवि॒द्महे॑चक्रतुं॒डाय॑धीमहि ॥ तन्नो॑नंदिःप्रचो॒दया॑त् ॥ इतिऋषभंचावाह्यसर्वान्संपूज्यपुष्पमालादि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भिःकलशान्भूषयित्वाग्निंग्रहांश्चप्रतिष्ठाप्यान्वाधाद्ध्यात् ॥ ग्रहोत्कीर्तनांते भद्रो सूर्य रुद्रं गणपतिं ऋषभं चैताःप्रधानदेवताःस
मिच्चर्वाज्यतिलैःप्रत्येकंप्रतिद्रव्यंअष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशतिसंख्याकाभिर्वाहुतिभिःअंगहोमेवरुणंद्विरित्यादिप्रायश्चि
त्तहोमांतेबलिदानंपूर्णाहुतिंचकृत्वासस्रावहोमादिशेषंसमाप्य धृतनववस्त्रंपत्नीशिशुसहितंयजमानं समुद्रज्येष्ठाइत्यादिवारु
णैर्ग्रहादिमंत्रैश्चाभिषिंचेत् ॥ ततोयजमानोधृतनवशुक्लांबरोभिषेकवस्त्रमाचार्यायदत्वाविभूतिंधृत्वोत्तरपूजांकृत्वाचार्यसंपूज्य
तस्मैगांपीठंचदत्वानिरीक्षिताज्यंदत्वाब्राह्मणभोजनंसंकल्प्यभूयसींदत्वाशिषोगृहीत्याकर्मसमापयेत् ॥ इतिभद्राजननशांतिः ॥

॥ १९१ ॥ अधोमुखजननशांतिः ॥

श्रीः ॥ जन्मतोद्वादशाहेजन्मनक्षत्रेन्यस्मिन्वाशुभदिनेकर्तागोमुखप्रसवंकृत्वादेशकालौसंकीर्त्य अस्यशिशोःअधोमुखजननसू
चितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वर० सग्रहांबृहच्छौनकोक्तांशांतिंकरिष्यइतिसंकल्प्यगणेशपूजादिऋत्विग्वरणांतंकुर्यात् ॥
अत्रऋत्विजश्चत्वारः ॥ ततोगृहस्यैशानभागेस्थंडिलंकृत्वाआचार्यःप्रादेशांतेतत्पूर्वभागेमहीद्यौरित्यादिस्थापितकलशेपूर्णपात्रे
सुवर्णप्रतिमायां त्र्यंबकं इतिरुद्रमावाह्यवस्त्रादिभिःसंपूज्याग्निंग्रहांश्चप्रतिष्ठापयेत् ॥ ततएकऋत्विक्रुद्रकुंभंस्पृष्ट्वाएकादशवारं
रुद्रंजपेत् ॥ ततआचार्योन्वाधानेग्रहोत्कीर्तनांते ॥ रुद्रंप्रधानंसमिदाज्यतिलचरुभिःप्रतिद्रव्यंअष्टोत्तरसहस्राहुतिभिः १०८।
२८ वाअंगहोमेवरुणंद्विरित्यादिप्रणीताप्रणयनांतेतूष्णींनिर्वापप्रोक्षणेकृत्वाचरुंश्रपयित्वाज्यसंस्कारादिग्रहहोमांतेउक्तमंत्रेणप्र
धानहोमंकृत्वाइमंमेवरुणेत्यादिबलिपूर्णाहुतिसस्रावादिशेषंसमापयेत् ॥ अथमाताबालंकार्पासराशौनिधायपराङ्मुखीभवेत् ॥
विप्रास्तंगृहीत्वास्वाभिमुख्यैमात्रेदद्युः ॥ तत्रमंत्रः ॥ बालेऽस्माभिरयंबालोयुष्मद्दत्तःप्रगृह्यच ॥ दीर्घायुरपिबालोयंपूर्ववत्कुल

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वर्धनः ॥ ततोयजमानंपत्नीशिशुसहितंकलशोदकेनसमुद्रज्येष्ठाइत्यादिभिरभिषिंचेत् ॥ ततोयजमानोग्निंसंपूज्यविभूतिंधृत्वोत्तर पूजांविधायाचार्यादिभ्योयथाशक्तिदक्षिणांदत्वापीठंदत्वाब्राह्मणभोजनंसंकल्प्यभूयसींदत्वाशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यात् ॥

॥ १९२ ॥ एकनक्षत्रजननशांतिः ॥

श्रीः ॥ जनकनक्षत्रोत्पत्तौउक्तसमयेगोमुखप्रसवंकृत्वाएकोदरनक्षत्रोत्पत्तौतमकृत्वादेशकालौसंकीर्त्य ॥ अस्यशिशोःपित्रेक नक्षत्रोत्पत्तिसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंशांतिमभिषेकंपूजितनक्षत्रप्रतिमाग्रेयथाशक्तिदानंचकरिष्येइतिसं कल्प्य ॥ गणपतिंसंपूज्यआचार्यंचतुरऋत्विजश्चवृत्वापुण्याहंवाचयीत ॥(मात्रेकनक्षत्रेत्याद्यूहेनान्यत्रसंकल्पः)॥ ततआचार्यो यदत्रसंस्थितमितिसर्षपविकिरणप्रोक्षणप्रार्थनादिकृत्वास्थंडिलादैशान्यांकलशंमहीद्यौरित्यादिनास्थाप्य ॥ तत्ररक्तवस्त्राच्छादि तेनक्षत्रतद्देवतान्यतरप्रतिमांकृताद्युत्तारणांमंत्रेणावाहानाद्युपचारैःपूजयेत् ॥ वस्त्रार्पणेतद्युग्ममर्पयेत् ॥ पूजांतेऽग्निंव्याहृति भिःप्रतिष्ठाप्यान्वाधानेव्याहृत्यंतेअदोनक्षत्रमिमांदेवतांवा प्रत्येकमष्टोत्तरशतसंख्याभिःसमिच्चर्वाज्याहुतिभिःअंगहोमेवरुणं द्विरित्यादिप्रायश्चित्तहोमांतंप्रणीताविमोकादि ॥ आचार्यःकलशोदकेनययोरेकनक्षत्रजन्मतयोरभिषेकंकुर्यात् ॥ ततःपूजि तप्रतिमाग्रेआचार्यायवस्त्रालंकारगाःदद्यात् ॥ ज्योतिर्निबंधोक्त्यास्वर्णरूप्यमयौहरिहरौसंपूज्यतौवादद्यात् ॥ विविधस्यास्य विश्वस्यपितरौविश्वतोमुखौ ॥ प्रीयेतांमूर्तिदानेनदेवौहरिहरावुभाविति ॥ मापत्रयसुवर्णमृत्विग्भ्योदत्वाउत्तरपूजाविसर्जने आचार्यहस्तेप्रतिमाप्रतिपादनंधान्यवस्त्रादिभिःसहयानशय्यासनादीनांब्राह्मणांतरेभ्योदानंकृत्वातैःसहाचार्यऋत्विजोभोजयि त्वापूर्णतांवाचयित्वातेभ्यःशुभाआशिषःप्रतिगृह्यकर्मेश्वरार्पणंकुर्यादिति ॥ इत्येकनक्षत्रजननशांतिः ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ १९३ ॥ ग्रहणजननशांतिः ॥

श्रीः ॥ सूर्यग्रहणेप्रसूतौतत्कालस्थितनक्षत्रस्ययाधिष्ठात्र्यग्न्यादिदेवतातस्याःसूर्यस्यचयथाशक्तिहेम्नाप्रतिमेविधायराहोःसीसेन नागाकृतिंकृत्वाऽऽशौचांतेगोमुखप्रसवंकृत्वा ममभार्यायाःसूर्यग्रहणकालीनप्रसूतिसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांशांतिंकरिष्येइतिसंकल्प्य ॥ गणेशपूजनाद्याचार्यवरणपूजांतंकुर्यात् ॥ चंद्रग्रहेतुसूर्यस्थानेराजतंचंद्रबिंबंकुर्यात् ॥ अन्यद्वयंपूर्ववत् ॥ संकल्पेसूर्यस्थानेचंद्रपदप्रयोगः ॥ ततआचार्योयदत्रेत्याद्यंतेशुचिदेशंगोमयेनोपलिप्य तत्रनवंसदशंक्षालितंश्वेतवस्त्रंप्रसार्यतत्रोक्तदेवतानांरूपत्रयंनिधाय ॥ ॐ आस॒त्येन॒रज॑सा० ॥ मध्येसूर्यरक्तवर्णैर्वस्त्रगंधाक्षतपुष्पैर्धूपदीपादिभिश्चपूजयेत् ॥ तद्दक्षिणतोराहुंकृष्णवर्णैर्गंधादिभिर्धूपादिभिश्चपूजयेत् ॥ ॐ स्व॑र्भा॒नोरध॒यदि॑द्र॒माया॒अवो॑दि॒वोवर्त॑मानाऽअवा॑हन् ॥ गू॒ळ्हंसूर्य॑तम॒सापव्र॑तेनतु॒रीये॑ण॒ब्रह्म॑णाविन्द॒दत्रिः ॥ नक्षत्रदेवतामग्निर्नःपातुकृत्तिकाइतिवाक्याष्टकेनपूजयेत् सूर्यस्योत्तरतः ॥ चंद्रग्रहेतुमध्येचंद्रपूजनम् ॥ ॐ आप्या॑यस्व॒० ॥ इतिमंत्रेणश्वेतगंधादिभिर्धूपादिभिश्चेतिविशेषः ॥ अन्यदेवतयोःपूजनंपूर्ववत् ॥ ततोऽग्निस्थापनंग्रहपूजाकलशस्थापनांतंकृत्वाऽन्वाधानंकुर्यात् ॥ व्याहृत्यंतेग्रहान्वाधानंकृत्वा सवितारंअर्कसमिदाज्यचरुतिलैःप्रत्येकमष्टोत्तरशताहुतिभिः ॥ स्वर्भानुंदूर्वासहिताज्यादीनांतावतीभिराहुतिभिः ॥ नक्षत्रदेवतामग्निंपलाशवृक्षसमित्सहिताज्यादीनांतावतीभिराहुतिभिः ॥ अंगहोमेवरुणंद्विरित्यादि ॥ चंद्रग्रहेअर्कस्थानेचंद्रस्यार्कसमित्स्थानेपालाशसमिधांचनिर्देशः ॥ गृहसिद्धान्नस्यपर्यग्निकरणादि ॥ यथान्वाधानंत्यागः ॥ प्रायश्चित्तांतेबलिपूर्णाहुतीसंस्थाजपांतेपंचगव्यपंचरत्नपंचत्वक्पंचपल्लवैरोषधिकल्कैश्चमिश्रितलौकिकजलैर्ग्रहकलशोदकैश्चसहितैरभिषेकः ॥ आपोहिष्ठेतितृचं॥ इमं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मेगंगइत्येकां ॥ पितरःपितामहाःपरेवरेइतिच ॥ तत्त्वायामिऋक् १ ॥ अभिषेकांतेआचार्यसंपूज्यतस्मैप्रतिमात्रयंदक्षिणांच दद्यात् ॥ ततोग्रहाणांपूजनविसर्जनेप्रतिमाप्रतिपादनंब्राह्मणभोजनसंकल्पश्चेति ॥ इतिग्रहणजननशांतिः ॥ ॥ ७ ॥

॥ १९४ ॥ नक्षत्रगंडांतशांतिः ॥

श्रीः ॥ षण्मासोत्तरंद्वादशेवाहनिप्रथमतोगोप्रसवंकृत्वा ॥ देशकालौसंकीर्त्यममाऽस्यशिशोःरेवत्यश्विनीसंध्यात्मकगंडांतजननसूचितसर्वारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थंनक्षत्रगंडांतशांतिंकरिष्येइतिसंकल्प्य ॥ गणेशपूजनादियजुर्वेदविदैवज्ञाचार्यर्त्विग्वरणांतंकुर्यात् ॥ ततस्तांश्चंदनशुक्लमाल्यैःक्षौमशुक्लवासोभ्यांपूजयेत् ॥ ततआचार्योनिर्मितस्यापिनिमित्तानुसारिपरिमाणकांस्यपात्रस्यपुनर्निर्माणमाप्यायस्वेतिमंत्रेणकुर्याच्चंद्रप्रतिमाद्युत्तारणंच ॥ ततोयदत्रेतिसर्षपविकिरणादिनाभूसंस्कारंकृत्वा उपलिप्तेदेशेकांस्यपात्रेपायसंपयोवानिक्षिप्य तत्रनवनीतपूर्णशंखंनिधायतत्रराजतंचंद्रबिंबंस्थापयित्वा सोमोहमितिध्यानपूर्वकं समाहितचेताआप्यायस्वेतिमंत्रेणावाहनादिषोडशोपचारैस्तत्रचंद्रपूजनंकुर्यात् ॥ तत्रश्वेतंसदशंवस्त्रद्वयंसमर्पणीयं पुष्पाणि श्वेतानिसहस्रमर्पणीयानि मौक्तिकंदक्षिणातदसंभवेइष्टमन्यत् ॥ पूजांतेतमेवमंत्रंसविश्वासंचंद्रंध्यायन् सहस्रंसप्रणवंजपेत् ॥ तदुत्तरतस्ताम्रकलशंमहीद्यौरित्यादिविधिनास्थापयित्वा तत्ररजतप्रतिमायांबृहस्पतिमंत्रेणवागीश्वरंसंपूज्यतदुत्तरतःक्रमेणतेनैवविधिनानिहितकुंभचतुष्टये अश्वत्थेवोनिषदनमित्याम्रपल्लवप्रक्षेपांतंकृत्वाचतुर्षुक्रमेणद्रवीभूतानिकुंकुमचंदनकुष्ठगोरोचनानिसिंचेत् ॥ तेषुवरुणंपूजयेत् ॥ ततःपश्चिमदेशेस्थंडिलाद्यग्निप्रतिष्ठापनांतंकृत्वा स्थापितकलशोत्तरभागेग्रहावाहनादिवरुणपूजांतंकृत्वाऽन्वाधानादिग्रहमखंपूर्णाहुत्यंतंकुर्यात् ॥ अभिषेककालेवारुणकलशचतुष्टयस्थोदकेनादिवागंडांतजातंबालंपित्रा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सहरात्रिजातंमात्रासहसंध्ययोर्जातमुभाभ्यांसहाभिषिंचेत् ॥ ॐ सहस्राक्षण० ऋक् १ ॥ ततःसर्वकलशोदकैः समुद्रज्येष्ठा इत्यादिभिःसुरास्त्वामित्यादिभिर्मंत्रैश्चाभिषेकांतेसुस्नातःसपत्नीकःकर्ता धृतश्वेतचंदनादिर्विभूतिधारणंकृत्वा आचार्यायशंखदानं कुर्यात् ॥ इमंसचंद्रंशंखंसवस्त्रयुगंसमौक्तिकंनवनीताद्युपस्करसहितंगंडदोषापनुत्तयेदैवज्ञायययजुर्वेदविदेतुभ्यमहंसंप्रददइति ॥ तत्सांगतासिद्ध्यर्थसहिरण्यांधेनुंदद्यात् ॥ ततोवागीश्वरंताम्रपात्रसहितंगंडदोषशांत्यर्थतुभ्यंसंप्रददइतिबृहस्पतिप्रतिमादानंतदं गत्वेनयथाशक्तिदक्षिणादानंच ॥ ततःस्थापितेतरदेवतानांउत्तरपूजापूर्वकंविसर्जनमाचार्यहस्तेप्रतिपादनंच ॥ ततःसहस्राक्षे णेतिमंत्रस्यायुर्वृद्ध्यर्थंयथाशक्तिजपंदशावरब्राह्मणभोजनंचकुर्यात् ॥ इतिनक्षत्रगंडांतशांतिः ॥ ॥ छ ॥

॥ १९५ ॥ तिथ्यादिगंडांतशांतिः ॥

श्रीः ॥ तिथिगंडपूर्वार्धजन्मनिकर्तास्नातःपुत्रमनालोक्याऽस्यशिशोस्तिथिगंडपूर्वार्धजन्मसूचितसर्वारिष्टनिरसनद्वाराश्रीपरमे श्वरप्रीत्यर्थंअनडुद्दानंकरिष्येइतिसंकल्प्यनालच्छेदनात्पूर्वंगंडदोषेब्राह्मणपूजनपूर्वकंअनड्वाहंदद्यात् ॥ असंभवेकार्षापणाष्ट कंवा ॥ सूतकांतेशुभदिनेवास्नातोऽनडुद्दानमित्यस्यस्थानेगर्गोक्तांशांतिमित्यूहेनसंकल्प्यगणेशपूजादिआचार्यवरणांतंकुर्यात् ॥ सचयदत्रेत्यादिनाभूशुद्धिकलशस्थापनेकृत्वा कलशेयाओषधीः बृहस्पतेजुषस्वनः स्योनापृथिविरुवत्यश्वत्थेवइतिशतौषधीरद्भा निमृदंत्वचःपल्लवांश्चनिक्षिप्य पूर्णादर्वीतिस्थापितपूर्णपात्रेस्थापितहैमवरुणप्रतिमायांतत्त्वायामीतिवरुणंपूजयेत् ॥ ततोऽग्निंप्र तिष्ठाप्यग्रहान्संपूज्यान्वादध्यात् ॥ व्याहृत्यंतेग्रहानुत्कीर्त्य ॥ वरुणंप्रतिद्रव्यमष्टोत्तरशतसंख्याभिःसमिधांचरोराज्यतिलयवा नांचाहुतिभिः अंगहोमेवरुणंद्विरित्यादिबलिदानपूर्णाहुतिप्रणीताविसर्गांते कलशद्वयोदकेनसमुद्रज्येष्ठेत्यादिभिःपित्रादित्रया

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णामभिषेकोयवव्रीहिमाषतिलमुद्गानांदक्षिणात्वेनदानंविसर्जनादि यथाशक्तिब्राह्मणभोजनंचेति ॥ तिथिगंडोत्तरार्धजन्मनिन तुतात्कालिकदानं ॥ शांतौमातुःशिशोश्चाभिषेकइतिविशेषः ॥ लग्नगंडपूर्वार्धजन्मनिकांचनमितिविशेषः ॥ नक्षत्रगंडस्योत्तरा दिनिषिद्धभागस्यचपूर्वार्धजन्मनिधेनोस्तिलपात्रादेश्चदानम् ॥ शांतौनक्षत्रप्रतिमायास्तत्तद्वाक्याष्टकेनपूजनम् ॥ उत्तरार्धेजन्म निनदानंदक्षिणाकाले ॥ उत्तरादौतिलपात्रादेर्दानं ॥ इतरत्रयवव्रीह्यादेरभिषेकव्यवस्थाचपूर्ववत् ॥ इतितिथ्यादिगंडांतशांतिः

॥ १९६ ॥ विषनाडीजननशांतिः ॥

श्रीः ॥ कर्ताऽऽशौचांतेदेशकालौसंकीर्त्यविषनाड्यामेतच्छिशुजननसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंवृद्धगर्गोक्तां सग्रहमखांशांतिंकरिष्यइतिसंकल्प्य ॥ गणेशपूजनाद्याचार्यार्त्विग्वरणांतंकुर्यात् ॥ आचार्योयदत्रसंस्थितमितिस्थलशुद्धिंकृत्वा यथाशक्तियथालक्षणंनिर्मितानांहैमीनांरुद्रादिप्रतिमानांचतसृणामभ्युत्तारणंकृत्वा पूर्वभागेमहीद्यौरितिभुवंस्पृष्ट्वातत्रओषध यःसंवदंतइतिचतुःप्रस्थपरिमितान्व्रीहीन्प्रक्षिप्य तैःस्थंडिलंपरिकल्प्यतत्रकलशस्थापनोदकपूरणेसमंत्रकेकृत्वायाओषधीरिति सर्वौषधीःप्रक्षिप्य स्योनेतिसप्तमृदः अश्वत्थेवइतिपंचपल्लवान् कांडात्कांडादितिदूर्वाः अग्नेरेतइतिहिरण्यं याःफलिनीरितिफलं युवासुवासाइतिवस्त्रद्वयेनावेष्ट्य बृहस्पतेजुषस्वनइतिपंचरत्नानिनिक्षिप्य गंधद्वारामितिगंधादिनाकलशंसंपूज्यपूर्णादर्वीतिपूर्ण पात्रंनिधाय तत्रप्रतिमाचतुष्टयंनिधायतास्त्वावाहनादिषोडशोपचारैर्देवताःपूजयेत् ॥ कद्रुद्रायेतिरुद्रं ॥ यमायसोममितियमं ॥ अग्निर्मूर्धादिवइत्यग्निं ॥ परंमृत्योरितिमृत्युं ॥ पूजांतेस्थंडिलेपश्चिमभागस्थेऽग्निंप्रतिष्ठाप्यस्थापितोत्तरभागेग्रहपूजनकलशस्था पनांतंकृत्वाऽन्वादध्यात् ॥ व्याहृत्यंतेग्रहपीठदेवतान्वाधानंप्रसिद्धरीत्याकृत्वा रुद्रंप्रतिद्रव्यमष्टोत्तरशतसंख्याभिःसमिच्चरुघृ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ताहुतिभिः ॥ यममग्निंमृत्युंचतावतीभिस्तद्द्रव्याहुतिभिः ॥ एताएवदेवतास्तिलाहुतीभिश्चतत्संख्याभिः ॥ अंगहोमेवरुणंद्विरि
त्यादिप्रणीताप्रणयनांतेआज्यनिर्वापः आज्येनसहगृहसिद्धान्नस्यपर्यग्निकरणंसंमार्गांतेचरोरग्नावधिश्रपणमभिघारणंचकृत्वोद
गुद्वासनादिसामान्यप्रधानहोमांतेग्रहपीठदेवतानांयथान्वाधानंत्यागेकृते प्रत्येकमष्टोत्तरशतसंख्याहुतिपर्याप्तंसमिच्चरुघृतात्म
कद्रव्यत्रयंरुद्रायएवंयमायअग्नयेमृत्यवे एवंतत्संख्याहुतिपर्याप्तंतिलद्रव्यंरुद्रादिभ्योनममेतित्यागेकृते ऋत्विक्सहितआचा
र्यस्तत्तन्मंत्रैर्जुहुयात् ॥ प्रायश्चित्तहोमांतेलोकपालेभ्योग्रहपीठदेवताभ्यश्चबलिदानंरुद्रयमाग्निमृत्युभ्यश्चांतेक्षेत्रपालायच ॥
पूर्णाहुत्यंतेप्रणीताविमोकः ॥ कलशद्वयोदकेनाभिषेकः समुद्रज्येष्ठेत्यादिभिर्मंत्रैः ॥ प्रीयतांभगवानीशःपिनाकीसर्वतोमुखः ॥
तवमूर्तिप्रदानेनसर्वाभीष्टप्रदोभव ॥ ईषत्पीनोयमःकालोदंहस्तःप्रसन्नधीः ॥ रक्तदृङ्नीलकायश्चमहिषस्थःशिवंकुरु ॥ पिंगभ्रू
श्मश्रुकेशांतःसाक्षसूत्रकमंडलुः ॥ सप्तार्चिःशक्तिधारीचममपापंव्यपोहतु ॥ दंष्ट्राकरालवदनोनीलांजनसमाकृतिः ॥ रक्ताक्षो
सिगदापाणिर्मृत्युर्मांपातुसर्वदा ॥ इत्यादिभिश्चतुर्भिःश्लोकैश्च ॥ ततएतैरेवश्लोकैःसमाहितएकैकांदेवतामाचार्यायदद्यात् ॥
ततस्तस्मैगोभूहिरण्यवस्त्रादितन्निष्क्रयंवादद्यात्॥ कृतस्यकर्मणःसांगतायैइमांदक्षिणांतुभ्यमहंसंप्रददेइति ॥ एवमृत्विग्भ्योपि
यथाशक्तिदक्षिणादानं ततोग्रहपीठदेवतानांपूजनविसर्जनेआचार्यहस्तेप्रतिपादनंब्राह्मणभोजनंच ॥ इतिविषनाडीजननशांतिः

॥ १९७ ॥ यमलजननशांतिः ॥

श्रीः ॥ ममभार्यायायमलजननसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंइष्ट्वायक्ष्येइतिश्रौताग्निमतःगृह्याग्निमतस्तुमारु
तस्थालीपाकेनयक्ष्यइतिसंकल्पः ॥ अकृतप्रत्यारंभस्यतत्स्थानेपूर्णाहुतिंहोष्यामीति ॥ अग्निशून्यस्तुसग्रहमखंकात्यायनोक्तं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रायश्चित्तंकरिष्येइतिसंकल्प्यगणेशपूजनाद्याचार्यवरणांतंकुर्यात्॥ आचार्योयदत्रेत्यादिनाभूशुद्धिंविधायप्रागादिक्रमेणईशान्यं तासुदिक्षुमहीद्यौरित्यादिविधिनाकलशाष्टकपूरणांतंकृत्वाअग्नेरेतइतिहिरण्यंकषायादिसहितंप्रक्षिप्य कांडात्कांडादितिदूर्वाः याओषधीरितिसर्वौषधीश्चप्रक्षिप्य गंधादिप्रक्षेपादिवरुणपूजांतंकुर्यात्॥ अथकलशोदकैराचार्योदंपत्योरभिषेकंकुर्यात्॥ आपो हिष्ठेतितृचं० ॥ कयानइति २ ॥ आनस्तुतइतिपंच० ५ ॥ मोष्वितिपंच० ५ ॥ इदमापइत्येकां० १ ॥ अपनःशोशुचदघ मिति १२ ॥ एवमभिषिक्तौदंपतीश्वेतैर्वस्त्रचंदनपुष्पैःसौवर्णभूषणैश्चाऽलंकृत्यदर्भेषूपवेशयति ॥ तौतत्रोदङ्मुखौतिष्ठतः ॥ तत्समीपेप्राङ्मुखआचार्यःस्थंडिलेऽग्निंप्रतिष्ठाप्यैशान्यांग्रहपूजाकलशस्थापनांतंकृत्वाऽन्वाधानंकुर्यात् ॥ व्याहृत्यंतेग्रहानुत्की र्त्य ॥ अपस्तिसृभिः इंद्रंसप्तभिः वरुणंपंचभिः अपएकया अग्निमष्टाभिराज्याहुतिभिः अग्निंसोमंपवमानंपावकंमारुतंम रुतःयमंअंतकंमृत्युंचएकैकयाचर्वाहुत्या अंगहोमेवरुणंद्विरित्यादि ॥ तूष्णींषट्त्रिंशद्धारंनिर्वापप्रोक्षणे ॥ यथान्वाधानमाज्या हुतिषुत्यागः ॥ अग्नयेस्वाहेत्यवदानसंपदानवाहुतयः ॥ यथालिंगंत्यजतापिअन्याद्यात्मनामरुतोध्येयाः ॥ प्रयाजेषुसमिद्धइ तित्यागेपिसमिदाद्यात्मनानिरुक्तोक्ताग्निध्यानवत् ॥ ततःइमंमेवरुणेत्यादिबलिदानांतेपूर्णाहुतिःपूर्णपात्रनिनयनंग्रहकलशेना भिषेकःआचार्यायदक्षिणादानंस्थापितदेवतानांपूजनादिआचार्यहस्तेप्रतिपादनांतंचकृत्वा ब्राह्मणान्भोजयित्वास्वस्तिभवंतोब्रु वंतितिवाचयित्वा आशिषोगृहीत्वेश्वरार्पणंकुर्यादिति ॥ इतियमलजननशांतिः॥ ॥ छ ॥ ॥ छ ॥

॥ १९८ ॥ त्रिकप्रसवशांतिः ॥

श्रीः ॥ एकादशेद्वादशेअन्यस्मिन्वाशुभेऽह्निसभार्योदेशकालौसंकीर्त्यममसुतत्रयजन्मानंतरंसुताजननसूचितसर्वारिष्टपरिहा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रद्वाराश्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांशांतिंकरिष्ये ॥ सुतात्रयजननोत्तरंसुतजननंतथोहःकार्यः ॥ ततोगणेशपूजनाद्याचार्यर्त्विग्वरणतत्पूजांतेआचार्योयदत्रेत्याद्यभ्युत्तारणंचकृत्वा ॥ ततःस्थंडिलपूर्वभागेग्रहपूजाकलशस्थापनवरुणपूजनांतंकृत्वा तदुत्तरतउदक्संस्थानांपंचकलशानांमहीद्यौरित्यादिविधिना यथाशक्तिधान्योपरिस्थापितानामुपरियथाशक्तिहेमनिर्मिताःब्रह्मविष्णुमहेशेंद्ररुद्रप्रतिमाःस्थापयित्वातासुदेवताःपूजयेत् ॥ ब्रह्मजज्ञानमितिब्रह्माणं ॥ इदंविष्णुरितिविष्णुं ॥ तत्पुरुषायेतिमहेशं ॥ यतइंद्रेतींद्रं ॥ कद्रुद्रायेतिरुद्रं ॥ पूजांतेरुद्रकलशंस्पृष्ट्वाएकादशवारंरुद्रंजपेत् ॥ तदंतेकृणुष्वपाजइत्यादिशांतिसूक्तानिजपेत् ॥ ततोऽग्निप्रतिष्ठापनादि अन्वाधानेव्याहृत्यंतेप्रसिद्धंग्रहपीठगतदेवतान्वाधानंकृत्वा ब्रह्माणंविष्णुंमहेशंइंद्रंरुद्रंचप्रत्येकंसमिदाज्यतिलचरूणांप्रतिद्रव्यमष्टोत्तरसहस्राहुतिभिः १०८।२८ अंगहोमेवरुणंद्विरित्यादि ॥ सामान्यप्रधानंतेयथान्वाधानंत्यागः॥ ततःप्रधानहोममुक्तमंत्रैराचार्यर्त्विक्कर्तृकग्रहहोमपुरःसरंकुर्यात् ॥ प्रायश्चित्तहोमांतेबलिःपूर्णाहुतिश्च ॥ ततःप्रणीताविमोकसंस्थाजपपरिस्तरणविमोकांतेषट्कलशोदकेनसमुद्रज्येष्ठाइत्यादिमंत्रैःसहकुटुंबयजमानाभिषेकः ॥ ततआचार्यायसहिरण्यधेनुंदत्वाऋत्विग्भ्योयथाशक्तिदानंचकृत्वास्थापितदेवतानामुत्तरपूजनविसर्जनांतेतत्प्रतिमाआचार्यहस्तेप्रतिपाद्यकांस्यपात्रेसकुटुंबःस्वरूपमवेक्ष्यसदक्षिणंतद्दानंकृत्वा ब्राह्मणभोजनंयथाशक्तिसंकल्प्यशांतिपाठंकारयित्वापरमेश्वरार्पणंकुर्यात् ॥ इतित्रिक०॥

॥ १९९ ॥ सदंतजननशांतिः ॥

श्रीः ॥ अस्यशिशोःप्रथममूर्ध्वदंतजननसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थशांतिंकरिष्ये ॥ निमित्तांतरेसदंतजननसूचितेत्यूहः द्वितीयमासदंतजननसूचितेत्येवमूहश्चकल्प्यः ॥ गणेशपूजनाद्याचार्यवरणांतेआचार्योयदत्रेत्यादिप्रतिमानाम

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ज्युत्तारणंचकृत्वाहोमदेशोत्तरभागेगजपृष्ठनौकायांसौवर्णपीठेवास्वस्तिकचर्मयोगेभद्रासनत्वेनकल्पिते बालमुपवेश्यसर्वौषधिस र्वगंधादियुक्तजलैःस्नापयित्वा होमदेशपूर्वभागेस्थापितकलशोपरिधातारंवह्निंसोमंवायुंपर्वतान्केशवंचषट्प्रतिमासुसंपूज्याऽग्निं प्रतिष्ठाप्यग्रहान्संपूज्याऽन्वादध्यात् ॥ ग्रहान्वाधानांते धातारंसकृच्चरुणा वह्न्याद्यादेवताएकैकयाज्याहुत्याअंगहोमेवरुणं द्विरित्यादि ॥ धात्रेत्वाजुष्टंनिर्वपामीतिप्रोक्षामीतिसमंत्रेनिर्वापप्रोक्षणे ॥ ग्रहानुद्दिश्यत्यागहोमांतेॐधात्रेस्वाहेत्यवदानधर्मेणस कृदाहुतिः ॥ ॐ वह्नयेस्वाहा ॥ ॐ सोमाय० ॥ ॐ समीरणाय० ॥ ॐ पर्वतेभ्यः० ॥ ॐ केशवाय० ॥ इतिस्रुवेणाज्याहु तयः ॥ यथालिंगंत्यागः ॥ चर्वाज्याभ्यांस्विष्टकृद्घृतपूर्णाहुत्यंतेकलशद्वयोदकेनाभिषेकः ॥ यथाशक्त्याचार्यायदक्षिणादानं तद्धस्तेप्रतिमाप्रतिपादनांतेभूयसींदक्षिणामन्येभ्योयथाशक्तिदत्वासशाहंब्राह्मणान्भोजयेत् ॥ अष्टमेहनिशक्त्यनुसारेणकांच नादिदानंतेभ्यःकार्यं ॥ दिनाष्टकंब्रह्मचर्यादिव्रतचर्यांतेपरमेश्वरार्पणंकुर्यादितिसदंतजननादिशांतिः ॥ षष्ठेऽष्टमेवामासेदंतो त्पत्तौतुतदनुसारिसंकल्पपूर्वकंबृहस्पतेरेवमंत्रेणतत्पूजनविधिनापूजनंदधिमधुघृताक्तानांअश्वत्थसमिधामष्टोत्तरशतंतन्मंत्रेण होमः आज्येनस्विष्टकृदादि तत्कलशोदकेनाभिषेकः ब्राह्मणभोजनांतेईश्वरार्पणं ॥ इतिसदंतोत्पत्तिशांतिः ॥ ॥ छ ॥

॥ २०० ॥ सिंहादिप्रसूतगवादिशांतिः ॥

श्रीः ॥ कर्तादशाहोत्तरंशुभदिनेस्नात्वाआचमनादिदेशकालस्मरणांतेममपत्न्याःपौषेप्रथमप्रसूति–(ममगृहेसिंहस्थेरवौगोप्रसूति सूचित– माघेमहिषीप्रसूतिसूचित– श्रावणेदिवावडवाप्रसूति) सूचितसर्वारिष्टपरिहारद्वारासग्रहांशौनकोक्तांशांतिंकरिष्यइ तिसंकल्प्यगणेशपूजनस्वस्तिवाचनादिऋत्विग्वरणांतंकुर्यात् ॥ *ततआचार्यःकर्मसंकल्प्यप्रादेशकरणांते गृहस्यैशानभागेमही*

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्यौरित्यादिविधिनाकलशंसंस्थाप्यवस्त्रयुग्मनावष्टंपूर्णपात्रं सावणराजतताम्रान्यतमप्रतिमयोः कद्रुद्रायेतिरुद्रं ॥ आसत्येने तिसूर्यंचावाह्यपूजयेत् ॥ ततएकऋत्विकृहोमसमाप्त्यंतंरुद्रमपरश्चसौरमंत्रान्जपेत् ॥ यद्वातत्तन्मूलमंत्रजपःकार्यः ॥ ततोग्निं ग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् ॥ ग्रहादिकीर्तनांते रुद्रं सूर्यंच तिलाज्यचरुभिःप्रत्येकंप्रतिद्रव्यं १०८ वा २८ संख्याकाहुतिभिः अंगहोमेवरुणंद्विरित्यादिग्रहादिहोमांतेपूजामंत्राभ्यांप्रधानहोमंकुर्यात् ॥ ततःअंगहोमादिप्रायश्चित्तहोमांतेबलिदानंपूर्णाहुतिं चकृत्वासस्रावहोमादिशेषंसमाप्यस्थापितकलशोदकेनसकुटुंबंयजमानंसमुद्रज्येष्टादिमंत्रैरभिषिंचेत् ॥ ततोयजमानोविभू तिंधृत्वोत्तरपूजांविधायाचार्यसंपूज्यतस्मैप्रसूतांगांमहिषींवादत्वाऋत्विग्भ्योदक्षिणामाचार्यायविसर्जितदेवतापीठंचदत्वायथा शक्तिब्राह्मणान्संभोज्यभूयसींदद्यात् ॥ इतिसिंहादिप्रसूतगवादिशांतिः ॥ ॥ छ ॥ ॥ छ ॥

॥ २०१ ॥ प्रसववैकृतशांतिः ॥

श्रीः ॥ वृद्धगर्गः ॥ यत्रगर्भेविपर्यासोमानुषाणांगवामपि ॥ अद्भुतानिप्रसूयंतेतत्रदेशस्यविप्लवः ॥ अत्राऽपिदिव्यजाशांतिः कार्यापंचदशींबुधैः ॥ पंचदशींप्राप्येतिशेषः ॥ पर्वणीत्यर्थः ॥ मानुषामानुषाणांचगोजाश्वमृगपक्षिणाम् ॥ जायंतेजातिभेदा श्चसदंताविकृतास्तथा ॥ बहुशीर्षाअशीर्षावाबहुकर्णाअकर्णकाः ॥ एकशृंगाद्विशृंगास्तथैवत्रिचतुर्भुजाः ॥ दीर्घकर्णामहा कर्णागजकर्णाश्चमानवाः ॥ वानरश्वापदव्याघ्रमार्जारतनुधारिणः ॥ जायंतेपुरुषायत्रतत्रसंग्राममादिशेत् ॥ राजश्रेष्ठकुलेनाशो धनस्यचकुलस्यच ॥ यमलायत्रजायंतेनारीणांगजवाजिनाम् ॥ ब्रह्मशांतिंततःकुर्याद्यत्रब्रह्माप्रशासिता ॥ अष्टोत्तरसहस्रा णिचरुंवैजुहुयाद्धृतम् ॥ समिधांतुपलाशानांतर्पयेत्पूर्ववद्द्विजान् ॥ दासीदाससमायुक्तोगोधान्यफलसंयुतम् ॥ कांचनंवृषभं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वस्त्रंदद्याद्विप्रायदक्षिणाम् ॥ अशिराजायतेजंतुस्तथाद्वित्रिशिराअपि ॥ सूर्याद्भुतंविजानीयात्पूजयित्वादिवाकरम् ॥ दध्याज्य मधुसंयुक्ताःसमिधस्त्वर्कसंभवाः ॥ यद्वाजनःप्रसूतिभिर्जुहुयाद्भुतमेवच ॥ धेनुंसुवर्णवस्त्रंचदद्याद्धात्रेचदक्षिणाम् ॥ सर्वेदो षाविनश्यंतिततःसंपद्यतेशुभम् ॥ मृगीजनयतेसर्पान्मंडूकांश्चाप्यमानुषान् ॥ बृहस्पत्यद्भुतमिदंतद्वारेतंप्रपूजयेत् ॥ उदुंबर स्यसमिधोदधिसर्पिःसमन्विताः ॥ दोषोपशमनार्थायजुहुयान्नियमेस्थितः ॥ वस्त्रंसुवर्णधेनुंचदद्याद्विप्रायदक्षिणाम् ॥ स्त्रीगर्भ पातोयमलंप्रसूयंतेऽथवास्त्रियः ॥ सदंताश्चैवजायंतेजातमात्राहसंतिच ॥ बुधाद्भुतंविजानीयात्तद्वारेतंप्रपूजयेत् ॥ वस्त्रंगांच सुवर्णंचदद्याद्विप्रायदक्षिणाम् ॥ अद्भुतसागरेनारदः ॥ भानौसिंहगतेचैवयस्यगौःसंप्रसूयते ॥ मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्न संशयः ॥ तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभम् ॥ प्रसूतांतत्क्षणादेवतांगांविप्रायदापयेत् ॥ ततोहोमंप्रकुर्वीतघृताक्तैराज सर्षपैः ॥ अयुतोहोमोव्याहृतिभिःकार्यइति ॥ तथा ॥ अस्यवामस्यसूक्तेनतद्विष्णोरितिमंत्रतः ॥ जुहुयाच्चतिलाज्येनशतम ष्टोत्तराधिकम् ॥ मृत्युंजयेनमंत्रेणजुहुयाच्चतथायुतं ॥ श्रीसूक्तेनततःस्नायाच्छांतिसूक्तेनवापुनरिति ॥ यत्कांत्यासूर्यचंद्राद्या अभवन्प्रौढकांतयः ॥ श्रीकांतस्यमुदेतस्यप्रोक्ताजननशांतयः ॥ इतिजननशांतयः ॥ ॥ छ ॥ ॥ छ ॥

॥ २०२ ॥ बालग्रहशांतिप्रयोगः ॥

श्रीः ॥ कर्ताप्रदोषाद्युक्तकालेआचमनादिदेशकालस्मरणांतेअस्यशिशोःशरीरेअमुकाख्यपूतनाग्रहणजन्यज्वरच्छर्दिकासश्वास मूर्छाग्रहणीशूलहिक्कांऽगसंकोचाऽकस्मिकभयप्रकंपाक्षिमीलनगात्रभंगमुखशोषदंतखादनतनुवैवर्ण्यशिरःस्फोटपुलकव्रणोद्गम हृद्रोगवैकल्याहारद्वेषदिवारात्रिरोदनाद्यनेकविधव्याधिपीडानां सद्योनिरासेनआरोग्यावाप्तिपूर्वकंक्षेमायुरभिवृद्धिहाराश्रीप०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्कल्पोक्तविधिनाशांतिंकरिष्येइतिसंकल्प्य (अत्राऽमुकपदस्थानेपूतनायाःदिनमासाब्दभेदानुसारेणतत्तन्नामकीर्तयेत्) गणे
शंसंपूज्यपुण्याहवाचनंकृत्वानदीतीरस्थमृदाद्युक्तद्रव्येणपुत्तलिकांविधायनवेशरावेसंस्थाप्यप्राणप्रतिष्ठांते ॐ नमोभक्तवत्सले
विमोचनिस्वाहेतिमंत्रेणनाममंत्रेणवाषोडशोपचारैःपूजयेत् ॥ तत्रवस्त्रगंधपुष्पधूपदीपनैवेद्यादितत्तदुक्तंग्राह्यं ॥ ततस्तस्याःपु
रतोभक्तपोलिकामुष्टिकमत्स्यमांससुराद्युक्तद्रव्यात्मकंबलिंनिधायतत्रैवतत्तद्वर्णध्वजान्पिष्टदीपांश्चयथोक्तसंख्ययासंस्थाप्यदे
व्यैनिवेदयेत् ॥ तत्रसाधारणोमंत्रः ॥ ॐ नमश्चामुंडेभगवतिविद्युज्जिह्वेहांहांहींहींअपसरंतुदुष्टग्रहाहुंतद्यथागच्छंतुयातान्यतः
स्थानेरुद्रोज्ञापयतिस्वाहा विद्युज्जिह्वेहांहींहूंहूंमुंचमुंचस्वाहा ॥ यत्रविशेषमंत्रउक्तस्तत्रसोऽपिग्राह्यः ॥ मंत्रांतेअमुकाख्यपूत
नायैसांगायै० अमुंसदीपंसर्वोपस्करयुतंबलिंसमर्पयामि॥ भोभोःअमुकपूतने इमंबलिंगृहाणममास्यबालकस्यआयुःकर्त्रीत्यादि
ततःकश्चिद्वटाम्रोदुंबराश्वत्थजंबूपल्लवानार्द्रान्कुसुमाक्षतानेकीकृत्यबालकांगेभ्यःसमुत्तार्यशरावेनिक्षिप्यबालंनीराजयेत्॥मंत्र
स्तु ॥ ब्रह्माविष्णुश्चरुद्रश्चस्कंदोवैश्रवणस्तथा ॥ रक्षंतुत्वरितंबालंमुंचमुंचकुमारकमिति ॥ ततस्तत्सर्वमादायसशस्त्रकंबलः
ॐ नमोभक्तवत्सलेविमोचनिस्वाहेतिमंत्रमुच्चारयन्नप्रमत्तोग्रामाद्बहिर्गत्वाचतुष्पथनदीतीराद्युक्तस्थलेनिक्षिपेत् ॥ कर्ताचतंद्वा
रप्रदेशांतमनुव्रजन्सर्षपविकिरणंजलसेकंचकृत्वाभार्यापुत्राभ्यांसहहस्तपादंप्रक्षाल्यगृहंप्रविश्यब्राह्मणैःशांतिंपाठयेत् ॥ ततःप
लाशोदुंबराश्वत्थबिल्ववटपल्लवकषायेणनमश्चामुंडेइत्यादिपूर्वोक्तमंत्रेणबालंसंस्नाप्यगंधादिनाऽलंकृत्यधातकीलोध्रमंजिष्ठाता
लचंदनचूर्णेनतस्यांगान्यनुलिप्यगुग्गुलुधूपेनधूपयेत् ॥ ततोभूर्जपत्रेरक्षरक्षमहादेवनीलग्रीवजटाधर ॥ ग्रहैस्तुसहितोरक्षमुं

१ दिनमासादिभेदेनपृथग्देवतामंत्राश्चशांतिरत्नादावालोचनीयाः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चमुंचकुमारकमितिमंत्रंलिखित्वातत्पत्रंशिशोर्दक्षिणभुजेबद्ध्वातस्याशिखांस्पृशन्मंत्रंजपेत् ॥ ॐ सर्वामातरइमंग्रहंसंहरंतुहुंरोद यरोदयस्फोटय २ स्वाहागर्ज २ सर २ गृह्ण २ आमर्दय २ हिम २ हन २ एवंसिद्धिरुद्रोज्ञापयतिस्वाहा ॥ ततःसतिसंभवे चतुष्पथेकुंडंस्थंडिलंवाकृत्वा ॐ कूष्मांडिभगवतिसुरागिणिसुमुंडितेमुंच २ दह २ पच २ सर २ गच्छ २ स्वाहेतिमंत्रेणसह स्रसंख्ययापूतनायैविधिवत्तिलहोमःकार्यः ॥ ततोबालरोदनपरिहारार्थंभूर्जपत्रादौषडक्षंतन्मध्येह्रींकारंतत्रशिशोर्नामचलिखि त्वाषट्सुकोणेषुक्रमेणआंलुलुवेस्वाहाइतिषडक्षराणितद्बाह्येनेमिवद्वर्तुलद्वयंतद्बहिरधोमुखानर्धचंद्रांश्चविलिख्यपंचोपचारैःसंपू ज्यतद्यंत्रंबालहस्तेबध्नीयात् ॥ ततःपूर्वोक्तंबालग्रहस्तवंपठित्वाहरिवंशोक्तेनपारिजातोक्तेनवारक्षामंत्रेणविभूतिमभिमंत्र्यबाल स्यांगेलेपयेत् ॥ततोब्राह्मणेभ्योदक्षिणांदत्वाभोजनंचसंकल्प्यतान्प्रणम्याशिषोगृहीत्वाकर्मेश्वरायार्पयेत् ॥ इतिबालग्रहशांतिः ॥

॥ इतिद्वितीयंसंस्कारशांत्यादिप्रकरणंसंपूर्णम् ॥ २ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ अथव्रतोद्यापनादिमिश्रप्रकरणम् ॥ ३ ॥

॥ २०३ ॥ सर्वव्रतसाधारणोद्यापनसंभाराः ॥

श्रीः॥ तत्रादौसंभाराः–प्रतिमाःसुवर्णमय्यः॥ ताम्रादिधातुमयाःकलशाअशक्तौमृन्मयाः॥ पंचामृतंपंचखाद्यंसूत्रयज्ञोपवीतकं॥ पूगीफलंश्रीफलंचमध्वाज्यंपायसंतथा ॥ चरुंतिलसमिद्दूर्वासंभारान्कुशपुष्पकं ॥ समिधः॥ अर्कःपलाशःखदिरोह्यपामार्गोथपिप्पलः ॥ उदुंबरःशमीदूर्वाकुशाश्चसमिधःस्मृताः ॥ पंचत्वचः ॥ न्यग्रोधःपिप्पलःप्लक्षोजंबूचूतसमुत्थिताः ॥ पल्लवाःपंचविज्ञेयास्तेषामेवत्वचोहिताः ॥ पंचरत्नानि ॥ सुवर्णरजतंमुक्तामाणिक्यंचप्रवालकं ॥ पंचरत्नमितिख्यातंसमस्तसुरवल्लभं ॥ सप्तमृदः ॥ गजाश्वरथ्यावल्मीकसंगमह्रदगोकुलात् ॥ मृदमानीयकुंभेषुप्रक्षिपेच्चत्वरात्तथा ॥ सप्तधातवः ॥ सुवर्णरजतंताम्रमारकूटंतथैवच ॥ लोहंत्रपुस्तथासीसंधातवःसप्तकीर्तिताः ॥ ॥ सप्तधान्यानि ॥ यवगोधूमधान्यानितिलाअपिचकंगवः ॥ श्यामाकाश्चणकाश्चैवसप्तधान्यमुदाहृतं ॥ ॥ पंचखाद्यं ॥ प्रियालखंडखर्जूरीनारिकेलश्चगोस्तनी ॥ ॥ अष्टगंधः॥ गोरोचनंदेवदारुंकर्पूरंकेशरंतथा ॥ कृष्णागुरुंकुंकुमंचकस्तूरीमलयागरं ॥ सर्वौषध्यः ॥ कदंबादेवदारुश्चमांसीमुस्तमथागुरुं ॥ धात्रीबिल्वंकचोरंचसर्वौषध्यःशतावरी ॥ हवनद्रव्याणि ॥ समिच्चरुद्रतिलाज्यंचपायसंकृसरांगकं ॥ मधुबिल्वंपंचखाद्यंलड्डुकाहवनेस्मृताः ॥ पंचरात्रे ॥ रजांसिपंचवर्णानिमंडलार्थंहिकारयेत् ॥ शालितंडुलजंशुक्लंरक्तंकौस्तुभसैंदुरं ॥ हरितालोद्भवंपीतंकृष्णंदग्धयवोद्भवम् ॥ रजांसिपंचवर्णानिहरितंपीतकृष्णयुक् ॥ इतिसर्वव्रतसाधारणोद्यापनसंभाराः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २०४ ॥ सर्वतोभद्रमंडलम् ॥

श्रीः ॥ हेमाद्रौस्कांदे ॥ प्रागुदीच्यायतारेखाःकुर्यादेकोनविंशतिं ॥ खंडेंदुस्त्रिपदःकोणेशृंखलाःपंचभिःपदैः ॥ एकादशपदावल्लीभद्रंतुनवभिःपदैः ॥ चतुर्विंशत्पदावापीपरिधिर्विंशतिःपदैः ॥ मध्येषोडशभिःकोष्ठैःपद्ममष्टदलंस्मृतम् ॥ श्वेतेंदुःशृंखलाकृष्णावल्लींनीलेनपूरयेत् ॥ भद्रारुणासितावापीपरिधिःपीतवर्णकः ॥ बाह्यांतरदलश्वेताकर्णिकापीतवर्णका ॥ परिध्यावेष्टितंपद्मंबाह्येसत्वंरजस्तमः ॥ तन्मध्येस्थापयेद्देवान्ब्रह्माद्यांश्चसुरासुरान् ॥ इतिसर्वतोभद्ररेखाकोष्ठवर्णपूरणादिशास्त्रार्थः ॥

॥ २०५ ॥ लिंगतोभद्राणि ॥

श्रीः ॥ अथद्वादशलिंगतोभद्रम् ॥ लैंगे ॥ प्रागुदीच्यांगतारेखाःषट्त्रिंशद्भिप्रकल्पयेत् ॥ पदानिद्वादशशतंपंचविंशतिरेवच ॥ खंडेंदुस्त्रिपदःकोणेशृंखलाषट्पदैःस्मृताः ॥ त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः ॥ त्रयोदशपदावापीलिंगमष्टादशैःस्मृतम् ॥ लिंगत्रयस्यपंक्तौतुशोभाकोष्ठाश्चतुर्दश ॥ तेषामुपरिपंक्तौतुकोष्ठाःसप्तदशैवतु ॥ पूजापंक्तिस्तुविज्ञेयापरितःपरिकल्पिता ॥ पूजापंक्त्यंतरापंक्तौकोष्ठाद्व्यशीतिसंख्यया ॥ परिधिःसतुविज्ञेयोंऽतरामंडलयोर्द्वयोः ॥ परिध्यंतरकोष्ठेषुसर्वतोभद्रमालिखेत् ॥ विशेषश्चात्रविज्ञेयःशृंखलाषट्पदाभवेत् ॥ त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः ॥ पंचविंशत्पदावापीपरिधिःषोडशात्मकः ॥ मध्येनवपदंपद्मंकर्णिकाकेसरान्वितम् ॥ सत्वंरजस्तमोवर्णाःपरितोमंडलस्थतु ॥ त्रयःपरिधयःकार्यास्तत्रद्वारा

१ इदंसर्वतोभद्रमंडलंविविधानिलिंगतोभद्राणिचयथावच्चक्रन्यासरंगरंजनादिनारंभेदत्तानिसंतितानितेषांयत्रयत्रोपयोगस्तत्रतत्रग्राह्याणि ।

२ एतल्लिंगतोभद्रंद्वादशगृहाणांविनियोगाभावादसमीचीनं स्मृतिकौस्तुभेतुद्वादशलिंगात्मकंहरिहरास्थंमंडलमुक्तंतदेवयुक्तं ।

CC-0.In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi, and eGangotri

णिकारयेत् ॥ सितेंदुःशृंखलाकृष्णावल्लीनीलाग्रकीर्तिता ॥ भद्रंचवारुणज्ञेयंवापीस्याच्छ्वेतवर्णिका ॥ लिंगानिकृष्णवर्णानि
पार्श्वतोद्वादशैवतु ॥ परिधिःपीतवर्णःस्यात्कमलंपंचवर्णकम् ॥ ॥ अथाष्टलिंगतोभद्रमाग्नेये ॥ चतुर्विंशतिरालेख्यारे
खाःप्राक्दक्षिणायताः ॥ कोणेषुशृंखलाःपंचपदावल्लयस्तुपार्श्वतः ॥ पदैर्नवभिरालेख्याश्चतुर्भिर्लघुशृंखलाः ॥ लघुवल्लयःपदैः
षड्भिस्ततोष्टादशभिःपदैः ॥ कृत्वालिंगानिवाप्यःस्युस्त्रयोदशभिरंतरा ॥ ततोवीथिद्वयेनैवपीठंकुर्याद्विचक्षणः ॥ तस्यपादाः
पंचपदैर्द्वाराण्यपितथैवच ॥ एकाशीतिपदंमध्येपद्मंस्वस्तिकमुच्यते ॥ कोणेषुशृंखलाःकार्याःपदैस्त्रिभिरतःपरम् ॥ पदैश्चतुर्भि
र्दिक्षुस्युर्भद्राण्येषांसमंततः ॥ एकादशपदावल्लयोमध्येष्टदलमालिखेत् ॥ पद्मंनवपदंह्येवंलिंगतोभद्रमुच्यते ॥ शृंखलाःकृष्ण
वर्णेनवल्लीर्नीलेनपूरयेत् ॥ रक्तेनशृंखलालघ्वीर्वल्लीःपीतेनपूरयेत् ॥ लिंगानिकृष्णवर्णानिश्वेतेनाप्यथवापिकाः ॥ पीठंसपादं
श्वेतेनपीतेनद्वारपूरणम् ॥ मध्येस्युःशृंखलारक्तावल्लीर्नीलेनपूरयेत् ॥ भद्राणिपीतवर्णानिपीतापंकजकर्णिका ॥ दलानिश्वेत
वर्णानियद्वाचित्राणिकल्पयेत् ॥ तिस्रोरेखाबहिःकार्याःसितरक्तासिताःक्रमादिति ॥ ॥ अथचतुर्लिंगतोभद्रम् ॥ ॥
लैंगे ॥ रेखास्त्वष्टादशप्रोक्ताश्चतुर्लिंगसमुद्भवे ॥ कोणेंदुस्त्रिपदःश्वेतस्त्रिपदैःकृष्णशृंखला ॥ वल्लीसप्तपदानीलाभद्रंरक्तंचतु
ष्पदम् ॥ भद्रपार्श्वेमहारुद्रंकृष्णमष्टादशैःपदैः ॥ शिवस्यपार्श्वतोवापींकुर्यात्पंचपदांसितां ॥ एकंपदंतथापीतंभद्रवाप्योस्तुम
ध्यतः ॥ शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयम् ॥ लिंगानांस्कंधतःकोष्ठाविंशतीरक्तवर्णकाः ॥ परिधिःपीतवर्णस्तुपदैःषोड
शभिःस्मृतः ॥ पदैस्तुनवभिःपश्चाद्रक्तंपद्मंसकर्णिकं ॥ ॥ एकलिंगतोभद्रम् ॥ गौरीतिलके ॥ तिर्यगूर्ध्वगतारेखाःकार्याः
स्निग्धास्त्रयोदश ॥ कोणेंदुस्त्रिपदःकार्यःशृंखलास्त्रिपदाःस्मृताः ॥ वल्लीतुत्रिपदानीलाभद्रंरक्तंप्रकल्पयेत् ॥ पदैर्द्वादशभिः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्पष्टमुत्तरेपूर्वदक्षिणे ॥ पश्चिमायांमहारुद्रमष्टाविंशतिकोष्ठकैः ॥ लिंगपार्श्वेतथामूर्ध्निअष्टौकोष्ठाःसुपीतकाः ॥ लिंगमेकंतथा गौर्यस्तिस्रःस्युरत्रमंडले ॥ पूजयेन्मंडलंचैतत्तस्यगौरीप्रसीदति ॥ इतिपृथक्पृथक्चत्वारिलिंगतोभद्राणि ॥ ॥ ७ ॥

॥ २०६ ॥ व्रतोद्यापनम् ॥

श्रीः ॥ यथोक्तव्रतंचरित्वातत्संपूर्णतावाप्त्यर्थंयथोक्तव्रतंकुर्यात् ॥ आदौमध्येतथाचांतेव्रतस्योद्यापनंभवेत् ॥ अथोद्यापनदि नेपूर्वोक्तसंभारान्संभृत्यसपत्नीकोयजमानःप्राङ्मुखउपविश्य आचम्यप्राणानायम्यदेशकालौनिर्दिश्यअमुकगोत्रस्यामुकशर्मणो ममेहजन्मनिजन्मांतरेचऐहिकामुष्मिकाखिलमनोरथसिद्धिद्वाराविष्णुसांनिध्यफलप्राप्त्यर्थंश्रीमहाविष्णुप्रीत्यर्थं आचरितस्या चरिष्यमाणस्यचशुक्लैकादशीव्रतस्यसांगतासिद्ध्यासंपूर्णफलावाप्त्यर्थंदेशकालाद्यनुसारतोव्रतोद्यापनाख्यंकर्मकरिष्ये॥ अथवाम याममपद्यावाकृतस्यामुकव्रतस्यसांगतासिद्ध्याकल्पोक्तफलावप्तयेइत्याद्यूह्य तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनां दीश्राद्धमाचार्यवरणंचकरिष्यइतिसंकल्प्यतानिकृत्वाऽचार्यंब्रह्माणंसदस्यंवृत्वासंपूज्यप्रार्थयेत् ॥ अथाचार्योदर्भेष्वासीनोदर्भा न्धारयमाणःआचम्यप्राणानायम्यदेशकालावुत्कीर्त्यअमुकव्रतोद्यापनकर्मणियजमानेनवृतोहमाचार्यकर्मकरिष्ये॥ शरीरशुद्ध्य र्थंभूशुद्ध्यादिभिरात्मानंपावयिष्येइतियथासंभवंसंकल्प्यकृत्वाकलशार्चनांते यदत्रसंस्थितंभूतं० ॥ भूतानिराक्षसावापियेत्रति ष्ठंतिकेचन ॥ तेसर्वेप्यपगच्छंतुयज्ञमत्रकरोम्यहं ॥ इतिगौरसर्षपान्विकीर्ययागभूमिंशुचीवोहव्येतिपंचगव्येनप्रोक्ष्यआपोहिष्ठे तिशुद्धोदकेनचप्रोक्ष्यकृतांजलिस्तिष्ठन् भद्रंकर्णेभिः०स्वस्तिनइंद्रो०देवाआयांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वभूमौ प्रादेशंकुर्यात् ॥ ततोव्रतपीठंस्थाप्यप्रतिमाप्यत्रचारणं ॥ अस्याःसुवर्णप्रतिमायाश्छेदनतापताडनादिदोषपरिहारार्थमभ्युत्तारणं

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

करिष्ये ॥ अश्मन्नूर्जप० रेवद्दिदीहि ॥ इत्यश्युत्तारणंकृत्वापंचामृतैःशुद्धोदकेनचप्रक्षाल्यप्रतिमायाकपोलौस्पृष्ट्वाप्राणप्रतिष्ठां कुर्यात् ॥ ततउपरिनिर्दिष्टवत्सर्वतोभद्रंविष्णुव्रतेशैवेतुलिंगतोभद्रंप्रकल्प्यतत्रब्रह्मादिदेवताआवाहयेत् ॥ ॥ ७ ॥

॥ २०७ ॥ ब्रह्मादिमंडलदेवताः ॥

श्रीः ॥ अमुकव्रतांगत्वेनब्रह्मादिमंडलदेवतास्थापनंकरिष्ये ॥ यथा ॥ मंडलमध्येब्रह्माणं ॥ ब्रह्मजज्ञानमित्यस्याग्निर्ब्रह्मात्रिष्टुप्ब्रह्मावाहनेविनियोगः ॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ भूर्भुवःसुवःब्रह्मणेनमःब्रह्माणमावाहयामि ॥ एवंसर्वत्र ॥१॥ उत्तरे ॥ आप्यायस्वेत्यस्यसोमोग्निर्वासोमोगायत्रीसोमावा०॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ भूर्भु० सोमं ॥२॥ ईशान्यां ॥ अभित्वेत्यस्यविश्वेदेवाईशानोगायत्री ईशानावा० ॥ अभित्वादेवसवितरीशानंवार्याणां ॥ सदावन्भागमीमहे ॥ भूर्भु० ईशानं० ॥३॥ पूर्वे ॥ इंद्रंवोविश्वतइत्यस्यविश्वेदेवाइंद्रोगायत्री इंद्रावा० ॥ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः ॥ अस्माकमस्तुकेवलः॥ भूर्भु० इंद्रं ॥ ॥ ४ ॥ आग्नेय्यां ॥ अग्निंदूतमित्यस्यप्रजापतिरग्निर्गायत्री अग्न्यावा०॥ अग्निदूतंवृणीमहेहोतारंविश्ववेदसं ॥ अस्ययज्ञस्यसुक्रतुं ॥ भू० अग्निं ॥ ५ ॥ दक्षिणे ॥ यमायसोममित्यस्यप्रजापतिर्यमोनुष्टुप् यमावा०॥ यमायसोमंसुनुतयमायजुहुताहविः ॥ यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः ॥ भू० यमं ॥६॥ नैर्ऋत्यां ॥ देवीमहमित्यस्याग्निर्निर्ऋतिस्त्रिष्टुप् निर्ऋत्यावा० ॥ देवीमहंनिर्ऋतिंवंदमानाःपितेवपुत्रंदसयेवचोभिः ॥ विश्वस्ययाजायमानस्यवेदशिरःशिरःप्रतिसूरीविचष्टे ॥ भू० निर्ऋतिं ॥७॥ पश्चिमे ॥ तत्त्वायामीत्यस्यविश्वेदेवावरुणस्त्रिष्टुप् वरुणावा०॥ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरुणे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हवोध्युरुशꣳसमानआयुःप्रमोषीः ॥ भू० वरुणं ॥ ८ ॥ वायव्यां ॥ वायोशतमित्यस्यविश्वेदेवावायुरनुष्टुप् वाय्वावा०॥ वायो शतꣳहरीणांयुवस्वपोष्याणां ॥ उतवातेसहस्रिणोरथआयातुपाजसा ॥ भू० वायुं ॥ ९ ॥ वायुसोममध्ये ॥ अष्टौदेवाइत्यस्य विश्वेदेवाअष्टवसवोविराट्त्रिष्टुप् अष्टवस्वावा० ॥ अष्टौदेवावसवःसोम्यासः ॥ चतस्रोदेवीरजराःश्रविष्ठाः ॥ तेयज्ञंपांतुरजसः परस्तात् ॥ संवत्सरीणममृतꣳस्वस्ति ॥ भूः० अष्टवसून् ॥ १० ॥ सोमेशानयोर्मध्ये ॥ नीलग्रीवाइत्यस्याग्निरेकादशरुद्राअ नुष्टुप्एकादशरुद्रावा ०॥ नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥ भू० एकादशरुद्रे भ्योनमः एकादशरुद्रान्० ॥११॥ ईशानेंद्रयोर्मध्ये ॥ त्यांन्वित्यस्यविश्वेदेवाद्वादशादित्यागायत्री द्वादशादित्यावा०॥ त्यांनु क्षत्रियाꣳअवंआदित्यान्याचिषामहे ॥ सुमृडीकाꣳअभिष्टये ॥ भूः० द्वादशादित्येभ्यो० द्वादशादित्यान्० ॥ १२ ॥ इंद्राग्न्यो र्मध्ये ॥ यावांकशेत्यस्यसोमोश्विनौगायत्रीअश्व्यावा०॥ यावांकशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञंमिमिक्षतं ॥ भू० अश्विभ्यांनमःअश्विनौआ० ॥ १३ ॥ अग्नियमयोर्मध्ये ॥ ओमासइत्यस्यसोमोविश्वेदेवागायत्रीविश्वेदेवावा०॥ ओमासश्चर्ष णीधृतोविश्वेदेवासआगत ॥ दाश्वाꣳसोदाशुषःसुतं ॥ भू० विश्वेभ्योदेवेभ्यो० विश्वान्देवान्० ॥१४॥ यमनिर्ऋतिमध्ये ॥ अभित्यमित्यस्यसोमःसप्तयक्षाःप्रकृतिः सप्तयक्षावा० ॥ अभित्यंदेवꣳसवितारमूण्योःक्रविर्क्रतुमर्चामिसत्यसवसꣳरत्नधामभि प्रियंमतिमूर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपासुवः ॥ भू० सप्तयक्षेभ्यो० सप्तयक्षान्॥ १५ ॥ निर्ऋतिवरुणमध्ये ॥ आयंगौरित्यस्याग्निःसर्पागायत्री सर्पावा० ॥ आयंगौःपृश्निरक्रमीदसदन्मातरंपुनः ॥ पितरंचप्रयन्सुवः ॥ भू० सर्पेभ्योन० सर्पान् ॥१६॥ वरुणवायुमध्ये ॥ ऋतायाडित्यस्यपांत्वित्यंतस्यविश्वेदेवागंधर्वाप्सरसोयजुःगंधर्वाप्सरआवा०॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ऋतावृधावृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसऊर्जोनामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातु ॥ भू० गंधर्वाप्सरोभ्यो०गंधर्वाप्सरसआ० ॥१७॥ ब्रह्मसोममध्ये ॥ यदक्रंदइत्यस्यविश्वेदेवाःस्कंदस्त्रिष्टुप्स्कंदावा० ॥ यदक्रंदःप्रथमंजायमानउद्यन्त्समुद्रादुतवा पुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वन् ॥ भू० स्कंदं०॥१८॥ स्कंदस्योत्तरे ॥ तत्पुरुषायविद्महेचक्रतुंडायधीमहि ॥ तन्नोनंदिःप्रचोदयात् ॥ त्यस्ययाज्ञिक्योदेवताउपनिषदोनंदीश्वरोगायत्री नंदीश्वरा० ॥ तत्पुरुषायविद्महेचक्रतुंडायधीमहि ॥ तन्नोनंदिःप्रचोदयात् ॥ भू० नंदीश्वरं० ॥१९॥ नंदीश्वरस्योत्तरे ॥ यत्तेगात्रादित्यस्यविश्वेदेवाःशूलोभुरिक्त्रिष्टुप् शूलावा०॥ यत्तेगात्रादग्निनापच्यमानादभिशूलंनिहंतस्यावधावति ॥ मातद्भूम्यामातृषन्मातृणेषुदेवेभ्यस्तदुशन्योरातमस्तु ॥ भू० शूलं०॥ २० ॥ शूलस्योत्तरे ॥ काश्यपरसीत्यस्यसोमोमहाकालोयजुः महाकालावा० ॥ ॐ काश्यपरस्यपापांमृध्रं ॥ भू० महाकालं० ॥२१॥ ब्रह्मेशानयोर्मध्ये ॥ द्वामिमौवातौवातइत्यस्यविश्वेदेवादक्षोनुष्टुप् दक्षावा०॥ द्वाविमौवातौवातआसिंधोरापरावतः॥ दक्षंमेअन्यआवातुपरान्योवातुयद्रपः ॥ भू० दक्षं० ॥२२॥ ब्रह्मेंद्रयोर्मध्ये॥ तामग्निवर्णामित्यस्ययाज्ञिक्योदेवताउपनिषदोदुर्गात्रिष्टुप्दुर्गावा० ॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां ॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमः॥ भू० दुर्गायै० दुर्गां ॥२३॥ दुर्गायाःपुरतः ॥ इदंविष्णुरित्यस्यसोमोविष्णुर्गायत्रीविष्णवा०॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपांसुरे ॥ भू० विष्णवे० विष्णुं ॥२४॥ ब्रह्माग्न्योर्मध्ये ॥ उदीरतामित्यस्यविश्वेदेवाःस्वधात्रिष्टुप् स्वधावा० ॥ उदीरतामवरउत्परासउन्मध्यमाःपितरः सोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ भू० स्वधायै० स्वधां ॥ २५ ॥ ब्रह्मयममध्ये ॥ परंमृत्योवित्यस्य विश्वेदेवामृत्युरोगास्त्रिष्टुप् मृत्युरोगावा०॥ परंमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदेवयानात् ॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रजाꣳरीरिषोमोतवीरान् ॥ भू० मृत्युरोगेभ्यो० मृत्युरोगान् ॥ २६ ॥ ब्रह्मनिर्ऋतिमध्ये ॥ गणानांत्वेत्यस्यविश्वेदेवागणप तिर्जगती गणपत्यावा०॥ गणानांत्वागणपतिꣳहवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूति भिःसीदसादनं ॥ भू० गणपतिं ॥२७॥ ब्रह्मवरुणमध्ये ॥ शंनोदेवीरित्यस्यविश्वेदेवाआपोगायत्री अबावा० ॥ शंनोदेवीरभि ष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ भू० अद्भ्योन० अपः ॥ २८ ॥ ब्रह्मवायुमध्ये ॥ मरुतोयस्येत्यस्यविश्वेदेवाम रुतोगायत्री मरुदावा०॥ मरुतोयस्यहिक्षयेपाथादिवोविमहसः ॥ ससुगोपातमोजनः ॥ मरुद्भ्योन० मरुतः ॥२९॥ ब्रह्मणःपादमू लेकर्णिकाधः॥ स्योनापृथिवीत्यस्ययाज्ञिक्योदेवताउपनिषदःपृथिवीगायत्री पृथिव्यावा०॥ स्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः॥ भू० पृथिव्यै०पृथिवीं ॥३०॥ तत्रैव ॥ इमंमेगंगइत्यस्ययाज्ञिक्योदेवताउपनिषदोगंगादिनद्योजगती गंगा दिनद्यावा०॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमꣳसचतापरुष्णिया ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया॥ भू० गंगादिनदीभ्यो० गंगादिनदीः० ॥ ३१ ॥ तत्रैव ॥ धान्नोधान्नइत्यस्यसोमःसप्तसागराःपंक्तिःसप्तसागरावा० ॥ धान्नोधा न्नोराजन्नितोवरुणनोमुंचयदापोअग्नियावरुणेतिशपामहेततोवरुणनोमुंच ॥ भू० सप्तसागरेभ्यो० सप्तसागरान्० ॥३२॥ तत्रैव (तदुपरि) मेरवेनमःमेरुंआ०॥ सोमस्योत्तरतो गदायै गदांआ०॥ ईशानस्यैशान्यां त्रिशूलं॥ इंद्रस्यपूर्वे वज्रं ॥ अग्नेराग्नेय्यांश क्तिं॥ यमस्यदक्षिणेदंडं॥ निर्ऋतेर्नैर्ऋत्यांखड्गं॥ वरुणस्यपश्चिमेपाशं ॥ वायोर्वायव्यांअंकुशंआवाहयामि ॥ इत्यायुधानि ॥८॥ उत्तरेगौतमायनमः गौतमंआ० ॥ ईशान्यांभरद्वाजं॥ पूर्वेविश्वामित्रं॥ आग्नेय्यांकश्यपं ॥ दक्षिणेजमदग्निं॥ नैर्ऋत्यांवसिष्ठं ॥ पश्चिमेअत्रिं ॥ वायव्यांअरुंधतींआ० इत्यृषीन् ८ ॥ पूर्वादिक्रमेण ऐंद्र्यैनमः ऐंद्रींआ० ॥ कौमारीं ॥ ब्राह्मीं ॥ वाराहीं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चामुंडां ॥ वैष्णवीं ॥ माहेश्वरीं ॥ वैनायकींआ० ॥ इत्यष्टौशक्तीः ८ ॥ इतिसर्वतोभद्रदेवताः ॥ अथलिंगतोभद्रेविशेषः ॥ पूर्वादिक्रमेण ॥ असितांगभैरवायनमः ॥ असितांगभैरवमावाहयामि ॥ रुरुभैरवं ॥ चंडभैरवं ॥ क्रोधभैरवं ॥ उन्मत्तभैरवं ॥ कपालभैरवं ॥ भीषणभैरवं ॥ संहारभैरवं चावाहयेत् ॥ पुनःपूर्वादिषुभवं० शर्वं० ईशानं० पशुपतिं० रुद्रं० उग्रं० भीमं० महांतं ॥ पुनःपूर्वादिषु अनंतं० वासुकिं० तक्षकं० कुलिशं० कर्कोटकं० शंखपालं० कंबलं० अश्वतरं० ॥ ईशानपूर्वाद्यंतरालेषुशूलिनं० चंद्रमौलिनं० वृषभध्वजं० त्रिलोचनं० शक्तिधरं० महेश्वरं० शूलपाणिं चावाह्य तदस्तु० गृहावै० नर्यप्रजां० प्रतिष्ठितांइतिप्रतिष्ठाप्य ॥ तत्तन्मंत्रैर्नाममंत्रैर्वाषोडशोपचारैःपूजयेत् ॥ ततोमंडलोपरिधान्यराशौकलशंप्रतिष्ठापयेत् ॥ मही द्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां ॥ पिपृतांनोभरीमभिः ॥ इतिभूमिंस्पृष्ट्वा ॥ ओषधयःसंवदंतेसोमेनसहराज्ञा ॥ यस्मैकरोतिं ब्राह्मणस्तꣳराजन्पारयामसि ॥ धान्यराशिंकृत्वा ॥ आजिघ्रकलशंमह्युरुधारापयस्वत्यात्वाविशंत्विंदवःसमुद्रमिवसिंधवःसा मासहस्रआभंजप्रजयापशुभिःसहपुनर्मावेंशताद्रयिः ॥ कलशंसंस्थाप्य ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमꣳसचतापरुष्णि या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ उदकेनापूर्य ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरीꣳ सर्वभूतानांतामिहोपह्वयेश्रियं ॥ गंधंप्रक्षिप्य ॥ याओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा ॥ मनैनुबभ्रूणांमहꣳशतंधामानिसप्तचं ॥ सर्वौषधीः ॥ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ दूर्वाः ॥ अश्वत्थेवोनिषदनं पर्णेवोवसतिःकृता ॥ गोभाजइत्किलासथयत्सनवथपूरुषं ॥ पंचपल्लवान् ॥ स्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानः शर्मसप्रथाः ॥ सप्तमृदः ॥ याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳहसः ॥ फलं ॥ अग्नेरे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तंश्चंद्रꣳहिरण्यं ॥ अन्द्यःसंभूतमृतंप्रजासु ॥ तत्संभरन्नुत्तरतोनिधाय ॥ अतिप्रयच्छंदुरितंतरेयं ॥ हिरण्यं ॥ बृहस्पतेजुष स्वनोहव्यानिविश्वदेव्य ॥ रास्वरत्नानिदाशुषे ॥ रत्नानि ॥ युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरा सःकवयउन्नयंतिस्वाधियोमनसादेवयंतः ॥ कलशंवस्त्रेणावेष्ट्य ॥ पूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्त्रेवविक्रीणावहाइषमू र्जꣳशतक्रतो ॥ इतितदुपरिपूर्णपात्रंनिधाय ॥ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेह बोध्युरुशꣳसमानआयुःप्रमोषीः ॥ अस्मिन्कलशेवरुणंसांगंसपरिवारंसायुधंससशक्तिकंआवाहयामि ॥ वरुणायनमःइतिपूज येत् ॥ कलशस्यमुखेविष्णुः० ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं ॥ त्वत्तोयेसर्व तीर्थानिदेवाःसर्वेत्वयिस्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सान्निध्यंकुरुदेवेशप्रसन्नोभवसर्वदा ॥ इतिसंप्रार्थ्यकलशेप्रतिमायांमुख्यदेवतांउक्तमंत्रेणसंस्थाप्यषोडशोपचारैःसंपूज्यपुरा णश्रवणादिनारात्रौजागरणंकुर्यात् ॥ इत्यधिवासनं ॥ परदिनेनित्यकर्मनिर्वर्त्यआचार्यः स्थापितदेवतांसंपूज्यहोमसंभाराना दायआचम्यप्राणानायम्यदेशकालौसंकीर्त्यअमुकव्रतोद्यापनेविहितहवनंकरिष्ये ॥ तदंगंस्थंडिलादिसर्वकर्मकरिष्ये ॥ स्थंडिलं गोमयेनोपलिप्यउल्लेख्यउद्धननादिभूसंस्कारंविधायबलवर्धननामानमग्निंप्रतिष्ठाप्यपुष्टंकृत्वा चत्वारिशृंगा० वरदोभव ॥ ततो न्वाधानं ॥ समित्रयमादायश्रद्धए ३ हीत्यादिअमुकव्रतोद्यापनकर्मणियायक्ष्यमाणदेवतास्ताःपरिग्रहीष्यामीत्यादिव्याहृत्यंतमु क्त्वाअत्रप्रधानंअमुकदेवतांअमुकद्रव्यैःअमुकसंख्याकैः ब्रह्मादिमंडलदेवताश्चएकैकयाहुत्याआज्येन आवरणदेवताश्चैकैकाहु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्याआज्येनस्विष्टकृतमित्यादिसमिधोऽग्नावाधायेत्यंतअन्वाधानएषाहदेवइत्यादिव्याहृत्यंतंहुत्वा यजमानः इमान्युपकल्पितह
वनीयद्रव्याणियायक्ष्यमाणादेवतास्ताभ्यस्ताभ्योमयापरित्यक्तानिनममयथादैवतमस्तु ॥ ततउक्तप्रकारेणमुख्यदेवताहोमां
तेमंडलदेवताहोमःसचेत्थं ॥ ब्रह्मणेस्वाहा एवंसवत्र॥ सोमाय० ईशानाय० इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय०
वायवे० अष्टवसुभ्यः० एकादशरुद्रेभ्यः० द्वादशादित्येभ्यः० अश्विभ्यां० विश्वेभ्योदेवेभ्यः० सप्तयक्षेभ्यः० सर्पेभ्यः०
गंधर्वाप्सरोभ्यः० स्कंदाय० नंदीश्वराय० शूलाय० माहाकालाय० दक्षाय० दुर्गायै० विष्णवे० स्वधायै० मृत्युरोगेभ्यः०
गणपतये० अद्भ्यः० मरुद्भ्यः० भूम्यै० गंगादिनदीभ्यः० सप्तसागरेभ्यः० मेरवे० गदायै० त्रिशूलाय० वज्राय० शक्तये०
दंडाय० खड्गाय० पाशाय० अंकुशाय० ४० गौतमाय० भरद्वाजाय० विश्वामित्राय० कश्यपाय० जमदग्नये० वसिष्ठाय०
अत्रये० अरुंधत्यै० ऐंद्र्यै० कौमार्यै० ब्राह्म्यै० वाराह्यै० चामुंडायै० वैष्णव्यै० माहेश्वर्यै० वैनायक्यै० ॥ लिंगतोभद्रेवि
शेषः ॥ असितांगभैरवाय० रुरुभैरवाय० चंडभैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपालभैरवाय० भीषणभैरवाय०
संहारभैरवाय० ॥ भवाय० शर्वाय० ईशानाय० पशुपतये० रुद्राय० उग्राय० भीमाय० महते० ॥ अनंताय० वासुकये०
तक्षकाय० कुलिशाय० कर्कोटकाय० शंखपालाय० कंबलाय० अश्वतराय०॥ शूलिने० चंद्रमौसिने० वृषभध्वजाय० त्रिलो
चनाय० शक्तिधराय० महेश्वराय० शूलपाणये० ॥ इति ॥ ततःस्विष्टकृदादिप्रायश्चित्तहोमांतंसमाप्य यजमानान्वारब्धआ

---

१ केचनब्रह्मणेनमःस्वाहेतिनमःशब्दविशिष्टानेवप्रयुंजतेपरंत्वत्रब्रह्मादीनांमूलमंत्रत्वाभावान्नमःशब्दरहितएवप्रयोगःसाधुः । प्रणवादिचतुर्थ्यं
तंस्वाहाशब्दसमन्वितं ॥ स्यात्पीठदेवताहोमेमंत्रोनाम्नैवकीर्तितः ॥ एवंच नाममंत्रेनमःशब्दराहित्यंमूलमंत्रेतुतद्विशिष्टत्वमितिसंस्काररत्नमालायां ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चार्यःपूर्णाहुतिंजुहुयात् ॥ स्रुचिद्वादशगृहीतमाज्यंगृहीत्वा० अग्नेत्वमिडोसि ॥ धामंतेविश्वंभुवनमाधिश्रितमंतःसमुद्रेहृद्यं१त रायुषि ॥ अपामनीकेसमिथेयआभृतस्तमश्याममधुमंतंतऊर्मिं ॥ सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्तर्षयःसप्तधामप्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वाघृतेनस्वाहा ॥ अद्भ्यःसप्तवतेन्नयेचेदं ॥ सꣳस्रावादिहोमशेषंसमाप्य अग्निंमुख्य देवतांचसंपूज्य कलशोदकेनसकुटुंबंयजमानमभिषिंचेत् ॥ ततोयजमानआचार्यसंपूज्यतस्मैसवत्सांगांदत्वाऋत्विग्भ्यश्चय थाशक्तिदक्षिणांदत्वादेवतायांतुदेवेतिविसृज्यपीठदानंकृत्वा श्रेयःस्वीकृत्यगच्छगच्छेत्यग्निंविसर्जयेत् ॥ व्रतसंपूर्णफलप्राप्त्यर्थं यथाशक्तिब्राह्मणभोजनंसंकल्प्यसंभोज्यभूयसींदक्षिणांदत्वाआशिषोगृहीत्वा व्रतंसुव्रतमस्त्वितिभवंतोब्रुवंत्वितिब्राह्मणान्प्रा र्थयेत् तेचव्रतंसुव्रतमस्त्वितिब्रूयुः ॥ ततः प्रमादात्कुर्वतामित्यादिविष्णुंस्मृत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इतिव्रतोद्यापनविधिः ॥

॥ २०८ ॥ शुक्लैकादशीव्रतोद्यापनम् ॥

श्रीः ॥ देशकालौसंकीर्त्यममअखिलपापक्षयपूर्वकंधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वाराश्रीपरमे० अमुककामनयावाम याचरितशुक्लैकादशीव्रतोद्यापनंकरिष्ये ॥ तदंगविहितंगणेशपूजनाद्याचार्यवरणांतंकृत्वाआचार्यःपूर्वोक्तप्रकारेणसर्वतोभद्रेब्र ह्मादिदेवताआवाह्यसंपूज्यतदुपरिअक्षतपुंजेकेशवादिद्वादशनामांकितं अक्षतपूर्णताम्रमयंतंडुलपूर्णराजतपूर्णपात्रसहितंवाक लशंप्रतिष्ठाप्यतत्रअष्टदलपद्मेदेवताआवाहयेत् ॥ तत्रकर्णिकायाम् भूःपुरुषंआवाहयामि ॥ भुवःपुरुषंआ० ॥ सुवःपुरुषंआ० ॥ भूर्भुवःसुवःपुरुषंआवाहयामि ॥ ततःसुवर्णप्रतिमायां ॥ सहस्रशीर्षा० ऋक् १ ॥ लक्ष्मीयुतंपुरुषंमध्येआवाहयामिस्थापयामिपूज यामिनमः ॥ परितः अग्निं इंद्रं प्रजापतिं विश्वान्देवान् ब्रह्माणं वसुदेवं रामं श्रियं नाममंत्रेणआवाह्य ॥ ततःपूर्वदक्षिणपश्चि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मोत्तरदलाभ्यंतरेषु स्त्रीचतुःसहस्रसहितांरुक्मिणीं १ स्त्रीचतुःसहस्रसहितांसत्यभामां २ स्त्रीचतुःसहस्रसहितांजांबवतीं ३ स्त्रीचतुःसहस्रसहितांकालिंदीं ४ चावाह्य ॥ ततआग्नेयादिकोणेषु ॥ शंखं चक्रं गदां पद्मं आवह्य ॥ पुरतः ॥ सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः ॥ विषपापहरोनित्यमतःशांतिंप्रयच्छमे ॥ इतिगरुडंआवाह्य ॥ परितः पूर्वादिक्रमेणइंद्राद्यष्टौलोकपालान्तत्तन्मंत्रैर्नाममंत्रैर्वावाह्य नर्यप्रजांमेगोपाय० इतिप्रतिष्ठाप्यपूर्वोक्तप्रकारेणपूजयेत् ॥ पुष्पानंतरंअंगपूजांकुर्यात् ॥ दामोदरायनमः पादौपूजयामि माधवाय० जानुनीपू० कामपतये० गुह्यंपू० वामनाय० कटिंपू० पद्मनाभाय० नाभिंपू० विश्वमूर्तये० उदरंपू० ज्ञानगम्याय० हृदयंपू० श्रीकंठाय० कंठंपू० सहस्रबाहवे० बाहूपू० योगिने० चक्षुषीपू० उरगाय० ललाटं० नाकसुरेश्वराय० नासांपू० श्रवणेशाय० श्रवणेपू० सर्वकामदाय० शिखांपू० सहस्रशीर्ष्णे० शिरःपू० सर्वरूपिणे० सर्वांगंपूजयामि ॥ धूपं० दीपं नमस्कारोत्तरंविशेषार्घ्यंदद्यात् ॥ नारायणजगन्नाथलक्ष्मीकांतदयानिधे ॥ गृहाणार्घ्यंमयादत्तं व्रतसंपूर्तिहेतवेइति ॥ ततःपरेहनिप्रातराचार्यआवाहितदेवताःसंपूज्यकर्मसंकल्प्यान्वादध्यात् ॥ सामान्यप्रधानातेत्रप्रधानं पुरुषंपुरुषसूक्तेनप्रत्यृचंआज्येनअमुकावृत्तिसंख्यया अग्निंइंद्रंप्रजापतिंविश्वान्देवान्ब्रह्माणंचाज्येनएकवारं वसुदेवंरामंश्रियं विष्णुंनाममंत्रेणघृताक्तपायसद्रव्येणएकवारं पुनःविष्णुंविष्णोर्नुकमितिषण्मंत्रैःप्रत्यृचंघृताक्तपायसद्रव्येणअग्निंवायुंसूर्यंप्रजापतिंचएकवारंघृताक्तपायसद्रव्येण केशवादिदामोदरांतद्वादशदेवताःनाममंत्रैःएकवारंपायसद्रव्येण स्त्रीचतुःसहस्रसहितांरुक्मिणीं स्त्रीचतुःसहस्रसहितांसत्यभामां स्त्रीचतुःसहस्रसहितांजांबवतीं स्त्रीचतुःसहस्रसहितांकालिंदीं शंखंचक्रंगदांपद्मंगरुडं इंद्राद्यष्टौलोकपालान्ब्रह्मादिमंडलदेवताश्चएकैकयाज्याहुत्यायक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंहुत्वाप्रधान

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

देवताहोमयेत् ॥ ॐ सहस्रशीर्षा० सूक्तेन ॥ अग्नये० इंद्राय० प्रजापतये० विश्वेभ्योदेवेभ्यः० ब्रह्मणेइत्याज्येन ॥ अथ घृताक्तपायसेन वसुदेवाय० रामाय० श्रियै० विष्णवे० ॐ विष्णोर्नुकं० तदस्यप्रियं० प्रतद्विष्णु० ॥ परोमात्रया० वि चक्रमे० त्रिर्देवः० ॥ ॐ भूःस्वाहा ॥ भुवःस्वाहा ॥ सुवःस्वाहा ॥ भूर्भुवःसुवःस्वाहा ॥ अथकेवलपायसेन ॥ ॐ केशवाय स्वाहा ॥ प्रणवःस्वाहाकारश्चसर्वत्र ॥ नारायणाय० माधवाय० गोविंदाय० विष्णवे० मधुसूदनाय० त्रिविक्रमाय० वामना य० श्रीधराय०हृषीकेशाय० पद्मनाभाय० दामोदराय० ॥ अथकेवलाज्येनस्त्रीचतुःसहस्रसहितायैरुक्मिण्यै० स्त्रीचतुःस० सत्यभामायै० स्त्रीचतुःस० जांबवत्यैन० स्त्रीचतुःसहस्रसहितायैकालिंद्यै० शंखाय० चक्राय० गदायै० पद्माय० गरुडाय० ॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० तत्तन्मंत्रैर्वाहुत्वाततोब्रह्मादिमंडलदेवतास्त त्तन्मंत्रैर्नाममंत्रैर्वाकेवलाज्येनहोमयेत् ॥ ततःइमंमेवरुणइत्यादिस्विष्टकृदंतंसमाप्य ॥ ततोयजमानोदेवायप्रापणंनिवेदयेत् ॥ प्रापणशब्देनहविःपदार्थाःपक्कान्नादयश्च ॥ त्वामेकमाद्यंपुरुषंपुराणंनारायणंविश्वसृजंयजामः ॥ त्वयैषभागोविहितोविधेयोगृहा णहव्यंजगतामधीशइतिनिवेद्यतिष्ठेत् ॥ ततःअग्निंत्रिवारंचतुर्वारंवाप्रदक्षिणीकृत्यग्निंधिविश्वाअपद्विषइतिधरण्यांजानुनीनिपा त्यध्रुवसूक्तंपुरुषसूक्तंचजस्वाअष्टौपदानिप्रतिदिशंगच्छेत् एभिर्मंत्रैः ॥ कृष्णायवासुदेवायहरयेपरमात्मने ॥ शरण्यायाप्रमेयाय गोविंदायनमोनमः ॥ नमःस्थूलायसूक्ष्मायव्यापकाव्यापकायच ॥ अनंतायजगद्धात्रेब्रह्मणेनंतमूर्तये ॥ अव्यक्तायाऽखिलेशा यचिद्रूपायगुणात्मने ॥ नमोमूर्तायसिद्धायपरायपरमात्मने ॥ देवदेवायवंद्यायपरायपरमेष्ठिने ॥ कर्त्रेविश्वस्यगोप्त्रेचतत्संहर्त्रे चतेनमः ॥ अथदेवायनिवेदितप्रापणमानीयमूर्ध्निकृत्वा ॥ केवैष्णवाःकेवैष्णवाःकेवैष्णवाइतिउच्चैर्वदेत् ॥ ततःसमानाःप्रति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वदेयुः ॥ वयंवैष्णवाः वयंवैष्णवाः इतित्रिः ॥ ततस्तेभ्यःसमानेभ्योहविर्दत्वास्वय ॐ नमोभगवतेवासुदेवायेतिमंत्रेणइदममृ
तमहंप्राश्नामिइतिप्राश्य ॥ आचम्यप्राणानायम्ययजमानःआचार्योवासिद्धयेस्वाहेतिअग्नौआज्यंजुहुयात् ॥ ततःयतइंद्रभया
महेइत्यनेनआत्मानमभिमंत्रयेत् ॥ ततआचार्यःशुल्बहरणादिकर्मशेषंसमापयेत् ॥ ततोयजमानःसांगतासिद्ध्यर्थंआचार्यादीन्
विध्युक्तप्रकारेणसंपूज्यदक्षिणादिभिःप्रतोष्यआचार्यायश्वेतांसवत्सांसालंकारांगांदद्यात् ॥ ततोयजमानःद्वादशसंख्याकान्ब्रा
ह्मणान्केशवादिद्वादशदेवतास्वरूपान्विभाव्य केशवादिद्वादशनामभिःयथाविभवंसंपूज्यतेभ्यःपक्वान्नपूरितान्वस्त्रतांबूलद
क्षिणादिसहितान्द्वादशकलशान् केशवादिद्वादशनामांकितान्दद्यात्तत्रमंत्रः ॥ पक्वान्नपूरितंकुंभंदक्षिणावस्त्रसंयुतं ॥ ददामि
द्विजवर्यायदेवोनःप्रीयतामिति ॥ देवपदस्थानेकेशवादिनाम्नांऊहःकार्यः ॥ ततःपीठदानम् ॥ ततआचार्यःपात्रांतरेउद्धृतकलशो
दकेनसपत्नीकंयजमानंसमुद्रज्येष्ठाइत्यादिवैदिकैर्मंत्रैः सुरास्त्वामित्यादिपौराणिकैर्मंत्रैर्वैष्णवसूक्तैश्चाभिषिंचेत् ॥ ततःस्नातोय
जमानःअग्निंसंपूज्य यस्यस्मृत्या० मंत्रहीनमितिक्षमाप्य अभ्यारमिदद्रयो० यांतुदेवगणाःसर्वेइतिविसर्जयेत् ॥ कृतस्यकर्मणः
सांगतासिद्ध्यर्थंसदन्नेनदक्षिणादिनाब्राह्मणान्प्रतोष्यआशिषोगृहीत्वाव्रतसंपूर्णतांवाचयेत् ॥ जपच्छिद्रंतपश्छिद्रंयच्छिद्रंव्रत
कर्मणि ॥ सर्वंभवतुमेऽच्छिद्रंब्राह्मणानांप्रसादतः ॥ इतिसंप्रार्थ्य ॥ तेऽच्छिद्रंभवत्वितिवदेयुः ॥ ततस्तान्नमस्कृत्यइष्टजनैः
सोत्सवोभुंजीत ॥ इतिशुक्लैकादशीव्रतोद्यापनम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २०९ ॥ कृष्णैकादश्युद्यापनम् ॥

श्रीः ॥ यजमानःदेशकालौसंकीर्त्यआत्मनःपापक्षयपूर्वकंएकविंशतिपुरुषानुद्धर्तुकामनयालक्ष्मीनारायणप्रीतयेचआचरितस्यकृ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्णैकादशीव्रतस्यसांगतासिद्ध्यर्थंकृष्णैकादशीव्रतोद्यापनंकरिष्येइतिसंकल्प्य ॥ पूर्वोक्तप्रकारेणगणेशपूजामारभ्यआचार्यवरणां तंकर्मकुर्यात् ॥ ततआचार्यःपूर्वोक्तप्रकारेणसर्वतोभद्रेब्रह्मादिदेवताआवाह्यसंपूज्यतदुपरिसंकर्षणादिद्वादशनामांकितंतिलपू र्णराजतपूर्णपात्रयुतंकलशंप्रतिष्ठाप्यतत्रअष्टदलंविलिख्यकर्णिकायां ॥ भूःपुरुषमित्याद्यावाह्यमध्येसहस्रशीर्षेतिसौवर्णींलक्ष्मी नारायणप्रतिमामावाह्य ॥ ततःपूर्वादिदिक्षुप्रत्येकंस्त्रीचतुःसहस्रसहितांरुक्मिणींसत्यभामांजांबवतींकालिंदींचावाह्य ॥ ततःआ ग्नेयादिविदिक्षुगणपतिंदुर्गांक्षेत्राधिपतिंवास्तोष्पतिंचावाह्य ॥ पुनःपूर्वादिदिक्षुब्रह्मजज्ञानमितिब्राह्मणं विष्णोर्नुकमितिविष्णुं बलभद्रम् प्रद्युम्नं त्र्यंबकमितित्र्यंबकम् वसुदेवं रामं अनिरुद्धं वामभागे श्रियं पुरतः राजतंगरुडं ॥ पुनःआग्नेयादिकोणेषु शंखं चक्रं गदां पद्मं ॥ पुनःपूर्वादिक्रमेण विमलां उत्कर्षिणीं ज्ञानां क्रियां योगां प्रह्वां सत्यां ईशानां पृष्ठभागे अनुग्रहाम् ॥ पुनः पूर्वादिक्रमेण इंद्राद्यष्टौलोकपालान् तत्तन्मंत्रैर्नाममंत्रैर्वाआवाह्यपूर्वोक्तप्रकारेणषोडशोपचारैःसंपूज्य पुराणश्रवणादिनारात्रिं निनयेत् ॥प्रातःपुनःपीठदेवताःसंपूज्य पूर्वोक्तप्रकारेणअग्निंप्रतिष्ठाप्यअन्वाधाय ॥अत्रप्रधानम् ॥ संकर्षणादिश्रीकृष्णांतद्वा दशदेवताःघृताक्तपायसेनएकैकयाहुत्यापुरुषंविष्णुंअष्टोत्तरसहस्रसंख्याकघृताक्ततिलाहुतिभिःअष्टोत्तशतसंख्याभिर्वा अग्निं वायुं सूर्यं प्रजापतिं प्रत्येकं स्त्रीचतुःसहस्रसहितांरुक्मिणींसत्यभामांजांबवतींकालिंदींएकवारंपायसेन वसुदेवंरामंश्रियंविष्णुं विष्णोर्नुकमितिषण्मंत्रैः प्रत्यृचंपायसेन गणपतिंदुर्गांक्षेत्राधिपतिंवास्तोष्पतिंब्रह्माणंबलभद्रंप्रद्युम्नंत्र्यंबकंअनिरुद्धंगरुडंशंखंच क्रंगदांपद्मंविमलाद्याअनुग्रहांतादेवताःइंद्राद्यष्टौलोकपालान् ब्रह्मादिमंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ अंगहोमेवरुणंद्वि रित्यादि सामान्यप्रधानांतंकृत्वाप्रधानदेवताहोमयेत् ॥ ॐ संकर्षणायस्वाहा वासुदेवाय० प्रद्युम्नाय० अनिरुद्धाय० पुरुषो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

त्तमाय० अधोक्षजाय० नारसिंहाय० अच्युताय० जनार्दनाय० उपद्राय० हरये० श्रीकृष्णाय० घृताक्तपायसेनएकवारं ॥ सहस्रशीर्षा० घृताक्ततिलैः ॐ भूःस्वाहा भुवःस्वाहा सुवःस्वहा भूर्भुवःसुवःस्वाहा ॥ प्रत्येकंस्त्रीचतुःसहस्रसहितायैरुक्मिण्यै० सत्यभामायै० जांबवत्यै० कालिंद्यै० वसुदेवाय० रामाय० श्रियै० विष्णोर्नुकं० तदस्यप्रि० प्रतद्विष्णु० परोमात्रया० विचक्रमे० त्रिर्देवः० केवलपायसेन० ॥ अथाज्येन० गणपतये० दुर्गायै० क्षेत्राधिपतये० वास्तोष्पतये० तत्तन्मंत्रैर्वा० ब्रह्मणे० बलभद्राय० प्रद्युम्नाय० त्र्यंबकाय० अनिरुद्धाय० गरुडाय० शंखाय० चक्राय० गदायै० पद्माय० विमलायै० उत्कर्षिण्यै० ज्ञानायै० क्रियायै० योगायै० प्रह्वायै० सत्यायै० ईशानायै० अनुग्रहायै० इंद्रायेत्यादिलोकपालेभ्यः ब्रह्मादिमंडलदेवताभ्यश्च हुत्वाततःअंगहोमादिप्रायश्चित्तहोमांतंकर्मनिर्वर्त्य ॥ आचार्यायकृष्णांगांदत्वाद्वादशब्राह्मणान्संकर्षणादिश्रीकृष्णांत द्वादशनामभिःसंपूज्यतेभ्यः दक्षिणादियुतान्तिलपूर्णान्संकर्षणादिद्वादशनामांकितान्कलशान्दद्यात् पीठंदत्वासदन्नेनब्राह्मणान्यथाविभवंसंभोज्यदक्षिणादिभिःप्रतोष्यव्रतसंपूर्णतांवाचयित्वाआशिषोगृहीत्वाइष्टजनैःसहभुंजीत ॥ इतिकृष्णैकादशी ॥

॥ २१० ॥ हरितालिकाव्रतम् ॥

श्रीः ॥ भाद्रतृतीयायांतिथ्याद्युल्लिख्यममपद्व्यासमस्तपापक्षयपूर्वकसप्तजन्मसौभाग्यादिविविधभोगप्राप्तिद्वाराउमामहेश्वरप्रीत्यर्थंआचरितहरितालिकाव्रतसंपूर्णफलावाप्तयेतदुद्यापनंकरिष्ये ॥ तदंगगणपतिपूजनादिकृत्वाचार्यंवृणुयात् ॥ ततोवृताचार्यः उक्तविधिनालिंगतोभद्रेद्रोणपरिमितव्रीहिस्थकलशेरौप्यप्रतिमायांत्र्यंबकंयजामहइतिशिवं सुवर्णप्रतिमायांगौरीमिमायेतिगौरीं पुरतश्चरौप्यमय्यांतत्पुरुषायविद्महेचक्रतुंडायेतिवृषभंसंस्थाप्यषोडशोपचारैःपूजयेत् ॥ तत्रमंत्रः ॥ मंदारमालाकुलितालकायै

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कपालमालांकितेशखराय ॥ दिव्यांबरायैचदिगंबरायनमःशिवायैचनमःशिवाय ॥ तन्मंत्रैर्वा ॥ ततःप्रार्थयेत् ॥ नमःशिवायसांबायपंचवक्त्रायशूलिने ॥ नंदिभृंगिमहाकालगणयुक्तायशंभवे ॥ शिवायैहरकांतायैप्रकृत्यैसृष्टिहेतवे ॥ नमस्तेब्रह्मरूपिण्यैजगद्धात्र्यैनमोनमः ॥ येनकामेनदेवित्वंपूजितासिमहेश्वरि ॥ तंपूर्णंकुरुमेकामंसौभाग्यंचप्रयच्छमे ॥ इतिप्रार्थ्यततःसुवासिनीःसंपूज्यरात्रिंनिनयेत् ॥ प्रातरावाहितदेवताःसंपूज्याग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ अत्रप्रधानंउमांमहेश्वरंचावाहनमंत्रैः प्रत्येकंप्रतिद्रव्यमष्टोत्तरशत १०८ संख्याकाभिः तिल १ यवा २ ज्या ३ हुतिभिः ऋषभंब्रह्मादिमंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्येशेषेणेतिआवाहनोक्तमंत्रैर्होमांतेअंगहोमादिहोमशेषंसमाप्यसंपूजिताचार्यायगांदत्वा षोडशाष्टौवायुग्मानियथाविभवं संपूज्यसौभाग्यद्रव्यवस्त्रदक्षिणायुतानिषोडशशूर्पवायनानि ॥ सौभाग्यारोग्यकामाहंसर्वसंपत्समृद्धये ॥ गौरीगिरीशतुष्ट्यर्थं वायनंतेददाम्यहं ॥ इतिदत्वाद्विजान्संपूज्यतेषामाशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इतिहरितालिकाव्रतम् ॥ ॥ छ ॥

॥ २११ ॥ परशुरामजयंतीव्रतम् ॥

श्रीः ॥ वैशाखशुक्लतृतीयायांनिशाद्वयव्यापिन्यांतिथ्यादिसंकीर्त्यअखिलपापक्षयपूर्वकंचतुर्विधपुरुषार्थसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंआचरितपरशुरामजयंतीव्रतोद्यापनंकरिष्येइतिसंकल्प्य ॥ वृताचार्यःसर्वतोभद्रस्थकलशेहैमंपरशुरामंविष्णोर्नुकमितिमंत्रेणसंपूज्यरात्रौजागरणंकृत्वा ॥ प्रातरग्निंप्रतिष्ठाप्यपरशुरामंघृताक्तपायसद्रव्येणअष्टोत्तरशतसंख्याकाहुतिभिःब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये ॥ ततःपीठंगांचदत्वाब्राह्मणान्भोजयेत् ॥ इतिपरशुरामजयंतीव्रतम् ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २१२ ॥ संकष्टचतुर्थीव्रतम् ॥

श्रीः ॥ मासपक्षाद्युल्लिख्यविद्याधनपुत्रारोग्यमुक्तिसंकटनाशकामेनस्त्रीभर्त्रादिकामनयाचरितसंकष्टीव्रतोद्यापनंकरिष्ये ॥ वृता चार्यःउक्तप्रकारेणसर्वतोभद्रस्थकलशेहैमंगणेशंप्रतिष्ठाप्यपूजयेत् ॥ अथध्यानम् ॥ लंबोदरंचतुर्बाहुंत्रिनेत्ररक्तवर्णकम् ॥ नाना रत्नैःसुवेषाढ्यंप्रसन्नास्यंविचिंतये ॥ आवाहनंगणेशायआसनंविघ्ननाशिने ॥ पाद्यंलंबोदरायेतिअर्घ्यंचंद्रार्धधारिणे ॥ विश्वप्रि यायाचमनंस्नानंचब्रह्मचारिणे ॥ वस्त्रंचशूर्पकर्णायउपवीतंकुजायच ॥ चंदनंरुद्रपुत्रायपुष्पंचगुणशालिने ॥ विकटायेतिधू पंचदीपंरुद्रप्रियायच ॥ नैवेद्यंविघ्ननाशायतांबूलंसिद्धिदायच ॥ फलंसंकष्टनाशायएकदंतायदक्षिणाम् ॥ नीराजनंवामनाय प्रदक्षिणांहरसूनवे ॥ पुष्पांजलिंकुमारायनमोविद्याधरायच ॥ ततः शूर्पपायससंपूर्णरक्तवस्त्रेणवेष्टितं गणेशायनिवेदयेत् ॥ ततश्चंद्रायार्घ्यं ॥ तदानींपंचम्यांवाहोमंकुर्यात् ॥ प्रधानंगणपतिंगणानांत्वेतिमंत्रेणतद्गायत्र्यावादूर्वा १ रक्ताक्षत २ आज्य ३ मोदक ४ पायस ५ द्रव्यैः केवलमोदकैर्वा ॥ प्रतिद्रव्यंअष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिर्वातत्संख्याकाहुतिभिर्यक्ष्ये ॥ ब्रह्मादिदेवताश्चैकैकयाज्याहुत्या एवंहोमंसमाप्य ॥ एकविंशतिब्राह्मणानेकविंशतिनामभिःवस्त्रादिनापूज्यपक्वान्नैःसंतर्पयेत् ॥ गणंजयः गणपतिः हेरंबः धरणीधरः महागणतिः यक्षेश्वरः क्षिप्रप्रसादनः अमोघसिद्धिः अमृतः मंत्रः चिंतामणिः निधिः सुमंगलः बीजं आशापूरकः वरदः शिवः काश्यपः नंदनः वाचांसिद्धिः ढौंढिनायकः ॥ ततः आचार्यायशूर्पस्थैकविंशतिमोद कवायनंरक्तवस्त्रवेष्टितंदद्यात् ॥ मंत्रः ॥ विप्रवर्यनमस्तुभ्यंमोदकान्वैददाम्यहं ॥ आपदुद्धरणार्थायगृहाणद्विजसत्तम ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गणेशंप्रार्थयेत् ॥ अबुद्धमतिरिक्तंवाद्रव्यहीनंमयाकृतं ॥ तत्सर्वंपूर्णतांयातुविघ्नराजनमोस्तुते ॥ ततोगांसोपस्करंपीठंचआचार्यायदत्वाआशिषोगृहीत्वाइष्टजनैःसहभुंजीत ॥ इतिसंकष्टचतुर्थीव्रतम् ॥ ॥ छ ॥ ॥ छ ॥

॥ २१३ ॥ शुक्लचतुर्थ्यांविनायकव्रतम् ॥

श्रीः ॥ गणपतिर्देवता ॥ सुवर्णप्रतिमा ॥ गणानांत्वेतिमंत्रः ॥ ॐ विनायकायनमःइतिनाममंत्रोवा ॥ दूर्वा १ पायस २ लड्डुका ३ हवनद्रव्याणि ॥ होमांतेएकविंशतिब्राह्मणपूजनं ॥ इतिशुक्लचतुर्थ्यांविनायकव्रतविधिः ॥ ॥ छ ॥

॥ २१४ ॥ ऋषिपंचमीव्रतम् ॥

श्रीः ॥ भाद्रपदशुक्लपंचम्यांऋषिपंचमीव्रतम् ॥ मध्याह्नव्यापिन्यांदिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वविद्धायांकार्यम् ॥ तद्यादौ प्रातःदंतधावनपूर्वकंस्नात्वा ॥ ममज्ञानतोज्ञानतोवारजस्वलावस्थायांकृतसंपर्कजनितदुर्योनित्वदोषपरिहारद्वाराशुभफलप्राप्त्यर्थंआचरितऋषिपंचमीव्रतोद्यापनंकरिष्ये ॥ वृताचार्यःसर्वतोभद्रेसप्तकलशेषुएकस्मिन्वाहैमीःअरुंधतीसहिताःसप्तर्षिप्रतिमाःपूजयेत् ॥ ॐ ऋषेमंत्रकृतांस्तोमैःकश्यपोद्वर्धयन्गिरः ॥ सोमंनमस्यराजानंयोजज्ञेवीरुधांपतिरिंद्रायेंदोपरिस्रव ॥ कश्यपायनमः कश्यपंआवाहयामि ॥ ॐ अत्रिर्यद्धामवरोहन्नबीसमजोहवीन्नाधमानेवयोषा ॥ श्येनस्यचिज्जवसानूतनेनागच्छतमश्विनाशंतमेन ॥ अत्रयेनमः अत्रिंआवाहयामि ॥ ॐ एवानःस्पृधःसमजासमत्स्विंद्रारंधिमिथतीरदेवीः ॥ विद्यामवस्तोरवसा गृणंतोभरद्धाजाउततइंद्रनूनं ॥ भरद्वाजायनमः भरद्वाजंआवाहयामि ॥ ॐ प्रसुतोभक्षमकरंचरावपिस्तोमंचेमंप्रथमःसूरिरु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्मृजे । सुतेसातेनयद्यागमंवांप्रतिविश्वामित्रजमदग्नीदमे ॥ विश्वामित्रायनमः विश्वामित्रंआवाहयामि ॥ ॐ अभित्वागोत
मागिराजातवेदोविचर्षणे । द्युम्नैरभिप्रणोनुमः ॥ गौतमायनमः गौतमंआवाहयामि ॥ ॐ गृणानाजमदग्निनायोनावृतस्यसी
दतं । पातंसोममृतावृधा ॥ जमदग्नयेनमः जमदग्निंआवाहयामि ॥ ॐ उतासिमैत्रावरुणोवसिष्ठोर्वश्यांब्रह्मन्मनसोधिजातः।
द्रप्संस्कन्नंब्रह्मणादैव्येनविश्वेदेवाःपुष्करेत्वाददंत ॥ वसिष्ठायनमः वसिष्ठंआवाहयामि ॥ ॐ अत्रैर्यथानुसूयास्याद्वसिष्ठस्या
प्यरुंधती । कौशिकस्ययथासतीतथात्वमपिभर्तरि ॥ अरुंधत्यैनमः अरुंधतींआवाहयामि ॥ इतिऋग्वेदमंत्रैएकेनवासप्तऋषि
इतियाजुषमंत्रेणाष्टप्रतिमासुयुगपदृष्टिभ्योनमःऋषीनावाहयामिइत्येककुंभेवाऽवाह्यनर्यप्रजांमे०सुप्रतिष्ठितमस्तु ॥ आवाहना
दिप्रत्युपचारं ॐ सप्तऋषिभ्यो० नाममंत्रैर्वापूजयेत् ॥ एतेसप्तर्षयःसर्वेभक्त्यासंपूजितामया ॥ ममपापंव्यपोहंतुज्ञानतोज्ञानतः
कृतम् ॥ इतिसंप्रार्थ्यततःवायनंदत्वाक्षमापयेत् ॥ न्यूनातिरिक्तकर्माणिमयायानिकृतानिच ॥ क्षमध्वंतानिसर्वाणियूयंसर्वेत
पोधनाः ॥ ततःकथाश्रवणादिनारात्रिंनिनयेत् ॥ प्रातःअग्निंप्रतिष्ठाप्यअन्वाधाय ॥ प्रधानंअरुंधत्यासहकश्यपादिऋष्या
त्मकपूजामंत्रेण तिल १ व्रीहि २ यव ३ सर्पिर्द्रव्यैः ४ तिलपायसाभ्यांवाप्रतिद्रव्यमष्टोत्तरशत १०८ मष्टाविंशतिर्वा २८
तत्संख्याकाहुतिभिः ब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादि ॥ ततःपुनःप्रतिमापूजांकृत्वासप
त्नीकान्सप्तब्राह्मणान्वस्त्रादिनासंपूज्यतेभ्यःक्रमेणदक्षिणाप्रतिमायुतकलशान्दद्यात् ॥ मंत्रः ॥ प्रतिगृह्णद्विजश्रेष्ठप्रतिमा
दिसमन्वितम् ॥ कलशंऋषिसंप्रीत्यैव्रतसंपूर्तिहेतवे ॥ यदैककुंभेसर्वप्रतिमापूजनंतदासर्वप्रतिमायुतंकलशमाचार्यायदद्यात्॥
अन्येभ्यःदक्षिणावस्त्रयुतान्पक्वान्नपूरितान्कलशान्दद्यात् ॥ ततःसप्तभ्यःसप्तगाआचार्यायएकांगांदत्वाप्रार्थयेत् ॥ सप्तर्षयः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शुभाःश्रेष्ठाःसर्वेषांचशुभप्रदाः ॥ सर्वपापंचमेभ्रंतुज्ञानतोज्ञानतःकृतम् ॥ एतेसप्तर्षयःसर्वेभक्त्यासंपूजितामया ॥ यथोक्त फलदाःसंतुव्रतस्यफलदायकाःइति ॥ ततःआशिषोगृहीत्वाब्राह्मणान्संतर्प्यस्वयंभुंजीत ॥ इतिऋषिपंचमीव्रतं ॥

॥ २१५ ॥ उपांगललितात्रतम् ॥

श्रीः ॥ प्रातःदंतधावनपूर्वकंनद्यादौस्नात्वाशुक्लंवासःपरिधायमंडपिकादिकंकृत्वातिथ्यादिसंकीर्त्य ॥ मयापुत्रपौत्रविद्यारोग्यसुखविजयपुष्ट्यादिकामेन स्त्रीतु अवैधव्यकामनयाउपांगललिताप्रीत्यर्थंअष्टवर्षात्मकाचरितोपांगललितात्रतोद्यापनंकरिष्यइति संकल्प्य ॥ वृताचार्यः एकलिंगोद्भवेकलशोपरिसौवर्णींललिताप्रतिमांपौराणमंत्रैःश्रीसूक्तेनचपूजयेत् ॥ ध्यानम् ॥ नीलकौशेयवसनांहेमाभांकमलासनाम् ॥ भक्तानांवरदांनित्यंललितांचिंतयाम्यहं ॥ पुष्पांजल्यंतेसाग्राअष्टचत्वारिंशत्परिमितादूर्वाहस्तेनादाय ॥ बहुप्ररोहाससततममृताहरितालता ॥ यथेयंललितेमातस्तथामेस्युर्मनोरथाः॥ इतिमंत्रेणाष्टाचत्वारिंशद्वारंसमर्पयेत् ॥ ततःप्रदक्षिणानमस्कारः ॥ प्रातःपुनःसंपूज्यदेव्यैअष्टौवटकान्समर्प्यअग्निंप्रतिष्ठाप्यअन्वाधात् ॥ प्रधानंउपांगललितांगौरीर्मिमायेतिमंत्रेणअष्टोत्तरशत १०८ दूर्वाहुतिभिः नमोदेव्यैमहादेव्यैइतिमंत्रेणअष्टोत्तरशततिल १ सर्पिः २ पंचखाद्ययुतपायसा ३ हुतिभिर्यक्ष्ये ब्रह्मादिमंडलदेवताश्चैकैकयाहुत्यायक्ष्ये ॥ एवंहोमंसंपाद्यअष्टौब्राह्मणान्वस्त्रादिभिःसंपूज्य तेभ्यःपक्वान्नपूरितान्दक्षिणासहितानष्टौकलशान्ददात् ॥ ततआचार्यवस्त्रालंकारादिभिःसंपूज्यसदक्षिणांविंशतिवटकसहितंवायनंददात् ॥ तत्रमंत्रः ॥ पक्वान्नफलसंयुक्तंसघृतंदक्षिणान्वितम् ॥ उपांगललिताप्रीत्यैब्राह्मणायददाम्यहम् ॥ ततःदेवीं ॥ सवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हनाशक्तियुतावरदापूजितामया ॥ मातर्मामनुगृह्याथगम्यतांनिजमंदिरम् ॥ इतिविसृज्यसोपस्करंपीठंगांचआचार्यायदत्वा ब्राह्मणान्सदन्नेनभोजयित्वाआशिषोगृहीत्वास्वयंविंशतिवटकान्भुंजीत ॥ इतिउपांगललिताव्रतम् ॥ ॥ छ ॥

॥ २१६ ॥ मुक्ताभरणसप्तमीव्रतम् ॥

श्रीः ॥ देशकालौसंकीर्त्यममसकलपापक्षयपूर्वकपुत्रपौत्रधनधान्यसौख्यातिशयप्राप्तिद्वाराश्रीसदाशिवप्रीत्यर्थंमुक्ताभरणसप्त मीव्रतंकरिष्येइतिसंकल्प्यपूजांसमाप्यप्रार्थयेत् ॥ महादेवमहाराजप्रीत्यापापप्रणाशन ॥ अस्माकंकुर्वतांपूजांसाधुवासाधुयो जितां ॥ ज्ञानतोज्ञानतोवापिभवतीविहिताचया ॥ संपूर्णयतुविश्वेशोविमलाकोमलास्तुमां ॥ ततःदेवस्यपुरतः ॥ यावज्जीवं मयात्मातुशिवस्यचनिवेदितः ॥ इत्येवंसमयंकृत्वासौवर्णंराजतंसौत्रंवादोरकंदेवाग्रतःसंपूज्यमंत्रेणदोरकंगृह्णीयात् ॥ देवदेव जगन्नाथसर्वसौभाग्यदायक ॥ गृह्णीयांदोररूपंत्वांपुत्रपौत्रप्रवर्धनम् ॥ ततःहस्तेबंधनमंत्रः ॥ सप्तसामोपगीतंत्वांधारयामिज गद्गुरो ॥ सूत्रग्रंथिस्थितंनित्यंधारयामिस्थिरोभवेत्यनेनमंत्रेणहस्तेबद्ध्वा ॥ ततः ॥ दहसर्वाणिपापानितुष्टिंकुरुदयानिधे ॥ प्रसन्नः सन्नुमाकांतदीर्घायुःपुत्रदोभव ॥ इतिजीर्णदोरकोत्तारणंकृत्वाब्राह्मणायएकादशशतसंख्याकान्मंडकान्व्रतदक्षिणायुतान्कृत्वा वायनंदत्वा तदेवद्रव्यंस्वयंभुंजीत ॥ एवंप्रतिमासंशुक्लसप्तम्यांकार्यम् ॥ वर्षांतेहैमींराजतींवामुद्रिकांताम्रपात्रोपरिसंस्थाप्यब्रा ह्मणायदद्यात् ॥ आचार्यायविशेषेणसौवर्णमंगुलीयकंपुष्पकुंकुमतांबूलांजनसूत्रयुतंसदक्षिणंचदद्यात् ॥ ब्राह्मणान्भोज यित्वास्वयंभुंजीत ॥ संतानवृद्धिंलब्ध्वातुशिवलोकेमहीयते ॥ इतिमुक्ताभरणसप्तमी ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २१७ ॥जन्माष्टमीव्रतम् ॥

श्रीः ॥ प्रातःदंतधावनपूर्वकंस्नात्वादेशकालौसंकीर्त्यममअखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वाराअमुककामनयावाआचरितजन्माष्टमीव्रतोद्यापनंकरिष्ये ॥ वृताचार्यःवेद्यांसर्वतोभद्रेप्रस्थतिलोपरिस्थकलशोपरिपूर्णपात्रेरौप्यमये पर्यंके सौवर्णींदेवकीं तदुत्संगेवामनंस्तनपायिनंसौवर्णश्रीकृष्णं इदंविष्णुरितिविष्णोर्नुकमितिवामंत्रेण परितः वसुदेवं बलभद्रं नंदं यशोदां सुभद्रां रोहिणीं विधुं मत्स्यादिदशरूपाणि आदित्यादिग्रहान् अश्विन्यादिसप्तविंशतिनक्षत्राणि देवान् नागान् यक्षान् विद्याधरान् उरगान् यमुनां कालियं कंसं गाः योगनिद्रां सात्यकिं उद्धवं अक्रूरं उग्रसेनादियादवान् शंखं चक्रं गदां पद्मं त्रुटिं कालात्मानं अहोरात्रं मासं संवत्सरं सर्वात्मानं द्वारपालान् पुण्यशीलं सुशीलं जयं विजयं पुरतःगरुडंएवंनाममंत्रैरावाह्यपुरुषसूक्तेनपूजयेत् ॥ ध्यानं ॥ कृष्णंचतुर्भुजंदेवंशंखचक्रगदाधरम् ॥ पीतांबरयुगोपेतंलक्ष्मीयुक्तंविभूषितम् ॥ लसत्कौस्तुभशोभाढ्यंमेघश्यामंसुलोचनम् ॥ ध्यायामिपुंडरीकाक्षंजगदानंदकारकम् ॥ अंगपूजा ॥ कृष्णायनमः पादौपू० संकर्षणाय गुल्फौ कालात्मने जानुनी विश्वकर्मणे जंघे विश्वनेत्राय कटिं पद्मनाभाय नाभिं परमात्मने हृदयं श्रीकंठाय कंठं सर्वास्त्रधारिणे बाहू वाचस्पतये मुखं केशवाय ललाटं सर्वात्मने शिरः ॥ पूजांसमाप्यस्तोत्रंपठेत् ॥ देवस्यजातकर्मषष्ठीपूजादिकृत्वा॥ पुरतःअभयात्रचाशुंठीगुडूचीपिप्पलीशस्त्राणिनिक्षिप्यार्घ्यंदद्यात्॥ चंद्रोदये॥ जातःकंसवधार्थायभूभारोत्तारणायच॥ कौरवाणांविनाशायदैत्यानांनिधनायच ॥ पांडवानांहितार्थायधर्मसंस्थापनायच ॥ गृहाणार्घ्यमयादत्तंदेवक्यासहितोहरे ॥ इतिकृष्णायार्घ्यं ॥ अंगणेभूमौराजतंचंद्रबिंबंसंपूज्यतस्यार्घ्यंजानुभ्यामवनींगत्वा ॥ क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गृहाणार्घ्यमयादत्तंरोहिण्यासहितःशशिन् ॥ रोहिण्यर्घ्यं ॥ दक्षस्यदुहितासाध्वीरोहिणीनामनामतः ॥ सोमेनसहितेदेविगृहा णार्घ्यनमोस्तुते ॥ ततःप्रार्थना ॥ त्राहिमांसर्वगश्रीशहरेसंसारसागरात् ॥ त्राहिमांसर्वपापघ्नदुःखशोकार्णवात्प्रभो ॥ यद्बाल्ये यच्चकौमारेयौवनेयच्चवार्धके ॥ तत्पुण्यंवृद्धिमाप्नोतुपापंहरहलायुधेति ॥ ततोरात्रौजागरणंकुर्यात् ॥ प्रातःस्नात्वादेवंसंपूज्य अग्निंप्रतिष्ठाप्यअन्वादध्यात् ॥ प्रधानंविष्णुंइदंविष्णुरितिमंत्रेण पायस १ तिल २ व्रीहि ३ यव ४ द्रव्यैःप्रतिद्रव्यंअष्टो त्तरशत १०८ संख्याकाहुतिभिः पुनःपंचखाद्येन विष्णोर्नुकमितिमंत्रेणअष्टोत्तरशत १०८ संख्यया पुनःपुरुषसूक्तेनप्रत्यृचं एकैकयाज्याहुत्या महाव्याहृतिभिश्चअष्टाविंशतिसंख्याज्याहुतिभिः परिवारदेवताब्रह्मादिदेवताश्चएकैकयाज्याहुत्या अंगहो मेवरुणंद्विरित्यादि ॥ ततआचार्यसंपूज्यविभवेसतिभूशय्यारौप्यवस्त्रकांचनादिदत्वापीठंचदद्यात् ॥ श्रीकृष्णःप्रतिगृह्णाति श्रीकृष्णोवैददातिच ॥ श्रीकृष्णस्तारकोभाभ्यांश्रीकृष्णायनमोनमः ॥ कृष्णायानंतरूपायदास्यामिप्रतिमामिमां ॥ द्रव्यंवि ष्णुसमुद्भूतमतःशांतिंप्रयच्छमे ॥ व्रतपूर्तयेगांचदद्यात् ॥ इतिजन्माष्टमीव्रतोद्यापनं ॥ ॥ छ ॥ ॥ छ ॥

॥ २१८ ॥ रामनवमीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःअखिलपापक्षयपूर्वकचतुर्विधपुरुषार्थसिद्धिद्वारामआचरितस्यरामनवमीव्रतस्यसांगतासिद्ध येतदुद्यापनंकरिष्ये ॥ ततःपूर्ववत्वृताचार्यःसर्वतोभद्रस्थकलशेसाक्षतपूर्णपात्रेषट्कोणंपद्मंविलिख्य तत्रमध्येहैमंरामंषडक्षरे णत्रयोदशाक्षरेणवामूलमंत्रेण ॥ मूलमंत्रस्तु श्रीरामरामरामेतिषडक्षरमंत्रः १॥ श्रीरामजयरामजयजयरामेतित्रयोदशाक्षरः २॥ अपरोवैदिकस्तु ॥ ॐ भद्रोभद्रयासचमानआगात्स्वसारंजारोऽअभ्येतिपश्चात् ॥ सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभिरा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मर्मस्थात् ॥ इतिमंत्रेणरामंतद्वामतःहैमींसीतां ॥ ॐ जनकात्मजायैनमःइतिनाममंत्रेणचप्रतिष्ठाप्य ॥ परितःषट्कोणेषुक्रमेण दशरथं कौसल्यां लक्ष्मणं भरतं शत्रुघ्नं मारुतिं च नाममंत्रैः प्रतिष्ठाप्य पुरुषसूक्तेनपूजयेत् ॥ पुष्पोत्तरंअंगपूजा ॥ श्रीरामचंद्रायनमः पादौपूजयामि राजीवलोचनाय० गुल्फौ० रावणांतकाय० जानुनी० विश्वामित्रप्रियाय० नाभिं० परमात्मने० हृदयं० श्रीकंठाय० कंठं० सर्वास्त्रधारिणे० बाहू० विश्वमूर्तये० मुखं० पद्मनाभाय० जिह्वां० दामोदराय० दंतान्० सीतापतये० ललाटं० ज्ञानगम्याय० शिरः० सर्वात्मने० सर्वांगं० ॥ नमस्कारमंत्रः ॥ नमोदेवाधिदेवायरघुनाथायशार्ङ्गिणे ॥ चिन्मयानंदरूपायसीतायाःपतयेनमइति ॥ अर्घ्यमंत्रः ॥ दशाननवधार्थायधर्मसंस्थापनायच ॥ राक्षसानांविनाशायदैत्यानांनिधनायच ॥ परित्राणायसाधूनांजातोरामःस्वयंहरिः ॥ गृहाणार्घ्यंमयादत्तंमात्रादिसहितोनघ ॥ इति ॥ ततःपुराणपठनादिनारात्रिं नयेत् ॥ प्रातःअग्निंप्रतिष्ठाप्यअन्वाधाय ॥ वैशेषिकप्रधानहामे रामंआज्य १ पायस २ द्रव्याभ्यां प्रत्येकं अष्टोत्तरशत १०८ संख्याहुतिभिःमूलमंत्रेण जानक्यादिसप्तदेवताः उक्तद्रव्येणअष्टाविंशति २८ संख्याहुतिभिः ॥ ब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये ॥ एवंहोमंसंपाद्य आचार्यसंपूज्यप्रतिमांदद्यात् ॥ तत्रमंत्रः ॥ इमांस्वर्णमयींरामप्रतिमांसमलंकृताम् ॥ श्रीरामप्रीतयेदास्येप्रीतोभवतुराघवइति॥ततःव्रतपूर्तयेगांचदत्वासदक्षिणेनब्राह्मणान्संतर्प्यदक्षिणादिभिःप्रतोष्यआशिषोग्राह्याः

॥ २१९ ॥ रामनामलेखनव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःअनेकपातकक्षयपूर्वकसकलमनोरथावाप्तिद्वाराश्रीरामचंद्रप्रीत्यर्थंमयालिखितंयत्कोटिलक्षामुकावधिकंरामनामतत्संपूर्णतासिद्धयेतदुद्यापनाख्यंकर्मकरिष्येइतिसंकल्प्य ॥ पूर्ववत्वृताचार्यःसर्वतोभद्रस्थकलशेसाक्षतपूर्ण

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पात्रेषोडशमाषात्मकराजतसिंहासनेसुवर्णस्यपलेनतदर्धेनवानिर्मितंरामं वामतःसीतां दक्षिणतः लक्ष्मणं पुरतः हनूमंतंचसौव र्णप्रतिमासुमूलमंत्रेणनाममंत्रेणचआवाह्य पुरुषसूक्तेनचपूजयेत् ॥ परितःसप्तधान्योपरिवारिपूर्णानष्टौकलशान्पूर्वादिक्रमेण संस्थाप्यतेषुलोकेशांस्तत्तन्मंत्रैरावाह्यपूजयेत् ॥ प्रातःअग्निंप्रतिष्ठाप्यान्वाधाय ॥ अत्रलेखनदशांशेनशतांशेनवाहोमः ॥ रामंआज्यद्रव्येणलेखनदशांशेनशतांशेनवामूलमंत्रेण परिवारदेवताः ब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये ॥ एवंहो मंसंपाद्यआचार्यसंपूज्यपीठंदद्यात् ॥ तत्रमंत्रः ॥ सीतासौमित्रिहनुमद्युतंरामंसदक्षिणं ॥ ददामिद्विजवर्यायरामोमेप्रीयता मिति ॥ ततःव्रतसंपूर्तयेगांचदत्त्वाघृतपूरितकांस्यपात्रंतिलपात्रंचयथाशक्तिदशदानानिदत्त्वायोगिराजंबटुकत्रयंचअन्यानपि सद्विजान्सदन्नेनसंतर्प्यदक्षिणादिनाप्रतोष्यआशिषोगृहीत्वाइष्टजनैःसहभुंजीत ॥ इतिरामनामलेखनव्रतम् ॥ ॥ छ ॥

॥ २२० ॥ अदुःखनवमीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःसकलदुःखनाशपूर्वकमभीष्टकामनासिद्धिद्वाराश्रीगौरीप्रीत्यर्थंअदुःखनवमीव्रतंकरिष्ये ॥ इति संकल्प्य ॥ गोमयेनोपलिप्यभूमौवेदींगुडेनलिप्तांइक्षुच्छादितांअपूपपायसादियुतांउपरिमंडपिकायुतांकृत्वातत्रपीठेगौरींगौरीमि मायेतिनमोदेव्याइतिवामंत्रेणसंपूज्यरात्रिंजागरणादिनानयेत् ॥ तद्दिनेहिंसादिरहितमुपोषणंकार्यम् ॥ अशक्तश्चेद्दुग्धफलादि भक्ष्यंअल्पंताशक्तश्चेद्धविष्यान्नं ॥ प्रातःदेवींसंपूज्यसपत्नीकंब्राह्मणंसंपूज्यपंचफलान्वितंवायनंसोपस्करंदद्यात् ॥ तत्रमंत्रः ॥ गौर्यादुःखविनाशिन्याव्रतसंपूर्तिहेतवे ॥ वायनंद्विजवर्यायसहिरण्यंददाम्यहं ॥ इतिअदुःखनवमीव्रतम् ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २२१ ॥ गोपद्मव्रतम् ॥

श्रीः ॥ कार्तिकशुक्लैकादश्यांद्वादश्यांवाकार्यम् ॥ तिथ्यादिसंकीर्त्यआत्मनोयमदंडनिरासपूर्वकपुत्रपौत्रसौभाग्याद्यभिवृद्धिद्वारश्रीगोपालप्रीत्यर्थंपंचवर्षाचरितगोपद्मव्रतोद्यापनंकरिष्ये ॥ वृताचार्यःसर्वतोभद्रस्थकलशेहैमंचतुर्भुजंगोपालंइदंविष्णुरितिमंत्रेणसंपूज्यप्रार्थयेत् ॥ नमस्तेदेवदेवेशनमस्तेगरुडध्वज ॥ नमस्तेविष्णवेतुभ्यंव्रतस्यफलदायक ॥ प्रातरग्निंप्रतिष्ठाप्यअन्वाधाय ॥ प्रधानं गोपालं समित् १ तिल २ पायस ३ आज्य ४ यव ५ द्रव्यैः प्रतिद्रव्यमष्टोत्तरशत १०८ संख्याकाहुतिभिः ॥ ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ ततःक्रमेणद्रव्याणांहोमेमंत्राः ॥ ॐ त्रीणिपदा० अतोदेवा० इदंविष्णु० विष्णोर्नुकं० तत्सवितुर्व० ॥ ततोवायनंप्रतिवर्षक्रमेणसहैववात्रयस्त्रिंशत्संख्याकद्रव्ययुतंदद्यात् ॥ प्रथमेपायसं द्वितीयेमंडकान् तृतीयेमाषवटकान् चतुर्थेअपूपान् पंचमेलड्डुकान्॥ वायनमंत्रः ॥ वायनंतेद्विजश्रेष्ठददामिव्रतपूर्तये ॥ दक्षिणादिसमायुक्तंगोपालःप्रीयतामिति ॥ ततःपंचमिथुनानिवस्त्रादिनासंपूज्यआचार्यायगांचदत्वा ॥ एवमेवलक्षगोपद्मव्रतं हवनेविशेषःतद्दशांशेनशतांशेनवापूर्वोक्तपंचद्रव्यैर्मिलित्वाकार्यम् ॥ वायनंचपूर्वोक्तमंत्रेणैवदद्यात् ॥ अन्यत्समानं ॥ इतिगोपद्मव्रतम् ॥

॥ २२२ ॥ श्रवणद्वादशीव्रतम् ॥

श्रीः ॥ प्रातर्नद्यादौ वरोवरेण्योवरदोवराहोधरणीधरः ॥ अपवित्रंपवित्रंमांकरोतुभगवान्हरिः ॥ इत्यनेनतिलान्विलिप्यस्नात्वानित्यकर्मनिर्वर्त्यसंकल्पयेत् ॥ तिथ्यादिसंकीर्त्यआत्मनःअखिलपापक्षयपूर्वकपिशाचादिदुर्योनिनिरसनद्वाराश्रीविष्णुलोकप्राप्त्यर्थंआचरितश्रवणद्वादशीव्रतोद्यापनंकरिष्येइतिसंकल्प्य ॥ वृताचार्यःचतुर्द्वारोपशोभितमंडपांतर्वेदिकायांपीठदेवताःपू

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जयेत् ॥ आधारशक्त्यैनमः विमलायै० उत्कर्षिण्यै० ज्ञानशक्त्यै० क्रियाशक्त्यै० प्रह्वायै० सत्यायै० मायायै० मध्येपरम
देवतायै० परितइंद्रादिलोकपालांस्तदुपरितत्पूर्णपात्रयुतेकलशे गणपतिं० दुर्गा० क्षेत्रपालं० वास्तोष्पतिं० परितआदित्यादि
नवग्रहदेवताश्चसंपूज्य ॥ तदुपरिसर्वतोभद्रंप्रसार्यतत्रब्रह्मादिदेवताःसंपूज्य तदुपरिसकुशकृष्णाजिनंप्रसार्य तत्रद्रोणपरिमित
तिलपर्वतंकृत्वातदलाभेगोधूमाः तत्रतिलपूरितपूर्णपात्रयुतकलशेद्वादशारयुतपद्मेहैमंवामनंत्रीणिपदेतिमंत्रेणसंपूज्यांगपूजां
कुर्यात् ॥ मत्स्यायनमः पादौपू० कूर्माय० जानुनी० वराहाय० गुह्यं० नृसिंहाय० नाभिं० वामनाय० उदरं० परशुरामाय०
दक्षिणभुजं० दाशरथिरामाय० वामभुजं० कृष्णाय० मुखं० बौद्धाय० कर्णौ० कल्किने० शिरः० ॐ नमोभगवतेवासुदेवाय
सर्वांगंपूज० दधिभक्तनैवेद्यंदत्वाप्रार्थयेत् ॥ नमस्तेदितिपुत्रायनमस्तेकश्यपात्मज ॥ त्रिविक्रमायदेवायवामनायनमोनमः ॥
ततोन्यग्रोधंकद्रुद्रायेत्रिमंत्रेणसंपूज्य ॥ शिक्यदध्यन्नेनयुतंजलपूरितंकरकंचसंपूजयेत् ॥ तत्रक्रमेणमंत्रौ ॥ शिक्योसिदधि
भक्तोसिलंबितोसिमयोपरि ॥ सूत्रेणैवाश्रितोसित्वंवामनःप्रीयतामिति ॥ करकंपूजयिष्यामिसरितांसंगमेजलैः ॥ पंचरत्नसमा
युक्तंतेनतुष्यतुवामनः ॥ ततःसर्वान्प्रार्थयेत् ॥ पर्जन्योवरुणःसूर्यःकेशवःसलिलंशिवः ॥ त्वष्टायमोवैश्रवणःसदापापंहरंतुमे ॥
कथाश्रवणादिनारात्रिंनिनयेत् ॥ प्रातरग्निंप्रतिष्ठाप्यअन्वादध्यात् ॥ वैशेषिकहोमे वामनं पायस १ घृत २ समित् ३ तिलैः ४
प्रतिद्रव्यमष्टोत्तरशत १०८ संख्याकाहुतिभिःपीठदेवताःब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ होममंत्राश्च इरावतीतिमंत्रेण
पायसं त्रीणिपदेत्याज्यं इदंविष्णुरितिसमित् विष्णोःकर्माणीतितिलाः ॥ ततोद्वादशसंख्याकान्विप्रान्वस्त्रादिनासंपूज्यद
ध्यन्नोपवीतगोपीचंदनयुतान्सुगंधजलपूरितान्द्वादशकरकांस्तेभ्योदद्यात्तत्रमंत्रः ॥ सुगंधिजलसंपूर्णदधिभक्तयुतंद्विज ॥ कर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कंतेप्रदास्यामिवामनःप्रीयतामिति ॥ ततः वामनःप्रतिगृह्णातिवामनोवैददातिच ॥ वामनस्तारकोभाभ्यांवामनायनमोनमः ॥ इत्यनेनसोपस्करपीठमाचार्यायदद्यात् ॥ व्रतपूर्तयेगांचदत्वाविप्रान्भोजयेत् ॥ इतिश्रवणद्वादशीव्रतम् ॥ ॥ छ ॥

॥ २२३ ॥ प्रदोषव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःअखिलपापक्षयशत्रुपराजयपूर्वकायुरारोग्यैश्वर्यपुत्रपौत्राद्यभिवृद्धिद्वाराश्रीउमामहेश्वरप्रीत्यर्थं आचरितप्रदोषव्रतोद्यापनंकरिष्ये ॥ वृताचार्यःउक्तप्रकारेणलिंगतोभद्रस्थताम्रकलशेरौप्यपूर्णपात्रयुतेसौवर्णसांबसदाशिवंपुरतोराजतंवृषभंतत्तन्मंत्रैःप्रतिष्ठाप्य ॥ परितःअसितांगभैरवाय १ रुरुभैरवाय २ चंडभैरवाय ३ क्रोधभैरवाय ४ उन्मत्तभैरवाय ५ भीषणभैरवाय ६ संहारभैरवाय ७ कपालभैरवाय ८ ॥ इतिप्रतिष्ठाप्यपूजयेत् ॥ मूलमंत्रेणन्यासंकृत्वापंचब्रह्ममंत्रैःसद्योजातादिभिः पूजयेत् ॥ प्रकारांतरेणपूजनं विष्णुं० ब्रह्माणं० भास्करं० सोमं० पूर्वादिक्रमतःप्रथमावरणे ॥ जयं १ विजयं २ गणपतिं ३ दुर्गां ४ द्वितीये ॥ नंदीश्वरं १ क्षेत्रपालं २ वास्तोष्पतिं ३ वायुं ४ तृतीये ॥ सप्तर्षीन् चतुर्थे ॥ भूतनाथं पंचमे ॥ इंद्रादीन्षष्ठे ॥ कपालिनंसप्तमे ॥ गंधर्वान्अष्टमे ॥ सद्योजातेत्यासनं वामदेवायेतिपाद्यं अघोरायेत्यर्घ्यं तत्पुरुषायेत्याचमनीयं ईशानायेतिस्नानं त्र्यंबकमितिवस्त्रं यज्ञोपवीतंउत्तरीयंच नमःसोमायेतिगंधं नमःशंभवेइत्यक्षतान् इमारुद्रायेतिपुष्पाणि एवापित्रेइतिबिल्वदलानि मानस्तोकेइतिधूपं आतेपितरितिदीपं त्वादत्तेतिनैवेद्यं कद्रुद्रायेतितांबूलं इमारुद्रायस्थिरधन्वनेइतिदक्षिणाम् महिक्षयेणक्षम्येतिमंत्रपुष्पम् यातेद्युदितिनमस्कारः पुनर्नाममंत्रेणअष्टौप्रदक्षिणानमस्कारांश्चकुर्यात् ॥ भवाय १ महादेवाय २ रुद्राय ३ नीलकंठाय ४ शशिमौलिने ५ उग्राय ६ भीमाय ७ ईशानाय ८ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ततोर्घ्यंरजतादिपात्रेक्षीरकुशघृतदधितंडुलसिद्धार्थगंधपुष्पादिक्षिप्त्वासजलंदद्यात् ॥ भयरोगादिदारिद्र्यपापक्षुदपमृत्यवः ॥
ऋणशोकमनस्तापानश्यंतुममसर्वदा ॥ ततःप्रार्थयेत् ॥ प्रसीददेवदेवेशप्रसीदपरमेश्वर ॥ प्रसीदसोमसर्वज्ञप्रसीदकरुणाकर ॥
प्रातरग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ वैशेषिकहोमे उमामहेश्वरंपलाशसमित् १ बिल्वपत्र २ पायस ३ आज्य ४ द्रव्यैः प्रत्येकमष्टोत्तर
शत १०८ संख्याकाहुतिभिः (पक्षे शिवंगौरींच त्र्यंबकंगौरीमिमायेतिमंत्राभ्यांप्रत्येकं पायसाज्याभ्यांवा) पीठदेवताःब्रह्मादि
देवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ ततःपीठंगांचदत्वाब्राह्मणान्भोजयेत् ॥ भूयसींदक्षिणांदत्वाशिषोग्राह्याः ॥ इतिप्रदोषव्रतम् ॥

॥ २२४ ॥ अनंतचतुर्दशीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनोनिखिलपापनिर्मुक्तिपूर्वकोत्तमसिद्धिपुत्रपौत्रसहितविविधभोगधनधान्यपरमगतिप्राप्तिकामन
याचतुर्दशवर्षाचरितानंतव्रतोद्यापनंकरिष्ये इतिसंकल्प्य नित्यवत्स्वयंदेवंसंपूजयेत् ॥ ततोवृताचार्यःसर्वतोभद्रेब्रह्मादिदेव
ताआवाह्यतदुपरिकलशंप्रतिष्ठाप्यतत्रयमुनामावाह्यश्रीसूक्तेननाममंत्रेणवासंपूज्य ॥ तदुपरिअक्षतपूरितपूर्णपात्रंनिधाय तत्रा
ष्टदलंविरच्य तत्रसुवर्णनिर्मितं चतुर्दशग्रंथियुतंअनंतंसहस्रशीर्षेतिमंत्रेणस्थापयेत् ॥ तदुत्तरतःसप्तधान्योपरिविस्तृतशय्यायां
स्वर्णनिर्मितंलक्ष्मीसहितंहैमंहलमुसलयुतंअनंतंदेवं इदंविष्णुरितिमंत्रेणस्थापयेत् ॥ स्वर्णदोरकप्रतिमयोःपुरुषसूक्तेनश्रीमदनं
तायनमइतिनाममंत्रेणपूजावार्षिकवत्कार्या ॥ अथग्रंथिदेवताःपूजयेत्क्रमेण ॥ विष्णुः १ अग्निः २ आदित्यः ३ सहस्राक्षः
४ पितामहः ५ इंद्रः ६ पिनाकी ७ विघ्नेशः ८ स्कंदः ९ सोमः १० वरुणः ११ पवनः १२ पृथ्वी १३ वसवः १४ ॥ ततःश
य्यायांप्रतिमायाःपरितः शंखं १ चक्रं २ गदां ३ पद्मं ४॥तद्बहिःनाममंत्रेण अनंतं १ कपिलं २ दक्षं ३ मनुं ४ प्रजापतिं ५ संकर्षणं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

६ कालं ७ वनमालिनं ८ त्रिविक्रमं ९ अहोरात्रं १० अर्धमासं ११ मासं १२ ऋतून् १३ अयने १४ संवत्सरं १५ इदुवत्सरं १६ अनुवत्सरं १७ वत्सरं १८ प्रजाध्यक्षं १९ अजितं २० सर्वभूतं २१ प्रद्युम्नं २२ अनिरुद्धं २३ श्रीधरं २४ पुरुषोत्तमं २५ वामनं २६ पद्मनाभं २७ विश्वरूपम् २८ त्रिविक्रमम् २९ विष्णुम् ३० अच्युतम् ३१ ॥ तद्वहिःअष्टवसून् ८॥३२ तद्वहिःएकादशरुद्रान् ११–३३ तद्वहिःद्वादशादित्यान् १२–३४ तद्वहिःनवग्रहान् ९–३५ तद्वहिःअष्टभैरवान्८–३६ तद्वहिःमेषादिद्वादशराशीन् १२–३७ तद्वहिःअश्विन्यादिनक्षत्राणि २८–३८ तद्वहिःब्राह्म्यादिसप्तमातृः ७–३९ तद्वहिःचैत्रादिद्वादशमासान् १२–४० तद्वहिर्दीप्त्यादिशक्तीः४१ तद्वहिर्विष्कंभादियोगान्२७–४२ आवाह्य ॥ पीठपरितःफलपक्वान्नपूरितान्चतुर्दशकुंभांश्चतुर्दशना मभिःस्थापयेत्पूजयेच्च॥तेचमंत्राः अनंतायनमः १ संकर्षणाय २ कमलाय ३ शेषाय४ वासुदेवाय ५ विश्वनाथाय ६ विश्वरूपाय ७ पद्मनाभाय ८ दामोदराय ९ जगन्नाथाय १० चतुर्भुजाय ११ श्रीकंठाय १२ केशवाय १३ सर्वात्मने १४ ॥ नमस्तेदेवदे वेशनमस्तेधणीधर॥ नमस्तेसर्वनागेंद्रअनंतायनमोनमइतिप्रार्थना॥ ॥ वैशेषिकहोमे श्रीमदनंतमश्वत्थसमित् १ तिल २ व्रीहि ३ यव ४ घृत ५ पायस ६ द्रव्यैः प्रत्येकमष्टोत्तरशत १०८ संख्याकाहुतिभिः पीठदेवताःआवरणदेवताश्चैकैकयाज्याहुत्या पायसाज्याहुत्यावा ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ स्थापनमंत्रैर्होमः॥ केचिद्विवैवहोममिच्छंति॥ प्रातर्ब्राह्मणभोजन मात्रंदिवैवसर्ववा ॥ ततःपीठंसंपूज्यवस्त्रादिनाआचार्यसंपूज्यपीठंदद्यात्॥ तत्रमंत्रः ॥ प्रतिगृह्णद्विजश्रेष्ठसमस्तफलदायक ॥ त्वत्प्रसादाददंविप्रमुच्येयंभवबंधनात् ॥ अनंतःप्रतिगृह्णातिअनंतोवैददातिच ॥ अनंतस्तारकोभाभ्यामनंतायनमोनमः ॥ ततःचतुर्दशब्राह्मणान्वस्त्रादिनासंपूज्यपक्वान्नादिनाभोजयेत् ॥ इत्यनंतचतुर्दशीव्रतम् ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २२५ ॥ वैकुंठचतुर्दशीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःसर्वपापक्षयपूर्वकशिवपदप्राप्तिकामनयाऽचरितवैकुंठचतुर्दशीव्रतोद्यापनंकरिष्ये ॥ वृताचार्यः लिंगतोभद्रस्थकलशेहैमंविश्वेश्वरंपूजयेत् ॥ प्रातरग्निंप्रतिष्ठाप्यघृताक्तातिलैःअष्टोत्तरशतं ॐ नमःशिवायेतिमंत्रेणहुत्वाव्रतपूर्त येगांपीठदानंआचार्यपूजनंब्राह्मणेभ्योदक्षिणावायनादिदत्वासंभोज्याशिषोगृह्णीयात् ॥ इतिवैकुंठचतुर्दशीव्रतम् ॥ ॥ ७ ॥

॥ २२६ ॥ शिवरात्रिव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःसर्वपापक्षयपूर्वकमक्षयभोगमोक्षप्राप्त्यर्थंआचरितशिवरात्रिव्रतोद्यापनंकरिष्ये ॥ वृताचार्यः अन्यैर्द्वादशब्राह्मणैःसहपूजामारभेत् ॥ द्वादशलिंगोद्भवेपीठेउक्तविधिनाब्रह्मादिदेवताःसंपूज्य ॥ तत्रमध्यमकुंभेउमामहेश्वरंत्र्यं बकमितिमंत्रेणप्रतिष्ठाप्यपुरतोराजतंवृषभंचप्रतिष्ठापयेत् ॥ द्वादशब्राह्मणाःद्वादशलिंगस्थकलशेषुद्वादशप्रतिमाःपूजयेयुः ॥ तत्रप्राच्यां महेशं अघोरं पशुपतिं ॥ दक्षिणस्यां पंचवक्त्रं उग्रं रुद्रं ॥ पश्चिमायां भवं शर्वं शंभुं ॥ उत्तरस्यां शिवं भीमं भीमपरा क्रमं ॥ प्रतिकलशंपरितोलोकपालान् ॥ वैशेषिकहोमे ॥ उमामहेश्वरं पायस १ बिल्वपत्र २ तिल ३ दूर्वा ४ घृत ५ द्रव्यैः प्रत्येकं अष्टोत्तरशत १०८ संख्याकाहुतिभिः ॥ द्वादशकलशस्थदेवताःअष्टाष्टसंख्याकाहुतिभिस्तैरेवद्रव्यैः ॥ परिवारदेवताःब्रह्मा दिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ एवंहोमंसंपाद्यदेवतांपूजयेत् ॥ शंभोप्रसीददेवेशसर्वलोकेश्वरप्रभो ॥ तवरूपप्रदानेनममसंतु मनोरथाः ॥ चतुर्दशनामानि ॥ अजैकपादहिर्बुध्न्योभवःशर्वउमापतिः ॥ रुद्रःपशुपतिःशंभुर्वरदःशिवईश्वरः ॥ महादेवोहरोभी

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मोनामान्येवंचतुर्दश ॥ एतैर्होमःप्रकर्तव्यःकुंभदानेपितान्स्मरेत् ॥ (पक्षे उमायुक्तशिवोदेवता त्र्यंबकंगौरीमिमायेतिमंत्रौतिल व्रीहिपायसयवद्रव्याणि ॥ अजैकपादादिनामभिश्चतुर्दशाहुतिसंख्याकोबिल्वपत्रैर्होमः)॥ अन्यत्समानं ॥ इतिशिवरात्रिव्रतम् ॥

॥ २२७ ॥ वटसावित्रीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यममभर्तुःपुत्रादीनांचआयुरारोग्यैश्वर्यादिप्राप्तिपूर्वकमिहजन्मनिजन्मांतरेचआत्मनःअवैधव्यप्राप्तयेआ चरितवटसावित्रीव्रतोद्यापनंकरिष्येइतिसंकल्प्य ॥ वृताचार्योवटमूलेगृहेवामृदावेदींविधायतत्रसर्वतोभद्रंविरच्यतत्रब्रह्मादिदे वताःसंपूज्यतत्रकलशद्वयंप्रतिष्ठाप्यतत्रैकस्मिन्कलशे हैमंब्रह्मजज्ञानमितिमंत्रेणब्रह्माणं गायत्रीमंत्रेणहैमींसावित्रींचप्रतिष्ठाप्य तदुत्तरतोद्वितीयकुंभेपलादधिकरजतस्यराजतपर्यंकेहैमीः सत्यवत्सावित्रीयमनारदप्रतिमाःनाममंत्रैरावाह्य पुरतःकाष्ठभारं कुठारंचहैमंराजतंवानिधायपूजयेत् ॥ अशक्तावेकस्मिन्कलशेसर्वेषांपूजनं ॥ अर्घ्यंदद्यात् ॥ ॐकारपूर्विकेदेविवीणापुस्तक धारिणि ॥ वेदमातर्नमस्तुभ्यमवैधव्यंप्रयच्छमे ॥ पतिव्रतेमहाभागेभर्तुश्चप्रियवादिनि ॥ अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते ॥ पुत्रान्पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोस्तुते ॥ प्रातरग्निंप्रतिष्ठाप्यअन्वाधाय ॥ सावित्रींगायत्रीमंत्रेणपायस १ घृत २ दूर्वा ३ तिल ४ व्रीहि ५ द्रव्यैःप्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः ॥ ब्रह्माणं धर्मराजं नारदंचव्याहृतिमंत्रेण तिल १ व्रीहि २ यव ३ द्रव्यैः प्रत्येकमष्टोत्तरशत १०८ संख्याकाहुतिभिः ॥ ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये॥ शूर्पवायनमंत्रः ॥ सोप स्करंद्विजश्रेष्ठव्रतसंपूर्तिकारकम् ॥ वायनंतेप्रयच्छामिसावित्रीप्रीयतामिति ॥ रात्रावरुंधतींदृष्ट्वासंपूज्यार्घ्यंदद्यात् ॥ अरुंधति नमस्तेस्तुवसिष्ठस्यप्रियेशुभे ॥ पुत्रान्देहिसुखंदेहिगृहाणार्घ्यंनमोस्तुते ॥ इतिदत्वाभुंजीत ॥ इतिवटसावित्रीव्रतम् ॥ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २२८ ॥ कोजागरव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःस्वकुलस्यचाखंडलक्ष्मीप्राप्तिपूर्वकसुखादिप्राप्तयेलक्ष्मीप्रीत्यर्थकोजागरव्रतंकरिष्ये ॥ रात्रौमं डलेसकुमिवतितउनेतिमंत्रेणलक्ष्मीं० इंद्रनरोनेमधिताहवंतेयत्पार्यायुनजतेधियुक्ताः ॥ शूरोनृषाताशर्वसश्चकानआगोमतिव्र जेभजात्वंनः ॥ इतिमंत्रेण मत्तैरावतस्थमिंद्रमावाह्यपूजयेत् ॥ परितोदीपान्घृतेनतैलेनवालक्षंतदर्धतदर्धंवायथाशक्तिवाद त्वावीथीचतुष्पथेवादत्वानारिकेलोदकमात्रंप्राश्याक्षैर्दीव्यन्नुत्सवेनरात्रिंनिनयेत् ॥ प्रातर्घृतशर्करापायसादिनाब्राह्मणान्संत र्प्यदक्षिणांदत्वाऽशिषोगृहीत्वाइष्टजनैःसहभुंजीत ॥ इतिकोजागरव्रतम् ॥ ॥ छ ॥ ॥ छ ॥

॥ २२९ ॥ सोमवत्यमावास्याव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःअवैधव्यपुत्रपौत्रप्राप्तिपूर्वकमतुलसौभाग्यसिद्धिद्वाराश्वत्थरूपीनारायणप्रीत्यर्थंआचरितस्यसो मवत्यमावास्याव्रतस्यसांगतासिद्ध्येतदुद्यापनाख्यंकर्मकरिष्ये इतिसंकल्प्य वृताचार्यःसर्वतोभद्रस्थकलशेरौप्यमयपीठेसौवर्णा श्वत्थाधोहैमंलक्ष्मीनारायणंइदंविष्णुरितिमंत्रेणप्रतिष्ठाप्यपूजयेत् ॥ मूलतोब्रह्मरूपायेतिपुरुषसूक्तेनवापूजयेत् ॥ प्रातरग्निंप्रति ष्ठाप्यान्वादध्यात् ॥ लक्ष्मीनारायणमश्वत्थसमित् १ पायस २ तिल ३ द्रव्यैःप्रत्येकमष्टोत्तरशत १०८ संख्याकाहुतिभिः ब्रह्मादिमंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ आचार्यपूजनंपीठदानंवायनदानंब्राह्मणभोजनंचकुर्यात् ॥ ॥ छ ॥

॥ २३० ॥ पिठोराव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःस्वकुलस्यचसंतत्यविच्छेदपूर्वकपुत्रपौत्रलक्ष्मीसुखाद्यभिवृद्ध्येसप्तवर्षावध्याचरितपिठोराव्रत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्यसंपूर्णतासिद्ध्यर्थंचतुःषष्टियोगिनीस्वरूपासप्तमातृकाप्रीत्यर्थंतदुद्यापनाख्यंकर्मकरिष्ये ॥ वृताचार्यःसर्वतोभद्रेसप्तकलशेषु ब्राह्म्यादिसप्तमातरः ॥ ॐ जज्ञानंसप्तमातरोवेधामंशासतश्रिये ॥ अयंध्रुवोरयीणांचिकेतयत् ॥ इत्यनेनआवाह्यपूजयेत् ॥ तदुत्तरेकलशेचतुःषष्टियोगिनीःआवाहयेत् ॥ अन्वाधाने ॥ सप्तमातृःअष्टोत्तरशतमाज्याहुतिभिःयोगिनीर्ब्रह्मादयश्चैकैकयाज्याहुत्या ॥ पीठदानमंत्रः ॥ सोपस्करंचकलशंगृहाणद्विजसत्तम ॥ प्रीयतांमातरोमह्यंलोकानांस्थितिहेतवः ॥ इतिपिठोराव्रतम् ॥

॥ २३१ ॥ सूर्यव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनोरोगक्षयपुत्रलाभादिप्राप्तिपूर्वकाभीष्टकामनासिद्ध्यर्थंवर्षात्मकसूर्यव्रतोद्यापनंकरिष्ये ॥ उक्तप्रकारेणवृताचार्योमध्याह्नेसर्वतोभद्रेकलशंप्रतिष्ठाप्यतदुपरिपूर्णपात्रंनिधायतत्रद्वादशारंकमलंरौप्यमयंरथं तदुपरिहैमंसंज्ञास

---

१ चतुःषष्टियोगिन्यस्तु—दिव्ययोगिनीं १ महायोगिगीं २ सिद्धयोगिनीं ३ गणेश्वरीं ४ प्रेताक्षीं ५ डाकिनीं ६ कालीं ७ कालरात्रिं ८ निशाचरीं ९ ॐकारीं १० रुद्रवेतालीं ११ ह्रींकारीं १२ भूतडांवरीं १३ ऊर्ध्वकेशीं १४ विरूपाक्षीं १५ शुष्कांगीं १६ नरभोजनां १७ भराडीं १८ वीरभद्रां १९ धूम्राक्षीं २० कलहप्रियां २१ राक्षसीं २२ घोररक्ताक्षीं २३ विरूपां २४ भयंकरीं २५ भासुरीं २६ रौद्रवेतालीं २७ श्रीपर्णीं २८ त्रिपुरांतकां २९ भैरवीं ३० ध्वंसिनीं ३१ क्रोधिनीं ३२ दुर्मुखीं ३३ प्रेतवाहिनीं ३४ कंटकीं ३५ त्राटकीं ३६ यमदूतीं ३७ करालीं ३८ खड्गांगीं ३९ दीर्घलंबोष्ठीं ४० मालिनीं ४१ मंत्रयोगिनीं ४२ कालाग्निगृहिणीं ४३ चक्रीं ४४ कंकालीं ४५ भुवनेश्वरीं ४६ स्फाराक्षीं ४७ कार्मुकीं ४८ लौकिकीं ४९ काकदृष्टिं ५० भक्षणीं ५१ अधोमुखीं ५२ प्रेरणीं ५३ व्याघ्रीं ५४ कंकणीं ५५ प्रेतभक्षणीं ५६ वीरकौमारिकां ५७ चंडां ५८ वाराहीं ५९ मुंडधारिणीं ६० कामाक्षीं ६१ उड्डाणीं ६२ जालंधरां ६३ महालक्ष्मीं ६४ ॥ इति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हितंसहस्रकिरणंआसत्येनेतिमंत्रेणप्रतिष्ठाप्य परितोद्वादशदलेषुद्वादशमासाधिपान्क्रमेणपूजयेत् ॥ मित्रं १ विष्णुं २ वरुणं ३ सूर्यं ४ भानुं ५ तपनं ६ इंद्रं ७ रविं ८ गभस्तिं ९ यमं १० हिरण्यरेतसं ११ दिवाकरं १२ ॥ अर्घ्यमंत्रः ॥ नमःसहस्रकिरणसर्वव्याधिविनाशन ॥ गृहाणार्घ्यमयादत्तंसंज्ञयासहितोरवे ॥ अन्वाद्ध्यात् ॥ संज्ञासहितंसहस्रकिरणंपायसद्रव्येणाष्टोत्तरशतसंख्याकाहुतिभिःद्वादशपरिवारदेवताःब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ ततोद्वादशब्राह्मणान्संतर्पयेत् ॥ इति ॥

॥ २३२ ॥ आशादित्यव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःसकलरोगनिरसनपूर्वकपुत्रपौत्रसकलाभीष्टसिद्धिद्वारासवितृप्रीत्यर्थंआशादित्यव्रतंकरिष्ये ॥ तत्रमंत्रः ॥ यथाशाविमलाःसर्वास्तवभास्कररश्मिभिः ॥ तथाशाविमलामह्यंकुरुनित्यंममार्घ्यतः ॥ नमोस्तुतेपापविनाशनाय विश्वात्मनेसप्ततुरंगमाय ॥ सामर्ग्यजुर्धामनिधेविधात्रेभवाब्धिपोतायनमःसवित्रे ॥ अनेनमंत्रेणमासाधिपनाममंत्रेणचपूजा कार्या ॥ मासाधिपनामानि सूर्यः १ धाता २ वरुणः ३ माधवः ४ हरिः ५ रविः ६ रुद्रः ७ भर्गः ८ स्वर्णरेताः ९ अर्यमा १० भानुः ११ भास्करः १२ ॥ वृताचार्यःसर्वतोभद्रेरक्तवस्त्रवेष्टितंताम्रकलशंतत्रपूर्णपात्रेद्वादशारंकमलंविरच्यतन्मध्येरौप्यरथेहैमंसवितारं आसत्येनेतिमंत्रेणसंस्थाप्यपरितोद्वादशदलेषुपूर्वोक्तान्द्वादशमासाधिपान्प्रतिष्ठाप्यउक्तप्रकारेणपूजयेत् ॥ ततोग्निंप्रतिष्ठाप्यहोमयेत् ॥ सवितारंपायस १ द्रव्येणाष्टोत्तरशत १०८ संख्याकाहुतिभिः ॥ मासाधिपद्वादशदेवताः ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ अत्रपायसपूरिततताम्रपात्रदानमुक्तं ॥ होमःकृताकृतः ॥ इत्याशादित्यव्रतम् ॥ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २३३ ॥ सोमवारव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःअशेषपापक्षयपूर्वकसत्पुत्रप्राप्तिधनधान्यैश्वयादिवृद्धिद्वाराऽमुककामनयावाचरितस्यसोमवा
रव्रतस्यसांगतासिद्ध्येतदुद्यापनंकरिष्ये ॥ वृताचार्यःलिंगतोभद्रंविरच्यतत्रब्रह्मादिदेवताआवाह्य तदुपरिकलशंपूर्णपात्रेहैमंशि
वंत्र्यंबकमितिमंत्रेण हैमींगौरींचगौरीमिमायेतिमंत्रेणपुरतोराजतंवृषभंतत्पुरुषायविद्महेचक्रतुंडायेतिमंत्रेणप्रतिष्ठाप्य पुरतः
पूर्वादिक्रमेण अनंतं १ सूक्ष्मं २ शिवं ३ उत्तमं ४ त्रिमूर्तिं ५ रुद्रं ६ श्रीकंठं ७ शिखंडिनं ८ ॥ पुनराग्नेयादिविदिक्षु गणेशं १
मातृः २ दुर्गां ३ क्षेत्रपालं ४ पुनःपूर्वादिदिक्षु लोकेशांस्तत्तन्मंत्रैःप्रतिष्ठाप्यपूजयेत् ॥ प्रातरग्निंप्रतिष्ठाप्यान्वाधध्यात् ॥ सोमं
शिवं त्र्यंबकमितिमंत्रेणपलाशसमिद्भिः आप्यायस्वेतिमंत्रेणपृषदाज्येन त्वंसोमासीतिमंत्रेण यव १ व्रीहि २ पायस ३ तिल ४
आज्य ५ द्रव्यैःप्रत्येकमष्टोत्तरशत १०८ संख्याकाहुतिभिः ॥ गौरींचत्रिमध्वाक्तदूर्वाभिस्तावतीभिःपरिवारदेवताब्रह्मादिदेवता
श्चैकैकयाज्याहुत्यायक्ष्ये ॥ ततःपीठंव्रतपूर्तयेधवलांगांचआचार्यायदत्वाआशिषोगृहीत्वास्वयंभुंजीत ॥ इतिसोमवारव्रतम् ॥

॥ २३४ ॥ शिवमुष्टिव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यममेहजन्मनिअखिलपापक्षयपूर्वकदुःखदारिद्र्यनाशविपुलसुखसौभाग्यैश्वर्यपुत्रपौत्रादिप्राप्त्यर्थंश्रीशि
वप्रीत्यर्थंपंचवर्षात्मकंपंचधान्येनशिवमुष्टिव्रतंकरिष्ये ॥ मंत्रपुष्पांतेधान्यंसमर्प्य ॥ वृताचार्यः एकलिंगोद्भवपीठेकलशंसंस्था
प्यराजतंपूर्णपात्रंनिधायतत्रहैमींउमेशप्रतिमांराजतंवृषभंसंस्थाप्यलोकेशानावाह्यपूर्ववत्पूजयेत् ॥ सुवर्णनिर्मितंधान्यंकृत्वापंच

१ प्रथमेशालितंदुलान् १ द्वितीयेयवान् २ तृतीयेगोधूमान् ३ चतुर्थेचणकान् ४ पंचमेमुद्गान् ५ एकैकंपंचप्रस्थंप्रस्थंवाअशक्तौनिष्किंचनेनन्यूनंग्राह्यं ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संख्ययात्रीणिएकैकंवासमर्पयेत् ॥ सुवर्णबिल्वदलानिअथवारौप्यमयानिकृत्वाधान्यसंख्ययासमर्पयेत् ॥ अग्निंप्रतिष्ठाप्यान्वा
दध्यात् ॥ उमेशं समित् १ तिल २ आज्य ३ द्रव्यैःगायत्रीमंत्रेणअष्टोत्तरशतसंख्याहुतिभिःलोकपालान्ब्रह्मादिदेवताश्चै
कैकयाज्याहुत्यायक्ष्ये ॥ ततःशिवायपंचरत्नादिसमर्पयेत् ॥ इतिशिवमुष्टिव्रतम् ॥ ॥ छ ॥ ॥ छ ॥

॥ २३५ ॥ मंगलागौरीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनोऽवैधव्यपुत्रपौत्राद्यैहिकनानाविधभोगप्राप्तिपूर्वकगौरीलोकप्राप्त्यर्थंआचरितंयत्पंचवर्षात्मकं
मंगलागौरीव्रतंतत्संपूर्णफलावाप्तयेतदुद्यापनंकरिष्ये॥ वृताचार्यःएकलिंगोद्भवेब्रह्मादिदेवतास्थापनपूर्वकंद्दषदुपरिकलशंप्रतिष्ठा
प्यतत्रहैमींगौरींगौरीमिमायेतिमंत्रेणप्रतिष्ठाप्यपूजयेत् ॥ परितःपिष्टजान्डमर्वाकारान्षोडशतंतुवर्तियुतान्दीपान्प्रज्वालयेत्॥
प्रातरग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ गौरीं घृत १ तिल २ अक्षता ३ बिल्वदल ४ द्रव्यैःप्रतिद्रव्यमष्टोत्तरशत १०८ संख्याका
हुतिभिःब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ दंपतीसंपूज्यसौभाग्यद्रव्यवस्त्रदक्षिणाफलतांबूलादिसहितंपक्वान्नपूरितवंश
पात्रं उपायनमिदंद्रव्यमितिमंत्रंपठंस्तद्दत्वाततआचार्यसंपूज्यरौप्यपात्रेसुवर्णवर्तिसंयुतंदीपंकृत्वाचार्यायदत्वासोपस्करंपीठंव्रत
पूर्तयेगांचदत्वाताम्रपात्रंपक्वान्नपूरितंवस्त्रादियुतंमात्रेदत्वापरमान्नेनभूदेवान्संतर्पयेत् ॥ इतिमंगलागौरीव्रतम् ॥ ॥ छ ॥

॥ २३६ ॥ भौमवारव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यअभीष्टकामनासिद्ध्यर्थंआचरितंयद्भौमवासरव्रतंतत्संपूर्णफलावाप्तयेतदुद्यापनंकरिष्येइतिसंकल्प्यवृता
चार्यउक्तविधिनासर्वतोभद्रेकलशप्रतिष्ठांतंकृत्वा तत्रहैमंमंगलमुक्तपूजाविधिनासंपूज्य (ॐ ह्रींश्रीमंगलायनमः अयंमूलमंत्रः॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अंगारकायविद्महेभूमिपुत्रायधीमहि ॥ तन्नोभौमःप्रचोदयात्इयंगायत्री ॥ अग्निर्मूर्धेतिवैदिकोमंत्रः) सुवर्णपुष्पैर्विशेषपूजांकृत्वा ॥ मंगलोभूमिपुत्रश्चऋणहर्ताधनप्रदः ॥ स्थिरासनोमहाकायःसर्वकर्मावरोधकः ॥ लोहितोलोहिताक्षश्चसामगानांकृपाकरः॥ धरात्मजःकुजोभौमोभूतिदोभूमिनंदनः ॥ अंगारकोयमश्चैवसर्वरोगापहारकः ॥ वृष्टिकर्तापहर्ताचसर्वकामफलप्रदः ॥ अत्रप्रधानं ॥ मंगलंगुडाज्यमिश्रिततिलद्रव्येणाष्टोत्तरसहस्रसंख्याकाहुतिभिःमूलमंत्रेणगायत्र्यावावैदिकेनवाएकविंशतिपरिवारदेवताःतेनैवद्रव्येणाष्टाष्टसंख्याकाहुतिभिःब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ मंगलोभूमिपुत्रश्चेत्याद्याएकविंशतिदेवतास्तासांनाममंत्रेणहोमः ॥ मंगलःप्रतिगृह्णातिमंगलोवैददातिच ॥ मंगलस्तारकोभाभ्यांमंगलायनमोनमः ॥ इतिभौमवारव्रतं ॥ ॥

॥ २३७ ॥ शनैश्चरव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःअखिलदुःखदौर्भाग्यनिरसनपूर्वकंइहजन्मनिजन्मांतरेचअतुलसुखपुत्रपौत्रधनधान्याद्यभिवृद्ध्यर्थंशनैश्चरव्रतंकरिष्ये ॥ शनैश्चरंदीर्घदेहंदंडपाशधरंतथा ॥ पिंगाक्षंस्थूलदेहंचध्यायामिरविनंदनम् ॥ इतिध्यात्वा ॥ शंनोदेवीतिवैदिकेन शनैश्चरायनमइतिनाममंत्रेणवापूजयेत् ॥ शनैश्चरं शमीसमित् १ तिल २ आज्य ३ द्रव्यैः प्रत्येकमष्टोत्तरशतसंख्याहुतिभिः ब्रह्मादिदेवताश्चैकैकयाज्याहुत्या ॥ ततोविप्रंसंपूज्यप्रस्थतिलानांवायनंसदक्षिणंदत्वादेवंविसृजेत् ॥ ॥ ७ ॥

॥ २३८ ॥ शिवलक्षपूजाव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यममअनेकजन्मार्जितदुरितादिनिवृत्तिपूर्वकंऐहिकपुत्रपौत्रादिविविधसुखप्राप्त्यनंतरशिवलोकनिवासकामनयाकृतंयल्लक्षपूजाविधानंतत्संपूर्णफलावाप्तयेतदुद्यापनाख्यंकर्मकरिष्ये ॥ ततोवृताचार्यःवेदिकालिंगतोभद्रस्थकलशेधान्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पूरितपूर्णपात्रेमध्येसौवर्णमहेशंनमःशंभवेचमयीभवेचेतिमंत्रेणसंस्थाप्य तद्वामभागेसौवर्णींगौरींचगौरीमिमायेतिमंत्रेणसंस्था
प्यपुरतोराजतंवृषभंउक्तमंत्रेणसंस्थाप्यपरिवारदेवताःस्थापयेत् ॥ पूर्वादिदिक्षु अधर्म० अवैराग्यं० अनैश्वर्य० महेश्वरं० ॥
तद्बहिःऐशान्यांईशानवक्त्राय० पूर्वेतत्पुरुषाय० दक्षिणेअघोरवक्त्राय० पश्चिमेसद्योजातवक्त्राय० उत्तरेवामदेववक्त्राय ॥ पूर्वा
दिषु वामायै० श्रेष्ठायै० काल्यै० उन्मन्यै० ॥ पुनःपूर्वामारभ्यैशानीपर्यंतंअजैकपदे० अहिर्बुध्न्याय० भवाय० शर्वाय०
उमापतये० रुद्राय० पशुपतये० शंभवे० वरदाय० शिवाय० ईश्वराय० ॥ पुनःपूर्वे नंदिकालौ० दक्षिणेभृंगिचंडौ० पश्चि
मेवृषस्कंदौ० उत्तरे देशकालौ० ततइंद्रादिलोकेशान् एवंसंस्थाप्यपूजयेत् ॥ अन्वाधाने ॥ सोमंमहेशंतिलद्रव्येणायुतसंख्या
काहुतिभिःसहस्रपरिमिताभिर्वापरिवारदेवतामंडलदेवताश्चएकैकयातिलाहुत्याऽऽज्याहुत्यावायक्ष्ये ॥ शेषंसमानं ॥ ॥

॥ २३९ ॥ विष्णुलक्षपूजाव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यअखिलनानाविधपातकशमनपूर्वकमैहिकामुष्मिकनिरतिशयानंदप्राप्तिद्वारालक्ष्मीनारायणप्रीत्यर्थंतुल
स्यादिलक्षव्रतोद्यापनंकरिष्ये ॥ वृताचार्योवेदिकायांसर्वतोभद्रेब्रह्मादिदेवतास्थापनपूर्वकंकलशंप्रतिष्ठाप्य तत्रसौवर्णचतुर्भुजं
लक्ष्म्यालिंगितवामांगंनारायणंसहस्रशीर्षेतिमंत्रेणसंस्थाप्यपुरतःसौवर्णराजतंवागरुडं ॥ सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः ॥
विषपापहरोनित्यमतःशांतिंप्रयच्छमेइति ॥ ततईशान्यादिविदिक्षुशंखंचक्रंगदांपद्मंच ॥ ततःपरितोलोकेशान्संस्थाप्यपूजयेत् ॥
प्रातरग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ अत्रप्रधानं लक्ष्मीनारायणं ॐ नमोनारायणायेतिमंत्रेणमधुलाजमिश्रिततिल १ पायस २
घृत ३ चरु ४ द्रव्यचतुष्टयेनप्रतिद्रव्यमष्टोत्तरसहस्राहुतिभिरष्टोत्तरशताहुतिभिर्वातथाचतुष्टयेनअयुताहुतिभिःसहस्राहुतिभि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्वासहस्रनाममंत्रैर्यक्ष्येपरिवारदेवतामंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ वायनमंत्रः ॥ जलशायीब्रह्मपितायद्गर्भेसचराचरं॥ अनंतभोगशयनःप्रीयतांमेजनार्दनः ॥ इतिदत्वागांपयस्विनींचदत्वाधिकफलप्राप्तयेसोपस्करांशय्यांचदत्वापंचाधिकान्द्विजान्सदन्नेनभोजयेदिति ॥ एवमेवविधानेनगणेशांबिकयोर्नृप॥ तत्तन्मंत्रेणपूजातुतत्तन्नामसहस्रकैः॥ गणेशेलड्डुकैर्होमंपंचखाद्यैरथापिवा ॥ पायसेनतुदेव्याश्चतिलैर्वाकेवलैरपि ॥ एवंकृत्वाविधानेनस्वर्गलोकेमहीयते ॥ इतिविष्णुलक्षपूजाविधानम् ॥ ॥

॥ २४० ॥ लक्षप्रदक्षिणाव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनोऽखिलपापरोगपीडानिरसनपूर्वकाभीष्टसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंविष्णोरमुकदेवस्येतिवा अमुककामनयाकृताःप्रदक्षिणास्तत्साङ्गुण्यार्थंतदुद्यापनंकरिष्यइतिसंकल्प्य ॥ वृताचार्यःसर्वतोभद्रेकलशोपरिहैमंकृतप्रदक्षिणं देवंतत्तन्मंत्रेणसंपूज्यसाष्टांगंप्रणमेत् ॥ ततोग्निंप्रतिष्ठाप्यान्वाधाय ॥ प्रधानंदेवंविष्णुंविष्णुगायत्र्याष्टोत्तरशतसंख्ययाचर्वा १ ज्या २ हुतिभिःब्रह्मादिदेवताःएकैकयाज्याहुत्यायक्ष्ये ॥ इतिलक्षप्रदक्षिणाविधानं ॥ पिप्पलोवृक्षराजेंद्रोह्यग्निगर्भस्त्वमेवच ॥ प्रभुर्वनस्पतीनांचपूर्वजन्मनियत्कृतं ॥ अघौघंनाशयक्षिप्रंतवरूपप्रदानतः ॥ ततोद्विजंप्रार्थयेत् ॥ अमुंतरुंगृहाणत्वंविष्णुरूपंद्विजोत्तम ॥ स्वीकृत्यदुष्कृतंघोरंक्षिप्रंशांतिंप्रयच्छमे ॥ व्रतपूर्तयेशुक्लांगांचदद्यादिति ॥ इत्यश्वत्थप्रदक्षिणा ॥ ॥

॥ २४१ ॥ लक्षवर्तिव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यात्मनोरजःसंपर्कादिविविधपातकक्षयागम्यागमनकोटिनाशविविधैहिकपुत्रपौत्रादिसुखप्राप्तिपूर्वकविष्णुलोकप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थमाचरिष्यमाणलक्षवर्तिव्रतंतत्संपूर्णफलावाप्तयेतदुद्यापनाख्यंकर्मकरिष्येइतिसंकल्प्यवृता

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चार्यःसर्वतोभद्रेकलशंप्रतिष्ठाप्य तन्मध्यदेशेइदंविष्णुरितिमंत्रेणहैमंश्रियासहितंविष्णुंतद्दक्षिणेसावित्र्यासहितंब्रह्माणंब्रह्मज
ज्ञानमितिमंत्रेण विष्णोरुत्तरेउमासहितंशंभुंनमःशंभवेचमयोभवेचेतिमंत्रेणइतिदेवतात्रयंसंस्थाप्यपुरतोराजतंगरुडंप्रतिष्ठाप्य
पूजयेत् ॥ प्रधानं लक्ष्मीसहितंविष्णुंघृतान्वितपायस १ पलाशसमित् २ घृत ३ द्रव्यैः सहस्रसंख्याकाहुतिभिः तथाब्रह्मशंभू
अष्टाविंशतितिलाहुतिभिः मंडलदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ अत्रक्रमः अग्नेनयऋचापायसं इदंविष्णुरितिमंत्रेणपला
शसमिधः विष्णुगायत्र्याघृतंचहुनेत् ॥ रौप्यपात्रस्थितंदीपंहैमवर्तिसमन्वितं ॥ कांस्यपात्रेणसहितंददामिव्रतपूर्तये ॥ इतिमं
त्रेणदत्वाआचार्यंसंपूज्ययथाशक्तिदक्षिणांगांचदत्वाब्राह्मणभोजनंसंकल्पयेत् ॥ इत्येकसूत्रवर्तिमाणिक्यलक्षवर्तिव्रतं ॥ ॥

॥ २४२ ॥ रुद्रलक्षवर्तिव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यममाखिलदुरितनाशाभीष्टसिद्धिपूर्वकशिवलोकप्राप्तिसांबसदाशिवप्रीत्यर्थंआचरितरुद्रलक्षवर्तिव्रतस्यो
द्यापनंकरिष्येइतिसंकल्प्य ॥ वृताचार्यःलिंगतोभद्रेताम्रकलशोपरिहैमंसांबंरुद्रंकद्रुद्रायेतिमंत्रेणप्रतिष्ठाप्य पुरतोवृषभंचसंपूज्य
प्रधानंदेवंसांबंकद्रुद्रायेतिमंत्रेण ॐ नमःशिवायेतिमंत्रेणवा घृत १ पायस २ बिल्व ३ द्रव्यैःसहस्राहुतिभिःमंडलदेवताश्चैक
कयाज्याहुत्यायक्ष्ये ॥ होमदशांशतःसाधारणंतर्पणंकांस्यपात्रसहितंदीपदानंच ॥ इतिरुद्रबिल्वलक्षवर्तिव्रतोद्यापनम् ॥ ॥

॥ २४३ ॥ कदलीव्रतोद्यापनम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यात्मनइहजन्मनिजन्मांतरेवासौभाग्यारोग्यपुत्रपौत्रलक्ष्मीवृद्धिसर्वदुःखनाशनपूर्वकंउमामहेश्वरप्राप्ति
कामःकदलीव्रतोद्यापनंकरिष्येइतिसंकल्प्य ॥ कदल्याआलवालंकृत्वाउपरिमंडपंचतुर्द्वारंकृत्वापूजयेत् ॥ वृताचार्यःकदली

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मूलदेशेमृदावेदींविधायतत्रलिंगतोभद्रेउक्तविधिनाब्रह्मादिदेवताआवाह्य तदुपरिकलशस्थपूर्णपात्रेहैमंशिवंत्र्यंबकमितिकद्रुद्रायेतिमंत्रेणवागौरींचगौरीमिमायेतिगायत्र्यावाप्रतिष्ठाप्यपुरतोवृषभंराजतंचपूजयेत् ॥ ततःकदलीं ॥ कदल्यैकामदायिन्यै मेधायैचनमोनमः ॥ रंभायैभूतसारायैसर्वसौख्यप्रदेनमः ॥ इत्यनेनपूजयेत् ॥ कदलीपरितोलोकपालानावाह्यततस्तैलहरिद्रा दिनामंगलस्नपनंकृत्वास्त्रीभूषणैर्भूषयित्वाऽवाहनाद्युपचारैःसंपूजयेत् ॥ अन्वाधाने शिवंगौरींकदलींचपलाशसमित् १ मधु २ सर्पिः ३ तिल ४ व्रीहि ५ द्रव्यैः तिलाज्याभ्यांवाप्रत्येकमष्टोत्तरशतमष्टाविंशतिवासंख्याकाहुतिभिः ब्रह्मादिदेवताश्चैकैक याज्याहुत्या ॥ क्रमेणहोममंत्राःकद्रुद्राय० गौरीमिमायेति० ॥ ॐ आंह्रींक्रींकामिन्यैविघ्नहेत्रैलोक्यक्षोभिण्यैधीमहि ॥ तन्नः कदलीप्रचोदयात् ॥ उमेगौरिनमस्तुभ्यंनमस्तेविश्वधारिणि ॥ परमानंदरूपिण्यैकदल्यैतेनमोनमः॥ वायनंदद्यात् ॥ ततआ चार्यायसंपूज्यपीठंकदलींचदद्यात् ॥ तत्रमंत्रः ॥ कदलींकामदात्रींचसर्वसौख्यप्रदायिनीम् ॥ गिरिजाहररूपांवैब्राह्मणायद दाम्यहम् ॥ प्रतिगृह्णद्विजश्रेष्ठसमस्तफलदायक ॥ कदल्याश्चप्रदानेनपूर्णाःसंतुमनोरथाः ॥ कदलीप्रतिगृह्णातिकदलीवैददा तिच ॥ कदलीतारकोभाभ्यांकदल्यैतेनमोनमः ॥ कदलीदानसांगतासिद्ध्यर्थंहिरण्यद० ॥ इतिकदलीव्रतोद्यापनम् ॥ ॥

॥ २४४ ॥ कर्कटीव्रतम् ॥

श्रीः ॥ देशकालौनिर्दिश्यममसकलसौभाग्यपुत्रपौत्रप्राप्त्यर्थंश्रीउमामहेश्वरप्रीत्यर्थंकर्कटीव्रतंकरिष्ये ॥ वृताचार्यःलिंगतोभद्रे कद्रुद्रायेतिरुद्रंगौरीमिमायेतिउमांचप्रतिष्ठाप्यध्यानं ॥ सूर्यकोटिप्रतीकाशंत्रिनेत्रंचंद्रभूषणम् ॥ शूलवज्रगदाकुंभपाशांकुशधरं विभुं ॥ वरदाभयपाणिंचसर्वाभरणभूषितं ॥ उमालिंगितसर्वांगंशांतंध्यायेत्सदाशिवं ॥ षोडशोपचारैःसंपूज्य ॥ कर्कटीवल्लीं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चसंपूज्य ॥ प्रार्थना ॥ कल्पवल्लिमहाभागेसौभाग्यारोग्यदायिनि ॥ प्रार्थयामिव्रतादौत्वांभर्तुःश्रेयोऽभिवृद्धये ॥ अन्वाधाने उमांमहेश्वरंच पायस १ आज्य २ तिल ३ द्रव्यैःआवाहनोक्तमंत्रेणप्रत्येकंप्रतिद्रव्यमष्टोत्तरशतमष्टाविंशतिवासंख्याहुतिभिः ब्रह्मादिदेवताएकैकयाहुत्याएवंहुत्वा ॥ दानमंत्रः ॥ कर्कटीनामयावल्लीविधात्रानिर्मितापुरा ॥ तस्याःफलप्रदानेनपूर्णाःसंतुम नोरथाः ॥ गृहाणेमांमहावल्लींसफलांवस्त्रसंयुतां ॥ कल्पितंमेफलंचास्तुव्रतेनममशंकर ॥ पीठंगांचाचार्यायदद्यात् ॥ इति ॥

॥ २४५ ॥ कूष्मांडीव्रतम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःसत्पुत्रप्राप्तिपूर्वकअतुललक्ष्मीसुखाभिवृद्धिद्वाराब्रह्मसावित्रीप्रीत्यर्थंकूष्मांडीव्रतोद्यापनंकरि ष्ये ॥ ततोवृताचार्यःसर्वतोभद्रेहेमप्रतिमयोःब्रह्मसावित्र्योर्ब्रह्मजज्ञानंप्रणोदेवीतिमंत्राभ्यांप्रतिष्ठाप्यपूजयेत् ॥ कूष्मांडीपूजन मंत्रः ॥ कूष्मांड्यैकामदायिन्यैब्रह्माण्यैतेनमोनमः ॥ नमोस्तुसुखदात्र्यैचसावित्र्यैतेनमोनमः ॥ ब्रह्माणंसावित्रींचघृत १ तिल २ द्रव्येणप्रत्येकमष्टोत्तरशत १०८ संख्याकाहुतिभिः ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ कूष्मांडीदानमंत्रः ॥ कूष्मां डींबहुबीजाढ्यांवस्त्रालंकारभूषितां ॥ दक्षिणाकलशोपेतांहैमकूष्मांडसंयुताम् ॥ सावित्रीब्रह्मसंप्रीत्यैगृहाणद्विजसत्तम ॥ सौभाग्यद्रव्ययुतवायनानिउपायनमितिमंत्रेणयथाशक्तिदद्यात् ॥ ततःपीठंव्रतपूर्तयेगांचदत्वाब्राह्मणान्संतर्पयेदिति ॥ इति ॥

॥ २४६ ॥ कूष्मांडाष्टकफलदानम् ॥

श्रीः ॥ भविष्ये ॥ ब्रह्महत्यादिपापघ्नंकूष्मांडंशुभसौख्यदं ॥ कार्तिकेरथसप्तम्यांदद्यात्पुण्यदिनेष्वपि ॥ अद्येत्यादि० ममब्र ह्महननादिसमस्तपापक्षयपूर्वकबहुपुत्रपौत्रसौभाग्यादिसकलमनोरथावाप्तिकूष्मांडबीजसमसहस्रसंख्याकाब्दब्रह्मलोकनिवास

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कामोहंकूष्मांडाष्टकफलदानंकेवलैककूष्मांडदानंवाकरिष्ये ॥ गणपतिपूजनंकूष्मांडपूजनंब्राह्मणपूजनंचकरिष्ये ॥ प्रस्थमित व्रीहिगोधूमराश्युपरिकूष्मांडान्संस्थाप्य ॥ ब्रह्मसावित्रीदैवत्यायरुद्रदैवत्यायवाकूष्मांडायनमइतिषोडशोपचारैःसंपूज्य ॥ दान मंत्रः ॥ ब्रह्महत्यादिपापघ्नंब्रह्मणानिर्मितंपुरा ॥ कूष्मांडंवहुबीजाढ्यंपुत्रपौत्रादिवृद्धिदं ॥ व्रीहीक्षुदंडचुक्रादिधात्रीफलसम न्वितं ॥ फलतांवूलसंयुक्तंघृताक्तंदीपसंयुतं ॥ मुक्ताप्रवालहेमादियुक्तंदत्तंतवद्विज ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ गोत्रायशर्मणेसुपूजिताय इदंकूष्मांडदानंघृताक्तंतिललिप्तंमुक्ताप्रवालहेमरत्नफलतांवूलवस्त्रदीपाद्यन्यतमयथाशक्तिसोपस्करा दियुतंस्वर्णदक्षिणादियुतंतुभ्यमहंसंप्रददेनममइतिद्विजहस्तेदद्यात् ॥ इतिकूष्मांडदानविधिः ॥ ॥ छ ॥ ॥छ॥

॥ २४७ ॥ दशहराव्रतविधिः ॥

श्रीः ॥ देशकालौसंकीर्त्यममैतज्जन्मजन्मांतरसमुद्भूतत्रिविधकायिकचतुर्विधवाचिकत्रिविधमानसेतिस्कांदोक्तदशविधपापनि रासत्रयस्त्रिंशच्छतपित्रुद्धारब्रह्मलोकावाप्त्यादिफलप्राप्त्यर्थं ज्येष्ठमासादिदशयोगपर्वणिअस्यांमहानद्यांस्नानंतीर्थपूजनंप्रतिमा यांजाह्नवीपूजांतिलादिदानंमूलमंत्रजपमाज्यहोमंचयथाशक्तिकरिष्ये ॥ यथाविधिस्नानंदशवारंकृत्वा ॥ जलेस्थितोदशवारं सकृद्धावक्ष्यमाणंस्तोत्रंपठित्वावासःपरिधानादिपितृतर्पणांतंनित्यंविधाय तीर्थेपूजांविधाय सर्पिर्मिश्रान्दशप्रसृतिकृष्णतिला न्तीर्थेंजलिनाप्रक्षिप्यगुडमिश्रान्सक्तुपिंडान्दशप्रक्षिपेत् ॥ ततोगंगातटे ताम्रेमृन्मयेवास्थापितकलशेसौवर्णादिप्रतिमायां चतुर्भुजांगंगामावाहयेत् ॥ तत्रमंत्रः ॥ नमोभगवत्यैदशपापहरायैगंगायैनारायण्यैरेवत्यैशिवायैदक्षायैअमृतायैविश्वरूपिण्यै नंदिन्यैतेनमोनमः ॥ द्विजमात्रविषयोविंशत्यक्षरोमंत्रः ॥ ॐ नमःशिवायैनारायण्यैदशहरायैगंगायैस्वाहेति ॥ एवंगंगामा

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाह्य ॥ नारायणंरुद्रंब्रह्माणंसूर्यभगीरथंहिमाचलंचनाममंत्रेणतत्रैवआवाह्य ॥ उक्तमूलमंत्रमुच्चार्यश्रीगंगायैनारायणरुद्रब्रह्म सूर्यभगीरथहिमवत्सहितायैआसनंसमर्पयामीत्येवमासनाद्युपचारैःपूजयेत् ॥ दशविधपुष्पैःसंपूज्यदशांगंधूपयित्वादशविधनै वेद्यांतेतांवूलदक्षिणांदत्वादशफलान्यर्पयेत् ॥ दशदीपान्दत्वापूजांसमापयेत् ॥ दशविप्रेभ्यःप्रत्येकंषोडशषोडशमुष्टितिलान् सदक्षिणान्दद्यात् ॥ एवंयवानामपि ॥ ततोदशगाएकांवागांदद्यात् ॥ मत्स्यकच्छपमंडूकान्सौवर्णान्राजतान्पिष्टमयान्वासं पूज्यतीर्थेक्षिपेत् ॥ एवंदीपान्प्रवाहयेत् ॥ जपहोमचिकीर्षायांपूर्वोक्तमूलमंत्रस्यपंचसहस्रसंख्याजपदशांशहोमः ॥ यथाशक्तिवा जपहोमौ ॥ तत्रदशहरात्रतांगत्वेनहोमंकरिष्येइतिसंकल्प्य स्थंडिलेग्निंप्रतिष्ठाप्यअन्वाधानेचक्षुषीआज्येनेत्यंतेश्रीगंगांअमुकसं ख्ययाआज्येन नारायणादिषट्देवताएकैकयाज्याहुत्याशेषेणस्विष्टकृतमित्यादिप्रोक्षण्यादिषट्पात्राण्यासाद्यआज्यंसंस्कृत्यय थान्वाधानंजुहुयात् ॥ दशब्राह्मणान्सुवासिनीश्चभोजयेत् ॥ प्रतिपद्दिनमारभ्यस्नानादिपूजांतोविधिःकार्यइतिकेचित् ॥ ॥

॥ २४८ ॥ दशहरास्तोत्रंस्कांदे ॥

श्रीः ॥ ब्रह्मोवाच ॥ नमःशिवायैगंगायैशिवदायैनमोनमः ॥ नमस्तेरुद्ररूपिण्यैशांकर्यैतेनमोनमः ॥ १ ॥ नमस्तेविश्वरूपिण्यै ब्रह्ममूर्त्यैनमोनमः ॥ सर्वदेवस्वरूपिण्यैनमोभेषजमूर्तये ॥ २ ॥ सर्वस्यसर्वव्याधीनांभिषक्श्रेष्ठचैनमोस्तुते ॥ स्थाणुजंगमसं भूतविषहंत्र्यैनमोनमः ॥ ३ ॥ भोगोपभोगदायिन्यैभोगवत्यैनमोनमः ॥ मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः ॥ ४ ॥ नमस्त्रै लोक्यभूषायैजगद्धात्र्यैनमोनमः ॥ नमस्त्रिशुक्लसंस्थायैतेजोवत्यैनमोनमः ॥ ५ ॥ नंदायैलिंगधारिण्यैनारायण्यैनमोनमः ॥ नमस्तेविश्वमुख्यायैरेवत्यैतेनमोनमः ॥ ६ ॥ बृहत्यैतेनमस्तेस्तुलोकधात्र्यैनमोनमः ॥ नमस्तेविश्वामित्रायैनंदिन्यैतेनमोनमः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ७ ॥ पृथ्व्यैशिवामृतायैचसुवृषायैनमोनमः ॥ शांतायैचवसिष्ठायैवरदायैनमोनमः ॥ ८ ॥ उग्रायैशिवदोग्ध्र्यैचसंजीविन्यै
नमोनमः ॥ ब्रह्मिष्ठायैब्रह्मदायैदुरितघ्न्यैनमोनमः ॥ ९ ॥ प्रणतार्तिप्रभंजिन्यैजगन्मात्रेनमोस्तुते ॥ सर्वापत्प्रतिभक्षायैमंगला
यैनमोनमः ॥ १० ॥ शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते ॥ ११ ॥ निर्लेपायैदुर्गहंत्र्यै
दक्षायैतेनमोनमः ॥ परात्परतरेतुभ्यंनमस्तेमोक्षदेसदा ॥ १२ ॥ गंगेममाग्रतोभूयागंगेमेदेविपृष्ठतः ॥ गंगेमेपार्श्वयोरेहित्वयि
गंगेस्तुमेस्थितिः ॥ १३ ॥ आदौमध्येतथाचांतेसर्वतोगांगतेशिवे ॥ त्वमेवमूलप्रकृतिस्त्वंहिनारायणःपरः ॥ १४ ॥ गंगेत्वंपर
मात्माचशिवस्तुभ्यंनमःशिवे ॥ यइदंपठतेस्तोत्रंभक्त्यानित्यंनरोपियः ॥ १५ ॥ शृणुयाच्छ्रद्धयायुक्तःकायवाक्चित्तसंभवैः ॥
दशधासंस्थितैर्दोषैःसर्वैरेवप्रमुच्यते ॥ १६ ॥ सर्वान्कामानवाप्नोतिप्रेत्यब्रह्मणिलीयते ॥ ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुता
॥ १७ ॥ तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः ॥ यःपठेद्दशकृत्वस्तुदरिद्रोवापिचाक्षमः ॥ १८ ॥ सोपितत्फलमाप्नोतिगंगां
संपूज्ययत्नतः ॥ अदत्तानामुपादानंहिंसाचैवविधानतः ॥ १९ ॥ परदारोपसेवाचकायिकंत्रिविधंस्मृतं ॥ पारुष्यमनृतंचैवपै
शून्यंचापिसर्वशः ॥ २० ॥ असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं ॥ परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं ॥ २१ ॥ वितथा
भिनिवेशश्चमानसंत्रिविधंस्मृतं ॥ एतानिदशपापानिहरत्वंममजाह्नवि ॥ दशपापहरायस्मात्तस्माद्दशहरास्मृता ॥ २२ ॥ त्रय
स्त्रिंशच्छतान्पूर्वान्पितॄनथपितामहान् ॥ उद्धरत्येवसंसारान्मंत्रेणानेनपूजिता ॥ २३ ॥ नमोभगवत्यैदशपापहरायैगंगायैना
रायण्यैरवेत्यैशिवायैदक्षायैअमृतायैविश्वरूपिण्यैनंदिन्यैतेनमोनमः ॥ सितमकरनिषण्णांशुभ्रवर्णांत्रिनेत्रांकरधृतकलशोद्यत्सो
त्पलामत्यभीष्टं ॥ विधिहरिहरमौलौसेंदुकोटीरजुष्टांकलितसितदुकूलांजाह्नवींतांनमामि ॥ २४ ॥ आदावादिपितामहस्यनिग

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मव्यापारपात्रेजलंपश्चात्तन्नगशायिनोभगवतःपादोदकंपावनं ॥ भूयःशंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियंकन्याकल्मषनाशि
नीभगवतीभागीरथीदृश्यते ॥ २५ ॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ इति
स्तोत्रेणस्तुत्वाहोमांतेप्रतिमोत्तरपूजांकृत्वाविसृज्यआचार्यायमूलमंत्रेणदद्यात् ॥ इतिदशहराविधिः ॥ ॥ ॥ ७ ॥

॥ २४९ ॥ मलमासव्रतम् ॥

श्रीः ॥ देशकालौनिर्दिश्यममसकलदुःखदारिद्र्यनाशपुत्रपौत्रैश्वर्यधर्मार्थकाममोक्षप्राप्तिद्वाराश्रीजनार्दनप्रीत्यर्थंकृतस्याचरणीय
स्यचमलमासव्रतस्यसांगतार्थंव्रतोद्यापनंकरिष्ये ॥ गण० स्वस्ति० वृताचार्यःसर्वतोभद्रोपरिपरितोद्वादशमध्येएकंएवंत्रयोदश
कलशान्महीद्यौरित्याद्यावाहितेमध्यकलशेसुवर्णमयंलक्ष्मीयुतजनार्दनंअतोदेवाइत्यावाह्यपूजयेत् ॥ प्रातरग्निंप्रतिष्ठाप्यअत्रप्र
धानंलक्ष्मीजनार्दनं अतोदेवेतिऋकृष्टेनसमित्तिलाज्यचरुपायसैः प्रतिद्रव्यमष्टोत्तरसहस्राहुतिभिः ब्रह्मादीनेकैकयाज्याहुत्या॥
ततोवायनंकांस्यपात्रेनिधायदद्यात् ॥ विप्रंसंपूज्य ॥ अधिमासेतुसंप्राप्तेश्रीजनार्दनप्रीतये ॥ नरकोत्तारणार्थायमयादानंप्रदी
यते ॥ त्रयस्त्रिंशदपूपांश्चशर्कराघृतसंयुतान् ॥ सदक्षिणानहंतुभ्यंकांस्यपात्रेनिधायच ॥ दास्येजनार्दनप्रीत्यैगृहाणत्वंद्विजो
त्तम ॥ मलमासस्तुमासानांमलिनःपापसंभवः ॥ तत्पापस्यविशुद्ध्यर्थंवायनंप्रददाम्यहं ॥ इदंत्रयस्त्रिंशत्संख्याकापूपवायन
दानंसकांस्यपात्रंतुभ्यंसंप्रददे ॥ ततोयथाविभवमाचार्यायान्येभ्यश्चतिलपात्रंघृतपात्रंउपानद्गौशय्यांचदत्वापीठंगांचदत्वाब्राह्म
णभोजनंसंकल्प्यकर्मेश्वरार्पणंकुर्यात् ॥ इतिमलमासव्रतोद्यापनम् ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २५० ॥ कोकिलाव्रतम् ॥

श्रीः ॥ ममेहजन्मनिजन्मांतरेचसर्वपापक्षयपूर्वकंपुत्रपौत्रावैधव्यनिःसापत्न्यलक्ष्मीसौभाग्यरूपलावण्याद्यभिवृद्धिद्वारागौरीरूपाकोकिलाप्रीत्यर्थंकोकिलाव्रतंकरिष्यइतिसंकल्प्यकोकिलांपूजयेत् ॥ चूतचंपकवृक्षस्थांस्वर्णपक्षादिसंयुताम् ॥ चिंतयेत्पार्वतींदेवींकोकिलारूपधारिणीम् ॥ अर्घ्यंगृहाणदेवेशिवांछितार्थप्रदायिनि ॥ आषाढस्याऽसितेपक्षेमेघवर्णेहरप्रिये ॥ कोकिलेत्वं जगन्मातर्गृहाणार्घ्यंनमोस्तुते ॥ वृताचार्यःएकलिंगोद्भवेभद्रेब्रह्मादिदेवताःसंस्थाप्य ॥ कलशंप्रतिष्ठाप्यतदुपरिहैमींकोकिलां गौरीमिमायेतिमंत्रेणप्रतिष्ठाप्य ॥ अन्वाधाने कोकिलारूपिणींगौरींगौरीमिमायेतिमंत्रेणतिल १ चंपकपुष्प २ तंडुल ३ पायस ४ आज्य ५ द्रव्यैःप्रत्येकमष्टोत्तरशत १०८ संख्याकाहुतिभिः ॥ तथाव्याहृतिमंत्रेणबिल्वपत्रैःशतत्रय ३०० परिमिताहुतिभिः ॥ ब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ वायनंदद्यात् ॥ तत्रमंत्रः ॥ सोपस्करंद्विजश्रेष्ठवायनंव्रतपूर्तये ॥ ददामितेगृहाणेदंकोकिलाप्रीयतामिति ॥ आचार्यायपीठंव्रतपूर्तयेगांचदत्वादक्षिणाभोजनादिभिस्तोषयेत् ॥ इतिकोकिलाव्रतम् ॥ ॥

॥ २५१ ॥ अर्धोदयव्रतम् ॥

श्रीः ॥ अमार्कश्रवणेपातेयुक्ताचेत्सौषमाघयोः ॥ अर्धोदयःसविज्ञेयःकोटिसूर्यग्रहैःसमः(किंचिन्न्यूनंमहोदयः) ॥ दिवैवयोगःशस्तोयंनतुरात्रौकदाचन ॥ इति ॥ तिथ्यादिसंकीर्त्य आत्मनःअखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं (ब्रह्मविष्णुशिवप्रीत्यर्थं) अर्धोदयव्रतंकरिष्ये ॥ दर्भास्तृतशुद्धभूमौशतत्रयद्रोणपरिमिततिलानांपर्वतं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृत्वायथाशक्तिवा तत्रपलाधिकंसुवर्णस्य ब्रह्मविष्णुशिवानांप्रतिमात्रयंकृत्वा ब्रह्मजज्ञानं इदंविष्णुः त्र्यंबकं इतिमंत्रैःप्रतिष्ठा प्यपूजयेत् ॥ परितोलोकेशांस्तत्तन्मंत्रैरावाहयेत् ॥ प्रार्थना ॥ नमोविश्वसृजेतुभ्यंसत्यायपरमात्मने ॥ देवायदेवपतयेयज्ञानां पतयेनमः ॥ नारायणजगन्नाथनमस्तेगरुडध्वज ॥ पीतांबरनमस्तुभ्यंजनार्दननमोस्तुते ॥ महेश्वरमहेशाननमस्तेत्रिपुरांतक ॥ जीमूतकेशायनमोनमस्तेवृषभध्वज ॥ ब्रह्मविष्णुमहेशानाःकर्मणांफलहेतवः ॥ भक्त्यामयाकृतांपूजांगृह्णीध्वंजगदीश्वराः ॥ इतिसंप्रार्थ्य वृताचार्योग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ ब्रह्मविष्णुमहेशान्घृताक्ततिलद्रव्येणप्रतिदैवतं सहस्रमष्टोत्तरंवासंख्याका हुतिभिःलोकपालानेकैकयाज्याहुत्यायक्ष्ये ॥ एवंहुत्वातिलपर्वतंब्राह्मणायदद्यात् ॥ तिलपर्वतमध्यस्थाब्रह्मविष्णुमहेश्वराः ॥ दहंतुपातकंसर्वंयच्छंतुममसद्गतिम् ॥ ततोगोप्रदानं ॥ भविष्येतुब्रह्मणःपलाशसमिच्चरुतिलाज्यानिविष्णोःअश्वत्थसमित्तिल पायसान् शंभोःचर्वाज्यव्रीहयः ॥ कांस्यपात्रदानंकेवलंद्रव्यद्वारावागोप्रदानं ॥ इत्यर्धोदयव्रतम् ॥ ॥ ॥ छ ॥

॥ २५२ ॥ समुद्रस्नानविधिः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममकायिकवाचिकमानसिकज्ञाताज्ञातादिसकलपातकनिरासार्थंअद्यामुकपर्वनि मित्तंसमुद्रस्नानंकरिष्ये इतिसंकल्प्य पाषाणंसिकतापिंडंवाहस्तेगृहीत्वा ॥ पिप्पलादसमुत्पन्नेकृत्येलोकभयंकरे ॥ पाषाणस्तेम यादत्तआहारार्थेप्रकल्प्यतां ॥ इतिसमुद्रेप्रक्षिप्यप्रार्थयेत् ॥ विश्वाचीचघृताचीचविश्वयोनेविशांपते ॥ सांनिध्यंकुरुमेदेवसा गरेलवणांभसि ॥ नमस्तेविश्वगुप्तायनमोविष्णोअपांपते ॥ नमोजलधिरूपायनदीनांपतयेनमः ॥ समस्तजगदाधारशंखचक्र गदाधर ॥ देवदेहिममानुज्ञांतवतीर्थनिषेवणे ॥ त्रितत्वात्मकमीशानंनमोविष्णुमुमापतिं ॥ सांनिध्यंकुरुदेवेशसमुद्रेलवणां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भसि ॥ अग्निश्चयोनिरनिलश्चदेहोरेतोधाविष्णुरमृतस्यनाभिः ॥ एतद्ब्रुवन्पांडवसत्यवाक्यंततोऽवगाहेतपतिंनदीनां ॥ इतिप ठित्वानित्यस्नानविधिवत्स्नात्वाअघमर्षणस्नानांगतर्पणेकृत्वासमुद्रायार्घ्यं ॥ सर्वदोभगवान्श्रीमान्सर्वरत्नाकरोयतः ॥ सर्वरत्न प्रधानस्त्वंगृहाणार्घ्यंमहोदधेइत्यर्घ्यंदद्यात् ॥ ततस्तर्पणं ॥ यथा ॥ पिप्पलादंतर्पयामि विकण्वं कृतांतं जीवकेश्वरं वसिष्ठं वाम देवं पराशरं उमापतिं वाल्मीकिं नारदं वालखिल्यान् नलं नीलं गवाक्षं गवयं गंधमादनं जांववंतं हनूमंतं सुग्रीवं अंगदं मैंदं द्विविदं वृषभं शरभं रामं लक्ष्मणं यशस्विनीं सीतां तर्पयामि ॥ एवंजलमध्येतर्पणंकृत्वा ॥ आब्रह्मस्तंबपर्यंतंयत्किंचित्सच राचरं ॥ मयादत्तेनतोयेनतृप्तिमेवाभिगच्छतु ॥ इत्यंजलिंदद्यात् ॥ इतिसमुद्रस्नानविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ २५३ ॥ पार्थिवलिंगोद्यापनम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्याऽमुककामनामुद्दिश्यकृतानांपार्थिवलिंगानांसंपूर्णफलावाप्तयेतदुद्यापनंकरिष्येइतिसंकल्प्य ॥ वृता चार्यःसर्षपादिनाभूतान्युत्सार्यद्वारपूजांकुर्यात् ॥ सदाशिवमंडपायनमः प्राग्द्वारपार्श्वयोः नंदिनेनमः महाकालायनमः चिच्छ क्त्यै० मायाशक्त्यै० द्वारश्रियै० वास्तुपुरुषाय० ॥ दक्षिणपार्श्वयोः गणेशाय० वृषभाय० चिच्छक्त्यादिपूर्ववत् ॥ पश्चिम द्वारपार्श्वयोः भृंगिणे० स्कंदायन० शक्त्यादिपूर्ववत् ॥ उत्तरद्वारपार्श्वयोः रिटिने० चंडीश्वराय० शक्त्यादिपूर्ववत् ॥ ततः लिंगतोभद्रेब्रह्मादिदेवतास्थापनपूर्वकंकलशंप्रतिष्ठाप्यतदुपरिशिवंतत्पार्श्वतःगौरींषण्मुखंगणेशंचावाह्यपूजयेत् ॥ अत्रप्रधानं सोमंशिवंकृतलिंगद्वादशांशेनशतांशेनवा पायस १ मधु २ शर्करा ३ आज्य ४ तिल ५ अक्षत ६ बिल्वपत्र ७ शतपत्रपत्र ८ द्रव्याष्टकेन केवलपायसेनवा नमःशंभवेचेतिमंत्रेण पंचाक्षरेणवा तथागौरींषण्मुखंगणेशंचउक्तद्रव्यैःप्रतिद्रव्यंःदशदशाहु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिभिःवृषभंलोकेशान् ब्रह्मादिदेवताश्चदशदशतिलाहुतिभिः द्वारदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ इतिशैवागमोक्तंपार्थिव०॥

॥ २५४ ॥ प्रबोधोत्सवतुलसीविवाहौ ॥

श्रीः ॥ देशकालौसंकीर्त्यश्रीदामोदरप्रीत्यर्थंप्रबोधोत्सवंसंक्षेपतस्तुलसीविवाहविधिंचतंत्रेणकरिष्ये ॥ तदंगतयापुरुषसूक्तेनविधि नाषोडशोपचारैस्तंत्रेणश्रीमहाविष्णुपूजांतुलसीपूजांचकरिष्ये ॥ न्यासादिविधाय श्रीविष्णुंतुलसींचध्यात्वासहस्रशीर्षेतिश्रीम हाविष्णुंतुलसींचावाह्य पुरुषएवेत्यादिभिःश्रीमहाविष्णवेदामोदरायश्रीदेव्यैतुलस्यैचनमआसनमित्यादिस्नानांतेमंगलवाद्यैःसु गंधितैलहरिद्राभ्यांनागवल्लीदलगृहीताभ्यांकनिक्रददित्युष्णोदकेनचमंगलस्नानंविष्णवेतुलस्यैचसुवासिनीभिःकारयित्वास्वयं वादत्वापंचामृतस्नानंसमर्प्यशुद्धोदकेनाभिषिच्य वस्त्रयज्ञोपवीतचंदनंदत्वातुलस्यैहरिद्राकुंकुमकंठसूत्रमंगलालंकारान्दत्वामं त्रपुष्पांतपूजांसमाप्यघंटादिवाद्यघोषेणदेवंप्रबोधयेत् ॥ तत्रमंत्राः ॥ इदंविष्णुवि० ॥ योजागारेतितुआचारप्राप्तः ॥ ब्रह्मेंद्र रुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय ॥ बुध्यस्वदेवेशजगन्निवासमंत्रप्रभावेणसुखेनदेव ॥ इयंचद्वादशीदेवप्रबोधार्थंतुनि र्मिता ॥ त्वयैवसर्वंलोकानांहितार्थंशेषशायिना ॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते॥ त्वयिसुप्तेजगत्सुप्तमुत्थितेचोत्थितं जगत् ॥ एवमुत्थाप्य ॥ चरणंपवित्रं० ॥ गतामेघावियच्चैवनिर्मलंनिर्मलादिशः ॥ शारदानिचपुष्पाणिगृहाणममकेशवेत्यादि मंत्राभ्यांपुष्पांजलिंदद्यात् ॥ अथाचारात्तुलसीसंमुखांश्रीकृष्णप्रतिमांकृत्वामध्येतःपटंधृत्वामंगलाष्टकपद्यानिपठित्वाअंतःपटं विसृज्याक्षताप्रक्षेपंकृत्वादामोदरहस्तेतुलसीदानंकुर्यात् ॥ देवींकनकसंपन्नांकनकाभरणैर्युताम् ॥ दास्यामिविष्णवेतुभ्यंब्रह्मलो कजिगीषया ॥ मयासंवर्धितांयथाशक्त्यलंकृतामिमांतुलसींदेवींदामोदरायश्रीधरायवरायतुभ्यमहंसंप्रददे ॥ देवपुरतःसाक्षत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जलंक्षिपेत् ॥ श्रीमहाविष्णुःप्रीयतामित्युक्त्वाइमांदेवींप्रतिगृह्णातुभवान्इतिवदेत् ॥ ततोदेवहस्तस्पर्शंतुलस्याःकृत्वा ॥ कइदं कस्माअदादितिमंत्रमन्येनवाचयेत् ॥ यजमानः ॥ त्वंदेविमेग्रतोभूयास्तुलसीदेविपार्श्वतः ॥ देवित्वंपृष्ठतोभूयास्त्वदानान्मो क्षमाप्नुयाम् ॥ दानस्यप्रतिष्ठासिद्ध्यर्थमिमांदक्षिणांसंप्रददे ॥ देवपुरतोदक्षिणामर्पयेत् ॥ ततःस्वस्वशाखोक्तानिशांतिसूक्तानिवि ष्णुसूक्तानिचपठेयुः ॥ तुलसीयुतायविष्णवेमहानीराजनंकृत्वामंत्रपुष्पंदत्वासपत्नीकःसगोत्रजःसामात्योयजमानश्चतस्रःप्रदक्षि णाःकुर्वीत ॥ ब्राह्मणेभ्योदक्षिणांदत्वायथाशक्तिब्राह्मणभोजनंसंकल्प्यकर्मेश्वरार्पणंकुर्यात् ॥ इतिसंक्षेपतःप्रबोधोत्सवतुल०॥

॥ २५५ ॥ तुलसीविवाहःकौस्तुभीयः ॥

श्रीः ॥ चातुर्मास्यव्रतपक्षेआषाढ्यांतुलसीरोपणं तत्प्रभृतिकालत्रयेपूजनं ॥ तुलसिश्रीसखिशुभेपापहारिणिपुण्यदे ॥ नमस्तेना रदनुतेनारायणिनमोस्तुते ॥ इतिसंप्रार्थ्य ॥ श्रीतुलस्यैनमःइतिमंत्रेणपयोघटैःसेचनं ॥ एवंप्रत्यहंप्रबोधद्वादशीपर्यंतंकार्यं ॥ द्वादश्यांविवाहः ॥ गुरुशुक्रास्तादिदोषोनास्तीतिनिर्णयसिंधौ ॥ मंडपंवेदिकांहरिद्रादिविवाहसामग्रींचसंपाद्यकृतनित्यक्रियो यजमानःप्रबोधद्वादश्यामुक्तापराह्णेमांगलिकस्नानंविधायपीठेउपविष्टःइष्टदेवतांगुरूंश्चनमस्कृत्य देशकालौसंकीर्त्यममदशपूर्वा न्दशपरानात्मनासहैकविंशतिपुरुषानुद्धर्तुंब्रह्मलोकसायुज्यार्थंश्रीपरमात्मनासहतुलसीविवाहंकरिष्ये इतिसंकल्प्य ॥ तदंगभूतं गणपतिपूजनपूर्वकंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंग्रहयज्ञंमंडपप्रतिष्ठांकुलदेवतास्थापनंचकरिष्ये ॥ पुण्याहे अद्यपरमा त्मनासहतुलस्याविवाहाख्यस्यकर्मणःपुण्याहंभवंतोब्रुवंतु ॥ अद्यपरमात्मनासहश्रीतुलस्याविवाहाख्यायकर्मणेस्वस्तिभवंतोब्रु वंतुएवंऋद्धिं श्रीरस्त्वितिप्रयोगोज्ञेयः ॥ तानिकृत्वा आचार्यादिचतुर्णांवरणंतेषांमधुपर्कादिपूजनं ॥ आचार्यःयदत्रेतिसर्षप

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विकिरणादिदेवयजनंरक्षस्त्वेत्यंतंकृत्वा तुलस्याःअग्रेमंडपादीशान्यांसर्वतोभद्रंविरच्यतत्रदेवताआवाह्यपूजयेत् ॥ तत्रमहीद्यौ
रित्यादिपूर्णपात्रनिधानांतेसुवर्णप्रतिमायामग्न्युत्तारणादिपरमात्मनःतुलस्याश्चप्राणप्रतिष्ठांषोडशोपचारैःपूजांचकुर्यात् ॥ तुल
स्याःहरेश्चमांगलिकस्नानंविधायवाग्दानंकुर्यात् ॥ ॐ अनृक्षराऋजवइतितुलस्यैफलादिदत्वा गणेशंसंस्मृत्यजनार्दननाम्नेसकल
प्रवरगोत्रजनकायपार्वतीबीजसंभूतायवृंदाभस्मनिसंस्थितायअनादिमध्यनिधनाय श्रीकृष्णपरमात्मनेवराय ॥ दातुःअमुकप्रव
रान्वितामुकगोत्रोत्पन्नांअमुकशर्मणःपालितप्रपौत्रींअमुकशर्मणःपालितपौत्रींअमुकशर्मणःपालितपुत्रींपयोघटैःसेचितकन्याव
द्वर्धितभावनीयतुलसीनाम्नींकन्यांभार्यात्वायवृणीमहेइतित्रिः ॥ ततोदातावृणीध्वंप्रदास्यामीतित्रिर्वदेत् ॥ गंधाक्षतफलपुष्पा
दिभिस्तुलसींसंपूज्य ॥ दातादेशकालौस्मृत्वातुलसीविवाहांगभूतंवाग्दानमहंकरिष्ये ॥ गणपतिंवरुणंचसंपूज्य स्वस्थानेतुल
सीपूजयित्तारमुपवेश्यगंधतांवूलादिनासंपूज्यसचदातारंपूजयेत् ॥ हरिद्राखंडपंचद्दढपूगीफलानिहस्तेगृहीत्वाजनार्दननाम्नेसक
लप्रवरगोत्रजनकायपार्वतीबीजसंभूताय वृंदाभस्मनिसंस्थितायानादिमध्यनिधनायश्रीकृष्णपरमात्मनेवराय ॥ अमुकगोत्रोत्प
न्नांअमुकशर्मणःपालितप्रपौत्रीं अमुकपालितपौत्रींअमुकपालितपुत्रींपयोघटैःसेचितकन्यावद्वर्धितभावनीयतुलसीनाम्नींकन्यां
ज्योतिर्विदादिष्टेमुहूर्तेदास्ये ॥ वाचासंप्रददे ॥ आचार्यवस्त्रप्रांतेतानिदत्वागंधादिनासंपूज्य ॥ अव्यंगेप०ते ॥ इमांदेवींप्र
दा० धौ ॥ आचार्यःपंचद्दढपूगीफलानिहरिद्राखंडानिचगृहीत्वासकलकुलगोत्ररूपिणिकृष्णपरमात्मनिवरविषयेभवंतोनिश्चि
ताभवंतु इतिदातुर्वस्त्रप्रांतेबद्ध्वागंधाद्यैःसंपूज्य तदस्तु० गृहावै० ॥ वाचादत्तामयादेवीकृष्णार्थंस्वीकृतात्वया ॥ पद्मावलो
कनविधौनिश्चितस्त्वंसुखीभव ॥ आचार्यः ॥ वाचादत्तात्वयादेवीकृष्णार्थंस्वीकृतामया ॥ कृष्णावलोकनविधौ० ॥ शिवा०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सौम० अक्षतं० दीर्घमायुःश्रेयःशांतिः० एतद्वःसत्यमस्तु ॥ ॐ समानीव० १ प्रसुग्मंता० १ ॥ इंद्राणींसंपूज्य ॥ देवेंद्राणि० सुवासिनीभिरुभयोर्नीराजनंकार्यं ॥ ब्राह्मणान्संपूज्य हिंकृण्वती० १ वनस्पतेशतवल्शो० २ समिद्धस्य ३ इंदुर्देवा० ४ घृतादु० ५ अस्यपिब० ६ ॥ ततोस्तमितेआचार्यःस्वशाखोक्तंमधुपर्ककुर्यात् ॥ ततस्तुलसीसंमुखांश्रीकृष्णप्रतिमांकृत्वामध्येअं तःपटंधृत्वामंगलाष्टकपद्यानिपठेयुः ॥ ततःअभ्रातृघ्नीं० अघोर० भूर्भुवःस्वः ऋक्चवेत्यादिवधूपूर्वकंअक्षतारोपणं ॥ अनृक्ष रा० ॥ ततोदातातुलसीदानसंकल्पंकुर्यात् ॥ ममसमस्तेत्यादितुलसीदानकल्पोक्तफलावाप्तयेअनेनजनार्दनेनास्यांतुलस्यांबीजो त्पादनेनज्ञानावाप्तिद्वाराश्रीप्रीतयेतुलसीदानमहंकरिष्ये ॥ ॥ सपत्नीकउत्थाय ॥ देवींकनकसंपन्नां० षया ॥ विश्वंभरः० ॥ इमांदेवींप्र० तारणायच ॥ ततःकांस्यपात्रेजनार्दनहस्तेनतुलसीपल्लवंधृत्वाअक्षतोदकंक्षिपन्वदेत् ॥ तुलसीतारयतु पुण्यं० शिवा० सौम० अक्षतं० दीर्घ० यच्छ्रे० यत्पा० पुण्या० स्वस्ति० ऋद्धिं० श्रीर० ॥ अमुकगोत्रःअमुकशर्माहंममसमस्तेत्या दितुलसीदानकल्पोक्तफलावाप्तये अनेनजनार्दनेनास्यांतुलस्यांबीजोत्पादनेनज्ञानावाप्तिद्वाराश्रीप्रीतयेजनार्दननाम्नेसकलगोत्र प्रवरायपार्वतीबीजसंभूतायवृंदाभस्मनिसंस्थितायअनादिमध्यनिधनायतुलस्यर्थिनेश्रीकृष्णपरमात्मनेवराय ॥ अमुकप्रवरान्वि तामुकगोत्रोत्पन्नांअमुकशर्मणःपालितप्रपौत्रीं अमु०णःपालितपौत्रीं अमु०णः पालितपुत्रींपयोघटैःसेचितकन्यावद्वर्धितभाव नीयतुलसीनाम्नींकन्यांश्रीकृष्णार्थिनींश्रीरूपिणींवनस्पतिदैवत्यांज्ञानोत्पादनार्थंतुभ्यमहंसंप्रददेनमम ॥ तुलसींप्रतिगृह्णातुभवा न् ॥ इमांचतुलसींकन्यांयथाशक्तिविभूषितां ॥ गोत्रायशर्मणेतुभ्यंदत्तांकृष्णसमाश्रय ॥ त्वंदेविमेग्रतोभूयास्तुलसीदेविपार्श्व

१ स्वशाखोक्तासौभगायपदांतामंत्राःपठनीयाः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तः ॥ देवित्वंपृष्ठतोभूयास्त्वदानान्मोक्षमाप्नुयां ॥ चत्वारिमासपर्यंततुलस्याःपालनंकृतं ॥ तुभ्यंकृष्णमयादत्तामममोक्षप्रदायिनी ॥ धर्मेच ॥ मोक्षेच ॥ नातिविलंबनंकार्यं ॥ दानस्यप्रतिष्ठासिद्ध्यर्थंसौवर्णमयीमिमांदक्षिणांतुभ्यमहंसंप्रददे ॥ ततोविभवे सति गोदासीमहिष्यादिभोजनजलपात्रादिदानं ॥ ततोदेवहस्तस्पर्शंतुलस्याःकृत्वाकइदंकस्माअदादितिमंत्रमन्येनवाचयेत् ॥ यत्कक्षी० ॥ उभयोरभिषेकः ॥ अनाधृ० १ समुद्र० ४ आपोहि० ३ आनःप्रजां० ४ ॥ सूत्रवेष्टनं युवासुवासा० उक्तप्रकारेणकृत्वा ॥ तुलस्याःपल्लवेकृष्णहस्तेचबध्नीयात् यदावध्नन्निति मंत्रेण ॥ उभयोःतिलकंकृत्वा ॥ भगोमेकामःसमृध्यतां यज्ञो० श्रियो० धर्मो० प्रजा० यशोमे० भगोमेइत्यादिमंत्रैःअक्षतारोपणंसकृत्कुर्यात् ॥ ततोमंगलसूत्रादि ॥ मांगल्यतंतुनानेनकृष्णजीवनहेतुना ॥ कंठे० तं ॥ शय्यादिपूजनांतेब्राह्मणेभ्योवायनानिदत्वा ॥ भद्रंक० द्रविणो० सविता० नवोन० उच्चादि० दक्षिणावतामि० इत्यायुःपदांताःषट् ॥ ततआचार्यःस्थंडिलमेत्यआचम्यदेशकालौस्मृत्वाप्रतिगृहीतायांतुलस्यांश्रीकृष्णपरमात्मनाभार्यात्वसिद्ध्येविवाहहोमंकरिष्येइतिसंकल्प्य स्थंडिलकरणादिअग्निध्यानांतेऽन्वाधाय ॥ तुलसीविवाहहोमकर्मणि यायक्ष्यमाणादेवतास्ताःसर्वाःपरिगृहीष्यामिइतिव्याहृत्यंतमुक्त्वावैशेषिकप्रधानहोमे केशवादिचतुर्विंशतिनामभिरेकैकया ज्याहुत्या अग्निंपृथिवींमहांतं वायुमंतरिक्षंमहांतं आदित्यंदिवंमहांतं चंद्रमसंनक्षत्राणिदिशोमहांतंएताःप्रधानदेवताःप्रत्येकं एकैकयाहुत्यालाजद्रव्येण सर्वतोभद्रदेवताःएकैकयाज्याहुत्याअंगहोमेवरुणंद्विरित्यादियजमानान्वारब्धःसामान्यप्रधानांतंहुत्वा ॥ प्रधानहोमंकेशवादिचतुर्विंशतिनामभिःकुर्यात् ॥ तुलस्याःपल्लवस्पर्शनंगृह्णामितेइतिमंत्रेणकुर्यात् ॥ ततोलाजहोमंकुर्यात् ॥

१ अत्रस्वशाखीयाआयुःपदांतामंत्राःपठनीयाः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ भूरग्नयेचपृथिव्यैचमहतेचस्वाहा ॥ अग्नयेपृथिव्यैमहतइदं० ॥ ॐ भुवोवायवेचांतरिक्षायचमह० वायवेंतरिक्षायमहत० ॥ ॐ सुवरादित्यायचदिवेचमह० ॥ आदित्यायदिवेमहत० ॥ ॐ भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चम० ॥ चंद्रमसेनक्षत्रेभ्योदिग्भ्योम० ॥ सर्वतोभद्रदेवताश्चहुत्वाअंगहोमादिहोमशेषंसमापयेत् ॥ आयुष्यमितिमंत्रेणसौभाग्यालंकारादिद द्यात् ॥ ततऐरिणीदानं ॥ पूर्वोच्चरितेत्यादितुलसीदानसंपूर्णफलार्थंश्रीपरमात्मानंवरंतद्युक्तानाचार्यादीन्पूजयिष्ये ॥ वस्त्राद्यैः संपूज्यविवाहोक्तप्रकारेणऐरिणींसंपाद्य ॥ तुलसीदानस्यसंपूर्णतासिध्यर्थंऐरिणीपूजांआचार्यपत्न्यैऐरिणीदानंचकरिष्ये ॥ ऐरि णीत्वमुमादेवीत्यादिश्लोकान्पठेत् ॥ याःफलिनी० अर्वाची० इतिमंत्रैःदानं॥ चत्वारिमासपर्यंततुलस्याःपालनंकृतं ॥ इदानीं तुमयातुभ्यंदत्तास्नेहेनपाल्यतां ततोगृहप्रवेशः ॥ इहप्रियंप्रजया० इतिमंत्रेण ॥ सक्तुमिवेतिमंत्रेणलक्ष्मींसंपूज्य गच्छगच्छे त्यग्निंविसृज्य इमांसोपस्करपीठयुतांप्रतिमांआचार्यायसंप्रददेइतिदत्वातस्मैशय्यांपदंगांचदद्यात् ॥ कर्मणःसांगतासिद्ध्यर्थं ब्राह्मणान्क्षीरशर्कराज्यैर्यथाशक्तिभोजयेत् ॥ दीनानाथेभ्योन्नंदत्वाभूयसींदक्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इतिस्मृतिकौ स्तुभेविष्णुपंचरात्रागमोक्तमूलवाक्यानुसारीतुलसीविवाहप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

॥ २५६ ॥ अश्वत्थोद्यापनंशौनकीयं ॥

श्रीः ॥ तदुक्तंशौनकीये ॥ स्थापनादष्टमेवर्षेद्वादशैकादशेपिवाउत्तरायणेगुरुशुक्रोदयेमाघफाल्गुनचैत्रवैशाखेषुशुक्लपक्षेशुभे ऋक्षेसुवारतिथिलग्नकेस्कंधपर्णांकुरान्वितेविद्युतादावाग्निनावानभिहतेऽश्वत्थोद्यापनंकुर्यात् ॥ तत्रादौकनककुंडलेकनकसूत्रे कनकमौंजीहोमद्रव्याणिसर्वसंभारान्यथासंभवंसंभृत्यअश्वत्थस्यचतुरस्रांवेदिकांविधायअश्वत्थमूले वर्तुलंचतुरस्रंवाऽलवालं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृत्वातत्रतुलसींप्लक्षशाखांशमींचरोपयित्वाश्वत्थवादिकायाचतुरस्रसमताञ्चतुर्द्वारंचतुर्हस्तंअधिकंवामंडपंअश्वत्थात्पूर्वेपश्चिमेउ
त्तरेवोक्तलक्षणमंडपंअन्यंवाकृत्वास्वगृहेज्योतिर्विदादिष्टेमुहूर्तेप्रधानसंकल्पंकुर्यात् ॥ तिथ्यादिसंकीर्त्यममात्मनःपुण्यातिशया
युष्ययशःपुत्रपौत्रपशुवित्तधनधान्यविद्याकुलाभिवृद्धिकुलकोटिसहितस्वर्लोकप्राप्त्यावैहिकामुष्मिकफलप्राप्त्यर्थं दशपूर्वान्दश
परानात्मनासहैकविंशतिपुरुषानुद्धर्तुंविष्णुपदप्राप्त्यर्थं तथाचाश्वत्थस्यब्रह्मत्वशांत्यभीष्टफलदातृत्वाद्यनेकगुणसंपत्त्यर्थंयथाज्ञा
नेनयथामिलितोपचारद्रव्यैर्देशकालानुसारतःएकाहाद्यधिवासप्रकारेणाश्वत्थोद्यापनाख्यंकर्मकरिष्ये ॥ पुत्रकामश्चेत् ममेहज
न्मनिजन्मांतरेवानानानिमित्तोपार्जितसंततिप्रतिबंधकादृष्टनिरसनपूर्वकंसत्पुत्रावाप्तयेइति ॥ तदंगविहितंगणेशपूजनंपुण्या
हवाचनंमातृकापूजनंनांदीश्राद्धमाचार्यादिवरणंचकरिष्येइतिसंकल्प्य ॥ स्वगृह्यविधिनातानिकृत्वाआचार्यादीन्वृणुयात् ॥
अस्मिन्कर्मणिआचार्यंत्वामहंवृणे ॥ सचवृतोस्मीतिवदेत् ॥ एवंब्रह्माणंसदस्यंउपद्रष्टारंवृत्वासर्वान्मधुपर्कादिनासंपूज्यप्रार्थ
येत् ॥ (ऋत्विग्वरणंमंडपप्रतिष्ठावास्तुपूजनप्रकारश्चाग्रेदेवप्रतिष्ठायांद्रष्टव्यः) ॥ ततःस्वगृहेएवअग्रहमखादिविधाय ॥ ततः
सत्विक्सपत्नीकोयजमानःपूर्णकलशहस्तःभद्रंकर्णेभिरितिमंत्रेणमंगलतूर्यघोषेणसहाश्वत्थप्रादक्षिण्येनमंडपपश्चिमद्वारमागत्य
तत्रधरांसंपूज्यमंडपंप्रविश्यकलशमश्वत्थसमीपेनिधायनिर्ऋतिवरुणयोर्मध्येउपविशेत् ॥ ततआचार्यःअश्वत्थोद्यापनकर्मणिवृ
तोहंआचार्यकर्मकरिष्येइतिसंकल्प्य ॥ शरीरशुद्ध्यर्थंभूतशुद्ध्यादिपौरुषजपंन्यासांश्चकृत्वायदत्रसंस्थितमितिसर्षपलाजान्विकीर्य
साधितपंचगव्येनकुशैःसर्वत्रप्रोक्षणंशुचीवोहव्येति आपोहिष्ठेति उत्तरनारायणेनचकार्यं ॥ भद्रंकर्णेस्वस्तिनइतिपठेत् देवाआ
यांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्व भूमौप्रादेशंकुर्यात् ॥ यथोक्तमंडपाकरणेसाधारणमंडपेप्राग्द्वारेअमंत्रकंचूतपल्ल

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वतोरणंदक्षिणेप्लक्षपल्लवतोरणंपश्चिमेवटपल्लवतोरणंउत्तरेअशोकपल्लवतोरणंबध्वातथैवप्रागादिद्वारेषुश्वेतकृष्णहरितरक्तपताकाःअश्वत्थशिरसिमहांतंचित्रध्वजंचबध्वा तथैवप्रागादिद्वारचतुष्टयेवेदादिक्रमेणद्वौद्वावेकमेकंवाब्राह्मणंजपार्थंवृणुयात् ॥ तत आचार्योश्वत्थस्यहरिद्रातैलरोपणादिलौकिकंविधायअश्वत्थवेदिकायांईशानप्रदेशेसर्वतोभद्रंविरच्यतत्रब्रह्मादिदेवतास्थापनंकरिष्यइतिसंकल्प्य उक्तप्रकारेणसंस्थाप्यसंपूज्यतदुपरिअक्षतपुंजेमध्यप्रदेशेकृताऽग्न्युत्तारणप्राणप्रतिष्ठापनसौवर्णप्रतिमायां(वनस्पतेशतवल्शइतिमंत्रेणाश्वत्थनारायणमावाहयेत्।) ततइदंविष्णुरितिवासुदेवं ॥ तद्वामतः अध॒स्यायोष॑णाम॒हीप्र॑ती॒चीवश॑म॒श्व्यं॑ ॥ अधि॑रुक्मा॒विनी॑यते ॥ इतिरुक्मिणीं ॥ तद्दक्षिणतः स॒त्यास॒त्येभि॑र्मह॒तीम॒हद्भि॑र्दे॒वीदे॒वेभि॑र्यज॒तायज॑त्रैः ॥ रु॒जद्दृ॒ह्ला नि॒दद॑दु॒स्रिया॑णां॒प्रति॒गाव॑उ॒षसं॑वावशंत ॥ इतिसत्यभामां ॥ प्रक्षोद॑सा॒धाय॑सासस्रए॒षासर॑स्वतीध॒रुण॒माय॑सी॒पूः ॥ प्र॒बाब॑धाना र॒थ्ये॑वयाति॒विश्वा॑अ॒पोम॑हि॒नासिंधु॑र॒न्याः ॥ इतिसरस्वतीं ॥ आतून॑इंद्रक्षु॒मंतं॑चि॒त्रंग्रा॒भंसंगृ॑भाय ॥ म॒हा॒ह॒स्तीदक्षि॑णेन ॥ इति गणपतिंचावाह्यपौरुषेणश्रीवासुदेवादिभ्योनमइतिसंपूज्यततोश्वत्थपरितःपीठसमंततोवाअष्टौकलशान्स्थापनप्रकारेणसंस्थाप्य तत्रपूर्वकलशेशुद्धोदकमापोहिष्ठेतिनवर्चेनसूक्तेनद्वितीयेगंधोदकंआनोभद्राइतिदशर्चेनतृतीयेक्षीरोदकंस्वस्तिनोमिमीतेतिपंचर्चेनचतुर्थेपंचगव्यंशन्नइंद्राग्नीइतिपंचदशर्चेनपंचमेहरिद्रोदकंएतोन्विंद्रमितितृचेनषष्ठकलशेसर्वौषध्युदकं समुद्रज्येष्ठाइतिचतसृभिःसप्तमेकुशोदकंयाआपोदिव्याइतिअष्टमेकुशोदकंप्रसुवआपइतिनवर्चेन ॥ उक्तप्रकारेणपूर्णपात्रांतंकृत्वातत्रवरुणमावाह्य संपूज्य तत्रपूर्वादिक्रमेणइंद्रादीन्तत्तन्मंत्रैरावाह्यसंपूजयेत् ॥ ततोश्वत्थंपुरुषसूक्तेनाथर्वशिरसाचसंसिच्यपंचामृताभिषेकंचकृत्वाकाषायवस्त्रयुग्मेनचसंवेष्ट्य ॥ ततःपूर्वादिदिक्षुचत्वारिस्थंडिलानिविधायतेषुहोमार्थंचतुरआचार्यान्वृत्वातेस्वगृह्यविधिना

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ग्नीन्स्थापयेयुः ॥ (अत्रकेचनईशानपूर्वयोर्मध्येग्रहहोमादिकंतुपंचमंस्थंडिलमिच्छंति ॥ तदेवमुख्यंकुंडंतत्रविधिवदग्निंप्रतिष्ठाप्यतस्मादग्निनाग्निःसमिध्यतइत्यग्निमुद्धृत्यस्वेस्वेकुंडेस्थापयेयुः ॥ बहवःपूर्वकुंडेएवग्रहप्रधानहोमादिकंकुर्वंति) ॥ पूर्वमकृतेग्रहयज्ञेइदानींईशान्यांवेदिकायांग्रहानावाह्यसंपूज्य ॥ अन्वाद्ध्यात् ॥ तत्रमुख्यकुंडेपूर्वमकृतेग्रहयज्ञेवैशेषिकप्रधानहोमेआदित्यादिनवग्रहान् २८।८ अर्कादिसमिच्चर्वाज्यद्रव्यैः अधिदेवताप्रत्यधिदेवताश्च ८।४ ऋतुसंरक्षकदेवताःऋतुसाद्गुण्यदेवताश्च ४।२ ॥ (अश्वत्थनारायणंअश्वत्थेवइतिमंत्रेणपलाशसमित्तिलाज्यैःप्रतिद्रव्यं १०८ वा २८ ॥ तथाआनोभद्रेतिमंत्रेणविश्वान्देवान्चरुद्रव्येण १०८ वा २८ ॥ तथावासुदेवादिपीठदेवताःपलाशसमित्तिलाज्यैः प्रति १०८ वा २८ ॥ (अश्वत्थसमिच्चर्वाज्यैरित्यन्यत्र) ब्रह्मादिदेवताःइंद्रादिलोकपालांश्च २८ वा ८ यक्ष्ये ॥ ॥ पंचकुंडपक्षेप्रतिकुंडमादावश्वत्थनारायणंपलाशसमित्तिलाज्यैः १०८ इत्युक्त्वापूर्वकुंडेब्रह्मादिमंडलदेवताहोमः ॥ दक्षिणकुंडेगणपतिंतिलाज्याभ्यांस्थापनमंत्रेणप्रतिद्रव्यं १०८ वा २८ ॥ पश्चिमेइंद्राद्यष्टौलोकपालान्तत्तत्स्थापनमंत्रैः २८।८ वास्तुं ॐ वास्तोष्पतेध्रुवास्थूणांसंत्रसोम्यानां ॥ द्रप्सोभेत्तापुरांशश्वतीनामिंद्रोमुनीनांसखा ॥ इतिमंत्रेणशमीसमिच्चर्वाज्यद्रव्यैःप्रतिद्रव्यं २८।८ ॥ उत्तरेश्रीवासुदेवंरुक्मिणींसत्यांसरस्वतींचतत्तत्स्थापनमंत्रेणप्रतिदैवतंप्रतिद्रव्यं १०८ वा २८ पायसाज्याभ्यांअंगहोमेवरुणंद्विरित्यादि० ॥ एवंतत्तन्मंत्रैर्होमंसंपाद्यअंगहोमादिवल्यंतंकृत्वाधिवसेत् ॥ अत्रबलिदानात्पूर्वंयूपाधिवासोन्यत्रोक्तः ॥ पुराणादिनारात्रिं नयेत् ॥ केचनकाषायवस्त्रदानांतंकृत्वापरेद्युरेवहोमादिकमिच्छंति ॥ प्रातर्घटिकांप्रतिष्ठाप्यपीठदेवताःसंपूज्यअष्टकलशदेवता

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विसृज्यब्राह्मणैस्तान्ग्राहयित्वातैःसहआचार्यःपवमानःसुवर्जनइत्यनुवाकेनाष्टकलशोदकैरश्वत्थंत्रिःपरिषिच्यकिंचिदवशिष्टो
दकान्कलशान्पूर्वस्थानेषुस्थापयेत् ॥ इतिअश्वत्थोद्यापनंशौनकीयम् ॥ ॥ छ ॥ ॥ छ ॥

॥ २५७ ॥ अश्वत्थोपनयनम् ॥

श्रीः ॥ ततोयजमानआचार्योवाऽश्वत्थपश्चिमेस्थंडिलेसंस्कारहोमंकुर्यात् ॥ तद्यथा ॥ अश्वत्थस्यपुंसवनाद्युपनयनांतान्संस्का
रान्व्याहृतिद्वाराकरिष्येइतिसंकल्प्य ॥ अग्निंपवमानंप्रतिष्ठाप्यान्वादध्यात् ॥ वैशेषिकप्रधानहोमे ॥ अग्निंवायुंसूर्यप्रजापतिं
आज्यद्रव्येणप्रतिसंस्कारं ८ वा ४ संख्याकाहुतिभिर्यक्ष्ये ॥ प्रतिसंस्कारहोमांते ॥ ॐ वनस्पतेशतवल्शोविरोहसहस्रवल्शा
विवयंरुहेमयंत्वायꣳस्वर्धितिस्तोतिंजानःप्रणिनायमहतेसौभगाय ॥ इतिमंत्रेणअश्वत्थंस्पृशेत् ॥ एवमुपनयनपर्यंतंकृत्वायजमा
नाश्वत्थांतरालेपटंधृत्वासुमुहूर्तेमंगलाष्टकपाठपुरःसरंतदेवलग्नमितिपठितेअंतःपटंनिःसार्य देवानांनुवयमितिध्रुवसूक्तंपठित्वा॥
ॐ देवानांनुवयंजानाप्रवोचामविपन्यया ॥ उक्थेषुशस्यमानेषुयःपश्यादुत्तरेयुगे ॥ ब्रह्मणस्पतिरेतासंकर्मारइवाधमत् ॥ देवा
नांपूर्व्येयुगेसतःसदजायत ॥ देवानांयुगेप्रथमेसतःसदजायत ॥ तदाशाअन्वजायंततदुत्तानपदस्परि ॥ भूर्जज्ञउत्तानपदोभुव
आशाअजायंत ॥ अदितेर्दक्षोअजायतदक्षाद्वदितिःपरि ॥ अदितिर्ह्यजनिष्टदक्षयादुहितातव ॥ तांदेवाअन्वजायंतभद्राअमृ
तबंधवः ॥ १ ॥ यदेवाअदःसलिलेसुसंरब्धाअतिष्ठत ॥ अत्रावोनृत्यतामिवतीव्रोरेणुरपायत ॥ यदेवायतयोयथाभुवनान्य
पिन्वत ॥ अत्रासमुद्रआगूळ्हमासूर्यमजभर्तन ॥ अष्टौपुत्रासोअदितेर्येजातास्तन्वस्परि ॥ देवाँउपप्रैत्सप्तभिःपरामार्ताडमा
स्यत् ॥ सप्तभिःपुत्रैरदितिरुपप्रैत्पूर्व्ययुगं ॥ प्रजायैमृत्यवेत्वत्पुनर्मार्ताडमाभरत् ॥ २ ॥ इतिध्रुवसूक्तम् ॥ येयज्ञेनेतिवर्गपंचकं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शाखांतरस्थमंत्रांश्चपठित्वायुवंवस्त्राणीतिकार्पासंनयज्ञोपवीतपरमंमातमंत्रेणयज्ञोपवीत इयंदुरुक्तेतिद्वाभ्यांकनकमयींदर्भमयीं वामेखलांस्वस्तिनोमिमीतेतिदंडंकृष्णाजिनंचतत्तन्मंत्रैर्दत्वासप्रणवांसव्याहृतिकांसशिरस्कांगायत्रींअश्वत्थंस्पृष्ट्वाउपदेशवत्पठेत् ॥ इत्युपनयनम् ॥ ततोमहानाम्न्यादिसमावर्तनांतंकृत्वाकनककुंडलेलंकारांश्चदत्वाआयुष्यंवर्च्चस्यमितिसूक्तंपठित्वामौंजीविसर्जनांतंकृत्वाममाग्नेइतिसूक्तंपठेत् ॥ ततःअंगहोमादिशेषंसमापयेत् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २५८ ॥ अश्वत्थविवाहः ॥

श्रीः ॥ तत्रादावश्वत्थालवालेशतकुंभमितंशुद्धजलंक्षिप्त्वादुग्धमधुघृतकुंभैश्चसिक्त्वावस्त्रयुग्मेनअश्वत्थतुलस्यादिशाखावेष्टयित्वा अश्वत्थायोष्णीषंवस्त्रयुग्मं तुलस्यैकंचुकींवस्त्रंकंठभूषणंमंगलसूत्रंमौक्तिकंकर्णपादभूषणानिचदत्वा अश्वत्थस्यविवाहविधिं करिष्यइतिसंकल्प्य ॥ पूर्वसंस्कारहोमस्थंडिलोत्तरप्रदेशेस्थंडिलंनिर्मायतयोजकनामानमग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ अत्रप्रधानं ॥ ब्रह्माणंद्वासुपर्णेतिमंत्रेण १०८ तिलाज्यद्रव्येण तथामहाव्याहृतिभिःतिलाज्यद्रव्येण १०८ यक्ष्ये ॥ एवंहोमंकृत्वा तुलस्यश्वत्थयोरंतरालेपटंधृत्वामंगलाष्टकानिपठित्वांतःपटंनिःसार्यतयोश्चतुरःशाखामयान्हस्तान्गृभ्णामीतिमंत्रेणयोजयेत् ॥ ततःअंगहोमादिशेषंसमाप्याश्वत्थंतुलसींचपुरुषसूक्तेनषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ अश्वत्थत्वंजगन्नाथःपुरादेवैर्विनिर्मितः ॥ पापात्संत्राहिनोदेवपुण्यंदेहिमहाफलं ॥ क्षीरोदधिसमुद्भूतेतुलसिहरिवल्लभे ॥ अश्वत्थोद्यापनफलंदेहिमह्यंसदाशिवे ॥ ततआचार्यःग्रहयज्ञोक्तविधिनाबलीन्दत्वाक्षेत्रपालबलिंदत्वा सर्वेआचार्याःस्वस्वकुंडेपूर्णाहुतिंहुत्वाकर्मशेषंसमापयेयुः ॥ ततोयजमानःपीठपूजांविधाय कृतस्याश्वत्थोद्यापनस्यसांगतासिद्धयेआचार्यादिभ्यःपूजापूर्वकंदक्षिणांदत्वाआचार्यादयःपूर्वस्थापिताष्टक

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

लशोदकेनदूर्वापल्लवैःसपल्लीकंयजमानमभिषिंचयुः ॥ तत्रमंत्राः ॥ आनोभद्रातिदशर्चंसूक्तं अस्यवामस्येतिद्विपंचाशदृचंसूक्तं परोमात्रयेतिदशर्चंसूक्तं मुंचामित्वेतिपंचर्चंसूक्तं समुद्रज्येष्ठाइत्यादयःसुरास्त्वामभिषिंचंत्वित्याद्याः ॥ एवमभिषिक्तोयजमानःतिलकादिधृत्वाअग्निंपीठदेवताश्चसंपूज्य उत्तिष्ठब्रह्मणस्पतइत्युत्थाप्यसोपस्करंपीठमाचार्यायगांचदत्वामंडपंसदस्यायआचार्यायवादत्वाभूयसींचदत्वाकर्मेश्वरार्पणंकृत्वाशताधिकान्ब्राह्मणान्संभोज्यआशिषोगृहीत्वा ॥ अनेनाश्वत्थोद्यापनेनश्रीकृष्णःप्रीयतामितिसंपूर्णतांवाचयित्वाइष्टजनैःसहभुंजीत ॥ इतिशौनकीयेश्वत्थोद्यापनम् ॥ ॥ छ ॥ ॥ छ ॥

॥ २५९ ॥ यूपप्रकारः ॥

श्रीः ॥ प्रासादप्रतिष्ठायामयमेवविधिः ॥ तत्प्रकारश्चेत्थं ॥ प्रासादस्यैशान्यां (अश्वत्थस्यतुपूर्वतः) पदत्रयंहित्वाऽरत्निमात्रं गर्तंखात्वातत्राक्षतान्दर्भांश्चक्षिप्त्वा वटाश्वत्थोदुंबरखदिराद्यन्यतमवृक्षनिर्मितं यजमानमात्रमष्टास्रंचषालयुतंमूर्ध्निवर्तुलंयूपंप्रोक्ष्यावटेनिखायहरिद्रातैलाक्तमभिषिच्यचषालंप्रतिमुच्यसर्षपगोरोचनगुग्गुलुदूर्वानिंबपत्राणांपोटलिकांबद्ध्वा युवासुवासाइतिवासोयुगेनाच्छाद्यगंधाद्यैःसंपूज्यलोकपालान्ब्रह्मविष्णुशिवांश्चयूपेसंपूज्य ॥ एह्येहिधर्मध्वजयज्ञनाथत्रयीमयोवेदशरीरयूप ॥ विधायदेवेश्वरयज्ञरक्षांबलिंगृहाणेममहंनमामि ॥ इतिबलिंदत्वामेर्वादिपर्वतान्वरुणंचसंपूज्यप्रार्थयेत् ॥ देहिमेनुग्रहंयूपप्रसादं कुरुचप्रभो ॥ मूलच्छेदेनयत्पापंभूमिघातेनपातकं ॥ अदुष्टयूपघातोत्थंयूपःपापंव्यपोहतु ॥ यद्वाल्येयच्चकौमारेयत्पापंवार्धकेकृतं ॥ तत्सर्वंममदेवेशयूपःपापंव्यपोहतु ॥ यन्निशायांतथाप्रातर्यन्मध्याह्नापराह्णयोः ॥ संध्ययोश्चकृतंपापंकर्मणामनसागिरा ॥ तत्सर्वंममदेवेशयूपःपापंव्यपोहतु ॥ ततोयाओषधीरितिपुष्पमालांबद्धागाढमालिंग्यपुत्रादियुक्तोनमेत् ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २६० ॥ अश्वत्थाद्यापनबाधायनीय (पचकुडी) ॥

श्रीः ॥ अत्रसंक्षिप्तःक्रमः ॥ संकल्पादिमंडपप्रतिष्ठांतेतत्रसर्त्विग्यजमानःप्रविश्यआचार्योमुख्यकुंडपश्चिमेसनवग्रहंवास्तुहोमं संकल्प्यप्रादेशकरणांतेकुंडंसंस्कृत्याग्निंप्रतिष्ठाप्यग्रहवेद्यांपूर्वोक्तमात्स्यानुसारेणग्रहान्संपूज्यतदुत्तरे वास्तुवेद्यामष्टाष्टतिर्यगूर्ध्व रेखीकरणेनैकोनपंचाशत्पदंवास्तुमंडलंसंपाद्यतत्कोणेपार्श्वेचार्धपदानिकृत्वाग्रेप्रतिष्ठोक्तवच्छिख्यादिदेवताःसंपूज्यग्रहवास्तुहो मांतेपृथगग्नौकूष्मांडहोमंकृत्वा ततःपृथग्घव्यवाहसंज्ञकेग्नावग्नेःषोडशसंस्कारसिद्धयेप्रत्येकंचतुर्भिर्व्याहृतिभिराज्यंहुत्वातस्मा त्कुंडादग्निनाग्निरित्यग्निमुद्धृत्यव्याहृत्यास्वेस्वेकुंडेक्षिपेयुः ॥ मुख्याचार्यःस्वर्णसूच्याश्वत्थेलक्ष्मीनारायणौलिखेत्पिप्पलोपरि चित्रध्वजंपताकांचबद्ध्वाविधिवत्सर्वौषधिकलशंप्रतिष्ठाप्यतेनयाओषधीरितिस्नापयित्वापिष्टकेनभूषयित्वा वनस्पतेशतवल्शइ तिगंधादिभिःसंपूज्यगुग्गुलुधूपंदत्वामहानैवेद्यमग्रतोनिधायसुवर्णशलाकयानेत्रोन्मीलनंकृत्वादधिमधुनांजनेनाङ्त्वास्वर्णसू च्याकर्णवेधंकृत्वा हिरण्मयेकुंडलेबध्नीयात् ॥ वेद्यांसर्वतोभद्रेब्रह्मादिमंडलदेवताआवाह्यसंपूज्य तत्पूर्वतःपीठेवस्त्रादावक्षत पुंजेसुवर्णप्रतिमायांवनस्पतेशतवल्शइतिलक्ष्मीनारायणमावाह्यपूजयेत् ॥ तदुत्तरेशांतिकलशंमहीद्यौरित्यादिविधिनाप्रतिष्ठा प्यतत्रगंगादिनदीरावाह्यपूर्णपात्रंनिधायतत्रवरुणंसंपूजयेत् ॥ सर्वेआचार्याःस्वकुंडादीशान्यांकलशान्स्थापयेयुः ॥ सुवर्णश लाकांसूचींचताम्रपात्र्यांकृत्वावेद्यामधिवासयेत् ॥ ततोयूपंवेदिकोपर्युत्तरतःश्वभ्रंकृत्वाऊर्ध्वऊषुणइतितस्मिन्प्रतिष्ठाप्यकुंकुम धूपदीपादिदत्वावस्त्रयुग्मेनाच्छाद्यनैवेद्यंसमर्प्यऊर्ध्वऊषुणइत्यधिवासयेत् ॥ प्रदोषसमयेरौद्रबलिंदत्वामुख्यकुंडपश्चिमतःआ चार्योन्वादध्यात् ॥ व्याहृत्यंतेत्रप्रधानंलक्ष्मीनारायणं न्यग्रोधोदुंबराश्वत्थपलाशापामार्गसमित्तिलपायसैःप्रतिद्रव्यं शताहुति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भिः १०० वनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयꣳरुहेमयंत्वामयꣳस्वधितिस्तीतिजानःप्रणिनायमहतेसौभगायइतियजुषा परोमात्रयेतिसूक्तेनप्रत्यृचंचरुणा पुरुषसूक्तेनप्रत्यृचमाज्येन लोकपालमीशानंपूर्वोक्तन्यग्रोधादिभिः २८ अभित्वादेवसवित रितिमंत्रेण ब्रह्मादिमंडलदेवतास्तैरेवद्रव्यैःयक्ष्ये अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंकुर्यात् ॥ पूर्वकुंडेलक्ष्मीनारायणं न्यग्रोधादितैरेवद्रव्यैः १०० इंद्रमग्निंचत्रातारमग्निंदूतमितिमंत्राभ्यांतैरेवद्रव्यैः २८ ॥ दक्षिणेलक्ष्मीनारायणंपूर्ववत् १०० यमंनिर्ऋतिंचयमायसोममसुन्वंतमितिमंत्राभ्यांतैरेवद्रव्यैः २८ ॥ पश्चिमेलक्ष्मीनारायणंपूर्ववत् १०० वरुणंवायुंचइमंमेवरु णआनोनियुद्भिरितिमंत्राभ्यांतैरेवद्रव्यैः २८ ॥ उत्तरेलक्ष्मीनारायणंपूर्ववत् १०० कुबेरंअभित्यंदेवमितितैरेवद्रव्यैः २८ एवं होमःकार्यः होमकालेद्वारजापकैरग्रेतनदेवप्रतिष्ठापंचकुंडयुक्तक्रमेणसूक्तजपःकार्यः ॥ ततःअंगहोमादिप्रायश्चित्तहोमांतेइंद्रा दिभ्यःक्षेत्रपालायचबलिंदद्यात् ॥ सर्वेआचार्याःपूर्णाहुत्यादिहोमशेषंसमाप्योत्तरदिनावध्यग्निंरक्षेयुरुपवसेयुश्च ॥ इत्यधिवा सनं ॥ प्रातर्घटीस्थापनंआचार्योमंडपदेवताःसंपूज्याश्वत्थंपंचामृतैरभिषिच्यतैलहरिद्रारोपणाद्युपहारांतंलौकिकमेवकुर्यात् ॥ ततःपूर्वोक्ताश्वत्थोद्यापनविधिनास्थापिताष्टकलशैःपवमानःसुवर्जनइतित्रिरभिषिच्य वस्त्रदक्षिणांतोपचारैःसंपूज्यस्थंडिलेश्व त्थस्यब्रह्मत्वप्रसन्नताशांत्यभीष्टदातृत्वादिसिद्धयेनामकरणनिष्क्रमणान्नप्राशनचौलोपनयनमहानाम्नीमहाव्रतगोदानसमावर्त नविवाहेषुप्रतिसंस्कारंव्याहृत्याचतुराज्यंहुत्वाश्वत्थंकरेणस्पृशेत् ॥ अधिवासितसूच्याकर्णवेधंकृत्वाआयुष्यमितिसूक्तेनकुंडले बध्नीयात् शलाकयानेत्रांजनंकार्यं ॥ ततोश्वत्थमूलेतुलसींरोपयित्वायजमानकरेमालतींदत्वामध्येंतःपटंधृत्वा मंगलाष्टकानिप ठित्वापटमुन्नमय्यमालतीमश्वत्थमूलेरोपयित्वासर्वेयेयज्ञेनबृहस्पतेप्रथमंतेवदन्भद्रंकर्णेइत्यादिपठेयुः ततःकौपीनंयुवंवस्त्राणी

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिवस्त्रंमित्रस्यचक्षुरित्यजिनंयज्ञोपवीतमित्युपवीतंआचमनंचइयंदुरुक्तादितिद्वाभ्यांमेखलामावध्यस्वस्तिनइतिदंडंततोभिक्षां
दत्वाततोविवाहाशिषः ऋक्वाइदमग्रेगृहावैप्रतिष्ठेतिपठित्वांतेलाजहोमंकृत्वाऽकृत्वावाहोमशेषंसमाप्य ॥ अश्वत्थोत्तरतःऊ
र्ध्वऊषुणइतियूपंरोपयित्वातुलस्यासहाश्वत्थस्यसुवासिनीभिस्तैलहरिद्रारोपणंमंगलस्नानंचकारयित्वाततःकर्मसाद्गुण्यावाप्तयेल
क्ष्मीनारायणप्रीतयेचदुकूलवस्त्रादिनानाद्रव्यपूरितंवंशपात्रदानंकार्यं ॥ तत्रादौपूजनम् ॥ ब्रह्मविष्णुशिवादीनांस्थानंत्वंवृक्षराट्
स्वयं ॥ अंगैःसर्वैरहोस्वामिंस्थातव्यंतुत्वयाविभो ॥ इत्यावाहनं ॥ मूलानिब्राह्मणायस्यऋगाद्याश्चांगपल्लवाः ॥ फलानियज्ञ
शाखाश्चवाङ्मयोमेदयांकुरु ॥ आसनं ॥ सर्वतीर्थमयोयस्मात्सर्वदेवमयोयतः ॥ सर्वतीर्थांबुभिस्तस्मात्पाद्यमाधत्स्ववृक्षराट् ॥
पाद्यं ॥ आपोधर्मस्ययद्बीजमापोधर्मःसनातनः ॥ अर्घ्यःपवित्रंनास्त्यन्यदपामर्घ्यंगृहाणमे ॥ अर्घ्यं ॥ शुद्ध्यंतिद्रव्यमात्राणि
गंगातोयेननित्यशः ॥ अतःसर्वाणिगात्राणिस्नापयेयज्ञवृक्षराट् ॥ स्नानं ॥ सर्वभूताधिवासायसर्वदेवमयायच ॥ सर्वलज्जानि
रासार्थंवाससीकल्पयाम्यहं ॥ वस्त्रं ॥ यतोगंधवतीभूमिर्भूमिरूपाहिपादपाः ॥ राजात्वंपादपानांचचंदनंप्रतिगृह्यतां ॥ गंधं ॥
वृक्षराजनमस्तुभ्यंयज्ञराजनमोस्तुते ॥ यज्ञांगरूपयज्ञेशवृक्षाश्वत्थनमोस्तुते ॥ पुष्पं ॥ निर्यासंवृक्षराजानांधूपार्थंकल्पयाम्यहं ॥
धर्मरूपेणवर्ततेवृक्षाश्वत्थायतेनमः ॥ धूपं ॥ चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणं ॥ आर्तिक्यंकल्पयेभक्त्यापरिगृह्णीष्ववृक्ष
राट् ॥ दीपं ॥ अन्नाद्भवंतिभूतानियज्ञश्चान्नात्प्रवर्तते ॥ अश्वत्थयज्ञरूपोसिनैवेद्यंतर्पयाम्यहं ॥ नैवेद्यं ॥ पायसंलड्डुकांश्चार्प
येत् ॥ फलतांबूलदक्षिणाःसमर्प्यनमस्कारप्रदक्षिणापुष्पांजल्यंतेप्रार्थयेत् ॥ अश्वत्थोसिजगन्नाथपुरादेवैर्विनिर्मितः ॥ पापात्सं
त्राहिनोदेवपुण्यंदेहिमहाफलं ॥ क्षीरोदधिसमुद्भूतेतुलसिहरिवल्लभे ॥ अश्वत्थोद्यापनफलंदेहिमह्यंसदाशिवे ॥ इतिततःपूर्णाहु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिंवसोर्धारांचहुत्वाचार्यादीन्पूजादक्षिणादिभिस्तोषयेत् ॥ ततोभिषकः ॥ मंडपाद्युपस्करजातमाचार्यहस्तेप्रतिपाद्यसंभवेदश
धान्यानिदद्यादिति ॥ इतिअश्वत्थोद्यापनंबौधायनीयंसंपूर्णम् ॥ ॥ छ ॥ ॥ छ ॥

॥ २६१ ॥ वटोद्यापनम् ॥

श्रीः ॥ तिथ्यादिसंकीर्त्यआत्मनःसकलपापक्षयकुलकोटिसमुद्धरणैहिकामुष्मिकनिरवधिसुखप्राप्तिपूर्वकब्रह्मपदप्राप्तिकामोव
टोद्यापनंतथाभीष्टदातृत्वसिद्ध्यर्थंसर्वप्राणिसुखनिवासार्थंचवटसंस्कारंकरिष्येइतिसंकल्प्य ॥ तदंगविहितंगणपतिपूजनंपुण्या
हवाचनंमातृकापूजनंनांदीश्राद्धमाचार्यादिवरणंचकरिष्ये ॥ स्वगृह्यविधिनातानिकृत्वाचार्यादीन्वृणुयात् ॥ ततःसर्त्विग्यज
मानःपूर्णकलशहस्तःमंगलवाद्यतूर्यघोषेणसहशाकुनसूक्तंपठन्वटमंडपप्रादक्षिण्येनपश्चिमद्वारमागत्यतत्रस्योनाषृथिविमहीद्यौ
रितिमंत्राभ्यांरांसंपूज्यअर्घ्यंदत्वाप्रविश्यवटसमीपेकलशंनिधायवरुणनिर्ऋतिमध्येउपविशेत् ॥ ततआचार्यःकर्मसंकल्प्य भूत
शुद्ध्यादिविधायमंडपांतर्गोरसर्षपलाजान्यदत्रसंस्थितमितिविकीर्य साधितपंचगव्येनकुशैःआपोहिष्ठाइत्यादिमंत्रैःसर्वत्रप्रोक्षणं
कृत्वा भद्रंकर्णेस्वस्तिनइतिमंत्रद्वयंपठित्वादेवाआयांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वभूमौप्रादेशंकुर्यात् ॥ यथोक्तमं
डपेउक्ततोरणपताकाध्वजान्बद्ध्वाशांतिसूक्तजपार्थंवेदादिक्रमेणद्वावेकंवाब्राह्मणंप्रागादिक्रमेणप्रतिद्वारंवृणुयात् ॥ ततआचा
र्योवटपश्चिमेचतुरस्रांवेदिकांनिर्मायतत्रसर्वतोभद्रेउक्तप्रकारेणब्रह्मादिदेवताआवाह्य तदुपरिअक्षतपुंजेकलशत्रयंएकंवाप्रतिष्ठा
प्य ॥ तत्रमध्यमकुंभेब्रह्मजज्ञानमितिब्रह्माणं तदक्षिणेवषट्तेइतिविष्णुं उत्तरेत्र्यंबकमितिरुद्रंएकएवकलशश्चेत्तत्रैवआग्नेय्या
दिकोणेषुगणानांत्वेतिगणपतिं जातवेदसइतिदुर्गां जज्ञानमितिमातृः क्षेत्रस्यपतिनेतिक्षेत्रपालं ततःपरितोलोकेशांस्तत्तन्मन्त्रै

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रावाह्यसंपूज्य वेदीपरितोष्टौकलशान्स्थापनप्रकारेणसंस्थाप्य तत्रपूर्वादिकलशेषुपंचगव्यंसप्त
क्षीरंसर्वौषधीःगंगोदकंचक्षिप्त्वाशुद्धजलेनापूर्यपूर्णपात्रंनिधाय तेषुइंद्रादीनावाह्यसंपूजयेत् ॥ ततस्तैलहरिद्रारोपणादिवटस्य
कृत्वावस्त्रेणावेष्टयेत् ॥ इत्यधिवासनम् ॥ परेद्युःप्रातर्नित्यकर्मनिर्वर्त्यपीठदेवताःसंपूज्यप्रागादिद्वारचतुष्टयेचतुरःकुंभान्संस्था
प्यतेषुउदकंपंचरत्नपल्लवादिचनिधायइंद्रयमवरुणसोमांस्तत्तन्मंत्रैरावाह्यसंपूज्य चतुर्द्वारेषुचतुर्वेदविदोद्विजाःशांतिसूक्तानिप
ठेयुः ॥ ततईशान्यांकुंडेस्थंडिलेवाग्निंप्रतिष्ठाप्य तदुत्तरेवेदिकायामुक्तप्रकारेणग्रहानावाह्यसंपूज्यतदीशान्यांकलशंप्रतिष्ठाप्य
जपार्थंब्राह्मणंवृणुयात् ॥ ततःप्रागाद्याचार्याश्चत्वारःस्वस्वकुंडेस्वगृह्यविधिनाआचार्यकुंडात्श्रोत्रियागाराद्वाऽग्नीन्प्रणीयध्या
येयुः ॥ कुंडचतुष्टयपक्षेप्राक्कुंडादग्निप्रणयनंतत्रैवमुख्यहोमः ॥ अन्वाधानम् ॥ तत्रेशानकुंडेब्रह्मविष्णुरुद्रान्घृताक्तदूर्वाज्य
द्रव्येणाष्टोत्तरशतमिताहुतिभिर्यक्ष्ये ॥ इंद्राद्यष्टौलोकपालान्पलाशसमिच्चर्वाज्यद्रव्यैःअष्टाविंशतिसंख्ययायक्ष्ये ॥ दक्षिणेग
णपतिंदुर्गांसप्तमातृःक्षेत्रपालंघृताक्ततिलद्रव्येणाष्टाविंशत्याहुतिभिर्यक्ष्ये ॥ पश्चिमेसाधिप्रत्यधिदेवतानादित्यादिनवग्रहानर्का
दिसमिच्चर्वाज्यतिलव्रीहिद्रव्यैःअष्टाविंशतिसंख्याकाहुतिभिर्यक्ष्ये ॥ उत्तरेसोमंसोमोधेनुमितिमंत्रेणघृताक्तचरुप्लक्षसमिद्व्येण
अष्टोत्तरशताहुतिभिःब्रह्मादिदेवताश्चैकैकयाज्याहुत्यायक्ष्ये ॥ एवंतत्तन्मंत्रैःहोमंसंपाद्य ॥ ततआचार्योवटस्यहरिद्रातैलादिद
त्वापंचोपचारैःसंपूज्यपूर्वस्थापिताष्टकलशान्ब्राह्मणैर्ग्राहयित्वाच आपोहिष्ठा समुद्रज्येष्ठा इमाआपः एतोन्विंद्रमितिप्रत्येकंजप
न्वटस्याभिषेकंकुर्यात् ॥ ततआचार्यःप्रतीच्यांवटसंस्कारार्थंस्थंडिलंनिर्मायवटस्यपुंसवनादिविवाहांतान्संस्कारान्व्याहृतिद्वारा
करिष्ये ॥ अग्निंप्रतिष्ठाप्यअन्वादध्यात् ॥ अग्निंवायुंसूर्यंप्रजापतिंआज्यद्रव्येण प्रतिसंस्कारंचतुःसंख्याकाहुतिभिर्यक्ष्ये ॥ प्रतिसं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्कारहोमांतेवनस्पतेशतवल्शइतिमंत्रेणवटंस्पृशेत् ॥ एवमुपनयनपर्यंतंहुत्वा ॥ यजमानवटांतरालेपटंधृत्वासुमुहूर्तेतदेवलग्न मितिपठितेअंतःपटंनिःसार्यध्रुवसूक्तंयेयज्ञेनेतिपठित्वाकौपीनंयज्ञोपवीतंमेखलांदंडंचतत्तन्मंत्रैर्दत्वाउपदेशवद्गायत्रींश्रावयित्वा नमेत् ॥ ततोमहानाम्न्यादिसमावर्तनांतंकर्मकृत्वालंकारान्दत्वाआयुष्यंवर्चस्यमितिपठित्वामौंजींविसर्जयेत् ॥ ततोवटंदूर्वांच दुग्धादिनासिक्त्वावटंदूर्वांवस्त्रयुग्मेनसंवेष्टयवस्त्रंकंचुकीमाभरणादिदत्वापूर्ववद्धृत्वागृभ्णामीतिमंत्रेण वटदूर्वयोःपल्लवमयान् हस्तान्योजयेत् ॥ ततःसंस्कारसंबंधिहोमशेषंसमाप्यवटंपुरुषसूक्तेनसंपूज्यप्रार्थयेत् ॥ मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे ॥ अग्रतोरुद्ररूपायवटवृक्षायतेनमः ॥ अकारमूलरूपायउकारस्कंधशाखिने ॥ मकारफलपुष्पायवटवृक्षायतेनमः ॥ ततआचा र्याःस्वस्वकुंडेअंगहोमादिहुत्वाबलिंपूर्णाहुतिंचकृत्वा ॥ यजमानोवटोद्यापनसांगतासिद्ध्येदक्षिणांगांचदास्येइतिसंकल्प्यक्रमे णदत्वा ततऋत्विजःकलशोदकैःयजमानंसमुद्रज्येष्ठाइत्यादिमंत्रैरभिषिच्यकर्मशेषंसमापयेयुः ॥ ततोयजमानःपीठदेवताःसं पूज्यउत्तिष्ठब्रह्मणस्पतइतिउत्थाप्य यांतुदेवगणाःसर्वेइतिविसृज्य पीठादिआचार्यायदत्वा मंडपंसदस्यायदत्वाभूयसींदत्वाश ताधिकान्यथाशक्तिवाब्राह्मणान्भोजयिष्ये ॥ आशिषोगृहीत्वावटोद्यापनपूर्णतांवाचयित्वाइष्टजनैःसहभुंजीत ॥ इति ॥ ॥

॥ २६२ ॥ शालाकरणप्रयोगः ॥

श्रीः ॥ कर्ताउदगयनेशुक्लपक्षेरोहिण्युत्तराफल्गुन्युत्तराषाढोत्तराभाद्रपदान्यतमेज्योतिःशास्त्रोक्तनक्षत्रेवाकृतनित्यक्रियआच म्यप्राणानायम्यदेशकालौसंकीर्त्यममचिरकालवासार्थंश्रीपरमेश्वरप्रीत्यर्थंशालाकरणंकरिष्ये ॥ तदंगंगणपतिपूजनंस्वस्तिपुण्या हवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये ॥ एतान्युक्तरीत्याकुर्यात् ॥ पुण्याहेशालाकरणकर्मणःपुण्याहमित्यूहः वास्तोष्पतिः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रीयतामितिच ॥ अद्यपू० शालाकरणहोमंकर्तुमग्नेर्ध्यानादिकरिष्ये ॥ औपासनाग्निप्रज्वाल्यचत्वारिशृंगेतिध्यात्वावरदोभव ॥ ततोन्वाधानं ॥ समित्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाशालाकरणहोमकर्मणियायक्ष्यमाणदेवताइत्यादिव्याहृत्यंतमुक्त्वा ॥ नास्तिवैशेषिकप्रधानहोमः ॥ अंगहोमेवरुणंद्विरित्यादि ॥ जयादिहोमावैकल्पिकाः ॥ स्विष्टकृदंतमुक्त्वात्रिवृदन्नहोमेअग्निं० एतादेवताःसद्योयक्ष्ये ॥ एषहिदेवः० संस्थाजपांतंपुण्याहवाचनांतंसमापयेत् ॥ ततःअहतंवासःपरिधायद्विराचम्य ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददेभ्रिरसिनारिरसि ॥ इत्यभ्रिं(कुदळी)आदाय ॥ ॐ परिलिखितꣳरक्षःपरिलिखिताअरातयइदमहꣳरक्षसोग्रीवाअपिकृंतामियोस्मान्द्वेष्टियंचवयंद्विष्मइदमस्यग्रीवाअपिकृंतामि ॥ इतिप्रदक्षिणमवटं (खळगी)परिलिखति सकृन्मंत्रेणद्विस्तूष्णीं ॥ एवंप्रत्यवटंयावद्भिरवटैःप्रयोजनंतावंतःखात्वाऽवटसंबंधिपांसून्शालायाअभ्यंतरेप्रकिरति ॥ उच्छ्रयणक्रमेणैवावटानांक्रमोज्ञेयः ॥ ॐ इहैवध्रुवांनिमिनोमिशालांक्षेमेतिष्ठघृतमुक्षमाणा ॥ तांत्वाशालेसुवीराः सर्ववीराअरिष्टवीराअनुसंचरेम ॥ इतिद्वारस्थूणयोर्दक्षिणांस्थूणां (मेड) उच्छ्रयति ॥ अवटेस्थापयतीत्यर्थः ॥ ॐ इहैवध्रुवाप्रतितिष्ठशालेअश्वावतीगोमतीसूनृतावती ॥ ऊर्जस्वतीपयसापिन्वमानोच्छ्रयस्वमहतेसौभगाय ॥ इत्युत्तरांस्थूणामुच्छ्रयति ॥ आत्वाकुमारस्तरुणआवत्सोजगतासह ॥ आत्वाहिरण्मयःकुंभआदध्नःकलशैरयन्निव ॥ इतिसम्यक्स्थापयित्वासंमितेद्वारस्थूणेअभिमृशति ॥ एवमेवस्थूणाराज्यौ(स्थूणापंक्ती)उच्छ्रयतिएवमेवाभिमृशतिच ॥ प्रतिस्थूणंमंत्रावृत्तिरुच्छ्रयणाभिमर्शनयोः ॥ ॐ ऋतेनस्थूणावधिरोहवꣳशोर्ध्वोविराजन्नपसेधशत्रून् ॥ अथास्मभ्यꣳसहवीराꣳरयिंदाः ॥ इतितयोःस्थूणाराज्योरुपरिमध्यमंपृष्ठवंशमारोपयति ॥ ॐ मानःसपत्नःशरणःस्योनादेवोदेवेभिर्विमतास्यग्रे ॥ तृणंवसानाःसुमनाअसित्वꣳशंनएधिद्विपदेशं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चतुष्पदे ॥ इतिसर्वतश्छन्नांशालामभिमृशति ॥ अग्निपूजनंविभूतिधारणंचकुर्यात् ॥ अनेनशालाकरणहोमेनवास्तोष्पतिःप्रीयतां ॥ इतिसंस्कारनिर्णयेबौधायनीयःशालाकरणहोमः ॥ ॥ ॥

॥ २६३ ॥ वास्तुशमनप्रयोगः ॥

श्रीः ॥ सिद्धायांशालायांवास्तुशमनं ॥ तच्चानूराधानक्षत्रेकर्तव्यं ॥ निशायांगृहमध्येउल्लेखनादिनासंस्कृतेस्थलेऔपासनाग्निं प्रतिष्ठाप्यआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यवास्तोः शुभतासिद्धिद्वारावास्तुदेवताप्रीत्यर्थंवास्तुशमनहोमंकरिष्ये ॥ तदंगंगणपतिपूजनंपुण्याहवाचनंचकरिष्ये ॥ उक्तरीत्याकुर्यात् ॥ अद्यपू० वास्तुशमनहोमंकर्तुमग्निध्यानादिकरिष्ये ॥ अग्निंप्रज्वाल्यचत्वारिशृंगेतिध्यात्वावरदोभव ॥ ततोन्वाधानं ॥ समित्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वावास्तुशमनहोमकर्मणियायक्ष्यमाणादेवता० व्याहृत्यंतमुक्त्वावैशेषिकप्रधानहोमे वास्तोष्पतिंतिसृभिराज्याहुतिभिःशचीपतिमाज्याहुत्या वास्तोष्पतिमाज्याहुत्यायक्ष्ये ॥ अंगहोमेवरुणं० जयाभ्यातानराष्ट्रभृतादित्रिवृदन्नहोमांतं ॥ सामान्यप्रधानांतंहुत्वाप्रधानहोमः ॥ आज्येनषडाहुतीर्जुहुयात् ॥ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनएधिद्विपदेशंचतुष्पदेस्वाहा ॥ वास्तोष्पतयइदं १ ॥ वास्तोष्पतेशग्मयासस्त्सदातेसक्षीमहिरण्वयागातुमत्या ॥ आवःक्षेमउतयोगेवरेनोयूयंपातस्वस्तिभिःसदानःस्वाहा ॥ वास्तो० २ ॥ वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो ॥ अजरासस्तेसख्येस्याम पितेवपुत्रान्प्रतिनोजुषस्वस्वाहा ॥ वास्तो० ३ ॥ अपैतुमृत्युरमृतंनआगन्वैवस्वतोनोअभयंकृणोतु॥ पर्णवनस्पतेरिवाभिनःशीय

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ताꣳरयिःसचतांनःशचीपतिःस्वाहा ॥ शचीपतयइदं ४ ॥ परेमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदेवयानात् ॥ चक्षुष्मतेशृण्व तेतेब्रवीमिमानःप्रजाꣳरीरिषोमोतवीरान्स्वाहा ॥ वास्तोष्पतयइदं ॥ इदमूनुश्रेयोवसानमागन्मयद्रोजिद्धनजिदश्वजिद्यत् ॥ पर्णवनस्तेरिवाभिनःशीयताꣳरयिःसचतांनःशचीपतिःस्वाहा ॥ शचीपतयइदं ॥ इमंमेवरुण० इतिअंगहोमजयाद्युपहोमादिकृत्वात्रिवृदन्नहोमंकुर्यात् ॥ संस्थाजपांतंसमाप्य ॥ अनेनवास्तुशमनहोमेनवास्तोष्पतिःप्रीयतां ॥ इतिवास्तुशमनं ॥ ॥

॥ २६४ ॥ स्मृत्युक्तवास्तुशांतिः ॥

श्रीगणेशायनमः ॥ अथसूत्रस्मृतिपुराणसमुच्चयेनवास्तुशांतिप्रयोगः ॥ अथपरिभाषागृह्ये ॥ अनूराधैर्वास्तुशमनंकुर्यान्निशायामंतरागारेग्निमुपसमाधायेति ॥ मात्स्ये ॥ वास्तुपूजामकृत्वातुयोविशेन्नवमंदिरं ॥ रोगान्नानाविधान्क्लेशानश्नुतेसर्वसंकरान् ॥ नारदोपि ॥ अकपाटमनाच्छन्नमकृत्वाबलिभोजनं ॥ गृहंनप्रविशेद्धीमानापदामाकरोहितत् ॥ आचम्यप्राणानायम्य देशकालौसंकीर्त्यश्रीपरमेश्वरप्रीतिद्वारामममनूतनवास्तुकरणाश्रितहीनांधिकांगसमवेधादिदुष्टायव्ययजन्यसर्वदोषशांत्यर्थंअस्य वास्तोःशुभतासिद्धिद्वारापुष्टितुष्टिधनधान्यपुत्रपौत्राद्यभिवृद्ध्यर्थंचसनवग्रहमखांमात्स्योक्तांवास्तुशांतिंगृहप्रवेशंचकरिष्ये ॥ तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंआचार्यादिवरणंचकरिष्ये इतिसंकल्प्यकृत्वा वास्तुशांत्याख्येकर्मणिआचार्यत्वावृणे इतिवृणुयात्पूजयेच्च ॥ आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत ॥ ब्रह्माणं ॥ यथाचतुर्मुखोब्रह्मास्वर्गेलोकेपितामहः ॥ तथात्वंममयज्ञेस्मिन्ब्रह्माभवमहीसुर ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया ॥ सुप्रसन्नैश्चकर्तव्यंकर्मेदंविधिपूर्वकं ॥ इतिप्रार्थ्य ॥ ततआचार्यःदेशकालौसंकीर्त्यअमुकगोत्रोत्पन्नेनअमुकशर्म

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णायजमानेनवृतोहंआचार्यकर्मकरिष्ये ॥ तदंगंगणपतिस्मरणंशरीरशुद्ध्यर्थंपुरुषसूक्तपठनंसर्षपविकिरणादिकरिष्ये ॥ गणपति
पूजनंस्मरणंवाकृत्वा पुरुषसूक्तंपठित्वा० ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥
अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनशांतिकर्मसमारभे ॥ भूतप्रेतपिशाचाद्याअपक्रामंतुराक्षसाः ॥ स्थाना
दस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमां ॥ इतिमंत्रत्रयेणसर्षपान्विकीर्य ॥ शुचीवइत्यृग्भिः ३ पंचगव्येनप्रोक्ष्यापोहिष्ठेतितिसृ
भिःशुद्धाद्भिश्चप्रोक्ष्य ॥ कृतांजलिः ॐ भद्रंकर्णेभिःशृणुयामदेवाः ॥ भद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिः ॥
व्यशेमदेवहितंयदायुः ॥ स्वस्तिनइंद्रोवृद्धश्रवाः ॥ स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः ॥ स्वस्तिनोबृहस्प
तिर्दधातु ॥ मंत्रद्वयंपठेत् ॥ देवाआयांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वभूमौप्रादेशंकुर्यात् ॥ ततोगृहमध्येयजमा
नहस्तैकमितंकुंडंचतुरस्रंचतुरंगुलोत्सेधंस्थंडिलंवाविधाय ॥ तत्पूर्वतस्तदीशान्यांहस्तमितंवेदिद्वयंचकृत्वा ॥ ईशानवेद्यांईशाना
दिकोणेषु ॥ विशंतुभूतलेनागालोकपालाश्चसर्वशः ॥ अस्मिन्गृहेवतिष्ठंतुआयुर्बलकराःसदा ॥ इतिमंत्रावृत्त्याप्रतिकोणंशंकुं
रोपयेत् ॥ ततःशंकुपार्श्वेईशान्यादिक्रमेण ॥ अग्निभ्योप्यथसर्पेभ्योयेचान्येतत्समाश्रिताः ॥ तेभ्योबलिंप्रयच्छामिपुण्यमोदन
मुत्तमं ॥ इतिमंत्रावृत्त्यामाषभक्तबलीन्दद्यात् ॥ ततोवेद्युपरिकुंकुमादिनासुवर्णशलाकया ॥ शांतायैनमः यशोवत्यै० कांता
यै० विशालायै० प्राणवाहिन्यै० सत्यै० सुमत्यै० नंदायै० सुभद्रायै० सुरथायै० एतैर्नामभिःपश्चादारभ्यप्रागायताउद
क्संस्थाअंगुलद्वयांतरालादशरेखालिखित्वा ॥ हिरण्यायै० सुव्रतायै० लक्ष्म्यै० विभूत्यै० विमलायै० प्रियायै० जयायै०
ज्वालायै० विशोकायै० इडायै० एतैर्नामभिःदक्षिणामारभ्योदगायताःप्राक्संस्थारेखाःकृत्वा ॥ ततःपूर्वकृतेकुंडेस्थंडिलेवाउ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्धननादिसंस्कारंविधायपूर्वाहृतमौपासनंलौकिकंवाग्निंप्रतिष्ठाप्यदक्षिणवेद्यांसांगानादित्यादिग्रहान्सस्थाप्यसंपूज्य तदीशान्यां कलशंचसंस्थाप्य कलशस्य० देवदानव०इतिसंप्रार्थ्य अथेशानवेद्यांवास्तुमंडलेप्रतिमादौदेवताआवाहयेत् ॥ तद्यथा ॥ ईशान कोणपदेवास्तोःशिरसि ॥ शिखिनेनमःशिखिनमावाहयामि १ एवंसर्वत्र ॥ तद्दक्षिणैकपदेतद्दक्षिणनेत्रेपर्जन्याय० पर्जन्यं० २ त द्दक्षिणपदेतत्पश्चिमपदेचदक्षिणश्रोत्रेजयंतं० ३ तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधं० ४ तद्दक्षिणपदद्वयेदक्षिणबाहौसूर्यं० ५ तद्दक्षिणपदद्वयेदक्षिणबाहावेवसत्यं०६ तद्दक्षिणपदद्वयेदक्षिणकूर्परेभृशं० ७तद्दक्षिणैकपदेदक्षिणप्रबाहौआकाशं० ८ तद्द क्षिणाग्नेयकोणपदेदक्षिणप्रबाहावेववायुं० ९ तत्पश्चिमैकपदेदक्षिणमणिबंधेपूषणं० १० तत्पश्चिमपदेतदुत्तरपदेचदक्षिणपार्श्वे वितथं० ११ तत्पश्चिमपदद्वयेदक्षिणपार्श्वएवगृहक्षतं० १२ तत्पश्चिमपदद्वयेदक्षिणोरौयमं० १३ तत्पश्चिमपदद्वयेदक्षिणजा नौगंधर्वं० १४ तत्पश्चिमपदद्वयेदक्षिणजंघायांभृंगराजं० १५ तत्पश्चिमोपरिस्थैकपदेदक्षिणस्फिचिमृगं० १६ तत्पश्चिमे नैर्ऋत्यकोणपदेपादयोः पितॄन्० १७ तदुत्तरैकपदेवामस्फिचिदौवारिकं० १८ तदुत्तरपदेतत्प्राक्पदेचवामजंघायांसुग्रीवं० १९ तदुत्तरपदद्वयेवामजानौपुष्पदंतं० २० तदुत्तरपदद्वयेवामोरौवरुणं० २१ तदुत्तरपदद्वयेवामपार्श्वेअसुरं० २२ तदुत्त रपदद्वयेवामपार्श्वएवशोषं० २३ तदुत्तरोपरिस्थैकपदेवाममणिबंधेपापं० २४ तदुत्तरवायव्यकोणपदेवामप्रबाहौरोगं० २५ तत्प्रागेकपदेवामप्रबाहावेवअहिं० २६ तत्प्राक्पदेतद्दक्षिणपदेचवामकूर्परेमुख्यं० २७ तत्प्राक्पदद्वयेवामबाहौभल्लाटं० २८ तत्प्राक्पदद्वयेवामबाहावेवसोमं० २९ तत्प्राक्पदद्वयेवामांसेसर्पान्० ३० तत्प्राक्पदद्वयेवामश्रोत्रेअदितिं० ३१ तत्प्रागुपरि स्थैकपदेवामनेत्रेदितिं० ३२ तद्दक्षिणेशिखिपदाधःकोणपदेमुखेआपवत्सं० ३३ आग्नेयेवायुपदाधःकोणपदेदक्षिणहस्तेसा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वित्रं० ३४ नैर्ऋत्येपितृपदाधःकोणपदेमेढ्रेजयं ३५ वायव्येरोगपदाधःकोणपदेवामहस्तेरुद्रं० ३६ मध्यपदेष्वीशानकोणपदा
दक्षिणपदत्रयेदक्षिणस्तनेअर्यमणं० ३७ तदक्षिणाग्नेयैककोणपदेदक्षिणहस्तेसवितारं० ३८ तत्पश्चिमपदत्रयेजठरदक्षिणभा
गेविवस्वंतं० ३९ तत्पश्चिमैकपदेनैर्ऋत्यकोणेवृषणयोर्विबुधाधिपं० ४० तदुत्तरपदत्रयेजठरवामभागेमित्रं० ४१ तदुत्तरवा
यव्यकोणपदेवामहस्तेराजयक्ष्माणं० ४२ तत्प्राक्पदत्रयेवामस्तनेपृथ्वीधरं० ४३ तत्प्रागीशानकोणपदेउरसिआपवत्सं० ४४
मध्यमनवपदेषुहृन्नाभ्योर्ब्रह्माणं० ४५ तदुत्तरेसुवर्णनिर्मितंवृषवास्तुंवास्तोष्पतइतिमंत्रेणस्थाप्य ततोमंडलाद्बहिरीशानादिको
णेषु ॥ चरकीं० विदारीं० पूतनां० पापराक्षसीं० ततःपूर्वादिदिक्षु ॥ स्कंदं० अर्यमणं० जृंभकं० पिलिपिच्छं० इत्यावाह्य
प्रागाद्यष्टदिक्षुइंद्राद्यष्टौलोकपालांस्तत्प्रकाशकैर्मंत्रैर्नाममंत्रैर्वावाह्य ॥ नर्यप्रजामितिप्रतिष्ठाप्यशिख्यादिदेवताःषोडशोपचारैःपं
चोपचारैर्वापूजयेत् ॥ मंडलादीशान्यांमहीद्यौरित्यादिकलशेवरुणंस्थाप्यपूजयेदितिकेचित् ॥ ततोन्वाधानं ॥ आचार्यःसमित्र
यमादायश्रद्धएहीत्यादिव्याहृत्यंतमुक्त्वा ॥ वैशेषिकप्रधानहोमे आदित्यादिनवग्रहदेवताः अन्वाधानोक्तरीत्योत्कीर्त्य ॥ वास्तु
देवतान्वाधानं शिखिनं पर्जन्यं जयंतं कुलिशायुधं सूर्यं सत्यं भृशं आकाशं वायुं पूषणं वितथं गृहक्षतं यमं गंधर्वं भृंगराजं मृगं
पितॄन् दौवारिकं सुग्रीवं पुष्पदंतं वरुणं असुरं शोषं पापं रोगं अहिं मुख्यं भल्लाटं सोमं सर्पं अदितिं दितिं अपः सावित्रं जयं रुद्रं
(अपउपस्पृश्य) अर्यमणं सवितारं विवस्वंतं विबुधाधिपं मित्रं राजयक्ष्माणं पृथ्वीधरं आपवत्सं ब्रह्माणं एताःपंचचत्वारिंश
देवताःऔदुंबरसमित्तिलपायसाज्यद्रव्यैःप्रत्येकंप्रतिद्रव्यंअष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्याकाभिराहुतिभिः ॥ वास्तोष्प

१ मध्यवर्तिनवकोष्टात्मकब्रह्मपदसंलग्नेप्राग्गतेत्रिपदेइत्यर्थः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तइतिचतसृभिर्ऋग्भिःपूर्वोक्तद्रव्यैःप्रत्यृचंपूर्वोक्तसंख्याहुतिभिः ॥ (अथवा ॥ वास्तोष्पतइतिचत्वारोमंत्राःएकैकेनमंत्रेणसप्तविंशतिःसप्तविंशतिर्वाहुतयइत्यष्टोत्तरशतमितिदानमयूखे ॥ तत्पक्षेप्रत्यृचमितिनोल्लेखः॥) वास्तोष्पतिंवास्तोष्पतइतिचतसृभिः वास्तोष्पतेध्रुवास्थूणामितिचपंचम्याचपंचवाबिल्वफलैस्तद्बीजै (पत्रै) र्वायक्ष्ये ॥ चरकीं विदारीं पूतनां पापराक्षसीं स्कंदं अर्यमणं जृंभकं पिलिपिच्छं इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं सोमं ईशानं एतादेवताःपूर्वोक्तद्रव्यैःप्रत्येकंअष्टचतुरन्यतमसंख्याहुतिभिः अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानांतंहुत्वा ॥ इमानिउपकल्पितानिहवनीयद्रव्याणिहोमपर्याप्तानियायक्ष्यमाणादेवतास्ताभ्योमयापरित्यक्तानिनमम यथादैवतमस्तु ॥ ततःअन्वाधानोक्तसंख्ययाग्रहहोमंसमाप्य ॥ प्रधानहोमंकुर्यात् ॥ प्रत्येकंप्रणवः ॐ शिखिनेस्वाहा पर्जन्याय० जयंताय० कुलिशायुधाय० सूर्याय० सत्याय० भृशाय० आकाशाय० वायवे० पूष्णे० वितथाय० गृहक्षताय० यमाय० गंधर्वाय० भृंगराजाय० मृगाय० पितृभ्यः० दौवारिकाय० सुग्रीवाय० पुष्पदंताय० जलाधिपाय० असुराय० शोषाय० पापाय० रोगाय० अहये० मुख्याय० भल्लाटाय० सोमाय० सर्पाय० अदित्यै० दित्यै० अद्भ्यः० सावित्राय० जयाय० रुद्राय० अर्यम्णे० सवित्रे० विवस्वते० विबुधाधिपाय० मित्राय० राजयक्ष्मणे० पृथ्वीधराय० आपवत्साय० ब्रह्मणे० ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनएधिद्विपदेशंचतुष्पदेस्वाहा ॥ वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो ॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्वस्वाहा ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या ॥ आवःक्षेमउतयोगेवरन्नोयूयंपातस्वस्तिभिःसदानःस्वाहा ॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखासुशेवएधिनःस्वाहा ॥ चतुर्णांमंत्राणामाश्वलायनीयधर्मः॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सूक्तक्रमपाठात् ॥ अन्वाधानसंख्ययाहुतीर्हुत्वा ॥ ॐ वास्तोष्पतेप्रतिजानी० देस्वाहा ॥ १ ॥ वास्तोष्पतेप्रतरण० स्वस्वाहा॥२॥ वास्तोष्पतेशग्मया० नःस्वाहा ॥ ३ ॥ अमीवहा० एधिनःस्वाहा ॥ ४ ॥ वास्तोष्पतेध्रुवास्थूणांसत्रंसोम्यानां ॥ द्रप्सोभेत्तापुरांशश्वतीनामिंद्रोमुनीनांसखास्वाहा ॥ ५॥ इतिबिल्वफलैस्तद्वीजैर्वाहुत्वा ॥ (अपैतुमृत्यु०तिस्वाहा परंमृत्योअनु० रान्स्वाहा० इदमनुश्रेयो० तिस्वाहा) ॐ चरक्यैस्वाहा विदार्यै० पूतनायै० पापराक्षस्यै० स्कंदाय० अर्यम्णे० जृंभकाय० ॐ पिलिपिच्छाय० इंद्राय० ॐ अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय०॥ ततइमंमेवरुणेत्यादिपूर्णपात्रदानांतंकृत्वा आपूर्विकपक्षेणतृवृदन्नहोमंपुण्याहवाचनांतंसमाप्यशालाकरणवास्तुशांतितंत्रकरणपक्षेशालाकरणमंत्रैःसंस्कारः॥ ततःवास्तुमंडलपश्चिमदेशे ॐ शिखिनेनमः इमंपायसबलिंसमर्पयामीत्येवंशिख्यादिभ्यःप्रत्येकंसमुच्चयेनवादद्यात् ॥ चरक्यादिभ्यःनवग्रहेभ्योदिक्पालेभ्यश्चसदीपमाषभक्तबलीन्दत्वा ॥ प्रक्षालितपादपाणिर्द्वादशाष्टचतुर्गृहीतेनवाज्येनपूर्णाहुतिंजुहुयात् ॥ कृतहोमस्यसंपूर्णफलावाप्तयेपूर्णाहुतिंहोष्यामीतियजमानःसंकल्प्यततआचार्यः॥ ॐ सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्तर्षयःसप्तधामप्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वाघृतेनस्वाहा ॥ सप्तवतेग्नयइदं० ॥ शिख्यादिप्रीतयेकांचनंब्रह्मप्रीतयेधेनुंचब्राह्मणायदद्यात् ॥ ततआचार्यादयः आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाःशुचयइतिचतसृभिःपवमानानुवाकेनसुरास्त्वामभिषिंचंत्वित्यादिपौराणमंत्रैश्चसपत्नीकंयजमानंशांतिकलशोदकेनाभिषिच्य ॥ सर्वौषधीरनुलिप्यस्नापयेयुः ॥ ततोयजमानः ब्रह्मस्थानेमध्यनवपदेसुरूपांभूषितांस्त्रीरूपांपृथ्वींध्यात्वा ॥ ॐ धरायैनमइतिसंपूज्यप्रार्थयेत् ॥ सर्वदेवमयंवास्तुसर्वदेवमयंपरं ॥ इतिपठित्वा ॥ ततोगृहंप्रागादितस्त्रिसूत्र्यापावमानेनसूत्रेणवेष्टयेत् ॥ पवमानःसुवर्जनः० ॥ जातवेदामोर्ज

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यँत्यापुनातु ॥ इतिपावमानं ॥ कृणुष्वपाजःप्रसि० परिबाधोअदेवीः ॥ इतिराक्षोघ्नं ॥ ततोदुग्धजलपूर्णयाचसस्तनकुंभ्यात थैवसूक्तद्वयेनबहिरभ्यंतरेचशिवंशिवमितियजुषाधाराद्वयमविच्छिन्नंकुर्यात् ॥ अथयजमानःगृहस्याग्नेयकोणदेशेजानुदघ्न मवटंखात्वातंगोमयेनोपलिप्यपुष्पाक्षतादिभिरलंकृत्य शैवालसप्तबीजानिचंदनंचप्रक्षिप्य जलपूर्णशुक्लपुष्पयुतंगंधादिभिरर्चि तंकुंभंहस्तद्वयेनादायजानुभ्यामवनिंगत्वा ॐ नमोवरुणायेतितज्जलेनगर्तपूरयेत् ॥ तत्प्रागावर्तेप्रदक्षिणेपुष्पेवोर्ध्वमुखेशुभं वैपरीत्येत्वशुभं ॥ ततोमृन्निर्मितपेटिकायांसप्तबीजदध्योदनशैवालपुष्पाणिप्रक्षिप्यपूर्वस्थापितवृषवास्तुंतूर्यमंगलघोषेणानीय तस्यांसंस्थाप्यगंधादिभिःपूजयेत्प्रार्थयेच्च ॥ पूजितोसिमयावास्तोहोमाद्यैरर्चनैःशुभैः ॥ प्रसीदपाहिविश्वेशदेहिमेगृहजंसुखं ॥ वास्तुमूर्तेनमस्तेस्तुभूशय्याभिरतप्रभो ॥ मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा ॥ ततःपेटिकामाच्छाद्यतस्मिन्गर्तेशनैर्निक्षिपेदने नमंत्रेण ॥ सशैलसागरांपृथ्वींयथावहसिमूर्धनि ॥ तथामांवहकल्याणसंपत्संततिभिःसह ॥ गर्तमृदापूर्यमृदधिकेउत्तमंसाम्ये मध्यमंन्यूनेत्वधमं ॥ गर्तोपरिगोमयेनोपलिप्य शुक्लगंधपुष्पाक्षतैर्भूषयेत् ॥ ततोग्नेःपश्चादाचार्यादीन्संपूज्यसवत्सांअलंकृतां गांवासोयुगंचब्रह्मणेनड्वाहंसदस्यायाश्वंवासोयुगंचान्येभ्योऋत्विग्भ्योयथाशक्तिदक्षिणांदत्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ब्रा ह्मणान्भोजयित्वाभूयसींदत्वा ग्रहाणांशिख्यादिवास्तुदेवतानांचपूजांकृत्वाक्षमाप्य यांतुदेवेतिविसृज्याचार्यहस्तेसंप्रतिपाद्या ग्निंसंपूज्यगच्छगच्छेतिविसृज्यब्राह्मणैःसहशांतिंपठेत् ॥ यस्यस्मृत्येतिविष्णुंस्मृत्वाकर्मेश्वरार्पणंकुर्यात् ॥ ॥ छ ॥

॥ २६५ ॥ गृहप्रवेशः ॥

श्रीः ॥ एवंशांतिंविधायतस्मिन्नहनिद्वितीयेहनिवाघटिकास्थापनंकृत्वापरिभाषोक्तसुमुहूर्तेसूत्रोक्तंगृहप्रवेशंकुर्यात् ॥ सयथा ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्विजवरानग्रतःकृत्वापश्चाद्यजमानपत्न्यादध्यक्षतयुक्तंगंधपुष्पाम्रपल्लवफलोपेतंपूर्णकुंभंग्राहयित्वासुवासिनीरन्नसामग्रींदीपंव स्त्रंद्रव्यंदेवतेत्यादिभिःसार्धंकृतशुक्लवस्त्रपरिधानोयजमानोगीतवाद्यैर्ब्राह्मणैर्मंत्रपाठकैःसहगृहंप्रविशेत् ॥ तत्रमंत्राः ॥ ॐ गृहामाबिभीतमावेपिद्वमूर्जंबिभ्रतएमसि ॥ ऊर्जंबिभ्रद्वसुवनिःसुमेधागृहानेमिमनसामोदमानः ॥ येषामभ्येतिप्रवसन्नेति सौमनसोबभुः ॥ गृहानुपह्वयामहेतेनोजानंतुजानतः ॥ उपहूताइहगावउपहूताअजावयः ॥ अथोअन्नस्यकीलालउपहूतोगृहेषुनः ॥ उपहूताभूरिसखाःसखायःस्वादुसंमुदः ॥ अरिष्टाःसर्वपूरुषागृहानःसंतुसर्वदा ॥ ऊर्जस्वंतःपयस्वंतइरावंतोहसामुदः ॥ अनश्याअतृष्यागृहामास्मद्बिभीतन ॥ इतिगृहसमीपंगच्छति ॥ ॐ क्षेमायवःशांत्यैप्रपद्येशिवꣳशग्मꣳशंयोःशंयोः ॥ इतिगृहंप्रविशति ॥ नतदहरागतःकलहंकरोति ॥ ॐ गृहानहꣳसुमनसःप्रपद्येवीरघ्नोवीरतमःसुशेवान् ॥ इरांवहंतःसुमनस्यमानास्तेष्वहꣳसुमनाःसंविशामि ॥ इतिगृहमध्येसंविशति ॥ विश्वाउतत्वयावयंधाराउदन्याइव ॥ अतिगाहेमहिद्विषः ॥ इतिभार्यांसमीक्षते ॥ ततआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममनूतनकृतगृहप्रवेशांगंगणेशपूजनंपुण्याहवाचनंचकरिष्ये ॥ नूतनगृहप्रवेशकारिणेपुण्याहंभवंतोब्रुवंत्वितिविशेषः ॥ सांगतासिद्ध्येब्राह्मणभोजनंसंकल्प्यभूयसींदत्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ ततोदेवताविसर्जनं ॥ इतिसंस्कारनिर्णयेबौधायनीयोगृहप्रवेशः ॥ ॥ छ ॥ ॥ छ ॥

वास्तुमंडलंग्रहमंडलंचारंभें आलोचनीयं ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २६६ ॥ ग्रहयज्ञविचारः ॥

श्रीगणेशायनमः ॥ अथग्रहयज्ञः ॥ सचनित्यनैमित्तिककाम्यभेदेनत्रिविधः ॥ शुभवारत्रिजन्मनक्षत्रायनविषुवोपरागादिषु नित्यः ॥ उपनयनादिकर्मप्रारंभेषुनैमित्तिकः ॥ विपदपगमसंपदादिकामनासुकाम्यः ॥ तत्रकाम्येमंडपकुंडादिकंनित्यंनित्यनैमित्तिकयोरनित्यं ॥ नित्यंनैमित्तिकंहित्वासर्वमन्यत्समंडपमितिमात्स्योक्तेः॥ यदास्थंडिलंतदावेदिरेवनमंडपः तथैवशिष्टाचारदर्शनादितिप्रयोगपारिजाते ॥ ॥ मंडपलक्षणंहेमाद्रौमात्स्ये ॥ गृहस्योत्तरपूर्वेणमंडपंकारयेद्बुधः ॥ रुद्रायतनभूमौवाचतुरश्रमुदक्प्लवं ॥ दशहस्तमथाष्टौवाहस्तान्कुर्याद्विधानतः ॥ तस्यद्वाराणिचत्वारिकर्तव्यानिविचक्षणैरिति ॥ उत्तरपूर्वेणेतितृतीयासप्तम्यर्थे ॥ उदक्प्लवंउदक्क्रमनिम्नं ॥ अष्टौवाहस्तान्मीत्वातावत्प्रमाणंमंडपंकुर्यादित्यर्थः ॥ दशहस्तमष्टहस्तंवामंडपंकुर्यादितिफलितोर्थः ॥ विधानतइत्यनेनभूमिशोधननवभागकरणादिसर्वाक्रियागृह्यते तस्यमंडपस्य ॥ ॥ कुंडंस्कांदे ॥ नवग्रहमखेकुंडंहस्तमात्रंसमंततः ॥ चतुरश्रमधोहस्तंयोनिवक्रंसमेखलं ॥ चतुरंगुलविस्तारामेखलातद्वदुच्छ्रितेति ॥ अधोहस्तमधोभागेहस्तपरिमितखातं योनिवक्रंयोनिवक्रवद्वक्रंकंठः तद्वत्विस्तारवत् ॥ इदंकुंडंमंडपपक्षेतदीशानभागेउदीच्यांवाकार्यमितिहेमाद्रिः ॥ मध्यइतिकेचित् ॥ ॥ योनिर्मात्स्ये ॥ वितस्तिमात्रायोनिःस्यात्षट्सप्तांगुलविस्तृता ॥ कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिता ॥ गजोष्ठसदृशीतद्वदायताच्छिद्रसंयुता ॥ मेखलोपरिसर्वत्रअश्वत्थदलसंनिभेति ॥ तद्वत्अंगुलोच्छ्रायवत् पार्श्वयोर्विस्तृतेत्यर्थः ॥ गजोष्ठसदृशीअश्वत्थदलसदृशीवेतिविकल्पः ॥ साचयोनिःपश्चिमतःकार्या ॥ पश्चिमेमध्यभागेतुयो

१ सर्वसामान्योग्रहयज्ञःपूर्वंसंस्कारप्रकरणेगतोपिपुनःसंस्काररत्नमालास्थोललितोविस्तृतश्चेतिपुनःसंगृहीतः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

निंकुर्याद्विधानतइतिगर्गोक्तेः ॥ कुंडाभावेस्थंडिलेहोमःकार्यः ॥ नित्यंनैमित्तिकंकाम्यंस्थंडिलेवासमाचरेदितिशारदातिलकात् ॥ अत्रद्वयोर्ग्रहणेनकाम्येस्थंडिलंनेत्यर्थादुक्तंभवति ॥ मात्स्ये॥ तस्यचोत्तरपूर्वेणस्थंडिलंहस्तमात्रकं ॥ त्रिवप्रंचतुरश्रंच वितस्त्युच्छ्रायसंयुतं ॥ द्विरंगुलोच्छ्रितोवप्रःप्रथमःसमुदाहृतः ॥ अंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि ॥ द्व्यंगुलस्तत्रविस्तारः सर्वेषांकथितोबुधैरिति ॥ तस्यकुंडस्य ॥ स्थंडिलंवेदिः ॥ वप्रोमेखला ॥ वितस्तिर्द्वादशांगुलातयापरिमितोयउच्छ्रायस्तेनसंयुतंसंबद्धमित्यर्थः॥ द्विरंगुलोच्छ्रितइत्यत्रसुच्प्रयोगआर्षः॥ उपरिप्रथमवप्रोपरि॥ सर्वेषांवप्राणां॥ ॥ काम्येग्निचक्रमावश्यकं ॥ तच्चज्योतिर्निबंधे ॥ सैकातिथिर्वारयुताकृताप्ताशेषेगुणेभ्रेभुविवह्निवासः ॥ सौख्यायहोमेशशियुग्मशेषेप्राणार्थनाशोदिविभूतलेचेति॥ शुक्लप्रतिपदमारभ्यात्रगणनेतिसांप्रदायिकाज्योतिर्विदः॥ एकयासहितासैकागणितासुतिथिषुअधिकाएकातिथिर्गणयितव्येत्यर्थः ॥ अत्रैकवचनंद्वित्र्यादितिथिविषयेजात्यभिप्रायंज्ञेयं ॥ वारैर्युताकृताप्तेत्येतद्व्यंतिथिविशेषणं ॥ कृतशब्देनकृतादियुगचतुष्टयबोधितचतुःसंख्यालक्ष्यते॥ आप्ताभाजिता गुणास्त्रयःअभ्रंशून्यंशशीएकः युग्मंद्वौअन्यत्स्पष्टं॥ एतदपवादस्तत्रैव ॥ नित्येनैमित्तिकेकर्मण्यग्निचक्रंनविद्यतइति ॥ अग्निचक्रंनविद्यतेअग्निचक्रापेक्षानास्तीत्यर्थः ॥ ॥ अथाहुतिपातो ज्यौतिषे ॥ तरणिविद्भृगुभास्करिचंद्रमःकुजसुरेज्यविधुंतुदकेतवः॥ रविभतोदिनभंगणयेत्क्रमात्प्रतिखगंत्रितयंत्रितयंन्यसेत्॥ दिनकरार्कितमःकुजकेतवोहुतभुजोनशुभास्त्वितरेशुभाः॥ दहनचक्रमिदंप्रविलोक्यतांहवनकर्मणिसर्वसमृद्धयइति ॥ तरणिः सूर्यः वित्तबुधः भृगुःशुक्रः भास्करिःशनिः चंद्रमाःप्रसिद्धः कुजोभौमः सुरेज्योगुरुः विधुंतुदोराहुः केतुःप्रसिद्धः दिनकरः सूर्यः आर्किःशनिः तमोराहुः कुजोमंगलः केतुश्चेत्येतेहुतभुजश्चेत्यभाः॥ हुतशेषशिष्टाः चंद्रबुधबृहस्पतिशुक्राःहुतभुजश्चेच्छु

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भाइत्यर्थः ॥ अत्रापवादःक्रियासारे ॥ नित्यनैमित्तिकदुर्गाहोमादीनावचारयेत्इति ॥ ॥ सर्वतोभद्रपीठंतुसर्वाधारंप्रकीर्तितमितिस्मृतिवचनात्सर्वतोभद्रपीठंवेदिकायांपूर्वव्रतोद्यापनारंभोक्तप्रकारेणरचयित्वातत्रब्रह्मादिदेवताआवाह्यसंपूज्यतदुपरिवेदिपरिमितेश्लक्ष्णेक्षौमवस्त्रेकार्पासवस्त्रेवाग्रहपीठानिनिष्पादयेत्तत्प्रकारइत्थं ॥ वेदिपरिमितंश्लक्ष्णंक्षौमंवस्त्रंकार्पासंवाग्रसार्यवस्त्रप्रांतेवध्यर्थंचतुर्दिक्षुसमंतादेकैकांरेखांलिखित्वाततोंतरेकैकांगुलांतरालास्तिस्रस्तथैवलिखित्वावशिष्टंचतुरश्रमंतर्गतंप्रागुदक्चत्रेधाविभज्यतेननिष्पन्नेषुनवकोष्ठेषुमध्यकोष्ठेसूर्यस्य आग्नेयकोष्ठेसोमस्य दक्षिणकोष्ठेभौमस्य ऐशानकोष्ठेबुधस्य उत्तरकोष्ठेगुरोः पूर्वकोष्ठेशुक्रस्य पश्चिमकोष्ठेशनेः नैर्ऋतकोष्ठेराहोः वायव्यकोष्ठेकेतोःइत्येवंक्रमेणवक्ष्यमाणप्रकारेणलिखित्वातत्तद्वर्णाक्षतैःपूरयेत् ॥ अथवायथाग्रहपीठानांपत्रेषुनिवेशोभवतितावत्प्रमाणपत्रंसकर्णिकमष्टपत्रंपद्मंविलिख्यकर्णिकायांसूर्यस्याग्नेयपत्रेसोमस्यदक्षिणपत्रेभौमस्यैशानपत्रेबुधस्योत्तरपत्रेगुरोःपूर्वपत्रेशुक्रस्यपश्चिमपत्रेशनेर्नैर्ऋतपत्रेराहोर्वायव्यपत्रेकेतोरिति ॥ अथपीठरचनाप्रकारः ॥ प्रसारितवस्त्रस्यमध्येरक्तवर्णचूर्णेनषडंगुकासप्तयवसहितैकांगुलात्मकव्यासार्धेनकर्कटकेनसूर्यस्यवृत्तं पीठंविदध्यात् ॥ आग्नेय्यांश्वेतचूर्णेनयूकाद्वयसप्तयवसहितचतुरंगुलात्मकभुजचतुष्टयेनचतुरश्रंसोमस्यपीठं ॥ याम्यायांरक्तवर्णचूर्णेनचतुर्यूकाधिकांगुलत्रयात्मकभुजत्रयेणैकयूकापंचयवसहितद्व्यंगुललंबकंत्रिकोणंदक्षिणाग्रंभौमस्यपीठं ॥ ईशान्यांपीतचूर्णेनचतुर्यवांतरंचतुरंगुलदीर्घउदक्संस्थंभुजसंज्ञकंरेखाद्वयंसमाग्रंलिखित्वाएतद्रेखाद्वयोदग्गताग्रयोरंतरालेतदग्रसंगतांअंतरालप्रदेशपरिमितामेकांरेखांलिखित्वापौरस्त्यभुजोत्तरदिग्गताग्रात्पुरतोग्रसंलग्नांचतुर्यवात्मिकांप्राचींरेखांविधायतथैवपाश्चात्यभुजोत्तरदिग्गताग्रात्पश्चादग्रसंलग्नांचतुर्यवात्मिकांप्रतीचींरेखांविधायभुजद्वयमध्यतउत्तरेऋजुतिर्यक्सूत्रंदत्वाभुजद्वयमध्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तउत्तरेलिक्षापंचकयूकाद्वयसहितपंचयवाधिकांगुलद्वयंनीत्वातत्रचिह्नंकृत्वाचतुर्थवात्मकप्राक्प्रत्यग्रेखाबहिःप्रांतावारभ्यचि
ह्नपर्यंतंषड्यवाधिकद्व्यंगुलात्मकंभुजद्वयंकुर्यादित्येवंबाणाकारंपीठंबुधस्य ॥ उत्तरस्यांपीतचूर्णेनपूर्वपश्चिमभुजद्वयंत्र्यंगुलंदक्षि
णोत्तरभुजद्वयंद्व्यंगुलमित्येवंदीर्घचतुरश्रपीठंगुरोः ॥ पूर्वस्यांश्वेतचूर्णेनपंचयूकासप्तयवैकांगुलात्मकव्यासार्धेनकर्काटकेनवृ
त्तंकृत्वातस्मिन्वृत्तेपूर्वादिशमारभ्ययूकात्रययवद्वयसहितद्व्यंगुलमिताःपंचज्याःकृत्वावशिष्टंमार्जयेदित्येवंपंचकोणपीठंशुक्रस्य,
अथवायूकाषट्कसहितद्व्यंगुलात्मकव्यासार्धेनवृत्तेकृत्वातस्मिन्वृत्तंपूर्वादिशमारभ्ययूकाषट्कयवषट्कसहितत्र्यंगुलपरिमितप्रदेशेचि
ह्नंकृत्वाततआरभ्यान्येषुप्रदेशेष्वेवमेवचिह्नानीत्येवंपंचचिह्नानिकर्काटकेनकृत्वायस्मात्कस्मादेकस्माच्चिह्नादनंतरंचिह्नंविहाय
तृतीयचिह्नसंलग्नंयूकाद्वययवत्रयाधिकांगुलपंचकपरिमितंबाहुंकृत्वैवमेवेतरांश्चतुरोबाहून्संपाद्यकोणाधःस्थान्बाहून्वृत्तंचमार्ज
येदित्येवमुत्कलसंज्ञकंपंचकोणंशुक्रस्यपीठं ॥ पश्चिमायांकृष्णचूर्णेनलिक्षाचतुष्टययूकाचतुष्टययवचतुष्टयाधिकचतुरंगुलात्मक
व्यासार्धेनवृत्तंकृत्वावृत्तसंगतांयूकापंचकयवत्रयाधिकषडंगुलमितांज्यांकुर्यादित्येवंप्रत्यग्ज्यंषडंगुलक्षेत्रफलंशनेःपीठं, अथवा
लिक्षाषट्कयवपंचकाधिकांगुलद्व्यात्मकव्यासार्धेनवृत्तंकृत्वायूकाषट्कयवपंचकाधिकांगुलत्रयपरिमितांवृत्तरेखासंलग्नांज्यासंज्ञ
कांरेखांदद्यादित्येवंद्व्यंगुलक्षेत्रफलंशनेःपीठं ॥ नैर्ऋत्यांनीलचूर्णेनचतुरंगुलपरिमितचतुर्भुजंचतुरश्रंकृत्वातस्यचतुरश्रस्याग्नेय
कोणाद्दक्षिणतोयूकाषट्कैकयवाधिकैकांगुलात्मकंप्रदेशंऋजुतयावर्धयित्वातत्रचिह्नंकृत्वैवमेवोत्तरतोवर्धयित्वाचिह्नंकृत्वादक्षिण
दिग्गतचिह्नान्नैर्ऋतकोणपर्यंतांरेखांलिखित्वोत्तरदिग्गतचिह्नाद्वायव्यकोणपर्यंतांरेखांलिखित्वाधःस्थद्व्यंगुलात्मकभुजार्धयोश्चि
ह्नंकृत्वाताभ्यांचिह्नाभ्यामेकैकांगुलात्मकव्यासार्धेनकर्काटकेनवृत्तद्वयंलिखित्वामध्यस्थितंसर्वंमार्जयेदित्येवंशूर्पाकारंराहोः॥वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

यव्यांनानावर्णैःपूर्वापरमष्टांगुलदीर्घचतुर्यवांतररेखाद्वयंविलिख्यअधआरभ्यपंचांगुलप्रमाणंउपरिभागादेकांगुलप्रमाणंप्रदेशं उत्तररेखायास्त्यक्त्वाशिष्टद्व्यंगुलप्रमाणांरेखांसंमार्ज्यैकयवाधिकचतुरंगुलात्मकौभुजौउत्तरतोमिथोलग्नास्यौकुर्यादित्येवंध्वजा कारंपीठंकेतोः ॥ सर्वत्रकोष्ठमध्यभागानुसारेणपीठमध्यभागकल्पना ॥ आदित्याभिमुखाःसर्वेइत्येतस्मिन्पक्षेसोमचतुरश्रपीठ स्यदिक्षुकोणाःकल्पनीयाः ॥ भौमस्यतुपूर्ववदेवबाणस्याग्रंईशानकोष्ठनैर्ऋतकोणसंमुखंयथाभवतितथाबुधबाणाकारपीठं ॥ बृ हस्पतेःपूर्ववदेव ॥ शुक्रपीठस्यपश्चिमांदिशमारभ्यपंचज्याकल्पनं ॥ शनेःपीठंप्राग्ज्यंकल्पनीयं ॥ नैर्ऋतकोष्ठैशानकोणाभिमु खशूर्पाग्रंकल्पनीयं ॥ ध्वजस्योत्तराग्रतापूर्वत्रोक्ताअत्रदक्षिणाग्रतेतिकेतुपीठमितिविशेषः ॥ सर्वतोभद्रादिपीठेमूलमंत्रेणजुहु यादितिवचनाभावान्नमूलमंत्रेणहोमःकिंतु ॥ प्रणवादिचतुर्थ्यंतंस्वाहाशब्दसमन्वितं ॥ स्यात्पीठदेवताहोमेमंत्रोनामैवकीर्ति तइतिमंत्रप्रकाशकारोक्तेर्नमःशब्दरहितेनैवनाममंत्रेणहोमइतिद्रष्टव्यं ॥ मूलमंत्रस्वरूपंगारुडे ॥ प्रणवादिचतुर्थ्यंतंनमोंतंचै वसत्तम ॥ देवतायाःस्वकंनाममूलमंत्रःप्रकीर्तितइति ॥ तथाचयत्रमूलमंत्रेणजुहुयादितिवचनंविशेषविहितमंत्राभावश्चतत्रा यंमूलमंत्रः ॥ तेनकर्तव्येहोमेनमःशब्दोत्तरंस्वाहाकारोभवति ॥ इतिग्रहयज्ञोपकरणनिर्णयः ॥ ॥ छ ॥ ॥ छ ॥

॥ २६७ ॥ ग्रहयज्ञप्रयोगः ॥

श्रीः ॥ कर्तास्नात्वानित्यकर्मनिर्वर्त्यज्योतिर्विदोक्तेकालेआचम्यप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणामुककर्मणिग्रहानुकू ल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंग्रहयज्ञंकरिष्येइत्युपनयनादिकर्मप्रारंभेषुनैमित्तिकग्रहयज्ञसंकल्पः ॥ त्रिजन्मनक्षत्रायनविषु वोपरागेषुत्रिजन्मनक्षत्रेग्रहयज्ञंकरिष्ये अयनेविषुवेउपरागेवाग्रहयज्ञंकरिष्येइतिनित्यग्रहयज्ञसंकल्पः ॥ विपदपगमसंपदादि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कामनासुविपदपगमार्थसंपत्प्राप्त्यर्थंपुष्टिप्राप्त्यर्थंइत्येवंतत्तत्कामनानुसारेणकाम्यग्रहयज्ञसंकल्पः ॥ तत्रनित्यनैमित्तिकयोर्यथो क्तवस्तूनितदभावेप्रतिनिधिरूपाणियथासंभवंसंपादयेत् ॥ काम्येतुप्रतिनिध्यभावाद्यथोक्तवस्तून्येव ॥ ततोगणपतिपूजनादि नांदीश्राद्धांतंकृत्वाआचार्यादिवरणंकुर्यात् ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नोमुकशाखाध्यायीअमुकशर्माहं अमुकप्रवरान्वि तामुकगोत्रोत्पन्नममुकशाखाध्यायिनममुकशर्माणमस्मिन्ग्रहयज्ञआचार्यत्वेनत्वांवृणेइतिविधिज्ञंकुशलंस्वशाखाविदंसदाचारि णंब्राह्मणंपाणिनापाणिंसंस्पृश्यवृणुयात् ॥ तद्धस्तेफलादिदद्यादित्याचारः॥ततस्तंसंपूज्यप्रार्थयेत् ॥ आचार्यस्तुयथास्वर्गेशक्रादी नांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रतेति ॥ ततोब्रह्माणंवृत्वासंपूज्य ॥ यथाचतुर्मुखोब्रह्मास्वर्गेलोकेपितामहः॥ तथात्वंममयज्ञेस्मिन्ब्रह्माभवमहीसुरेतितंप्रार्थयेत् ॥ ततःसदस्यंवृत्वासंपूज्य ॥ भगवन्सर्वधर्मज्ञसर्वधर्मभृतांवर ॥ विततेममयज्ञे स्मिन्सदस्योभवसुव्रतेतितंप्रार्थयेत् ॥ ततोहोमानुसारेणर्त्विजोवृत्वासंपूज्य ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया ॥ सुप्र सन्नैःप्रकर्तव्यंकर्मेदंविधिपूर्वकमितितान्प्रार्थयेत् ॥ आचार्यःअग्न्यायतनस्यपश्चादुपविश्याचम्यप्राणानायम्ययदत्रसंस्थितंभूतं स्थानमाश्रित्यसर्वदा ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ अपक्रामंतु० ब्रह्मकर्मसमारभेइतिप्रागादिक्रमेणसर्वतःसर्ष पान्विकीर्य ॥ शुचीवइत्यस्यविश्वेदेवामरुतस्त्रिष्टुप् अग्निःशुचिव्रततमइतिद्वयोर्विश्वेदेवाअग्निःशुचिर्गायत्रीपंचगव्येनभूमेःप्रो क्षणेविनियोगः ॥ ॐ शुचीवोहव्यामरुतःशुचीनां ॥ शुचिंश्हिनोम्यध्वरंश्शुचिंभ्यः ॥ ऋतेनसत्यमृतसापआयन् ॥ शुचिंज न्मानःशुचयःपावकाः ॥ अग्निःशुचिव्रततमः ॥ शुचिर्विप्रःशुचिंःकविः ॥ शुचीरोचतआहुतः ॥ उदग्नेशुचयस्तवशुक्राभ्राजंत ईरते ॥ तवज्योतींश्ष्यर्चयः ॥ इतिपंचगव्येनसर्वतोयागभूमिंप्रोक्ष्य ॥ आपोहिष्ठेतितृचस्याग्निरापोगायत्रीशुद्धोदकेनभूमिप्रो

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

क्षणेवि० ॥ ॐ आपोहिष्ठामयोभुव० जनयथाचनः॥ इतिशुद्धोदकेनसवतोयागभूमिंप्रोक्ष्य ॥ स्वस्तिनइत्यस्ययाज्ञिक्योदेव ताउपनिषदइंद्रादयोविराट्त्रिष्टुप्जपेवि० ॐ स्वस्तिनइंद्रो० दधातुइतिजपेत् ॥ देवाआयांतु यातुधानाअपयांतु विष्णोदेवय जनंरक्षस्व इत्यभ्यायतनस्यपश्चाद्भूमिमभिमृशेत् ॥ मंडपपक्षेमंडपार्थभूमिशोधनादितदीयदेवतापूजनांतंशांतिरत्नमालायां वक्ष्यमाणप्रकारेणकुर्यात् ॥ उक्तलक्षणकुंडसत्वेतत्कुशमुष्टिनासंमृज्यकुंडोपरितनमेखलायांश्वेतवर्णभूषितायां इदंविष्णुरित्य स्यसोमोविष्णुर्गायत्रीविष्ण्वावाहनेवि० ॐ इदंविष्णुर्विचक्रमे० पाꣳसुरे विष्णवेनमः विष्णुमावाहयामीतिविष्णुमावाहयेत् ॥ ततोमध्यमेखलायांरक्तवर्णभूषितायां ब्रह्मजज्ञानमित्यस्याग्निर्ब्रह्मात्रिष्टुप्ब्रह्मावाहनेवि० ॐ ब्रह्मजज्ञानं० श्रुविवः ब्रह्मणेनमः ब्रह्माणमावाहयामिइतिब्रह्माणमावाहयेत् ॥ ततोधोमेखलायांकृष्णवर्णभूषितायां मृडानोरुद्रेत्यस्याग्नीरुद्रोविराड्जगती रुद्रा वाहनेवि० ॐ मृडानोरुद्रोतनो० प्रणीतौ रुद्रायनमःरुद्रमावाहयामिइतिरुद्रमावाहयेत्॥ उदकस्पर्शः ॥ततोयोन्यांरक्तवर्णभू षितायां गौरीर्मिमायेत्यस्यविश्वेदेवागौरीजगतीगौर्यावाहनेवि० ॐ गौरीर्मिमायसलिलानितक्षती ॥ एकपदी० व्योमन् गौर्यै नमः गौरीमावाहयामि इतिगौरीमावाहयेत् ॥ ततःपदार्थानुसमयेनतैरेवमंत्रैःक्रमेणषोडशोपचारैःसंपूज्यायतनंसमंताद्गंगवल्लि कयाभूषयित्वाभ्यायतनंगोमयेनोपलिप्योल्लेखनादिकृत्वा वरदनामानंमथितंश्रोत्रियागारादाहृतंवाग्निंमध्येप्रतिष्ठाप्यचत्वारिशृं गेतिध्यायेत् ॥ पुष्टिकामनायांतुबलवर्धननामाग्निः ॥ ततोमंडपस्यैशानकोष्ठेमध्येएकहस्तप्रमाणांचतुरश्रांद्वादशांगुलोच्चांवेदिं विधायतस्याअधस्तादेकांगुलोच्छ्रायंद्व्यंगुलविस्तारंएकंवप्रंकृत्वातस्याधस्तात्तथैवान्यदेकंवप्रंकृत्वातस्याधस्तादेकंवप्रंद्व्यंगुलोच्छ्रा यविस्तारंकृत्वातद्वप्रत्रयंउपरितनवप्रमारभ्यक्रमेणश्वेतरक्तकृष्णचूर्णैरंजयेत् ॥ एतानिवप्राणिवेदिप्रमाणांतर्गतान्येवभवंति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ततोवेद्यांसतिसंभवेसर्वतोभद्रंपीठंविरच्यतत्रपूर्ववत्तोद्यापनारंभोक्तप्रकारेणब्रह्मादिदेवताआवाह्यनर्यप्रजामितिप्रतिष्ठाप्यपदार्थानुसमयेनपूजयेत् ॥ कांडानुसमयपक्षेआवाहनादिषोडशोपचारैरेकस्यपूजांकृत्वापरस्यावाहनादिषोडशोपचारैःपूजांकुर्यादित्येवंक्रमेणसर्वदेवतापूजनं ॥ ततआयतनकरणादिआधारवत्तंत्रेणैतदुद्देशेनदशदशतिलाहुतीर्घृताहुतीर्वाजुहुयात् ॥ एकैकाआहुतिरितिसंप्रदायः ॥ मेर्वादीनांनमःशब्दरहितैःप्रणवादिचतुर्थ्यंतैःस्वाहाशब्दसमन्वितैर्नाममंत्रैर्होमः ॥ होमकर्मणिसमासेग्रहपीठवस्त्रंप्राच्यांशुक्रपीठंयथाभवतितथासर्वतोभद्रपीठोपर्यास्तीर्यप्रतिमानामग्न्युत्तारणंकुर्यात् ॥ अश्मन्नूर्जमित्यनुवाकमंत्राणामग्निर्ऋषिःअग्निर्देवतात्रिष्टुबादीनिछंदांसिअग्न्युत्तारणेवि० ॐ अश्मन्नूर्जपर्वते० इत्यनुवाकेनप्रतिमानामग्न्युत्तारणंकृत्वापंचामृतैः शुद्धोदकेनचप्रक्षाल्यसूर्यप्रतिमायाःकपोलौस्पृष्ट्वाप्राणप्रतिष्ठांविदध्यात् ॥ ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिच्छंदांसिचिद्रूपापराप्राणशक्तिर्देवताआंबीजं ह्रींशक्तिः क्रोंकीलकं सूर्यप्रतिमायांप्राणप्रतिष्ठापनेवि० ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहोंहंसःसोहंसूर्यप्रतिमायाःप्राणाइहप्राणाः ॥ पुनः ॐ आंह्रीमित्यादि० सूर्यप्रतिमायाजीवइहस्थितः ॥ पुनः ॐ आंह्रीमित्यादि० सूर्यप्रतिमायाःसर्वेंद्रियाणि ॥ पुनः ॐ आंह्रीमित्यादिवाङ्मनश्चक्षुःश्रोत्रत्वग्जिह्वाघ्राणपाणिपादपायूपस्थाइहैवागत्यस्वस्तयेसुखंचिरंतिष्ठंतुस्वाहा इतिजपित्वा ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यैदेवत्वमर्चायैस्वाहाइतिमंत्रमुक्त्वाप्रतिमांसजीवांध्यायेत् ॥ सर्वेंद्रियाणिवाङ्मनश्चक्षुःश्रोत्रत्वग्जिह्वाघ्राणपाणिपादपायूपस्थाइत्येकमेववा एवंप्राणप्रतिष्ठांविधायप्रतिमांपंचामृतैःसंस्नाप्यशुद्धोदकेनस्नापयेत् ॥ ततउदुत्यमित्यस्यसोमःसूर्योगायत्रीसू

१ ब्रह्मादिमंडलदेवताःसंस्काररत्नमालास्थेस्मिन्प्रयोगेत्रैवोक्ताअपिपूर्वमुद्यापनोपक्रमेसंगृहीताएवेतिविस्तरभियानात्रपुनःसंगृहीताः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्यप्रतिमानेत्रोन्मीलनेवि० ॥ ॐ उदुत्यंजा० सूर्य इतिमंत्रेणसुवर्णशलाकयादभैशलाकयावागोघृतंगृहीत्वातेनप्रतिमायादक्षवा
मनेत्रेमंत्रावृत्त्याक्रमेणोन्मील्य ॥ अंजंतित्वामित्यस्यविश्वेदेवावनस्पतिस्त्रिष्टुप् सूर्यप्रतिमानेत्रयोर्मधुनाभ्यंजनेवि० ॥ ॐ अंज
तित्वामंध्वरेदेवयंतः ॥ वनस्पतेमधुना० रस्याउपस्थे ॥ मंत्रावृत्त्याक्रमेणनेत्रेमधुनाभ्यज्योपहारंनिवेदयेत् ॥ नेत्रोन्मीलनमा
रभ्योपहारनिवेदनपर्यंतंप्रतिमायाःपुरतःस्वयंअन्योपियःकश्चननैवतिष्ठेत् ॥ एवंसोमादिप्रतिमानामभ्युत्तारणादिकमूहेन प्रत्ये
कंकर्तुमशक्तौसर्वासांसहैवोहेन तत्रहंसःसोहमित्यनंतरंसूर्यादिप्रतिमासुप्राणप्रतिष्ठापनेवि० सूर्यादिप्रतिमानांप्राणाइत्यादिरू
होयथायथं॥ ॥ततोग्रहानावाहयेत् ॥ यथा ॥ आसत्येनेत्यस्यविश्वेदेवाःसूर्यस्त्रिष्टुप् समस्तव्याहृतीनांप्रजापतिःप्रजापतिर्बृहती
सूर्यावाहनेवि० ॐ आसत्येनरजसा० विपश्यन्॥ भूर्भुवःसुवः भगवन्ग्रहाधिपतेकिरीटिन्त्रिदेवतामयपद्मासनपद्माभयकरद्वि
भुजलोहितमाल्यांबरधरलोहितगंधानुलेपनमाणिक्याभरणभूषितजपापुष्पोपमद्युतेसप्ताश्वरथारूढकालिंगदेशोद्भवकाश्यपसगो
त्रसूर्येहागच्छेतिमध्येद्वादशांगुलवर्तुलेआरक्ताक्षतपूरितेपीठेप्राङ्मुख्यांताम्रप्रतिमायांरक्ताक्षतैःसूर्यमावाह्येहाधितिष्ठेतिस्थापये
त् ॥ भूर्भुवःसुवरित्यादिदेवतापदांतमुक्त्वापूजार्थंत्वामावाहयामीत्यावाह्येहाधितिष्ठेतिस्थापयेदित्येवंवासर्वत्रप्रयोगः ॥ आ
प्यायस्वेत्यस्यसोमोविश्वेदेवावासोमोगायत्रीसमस्तव्या० सोमावाहनेवि० ॐ आप्यायस्व० गथे भूर्भुवःसुवः भगवन्नक्षत्राधि
पतेकिरीटिन्सुधामयगदावरकरद्विभुजश्वेतमाल्यांबरधरश्वेतगंधानुलेपनमौक्तिकाभरणभूषितगोक्षीरोपमद्युतेदशाश्वरथारूढ
यमुनातीरोद्भवआत्रेयसगोत्रसोमेहागच्छेत्याग्नेय्यांचतुर्विंशत्यंगुलेचतुरश्रेश्वेताक्षतपूरितेपीठेप्रत्यङ्मुख्यांस्फटिकप्रतिमायांरज
तप्रतिमायांवाश्वेताक्षतैःसोममावाह्येहाधितिष्ठेतिस्थापयेत् ॥ अग्निर्मूर्धेत्यस्यप्रजापतिरग्निर्वांगारकोगायत्रीसमस्तव्या० अंगार

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ततोवेद्यांसतिसंभवेसर्वतोभद्रंपीठंविरच्यतत्रपूर्ववत्तोद्यापनारंभोक्तप्रकारेणब्रह्मादिदेवताआवाह्यनर्यप्रजामितिप्रतिष्ठाप्यपदार्थानुसमयेनपूजयेत् ॥ कांडानुसमयपक्षेआवाहनादिषोडशोपचारैरेकस्यपूजांकृत्वापरस्यावाहनादिषोडशोपचारैःपूजांकुर्यादित्येवंक्रमेणसर्वदेवतापूजनं ॥ ततआयतनकरणादिआधारवत्तंत्रेणैतदुद्देशेनदशदशतिलाहुतीर्घृताहुतीर्वाजुहुयात् ॥ एकैकाआहुतिरितिसंप्रदायः ॥ मेर्वादीनांनमःशब्दरहितैःप्रणवादिचतुर्थ्यंतैःस्वाहाशब्दसमन्वितैर्नाममंत्रैर्होमः ॥ होमकर्मणिसमाप्तेग्रहपीठवस्त्रंप्राच्यांशुक्रपीठंयथाभवतितथासर्वतोभद्रपीठोपर्यास्तीर्यप्रतिमानामग्न्युत्तारणंकुर्यात् ॥ अश्मन्नूर्जमित्यनुवाकमंत्राणामग्निर्ऋषिःअग्निर्देवतात्रिष्टुबादीनिछंदांसिअग्न्युत्तारणेवि० ॐ अश्मन्नूर्जपर्वते० इत्यनुवाकेनप्रतिमानामग्न्युत्तारणंकृत्वापंचामृतैः शुद्धोदकेनचप्रक्षाल्यसूर्यप्रतिमायाःकपोलौस्पृष्ट्वाप्राणप्रतिष्ठांविदध्यात् ॥ ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिच्छंदांसिचिद्रूपापराप्राणशक्तिर्देवताआंबीजं ह्रींशक्तिः क्रोंकीलकं सूर्यप्रतिमायांप्राणप्रतिष्ठापनेवि० ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहोंहंसःसोहंसूर्यप्रतिमायाःप्राणाइहप्राणाः ॥ पुनः ॐ आंह्रीमित्यादि० सूर्यप्रतिमायाजीवइहस्थितः ॥ पुनः ॐ आंह्रीमित्यादि० सूर्यप्रतिमायाःसर्वेंद्रियाणि ॥ पुनः ॐ आंह्रीमित्यादिवाङ्मनश्चक्षुःश्रोत्रत्वग्जिह्वाघ्राणपाणिपादपायूपस्थाइहैवागत्यस्वस्तयेसुखंचिरंतिष्ठंतुस्वाहा इतिजपित्वा ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यैदेवत्वमर्चायैस्वाहाइतिमंत्रमुक्त्वाप्रतिमांसजीवांध्यायेत् ॥ सर्वेंद्रियाणिवाङ्मनश्चक्षुःश्रोत्रत्वग्जिह्वाघ्राणपाणिपादपायूपस्थाइत्येकमेववा एवंप्राणप्रतिष्ठांविधायप्रतिमांपंचामृतैःसंस्नाप्यशुद्धोदकेनस्नापयेत् ॥ ततउदुत्यमित्यस्यसोमःसूर्योगायत्रीसू

१ ब्रह्मादिमंडलदेवताःसंस्काररत्नमालास्थेस्मिन्प्रयोगेत्रैवोक्ताअपिपूर्वमुद्यापनोपक्रमेसंगृहीताएवेतिविस्तरभियानात्रपुनःसंगृहीताः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्यप्रतिमानेत्रोन्मीलनेवि० ॥ ॐ उदुत्यंजा० सूर्य इतिमंत्रेणसुवर्णशलाकयादर्भशलाकयावागोघृतंगृहीत्वातेनप्रतिमायादक्षवा
मनेत्रेमंत्रावृत्त्याक्रमेणोन्मील्य ॥ अंजंतित्वामित्यस्यविश्वेदेवावनस्पतिस्त्रिष्टुप् सूर्यप्रतिमानेत्रयोर्मधुनाभ्यंजनेवि० ॥ ॐ अंजं
तित्वामध्वरेदेवयंतः ॥ वनस्पतेमधुना० रस्याउपस्थे ॥ मंत्रावृत्त्याक्रमेणनेत्रेमधुनाभ्यज्योपहारंनिवेदयेत् ॥ नेत्रोन्मीलनमा
रभ्योपहारनिवेदनपर्यंतंप्रतिमायाःपुरतःस्वयंअन्योपियःकश्चननैवतिष्ठेत् ॥ एवंसोमादिप्रतिमानामभ्युत्तारणादिकमूहेन प्रत्ये
कंकर्तुमशक्तौसर्वासांसहैवोहेन तत्रहंसःसोहमित्यनंतरंसूर्यादिप्रतिमासुप्राणप्रतिष्ठापनेवि० सूर्यादिप्रतिमानांप्राणाइत्यादिरू
होयथायथं॥ ॥ततोग्रहानावाहयेत् ॥ यथा ॥ आसत्येनेत्यस्यविश्वेदेवाःसूर्यस्त्रिष्टुप् समस्तव्याहृतीनांप्रजापतिःप्रजापतिर्बृहती
सूर्यावाहनेवि० ॐ आसत्येनरजसा० विपश्यन्॥ भूर्भुवःसुवः भगवन्ग्रहाधिपतेकिरीटिन्त्रिदेवतामयपद्मासनपद्माभयकरद्वि
भुजलोहितमाल्यांबरधरलोहितगंधानुलेपनमाणिक्याभरणभूषितजपापुष्पोपमद्युतेसप्ताश्वरथारूढकालिंगदेशोद्भवकाश्यपसगो
त्रसूर्येहागच्छेतिमध्येद्वादशांगुलवर्तुलेआरक्ताक्षतपूरितेपीठेप्राङ्मुख्यांताम्रप्रतिमायांरक्ताक्षतैःसूर्यमावाह्येहाधितिष्ठेतिस्थापये
त् ॥ भूर्भुवःसुवरित्यादिदेवतापदांतमुक्त्वापूजार्थंत्वामावाहयामीत्यावाह्येहाधितिष्ठेतिस्थापयेदित्येवंवासर्वत्रप्रयोगः ॥ आ
प्यायस्वेत्यस्यसोमोविश्वेदेवावासोमोगायत्रीसमस्तव्या० सोमावाहनेवि० ॐ आप्यायस्व० गंथे भूर्भुवःसुवः भगवन्नक्षत्राधि
पतेकिरीटिन्सुधामयगदावरकरद्विभुजश्वेतमाल्यांबरधरश्वेतगंधानुलेपनमौक्तिकाभरणभूषितगोक्षीरोपमद्युतेदशाश्वरथारूढ
यमुनातीरोद्भवआत्रेयसगोत्रसोमेहागच्छेत्याग्नेय्यांचतुर्विंशत्यंगुलेचतुरश्रेश्वेताक्षतपूरितेपीठेप्रत्यङ्मुख्यांस्फटिकप्रतिमायांरज
तप्रतिमायांवाश्वेताक्षतैःसोममावाह्येहाधितिष्ठेतिस्थापयेत् ॥ अग्निर्मूर्धेत्यस्यप्रजापतिरग्निर्वांगारकोगायत्रीसमस्तव्या० अंगार

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कावा० ॐ अग्निर्मूर्धादिवः० जिन्वति भूर्भुवःसुवः भगवन्अग्न्याकृतेकिरीटिन्शक्तिशूलगदावरकरचतुर्भुजलोहितमाल्यांबर धरलोहितगंधानुलेपनप्रवालाभरणभूषितज्वलत्पुंजोपमद्युतेरक्तमेषरथारूढअवंतिकासमुद्भवभारद्वाजसगोत्रअंगारकेहागच्छे तिदक्षिणेत्र्यंगुलेत्रिकोणेरक्ताक्षतपूरितेपीठेदक्षिणामुख्यांरक्तचंदनप्रतिमायांसुवर्णप्रतिमायांवारक्ताक्षतैरंगारकमावाह्येहाधि तिष्ठेतिस्थापयेत् ॥ उद्बुध्यस्वेत्यस्याग्निर्बुधस्त्रिष्टुप् समस्तव्या० बुधावाह० ॐ तद्बुध्यस्वाग्ने० तंतुमेतं भूर्भुवःसुवः भगवन्सौ म्याकृतेकिरीटिन्सर्वज्ञानमयखड्गचर्मगदावरकरचतुर्भुजपीतमाल्यांबरधरपीतगंधानुलेपनमरकताभरणभूषितकुंकुमोपमद्युते पीतसिंहरथारूढमगधदेशोद्भवात्रेयसगोत्रबुधेहागच्छेतिऐशान्यांचतुरंगुलेबाणाकरेपीताक्षतपूरितेपीठेउदङ्मुख्यांसुवर्णप्रति मायांपीताक्षतैर्बुधमावाह्येहाधितिष्ठेतिस्थापयेत् ॥ बृहस्पतइत्यस्यविश्वेदेवाबृहस्पतिस्त्रिष्टुप् समस्तव्या० बृहस्पत्यावा० ॐ बृह स्पतेअतियद्र्यो० चित्रं भूर्भुवःसुवः भगवन्सर्वदेवताचार्यकिरीटिन्सर्वविद्यामयदंडाक्षसूत्रकमंडलुवरकरचतुर्भुजपीतमाल्यां बरधरपीतगंधानुलेपनपुष्परागाभरणभूषितसुवर्णोपमद्युतेपीताश्वरथारूढसिंधुदेशोद्भवांगिरसगोत्रबृहस्पतइहागच्छेत्युत्तरेषडं गुलेदीर्घचतुरश्रेपीताक्षतपूरितेपीठेउदङ्मुख्यांसुवर्णप्रतिमायांपीताक्षतैर्बृहस्पतिमावाह्येहाधितिष्ठेतिस्थापयेत् ॥ शुक्रंतइत्यस्य विश्वेदेवाःशुक्रस्त्रिष्टुप्समस्तव्या० शुक्रावाह० ॐ शुक्रंतेअन्य० रातिरस्तु भूर्भुवःसुवः भगवन्सर्वदैत्याचार्यकिरीटिन्सर्वविद्या मयदंडाक्षसूत्रकमंडलुवरकरचतुर्भुजश्वेतमाल्यांबरधरश्वेतगंधानुलेपनवज्राभरणभूषितरजतोपमद्युतेश्वेताश्वरथारूढभोजकट देशोद्भवभार्गवसगोत्रशुक्रेहागच्छेतिपूर्वेनवांगुलेपंचकोणेश्वेताक्षतपूरितेपीठेप्राङ्मुख्यांरजतप्रतिमायांश्वेताक्षतैःशुक्रमावाह्येहा धितिष्ठेतिस्थापयेत् ॥ शंनोदेवीरित्यस्याग्निःप्रजापतिर्गायत्री समस्तव्या० ॐ शंनोदेवीरभिष्टये आपोभवंतु० शंयोः

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नःभूर्भुवःसुवः भगवन्क्रूराकृतेकिरीटिन् शूलबाणधनुर्वरकरचतुर्भुजनीलमाल्यांबरधरनीलगंधानुलेपननीलाभरणभूषितकज्ज
लपुंजोपमद्युतेनीलगृध्ररथारूढसौराष्ट्रदेशोद्भवकाश्यपसगोत्रशनैश्चरेहागच्छेतिपश्चिमेद्व्यंगुलेषडंगुलेवाधनुराकारेनीलाक्षतपू
रितेपीठेप्रत्यङ्मुख्यांलोहप्रतिमायांनीलाक्षतैःशनैश्चरमावाह्येहाधितिष्ठेतिस्थापयेत् ॥ कयानइत्यस्यविश्वेदेवाराहुर्गायत्रीसमस्त
व्या० राह्वावा० ॐ कयानश्चित्र० वृता भूर्भुवःसुवः भगवन्क्रूराकृतेकिरीटिन्करालवदनासिंहिकानंदनखड्गचर्मशूलवरकरचतु
र्भुजकृष्णमाल्यांबरधरकृष्णगंधानुलेपनगोमेदाभरणभूषितकालमेघोपमद्युतेकृष्णसिंहरथारूढराठिनापुरोद्भवपैठीनसिसगोत्र
राहोइहागच्छेतिनैर्ऋत्यांद्वादशांगुलेशूर्पाकारेकृष्णाक्षतपूरितेपीठेदक्षिणामुख्यांसीसप्रतिमायांकृष्णाक्षतैराहुमावाह्येहाधितिष्ठे
तिस्थापयेत् ॥ केतुंकृण्वन्नित्यस्यविश्वेदेवाःकेतुर्गायत्रीसमस्तव्या० केत्वावा० ॐ केतुंकृण्वन्नकेतवे० रजायथाः भूर्भुवःसुवः
भगवन्क्रूराकृतेकिरीटिन्गदावरकरद्विभुजचित्रमाल्यांबरधरचित्रगंधानुलेपनवैडूर्याभरणभूषितधूम्रोपमद्युते चित्रकपोतरथा
रूढअंतर्वेदिसमुद्भवजैमिनिसगोत्रकेतोइहागच्छेतिवायव्यांषडंगुलेध्वजाकारेचित्राक्षतपूरितेपीठेदक्षिणामुख्यांकांस्यप्रतिमायां
चित्राक्षतैःकेतुमावाह्येहाधितिष्ठेतिस्थापयेत्॥ बहुवचनांतोवाकेतुशब्दः अस्मिन्पक्षेऋष्यादिस्मरणवाक्येकेतवोगायत्रीत्यूहः भ
गवंतःक्रूराकृतयःकिरीटिनोगदावरकराद्विभुजाश्चित्रमाल्यांबरधराश्चित्रगंधानुलेपनावैदूर्याभरणभूषिताधूम्रोपमद्युतयश्चित्र
कपोतरथारूढाअंतर्वेदिसमुद्भवाजैमिनिसगोत्राःकेतवइहागच्छतेत्यावाहनवाक्यऊहः इहाधितिष्ठतेतिस्थापनवाक्ये ॥ अथवा
देशगोत्रेएवोच्चार्ये ॥ यथोक्तप्रतिमानामलाभेसर्वाःसुवर्णमय्यःतदलाभेपूगीफलेषुअक्षतपुंजेषुवा ॥ यथोक्ताक्षतालाभेसर्वाःश्वे
ताएव ॥ सर्वेग्रहाआदित्याभिमुखाएववास्थापनीयाः ॥ अस्मिन्पक्षेसूर्यःप्रसिद्धप्राच्यभिमुखएव ॥ अथाधिदेवताः ॥ त्र्यंबक

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मित्यस्यविश्वेदेवाईश्वरोनुष्टुप् समस्तव्या० ईश्वरावा० ॐ त्र्यंबकंयजामहे० मामृतात्ईश्वरायनमः पंचवक्त्रंप्रतिवक्त्रंत्रिलोचनं वृषारूढंचंद्रमौलिंचतुर्भुजंकपालशूलखट्वांगवरधारिणंईश्वरमावाहयामीतिसूर्यदक्षिणपार्श्वेईश्वरं ॥ गौरीमिमायेत्यस्यविश्वेदेवा उमाजगती समस्तव्या० उमावाह० ॐ गौरीर्मिमायसलिलानितक्षती एकपदी० व्योमन्भू० उमायैनमः त्रिदशपूजितांश्वेता सनांपुरोगतासिंहांचतुर्भुजांअक्षसूत्रकमलदर्पणकमंडलुधारिणींउमामावा० इतिसोमदक्षिणपार्श्वेउमां ॥ यदक्रंदइत्यस्याग्निः स्कंदस्त्रिष्टुप् समस्तव्या० स्कंदावा० ॐ यदक्रंदः० अर्वन् भू० स्कंदायनमः षण्मुखंरक्तांबरधरंशिखंडकविभूषणंमयूरवाहनं चतुर्भुजंकुक्कुटघंटावैजयंतीपताकाशक्तिधारिणंस्कंदमावा० इत्यंगारकदक्षिणपार्श्वेस्कंदं ॥ सहस्रशीर्षेत्यस्यप्रजापतिर्नारायणो नुष्टुप् समस्त० नारायणावा० ॐ सहस्रशीर्षापुरुषः सहस्रा० दशांगुलं भू० नारायणायनमः नीलमेघच्छविंश्रीवत्सांकंकौस्तु भवक्षसंगरुडारूढंचतुर्भुजंपद्मकौमोदकीचक्रशंखधारिणंनारायणमा० इतिबुधदक्षिणपार्श्वेनारायणं ॥ ब्रह्मादेवानामित्यस्य विश्वेदेवाब्रह्मात्रि ष्टुप् समस्तव्या० ॐ ब्रह्मादेवानां० रेभन् भू० ब्रह्मणेनमः यज्ञोपवीतिनंपद्मासनस्थंजटिलंचतुर्मुखंचतुर्भुजं अक्षमालास्रुवपुस्तककमंडलुधारिणंपार्श्वभागस्थापितपीतवस्त्रकृष्णाजिनंपार्श्वभागस्थितहंसंब्रह्माणमा० इतिबृहस्पतिदक्षिणपा र्श्वेब्रह्माणं॥सजोषाइंद्रेत्यस्यसोमइंद्रस्त्रिष्टुप् समस्तव्या० इंद्रावा० ॐ सजोषाइंद्र० विश्वतोनः भू० इंद्रायनमः चतुर्दंतगजारू ढंवज्रांकुशपाणिंशचीपतिंनानाभरणभूषितंइंद्रमा० इतिशुक्रदक्षिणपार्श्वेइंद्रं ॥ इमंयमेत्यस्यविश्वेदेवायमस्त्रिष्टुप् समस्तव्या० यमावा० ॐ इमंयमप्रस्तर० मादयस्व भू० यमायनमः ईषत्पीतंदंडपाशपाणिंकृष्णवर्णंरक्तनेत्रंनानाभरणभूषितंमहिषारूढंय ममा० इतिशनैश्चरदक्षिणपार्श्वेयमं ॥ कार्षिरसीत्यस्यसोमःकालोयजुःएकपदागायत्रीवासमस्तव्या० कालावा० ॐ कार्षिरस्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri

पापांमृध्रं भू० कालायनमः करालवदनंविभीषणंनित्यंगसंपवृश्चिकरांमाणंपाशदंडपाणिंकालमा० इतिराहुदक्षिणपार्श्वेकालं ॥ चित्रावसोइत्यस्यप्रजापतिश्चित्रगुप्तोयजुःएकपदाजगतीवा समस्त० चित्रगुप्तावा० ॐ चित्रावसोस्वस्तितेपारमशीय भू० चित्र गुप्तायनमः उदीच्यवेषसाकारंलेखनीपत्रिकापाणिंसौम्यदर्शनंचित्रगुप्तमा० इतिकेतुदक्षिणपार्श्वेचित्रगुप्तं ॥ इत्यधिदेवताःसु वर्णप्रतिमासुपूगीफलेषुअक्षतपुंजेषुवाआवाहयेत् ॥ अथप्रत्यधिदेवताः॥ अग्निंदूतमित्यस्यप्रजापतिरग्निर्गायत्रीसमस्त० अग्न्या वा० ॐ अग्निंदुतंवृणीमहे होतारं० सुक्रतुं भू० अग्नयेनमः पिंगभ्रुवंश्मश्रुलंपिंगलनेत्रंछागस्थंअरुणंसप्तार्चिषंअक्षसूत्रशक्तिधा रिणंअग्निमा० इतिसूर्योत्तरपार्श्वेग्निं ॥ अप्सुमइत्यस्यविश्वेदेवाआपोनुष्टुप् समस्तव्या० अबावा० ॐ अप्सुमेसोमोअब्रवीत् अंत० विश्वभेषजीः भू० अद्भ्योनमः स्त्रीरूपिणीःश्वेतामकरवाहनामुक्ताभरणभूषिताःपाशकलशधारिणीरपआ० इतिसोमोत्तरपार्श्वेऽ पः॥ स्योनापृथिवीत्यस्ययाज्ञिक्योदेवताउपनिषदःपृथिवीगायत्री समस्त० पृथिव्यावा० ॐ स्योनापृ० सप्रथाः भू० पृथिव्यैनमः शुक्लवर्णांदिव्याभरणभूषितांचतुर्भुजांरत्नपात्रसस्यपात्रौषधपात्रपद्मधारिणींसौम्यवपुषंचंडांशुसदृशांबरांचतुर्दिङ्नागपृष्ठगतांपृ थिवीमा० इतिअंगारकोत्तरपार्श्वेपृथिवीं ॥ इदंविष्णुरित्यस्यसोमोविष्णुर्गायत्री समस्त० विष्ण्वावा० ॐ इदंविष्णु० पाꣳसुरे भू० विष्णवेनमः नीलमेघच्छविंश्रीवत्सांकंकौस्तुभवक्षसंगरुडारूढंचतुर्भुजंपद्मशंखचक्रकौमोदकीधारिणंविष्णुमा० इतिबुधोत्तर पार्श्वेविष्णुं ॥ इंद्रंवइत्यस्यविश्वेदेवाइंद्रोगायत्री समस्तव्या० इंद्रावा० ॐ इंद्रंवोवि० केवलः भू० इंद्रायनमः चतुर्दंतगजारूढंव ज्रांकुशपाणिंनानाभरणभूषितंशचीपतिमिंद्रमा० इतिबृहस्पत्युत्तरपार्श्वेइंद्रं ॥ इंद्राणीमित्यस्यविश्वेदेवाइंद्राण्यनुष्टुप् समस्त० इंद्राण्यावा० ॐ इंद्राणीमासुनारिंषुसुपत्नीं० मरुतेपतिः भू० इंद्राण्यैनमः नानालंकारमंडितांदिव्यवस्त्रांश्वेतमाल्यांबरधरांश्वे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तगंधानुलेपनांसौम्यांसंतानमंजरीवरकरांइंद्राणीमा० इतिशुक्रोत्तरपार्श्वेइंद्राणीं ॥ प्रजापतइत्यस्यविश्वेदेवाःप्रजापतिस्त्रिष्टुप् समस्त० प्रजापत्यावा० ॐ प्रजापतेनत्वदेता० रयीणां भू० प्रजापतयेनमः यज्ञोपवीतिनंहंसस्थंएकवक्त्रंचतुर्भुजमक्षस्रक्स्रुव पुस्तककमंडलुधारिणंप्रजापतिमा० इतिशनैश्चरोत्तरपार्श्वेप्रजापतिं ॥ आयंगौरित्यस्याग्निःसर्पागायत्री समस्तव्या० सर्पावा० ॐ आयंगोःपृश्निं० न्त्सुवः भू० सर्पेभ्योनमः अक्षसूत्रधरान्कुंडिकाकारपुच्छसंयुतान्भीषणानेकभोगांस्त्रिभोगान्वासर्पानावा० इतिराहूत्तरपार्श्वेसर्पान् ॥ ब्रह्मादेवानामित्यस्यविश्वेदेवाब्रह्मात्रिष्टुप् समस्तव्या० ब्रह्मावा० ॐ ब्रह्मादेवानांपदवीः० रेभन् भू० ब्रह्मणेनमः यज्ञोपवीतिनंपद्मासनस्थंजटिलंचतुर्मुखंचतुर्भुजंअक्षस्रक्स्रुवपुस्तककमंडलुधारिणंपार्श्वभागस्थापितपीतवस्त्रकृष्णा जिनंपार्श्वभागस्थितहंसंब्रह्माणमा० इतिकेतूत्तरपार्श्वेब्रह्माणं इतिप्रत्यधिदेवताः सुवर्णप्रतिमासुपूगीफलेषुअक्षतपुंजेषुवावा हयेत् ॥ अथवाइन्द्रादयोधिदेवताईश्वरादयःप्रत्यधिदेवताः तत्तद्ग्रहावाहनानंतरमेवतत्तदधिदेवताप्रत्यधिदेवतावाहनंवा ॥ अथकर्मसंरक्षणदेवताः ॥ गणानांत्वेत्यस्यविश्वेदेवागणपतिर्जगती समस्तव्या० गणपत्यावा० ॐ गणानांत्वा०सादनं भू०गण पतयेनमः गजाननंमूषकवाहनंनागयज्ञोपवीतिनंशशांककृतशेखरंसिद्धिबुद्धियुतंत्रिनेत्रंचतुर्भुजंदंताक्षस्रक्परशुमोदकधारिणं गणपतिमा० इतिराहोरुत्तरतोगणपतिं ॥ तामग्निवर्णामित्यस्ययाज्ञिक्योदेवताउपनिषदोदुर्गात्रिष्टुप् समस्त० दुर्गावा० ॐ तामग्निवर्णां० तपसेनमः भू० दुर्गायैनमः सिंहारूढांदशभुजांशक्तिबाणशूलखड्गचक्रचंद्रबिंबखेटकपालशुकटंकहस्तांदुर्गदैत्यासु हारिणींदुर्गामा० इतिशनैश्चरस्योत्तरतोदुर्गां ॥ वायोशतमित्यस्यविश्वेदेवावायुरनुष्टुप् समस्त० वाय्वावा० ॐ वायोशत२० पा जसा भू० वायवेनमः धावद्धरिणपृष्ठस्थंध्वजवज्र

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

काशोयजुः समस्त० आकाशावा० ॐ धृतंघृतपावानः० त्वांतारिक्षाय भू० आकाशायनमः नीलोत्पलाभंनीलांबरंसौम्यंषंढं चंद्रार्ककरंआकाशमा० इतिराहोर्दक्षिणतआकाशं ॥ यावांकशेत्यस्यसोमोश्विनौगायत्री समस्त० अश्व्यावा० ॐ यावांकशा० र्मिमिक्षतं भू० अश्विभ्यांनमः दिव्यौषधिदर्शनीयपुस्तककरौअन्योन्ययुक्तदेहौसुरूपचारुदर्शनरत्नभांडकरचंद्रशुक्लांबरनारी युगपाश्वौंदेवभिषजावश्विनावा० इतिकेतोर्दक्षिणतोश्विनौ ॥ वास्तोष्पतइत्यस्यप्रजापतिर्वास्तोष्पतिस्त्रिष्टुप् समस्त० वास्तोष्प त्यावा० ॐ वास्तोष्पतेप्रतिं० चतुष्पदे भू० वास्तोष्पतयेनमः भगवंतंवास्तुपुरुषंमहाबलपराक्रमंसर्वदेवाधिवासाश्रयशरीरंब्रह्म पुत्रंसकलब्रह्मांडधारिणंभूमिभारार्पितमस्तकंपुरपत्तनप्रासादप्रपावापीसरःकूपादिसंनिवेशसांनिध्यकरंसर्वसिद्धिप्रदंप्रसन्नवदनं विश्वंभरंपरमपुरुषरूपंचक्रशार्ङ्गधरंवरदाभयहस्तंवास्तोष्पतिमा० इतिबृहस्पतेरुत्तरतोवास्तोष्पतिं ॥ क्षेत्रस्यपतिनेत्यस्यविश्वेदे वाःक्षेत्रपालोनुष्टुप् समस्तव्या० क्षेत्रपालावा० ॐ क्षेत्रस्यपतिना० तीदृशे भू० क्षेत्रपालायनमः श्यामवर्णंत्रिलोचनंऊर्ध्वकेशंसु दंष्ट्रंभृकुटीकुटिलाननंनूपुरालंकृतांघ्रिंसर्पमेखलायुतंसर्पांगंअतिक्रूरंक्षुद्रघंटामयींकरोटिकामयींगुल्फावलंबिनींमालांदधानंउर गाबद्धंचंद्ररेखासुमुखंअष्टहस्तंशूलकुंतखड्गदुंदुभियुतदक्षिणहस्तंकपालघंटाचर्मचापयुतवामहस्तंभीमंदिग्वाससममितद्युतिंक्षेत्र पालमा० इतिअंगारकोत्तरतःक्षेत्रपालं ॥ अथवासूर्यगुरुशनिकेतुमध्येगणपत्यादीन्यथावकाशंस्थापयेत् ॥ अथलोकपालाः ॥ त्रातारमिंद्रमित्यस्यविश्वेदेवाइंद्रस्त्रिष्टुप् समस्तव्या० इंद्रावा० ॐ त्रातारमिंद्रं० भू० इंद्रायनमः ऐरावतारूढंवज्रपाणिंसुवर्णवर्णं नाकपममरेश्वरमिंद्रमा० इतिशुक्रमंडलपुरतइंद्रं ॥ अग्नेनयेत्यस्यविश्वेदेवाअग्निस्त्रिष्टुप् समस्तव्या० अग्न्यावा० ॐ अग्नेनयसु पथा० भू० अग्नयेनमः सुलोहितवर्णसप्तार्चिषंसप्तहस्तंस्वाहास्वधाप्रियंचतुःशृंगंसप्तजिह्वंद्विवक्त्रंत्रिपादंमेषारूढंशक्त्यन्नस्रुक्स्रु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वतोमरव्यजनघृतपात्रधारिणंअग्निमा० इतिसोममंडलतआग्नेय्यांअग्निं ॥ इमंयमेत्यस्यत्रिश्वेदेवायमस्त्रिष्टुप् समस्त० यमावा० ॐ इमंयमप्र० भू० यमायनमः दंडधारिणंइलाप्रियंमहिषवाहनंकृष्णवर्णशुभाशुभकर्मफलप्रदंयममावा० इत्यंगारकमंडलाद्दक्षिणतोयमं ॥ असुन्वंतमित्यस्याग्निर्निर्ऋतिस्त्रिष्टुप् समस्त० निर्ऋत्यावा० ॐअसुन्वंतमयजमानमि० भू० निर्ऋतयेनमः खड्गचर्मधरंनरारूढंऊर्ध्वकेशंविरूपाक्षंकरालंकालिकाप्रियंनिर्ऋतिमा० इतिराहुमंडलान्नैर्ऋत्यांनिर्ऋतिं ॥ तत्त्वायामीत्यस्यविश्वेदेवावरुणस्त्रिष्टुप् समस्त० वरुणावा० ॐ तत्त्वायामि० भू० वरुणायनमः नागपाशधरमंबुपतिंश्वेतभूषणंपद्मिनीप्रियंमकारूढंवरुणमा० इतिशनिमंडलात्पश्चिमेवरुणं ॥ आनोनियुद्भिरित्यस्यविश्वेदेवावायुस्त्रिष्टुप् समस्तव्या० वाय्वावा० ॐ आनोनियुद्भिःशतिनीभिरध्वरं ॥ सहस्त्रिणी० भू० वायवेनमः जगत्प्राणरूपंकृष्णमृगारूढंहेमदंडधरंश्यामवर्णमोहिनीप्रियंवायुमावा० इतिकेतुमंडलाद्वायव्यांवायुं ॥ संतेपयांसीत्यस्याग्निःसोमस्त्रिष्टुप् समस्तव्या० सोमावा० ॐ संतेपयांसि० भू० सोमायनमः मृगारूढंगदापाणिंश्वेतवर्णंरोहिणीप्रियंसोममा० इतिबृहस्पतिमंडलादुत्तरतःसोमं ॥ कुबेरपक्षे राजाधिराजायेत्यस्यारुणःकुबेरोष्टिः समस्तव्या० कुबेरावा० ॐ राजाधिराजाय० महाराजायनमः भू० शिबिकारूढंकुंतपाणिंनिधीश्वरंसुवर्णवर्णंधनदंप्रभुंचित्रिणीप्रियंकुबेरमा० इतिकुबेरं० स्थानंसोमस्यैवैतस्यापि ॥ अभित्वेत्यस्यविश्वेदेवाईशानोगायत्री समस्त० ईशानावा० ॐ अभित्वादेव० ॐ भू० ईशानायनमः शुद्धस्फटिकसंकाशंवृषारूढंवराभयशूलाक्षसूत्रधारिणंपंचवक्त्रंत्रिनेत्रंनानाभरणभूषितंपार्वतीप्रियमीशानमा० इतिबुधमंडलादीशान्यांईशानं ॥ इतिप्रतिमास्तुपूगीफलेषुअक्षतपुंजेषुवालोकपालानावाहयेत् ॥ ईश्वरादि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मित्यश्विनोरूहः ॥ अन्यत्समानं ॥ ततःनयंप्रजामित्यस्याग्निर्नयानुष्टुप् ॥ देवताप्रतिष्ठापनेवि० ॐ नयंप्रजांमेंगोपाय अमृत्त्वार्य० प्रतिष्ठितां इतिदेवताप्रतिष्ठापनंकुर्यात् ॥ मंत्रावृत्तिःप्रतिदैवतं तत्तदावाहनानंतरमेवतत्तत्प्रतिष्ठापनंतत्तत्पूजनंचेति कांडानुसमयएवात्रनियतः सौकर्यात् ॥ आवाहनंप्रतिष्ठापनंचक्रमेणैकैकस्यादेवतायाःकृत्वैकैकस्यैतंतमुपचारंनिवेदयेदित्येवं रूपोहिपदार्थानुसमयः ॥ तस्यशुक्राकौंप्राङ्मुखौज्ञेयावित्यस्मिन्पक्षेप्रतिदेवतंयथायथंयथायोग्यप्राप्तप्राङ्मुखोदङ्मुखतयोस्तत्तदभिमुखतायावाविलंबावहत्वान्नभवति ॥ विलंबसहनेप्रधानस्यतदारंभस्यवापूर्वाह्णकालताबाध्येत अतःकांडानुसमयएवात्र ॥ ग्रहाणांपूजनेयंविशेषः ॥ ग्रहवर्णानिवासांसि ॥ सूर्यायरक्तचंदनं चंद्रायश्वेतचंदनं भौमायरक्तचंदनं बुधायकेशरयुक्तंचंदनं गुरवेकेशरयुक्तंचंदनं शुक्रायश्वेतचंदनं शनिराहुकेतुभ्योऽगुरुः ॥ सूर्यायरक्तंकरवीरं सोमायश्वेतंकरवीरं भौमायरक्तोत्पलं बुधायचंपकपुष्पं गुरवेऽगस्त्यपुष्पं शुक्रायातसीपुष्पं शनयेकालांजनीपुष्पं राहवेसर्षपपुष्पं केतवेशंखिनीपुष्पं ॥ रवयेसल्लकीनिर्यासधूपः सोमायघृतयुक्ताक्षतधूपः भौमायसारफलीतिप्रसिद्धस्यसर्जरसस्यधूपः बुधायागुरुधूपः गुरवेलोहबाणइतिप्रसिद्धस्यसिल्हाद्रव्यस्यधूपः शुक्रायबिल्वफलनिर्याससहितस्यागुरोर्धूपः शनयेगुग्गुलुधूपः राहुकेतुभ्यांलाक्षाधूपः ॥ घृतदीपःसर्वेषां ॥ रवयेगुडौदनः सोमायघृतयुक्तंपायसं भौमायहविष्यान्नं बुधायषाष्टिकपायसं गुरवेदध्योदनः शुक्रायघृतौदनः शनयेतिलमाषमिश्रितौदनः राहवेलवणमिश्रितक्षीरयुक्तओदनः केतवेआरक्तपुष्पयुतलवणमिश्रिताजाक्षीरयुततिलतंदुलमिश्रितओदनः ॥ रवयेद्राक्षाफलानि सोमायेक्षवः भौमायपूगानि बुधायनारिंगाणि गुरवेजंबीराणि शुक्रायबीजपूराणि शनयेखर्जूरफलानि राहवेनारिकेलफलानि केतवेदाडिमीफलानि ॥ ग्रहवर्णवस्त्राभावेश्वेतरंजितानिकृत्वासमर्पणीयानि एतदसंभवेश्वेतानि ॥ यथो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

क्तचंदनपुष्पालाभेयानिकानिचित्तत्तद्वर्णानि तदलाभेश्वेतानि॥ यथोक्तधूपालाभेगुग्गुलुः तस्याप्यलाभेयःकश्चनसौरभयुक्॥ यथोक्तौदनालाभेतत्तद्वर्णयुक्तपिष्टौदनोघृतौदनोवानैवेद्यं यथोक्तफलालाभेनारिकेरफलानिखर्जूरफलानिवा॥ सतिसंभवेफल पुष्पसमन्वितंवितानमप्यर्पणीयं॥ अधिदेवताप्रत्यधिदेवतानांचैतएवोपचाराः गणपत्यादिषुतुश्वेतमेवचंदनं शतपत्राण्येवपु ष्पाणि धूपोगुग्गुलुरेव गोघृतदीपः घृतौदनोनैवेद्यं शतपत्रपुष्पालाभे यथासंभवंपुष्पं फलंनारिकेरंखर्जूरफलंवेतिद्रष्टव्यं॥ ततःपीठादीशान्यामुदीच्यांवा महीद्यौरितिभूमिंस्पृष्ट्वा तत्ररंगवल्लीपद्मंविधाय ओषधयःसंवदंतइतिप्रस्थपरिमितधान्यपुंजंत त्रकृत्वा तत्राजिघ्रेत्यनेननवमव्रणंतैजसंमृन्मयंवाचंदनेनानुलिप्तंदध्यक्षतपुष्पमालाद्यलंकृतंत्रिसूत्रवेष्टितग्रीवंकलशंसंस्थाप्य इ मंमइत्युदकेनपूरयित्वा आप्यायस्वेत्यस्याग्निःसोमोगायत्रीक्षीरप्रक्षेपेवि० ॐ आप्यायस्वसमे० संगथेइतिकलशेक्षीरंप्रक्षिप्य॥ दधिक्राण्वइत्यस्यविश्वेदेवादधिक्रावानुष्टुप् दधिप्रक्षेपे० ॐ दधिक्राव्णो० तारिषत् इतिकलशेदधिप्रक्षिप्य॥ शुक्रमसीत्यस्य प्रजापतिराज्यंयजुःआज्यप्रक्षेपे० ॐ शुक्रमसिज्योतिरसितेजोसि इतिकलशेआज्यंप्रक्षिप्य॥ मधुवाताइतिमंत्रस्याग्निर्विश्वेदे वागायत्री मधुप्रक्षेपे० ॐ मधुवाताऋतायते० गावोभवंतुनः ३ इतिमधुप्रक्षिप्य॥ त्वेक्रतुमित्यस्यसोमःप्रजापतिस्त्रिष्टुप् शर्क राप्रक्षेपेवि० ॐ त्वेक्रतु० योधि इतिशर्करांप्रक्षिप्य॥ तत्सवितुरित्यस्यागायत्र्याविश्वामित्रःसवितागायत्री गोमूत्रप्रक्षेपे० ॐ त त्सवितुर्वरेण्यं० चोदयात्इतिकलशेगोमूत्रंप्रक्षिप्य गंधद्वारामित्यस्ययाज्ञिक्योदेवताउपनिषदःश्रीरनुष्टुप् गोमयप्रक्षेपे० ॐ गं धद्वारां० श्रियंइतिकलशेगोमयंप्रक्षिप्य पुनराप्यायस्वेत्यादिभिस्त्रिभिःक्षीरदधिघृतानिकलशेप्रक्षिप्य नूतनाहृतचित्रपर्वतधातूं स्वर्णींप्रक्षिप्य उद्वृतासिवराहेणेत्यस्ययाज्ञिक्योदेवताउपनिषदोमृत्तिकानुष्टुप् मृत्प्रक्षेपेवि० ॐ उद्वृतासि० कृतं इतिकल

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust. Foundation, Delhi and eGangotri
शेश्वशालागजशालावल्मीकनदीसंगमह्रदराजद्वारगोष्ठप्रदेशाहृताःसप्तमृत्तिकाःप्रक्षिप्य गंधद्वारामित्यस्ययाज्ञिक्योदेवताउप
निषदःश्रीरनुष्टुप् गंधप्रक्षेपेवि० ॐ गंधद्वारांदु० श्रियंइतिकलशेगंधंप्रक्षिप्य याजाताओषधयइत्यस्याग्निरोषधयोनुष्टुप् ओषधि
प्रक्षेपेवि० ॐ याजाताओषधयो० सप्तचइतिकुष्ठमांसीहरिद्राद्वयमुराशैलेयचंदनसटीचंपकमुस्तात्मिकादशौषधीःसहैवकलशे
निक्षिपेत् कुष्ठंकोष्ठं मांसीजटामांसी हरिद्राएकाप्रसिद्धाद्वितीयादारुहळदइति मुरामोरवेलइतिपरशुरामक्षेत्रेप्रसिद्धा शैलेयं
शिलारसः चंदनंप्रसिद्धं सटीकचोरः चंपकश्चंपकवृक्षस्तस्यत्वक् मुस्ताभद्रमोथेति एतासामभावेशतावरी॥ कांडात्कांडादित्य
स्याग्निरोषधयोनुष्टुप् दूर्वाप्रक्षेपेवि० ॐ कांडात्कांडात्प्र० शतेनंच इतिकलशेदूर्वाःप्रक्षिप्य॥ अश्वत्थेवइत्यस्याग्निरोषधयोनुष्टुप्
पंचत्वक्प्रक्षेपणेवि० ॐ अश्वत्थेवो० पूरुषंइतिन्यग्रोधपिप्पलप्लक्षजंवूचूततरूणांत्वचःसहैवकलशेक्षिपेत् जंवूस्थानेउदुंबरोवा
पुनरश्वत्थेवइत्यनेनएषामेवतरूणांसहैवपल्लवान्कलशेक्षिपेत् ॥ याःफलिनीरित्यस्याग्निरोषधयोनुष्टुप् फलप्रक्षेपणेवि० ॐ याः
फलिनीर्या० त्वꣳहसःइतिकलशेफलंप्रक्षिप्य॥ अग्नेरेतश्चंद्रमित्यस्याग्निर्हिरण्यंत्रिष्टुप् हिरण्यप्रक्षेपेवि० ॐ अग्नेरेतश्चंद्रꣳहिरण्यं
अद्भ्यः० तरेयंइतिकलशेहिरण्यंप्रक्षिप्य ॥ बृहस्पतेजुषस्वनइत्यस्यविश्वेदेवाबृहस्पतिर्गायत्री पंचरत्नप्रक्षेपणेवि० ॐ बृहस्प
तेजु० द्राशुषेइतिकलशेसुवर्णरजतमुक्तामाणिक्यप्रवालात्मकपंचरत्नानिप्रक्षिपेत् ॥ एतेषामलाभेसुवर्णप्रक्षिपेत् मंत्रस्तुयःपंच
रत्नानांसएव ॥ ततोदूर्वाम्रपल्लवैःकलशस्यमुखमाच्छाद्य ॥ युवंवस्त्राणीत्यस्यविश्वेदेवामित्रावरुणौत्रिष्टुप् कलशवेष्टनेवि० ॐ
युवंवस्त्राणिपीवसावसाथे० सचेथे इतिकलशंश्वेतवस्त्रयुग्मेनवेष्टयित्वा॥ पूर्णादर्विपरापतेत्यस्यविश्वेदेवाःशतक्रतुरनुष्टुप् कल
शाननेतंडुलपूर्णपात्रनिधानेवि० ॐ पूर्णादर्विपरापत० इतिकलशाननेतंदुलपूर्णपात्रंनिदध्यात् ॥ ततःकलशस्यमुखे० सर्वेस

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मुद्राःसरितः० क्षयंकारकाः गंगेचयमुनेचैव० जलेस्मिन्संनिधिंकुरुइतिकलशेदेवताआवाह्यसंपूज्यतत्त्वायामीतिकलशेवरुण मावाह्यसंपूजयेत् ॥ ततःदेवदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं ॥ त्वत्तोयेसर्वतीर्थानि देवाःसर्वेत्वयिस्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदि त्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सांनि ध्यंकुरुदेवेशप्रसन्नोभवसर्वदा ॥ इतिकलशंप्रार्थयेत् ॥ ततःआपोहिष्ठेतिमंत्रत्रयस्याग्निरापोगायत्री ॥ हिरण्यवर्णाइतिमंत्रचतु ष्टयस्याग्निरापस्त्रिष्टुप्॥ पवमानानुवाकमंत्राणांसोमऋषिः पवमानसुवर्जनादयोदेवताः अनुष्टुवादीनिछंदांसि जपेवि० ॐ आपो हिष्ठा० ३ हिरण्यवर्णाःशुचयः० ४ पवमानःसुवर्जनः १७ इतिस्थापितंकलशमभिमृश्यजपेत् ॥ काम्येस्वयमेवाचार्येणायं जपःकार्यः॥ नित्यनैमित्तिकेचस्वाशक्तौमंत्रविदंअन्यंब्राह्मणंजपार्थंवृत्वासंपूज्यतेनजपःकरणीयः॥ ग्रहपीठेग्रहमंत्रजपार्थंत्रीन्ब्रा ह्मणान्एकंवाकृत्वासंपूज्यजपंकारयेत् ॥ कलशसंबंधिजपसंख्यातुअष्टोत्तरशतमष्टाविंशतिर्वाग्रहमंत्रजपोपिएवमेवप्रतिमंत्रं ॥ अथान्वाधानं ॥ आचार्यःसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाग्रहयज्ञहोमकर्मणियायक्ष्यमाणदेवतास्ताइत्यादि प्रसाधनीदेव्यंतंव्याहृत्यंतंवोक्त्वा गणपतिंएकयापलाशसमिदाहुत्याचर्वाहुत्याआज्याहुत्याचयक्ष्येइतिवदेत् ॥ अथवाकेवलच र्वाहुत्याकेवलाज्याहुत्यावायक्ष्यइत्येवंवदेत् ॥ इदंचप्रथमंतुवराहुतिरितिपाठे ॥ प्रथमातुवराहुतिरितिपाठेतुकेतुप्रत्यधिदेवता न्वाधानोत्कीर्तनांतेगणपतिंप्रथमयासमिच्चर्वाज्यवराहुत्यायक्ष्यइतिकेवलचरुवराहुत्यायक्ष्येकेवलाज्यवराहुत्यायक्ष्येइतिवा॥ व

स्त्वंउक्तप्रमाणद्विगुणप्रमाणत्वंअर्धाधिकप्रमाणत्वंवा ॥ समिधिदैर्घ्यविषयकमेवद्वैगुण्यंअर्धाधिकत्वंवा स्पष्टवचनंविनाएकदास

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Siddhanta eGangotri Gyaan and eGangotri
मिद्वयाभ्याधानेदोषश्रवणात् ॥ वैशेषिकप्रधानहोम सूर्यसोमअंगारकबुधबृहस्पतिशुक्रंशनैश्चररराहुंकेतुं एतत्संख्याभिरेतत्संख्याभिः यथायथमर्कादिसमिद्भिः तावतीभिश्चर्वाहुतिभिः तावतीभिराज्याहुतिभिश्च ॥ एतदित्यस्यस्थानेअष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिंवाकीर्तयेत् ॥ ईश्वरंउमांस्कंदंनारायणंब्रह्माणंइंद्रंयमंकालंचित्रगुप्तं एताअधिदेवताः अग्निंअपःभूमिंविष्णुं इंद्रंइंद्राणींप्रजापतिंसर्पान्ब्रह्माणंएताःप्रत्यधिदेवताश्चएतत्संख्याभिरेतत्संख्याभिर्यथायथमर्कादिसमिद्भिस्तावतीभिश्चर्वाहुतिभिस्तावतीभिराज्याहुतिभिश्च एतदित्येतस्यस्थानेप्रधानदेवतानांयोत्कीर्तितासंख्यातत्तद्न्यूनांसंख्यांप्रतिदेवतमष्टोत्तरशतमष्टाविंशतिमष्टौवाकीर्तयेत् ॥ गणपतिंदुर्गांवायुंआकाशंअश्विनौवास्तोष्पतिंक्षेत्रपालं इंद्रंअग्नियमंनिर्ऋतिंवरुणंवायुंसोमंईशानंएतत्संख्याभिरेतत्संख्याभिः पलाशसमिद्भिस्तावतीभिश्चर्वाहुतिभिस्तावतीभिराज्याहुतिभिश्च एतदित्येतस्यस्थानेधिदेवताप्रत्यधिदेवतानांयोत्कीर्तितासंख्यातत्तद्न्यूनांसंख्यांप्रतिदेवतमष्टाविंशतिमष्टौचतुर्वाकीर्तयेत् ॥ अधिदेवताप्रत्यधिदेवतानांप्रधानाहुतिसंख्यादशांशेनहोमः कर्मसंरक्षणदेवतानांप्रतिदेवतंप्रधानाहुतिसंख्याविंशांशेनेत्येवंवा ॥ अस्मिन्कल्पेप्रधानदेवतानांप्रतिदेवतंसहस्रंशतंवेत्येवमेवसंख्याद्वयंभवतिनतुसहस्रशतात्मकसंख्ययोरष्टोत्तरत्वंनवाष्टाविंशतिसंख्या ॥ दशांशविंशांशयोरत्रासंभवात् ॥ प्रधानाहुतिसंख्यायदिसहस्रंतदाधिदेवताप्रत्यधिदेवतानांशतंशतंकर्मसंरक्षणदेवतानांदशदश ॥ प्रधानाहुतिसंख्यायदिशतंशतंतदाधिदेवताप्रत्यधिदेवतानांदशदश कर्मसंरक्षणदेवतानांपंचपंचेतिविवेकः ॥ सर्वतोभद्रपीठदेवातानांपूजोत्तरंहोमाकरणपक्षेप्रधानोत्तरमेवहोमस्यकर्तव्यत्वादत्रान्वाधानंपूर्ववत्कर्तव्यं ॥ ततःअंगहोमेवरुणंद्वाभ्यामाहुतिभ्यामित्यादि व्याहृत्यंतत्वपक्षे ॥ प्रसाधनीदेव्यंतत्वपक्षेतुअग्निंस्विष्टकृतंएकयाहुतशेषाहुत्यायक्ष्यइत्यादि ॥ पात्रासादनकालेदर्व्यासहचरु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

होमकर्तृदक्षिणहस्तानांआज्यहोमकर्तृसंख्यापरिमितस्रुवाणांचरूद्धरणपात्रस्यआज्यहोमकर्तृसंख्यापरिमिताज्यस्थालीनांचासा
दनप्रोक्षणेकार्ये ॥ हस्तानांस्रुवाणांचसंमार्गोपिआसादिताहस्ताआसंमार्गतत्रैवावस्थिताःस्युः ॥ संमार्गोत्तरंबर्हिषिअथवासादन
रहिताएवधर्माः स्रुवस्थानेतावत्योदर्व्योवा वक्ष्यमाणस्थालीपाकधर्मेणचरून्चरुंवाश्रपयित्वायुगपदनेककर्तृकचर्वाज्यहोमनि
र्वाहायसर्वेषांहस्तानांस्रुवाणांचसंमार्गःकार्यः ॥ दर्वीपक्षेतासामपि ॥ अथवाहोमसमयएवचरुसमिद्धोमकर्तारःस्वस्वदक्षिणह
स्तस्यस्वस्ववामहस्तेनप्रोक्षणंकृत्वानिष्टप्यआसादितसंमार्गदर्भैकदेशेनवामहस्तेनसंमृज्यपुनर्निष्टप्यबर्हिषिनिधायदक्षिणहस्तेनैव
स्वस्वहस्तसंमार्गदर्भप्रहरणंकुर्युरिति प्रतिदेवतचरुपक्षेतावत्यश्चरुस्थाल्यस्तावंतिमेक्षणानिच ॥ एकत्रश्रपणपक्षेप्रत्येकंव्युद्धृत्य
तेनतेनतत्तद्देवतायैपर्यग्निकरणकालेसर्वैर्होमद्रव्यैःसहाज्यस्यपर्यग्निकरणं ॥ ततःश्रृतांश्चरून्छृतंचरुंवाभिघार्योत्तरतउद्वास्य
बर्हिष्यासाद्यतत्रैवासादितेषुचरूद्धरणपात्रेषुएकचरुपक्षेएकस्मिन्नुद्धरणपात्रेउद्धरेत् ॥ एकचरुपक्षेप्रतिदेवतंपंक्त्याकारेणविभ
जेत् तत्क्रमेणैवहोमः ॥ ततःपरिषेकादिप्रसाधनीदेवीहोमांतंव्याहृतिहोमांतंवान्वाधानोत्कीर्तितपक्षानुसारेणकुर्यात् ॥ अस्मिन्न
ग्नौचरुश्रपणासंभवेनगृह्यसिद्धान्नेनदेवपवित्रसंस्कारसंस्कृतेनहोमंकुर्वंतिशिष्टाइदानीं ॥ ततः गणानांत्वेत्यस्यविश्वेदेवागणपति
र्जगतीहोमेवि० ॐ गणानांत्वागणपतिꣳ० सादनꣳस्वाहाइतिएकांपलाशमिधंजुहोति गणपतयइदंनममेतित्यागः एवमेकांच
र्वाहुतिमेकामाज्याहुतिंचजुहोति त्यागःपूर्ववत् ॥ जुहुयात्समिदन्नाज्यैःपृथगष्टोत्तरंशतमितिवचनेसमिद्विषयेपिजुहुयादित्यु
क्तत्वात्स्वाहाकारोत्रस्मार्तः ॥ ततऋत्विजउदङ्मुखाःप्राङ्मुखावोपविश्यद्विराचम्यामुक्तकेशानिपातितजानुकाःसावधानमनसो
भूत्वाहोमंकुर्युः ॥ होमारंभात्प्रागेवयजमानः इमान्युपकल्पितानिहवनीयद्रव्याणिअन्वाधानोत्कीर्तितसंख्याहुतिपर्यासानि

CC-0. In Public Domain.Funding by MoE-IKS

यायायक्ष्यमाणादेवतास्ताभ्यस्ताभ्योमयादित्यत्यागेनममेतिवाक्यान्तंकुर्यादितिसंप्रदायिकाः ॥ प्रधानहोमान्वाधानात्पूर्वस
र्वतोभद्रपीठदेवतान्वाधानंकृतंचेदत्रहोममाचार्यएवकुर्यात् ॥ ततऋत्विजःआवाहनोक्ततत्तन्मंत्रैर्ऋष्यादिस्मरणपूर्वकंअन्वाधा
नोत्कीर्तितद्रव्यैरन्वाधानोत्कीर्तितसंख्ययाहोमंकुर्युः ॥ अत्रविनियोगवाक्येहोमेविनियोगइतिविशेषोद्रष्टव्यः ॥ अर्कःपलाशः
खदिरःअपामार्गःपिप्पलःउदुंबरःशमीदूर्वाःकुशाइतिक्रमेणसमिधः ॥ एतासामलाभेपलाशसमिधः ॥ तत्रसर्पिर्मधुदध्यक्ताःप्रादे
शमात्र्योवांतरशाखारहिताःमूलतोद्व्यंगुलप्रदेशंविहायमध्यमानामिकांगुष्ठैर्गृहीत्वासमिधोहोतव्याः ॥ तत्रसमिदेकैका दूर्वाद
र्भाणांचत्रिकंत्रिकं ॥ दूर्वाःसप्तपत्रयुताःपंचपत्रयुतावाअच्छिन्नाग्राह्याः ॥ दर्भाःसाग्राःअभावेग्ररहिताअपि ॥ आज्यंस्रुवेणदर्व्या
वाहोतव्यं ॥ अंगुष्ठाग्रेणग्रासमात्रंचरुंगृहीत्वांगुष्ठेननिष्पीड्यसंहतांगुलिनोत्तानेनदक्षिणेनहस्तेनजुहुयादितिसंप्रदायः ॥ समाप्ते
प्रधानहोमेआचार्योत्रचेदन्वाधानंपीठदेवताहोमस्यकृतंतदात्रतदीयंहोमंकृत्वास्थापितदेवतानामुत्तरपूजनंविधायप्रसीदंतुभवं
तइतितान्संप्रार्थ्यान्वाधानोत्कीर्तितपक्षानुसारेणवारुणीहोमादिस्विष्टकृदादिवासंस्रावहोमात्माक्कर्मकुर्यात् ॥ समिधांनस्विष्टकृ
त् ॥ ततःसपत्नीकोयजमानोयत्रयत्रबलिसमर्पणंकर्तव्यंभवतितास्मिंस्तस्मिन्देशेग्नेःपश्चादेवोपविश्यअग्न्यायतनस्यसमंतादिक्षु
माषभक्तबलीन्दद्यात् ॥ प्रतिबलिसमर्पणंसाक्षतंजलंपात्रेक्षिपेत् ॥ त्रातारमिंद्रमित्यस्यविश्वेदेवाइंद्रस्त्रिष्टुप् इंद्रप्रीत्यर्थबलिदा
नेवि० ॥ ॐ त्रातारमिंद्रंमवि० इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायअमुंसदीपंमाषभक्तबलिंसमर्पयामिइतिसाक्षतं
जलंपात्रेत्यक्त्वा भोइंद्रबलिंभक्षदिशंरक्षममसकुटुंबस्यायुःकर्ताक्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्तावरदोभवेति
प्रार्थयेत् ॥ अनेनबलिदानेनइंद्रःप्रीयतामितिततोवदेत् ॥ अग्नेनयसुपथाइत्यस्यविश्वेदेवाअग्निस्त्रिष्टुप् अग्निप्रीत्यर्थबलि०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ अग्नेनयसुपथा० अग्नयेसांगाय० भोअग्नेबलिंभक्ष० भव अग्निःप्रीयतां ॥ इमंयमेत्यस्यविश्वेदेवायमस्त्रिष्टुप् यमप्रीत्यर्थेबलि० ॐ इमंयमप्रस्तर० यमायसांगाय० भोयमबलिंभक्ष० भव यमःप्रीयतां ॥ असुन्वंतमित्यस्याग्निर्निर्ऋतिस्त्रिष्टुप् निर्ऋतिप्रीत्यर्थ बलि० ॐ असुन्वंतमयजमान० निर्ऋतयेसांगाय० भोनिर्ऋते० भव निर्ऋतिःप्रीयतां ॥ तत्त्वायामीत्यस्यविश्वेदेवावरुणस्त्रि ष्टुप् वरुणप्रीत्यर्थबलि० ॐ तत्त्वायामि० वरुणायसांगाय० भोवरुण० वरुणःप्रीयतां ॥ आनोनियुद्भिरित्यस्यविश्वेदेवावा युस्त्रिष्टुप् वायुप्रीत्यर्थबलि० ॐ आनोनियुद्भिः० वायवेसांगाय० भोवायो० वायुःप्रीयतां ॥ संतेपयांसीत्यस्याग्निःसोमस्त्रि ष्टुप् सोमप्रीत्यर्थबलि० ॐ संतेपयांसि० सोमायसांगाय० भोसोमबलिंभक्ष० सोमःप्रीयतां ॥ अभित्वेत्यस्यविश्वेदेवाईशा नोगायत्रीईशानप्रीत्यर्थबलि० ॐ अभित्वादेव० ईशानायसां० भोईशान० ईशानःप्रीयतां ॥ ततोग्रहादिबलयोग्रहपीठस मीपे ॥ आसत्येनेत्यस्यविश्वेदेवाःसूर्यस्त्रिष्टुप् सूर्यप्रीत्यर्थबलि० ॐ आसत्येनरजसा० सूर्यायसांगायसपरिवारायसायुधायस शक्तिकायेश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहितायेमंसदीपमाषभक्तबलिंसमर्पयामि भोसूर्यइमंबलिंगृहाणममसकुटुंबस्य० सूर्यःप्रीयतां ॥ आप्यायस्वेत्यस्यसोमःसोमोगायत्री सोमप्रीत्यर्थे० ॐ आप्यायस्वसमेतुते० सोमायसांगाय० सशक्तिकायउ मात्रूपाधिदेवताप्रत्यधिदेवतासहितायइमंसदीपं० भोसोमइमंबलिं० सोमःप्रीयतां ॥ अग्निर्मूर्धेत्यस्यप्रजापतिरंगारकोगायत्री अंगारकप्रीत्यर्थब० ॐ अग्निर्मूर्धा० अंगारकायसांगाय० स्कंदभूमिरूपाधि० भोअंगारकइमं० अंगारकःप्रीयतां ॥ उद्बुध्यस्वा ग्नइत्यस्याग्निर्बुधस्त्रिष्टुप् बुधप्रीत्यर्थब० ॐ उद्बुध्यस्वाग्ने० बुधायसांगाय० नारायणविष्णुरूपाधि० भोबुधइमं० बुधःप्रीयतां॥

बृहस्पतेअतीत्यस्यविश्वेदेवाबृहस्पतिस्त्रिष्टुप् बृहस्पतिप्रीत्यर्थबलि० ॐ बृहस्पतेअति० बृहस्पतयेसांगाय० ब्रह्मेंद्ररूपाधि०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भोबृहस्पतइमं० बृहस्पतिःप्रीयतां ॥ शुक्रंतइत्यस्यविश्वेदेवाःशुक्रस्त्रिष्टुप् शुक्रप्रीत्यर्थबलि० ॐ शु॒क्रंते॑अ॒न्यद्य॑ज॒तं० शुक्राय सांगाय० इंद्रेंद्राणीरूपाधि० भोशुक्रइमंब० शुक्रःप्रीयतां॥ शंनोदेवीरित्यस्यप्रजापतिःशनैश्चरोगायत्रीशनैश्चरप्रीर्थब० ॐ शंनो॑ दे॒वीर॒भि॑ष्टय॒० शनैश्चरायसांगाय० यमप्रजापतिरूपाधि० भोशनैश्चरइमं० शनैश्चरःप्रीयतां ॥ कयानइत्यस्यविश्वेदेवाराहु र्गायत्री राहुप्रीत्यर्थबलि० ॐ कया॑नश्चि॒त्र० राहवेसांगाय० कालसर्परूपाधि० भोराहोइमंबलिं० राहुःप्रीयतां ॥ केतुंकृण्व न्नित्यस्यप्रजापतिःकेतुर्गायत्रीकेतुप्रीत्यर्थबलि० ॐ के॒तुंकृ॒ण्वन्न॑० केतवेसांगाय० चित्रगुप्तब्रह्मरूपाधि० भोकेतोइमंबलिं० केतुःप्रीयतां ॥ केतुशब्दस्यबहुवचनांतत्वपक्षेकेतुभ्यःसांगेभ्यःसपरिवारेभ्यःसायुधेभ्यःसशक्तिकेभ्यःचित्रगुप्तब्रह्मरूपाधि देवतप्रत्यधिदेवतासहितेभ्यइमंसदीपंमाषभ० भोकेतवःइमंबलिंगृह्णतममसकुटुंबस्यआयुःकर्तारःक्षेमकर्तारःशांतिकर्तारःपु ष्टिकर्तारस्तुष्टिकर्तारोनिर्विघ्नकर्तारोवरदाभवत केतवःप्रीयंतामित्यूहः॥ गणानांत्वेत्यस्यविश्वेदेवागणपतिर्जगती गणपतिप्रीत्य र्थबलि० ॐ ग॒णानां॑त्वाग॒णप॑तिꣳ० गणपतयेसांगाय० सिद्धिबुद्धिसहितायेमं० भोसिद्धिबुद्धिसहितगणपतेइमं० गणपतिः प्रीयतां ॥ जातवेदसइत्यस्ययाज्ञिक्योदेवताउपनिषदोदुर्गात्रिष्टुप् दुर्गाप्रीत्यर्थबलि० ॐ जा॒तवे॑दसेसुन० दुर्गायैसांगायैसपरि वारायैसायुधायैसशक्तिकायैइमंसदीपं० भोदुर्गेइमंबलिंगृहाणममसकुटुंबस्यायुःकर्त्रीक्षेमकर्त्रीशांतिकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीवर दाभव दुर्गाप्रीयतां ॥ वायोशतमित्यस्यविश्वेदेवावायुरनुष्टुप् वायुप्रीत्यर्थबलि० ॐ वायो॑श॒तꣳह० वायवेसांगाय० भोवायो इमं० वायुःप्रीयतां ॥ घृतंघृतपावानइत्यस्यसोमआकाशोयजुः आकाशप्रीत्यर्थब० ॐ घृ॒तंघृ॑तपावानः० आकाशायसांगाय० इमंसदीपं० भोआकाशइमंबलिं० आकाशःप्रीयतां ॥ यावांकशेत्यस्यसोमोश्विनौगायत्रीअश्विप्रीत्यर्थबलि० ॐ या॒वां॒कशा॒

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मधु० अश्विभ्यांसांगाभ्यांसपरिवाराभ्यांसायुधाभ्यासशक्तिकाभ्यांइमं० भोअश्विनौइमंबलिंगृह्णीतंममसकुटुंबस्यायुःकर्तारौ क्षेमकर्तारौशांतिकर्तारौपुष्टिकर्तारौतुष्टिकर्तारौनिर्विघ्नकर्तारौवरदौभवतं अश्विनौप्रीयेतां ॥ वास्तोष्पतइत्यस्यप्रजापतिर्वास्तो ष्पतिस्त्रिष्टुप् वास्तोष्पतिप्रीत्यर्थबलि० ॐ वास्तोष्पतेप्रति० वास्तोष्पतयेसांगाय० इमं० भोवास्तोष्पतेइमंबलिं० वास्तोष्पतिः प्रीयतां ॥ बलेर्विप्रकृष्टत्वेत्विममित्यत्रामुमितिवदेत्सर्वत्र० तत्तत्प्रदेशोपविष्टोबलिसमर्पणंकुर्यादित्यस्मिन्कल्पेतुसर्वत्रेममित्ये वनत्वमुमिति ॥ ततःक्षेत्रपालायकुंकुमारक्तपुष्पादियुतंसदीपंसतांबूलंसदक्षिणंमाषभक्तबलिंदद्यात् ॥ अत्रावाहनादिपूजनमपि केचित्कुर्वंति॥ क्षेत्रस्यपतिनेत्यस्यविश्वेदेवाःक्षेत्रपालोनुष्टुप् क्षेत्रपालप्रीत्यर्थबलिदाने० ॐ क्षेत्रस्यपतिनावयं० क्षेत्रपालायसां गायसशक्तिकायभूतप्रेतडाकिनीशाकिनीब्रह्मराक्षसवेतालादिपरिवारयुतायेमंकुंकुमारक्तपुष्पादियुतंसदीपंसतांबूलंसदक्षिणंमा षभक्तबलिंसमर्पयामि भोभोक्षेत्रपालसपरिवारेमंबलिं० क्षेत्रपालःप्रीयतामिति ॥ ततःशूद्रेणदुर्ब्राह्मणेनवातंबलिंदूरदेशंप्राप येत् ॥ तत्पृष्ठतः शांतिपाठपूर्वकंस्वयंजलंसिंचन्साचार्यःसपत्नीकोगृहाद्बहिर्गत्वाक्षेत्रपालायनमइतिक्षेत्रपालंनमस्कृत्यहस्तौपा दौप्रक्षाल्यप्रत्येत्याचामेत् ॥ आचार्यपत्न्योरपिहस्तपादप्रक्षालनमाचमनंच ॥ तत्रपत्न्याःसकृदमंत्रकं ॥ ततोयजमानपत्न्याचा र्याअग्निसमीपमागत्याचम्यस्वायतनेषूपविशेयुः ॥ ततआचार्योदर्व्यास्रुवेणद्वादशगृहीतमष्टगृहीतंचतुर्गृहीतंवाज्यंगृहीत्वादर्व्या अपूर्णतायांआज्येनाभिपूर्यतदुपरिवस्त्रयुतंचंदनादिभूषितंफलंनिधाय इडनामायमग्निरित्यनुसंधाययजमानतत्पत्न्यमात्यान्वा रब्धस्तिष्ठन् ॥ समुद्रादूर्मिरितिमंत्रत्रयस्ययाज्ञिक्योदेवताउपनिषदोग्निस्त्रिष्टुप्॥ मूर्धानंदिवइत्यस्यसोमोग्निर्वैश्वानरस्त्रिष्टुप् ॥ पुनस्त्वेत्यस्याग्निर्मरुद्रादित्यास्त्रिष्टुप् ॥ पूर्णादर्वीत्यस्यविश्वेदेवाःशतक्रतुरनुष्टुप् ॥ सप्ततेअग्नइत्यस्यसप्तवानग्निर्जगती सर्वे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षांपूर्णाहुतिहोमेवि० समुद्रादूर्मि० ३ मूर्धानंदिवो० १ पुनस्त्वादित्या० १ पूर्णादर्वि०परा० १ सप्ततअग्न० १ घृतनस्वाहा एतः पूर्णाहुतिंजुहुयात् ॥ यजमानःअग्नयेग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्रतवेसप्तवतेग्नयेचेदंनममेतित्यजेत् ॥ ततआचार्यादयः पूर्णाहुतिमुत्तमांजुहोति सर्वं० तिष्ठति पूर्णाहुतिमु० सयत्वायेत्याचारात्पठेयुः ॥ ततआचार्यःसंस्रावहोमादिसंस्थाजपांतंकर्मकुर्यात् ॥ ऋत्विजामपिसंस्थाजपेनोपस्थानं ॥ ततोयजमानआचार्यादिभ्योजपहोमफलंगृह्णीयात्नवा ॥ ततोब्रह्मसदस्यर्त्विक्सहितआचार्यःप्राङ्मुखउदङ्मुखोवातिष्ठन्ग्रहवेदेरीशान्यामग्नेःपश्चिमतोवासंमृष्टेगोमयोपलिप्तेरंगवल्ल्यालंकृतेचतुष्पदंदीर्घचतुरश्रंसोत्तरच्छदंपीठंनिधायतत्रोदगग्रानमूलांस्त्रीन्हरितान्दर्भानास्तीर्यानास्तीर्यवातत्रोपविष्टंधृतनवकंचुकीवस्त्रयापत्न्यासहितंसामात्यंप्राङ्मुखंपरिहिताहतवस्त्रंयजमानंस्थापितकलशोदकेनपात्रांतरेगृहीतेनतत्रत्यपंचपल्लवैर्दूर्वाकुशसहितैरभिषिंचेत् ॥ तत्रमंत्राः आपोहिष्ठा०३ हिरण्यवर्णाःशुचयः०४ पवमानःसुवर्जनः १७ एतेषामृष्यादिकंकलशसंबंधिजपनिरूपणेउक्तं अभिषेकेविनियोगइतिविनियोगवाक्येविशेषः ॥ सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः० सर्वकामार्थसिद्धयेइत्येतैः ॥ ग्रहाणामादिरादित्योलोकरक्षणकारकः ॥ विषमस्थानसंभूतांपीडांहरतुतेरविः ॥ १ ॥ रोहिणीशःसुधामूर्तिःसुधागात्रःसुधाशनः ॥ विषमस्थानसंभूतांपीडांहरतुतेविधुः ॥ २ ॥ भूमिपुत्रोमहातेजाजगतांभयकृत्सदा ॥ विषमस्थानसंभूतांपीडांहरतुतेकुजः ॥ ३ ॥ उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः ॥ सूर्यप्रियकरोविद्वान्पीडांहरतुतेबुधः ॥ ४ ॥ देवमंत्रीविशालाक्षःसदालोकहितेरतः ॥ अनेकशिष्यसंपूर्णःपीडांहरतुतेगुरुः ॥ ५ ॥ दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहामतिः ॥ प्रभुस्ताराग्रहाणांचपीडांहरतुतेभृगुः ॥ ६ ॥ सूर्यपुत्रोदीर्घदेहोविशालाक्षःशिवप्रियः ॥ मंदचारःप्रसन्नात्मापीडांहरतुतेशनिः ॥ ७ ॥ महाशिरामहावक्त्रोदीर्घदंष्ट्रोमहाबलः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अतनुश्चोर्ध्वकेशश्चपीडांहरतुतेतमः ॥ ८ ॥ अनेकरूपवर्णैश्चशतशोथसहस्रशः॥ उत्पातरूपोजगतांपीडाहरतुतेशिखी ॥ ९ ॥ एतैर्मंत्रैः देवस्यत्वेत्यादिभिर्मंत्रैश्चाभिषिंचेत् ॥ ततःकलशोदकेनान्येनचजलेनतैलाभ्यंगसर्वौषध्यनुलेपनपूर्वकंसुस्नातौदंपती अहतवासांसिपरिधायअभिषेकवासांसिआचार्यायदत्वाश्वेतचंदनपुष्पालंकारान्धृत्वाग्नेःपश्चादुपविशतोदक्षिणतःपत्नी ॥ तत आचार्येणसहयजमानो मानस्तोकइतिभस्मधृत्वाचार्यादीन्पादप्रक्षालनार्घ्यगंधाक्षतपुष्पैःसंपूज्यतेभ्योदक्षिणांदद्यात् तत्राचार्यायगौः ब्रह्मणेनड्वान् सदस्यायाश्वः सूर्यायगौः सोमायशंखः अंगारकायरक्तोनड्वान् बुधायसुवर्णं गुरवेपीतवस्त्रं शुक्रायश्वेतोश्वः शनयेकृष्णागौः राहवेकालायसः केतवेहस्तीछागोवेतितत्तद्धोमकर्त्रेव्यवस्थयादद्यात् ॥ यदिनवभ्योधिकाऋत्विजस्तदातेभ्यःप्रत्येकमेकैकागौर्देया न्यूनत्वेतुगोशंखादिनवदक्षिणायथासंभवंतेभ्यएवदेयाः ॥ अथगवादीनांनवानांक्रमेणमंत्राः ॥ कपिलेसर्वदेवानांपूजनीयासिसर्वदा ॥ सर्वदेवमयीयस्मादतःशांतिंप्रयच्छमे १ त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ॥ पांचजन्यंप्रदास्यामिह्यतःशांतिंप्रयच्छमे २ धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ अष्टमूर्तेरधिष्ठानमतः० ३ हिरण्यगर्भ० ४ पीतवस्त्रमिदंयस्माद्वासुदेवस्यवल्लभं ॥ प्रदानात्तस्यमेविष्णुःसदाशांतिंप्रयच्छतु ५ विष्णुस्त्वमश्वरूपेणयस्मादमृतसंभवः॥ सूर्यस्यवाहनंनित्यमतः० ६ यस्मात्त्वंपृथिवीसर्वाधेनोवैकृष्णसन्निभे ॥ सर्वपापहरानित्यमतः० ७ यस्मादायसकार्याणित्वदधीनानिसर्वदा ॥ लांगलाद्यायुधादीतितस्माच्छांतिं० ८ सुप्रतीकगजेंद्रत्वंदेवेंद्रस्यचवाहनं ॥ दानेनानेनदत्तेनसदाशांतिंप्रयच्छमे ९ छागपक्षे ॥ यस्मात्त्वंछागयज्ञानामंगत्वेनव्यवस्थितः ॥ यानंविभावसोर्नित्यमतः० १० एतेषामर्थानांविषममूल्यकत्वेपिन्यू नलाभवद्भ्यःसुवर्णदानेनलाभसाम्यंसंपादनीयं ॥ उक्तदक्षिणानामभावेसर्वेभ्यस्तुष्टिकरंहिरण्यमेववादद्यात् ॥ अतोनात्रमूल्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ध्यायोक्तमूल्यदानं ॥ सर्वेष्वपिपक्षेषुआचार्यायद्दिगणंदद्यात् ॥ कर्मणःसाद्गुण्यार्थमन्येभ्योब्राह्मणेभ्योभूयसीदद्यात् ॥ ततो
ग्रहपीठदेवतानांमंडपश्चेत्तद्देवतानांचयजमानःपंचोपचारैरुत्तरपूजनंविधायसप्रणवैस्तत्तन्नाममंत्रैःआदित्यादिदेवताभ्योनमइ
तिसमुदितरूपेणवापुष्पांजलिंसमर्पयेत् ॥ ततआचार्योग्रहपीठदेवतानांमंडपश्चेत्तद्देवतानांचोद्वासनंउत्तिष्ठेतिमंत्रेणकुर्यात् ॥
ततोयजमानः इदंग्रहपीठंसप्रतिमंसकलशंसोपस्करमाचार्यतुभ्यमहंसंप्रददेइत्याचार्यायसमर्पयेत् ॥ मंडपश्चेत्सोपस्करमंडपस
हितमिदंग्रहपीठमिति ॥ ततआचार्यःअग्निंसंपूज्य ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर ॥ यत्रब्रह्मादयोदेवास्तत्रगच्छहुता
शन ॥ इतिविसृजेत् ॥ अथयजमानः कांस्यपात्रगताज्येसकुटुंबःस्वप्रतिरूपमवेक्ष्य ॥ आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंस्मृतं ॥
आज्यंसुराणामाहारआज्येलोकाःप्रतिष्ठिताः ॥ अलक्ष्मीर्यायच्चदौस्थ्यंममगात्रेष्ववस्थितं ॥ तत्सर्वंक्षपयाज्यत्वंलक्ष्मींपुष्टिंचव
र्धय ॥ इतिपठित्वातदाज्यंसदक्षिणंब्राह्मणायदद्यात् ॥ ततोयावत्यःप्रधानाहुतयस्तावतोब्राह्मणान्भोजयेत् यावंतितदाहुतिश
तानितावतोवा यावंतितत्सहस्राणितावतोवा यथासंभवंवा ॥ ततोभुक्तवद्भ्योयथाविभवंदक्षिणांदत्वाक्षमाप्यतदाशिषोगृहीत्वा
प्रणिपत्य ॥ अनेनग्रहयज्ञाख्येनकर्मणादित्यादयःप्रीयंतांनममेतीश्वरार्पणंकृत्वाहृष्टमनाःसुहृद्युतोभुंजीत ॥ इत्योकोपाह्वगणे
शदीक्षिततनूजगोपीनाथदीक्षितविरचितःसंस्काररत्नमालास्थोग्रहमखप्रयोगः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २६८ ॥ पंचकुंडीमंडपप्रकारः ॥

श्रीगणेशायनमः ॥ देवप्रतिष्ठांअश्वत्थोद्यापनंवाकुर्तुतत्तत्स्थानादुत्तरतःपूर्वतोवाउत्तममंडपेषोडशहस्तं मध्यममंडपेचतुर्दशह
स्तंदशहस्तमष्टहस्तंवाचतुर्द्वारंमंडपंकुर्यात् ॥ तत्रमध्यस्तंभचतुष्टयमध्येवेदींहस्तोच्छ्रितांकुर्यात् ॥ तस्याःसमंततश्चतुर्दिक्षुत्रयो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दशांगुलांतरंहस्तमात्रांतरंवात्यक्त्वाकुंडानिहस्तमात्राणिकुर्यात् ॥ तत्रप्राच्यांचतुरस्रंदक्षिणयोनि ॥ दक्षिणेर्धचंद्रंदक्षिण
योनि ॥ पश्चिमेवर्तुलंपश्चिमयोनि ॥ उत्तरेपद्मकुंडंपश्चिमयोनि ॥ ईशान्यांचतुरस्रंवृत्तंवाआचार्यकुंडंदक्षिणयोनि पश्चिमेवा
कुर्यात् ॥ मंडपस्येशान्यामुत्तरस्यांवादिशिचतुर्हस्तांतरेणमंडपार्धमानेनत्रिभागेनवाचतुर्थभागेनवाप्रासादमानेनवाचतुष्कोणं
कोणध्वजस्तंभयुतंचतुर्द्वारंपूर्वमुखमुदङ्मुखंवास्नानमंडपंकुर्यात् ॥ तन्मध्यप्रदेशेवेदिकाद्वयंद्विहस्तंचतुर्थांशोच्छ्रायंद्विमेखलं
कुर्यात् ॥ अथवामहावेद्यर्धविस्तीर्णंतदुच्छ्रायोच्छ्रायंतदर्धोच्छ्रायंवाकुर्यात् ॥ महामंडपस्यपश्चिमतःचतुर्हस्तंषड्हस्तंवाजलाधिवा
समंडपंकुर्यात् ॥ एवंमंडपादिसंपाद्यपूर्वदिनेपूर्वतनचतुर्थदिनेवायथाविभवंसंभृतसंभारःसंकल्पादिकुर्यात् ॥ ॥ छ ॥

॥ २६९ ॥ संकल्पोऋत्विग्वरणंच ॥

श्रीः ॥ तत्रादौयजमानःकूष्मांडहोमब्रह्मकूर्चादिभिरात्मतनुंपावयित्वामुहूर्तात्पूर्वदिनेकृतमंगलस्नानःशुक्लमाल्यानुलेपनःसभा
र्यःस्वासनेउपविश्याचम्यपवित्रपाणिःप्राणानायम्यदेशकालौस्मृत्वाआत्मनःपापक्षयपूर्वकं दशपूर्वान्दशपरानात्मनासहैकविंश
तिपुरुषान्पितृतोमातृतश्चोद्धर्तुकामोहंश्रीपरमेश्वरप्राप्त्यर्थं यथाज्ञानेनयथामिलितोपचारद्रव्यैर्देशकालानुसारतःएकाहाद्यधि
वासप्रकारेणआचार्यब्रह्मसदस्यादिद्वाराविष्णुप्रतिष्ठांशिवप्रतिष्ठांवाकरिष्ये ॥ तथाचपत्नीपुत्रादिसहितस्यममप्रतिमापिंडिका
कुंडतोरणस्तंभादिषुप्रधानांगकर्मसुचहीनाधिकांगतादिकर्मण्ययथाकरणादिविधिसूचितसर्वानिष्टनिबर्हणार्थंअस्यकर्मणःसाङ्गु
ण्यार्थंचग्रहमखंतिलैःशांतिहोमंचकरिष्ये ॥ आदौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंआचार्य
वरणंचकरिष्ये ॥ तानिकृत्वाआचार्यादीन्वृणुयात् ॥ यथा ॥ अमुकप्रवरान्वितोऽमुकगोत्रोत्पन्नोऽमुकशाखाध्यायीअमुकशर्मा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अहं ॥ अमुकप्रवरोपेतममुकगोत्रोत्पन्नममुकशाखाध्यायिनममुकशर्माणंअमुकदेवप्रतिष्ठाख्येकर्मणिमुख्यकुंडेविहितहोमंकर्तुमा
चार्यत्वामहंवृणे ॥ आचार्योवृतोस्मियथाज्ञानतःकर्मकरिष्यामीतिवदेत् ॥ एवंब्रह्माणंसदस्यंप्रतिकुंडमाचार्यं ब्रह्माणंच ॥ एको
वाब्रह्मा ॥ प्रतिकुंडंऋत्विजोजापकादींश्चवृत्वासर्वान्मधुपर्कादिनार्हयित्वाप्रार्थयेत् ॥ आचार्यप्रार्थना ॥ यथाशक्रस्यवागीश
आचार्यःसर्वकर्मसु ॥ तथामयात्वमाचार्योवृतोऽस्मिन्सवकर्मणि ॥ मंत्रमूर्तिर्भवान्नाथःसंसाराघौघनाशनः ॥ श्रीदेवस्यप्रतिष्ठा
यांकुरुकर्मयथोदितं ॥ त्वत्प्रसादान्निजेष्टंचसमग्रंफलमाप्नुयां ॥ संसारभयभीतेनह्येषयज्ञःप्रकारितः ॥ प्रारब्धस्त्वत्प्रसादेननि
र्विघ्नंमेभवत्विति ॥ ॥ ब्रह्माणं–यथाचतुर्मुखोब्रह्माशक्रादीनांमखेप्रभुः ॥ तथात्वंममयज्ञेस्मिन्ब्रह्मत्वेनवृतोह्यसि ॥ ॥
सदस्यं–त्वंनोगुरुःपितामातात्वंप्रभुस्त्वंपरायणं ॥ त्वत्प्रसादाच्चविप्रर्षेसर्वंमेस्यान्मनोगतं ॥ आपद्विमोक्षणार्थायकुरुयज्ञमतं
द्रितः ॥ ऋत्विग्भिःसहितःशुद्धैःसंयतैःसुसमाहितैः ॥ आचार्येणचसंयुक्तःकुरुकर्मयथोदितं ॥ ॥ गणपं–प्रारिप्सितस्यय
ज्ञस्यजपस्यहवनस्यच ॥ निर्विघ्नेनसमाप्त्यर्थंत्वामहंगणपंवृणे ॥ ॥ उपद्रष्टारं–भगवन्सर्वधर्मज्ञसर्वधर्मभृतांवर ॥ विततेम
मयज्ञेस्मिन्नुपद्रष्टाभवद्विज ॥ सर्वेषांसमुच्चयेनप्रार्थना ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया ॥ सुप्रसन्नाःप्रकुर्वंतुकर्मेदं
विधिपूर्वकं ॥ अस्मिन्कर्मणियेयेतुवृतागुरुमुखामया ॥ सावधानाःप्रकुर्वंतुस्वंस्वंकर्मयथोदितं ॥ इतिसर्वान्संपूज्यसंप्रार्थ्यसा
ष्टांगंप्रणमेत् ॥ तेचसर्वेप्रत्येकं वृतोस्मियथाज्ञानतःकर्मकरिष्यामीतिवदेयुः ॥ इति ॥ ॥ छ ॥ ॥ छ ॥

१ ऋत्विग्वरणंप्रक्रम्य—संपूज्यमधुपर्केणऋत्विजःकर्मकारयेत् । अन्यथाविफलंकर्मभवतीहनसंशयः । मधुपर्कश्चार्च्यशाखयाकार्यः । मंत्रवद्व
रणएवमधुपर्कइतिकेचित् । मधुपर्कस्यवरणांगत्वाद्यत्रवरणंतत्रमधुपर्कइतिवृत्तिकृत् । वस्तुतस्तुऋत्विजोवृत्वामधुपर्कमाहरेदित्यत्रक्रममात्रविधाना

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २७० ॥ मंडपपूजाचंडेश्वरोक्ता ॥

श्रीः ॥ अथाचार्यःसयजमानःसर्त्विक्पूर्णकुंभदध्यक्षतफलपुष्पसुवासिनीभिःसहितोमंगलघोषैःभद्रंकर्णेभिःकनिक्रददित्यादि शाकुनसूक्तंपठन्मंडपंगच्छेत् ॥ आचार्योमंडपप्रादक्षिण्येनपश्चिमद्वारिजानुभ्यामवनिंमत्वा स्योनापृथिवीतिभूमिंध्यायन्अर्घ्यं दद्यात् ॥ तत्रादौ ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ दंष्ट्राग्रैर्लीलयादेवियज्ञार्थंप्रणमाम्यहं ॥ इतिनमस्कारः ॥ ब्रह्मणा निर्मितेदेविविष्णुनाशंकरेणहि ॥ पार्वत्याचैवगायत्र्यास्कंदवैश्रवणेनच ॥ यमेनपूजितेदेविधर्मेणविजिगीषुणा ॥ सौभाग्यंदेहि पुत्रांश्चधनंरूपंचदेहिमे ॥ गृहाणार्घ्यंमयादत्तंसौभाग्यंचप्रयच्छमे ॥ इत्यर्घ्यंदत्वापश्चिमद्वारेणमंडपंप्रादक्षिण्येनप्रविश्यनैर्ऋती वारुण्योर्मध्येपूर्वोत्तराभिमुखाउपविशेयुः ॥ आचार्योवेद्याःपश्चिमतउपविश्यआचम्यप्राणानायम्यदेशकालौस्मृत्वाअमुककर्म णियजमानेनवृतोहंमंडपपूजादिविहितंकर्मकरिष्ये ॥ गणेशंपूजयित्वाशरीरशुद्ध्याकर्माधिकारार्थंआसनादिन्यासभूशुद्ध्यादि पवनपावनन्यासादिनात्मानंपावयित्वाप्रतिष्ठामंडपांतः यदत्रसंस्थितंभूतं० ॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभावन ॥ सुब्रह्मण्य नमस्तेस्तुमहापुरुषपूर्वज ॥ भूतानिराक्षसावापियेत्रतिष्ठंतिकेचन ॥ तेसर्वेप्यपगच्छंतुयज्ञमत्रकरोम्यहं ॥ अपसर्पंतुतेभूता० ब्रह्मकर्मसमारभे ॥ इतिलाजगौरसर्षपान्सर्वतोविकिरेत् ॥ ततःशुचीवोहव्येतितृचेनकुशैःपंचगव्येनआपोहिष्ठेतितृचेनअद्भ्यः संभृतइत्युत्तरनारायणेनचाद्भिःप्रोक्षणंकार्यं ॥ ततःकृतांजलिःभद्रंकर्णेस्वस्तिनइतिमंत्रद्वयंपठेत् ॥ देवाआयांतु यातुधाना

न्मधुपर्कस्यनवरणांगत्वंकिंतूभयोर्ऋत्विगंगत्वं । तेनस्मार्तेमंत्रवद्वरणाभावेपिऋत्विक्सत्वान्मधुपर्कोभवति । तेनात्रवरणोत्तरमाशौचादिपातेनऋ त्विक्परावृत्तिरितियुक्तं ॥ शां० र० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अपयातु विष्णोदेवयजनरक्षस्व भूमिप्रदिश...

वायव्यकोणेअदितिं ॥ ईशानकोणेनंदांचपूजयेत् ॥ ततःपश्चिमद्वारेणबहिर्निर्गत्यमंडपप्रादक्षिण्येनमंडपद्वाराद्बहिर्हस्तातपूर्व
श्वत्थतोरणंसुदृढनामकंशंखचिह्नितं(अग्निमीळेमधुच्छंदाअग्निर्गायत्री)॥ ॐ अ॒ग्निमी॑डेपु॒रोहि॑तंय॒ज्ञस्य॑दे॒वमृ॒त्विजं॑ ॥ होता॑रꣳरत्न॒
धात॑मं ॥ इतिमंत्रेणनिधाय ॥ सुदृढतोरणायनमइतिनाममंत्रेणगंधादिभिःसंपूज्यपुष्पमालादिशोभितंकुर्यात् ॥ राहुबृहस्पती
तत्रन्यसेत् ॥ तत्रैकःकलशःस्थाप्यः ॥ यथा ॥ महीद्यौरितिभूमिंस्पृष्ट्वा ओषधयःसमितिधान्यराशिंकृत्वा तदुपरिआजिघ्रइ
तिकलशंसंस्थाप्य आपोवाइदꣳइतिजलेनापूर्य गंधद्वारामितिगंधंप्रक्षिप्य याओषधीरितिसर्वौषधीः ओषधयःसमितियवान्
कांडात्कांडादितिदूर्वाः अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीतिसप्तमृदः याःफलिनीरितिफलं बृहस्पतेजुषस्वनइतिपंचरत्ना
निअग्नेरेतइतिहिरण्यंचप्रक्षिप्य युवासुवासाइतिवस्त्रेणरक्तसूत्रेणवावेष्ट्य पूर्णादर्वीतितदुपरिपूर्णपात्रंन्यसेत् ॥ तस्मिन्कलशे
ध्रुवावाहनंपूजनंच ॥ ततोदक्षिणेऔदुंबरंसुभद्रनामकंचक्रचिह्नितंतोरणं ॥ ॐ इ॒षेत्वो॒र्जेत्वा॑वा॒यव॑स्थोपा॒यव॑स्थदे॒वोवः॑सवि॒ता
प्रार्प॑यतु॒श्रेष्ठ॑तमाय॒कर्म॑णे ॥ इतिनिधायसुभद्रतोरणायनमःइतिपूर्ववत्संपूज्यपूर्ववच्चंदनादिचर्चितंकृत्वासूर्यमंगारकंचतत्रन्य
सेत् ॥ तत्रैकःकलशःपूर्ववत्स्थाप्यः ॥ तत्रधरामावाहयेत्पूजयेच्च ॥ पश्चिमेप्लाक्षंसुकर्मनामकंगदाचिह्नितंतोरणं ॥ ॐ अग्न॒आ
या॑हिवी॒तये॑गृणा॒नोह॒व्यदा॑तये ॥ निहोता॑सत्सिब॒र्हिषि॑ ॥ इतिनिधायसुकर्मतोरणायनमइतिपूर्ववत्संपूज्यचंदनादिचर्चितंकृत्वा
शुक्रंबुधंचतत्रन्यसेत् ॥ तत्रपूर्ववत्कलशंसंस्थाप्यतत्रवाक्पतिमावाह्यपूजयेत् ॥ ॥ ततउत्तरे ॥ वटतोरणंसुहोत्रनामकंपद्म
चिह्नितं ॥ ॐ शंनो॑दे॒वीर॒भिष्ट॑य॒आपो॑भवंतुपी॒तये॑ ॥ शंयोर॒भिस्र॑वंतुनः ॥ इतिमंत्रेणनिधायसुहोत्रतोरणायनमः इतिपूर्ववत्सं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २७० ॥ मंडपपूजाचंडेश्वरोक्ता ॥

श्रीः ॥ अथाचार्यःसयजमानःसर्त्विक्पूर्णकुंभदध्यक्षतफलपुष्पसुवासिनीभिःसहितोमंगलघोषैःभद्रंकर्णेभिःकनिक्रददित्यादि शाकुनसूक्तंपठन्मंडपंगच्छेत् ॥ आचार्योमंडपप्रादक्षिण्येनपश्चिमद्वारिजानुभ्यामवनिंमत्वा स्योनापृथिवीतिभूमिंध्यायन्अर्घ्यं दद्यात् ॥ तत्रादौ ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ दंष्ट्राग्रैर्लीलयादेवियज्ञार्थंप्रणमाम्यहं ॥ इतिनमस्कारः ॥ ब्रह्मणा निर्मितेदेविविष्णुनाशंकरेणहि ॥ पार्वत्याचैवगायत्र्यास्कंदवैश्रवणेनच ॥ यमेनपूजितेदेविधर्मेणविजिगीषुणा ॥ सौभाग्यंदेहि पुत्रांश्चधनंरूपंचदेहिमे ॥ गृहाणार्घ्यमयादत्तंसौभाग्यंचप्रयच्छमे ॥ इत्यर्घ्यंदत्वापश्चिमद्वारेणमंडपंप्रादक्षिण्येनप्रविश्यनैर्ऋतीं वारुण्योर्मध्येपूर्वोत्तराभिमुखाउपविशेयुः ॥ आचार्योवेद्याःपश्चिमतउपविश्यआचम्यप्राणानायम्यदेशकालौस्मृत्वाअमुककर्म णियजमानेनवृतोहंमंडपपूजादिविहितंकर्मकरिष्ये ॥ गणेशंपूजयित्वाशरीरशुद्ध्याकर्माधिकारार्थंआसनादिन्यासभूशुद्ध्यादि पवनपावनन्यासादिनात्मानंपावयित्वाप्रतिष्ठामंडपांतः यदत्रसंस्थितंभूतं० ॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभावन ॥ सुब्रह्मण्य नमस्तेस्तुमहापुरुषपूर्वज ॥ भूतानिराक्षसावापियेत्रतिष्ठंतिकेचन ॥ तेसर्वेप्यपगच्छंतुयज्ञमत्रकरोम्यहं ॥ अपसर्पंतुतेभूता० ब्रह्मकर्मसमारभे ॥ इतिलाजगौरसर्षपान्सर्वतोविकिरेत् ॥ ततःशुचीवोहव्येतितृचेनकुशैःपंचगव्येनआपोहिष्ठेतितृचेनअद्भ्यः संभूतइत्युत्तरनारायणेनचाद्भिःप्रोक्षणंकार्यं ॥ ततःकृतांजलिःभद्रंकर्णेस्वस्तिनइतिमंत्रद्वयंपठेत् ॥ देवाआयांतु यातुधाना

न्मधुपर्कस्यनवरणांगत्वंकिंतूभयोर्ऋत्विगंगत्वं । तेनस्मार्तेमंत्रवद्वरणाभावेपिऋत्विक्सत्वान्मधुपर्कोभवति । तेनात्रवरणोत्तरमाशौचादिपातेनऋ त्विक्परावृत्तिरितियुक्तं ॥ शां० र० ॥

CC-0. In Public Domain Funding by MoE-IKS

Digitized by Sarayu Trust. Funding by MoE-IKS

अपयांतु विष्णोदेवयजनंरक्षस्व भूमौप्रादेशंकुर्यात् ॥ ततोग्नेर्दक्षिणकोणेस्थूणांवसुदामावाह्यपूजयेत् ॥ नैर्ऋत्यकोणेभद्रां ॥ वायव्यकोणेअदितिं ॥ ईशानकोणेनंदांचपूजयेत् ॥ ततःपश्चिमद्वारेणबहिर्निर्गत्यमंडपप्रादक्षिण्येनमंडपद्वाराद्बहिर्हस्तांतेपूर्वे श्वत्थतोरणंसुदृढनामकंशंखचिह्नितं(अग्निमीळेमधुच्छंदाअग्निर्गायत्री)॥ ॐ अग्निमीडेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारꣳरत्न धातमं ॥ इतिमंत्रेणनिधाय ॥ सुदृढतोरणायनमइतिनाममंत्रेणगंधादिभिःसंपूज्यपुष्पमालादिशोभितंकुर्यात् ॥ राहुबृहस्पती तत्रन्यसेत् ॥ तत्रैकःकलशःस्थाप्यः ॥ यथा ॥ महीद्यौरितिभूमिंस्पृष्ट्वा ओषधयःसमितिधान्यराशिंकृत्वा तदुपरिआजिघ्रइ तिकलशंसंस्थाप्य आपोवाइदꣳइतिजलेनापूर्य गंधद्वारामितिगंधंप्रक्षिप्य याओषधीरितिसर्वौषधीः ओषधयःसमितियवान् कांडात्कांडादितिदूर्वाः अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीतिसप्तमृदः याःफलिनीरितिफलं बृहस्पतेजुषस्वनइतिपंचरत्ना निअग्नेरतइतिहिरण्यंचप्रक्षिप्य युवासुवासाइतिवस्त्रेणरक्तसूत्रेणवावेष्ट्य पूर्णादर्वीतितदुपरिपूर्णपात्रंन्यसेत् ॥ तस्मिन्कलशे ध्रुवावाहनंपूजनंच ॥ ततोदक्षिणेऔदुंबरंसुभद्रनामकंचक्रचिह्नितंतोरणं ॥ ॐ इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणे ॥ इतिनिधायसुभद्रतोरणायनमःइतिपूर्ववत्संपूज्यपूर्ववच्चंदनादिचर्चितंकृत्वासूर्यमंगारकंचतत्रन्य सेत् ॥ तत्रैकःकलशःपूर्ववत्स्थाप्यः ॥ तत्रधरामावाहयेत्पूजयेच्च ॥ पश्चिमेप्लाक्षंसुकर्मनामकंगदाचिह्नितंतोरणं ॥ ॐ अग्नआ याहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ इतिनिधायसुकर्मतोरणायनमइतिपूर्ववत्संपूज्यचंदनादिचर्चितंकृत्वा शुक्रंबुधंचतत्रन्यसेत् ॥ तत्रपूर्ववत्कलशंसंस्थाप्यतत्रवाक्पतिमावाह्यपूजयेत् ॥ ॥ ततउत्तरे ॥ वटतोरणंसुहोत्रनामकंपद्म चिह्नितं ॥ ॐ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ इतिमंत्रेणनिधायसुहोत्रतोरणायनमः इतिपूर्ववत्सं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पूज्यचंदनादिचर्चितंकृत्वासोमकेतुशनींस्तत्रन्यसेत् ॥ तत्रपूर्ववत्कलशस्थापनंतत्रविघ्नेशमावाह्यपूजयेच्च ॥ ॥ ततःपूर्वद्वारे कलशद्वयंप्रतिद्वारशाखंप्रतिष्ठाप्यचंदनोदकफलपंचपल्लवसप्तमृत्तिकासुवर्णपंचरत्नादियुतंदध्यक्षतविभूषितंवस्त्रपुष्पमालादिचं दनचर्चितं रक्तसूत्रवेष्टिताननंपूर्ववन्मंत्रैःस्थापयेत् ॥ प्रतिकलशंमंत्रावृत्तिः ॥ ऐरावतंकलशद्वयेन्यसेत्पूजयेच्च ॥ ऋग्वेदिना वृत्विजौपूर्वद्वारेशांतिसूक्तजपार्थत्वेनत्वांवृणे ॥ ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखे भवेतिप्रत्येकंवृत्वा ॥ (अग्निमीळेमधुच्छंदाअग्निर्गायत्री) ॥ ॐ अग्निमींडे० ॥ इतिमंत्रेणगंधाद्युपचारैःपूजयेत् ॥ ततःसह स्राक्षंमत्तैरावतस्थितंपीतकिरीटकुंडलधरंदक्षिणवामकरस्थवज्रोत्पलमिंद्रंध्यात्वा ॥ एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरा मरेश ॥ संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते ॥ भोइंद्रइहागच्छेहतिष्ठ ॥ इंद्रंसांगंसप० सशक्तिकंद्वारकलशेआ०॥ (आशुःशिशानइतींद्रोप्रतिरथइंद्रस्त्रिष्टुप्) ॥ ॐ आशुःशिशानोवृषभोनयुध्मोघनाघनःक्षोभणश्चर्षणीनां ॥ संक्रंदनोतिमिषएकवीरःशतꣳसेनाअजयत्साकमिंद्रः ॥ इतिपीतांपताकांपीतध्वजंचोच्छ्रयेत् ॥ (त्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप् ॥ इंद्रपूजनेवि०) ॥ ॐ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं ॥ हुवेनुशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विंद्रः ॥ इतिइंद्रंपूजयित्वा ॥ इंद्रःसुरपतिःश्रेष्ठोवज्रहस्तोमहाबलः ॥ शतयज्वाचयोदेवस्तस्मैनित्यंनमोनमः ॥ इतिनत्वाइंद्रायसांगायसायुधायसशक्तिका यअमुंसदीपमाषभक्तबलिंसमर्पयामीतिसमर्पयेत् ॥ हस्तौपादौप्रक्षाल्याचम्य ॥ ततआग्नेयेगत्वापूर्ववत्कलशंस्थापयित्वापुंडरी कंअमृतंचतत्रन्यसेत्पूजयेच्च ॥ छागस्थंरक्तंदक्षिणवामकरद्वयधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा ॥ एह्येहिसर्वामरह व्यवाहमुनिप्रवीरैरभितोभिजुष्ट ॥ तेजस्वतालोकगणेनसार्धंममाध्वरंपाहिकवेनमस्ते ॥ भोअग्नेइत्यादिअग्निंसांगमावाह्यरक्तां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पताकांरक्तध्वजंच ॥ (अग्निंदूतंमेधातिथिरग्निर्गायत्री ॥ पताकोच्छ्रयणेवि०) ॥ ॐ अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं ॥ अस्य यज्ञस्यसुक्रतुं ॥ इतिउच्छ्रयेत् ॥ (त्वंनोअग्नेनाभागःकाण्वोग्निर्महापंक्तिः) ॥ ॐ त्वंनोअग्नआयुषुत्वंदेवेषुपूर्व्यवस्वएकइरज्यसि ॥ त्वामापःपरिस्रुतःपरियंतिस्वसेतवोनभंतामन्यकेसमे ॥ इतिमंत्रेणाग्निंगंधादिभिःपूजयित्वा ॥ आग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः ॥ धूम्रकेतुरजोध्यक्षस्तस्मैनित्यंनमोनमः ॥ इतिनत्वाअग्नयेसांगायेतिबलिंदद्यात् ॥ ततआचम्यदक्षिणेगत्वाप्रतिद्वारशाखंचंदनोदकादियुतंपूर्ववत्कलशद्वयंस्थापयित्वावामननामकंदिग्गजंतत्रन्यसेत्पूजयेच्च ॥ ततोयजुर्वेदिनावृत्विजौशांतिसूक्तजपार्थत्वेनत्वांवृणे ॥ कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदैवतः ॥ काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ इतिप्रत्येकंवृत्वा ॥ इषेत्वोर्जेत्वावा० ॥ इतिमंत्रेणगंधाद्युपचारैःपूजयेत् ॥ ततोमहिषारूढंधृतदंडपाशदक्षिणवामकरद्वयंकृष्णांजनचयोपममग्निसमलोचनंयमंध्यात्वा ॥ एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्ते ॥ शुभाशुभानंदशुचामधीशशिवायनःपाहिमखंनमस्ते ॥ भोयमइत्यादियमंसांगमित्याद्यावाह्य ॥ कृष्णांपताकांकृष्णंध्वजंच ॥ (आयंगौःसार्पराज्ञीसर्पागायत्री) ॥ ॐ आयंगौःपृश्निरक्रमीद० ॥ इतिमंत्रेणोच्छ्रयेत् ॥ (ततःयमायसोमंयमोयमोनुष्टुप्) ॥ ॐ यमायसोमंसुनुतयमायजुहुताहविः ॥ यमंहयज्ञोगंच्छत्यग्निदूतोअरंकृतः ॥ इतियमंगंधादिभिःपूजयित्वा ॥ महामहिषमारूढंदंडहस्तंमहाबलं ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां ॥ इतिनत्वा ॥ यमायसांगायेत्यादिबलिंदद्यात् ॥ ततआचम्यनैर्ऋत्यांगत्वापूर्ववत्कलशंस्थापयित्वा ॥ कुमुदंदुर्जयंचतत्रपूजयित्वा ॥ ततोनारूढंमहाकायंखड्गहस्तंमहाबलं ॥ राक्षसैर्वेष्टितंनीलंपीताभरणभूषितं निर्ऋतिंध्यात्वा ॥ एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः ॥ ममाध्वरंपाहिपिशाचनाथलोकेश्वरस्त्वंभगवन्नमस्ते ॥ भोनिर्ऋतेइत्यादिनानिर्ऋ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिंकलशेआवाह्य ॥ (मोषुणःकण्वोनिर्ऋतिर्गायत्री ॥ पताकोच्छ्रयणेवि०) ॥ ॐ मोषुणःपरांपरानिर्ऋतिर्दुर्हणांवधीत् ॥ पदीष्टतृष्णयासह ॥ इतिनीलपताकांनीलध्वजंचोच्छ्रयेत् ॥ असुन्वंतइतिमंत्रेणमोषुणइतिवानिर्ऋतिंगंधादिभिःपूजयित्वा ॥ निर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां ॥ इतिनत्वासांगायेत्यादिवलिंदद्यात् ॥ ॥ ततआचम्यपश्चिमेगत्वापूर्ववत्कलशद्वयंस्थापयित्वाअंजनाख्यंदिग्गजंतत्रन्यसेत् ॥ सामवेदिनावृत्विजौपश्चिमद्वारेशांतिसूक्त जपार्थंत्वामहंवृणे ॥ सामवेदस्तुपिंगाक्षोजागतःशक्तिदैवतः ॥ भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्वाअग्नआ याहीतिगंधाद्युपचारैःपूजयेत् ॥ ततःमकरस्थंपाशहस्तंशुक्लवर्णंकिरीटिनंवरुणंध्यात्वा ॥ एह्येहियादोगणवारिधीनांगणेनपर्जन्य महाप्सरोभिः ॥ विद्याधरेंद्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते ॥ भोवरुणेत्यादिद्वारकलशेआवाह्य ॥ श्वेतांपताकांश्वेत ध्वजंच ॥ (इमंमेवरुणेतिशुनःशेपोवरुणोगायत्री ॥ वरु०) ॐ इमंमेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ इति उच्छ्रयेत् ॥ (तत्त्वायामिशुनःशेपोवरुणस्त्रिष्टुप्)॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव रुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः ॥ इतिवरुणंगंधादिभिःपूजयेत् ॥ पाशहस्तंचवरुणमर्णसांपतिमीश्वरं ॥ आवाहयामियज्ञे स्मिन्वरुणायनमोनमः ॥ इतिनत्वावरुणायेत्यादिमाषभक्तबलिंदत्वा ॥ ॥ ततआचम्यवायव्यांगत्वातत्रपूर्ववत्कलशंस्थाप यित्वा तत्रपुष्पदंतंसिद्धार्थंचसंपूज्यमृगाधिरूढंधूम्रवर्णंचित्रांबरधरंयुवानंध्वजवरददक्षिणवामकरद्वयंवायुंध्यात्वा ॥ एह्येहि यज्ञेममरक्षणायमृगाधिरूढःसहसिद्धसंघैः ॥ प्राणाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते ॥ भोवायोइहागच्छेत्यावाह्य ॥ धूम्रांपताकांधूम्रध्वजंच ॥ (वायोशतंवामदेवोवायुरनुष्टुप्)॥ ॐ वायोशतंहरीणांयुवस्वपोष्याणां ॥ उतवातेसहस्रिणोरथआ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यांतुपाजसा ॥ इतिमंत्रेणोच्छ्रयेत् ॥ (तववायोव्यश्वांगिरसोवायुर्गायत्री) ॥ ॐ तववायवृतस्पतेत्वष्टुर्जामातरद्भुत ॥ अवाꣳ स्यावृणीमहे ॥ इतिवायुंगंधादिभिरभ्यर्च्य ॥ वायुमाकाशगंचैवपवनंवेगवद्गतिं ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां ॥ अनाकारोमहौजाश्चयश्चादृष्टगतिर्दिवि ॥ तस्मैपूज्यायजगतोवायवेहंनमामिच ॥ इतिनत्वासांगायेत्यादिमाषभक्तबलिंदद्यात् ॥ ततआचम्यउत्तरेगत्वापूर्ववत्कलशद्वयसंस्थाप्यसार्वभौमंदिग्गजंतत्रन्यसेत् ॥ अथर्ववेदिनावृत्विजौशांतिसूक्तजपार्थंत्वेनत्वां वृणे ॥ बृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः ॥ वैशंपायनविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंवृत्वा ॥ ततःशंनोदेवीरितिमंत्रेणगंधाद्युपचारैःपूजयेत् ॥ ततोनरयुतविमानस्थंकुंडलमहाकेयूररुचिरंगदावरददक्षिणवामभुजद्वयंमुकुटिनंमहोदरंमहाकायंहरितवर्णंकुबेरंध्यात्वा ॥ एह्येहियक्षेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्धं ॥ सर्वौषधीभिःपितृभिःसहैवगृहाणपूजांभगवन्नमस्ते ॥ भोसोमेत्यादिद्वारकलशेआवाह्य ॥ हरितांपताकांहरितध्वजंच ॥ (आप्यायस्वराहूगणोगोतमःसोमोगायत्री) ॥ ॐ आप्यायस्व समेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ इत्युच्छ्रयेत् ॥ (सोमोधेनुंराहूगणोगोतमःसोमस्त्रिष्टुप्) ॥ ॐ सोमोधेनुं सोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति ॥ सादन्यंविद्थ्यंसभेयंपितृश्रवणंयोददाशदस्मै ॥ इतिमंत्रेणसोमंगंधादिभिःपूजयेत् ॥ सर्वनक्षत्रमध्येतुसोमोराजाव्यवस्थितः ॥ तस्मैसोमायदेवायनक्षत्रपतयेनमः ॥ इतिनत्वासांगायेत्यादिसोमायेमंमाषभक्तबलिं समर्पयामीतिदद्यात् ॥ ततआचम्यईशान्यांगत्वापूर्ववत्कलशंसंस्थाप्य ॥ सुप्रतीकंदिग्गजंमंगलंचतत्रसंपूज्य वृषारूढंदक्षिण वामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रंशुक्लमीशानंध्यात्वा ॥ एह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगधरेणसार्धं ॥ लोकेनयज्ञेश्वरयज्ञ सिद्ध्यैगृहाणपूजांभगवन्नमस्ते ॥ भोईशानेत्यादिईशानंकलशेआवाह्य ॥ श्वेतांपताकांश्वेतध्वजंच ॥ (अभित्वादेवसवितरित्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जीगर्तिःशुनःशेपःसवितागायत्री) ॥ ॐ अभित्वादेवसवितरीशानंवार्याणां ॥ सदावन्भागमीमहे ॥ इत्युच्छ्रयेत् ॥ तमीशानमि तिगंधादिभिरभ्यर्च्य ॥ वृषस्कंधसमारूढशूलहस्तत्रिलोचन ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां ॥ सर्वाधिपोमहादेव ईशानःशुक्लईश्वरः ॥ शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमः ॥ इतिध्यात्वा ॥ ईशानायसांगायेत्यादिवलिंदद्यात् ॥ ॥ तत आचम्यईशानपूर्वयोर्मध्येअधउद्दिश्यअनंतशयनासीनंफणासहस्रमंडितंपद्मशंखधरोर्ध्वाधोदक्षिणकरद्वयं चक्रगदाधरोर्ध्वाधो वामकरद्वयमनंतंध्यात्वा ॥ एह्येहिपातालधरामरेंद्रनागांगनाकिन्नरगीयमान ॥ यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयं ॥ भोअनंतइहागच्छेत्यादिअनंतमावाह्यश्वेतांपताकांश्वेतध्वजंच ॥ (आयंगौःसार्पराज्ञीसर्पागायत्री) ॥ ॐ आयंगौःपृश्निरक्रमी दसदन्मातरंपुरः ॥ पितरंचप्रयन्त्सुवः ॥ इत्युच्छ्रयेत् ॥ तेनैवमंत्रेणशेषंगंधादिभिरभ्यर्च्य ॥ योसावनंतरूपेणब्रह्मांडंसचरा चरं ॥ पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमइतिनत्वासांगायेत्यादिमाषभक्तबलिंदद्यात् ॥ ॥ ततआचम्यपश्चिमनिर्ऋतिम ध्येऊर्ध्वमुद्दिश्यअक्षसूत्रकुशमुष्टिधरोर्ध्वाधोदक्षिणकरद्वयंसुवर्णकमंडलुधरोर्ध्वाधोवामकरद्वयंचतुर्मुखंश्मश्रुजटिलंलंबोदरंसुव र्णवर्णंब्रह्माणंध्यात्वा ॥ एह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्धंपितृदेवताभिः ॥ सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततंशिवा य ॥ भोब्रह्मन्इहागच्छेत्यादिब्रह्माणंसांगमित्याद्यावाह्यरक्तांपताकांरक्तध्वजंच ॥ (ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप्) ॥ ॐ ब्रह्मजज्ञानंप्रथमं० अनेनोच्छ्रयेत् ॥ तेनैवब्रह्माणंगंधादिभिरभ्यर्च्य ॥ पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः ॥ यज्ञाध्यक्ष श्चतुर्वक्त्रस्तस्मैनित्यंनमोनमइतिनत्वासांगायेत्यादिबलिंदद्यात् ॥ अन्येतुस्योनापृथिवीतिपृथ्वींसंपूज्यतेनैवध्वजपताकास्थापनं कुर्वंति ॥ रूपनारायणमतेईशानपूर्वयोर्मध्येब्रह्मपूजनं ॥ ततआचम्यमंडपमध्येअत्युच्चदंडोदशहस्तदीर्घस्त्रिहस्तायतोमहाध्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जोविचित्रवर्णः ॥ (इंद्रस्यवृष्णइत्यस्येंद्रोप्रतिरथइंद्रस्त्रिष्टुप्) ॥ ॐ इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्धउग्रं ॥ महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात् ॥ इतिसंस्थाप्य ॥ ब्रह्मजज्ञानमितिमंत्रेणतत्रैवब्रह्मपूजनंकार्यं ॥ ततोमंडपस्यषोडशस्तंभेषुसर्वेभ्योदेवेभ्योनमः । वंशेषुकिन्नरेभ्योनमः । पृष्ठेपन्नगेभ्योनमइतिपूजयेत् ॥ ॥ ततोमंडपाद्बहिःपूर्वस्यां दिशिकिंचिद्भूमिमुल्लिप्यतत्रोपविश्य ॥ त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ॥ ब्रह्मविष्णुशिवैःसार्धंरक्षांकुर्वंतुतानिमे ॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः ॥ ऋषयोमनवोगावोदेवमातरएवच ॥ सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः ॥ ब्रह्माविष्णु श्चरुद्रश्चक्षेत्रपालगणैःसह ॥ रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः ॥ त्रैलोक्यस्थस्थावरेभ्योभूतेभ्योनमः ॥ त्रैलोक्यस्थचरेभ्योभूतेभ्योनमः ॥ ब्रह्मणेनमः ॥ विष्णवेनमः ॥ शिवायनमः ॥ देवेभ्योनमः॥ दानवेभ्योनमः ॥ गंधर्वेभ्योनमः ॥ यक्षेभ्योनमः ॥ रक्षोभ्योनमः ॥ पन्नगेभ्योनमः ॥ ऋषिभ्योनमः ॥ मनुष्येभ्योनमः ॥ गोभ्योनमः ॥ देवमातृभ्योनमः ॥ इतिप्रत्येकंसंपूज्य पूर्वमंत्रैरेभ्योभूमौमाषभक्तबलिंदद्यात् ॥ इतिमंडपप्रतिष्ठा ॥ ॥ छ ॥ ॥ छ ॥

॥ २७१ ॥ शांतिहोमः ॥

श्रीः ॥ ततोदेशकालौस्मृत्वाप्रतिमापिंडिकादिषुन्यूनाधिकपाषाणप्राणिवधादिदोषपरिहारार्थंशांतिहोमंकरिष्येइतिसंकल्प्याग्नि स्थापनादिविधायान्वाधानंकुर्यात् ॥ व्याहृत्यंतमुक्त्वावैशेषिकहोमेमृत्युरोगान्अघोरंरुद्रंपापभक्षणमंत्रलिंगोक्तदेवताःस्थाप्य देवंच ५ एताःपंचदेवताःप्रत्येकंअष्टाधिकशतसंख्याकाभिर्घृताक्ततिलाहुतिभिर्यक्ष्येअंगहोमेवरुणंद्विरित्यादि ॥ क्रमेणहोम मंत्राः ॥ परंमृत्यो० ॥ अघोरेभ्योथघोरे० ॥ त्र्यंबकं० ॥ चरणंपवित्रं० ॥ स्थाप्यदेवमंत्रः ॥ इदंविष्णु० ॥ विष्णोर्नुकं० इति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नारायणस्य ॥ शिवपक्षे ॥ तत्पुरुषायविद्महे० इतिशिवस्य० ॥ ततःइमंमेवरुणेत्यादिहोमशेषंसमापयेत् ॥ इतिशांतिहोमः ॥

॥ २७२ ॥ देवहस्तेकंकणबंधनेजलाधिवासेचवासुदेव्यांविशेषः ॥

श्रीः ॥ आचार्यःकौतुकबंधनंकरिष्येइतिसंकल्प्यदर्भकूर्चेउदकुंभंनिधायदशतंतुमितंपंचांगुलमष्टांगुलंवाकार्पाससूत्रंहरिद्राक्तं साक्षतकांस्यपात्रेनिधायकुंभोदकेनसूत्रमभिषिंचेदेभिर्मंत्रैः ॥ ॐ अग्निर्मींडे० ॥ आपोहिष्ठा ३ ॥ एतोन्विंद्रं ३ ॥ स्वादिष्ठये तिदश० ॥ रक्षोहणमिति० २५ ॥ रात्रीव्यख्यदिति० ॥ कृणुष्वपाजइतिपंचदश० ॥ तरत्समंदीति० ४ ॥ सहस्रशीर्षेति० १८ ॥ विष्णोर्नुकमितिषट् ॥ परोमात्रयेतिसप्त० ॥ हिरण्यवर्णामितिपंचदश० ॥ यज्ञाग्रतइतिषट् ॥ विहिहोत्रेतिपंच ॥ मुंचामित्वा० ५ ॥ स्योनापृथिवी० १ ॥ द्रविणोदा० १ ॥ सवितापश्चातात् १ ॥ नवोनवइति० १ ॥ उलूकयातुमिति० १॥ पिशंगभृष्टिममिति० १ ॥ एभिर्मंत्रैःसूत्रमभिषिच्य ॥ जातवेदस० ॥ इत्यनयासूत्रंगंधेनानुलिप्य ॥ विश्वेत्तातेः० ॥ इति मंत्रेणभगवतोदक्षिणहस्तेबध्नीयात् ॥ ततोधान्यराशौजलद्रोणिंकटाहंवाजलभांडंनिधायएतेषामभावेजलधारार्थंशिक्यादिसं पाद्यद्रोण्यादिकंगंधोदकेनापूर्यतन्मध्येअष्टाविंशतिदर्भनिर्मितंकूर्चंनिधाय यदत्रसंस्थितमितिभूतशुद्धिंविधायतस्मिन्कूर्चेमूल मंत्रेणहरिंहरंवाभावयित्वाचक्रमुद्रांप्रदर्श्य जलद्रोणीतोदक्षिणदिशिधान्यपुंजोपरिवस्त्रद्वयवेष्टितंकलशंएकवस्त्रवेष्टितंकरकंच कलशस्थापनमंत्रैःस्थापयेत्॥ तत्रकलशेब्रह्मजज्ञानं० ॥ ॐ ब्रह्मणेनमःब्रह्मणमावाहयामिइत्यावाह्यकरकेनाममंत्रेणसुदर्शनमा वाहयेत् ॥ ॐ सुदर्शनायनमःसुदर्शनमावाहयामि ॥ ततःजलद्रोण्यादेरुपरि यदत्रसंस्थितमितिमंत्रेणसर्षपान्विकीर्यअष्टौकल शान्कलशस्थापनमंत्रैःस्थापयेत् तेष्वष्टकलशेषुइंद्रादीनावाहयेत्॥ अग्रतःसुवर्चसंदीपंदद्यात्॥ जलांतःशमीपीठंस्थापयित्वात

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दुपरिवस्त्रमास्तीर्यप्रतिमांवस्त्रेणाच्छाद्यकुशैरावेष्ट्यप्राङ्मुखीमुदङ्मुखींवाजलेधिवासयेत् ॥ अयंकमलावासइत्यागमप्रसिद्धिः ॥ अयमेवसरोजसंघातनामकाधिवासः ॥ जलद्रोण्यभावेसंततधारांकुर्यात् ॥ जलाधिवासंएकरात्रंयामंवागोदोहनमात्रंवाकुर्यात् ॥ जलाधिवाससूक्तानितु ॥ अतोदेवाइतिषट् ६ ॥ विष्णोर्नुकमितिसप्तदश १७ ॥ अस्यवामस्येतिद्विपंचाशत् ५२ ॥ ममाग्नेवर्च इत्येकविंशतिः २१ ॥ आशुःशिशानइतित्रयोदश १३ ॥ शंनइंद्राग्नीइतिपंचदश १५ ॥ रक्षोहणमितिपंचविंशतिः २५ ॥ आनोभद्राइतिदश १० ॥ स्वस्त्ययनमिति २ ॥ इमारुद्रायेत्येकादश ११ ॥ मुंचामित्वेतिपंच० ५ ॥ रात्रीव्यख्यदिति ८ ॥ एतानिसूक्तानिजपेयुः ॥ ततःअथर्वशीर्षंयथाशक्त्यावर्तयेत् ॥ एवंजलाधिवासंसंपाद्यसाक्षतहस्ताचार्यादिसहितःसपत्नी कोयजमानः मंगलतूर्यनिनादेनसुवासिनीमंगलगीतसहितःभद्रंकर्णेभिरितिमंत्रघोषेणमहामंडपप्रादक्षिण्येनपश्चिमद्वारेणमंडपं प्रविश्यवेद्याःपश्चिमतउपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वामंडपप्रतिष्ठांकरिष्येइतिसंकल्प्य ॥ गणेशंसंपूज्यअथवास्तुय जननवग्रहमखार्थंवृतैराचार्यादिभिर्यथावकाशप्रदेशेकुंडांतरेस्थंडिलेवाएकतंत्रेणपृथग्वावास्तुयागंग्रहमखंचकारयेदितिविशेषः

॥ २७३ ॥ पंचकुंडीपक्षेन्वाधानादि ॥

श्रीः ॥ पूर्वईशानकुंडस्थमुख्याचार्यःउपरिमेखलायांइदंविष्णुरितिविष्णुं मध्यमेखलायांब्रह्मजज्ञानमितिब्रह्माणं अधोमेखला यांकद्रुद्रायेतिरुद्रंयोन्यांगौरीमिमायेतिगौरींचावाह्यपूजयेत् ॥ स्वगृह्यविधिनाकुंडसंस्कारपूर्वमग्निंप्रतिष्ठाप्यअग्नेर्गर्भाधानादिसं स्कारार्थंव्याहृत्याहुतीःप्रतिसंस्कारमष्टाष्टसंख्याकाहुत्वा ॥ ततःप्रागाद्याचार्याःप्रागादिकुंडहोमंकरिष्यइतिसंकल्प्य ॥ उपरिव त्स्वस्वकुंडसंस्कारंकृत्वामुख्याचार्यकुंडात्संस्कृतमग्निंअग्निनाग्निःसमिध्यतइतिमंत्रेणस्वेस्वेकुंडेप्रतिष्ठापयेयुरग्नेर्ध्यानादिचकुर्युः॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मुख्यकुंडाचार्यःस्वकुंडस्यैशान्यांशांतिकलशंविधिवत्स्थापयेत् ॥ प्रागाद्याचार्याःस्वस्वकुंडस्यैशान्यांसंपातोदकार्थशांतिकलशं चस्थापयेयुः ॥ तत्रैकःकलशःसंपातोदकार्थ ॥ द्वितीयकलशेसाक्षतपात्रेमूर्तिमूर्त्यधिपतिंलोकपालंचावाहयेत् ॥ तत्प्रकारः ॥ पूर्वकुंडस्येशानकलशे पृथिवीमूर्तिंआवाहयामि १ पृथिवीमूर्त्यधिपतिंशर्वं २ लोकपालमिंद्रं ३ अग्निमूर्तिं ४ अग्निमूर्त्यधिपतिंपशुपतिं ५ लोकपालंअग्निं ६ इतिपूर्वकुंडेषट् ॥ दक्षिणकुंडैककलशेयजमानमूर्तिं १ यजमानमूर्त्यधिपतिंउग्रं २ लोकपालं यमं ३ सूर्यमूर्तिं ४ सूर्यमूर्त्यधिपतिंरुद्रं ५ लोकपालंनिर्ऋतिं ६ इतिषट् ॥ पश्चिमकुंडैककलशे जलमूर्तिं १ जलमूर्त्यधिपतिंभवं २ लोकपालंवरुणं ३ वायुमूर्तिं ४ वायुमूर्त्यधिपतिंईशानं ५ लोकपालंवायुं ६ इतिषट्॥ अथोत्तरकुंडैककलशे सोममूर्तिं १ सोममूर्त्यधिपतिं २ लोकपालंकुबेरं ३ आकाशमूर्तिं ४ आकाशमूर्त्यधिपतिंभीमं ५ लोकपालंईशानं ६ इत्युत्तरकुंडेषट्आवाह्यपूजयित्वाअन्वाधानंकुर्यात् ॥ तत्रादौमुख्यकुंडेआचार्यःसमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतमुक्त्वाएतत्प्रतिष्ठाकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि जातवेदसमग्निमिध्मेनेतिव्याहृत्यंतमुक्त्वावैशेषिकप्रधानहोमे (मुख्यकुंडेमूर्तिपानसंति) ॥ स्थाप्यदेवंविष्णुंपलाशौदुंबराश्वत्थशम्यपामार्गसमित्तिलचर्वाज्यैःप्रतिद्रव्यं १०८ संख्यया २८ संख्यायावायक्ष्ये ॥ पिंडिकां २८ संख्ययातिलद्रव्येण लक्ष्मींगरुडंचप्रत्येकं २८ तिलद्रव्येण ब्रह्मादिमंडलदेवताःप्रत्येक १० तिलद्रव्येण ॥ प्रणवादिन्यासांतर्गततत्वानामाप्यायनार्थंप्रतितत्वं १० संख्ययालिंगोक्तदेवतास्तिलद्रव्येणयक्ष्ये ॥ (अथवाप्रणवादिन्यासमंत्राणामाप्यायनार्थंविष्णुं १०८ तिलैर्यवैश्चइतित्रिविक्रमः) ॥ प्रतिमायाःगर्भाधानादिषोडशसंस्कारसिद्ध्यर्थंप्रजापतिंअष्टा ८ हुतिसंख्ययातिलद्रव्येणव्याहृतिमंत्रेणयक्ष्ये ॥ तथाचशांत्यर्थंप्रजापतिं १०८ तिलद्रव्येणयक्ष्ये ॥ अंगहोमेवरुणं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्विरित्यादि ॥ ॥ अथपूर्वकुंडेव्याहृत्यंतमुक्त्वापृथिवीमूर्तिंपृथिवीमूर्त्यधिपतिंशर्वंलोकपालंइंद्रंअग्निमूर्तिं अग्निमूर्त्यधिपतिंपशु
पतिंलोकपालंअग्निंचप्रत्येकंपलाशोदुंबराश्वत्थशम्यपामार्गसमित्तिलचर्वाज्यैःप्रतिद्रव्यं ८ यक्ष्ये ॥ स्थाप्यदेवंविष्णुंतैरेवद्रव्यैः
प्रत्येकं १०८ पिंडिकां २८ तिलद्रव्येण ॥ लक्ष्मींगरुडंचप्रत्येकं २८ तिलद्रव्येण ॥ प्रजापतिं १०८ तिलद्रव्येण अंगहोमे
वरुणंद्विरित्यादि० ॥ ॥ दक्षिणकुंडे ॥ यजमानमूर्तिं यजमानमूर्त्यधिपतिंउग्रं यमं सूर्यमूर्तिं सूर्यमूर्त्यधिपतिंरुद्रं लोकपालं
निर्ऋतिंच प्रत्येकंपलाशोदुंबराश्वत्थशम्यपामार्गसमित्तिलचर्वाज्यैःप्रतिद्रव्यं ८ स्थाप्यदेवंविष्णुंतैरेवद्रव्यैःप्रत्येकं १०८ पिंडि
कां २८ तिलद्रव्येण लक्ष्मींगरुडंचप्रत्येकं २८ तिलद्रव्येण प्रजापतिं १०८ तिलद्रव्येण ॥ अंगहोमेवरुणंद्विरित्यादि ॥ ॥
अथपश्चिमकुंडेप्रधानं ॥ जलमूर्तिं जलमूर्त्यधिपतिंभवं लोकपालंवरुणं वायुमूर्तिंवायुमूर्त्यधिपतिंईशानंलोकपालंवायुं तैरेवद्र
व्यैःप्रतिद्रव्यं ८ स्थाप्यदेवंविष्णुंतैरेवद्रव्यैःप्रतिद्रव्यं १०८ पिंडिकां २८ तिलद्रव्येण लक्ष्मींगरुडंचप्रत्येकं २८ तिलद्रव्ये
णप्रजापतिं १०८ तिलद्रव्येण अंगहोमेवरुणंद्विरित्यादि० ॥ ॥ अथोत्तरकुंडेप्रधानं सोममूर्तिं सोममूर्त्यधिपतिं महादेवं
लोकपालंकुबेरं आकाशमूर्तिं आकाशमूर्त्यधिपतिंभीमं लोकपालंईशानं प्रत्येकंपूर्वोक्तद्रव्यैः प्रतिद्रव्यं ८ स्थाप्यदेवंविष्णुंतै
रेवद्रव्यैःप्रतिद्रव्यं १०८ पिंडिकां २८ तिलद्रव्येण लक्ष्मींगरुडंचप्रत्येकं २८ तिलद्रव्येणप्रजापतिं १०८ तिलद्रव्येणअंगहोमे
वरुणंद्विरित्यादि० ॥ इतिपंचकुंडीपक्षेन्वाधानम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २७४ ॥ पंचकुंडीहोममंत्रद्वारपालजपक्रमः ॥

श्रीः ॥ होमेक्रियमाणेजापकाजाप्यानिपठेयुः ॥ तान्यग्रेपूर्वादिकुंडीयहोमांतेवक्ष्यंते ॥ ईशानकुंडेमुख्यआचार्यः ॥ सामान्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रधानांतेसमिदादिहोमंकुर्यात् ॥ ईशान्याद्याचार्याःप्रतिद्रव्यंहोमांतेदेवस्यशिरस्युरसिपादयोःस्पृशेयुरितिकेचित् ॥ आज्यहो मेस्रुवेणाज्यशेषंप्रतिकुंडंस्थापितशांतिकलशेषुनयेयुः ॥ तत्रहोममंत्राः ॥ विष्णुःस्थाप्यश्चेत्इदंविष्णुरितिमूलमंत्रः तेनैवहोमः ॥ नारायणश्चेत्विष्णोर्नुकमितिमंत्रेणहोमः ॥ ह्रीश्चतेलक्ष्मीश्चपत्न्यौ अहोरात्रेपार्श्वे नक्षत्राणिरूपं अश्विनौव्यात्तं इष्टंमनिषाण अमुंमनिषाण सर्वंमनिषाणस्वाहाइतिपिंडिकामंत्रेणहोमः ॥ त्यागस्तुयजमानेनप्रतिकुंडंआदावेवकर्तव्यः हिरण्यवर्णामितिल क्ष्म्याः ॥ तत्पुरुषायविद्महेसुवर्णपक्षायधीमहि ॥ तन्नोगरुडःप्रचोदयात् (त्यमूषुवाजिनमितिवा इंद्रंमित्रमितिवा) गरुडस्य होममंत्रः ॥ ब्रह्मादिसर्वतोभद्रमंडलदेवतानांस्थापनोक्तमंत्रैर्नामभिर्वाहोमः ॥ अथन्यासहोमःसचन्याससमयएवान्येनऋत्विजा कर्तव्यः ॥ सचत्रिविक्रममतेयदिसमुदायेनक्रियतेतदापरायविष्णवेस्वाहेतितिलैरष्टोत्तरशतंकर्तव्यः विष्णवइदंनममेतित्यागः॥ प्रतिष्ठामयूखेतुपरायशिवात्मनेइतिशैवे ॥ एवंसूर्यादिषुविशेषः ॥ विष्णुप्रतिमायाःगर्भाधानादिषोडशसंस्कारसिद्ध्यर्थप्रतिसं स्कारंअष्टाहुतिसंख्ययासमस्तव्याहृतिभिर्होमः ॥ सचजीवन्यासानंतरंकर्तव्यः ॥ शांत्यर्थंव्याहृतिहोमः ॥ सोपिदेवस्थापनानंतरं कर्तव्यः ॥ ॥ अथप्राच्यादिकुंडेहोममंत्राः ॥ तत्रपूर्वकुंडेआचार्यःसामान्यप्रधानहोमांतेयजमानेनत्यागेकृतेप्रधानहोमंकुर्यात् ॥ प्रतिद्रव्यंहोमांतेदेवंपादनाभिशिरःसुस्पृशेत् ॥ आज्यहोमकृत्तुआज्यशेषंस्रुवेणकिंचिदुत्तरकलशेनिनयेत् ॥ प्रधानहोममंत्राः॥ स्योनापृथिवीतिपृथिवीमूर्तेः ॥ ॐ स्योनापृथिवि० थाःस्वाहा ॥ पृथिव्याइदं० इत्यष्टाहुतयःप्रतिमंत्रंहोतव्याः ॥ अघोरेभ्यइति पृथिवीमूर्त्यधिपतेःशर्वस्य ॥ त्रातारमिंद्रमितिलोकपालस्य ॥ अग्निंदूतमित्यग्निमूर्तेः ॥ तेजःपशूनामित्यग्निमूर्त्यधिपतेःपशुपतेः॥ अग्नआयाहीतिलोकपालस्याग्नेः ॥ प्रतिमंत्रंअष्टाहुतयःअष्टाविंशतिर्वा ॥ विष्णुःस्थाप्यश्चेत्तदाइदंविष्णुरितिहोमः १०८ नारा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यणश्चेत्तदाविष्णोर्नुकमितिहोमः ॥ ह्रीश्चतेलक्ष्मीश्चेतिपिंडिकामंत्रः २८ हिरण्यवर्णामितिलक्ष्म्याः २८ तत्पुरुषायविद्महेसुव
र्णपक्षायेतिगरुडस्य ॥ समस्तव्याहृतीः १०८ ततःएकादशप्रधानाहुतिमंत्राः ॥ पूर्वद्वारेजपः ॥ श्रीसूक्तं पवमानं सोमोधेनुं
षट्ऋचः कनिक्रददितिसूक्तं शंनइंद्राग्नीसूक्तं रक्षोहणंसूक्तं रात्रीसूक्तं इमारुद्रायेतिसूक्तं पुरुषसूक्तंच ॥ ॥ दक्षिणकुंडेहो
ममंत्राः ॥ यजमानेनद्रव्यत्यागेकृतेहोमंकुर्यात् ॥ प्रतिद्रव्यंदेवंस्पृशेत् ॥ आज्यशेषंकिंचिदुत्तरकलशेनिनयेत् ॥ ततोहोम
मंत्राः ॥ असिहिवीइतियजमानमूर्तेः ॥ त्वमिंद्रसजोषसइतियजमानमूर्त्यधिपतेरुद्रस्य ॥ यमायसोममितिलोकपालस्ययमस्य ॥
उदुत्यमितिसूर्यमूर्तेः ॥ आवोराजानमितिसूर्यमूर्त्यधिपतेरुद्रस्य ॥ असुन्वंतमितिलोकपालस्यनिर्ऋतेः ॥ स्थाप्यदेवस्येदंविष्णु
रिति १०८ ह्रीश्चतेइतिपिंडिकामंत्रः २८ ॥ हिरण्यवर्णामितिलक्ष्म्याः २८ ॥ तत्पुरुषायेतिगरुडस्य २८ ॥ व्याहृतिभिःप्र
जापतेः १०८ इति ॥ दक्षिणद्वारेजपः ॥ पुरुषसूक्तं आशुःशिशानसूक्तं इमारुद्रायस्थिरेति ४ ऋचः सोमोधेनुमिति ६ ऋचः
कौष्मांड्यः ॥ ॥ अथपश्चिमकुंडेहोममंत्राः ॥ आपोहिष्ठेतिजलमूर्तेः ॥ नमोभवायचरुद्रायचस्वाहाइतिजलमूर्त्यधिपतेर्भ
वस्य ॥ इममेवरुणइतिलोकपालस्य ॥ वातआवातुइतिवायुमूर्तेः ॥ तमीशानमितिवायुमूर्त्यधिपतेरीशानस्य ॥ आनोनियुद्भि
रितिलोकपालस्यवायोः ॥ स्थाप्यदेवस्येदंविष्णुरिति १०८ ह्रीश्चतेइतिपिंडिकामंत्रः २८ ॥ हिरण्यवर्णामितिलक्ष्म्याः २८॥
तत्पुरुषायेतिगरुडस्य २८ ॥ व्याहृतिभिःप्रजापतेः १०८ ॥ इतिपश्चिमकुंडेहोमः ॥ पश्चिमद्वारेजपः ॥ रुद्रसामनतमंहोष्टौ
पुरुषसूक्तं कद्रुद्रायेतिरुद्रसूक्तं रक्षोहणंसूक्तं ॥ ॥ अथोत्तरकुंडेहोममंत्राः ॥ वयंसोमव्रतेइतिसोममूर्तेः ॥ तत्पुरुषायविद्महे
इतिरुद्रगायत्र्यासोममूर्त्यधिपतेर्महादेवस्य अभित्यंदेवमितिकुबेरस्य ॥ आदित्प्रत्नस्येत्याकाशमूर्तेः ॥ मृगोनभीमइत्याकाश

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मूर्त्यधिपतेभींमस्य ॥ अभित्वादेवसवितरितिलोकपालस्य ॥ इदंविष्णुरितिविष्णोः १०८ ॥ ह्रीश्चतेइतिपिंडिकायाः २८ ॥ हिरण्यवर्णामितिलक्ष्म्याः २८ ॥ तत्पुरुषायेतिगरुडस्य २८ ॥ व्याहृतिभिःप्रजापतेः १०८ ॥ उत्तरद्वारस्थौ नारायणाथर्वशीर्षं शिवाथर्वशीर्षं नीलरुद्रं मधुवाता ३ ऋचः शंनइंद्राग्नीइतिसूक्तंच ॥ ॥ छ ॥ ॥ छ ॥

॥ २७५ ॥ सप्रासाददेवस्थिरप्रतिष्ठाप्रयोगः ॥

श्रीः ॥ अथप्रतिष्ठेंदौबौधायनत्रिविक्रमानुसारेणनिर्णयासिंधूक्तःसप्रासादसर्वदेवस्थिरप्रतिष्ठाप्रयोगोलिख्यते ॥ कर्ताशुभेह्निषोडशहस्तंद्वादशहस्तंवामंडपंकृत्वामध्येवेदिंमंडपनवांशविस्तृतांहस्तोच्चांतत्पूर्वतोहस्तमात्रांत्रिवप्रांग्रहवेदिंनैर्ऋत्येवास्तुवेदिंहस्तमात्रांआग्नेयेहस्तमात्रंकुंडंस्थंडिलंवाविरच्यमध्यवेद्यांसर्वतोभद्रंचकृत्वा तदुपरिवितानकदलीस्तंभादिनाभूषयित्वाप्रतिष्ठादिनात्पूर्वदिनेसद्योवासंकल्पंकुर्यात् ॥ तत्रयजमानःकूष्मांडहोमादिनाऽत्मतनुंपावयित्वासभार्यःस्वासनेउपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वा अस्मिन्लिंगेमूर्तौवादेवकलासान्निध्यार्थंदीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽहंवास्तुग्रहसहितांप्रासादपिंडिकापरिवारयुतांशिवप्रतिष्ठांविष्णुप्रतिष्ठांवाकरिष्ये ॥ तदंगतयाविहितंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंआचार्यादिवरणंचकरिष्ये आदौनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनंचकरिष्येइतिसंकल्प्यआचार्यवरणांतंकृत्वावृतानृत्विजोमधुपर्केणार्हयित्वावस्त्रालंकारादिभिःसंपूज्य यजमानःसर्त्विक्पूर्णकुंभदध्यक्षतफलपुष्पसुवासिनीभिःसहितोमंगलघोषेणशाकुनसूक्तंपठन्मंडपप्रादक्षिण्येनगत्वापश्चिमद्वारेणमंडपंप्रविश्यवेद्यानैर्ऋतेउपविशेत् ॥ अथाचार्योवेद्याःपश्चिमतउपविश्यदेशकालौस्मृत्वाअमुकदेवप्रतिष्ठाकर्मणियजमानेनवृतोहंविहितकर्मकरिष्ये ॥ शरीरशुद्ध्यादिकर्माधिकारार्थंआसनादिन्यासान्पवनपावनंचकरि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्ये इतिसंकल्प्य यदत्रेतिसर्षपान्विकीर्य ॥ शुचींवोहव्या०॥ अग्निशुचि०॥ उदग्नेशुचयः० ॥ इतिपंचगव्येनआपोहिष्ठेतिकुशोद
केनचभूमिंप्रोक्ष्य भद्रंकर्णे० स्वस्तिनइंद्रो० देवाआयांतु यातुधानाअपयांतु विष्णोदेवयजनंरक्षस्वेतिभूमौप्रादेशंकुर्यात् ॥
देशकालौस्मृत्वाअमुकप्रतिष्ठांगत्वेनमंडपप्रतिष्ठांकरिष्ये ॥ मंडपसंभवेतत्पूजादिकंप्रागुक्तवत्निर्वर्त्यप्राग्द्वारेणमंडपंप्रविश्य
वेद्युत्तरतोजलाधिवासंकुर्यात् ॥ इति ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २७६ ॥ अभ्युत्तारणम् ॥

श्रीः ॥ देशकालौस्मृत्वाअस्याःप्रतिमायाःअंगप्रत्यंगसंधिसमुत्पन्नवास्याग्निकुद्दालाग्निटंकाद्यातपनिरासार्थं अभ्युत्तारणंकरिष्य
इतिसंकल्प्य अश्मन्नूर्जमित्यनुवाकमष्टशतवारमष्टाविंशतिवारंवापठित्वासंततजलधारांकुर्यात् ॥ यथा ॥ ॐ अश्मन्नूर्जपर्वतेशि
श्रियाणांवातेपर्जन्येवरुणस्यशुष्मे ॥ अद्भ्यओषधीभ्योवनस्पतिभ्योधिसंभृतांतांनइषमूर्जंधत्तमरुतःसꣳराणाः ॥ अश्मꣳस्तेक्षुद्र
मुंतेशुगृच्छतुयंद्विष्मः ॥ समुद्रस्यत्वावाक्याग्नेपरिव्ययामसि ॥ पावकोअस्मभ्यꣳशिवोभव ॥ हिमस्यत्वाजरायुणाग्नेपरिव्यया
मसि ॥ पावकोअ० ॥ उप ॥ १ ॥ ज्मनुपवेतसेवत्तरंनदीष्वा ॥ अग्नेपित्तमपामसि ॥ मंडूकिताभिरागहिसेमन्नोयज्ञं ॥ पाव
कवर्णꣳशिवंकृधि ॥ पावकआचितयंत्याकृपा ॥ क्षामन्रुरुचउषसोनभानुना ॥ तूर्वनयामन्नेतशस्यनूरणआयोघृणे ॥ नतंतृ
षाणोअजरः ॥ अग्नेपावकरोचिषामंद्रयादेवजिह्वया ॥ आदेवान् ॥ २ ॥ वक्षियक्षिच ॥ सनःपावकदीदिवोग्नेदेवाꣳइहावह ॥
उपयज्ञꣳहविश्चनः ॥ अपामिदंन्ययनꣳसमुद्रस्यनिवेशनं ॥ अन्यंतेअस्मत्तपंतुहेतयःपावकोअस्मभ्यꣳशिवोभव ॥ नमस्तेहरसे
शोचिषेनमस्तेअस्त्वर्चिषे ॥ अन्यंतेअस्मत्तपंतुहेतयःपावकोअस्मभ्यꣳशिवोभव ॥ नृषदेवट् ॥ ३ ॥ अप्सुषदेवड्वनसंदेवड्वर्हिष

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

देवद्सुवर्विदेवट् ॥ येदेवादेवानांयज्ञियायज्ञियानाꣳसंवत्सरीणमुपभागमासते ॥ अहुतादोहविषोयज्ञेअस्मिन्त्स्वयंजुहुध्वंमधु नोघृतस्य ॥ येदेवादेवेष्वधिदेवत्वमायन्येब्रह्मणःपुरएतारोअस्य ॥ येभ्योनर्तेपवतेधामकिंचननतेदिवोनपृथिव्याअधिस्नुषु ॥ प्राणदाः ॥ ४ ॥ अपानदाव्यानदाश्चक्षुर्दावर्चोदावरिवोदाः ॥ अन्यंतेअस्मत्तपंतु० ॥ अग्निस्तिग्मेनशोचिषायꣳसद्विश्वंन्यत्रिणं ॥ अग्निर्नोवꣳसतेरायिं ॥ सैनानीकेनसुविदत्रोअस्मेयष्टादेवाꣳआयजिष्ठस्वस्ति ॥ अदब्धोगोपाउतनःपरस्माअग्नेर्घुमदुतरेवदिंदीहि ॥ ५ ॥ उपदेवान्वट्प्राणदाश्चतुश्चत्वारिꣳशच्च ॥ १ ॥ एतदंतेजलेधिवासयेत् ॥ छ ॥ ॥ छ ॥

॥ २७७ ॥ जलाधिवासः ॥

श्रीः ॥ हिरण्योपधानंदेवंपंचगव्यहिरण्ययवदूर्वाश्वत्थपलाशपर्णान्युदकुंभेप्रक्षिप्यताभिरद्भिरापोहिष्ठेतितिसृभिःहिरण्यवर्णाः शुचयइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेनचाभिषिच्य व्याहृतिभिरिदंविष्णुरितिचपुष्पफलयवदूर्वाःसमर्प्य नमस्तेरुद्र मन्यवेइतिरुद्रेसमर्प्य रक्षोहणमित्यनेनदेवहस्तेकंकणंबद्धावाससाच्छाद्य अवतेहेळोउदुत्तममितिजलेधिवासयेदितिबौधायनः॥

---

१ अत्रविशेषः॥ साचार्योयजमानोवेदनिनादतूर्यछत्रचामरादिरथादियानसहितःशिल्पशालांगत्वातत्रप्रतिमांवस्त्रचंदनपुष्पादिनासंपूज्यशिल्पिनः प्रतिमानिर्मायकान्वस्त्रगंधादिनासंतोष्यकुद्दालादिशिल्पिशस्त्राणिचहरिद्रादिनाभूषयित्वाविश्वकर्मणेनमइतिनत्वायानेप्रतिमामारोप्यशाकुंतसूक्तंपठेत् । अथसाचार्योयजमानःदेवस्यसंमुखंस्थित्वादेशकालौसंकीर्त्यअस्यांमूर्तौजलाधिवासाख्यंकर्मकरिष्येइतिसंकल्प्यपुण्याहंवाचयित्वा ॥ यदत्रसंस्थितं० अर्चाकर्मसमारभे ॥ इतिमंत्राभ्यांसर्षपान्विकीर्य ॥ शुचीवोहव्येतिजलाधिवासमंडपंपंचगव्येनप्रोक्ष्य ॥ आपोहिष्ठेतिशुद्धोदकेनचप्रोक्ष्य अभ्युत्तारणंकुर्यात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ततोगोदोहनमात्रंस्थित्वादेवंनत्वा ॥ स्वागतंदेवदेवेशविश्वरूपनमोस्तुते ॥ शुद्धेपित्वदधिष्ठानेशुद्धिंकुर्मःसहस्वतां ॥ इतिसं
प्रार्थ्य उत्तिष्ठब्रह्मणस्पतइतिसर्त्विगुत्थाप्यअग्युत्तारणंकुर्यात् ॥ ततोर्चांमृदाद्वादशवारंजलेनचप्रक्षाल्यमंत्रवत्पंचगव्यंकृत्वा
ॐ पयःपृथिव्यांपयओषधीषुपयोदिव्यैतरिक्षेपयोधां ॥ पयस्वतीःप्रदिशःसंतुमह्यं ॥ आवोराजानमितिचसंस्नाप्य आप्यायस्व०
दधिक्राव्णो० तेजोसि० मधुवाता० आयंगौः० इतिपंचामृतैःसंस्नाप्य ॥ लिंगंचेत् नमस्तेरुद्र० इत्यष्टाभिःसंस्नाप्यघृतेना
भ्यज्योद्वर्तनेनोद्वर्त्य उष्णोदकेनप्रक्षाल्य गंधंदत्वासपल्लवैश्चतुर्भिःकुंभैरापोहिष्ठेतितिसृभिराकलशेष्वितिचप्रत्येकंसमुद्रज्येष्ठा
इतिचतुर्भिराकलशेष्वितिचमिलितैःसंस्नाप्य औदुंबरपीठेर्चामुपवेश्यपरितोष्टदिक्षुसजलकुंभान्संस्थाप्यतेषुगंधपुष्पदूर्वाःप्रक्षि
प्य ॥ आद्येसप्तमृदःद्वितीयेपुष्करपर्णशमीविकंकताश्मंतकत्वचःपल्लवांश्च तृतीयादिषुसप्तधान्यानि पंचरत्नानिफलपुष्पाणि
कुशदूर्वागोरोचनाः संपातोदकं सर्वौषधीश्च क्षिप्त्वा क्रमेण आपोहिष्ठा० ३ हिरण्यवर्णाः० ४ पवमानःसुवर्जनइत्यनुवाकेनचा
भिषिच्यएककुंभेशमीपलाशवटखदिरबिल्वाश्वत्थविकंकतपनसाम्रशिरीषोदुंबराणांपल्लवान्कषायांश्चक्षिप्त्वाअश्वत्थेवइत्यभिषि
च्यपंचरत्नोदकेनहिरण्यवर्णाःशुचयः ४ इतिसंस्नाप्यआचमनंदत्वावस्त्रोपवीतादिदीपपर्यंतपूजांते यवपिष्टदीपानष्टौदद्यात् ॥
मंत्राः ॐ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ १ ॥
ॐ यःप्राणतोनिमिषतोमहित्वैकइद्राजाजगतोबभूव ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ २ ॥ ॐ ब्रह्मज
ज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ३ ॥ ॐ महीद्यौःपृथिवी
चनइमंयज्ञंमिमिक्षतां ॥ पिपृतांनोभरीमभिः ॥ ४ ॥ ॐ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुतांवेष्टितंजगत् ॥ सदुंदुभेसजू

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रिंद्रेणदेवैर्दूराद्वीयोअपसेधशत्रून् ॥ ५ ॥ ॐ अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराण मेनोभूयिष्ठांतेनमउक्तिंविधेम ॥ ६ ॥ ॐ यातेअग्नेयज्ञियांतनूस्त्येह्यारोहात्मात्मानं ॥ अच्छावसूनिकृण्वन्नस्मेनर्यापुरूणि ॥ यज्ञोभूत्वायज्ञमासीदस्वायोनिं ॥ जातवेदोभुवआजायमानःसक्षयएहि ॥ ७ ॥ इमंयमप्रस्तरमाहिसीदांगिरोभिःपितृभिःसं विदानः ॥ आत्वामंत्राःकविशस्तावहंत्वेनाराजन्हविषामादयस्व ॥ ८ ॥ इति ॥ ततःसुवर्णशलाकयातैजसपात्रस्थंमधुघृतं चगृहीत्वा चित्रंदेवानामुदगादनीकं० तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवानामनाधृष्टंदेवयजनमसि इतिमंत्राभ्यां ॐ नमोभगवतेतुभ्यंशिवायहरयेनमः ॥ हिरण्यरेतसेविष्णोविश्वरूपायतेनमः ॥ इतिप्रत्येकमावृत्त्यादक्षिणसव्यनेत्रेलिखेत् ॥ अंजंतित्वा० इतिमध्वक्तांजनेननेत्रेअंक्त्वादेवस्यत्वासवितुःप्रसवे० इंद्रस्येंद्रियेणानज्मीतिमध्वाज्यशर्कराभिरंक्त्वा तेनैवांज नेनपुनरंजयेत्हस्ताभ्यांअनज्मीति ॥ लिंगेतु स्वर्णसूच्या गंधेन ॐ नमोभगवतेरुद्रायहिरण्यरेतसेपरायपरमात्मनेविश्वरूपा योमाप्रियायनमः इत्यंक्त्वा अंजनादिनादेवस्यत्वेत्यंजयेत् ॥ (नेदंबाणसरिद्धवलोहजलिंगेषु) ॥ ततआदर्शभक्ष्यादिदर्श येत् ॥ ततःकर्ताचार्यायगामृत्विग्भ्यश्चदक्षिणांदद्यात् ॥ अथाचार्यःप्रत्यृचमादौप्रणवंवदन्पुरुषसूक्तेनदेवंस्तुत्वा वंशपात्रेपंच वर्णौदनेनदेवस्यनीराजनंकृत्वाचतुष्पथे ॐ नमोरुद्रायसर्वभूताधिपतयेदीप्तशूलधरायोमादयितायविश्वाधिपतयेरुद्रायवैनमो नमः शिवमगर्हितंकर्मास्तुस्वाहेति ॥ अश्वत्थपर्णेभूतेभ्योनमइतिबलिंक्षिपेत् ॥ ततोवेद्यांसर्वतोभद्रेदेवानावाहयेत् ॥ यथा मध्येब्रह्मणेनमःब्रह्माणमावाहयामिएवंसर्वत्र १ पूर्वादिदिक्षु इंद्रायनमः २ अग्नये ३ यमाय ४ निर्ऋतये ५ वरुणाय ६ वायवे ७ सोमाय ८ ईशानाय ९ ईशानेंद्राद्यंतरालेष्वष्टवसुभ्यो १० रुद्रेभ्यो ११ आदित्येभ्यो १२ अश्विभ्यां १३ विश्वे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भ्योदेवेभ्यो १४ पितृभ्यो १५ नागेभ्यो १६ स्कंदवृषाभ्यां १७ ॥ ब्रह्मेशानाद्यंतरालेष्वष्टसु दक्षाय १८ विष्णवे १९ दुर्गायै २० स्वधायै २१ मृत्युरोगेभ्यो २२ समुद्रेभ्यो २३ सरिद्भ्यो २४ गणपतये २५ मध्ये ब्रह्माधःपृथिव्यै २६ मेरवे २७ तत्रैवस्थाप्यदेवप्रतिमामावाह्य प्रागादिषु वज्राय २८ शक्तये २९ दंडाय ३० खड्गाय ३१ पाशाय ३२ अंकुशाय ३३ गदायै ३४ शूलाय ३५ तद्बाह्ये गौतमं ३६ भरद्वाजं ३७ विश्वामित्रं ३८ कश्यपं ३९ जमदग्निं ४० वसिष्ठं ४१ अत्रिं ४२ अरुं धतीं ४३ तद्बाह्ये सूर्यं ४४ सोमं ४५ भौमं ४६ बुधं ४७ गुरुं ४८ शुक्रं ४९ शनिं ५० राहुकेतू ५१ तद्बाह्ये ऐंद्रीं ५२ कौमारीं ५३ ब्राह्मीं ५४ वाराहीं ५५ चामुंडां ५६ वैष्णवीं ५७ माहेश्वरीं ५८ वैनायकीं ५९ इतिदेवतानाम्नावाह्यसंपूज्य मंडलमध्येअर्चासुप्रतिष्ठोभवेतिनिवेश्यसंपूज्य वेद्युपरिपुरोभागेवेद्याउत्तरतोवायथासोपस्करांशय्यामुपकल्प्यतस्यांदेवमारोप्य पुरुषसूक्तोत्तरनारायणाभ्यांस्तुत्वादेवेतत्त्वन्यासंकुर्यात् ॥ सयथा– पुरुषात्मनेनमः प्राणात्मने प्रकृतितत्त्वाय बुद्धितत्त्वाय अहंकारतत्त्वाय मनस्तत्त्वाय इतिसर्वांगेषु प्रकृतितत्त्वायबुद्धितत्त्वायहृदि शब्दतत्त्वायशिरसि स्पर्शतत्त्वायत्वचि रूपत त्त्वायहृदि रसतत्त्वायमुखे गंधतत्त्वायनासायां श्रोत्रतत्त्वायश्रोत्रयोः त्वक्तत्त्वायत्वचि चक्षुस्तत्त्वायचक्षुषोः जिह्वातत्त्वाय जिह्वायां घ्राणतत्त्वायघ्राणे वाक्तत्त्वायवाचि पाणितत्त्वायहस्तयोः पादतत्त्वायपादयोः पायुतत्त्वायपायौ उपस्थतत्त्वाय उपस्थे पृथ्वीतत्त्वायपादादिजानुपर्यंतं अप्तत्त्वायजान्वादिनाभिप० तेजस्तत्त्वायनाभ्यादिहृदयांतं वायुतत्त्वायहृदयादि भ्रूमध्यांतं आकाशतत्त्वायभ्रूमध्यादिशिरोंतं सत्त्वतत्त्वाय० रजस्तत्त्वाय० तमस्तत्त्वाय० सर्वांगे ॥ ततःपुरुषसूक्तेनषोडशां गन्यासः ॥ ततःसुखशायीभवेतिशय्यायांदेवंस्वापयित्वावस्त्रद्वयेनाच्छाद्यदेवस्यशिरोभागेकलशंसंस्थाप्यतत्रनिद्रामावाहयेत्॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वासुदेवंनमस्कृत्यनिद्रामावाहयाम्यहं ॥ मोहिनींसर्वभूतानांमनोविभ्रमकारिणीं ॥ एहिसावित्रिमूर्तिंस्त्वंचक्षुर्भ्यांज्ञानगोचरे॥ विशनासापुटेदेविकंठेचोत्कंठिताभवेति ॥ ततस्तांसंपूज्यमंडलशय्ययोरंतरानगंतव्यमितिप्रैषंदत्वामंडलदेवताभ्योनाम्नापायसे नबलिदानं ॥ ततःकुंडसंस्कारादिकुर्यात् ॥ प्रसंगान्मध्येप्रासादवास्त्वाद्यावाहनक्रमोलिख्यते ॥ ॥ छ ॥ ॥ छ ॥

॥ २७८ ॥ प्रासादादिवास्तुप्रकारः ॥

श्रीः ॥ देशकालौसंकीर्त्यसप्रासादामुकप्रतिष्ठांगत्वेनवास्तुदेवतापूजांकरिष्ये॥ तत्रादौवास्तुवेद्याईशानादिचतुष्कोणेषु ॥ विशं तुभूतलेनागालोकपालाश्चसर्वशः॥ प्रासादेस्मिन्वितिष्ठंतुआयुर्बलकराःसदा ॥ इतिमंत्रावृत्त्याचतुरःशंकून्रोपयेत् ॥ तेनैवक्र मेण ॥ अग्निभ्योप्यथसर्पेभ्योयेचान्येतत्समाश्रिताः ॥ तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमं ॥ इतिमंत्रावृत्त्याशंकुपार्श्वेमाष भक्तबलीन्दद्यात् ॥ ततोवेद्युपरिकुंकुमादिनासुवर्णादिशलाकया लक्ष्मीः यशोवती कांता सुप्रिया विमला शिवा सुभगा सुमतिः इला ९ इतिनवरेखाःप्रागायताउदक्संस्थाःकृत्वा धन्या प्राणा विशाला स्थिरा भद्रा जया निशा विरजा विभवा ९ इतिना मभिरुदगायताःप्राक्संस्थानवरेखाःकृत्वामध्यपदचतुष्टयमेकीकृत्यकोणेषुरेखादत्वातत्रदेवताआवाहयेत् ॥ यथा ॥ ईशानपद दक्षिणार्धेशिरसिशिखिनं १ तद्दक्षिणसार्धपदेपर्जन्यं २ तद्दक्षिणपदद्वयेजयंतं ३ तद्दक्षिणपदद्वयेकुलिशायुधं ४ तद्दक्षिणप दद्वयेसूर्यं ५ तद्दक्षिणपदद्वयेसत्यं ६ तद्दक्षिणसार्धपदेभृशं ७ तद्दक्षिणार्धपदेआकाशं ८ तत्पश्चिमार्धेवायुं ९ तत्पश्चिमसार्ध पदेपूषणं १० तत्पश्चिमपदद्वयेवितथं ११ तत्पश्चिमपदद्वयेगृहक्षतं १२ तत्पश्चिमपदद्वयेयमं १३ तत्पश्चिमपदद्वयेगंधर्वं १४

१ अत्रकेचनब्रह्मादिस्थापनक्रममिच्छंति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्पश्चिमसार्धपदेभृंगराजं १५ तत्पश्चिमार्धपदेमृगं १६ तदुत्तरार्धेपितॄन् १७ तदुत्तरसार्धपदेदौवारिकं १८ तदुत्तरपदद्वये
सुग्रीवं १९ तदुत्तरपदद्वयेपुष्पदंतं २० तदुत्तरपदद्वयेवरुणं २१ तदुत्तरपदद्वयेअसुरं २२ तदुत्तरसार्धपदेशोषं २३ तदुत्त
रार्धपदेपापं २४ तत्प्रागर्धेरोगं २५ तत्प्राक्सार्धपदेअहिं २६ तत्प्राक्पदद्वयेमुख्यं २७ तत्प्राक्पदद्वयेभल्लाटं २८ तत्प्राक्पद
द्वयेसोमं २९ तत्प्राक्पदद्वयेसर्पं ३० तत्प्राक्सार्धपदेअदितिं ३१ तत्प्रागर्धपदेदितिं ३२ मध्यपदेषुईशानपदोत्तरार्धेआपं ३३
आग्नेयपदोत्तरार्धेसावित्रं ३४ नैर्ऋतपदोत्तरार्धेजयं ३५ वायव्यपदोत्तरार्धेरुद्रं ३६ मध्येप्राक्पदद्वयेअर्यमणं ३७ आग्नेयप
ददक्षिणार्धेसवितारं ३८ तत्पश्चिमपदद्वयेविवस्वंतं ३९ नैर्ऋतपदपूर्वार्धेविबुधाधिपं ४० तदुत्तरपदद्वयेमित्रं ४१ वायव्यप
दपश्चिमार्धेराजयक्ष्माणं ४२ तत्प्राक्पदद्वयेपृथ्वीधरं ४३ ईशानपददक्षिणार्धेआपवत्सं ४४ मध्यपदचतुष्केहृदयेब्रह्माणं ४५
ततउत्तरेवास्तोष्पतइतिवृषवास्तुप्रतिमां ४६ ऐशान्यादिविदिक्षुचरकीं ४७ विदारीं ४८ पूतनां ४९ पापराक्षसीं ५० प्रागादि
दिक्षुस्कंदं ५१ अर्यमणं ५२ जृंभकं ५३ पिलिपिच्छं ५४ एवंक्रमेणवास्तुदेवताआवाह्यषोडशोपचारैःसंपूज्यमंडलादीशान्या
मुत्तरतोवामहीद्यौरित्यादिकलशंसंस्थाप्य तत्रवरुणंसंपूज्यावाहितदेवताभ्योनान्नापायसबलीन्दद्यात् ॥ (मंडपजलाशयांगवा
स्तावप्येवमेव ॥) अत्रब्रह्मादिःशिख्यादिर्वाक्रमः ॥ शक्तौहोमस्तत्रप्रत्येकंसमित्तिल(यव)पायसाज्यानि, समिदाज्यचरवः, समि
दाज्ये, यवाः, केवलंतिलावा ॥ प्रत्येकं १०।८।१ वाआहुतयः ॥ शारदातिलकेपायसाज्यैर्बलिंहरेदित्येवोक्तत्वात्केवलंपूजनपूर्वकं
बलिदानमेवकार्यंनहोमस्यावश्यकंतेतिवास्तुविषयेबहवोविकल्पाःसंति ॥ पक्षेहोमाभावोपिक्वचिदुक्तस्तत्रसदसत्सद्भिरूहनीयं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २७९ ॥ कुंडसंस्कारादि ॥

श्रीः ॥ ततःकुंडांतिकमेत्यदेशाद्युच्चार्यअमुकप्रतिष्ठांगत्वेनहवनंकर्तुंकुंडोपलेपनाद्यग्निप्रतिष्ठांकरिष्ये ॥ तद्होमयेनोपलिप्योल्लिख्य उपरिमेखलायांइदंविष्णुरितिविष्णुं मध्यमेखलायांब्रह्मजज्ञानमितिब्रह्माणं अधोमेखलायांमृडानोरुद्रइतिरुद्रं योन्यांगौरीमिमायेतिगौरींआवाह्यसंपूज्यस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्य नैर्ऋत्यवेद्यांवास्तुपूजामुपरिनिर्दिष्टवत्कुर्यात् ॥ ततोग्रहवेद्यामुक्तविधिनाग्रहान्संस्थाप्यसंपूज्य तदीशान्यांकुंभेवरुणंसंपूज्यअग्निसमीपमेत्यान्वाधानंकुर्यात् ॥ वास्तुदेवतान्वाधानं शिखिनं पर्जन्यं जयंतं कुलिशायुधं सूर्यं सत्यं भृशं आकाशं वायुं पूषणं वितथं गृहक्षतं यमं गंधर्वं भृंगराजं मृगं पितृन् दौवारिकं सुग्रीवं पुष्पदंतं वरुणं असुरं शोषं पापं रोगं अहिं मुख्यं भल्लाटं सोमं सर्पं अदितिं दितिं अपः सावित्रं जयं रुद्रं (अपउपस्पृश्य) अर्यमणं सवितारं विवस्वंतं विबुधाधिपं मित्रं राजयक्ष्माणं पृथ्वीधरं आपवत्सं ब्रह्माणं एताःपंचचत्वारिंशद्देवताःऔदुंबरसमित्तिलपायसाज्यद्रव्यैःप्रत्येकंप्रतिद्रव्यंअष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्याकाभिराहुतिभिः ॥ वास्तोष्पतइतिचतसृभिर्ऋग्भिःपूर्वोक्तद्रव्यैःप्रत्यृचंपूर्वोक्तसंख्याहुतिभिः ॥ (अथवा वास्तोष्पतइतिचत्वारोमंत्राःएकैकेनमंत्रेणसप्तविंशतिःसप्तविंशतिर्वाहुतयइत्यष्टोत्तरशतमितिदानमयूखे ॥ तत्पक्षेप्रत्यृचमितिनोल्लेखः ॥) वास्तोष्पतिंवास्तोष्पतइतिचतसृभिःवास्तोष्पतेध्रुवास्थूणामितिचपंचम्यापंचवाबिल्वफलैस्तद्बीजै (स्तत्पत्रै) र्वायक्ष्ये ॥ चरकीं विदारीं पूतनां पापराक्षसीं स्कंदं अर्यमणं जृंभकं पिलिपिच्छं इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं सोमं ईशानं एतादेवताःपूर्वोक्तद्रव्यैःप्रत्येकंअष्टचतुरन्यतमसंख्याहुतिभिः ग्रहहोमे सूर्यादिनवदेवताःअर्कादिसमिच्चर्वाज्यद्रव्यैःप्रतिदैवतंप्रतिद्रव्यं २८ वा ८ ॥ अधिदेवताःप्रत्यधिदेवताश्च ८।४

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भिर्वा विनायकादीनिंद्रादींश्चप्रत्येकंप्रतिद्रव्यं ४।२ संख्याकाभिःपूर्वोक्तद्रव्यत्रयाहुतिभिः ॥ प्रधानहोमे लोकपालमूर्तिमूर्ति
पतीन् पलाशोदुंबराश्वत्थशम्यपामार्गसमिदाज्यतिलद्रव्यैःप्रत्येकंप्रतिद्रव्यं २८ वा ८ संख्याहुतिभिः स्थाप्यदेवंपूर्वोक्तद्रव्यैः
प्रतिद्रव्यं १००८।१०८।२८ वासंख्यया ॥ अग्निर्यजुर्भिरित्यनुवाकेनविश्वान्देवान्तिलाज्याभ्यांदशदशाहुतिभिः ॥ पिंडि
कांतैरेवद्रव्यैःअष्टसंख्याहुतिभिःपरिवारदेवताःप्रत्येकं ८ एवंपंचपर्यायैःपर्यायत्रयेणवायक्ष्ये ॥ (विष्णुःस्थाप्यश्चेत्विष्णुंपुरु
षसूक्तेनचतुरावृत्तिभिःप्रत्यृचमाज्येन॥ रुद्रश्चेत्शिवंयातइषुरित्यनुवाकांतंद्रापेसहस्राणीत्यनुवाकाभ्यांप्रतिमंत्रमाज्येन॥ प्रासा
दाधिवासनहोमेपिंडिकावाहनादिपरिवारदेवताः प्रत्येकमष्टाविंशत्याहुतिभिस्तिलद्रव्येण ॥ स्थाप्यदेवं १०८ संख्ययामूलमंत्रे
णचर्वाहुतिभिः ॥ प्रासादोत्सर्गांगहोमेवास्तोष्पतइतिमंत्रेणअष्टोत्तरशतसंख्ययाघृतेन स्थाप्यदेवं अष्टोत्तरशतसंख्ययाज्येन
ब्रह्मादिमंडलदेवताःप्रत्येकंदशदशाहुतिभिःघृताक्ततिलद्रव्येण) अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानहोमांतेअग्नेरुत्तरतः
संपातकलशंसंस्थाप्यतस्मिन्नाज्यहोमेसंपातान्नयेत् ॥ अथयजमानेनद्रव्यत्यागेकृतेन्वाधानक्रमेणसर्त्विगाचार्योजुहुयात् ॥
वास्तुहोमंग्रहहोमंचकृत्वाप्रधानहोमंकुर्यात् तत्रमंत्राः ॥ इंद्रायेंदो० स्योनापृथिवि० अघोरेभ्यो० अग्नआयाहि० अग्निंदूतंवृ०
नमःशर्वायचपशुपतयेच० यमायसोमं० असिहिवी० स्तुहिश्रुतं० असुन्वंत० आसत्येन० योरुद्रोअग्नौ० इमंमेवरुण० शन्नो
देवी० नमोभवायचरुद्रायच० आनोनियुद्भिः० वातआवातु० तमीशानं० अप्यायस्व० वयंसोम० तत्पुरुषायविद्महे० अभि
त्वादेवस० आदित्यब्रह्म० नमउग्रायचभीमायच० २४ इतिलोकपालादिहोमः ॥ ततःपलाशसमिदादिसप्तद्रव्यैःस्थाप्यदेवमं
त्रेणउक्तसंख्ययाहोमः ॥ प्रतिद्रव्यहोमांतेदेवंपादनाभिशिरस्सुस्पृशेत् ॥ अग्निर्यजुर्भिरित्यनुवाकेनप्रतिद्रव्यं १० ॥ अग्निर्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जुर्भिः । सवितास्तोमैः । इंद्रउक्थामदैः । मित्रावरुणावाशिषा । अंगिरसोधिष्णियैरग्निभिः । मरुतःसदोहविर्धानाभ्यां । आपःप्रोक्षणीभिः । ओषधयोबर्हिषा । अदितिर्वेद्या । सोमोदीक्षया ॥ १ ॥ त्वष्टेध्मेन । विष्णुर्यज्ञेन । वसवआज्येन । आदित्यादक्षिणाभिः । विश्वेदेवाऊर्जा । पूषास्वगाकारेण । बृहस्पतिःपुरोधया । प्रजापतिरुद्गीथेन । अंतरिक्षंपवित्रेण । वायुः पात्रैः । अहश्श्रद्धयास्वाहा ॥ २ ॥ पिंडिकांह्रीश्चतेलक्ष्मीश्च० ॥ लिंगार्चायांगौरीमिमायेतिमंत्रेणतैरेवद्रव्यैः प्रतिद्रव्यं ८ ॥ ततःपरिवारस्थाप्यानांमंत्रैःप्रतिद्रव्यं ८ इतिप्रथमपर्यायंहुत्वादेवपादौस्पृशेत् ॥ एवंद्वितीयंपर्यायंहुत्वानाभिं ॥ तृतीयंमध्यं ॥ चतुर्थंउरः ॥ पंचमंहुत्वाशिरःस्पृष्ट्वा प्रतिपर्यायंसंपातजलेनदेवमभिषिंचेत् ॥ ततःस्थाप्येविष्णौपुरुषसूक्तेनप्रत्यृचमाज्यंहुत्वा इदंविष्णुरितिपादौस्पृशेत् पुनस्तथाहुत्वाविष्णोर्नुकमितिनाभिंस्पृशेत् पुनस्तथाहुत्वाअतोदेवेतिशिरः पुनस्तथाहुत्वापुरुषसूक्तेन सर्वांगंस्पृशेत् ॥ रुद्रेतु यातइषुः० अनुवाकांतं द्रापे० सहस्राणि० इत्यनुवाकाभ्यांप्रत्यृचमाज्यंहुत्वा सर्वोवैरुद्रइतिमंत्रेणमूलं स्पृशेत् ॥ पुनस्तथाहुत्वाकद्रुद्रायेतिमध्यंस्पृशेत् ॥ पुनस्तथाहुत्वानमोहिरण्यबाहवइत्यग्रंस्पृशेत् ॥ पुनस्तथाहुत्वारुद्रेणसर्वांगं स्पृशेत् ॥ ॥ अथप्रासादोत्सर्गाधिवासनांगहोमः ॥ पिंडिकापरिवारदेवमंत्रैःप्रत्येकं २८ तिलहोमः ॥ मूलेनचरुं १०८ हुत्वा ततोवास्तोष्पतइतिमंत्रेण १०८ आज्यंहुत्वा देवमंत्रेण १०८ आज्यंचहुत्वा ब्रह्मादिमंडलदेवताःप्रत्येकं १० तिलैर्हुत्वा मूर्धा नमितिपूर्णाहुतिंजुहुयात् ॥ ततःअंगहोमादिहोमशेषंसमाप्य पिंडिकांपरिवारदेवांश्चवेद्यांप्रतिमासमीपेवेदीसन्निधौवावस्त्राच्छा दितपीठेनिधाय मधुघृतेनाभ्यज्य शुद्धवारिणाप्रक्षाल्य पूर्वस्नानावशिष्टकलशवारिणातत्तन्मंत्रैःस्नापयित्वागंधादिभिरभ्यर्च्य वस्त्रेणाच्छाद्यन्यासान्कुर्यात् ॥ तत्रपिंडिकायांन्यासः ॥ घंनमःहृदये॥ पंनमःशिरसि ॥ भंनमःशिखायां ॥ फंनमःकवचा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यहुं ॥ लंनमःनेत्रत्रयायवौषट् ॥ क्षंनमःअस्त्रायफट् ॥ महीमूषुमंत्रेणावाह्यअदितिर्द्यौरितिस्तुत्वा ॐ ह्रींनमइतिमंत्रेणसंपूज्य
तेनैवपूर्णाहुतिंहुत्वा ॥ ॐ ह्रींश्रींह्रींक्षःपरब्रह्मणेसर्वाधारायनमः ॐ ह्रींश्रींह्रीं दिव्यतेजोधारिणिसुभगेनमइतिमंत्राभ्यां तथाप
रिवारत्वेनस्थाप्येतरदेवेषुचतत्तन्मंत्रेणषडंगन्यासादिकृत्वातत्तन्मंत्रेणसर्वाःपरिवारदेवताःपूजनपूर्वकंमुख्यदेवतावामपार्श्वेऽ
धिवासयेत् ॥ ॥ अथप्रासादाधिवासनं ॥ तत्रराक्षोघ्नपावमानसूक्ताभ्यांत्रिसूत्र्याप्रासादंवेष्टयपरितोजलदुग्धयोःपृथगविच्छिन्ने
धारेदत्वापूर्वस्थापितवास्तुप्रतिमांमृत्पेटिकायांनिधाय प्रासादाग्नेयकोणेवास्तुविध्युक्तप्रकारेणगर्तेनिवेशयेत् ॥ ततःप्रासादस्या
ग्रेएकाशीतिपदंमंडलंअक्षतैःकृत्वातेषुपदेषुसप्तधान्यपुंजान्कृत्वातत्रजलपूर्णानेकाशीतिकलशानाहृत्यनवनवकानिस्थापयित्वा
तेषुमध्यमपूर्वादिक्रमेण आजिघ्रकलशंमह्युरुधारापर्यस्वत्यात्वाविशंत्विंदवःसमुद्रमिवसिंधवः सामासहस्रआभजप्रजयापशुभिः
सहपुनर्मावविशताद्रयिः ॥ इतिमंत्रेणनवकुंभान्न्यसेत् ॥ तत्रमध्यनवकमध्यकुंभेशम्युदुंबराश्वत्थचंपकाशोकपलाशप्लक्षन्यग्रोध
कदंबाम्रबिल्वार्जुनपल्लवान् सोमायवनस्पत्यंतर्गतायनमइतिन्यसेत् १ पूर्वनवकमध्यकुंभेपद्मकरोचनदूर्वादर्भश्वेतपीतसर्षप
सितरक्तचंदनजातीपुष्पकुंदनंद्यावर्तदशकंक्षिपेत् २ आग्नेयनवकमध्यकुंभेयवव्रीहितिलस्वर्णरजतसमुद्रगानदीजलकूलमृदंत
रिक्षगोमयंक्षिपेत् ३ दक्षिणनवकमध्यकुंभेसहदेवीविष्णुक्रांताभृंगराजमहौषधीशमीशतावरीगुडूचीश्यामाकानष्टौक्षिपेत् ४
नैर्ऋत्यनवकमध्यकुंभेकदलनारिकेलबिल्वनारिंगमातुलिंगबदरामलकचूतफलाष्टकं ५ पश्चिमेमंत्रवत्पंचगव्यं ६ वायव्येशम्यु
दुंबराश्वत्थन्यग्रोधफलानांकषायं ७ उत्तरेशंखपुष्पीसहदेवीबलाशतावरीगुडूचीवचाव्याघ्रीमूलाष्टकं ८ ऐशानेसप्तमृदः ९
इतिक्षिप्त्वाश्रीसूक्तेनाभिमंत्र्यशेषेषुकुंभेषुगंधंक्षिप्त्वामूलेनाभिमंत्र्यांतर्बहिरधऊर्ध्वंचप्रासादंपंचगव्येनाभ्युक्ष्यमूर्धानंदिवइतिव

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ल्मीकमृदाविलिप्यवक्ष्यमाणमंत्रैःकुंभोदकैःप्रासादमभिषिंचेत् ॥ ॐ समुद्रज्येष्ठा० इत्यैशानमृत्कुंभेन १ ॥ ॐ यज्ञायज्ञावः समनातुतुर्वणिर्धियंधियंवोदेवयाउदधिध्वे ॥ आवोर्वाचःसुविताय्ररोदस्योर्महेमवृत्यामवसेसुवृक्तिभिः ॥ इतिवायव्यकषायकुंभेन २ ॥ पयःपृथिव्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधां ॥ पयस्वतीःप्रदिशःसंतुमह्यं ॥ इतिवारुणपंचगव्यकुंभेन ३ ॥ याःफलिनीर्या इतिनैर्ऋत्यफलकुंभेन ४ ॥ हंसःशुचिषदितिसौम्यमूलकुंभेन ५ ॥ विष्णोरराटमसिविष्णोःपृष्ठमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवमसिविष्णवेत्वा इतिपूर्वकुंभेन ६ ॥ सोमंराजानमवसेग्निंगीर्भिर्हवामहे ॥ आदित्यान्विष्णुंसूर्यं ब्रह्माणंचबृहस्पतिंइतिवह्निकुंभेन ७॥ विश्वतश्चक्षुरितियाम्यकुंभेन ८ ॥ नमोअस्तुसर्पेभ्योयेकेचइतिमध्यकुंभेन ९ ॥ इदमापःप्रवहतइत्यष्टाभिरवशिष्टैःपूर्वादिदिक्क्रमेणप्रासादशिखरंस्नापयेत् ॥ एकाशीतिकुंभासंभवेतुएककुंभेनगंधोदकपूरितेन ॐ दैव्यायकर्मणेशुंधध्वं इतिप्रासादंप्रोक्ष्यक्षालयित्वागंधादिभिरभ्यर्च्यतस्याधस्तादेवंसंचिंत्यतत्रयूपमूर्ध्वऊषुणइतिप्रक्षाल्यगंधादिभिरभ्यर्च्यतेनैवमंत्रेणाधिवासयेत् ॥ ॐ ह्रीं सर्वदेवमयाचिंत्यसर्वरत्नोज्वलाकृते॥ यावच्चंद्रश्चसूर्यश्चतावदत्रस्थिरोभव ॥ इतिमंत्रेणप्रासादमधिवासयेत् ॥ ततश्चतस्रोगाःदेवगायत्र्यादुग्ध्वातक्षीरेदेवगायत्र्याचरुंश्रपयित्वादेवायनिवेद्यद्वादशब्राह्मणान्भोजयित्वा अनेनकर्मणाविष्णुर्मेप्रीयतामितिवदेत् ॥ ततआचार्यायधेनुंदत्वारात्रौजागरणंकुर्यादितिप्रासादाधिवासनं ॥ ॥

॥ २८० ॥ देवस्थापनदिनकृत्यं ॥

श्रीः ॥ स्थापनदिवसेप्रातराचार्योयागमंडपमागत्यावाहितदेवताःसंपूज्याधिवासितांपिंडिकां त्रातारमिंद्रमितिमंत्रेणगृहीत्वाशांतिघोषेणप्रासादप्रादक्षिण्येनप्रासादमानीय शंतातीयेनविघ्नोद्धरणायपुष्पोदकधारयाप्रदक्षिणंप्रासादमभ्युक्ष्य महाऽइंद्रोवज्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाहुरितिमंत्रेणसमुल्लिख्यपुनरस्त्रपूतवारिणासर्वतःप्रोक्ष्यपिंडिकास्थापनदेशंनिश्चित्य द्वारदेशेदेवस्यदृष्टिपातंचनिर्णीयतत्रपंच
रत्नोपरिसौवर्णकूर्मंद्वारसंमुखंनिधायतदुपरिरत्नानिन्यस्य तदुपरिकूर्मशिलाब्रह्मशिलापिंडिकात्मिकांत्रिवप्रांसिंहासनापरपर्या
यांशिलांनिदध्यात् ॥ ततःशिलामध्यदेशंस्पृष्ट्वाप्रार्थयेत् ॥ त्वमेवपरमाशक्तिस्त्वमेवासनधारिका ॥ शिवाज्ञयात्वयादेविस्थातव्य
मिहसर्वदा ॥ ॐ तत्त्वाध्वनेनमः ॥ ॐ मंत्राध्वनेनमः ॥ ॐ कालाध्वनेनमः ॥ इतिपुष्पांजलित्रयंदत्वाध्रुवाद्यौरितिसूक्तेनपिंडि
काया ऊर्ध्वभागंस्पृष्ट्वास्वमंत्रंपिंडिकायांन्यस्य ॥ ॐ आत्मतत्त्वाय० ॥ ॐ आत्मतत्त्वाधिपतये० ॥ ॐ क्रियाशक्त्यै० ॥ ॐ शिव
तत्त्वाय० ॥ ॐ शिवतत्त्वाधिपतये० ॥ ॐ इच्छाशक्त्यै० ॥ ॐ विद्यातत्त्वाय० ॥ ॐ विद्यातत्त्वाधिपतयेआधारशक्त्यै० ॥
इतिविन्यस्य पिंडिकांप्रार्थयेत् ॥ सर्वदेवमयीशानित्रैलोक्याह्लादकारिणि ॥ त्वांप्रतिष्ठापयाम्यत्रमंदिरेशिवपूजिते ॥ यावच्चंद्र
श्चसूर्यश्चयावदेषावसुंधरा ॥ तावत्त्वंदेवदेवेशिमंदिरेस्मिंस्थिराभव ॥ पुत्रानायुष्मतोलक्ष्मीमचलामजरामृते ॥ अभयंसर्वभूते
भ्यःकर्तुनित्यंचदेहिमे ॥ विजयंभूपतेःसर्वलोकानांसुखमेवच ॥ सुभिक्षंक्षेममारोग्यंकुरुदेविनमोनमः ॥ ततःप्रणवंश्वभ्रेवि
न्यस्य ॥ तद्वाह्येस्वरान् ॥ तद्वाह्येकादिक्षांतानिव्यंजनानि ॥ तद्वाह्येइंद्रादिनामभिरष्टरत्नानिपूर्वादिक्रमेणवज्रमौक्तिकवैडूर्य
शंखस्फटिकपुष्परागेंद्रनीलमहानीलाइतिन्यस्यसप्तधान्यरूप्यवृषभमनःशिलाःक्षिपेत् ॥ विष्णुश्चेद्रूप्यवृषस्थानेरूप्यगरुडः ॥
ततःपायसेनसंलिप्यशुक्लवस्त्रेणाच्छाद्य ॐ नमःसुदर्शनायेतिरक्षांकृत्वागृहावैप्रतिष्ठेतिप्रासादमभिषिच्यदिक्पालेभ्योबलीन्द
त्वाआचम्यप्रासादंपंचगव्येनाभ्युक्ष्यकुशैःसंमार्जयेत् ॥ ततःसंपातोदकमापादंमूलेनाष्टवारमभिमंत्र्यतेनदेवस्यशिरोभिषिच्य
शंखतूर्यनिनादेन ॐ उत्तिष्ठब्रह्मणस्पतेइतिस्थाप्यदेवमुत्थाप्य प्रासादप्रादक्षिण्येनकनिक्रददितिसूक्तेनविष्णुं सद्योजातादिपं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चानुवाकैर्लिंगंगृहंप्रवेश्यपिंडिकासमीपेपीठेसंस्थाप्यपाद्यार्घ्यमधुपर्केणाभ्यर्च्य सुवर्णशलाकामंतरितांकृत्वासुलग्ने पुण्याहमस्तु ॐ प्रतितिष्ठपरमेश्वरइत्युक्त्वा अतोदेवाइतिविष्णुं रुद्रेणालिंगं एवमन्यान्देवांस्तत्तत्सूक्तेनचस्थापयेत् ॥ यजमानान्वितआचार्योदेवंप्रार्थयेत् ॥ लोकानुग्रहहेत्वर्थंस्थिरोभवसुखायनः ॥ सान्निध्यंहिसदादेवप्रत्यक्षंपरिकल्पय ॥ प्रधानपुरुषौयावद्यावच्चंद्रदिवाकरौ ॥ तावत्त्वमनयाशक्त्यायुक्तोत्रैवस्थिरोभव ॥ इतिप्रार्थ्यप्राणप्रतिष्ठांकुर्यात् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २८१ ॥ प्राणप्रतिष्ठा ॥

अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानिच्छंदांसि क्रियामयवपुःप्राणाख्यादेवता आंबीजं ह्रींशक्तिः क्रोंकीलकं प्राणप्रतिष्ठायांविनियोगः ॥ ब्रह्मविष्णुरुद्रऋषिभ्योनमःशिरसि ऋग्यजुःसामभ्यश्छंदोभ्योमुखे प्राणाख्यदेवतायैहृदिआंबीजायगुह्ये ह्रींशक्त्यैपादयोः ॥ क्रोंकीलकायसर्वांगे ॥ ॐअंकंखंगंघंङंपृथिव्यप्तेजोवाय्वाकाशात्मनेआंहृदयाय० ॥ ॐ इंचंछंजंझंञंशब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा ॥ ॐ उंटंठंडंढंणंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेऊंशिखायै० ॥ ॐ एंतंथंदंधंनंवाक्पाणिपादपायूपस्थात्मनेऐंकवचायहुं ॥ ॐ ओंपंफंबंभंमंवचनादानविहरणोत्सर्गानंदात्मनेऔंनेत्रत्रयायवौषट् ॥ ॐ अंयंरंलंवंशंषंसंहंळंक्षंमनोबुद्ध्यहंकारचित्तविज्ञानात्मनेअःअस्त्रायफट् ॥ एवमात्मनिदेवेचन्यासंकृत्वादेवंहृदिस्पृष्ट्वाजपेत् ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंक्षंहंसःदेवस्यप्राणाइहप्राणाः ॥ ॐ आंह्रीं० हंसःदेवस्यजीवइहस्थितः ॥ आंह्रीं० हंसःदेवस्यसर्वेंद्रियाणि ॥ ॐ आंह्रीं० हंसःदेवस्यवाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहागत्यस्वस्तयेसुखेनचिरंतिष्ठंतुस्वाहा॥अर्चांहृद्यंगुष्ठंदत्त्वाजपेत्॥ अस्यैप्राणाः प्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यैदेवत्वमर्चायैमामहेतिचकश्चन ॥ इति ॥ ततःप्रणवेनसंरुध्यसजीवंध्यात्वाधुवाद्यौरितितृचंज

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्वादेवकर्णेगायत्रीदेवमंत्रंचजप्त्वापुरुषसूक्तेनोपस्थायपादनाभिशिरःसुस्पृष्ट्वा ॥ ॐ इहैवैधिमापच्योष्टाःपर्वतइवाविंचाचलिः ॥ इंद्रइवेहध्रुवास्तिष्ठेहराष्ट्रमुधारय ॥ इतित्रिर्जपेत् ॥ ततोयजमानः ॥ स्वागतंदेवदेवेशमद्भाग्यात्त्वमिहागतः ॥ प्राकृतंत्वमदृष्ट्वा मांबालवत्परिपालय ॥ धर्मार्थकामसिद्ध्यर्थंस्थिरोभवशुभायनः ॥ सान्निध्यंतुसदादेवस्वार्चायांपरिकल्पय ॥ यावच्चंद्रावनीसूर्या स्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्रदेवेशस्थेयंभक्तानुकंपया ॥ भगवन्देवदेवेशत्वंपितासर्वदेहिनां ॥ येनरूपेणभगवंस्त्वया व्याप्तंचराचरं ॥ तेनरूपेणदेवेशस्वार्चायांसन्निधोभव ॥ इतिनमेत् ॥ ततआचार्योदेवस्यवाहनपरिवारादिदेवांस्तत्तन्मंत्रेणानी यस्वस्वस्थानेप्रतिष्ठाप्यप्राणप्रतिष्ठांकुर्यात् ॥ ॥ अथाचार्यःकर्ताचअर्चां ॐ भूःपुरुषमावाहयामि भुवःपुरुष० सुवःपुरुष० भूर्भुवःसुवःपुरुष० इत्यावाह्यप्रणवेनासनंदत्वातेनैवदूर्वाश्यामाकविष्णुक्रांतापद्ममिश्रंपाद्यं ॐइमाआपःशिवतमाःपूताःपूतत मामेध्यामेध्यतमाअमृताअमृतरसाःपाद्यास्ताजुषतांप्रतिगृह्यतांप्रतिगृह्णातुभगवान्महाविष्णुः विष्णवेनमःपाद्यं ॥ लिंगेतुभगवा न्महादेवोरुद्रायनमःपाद्यं० ॥ इमाआपःशिवतमा० अर्घ्याइत्यर्घ्यं ॥ इमा० आचमनीयाइत्याचमनं ॥ मूलेनमधुपर्कं ॥ आप्यायस्वेत्यादिभिःपंचामृतं ॥ कनिक्रददितितैलाभ्यंगं ॥ देवोक्तमंत्रैरभिषेकः ॥ ततःप्रतिसरविसर्जनं इदंविष्णुरितिवि ष्णोः ॥ नमोअस्तुनीलग्रीवायेतिलिंगस्य ॥ ततोमूलेनवस्त्रोपवस्त्रेदत्वा ॥ इमेगंधाःशुभादिव्याःसर्वगंधैरलंकृताः ॥ पूताब्रह्म पवित्रेणपूताःसूर्यस्यरश्मिभिः ॥ गंधं ॥ इमेमाल्याःशुभादिव्याःसर्वमाल्यैरलंकृताःपूताइत्यादि ॥ मालाः ॥ इमेपुष्पाः० ॥ पुष्पाणि ॥ वनस्पतिरितिधूपं ॥ आज्यंचेतिदीपं ॥ विष्णौसंकर्षणादिद्वादशनामभिःपुष्पाणिसमर्प्यतैरेवतर्पणंकृत्वापायसगु डौदनचित्रौदनैः पवित्रंतेइतिनैवेद्यंदत्वाकृसरंजुहुयात् ॥ अद्यपूर्वो० पूजांगहवनंकरिष्ये ॥ कुंडसमीपमेत्याग्निंध्यात्वापरिसमु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ह्यपर्युक्ष्य प्रोक्षणीपात्रंहविश्चासाद्यप्रोक्ष्याभिघार्याज्यादक्षिणतोनिधायाग्निमभ्यर्च्यसंकर्षणादिनामभिःकृसरंहुत्वा तेनैव शार्ङ्गि
णे श्रियै सरस्वत्यै पुष्ट्यै विष्णवेइति हुत्वा॥ विष्णोर्नुकं० प्रतद्वि० तदस्यप्रिय० परोमात्रया० विचक्रमे० त्रिर्देवः० इतिमं
त्रैर्हुत्वापुनःसंकर्षणादिभिःप्राग्वद्धुत्वा ॥ लिंगेतुदीपांतंकृत्वाभवायदेवायनमः शर्वायदेवा० ईशानाय० पशुपतये० रुद्राय०
उग्रायनमः भीमायनमः महतेनमः इतिपुष्पाणिदत्वातैरेवतर्पणं पवित्रंतेइतिपायसगुडौदननैवेद्यः ॥ ॐ भवायदेवायस्वाहे
तिअष्टनामभिःकृसरंहुत्वा भवस्यदेवस्यपत्न्यैस्वाहेत्याद्यष्टभिर्गुडौदनंहुत्वा भवस्यदेवस्यसुतायस्वाहेत्याद्यष्टभिःहरिद्रौदनंहुत्वा
ॐ त्र्यंबकं० मानोमहांत० मानस्तोके० आरात्ते० विकिरिद० सहस्राणिसहस्रशो० इतिद्वादशऋचः एतैःकृसरौदनंहुत्वा ॥
शिवाय० शंकराय० सहमानाय० शितिकंठाय० कपर्दिने० तास्राय० अरुणाय० अपगुरमाणाय० हिरण्यबाहवे० सस्पिं
जराय० वभ्लुशाय० हिरण्याय० इतिचहरिद्रौदनंहुत्वा ॥ अग्नयेस्विष्टकृतेस्वाहेतिस्विष्टकृतंपूर्णाहुतिंवसोर्धारांचसंपाद्यहो
मशेषंसमाप्य पूर्वोक्तसर्वहविर्भिर्बलिंदद्यात् ॥ तत्रमंत्रः ॥ त्वामेकमाद्यंपुरुषंपुरातनंनारायणंविश्वसृजंयजामहे ॥ त्वयैवयज्ञो
विहितोविधेयस्त्वमात्मनात्मन्प्रतिगृह्णीष्वहव्यं ॥ इति ॥ लिंगेतुनारायणपदेशिवंरुद्रंपदोच्चारः॥ ततोश्वत्थपर्णेभूर्भुवःसुवरोमि
तिहुतशेषंनिधायप्रदक्षिणीकृत्य ॥ विश्वभुजेनमः सर्वभुजे० आत्मने० परमात्मने० इतिनत्वा ॥ ज्ञानतोज्ञानतोवापिभगव
न्यन्मयाकृतं ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादादधोक्षज ॥ इतिदेवंसंप्रार्थ्यफलतांबूलदक्षिणानीराजनंमंत्रपुष्पंचदत्वाछत्रादिप
रिकल्प्यक्षमाप्यपूजांसमाप्यकर्तृनामयुतंदेवस्यनामकुर्यात् ॥ आचार्यःस्थापितदेवान्पंचोपचर्यसर्वेऋत्विजःकलशोदकेनसप
रिवारंयजमानमभिषिंचेयुः ॥ (ततःस्नानोत्तरंप्रासादांगेयूपेधिवासितेपूर्वोक्तविधिनातंनिखनेत् ॥ ततोमासपक्षाद्युल्लिख्यइमं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शिलेष्टकादार्वादिनिर्मितंवलभीजगतीप्राकारगोपुरपरिवारदेवतालयसंयुतंघंटावितानध्वजपताकाद्यलंकृतंप्रासादंतत्तद्देवतालो
ककामः कुलद्वयोद्धारार्थममुकदेवप्रीतयेहमुत्सृजामीतिकुशयवजलंक्षिपेत्) ॥ यजमानआचार्यसंपूज्यतस्मै गोयुगंएकांवागां
दत्वाऋत्विग्भ्योदक्षिणांदत्वाभूयसींचदत्वाब्राह्मणादिभोजनंसंकल्प्यस्थापितदेवताविसृज्यपीठंदत्वायस्यस्मृत्येति० वषट्ते०
प्रायश्चित्तान्यशेषाणि० प्रमादात्कुर्वतांकर्म० इतिविष्णुंस्मृत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इतिनिर्णयसिंधुमयूखानुसारीप्रतिष्ठेदौ
सप्रासादपरिवारदेवस्थिरार्चाप्रयोगःसंपूर्णः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २८२ ॥ षोडशतत्वन्यासास्तद्धोमश्च ॥

अथहेमाद्युक्तप्रतितत्वन्यासहोमः ॥ अयंमुख्यकुंडप्रधानहोमोत्तरंवासुदेव्यामुक्तःसयथा ॥ ॐ अकारायनमःस्वाहा उका
रायनमःस्वाहा मकारायनमःस्वाहा ॐकारःसर्वत्र ॥ इतिप्रणवन्यासहोमः ॥ १ ॥ भूर्नमःस्वाहा भुवर्नमःस्वाहा सुवर्न
नःस्वाहा ॥ इतिव्याहृतिन्यासहोमः ॥ २ ॥ अथमातृकान्यासहोमः ॥ अकारायनमःस्वाहा आकाराय० इकाराय० ईका
राय० उकाराय० ऊकाराय० ऋकाराय० ॠकाराय० ऌकाराय० ॡकाराय० एकाराय० ऐकाराय० ओकाराय० औका
राय० अंकाराय० अःकाराय० यकाराय० रकाराय० लकाराय० वकाराय० शकाराय० षकाराय० सकाराय० हकाराय०
ळकाराय० पफबभमेभ्योनमःस्वाहा तथदधनेभ्योनमः टठडढणेभ्योनमः चछजझञेभ्योनमः कखगघङेभ्योनमः ॥ इतिमा
तृकान्यासहोमः ॥ ३ ॥ सूर्याय० चंद्राय० अंगारकाय० बुधाय० बृहस्पतये० शुक्राय० शनैश्चराय० राहवे० केतवे०
रोहिण्यृक्षाय० मृगशीर्षेभ्यो० आर्द्रायै० पुनर्वसुभ्यां० पुष्याय० आश्लेषाभ्यो० मघाभ्यो० पूर्वाफल्गुनीभ्यो० उत्तराफल्गु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नीभ्यो० हस्ताय० चित्रायै० स्वात्यै० विशाखाभ्यः० अनूराधेभ्यो० ज्येष्ठायै० मूलाय० पूर्वाषाढाभ्यो० उत्तराषाढाभ्यो० श्रवणाय० धनिष्ठाभ्यो० शतभिषजाय० पूर्वाभाद्रपदाभ्यो० उत्तराभाद्रपदाभ्यो० रेवत्यै० अश्विभ्यां० भरणीभ्यो० कृत्तिकाभ्यो० ध्रुवाय० सप्तर्षिभ्यो० मातृमंडलाय० विष्णुपदेभ्यो० नागवीथ्यै० अंगवीथ्यै० ताराभ्यो० अगस्त्याय० ॥ इति ग्रहनक्षत्रध्रुवादिहोमः ॥ ३ ॥ एवं ॥ ६ ॥ चैत्रायनमःस्वाहा वैशाखाय० ज्येष्ठाय आषाढाय० श्रावणाय० भाद्रपदाय० आश्विनाय० कार्तिकाय० मार्गशीर्षाय० पौषाय० माघाय० फाल्गुनाय० इदुवत्सरानुवत्सरपरिवत्सरसंवत्सरेभ्योनमः० ऋतुभ्योनमः० अहोरात्रेभ्यो० क्षणाय० लवाय० कलायै० कृताय० त्रेताय० द्वापराय० कलियुगाय० चतुर्दशमन्वंतरेभ्यो० पराय० महाकल्पाय० उदगयनदक्षिणायनाभ्यां० विषुवते० ॥ इतिकालन्यासहोमः ॥ ७ ॥ ब्राह्मणाय० क्षत्रियाय० वैश्याय० शूद्राय० संकरजेभ्यो० अनुलोमेभ्यो० गोभ्यो० अजाभ्यो० अविकाभ्यो० ग्रामपशुभ्यो० अरण्यपशुभ्यो० ॥ इतिवर्णन्यासहोमः ॥ ८ ॥ मेघेभ्यो० नदीभ्यो० समुद्रेभ्यो० ॥ इतितोयन्यासहोमः ॥ ९ ॥ ऋग्वेदाय० यजुर्वेदाय० सामवेदाय० अथर्ववेदाय० सर्वोपनिषद्भ्यो० इतिहासपुराणेभ्यो० अथर्वांगिरसेभ्यो० कल्पसूत्रेभ्यो० व्याकरणेभ्यो० तर्केभ्यो० मीमांसायै० निरुक्ताय० छंदःशास्त्रेभ्यो० ज्योतिःशास्त्रेभ्यो० गीतशास्त्रेभ्यो० भूतशास्त्रेभ्यो० आयुर्वेदाय० धनुर्वेदाय० योगशास्त्रेभ्यो० नीतिशास्त्रेभ्यो० वश्यतंत्राय० ॥ इतिविद्यान्यासहोमः ॥ दिवेनमःस्वाहा सूर्यलोकाय० चंद्रलोकाय० अनिललोकाय० व्योम्नेन० समुद्रेभ्यो० पृथिव्यै० ॥ इतिवैराजन्यासहोमः ॥ ११ ॥ हिरण्यगर्भाय० कृष्णाय० रुद्राय० यमाय० अश्विभ्यां० वैश्वानराय० मरुद्भ्यो० वसुभ्यो० रुद्रेभ्यो० आदित्येभ्यो० सरस्वत्यै० इंद्राय० बलये०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रह्लादाय० विश्वकर्मणे० नारदाय० अनंताय० दिग्भ्यो० वरुणाय० मित्राय० विश्वेभ्योदेवेभ्यो० पितृभ्यो० यक्षेभ्यो० राक्षसेभ्यो० पिशाचेभ्यो० असुरेभ्यो० विद्याधरेभ्यो० ग्रहेभ्यो० गुह्यकेभ्यो० पूतनादिभ्यो० गंधर्वेभ्यो० कार्तिकेयाय० गणेशायन० ॥ इतिदेवयोनिन्यासहोमः ॥ १२ ॥ मत्स्याय० कूर्माय० वराहाय० नारसिंहाय० वामनाय० परशुरा माय० रामाय० कृष्णाय० बौद्धाय० कलंकिने० केशवाय० नारायणाय० माधवाय० गोविंदाय० विष्णवे० मधुसूदनाय० त्रिविक्रमाय० वामनाय० श्रीधराय० हृषीकेशाय० पद्मनाभाय० दामोदराय० ॥ इतिमूर्तिन्यासहोमः ॥ १३ ॥ अश्व मेधाय० नरमेधाय० राजसूयाय० गोसवाय० द्वादशाहाय० अहीनेभ्यो० सर्वजिद्भ्यो० सर्वमेधाय० अग्निष्टोमाय० अति रात्राय० अप्तोर्यामाय० षोळशिने० उक्थ्याय० वाजपेयाय० अत्यग्निष्टोमाय० चातुर्मास्येभ्यो० सौत्रामण्यै० पश्विष्टिभ्यो० दर्शाय० पौर्णमासाय० सर्वेष्टिभ्यो० स्वाहाकाराय० वषट्काराय० पंचमहायज्ञेभ्यो० आहवनीयाय० दक्षिणाग्नये० गार्हप त्याग्नये० वेद्यै० प्रवर्ग्याय० सवनेभ्यो० इध्मेभ्यो० दर्भेभ्यो० ॥ इतिक्रतुन्यासहोमः ॥ १४ ॥ ततोमूलमंत्रेणदशाहु तयः ॥ इतिमूलमंत्रन्यासहोमः ॥ १५ ॥ धर्माय० ज्ञानाय० वैराग्याय० ऐश्वर्याय० ॥ इतिगुणन्यासहोमः ॥१६॥ खड्गाय० मुसलाय० शार्ङ्गाय० हलाय० चक्राय० शंखाय० गदायै० पद्माय० ॥ शैवे वज्राय० दंडाय० शक्तये० शूलाय० खड्गाय० पाशाय० अंकुशाय० ध्वजाय० चक्राय० पद्माय० ॥इत्यायुधन्यासहोमः॥ लक्ष्म्यै० सरस्वत्यै० रत्यै० प्रीत्यै० कीर्त्यै० शांत्यै० पुष्ट्यै० तुष्ट्यै० ॥ इतिशक्तिन्यासहोमः ॥ देवमंत्रस्यहृदयायनमःस्वाहा शिरसेनमः० शिखायै० कव चाय० नेत्रत्रयाय० अस्त्रायफट्० श्रीवत्साय० कौस्तुभाय० वनमालायै० ॥ इत्यंगन्यासहोमः ॥ विष्णुपक्षेषोडशन्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सातिरिक्तोक्तद्वादशाक्षरमंत्रन्यासहोमः ॥ सचैवं ॥ ॐ ओंकारायनमःस्वाहा नकारायन० मोकारायन० भकारायन० गका
रायन० वकारायन० तेकारायन० वाकारायन० सुकारायन० देकारायन० वाकारायन० यकाराय० ॥ इतिद्वादशाक्षर
मंत्रन्यासहोमः ॥ प्राणाय० अपानाय० व्यानाय० उदानाय० समानाय० पुरुषाय० ॐकारायपुरुषात्मनेनमःस्वाहा
मकारायजीवात्मनेनमः भकारायप्राणतत्त्वायजीवोपाधयेनमःस्वाहा बकारायबुद्ध्यात्मने० फकारायअहंकारात्मने० पकाराय
मनआत्मने० नकारायशब्दतन्मात्रात्मने० धकारायस्पर्शतन्मात्रात्मने० दकारायरूपतन्मात्रात्मने० थकारायरसतन्मात्रा
त्मने० तकारायगंधतन्मात्रात्मने० णकारायश्रोत्रात्मने० ढकारायत्वगात्मने० डकारायचक्षुरात्मने० ठकारायजिह्वात्मने०
टकारायघ्राणात्मने० ञकारायवागात्मने० झकारायपाण्यात्मने० जकारायपादात्मने० छकारायपायवात्मने० चकारायउप
स्थात्मने० ङकारायपृथिव्यात्मने० घकारायअबात्मने० गकारायतेजआत्मने० खकारायवाय्वात्मने० ककारायआकाशात्मने०
शकारायपुंडरीकात्मने० षकारायसूर्यात्मने० सकारायसोमात्मने० रकारायवह्न्यात्मने० षकारायपुरुषात्मने० यकारायस
र्वात्मने० रकारायसर्वात्मने० वकारायअनुग्रहात्मने० संसर्वभूतात्मनेन० ळकारायहंसात्मने० क्षकारायकोपात्मने० आत्म
तत्वाय० आत्मतत्वाधिपतयेब्रह्मणेन० विद्यातत्वाय० विद्यातत्वाधिपतयेविष्णवेन० शिवतत्वाय० शिवतत्वाधिपतयेशि
वाय० अप्तत्वाय० तेजस्तत्वाय० वायुतत्वाय० आकाशतत्वाय० गंधतत्वाय० रसतत्वाय० रूपतत्वाय० स्पर्शतत्वाय०
शब्दतत्वाय० घ्राणतत्वाय० जिह्वातत्वाय० चक्षुस्तत्वाय० वाक्तत्वाय० श्रोत्रतत्वाय० पायुतत्वाय० उपस्थतत्वाय० हस्त
तत्वाय० पादतत्वाय० वाक्तत्वाय० मनस्तत्वाय० बुद्धितत्वाय० अहंकारतत्वाय० सत्वाय० रजसेन० तमसेन० पुरुष

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्वाय० रागतत्वाय० विज्ञानतत्वाय० नीतितत्वाय० तर्ककलातत्वाय० मायातत्वाय० ईश्वरतत्वाय० सदाशिवतत्वाय० शक्तितत्वाय० शिवतत्वाय० ॥ इतिजीवन्यासहोमः ॥ इत्येतेषोडशन्यासाःसर्वदेवसाधारणाः ॥ विष्णुश्चेद्विशेषन्यास होमः ॥ सचयथा ॥ ॐ केशवायनमःस्वाहा नंनारायणाय० मोंमाधवाय० भंगोविंदायनमः गंविष्णवे० वंमधुसूदनाय० तेंत्रिविक्रमाय० वांवामनाय० सुंश्रीधराय० देंहृषीकेशाय० वांपद्मनाभाय० यंदामोदराय० ॥ इतिद्वादशाक्षरमूर्तिन्या सहोमः ॥ ॐ हृदयाय० विष्णवेन० ब्रह्मणे० ध्रुवाय० चक्रिणे० शंभवे० विज्ञानाय० सावित्राय० चक्ररूपाय० पिंगला स्त्रायनमःस्वाहा ॥ इत्यष्टांगविष्णुमूर्तिन्यासहोमः ॥ अथपुरुषसूक्तन्यासहोमः ॥ प्रत्यृचंस्वाहाकारः ॥ ॐ सहस्र शीर्षा० गुलंस्वाहा पुरुषएवेदं० एतावानस्यमहिमा० त्रिपादूर्ध्व० तस्माद्विराळजायत० यत्पुरुषेण० तंयज्ञंबर्हिषि० तस्मा द्यज्ञात्सर्वहुतःसंभृतं० तस्माद्यज्ञात्सर्वहुतऋचः० तस्मादश्वा० यत्पुरुषं० ब्राह्मणोस्य० चंद्रमामनसो० नाभ्याआसी० सप्ता स्या० यज्ञेनयज्ञ० ॥ अथोत्तरनारायणन्यासहोमः ॥ अद्भ्यःसंभूत० वेदाहमे० प्रजापति० योदेवेभ्य० रुचंब्राह्मं० ह्रीश्च तेलक्ष्मी० ६ ॥ अथाधिवासितपिंडिकायांन्यासस्तस्येदानींहोमः ॥ ॐ यंथंभंफट्लक्ष्म्यैनमःस्वाहा हृदयायनमः शिर सेस्वाहा शिखायै० कवचाय० नेत्रत्रयाय० अस्त्राय० पृथिवीमूर्त्यधिपतयेशर्वाय० अग्निमूर्तये० अग्निमूर्त्यधिपतयेपशुपतये० यजमानमूर्तये० यजमानमूर्त्यधिपतयेउग्राय० अर्कमूर्तये० अर्कमूर्त्यधिपतयेरुद्राय० जलमूर्तये० जलमूर्त्यधिपतयेभवाय० वायुमूर्तये० वायुमूर्त्यधिपतयेईशानाय० सोममूर्तये० सोममूर्त्यधिपतयेमहादेवाय० आकाशमूर्तये० आकाशमूर्त्यधिपतये भीमाय० ॥ इत्यधिवासितपिंडिकान्यासमंत्रहोमः ॥ अथगर्भागारेस्थापितपिंडिकायांतत्वन्यासस्तस्यहोमः ॥ आत्म

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तत्वायनमःस्वाहा आत्मतत्वाधिपतयेक्रियाशक्त्यै० शिवतत्वाय० शिवतत्वाधिपतयेइच्छाशक्त्यै० विद्यातत्वाय० विद्यात
त्वाधिपतयेआधारशक्त्यै० ॥ देवेजीवन्यासानंतरंपंचोपनिषन्मंत्रन्यासस्तस्येदानींहोमः ॥ ॐ पांपरायपरमेष्ठ्यात्मनेनमः
स्वाहा वांपरायपुरुषात्मने० रांपरायविश्वात्मने० लांपरायनिवृत्त्यात्मने० वांपरायसर्वात्मने० ॥ ५ ॥ अथपृथिव्यादिपंच
महाभूतन्यासहोमः ॥ ॐ ह्योनापृथिवि० स्वाहेतिपृथिव्याः १ ॐ अप्सुमेसोमो० षजीःस्वाहाइत्यपां २ शुक्रमसीति
तेजसः ३ वायोशतमितिवायोः ४ नासदासीदित्याकाशस्य आदित्यप्रह्नस्येतिवा ५ ॥ इतिषोडशन्यासमंत्रहोमः ॥ एतेन्या
सहोमाःईशानमुख्याचार्यकुंडएवकर्तव्याः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २८३ ॥ चलार्चाप्रयोगः ॥

श्रीः ॥ अथबौधायनसूत्रेत्रिविक्रमानुसारेणसिंधूक्तःसर्वदेवचलप्रतिष्ठाप्रयोगः ॥ तत्रादौदशद्वादशान्यतमहस्तंमंडपंकृत्वाआ
ग्नेय्यांहस्तमात्रंचतुरस्रंकुंडंस्थंडिलंवाकृत्वापूर्वतोहस्तमात्रांद्वादशांगुलोच्चांत्रिवप्रांग्रहवेदिं नैर्ऋत्यांचतुरंगुलोन्नतांहस्तमात्रांवा
स्तुवेदिं मध्येमंडपनवांशांहस्तोच्चांप्रधानवेदिंकृत्वातदुपरिसर्वतोभद्रंविरच्यप्रतिष्ठादिनात्पूर्वेद्युःयजमानःआचम्यप्राणानायम्य
देशकालौसंकीर्त्य अस्यांमूर्तौलिंगेवादेवतासान्निध्यार्थंदीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोहंग्रहयज्ञसहितांअमुकमूर्ति
चलप्रतिष्ठांकरिष्ये ॥ (वास्तुदेवतापिंडिकापरिवारदेवतासत्त्वेतत्तद्बूहःकार्यः) ॥ तदंगभूतंमहागणपतिपूजनपूर्वकंस्वस्तिवाच
नंमातृकापूजनंनांदीश्राद्धंआचार्यादिवरणंचकरिष्ये ॥ तानिकृत्वा ॥ वृताचार्यःद्विराचम्यपवित्रपाणिःप्राणानायम्यदेशकाला
द्युच्चार्यअमुकमूर्तिंचलप्रतिष्ठाख्येकर्मणियजमानेनवृतोहमाचार्यकर्मकरिष्ये ॥ शरीरशुद्ध्यर्थंपुरुषसूक्तजपंकलशाद्यर्चनंचक

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रिष्ये ॥ तानिकृत्वायदत्रेतिगौरसर्षपान्विकीर्यशुचीवइतिपंचगव्येनआपोहिष्ठेतितृचेनकुशोदकेनचदेवयजनंसंप्रोक्ष्य भद्रंकर्णे
स्वस्तिनइतिजप्त्वा देवाआयांतुइत्यादिभूमौप्रादेशंकुर्यात् ॥ ततउक्तविधिनामंडपप्रतिष्ठांकृत्वाऽकृत्वावापूर्वरात्रौसुवस्त्राच्छा
दितांमूर्तिंपंचगव्यहिरण्ययवदूर्वाश्वत्थपर्णपलाशपर्णक्षिप्तोदकेनआपोहिष्ठेतितिसृभिः हिरण्यवर्णाःशुचयइतितिसृभिःपवमा
नःसुवर्जनइत्यनुवाकेनचाभिषिच्य व्याहृतिभिःइदंविष्णुरितिचपुष्पफलयवदूर्वाःसमर्प्यरक्षोहणमितिदेवहस्तेकंकणंबद्ध्वावास
साच्छाद्य अवतेहेडो० उदुत्तमं० मंत्राभ्यांगंधोदकपूरितजलद्रोण्यांप्राङ्मुखीमुदङ्मुखींवामूर्तिमधिवासयेत् ॥ पात्राभावेसंतत
धारांकुर्यात् ॥ ततःपूर्वोक्तकुंडसमीपमेत्यअमुकप्रतिष्ठांगत्वेनहोमंकर्तुंकुंडोपलेपनाद्यग्निप्रतिष्ठांकरिष्ये तद्गोमयेनोपलिप्यउल्लि
ख्य उपरिमेखलायांइदंविष्णुरितिविष्णुं मध्यमेखलायांब्रह्मजज्ञानमितिब्रह्माणं अधोमेखलायांमृडानोरुद्रइतिरुद्रं योन्यांगौरी
मिमायेतिगौरींआवाह्यसंपूज्यतांकौशेयवाससाच्छाद्यबलवर्धननामानमग्निंप्रतिष्ठाप्यध्यात्वा ॥ मंडपपक्षेनैर्ऋत्यवेद्यांवास्तुमंडलं
विलिख्यतत्रशिख्यादिवास्तुदेवताआवाह्यसंपूज्य ईशान्यांकलशेविधिनावरुणंसंपूज्यवास्तुदेवताभ्यःपायसबलिंदद्यात्॥ ततो
ग्रहवेद्यांग्रहान्संस्थाप्यसंपूज्याग्निसमीपमेत्यान्वाधानंकुर्यात् ॥ श्रद्धएहीत्यादिप्राणायामांतंकृत्वाऽमुकदेवचलप्रतिष्ठाकर्मणि
यायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि जातवेदसमग्निमिध्मेनइत्यादिव्याहृत्यंतमुक्त्वावैशेषिकप्रधानहोमे ॥ शिख्यादि
पंचचत्वारिंशद्देवताःऔदुंबरसमित्तिलपायसाज्यद्रव्यैःप्रत्येकंप्रतिद्रव्यं अष्टाविंशत्यष्टान्यतमसंख्याहुतिभिःवास्तोष्पतिं वास्तो
ष्पतइतिचतसृभिः प्रतिमंत्रं २८। वा ८ पुनर्वास्तोष्पतइति ४ वास्तोष्पतेध्रुवास्थूणामितिचपंचम्यापंचबिल्वफलैस्तद्वीजैर्वा ॥
चरक्यादीशानांतदेवताःपूर्वोक्तद्रव्यैःप्रत्येकं ८ । ४ आहुतिभिः ॥ ग्रहहोमेआदित्यादिनवग्रहान्अष्टाष्टसंख्याकाभिरर्कादि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

समिच्चर्वाज्याहुतिभिः अधिदेवताःप्रत्यधिदेवताश्चप्रत्येकंप्रतिद्रव्यंचतुश्चतुःसंख्याकाभिःपूर्वो० क्रतुसाद्गुण्यदेवताःक्रतुसंर० प्रत्येकंद्विद्विसं०पूर्वोक्तद्रव्यैर्यक्ष्ये ॥ इंद्रंपृथिवींपृथिवीमूर्तिंशर्वंअग्निंअग्निमूर्तिंपशुपतिंयमंयजमानमूर्तिंउग्रंनिर्ऋतिंसूर्यमूर्तिंरुद्रं वरुणंजलमूर्तिंभवंवायुंवायुमूर्तिंईशानं कुबेरंसोममूर्तिंमहादेवंईशानं आकाशमूर्तिंभीमंएतालोकपालमूर्तिंमूर्तिंपतिदेवताःप लाशोदुंबराश्वत्थशम्यपामार्गसमित्तिलाज्यद्रव्यैःप्रतिदैवतंप्रतिद्रव्यं २८ वा ८ आहुतिभिःतत्तन्मंत्रैः ॥ स्थाप्यदेवंअमुकंत न्मंत्रेणपूर्वोक्तसमित्संचकतिलनैवारपायसाज्यैःप्रतिद्रव्यं १०८ वा २८ वा ८ संख्याहुतिभिः ॥ विश्वान्देवान्अग्निर्यजुर्भिरि त्यनुवाकेन (तिलाज्याभ्यां) प्रतिद्रव्यंदशाहुतिभिः ॥ पिंडिकांप्रतिद्रव्यमष्टसं० ८ पूर्वोक्तसप्तद्रव्याहुतिभिःतत्तन्मंत्रेण ॥ परिवारदेवताश्चेत्तन्मंत्रैःअमुकदेवताःप्रत्येकंप्रतिद्रव्यंअष्टसंख्याकाभिःपूर्वोक्तसप्त० ॥ एवंपंचपर्यायैःत्रिभिःपर्यायैर्वायक्ष्ये ॥ ब्रह्मादिमंडलदेवताःप्रत्येकंदशभिर्घृताक्ततिलाहुतिभिर्यक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानहोमांतेयजमानस्त्या गंकुर्यात् ॥ ततोगणपतयेवराहुतिंजुहुयात् ॥ ततोग्नेरुत्तरतःसजलंकलशंसंस्थाप्यआज्यहोमेतस्मिन्संपातान्नयेत् ॥ सर्त्विगा चार्योऽन्वाधानक्रमेणहोमंकुर्यात् ॥ प्रतिद्रव्यहोमांतेदेवंपादनाभिशिरःसुस्पृशेत् ॥ तत्रादौवास्तुदेवताहोमः ततोग्रहहोमःत तोलोकपालमूर्तिंमूर्त्यधिपतीनांहोमः ततःस्थाप्यदेवताहोमः ॥ मंत्रास्तु—इदंविष्णुरितिविष्णोः त्र्यंबकमितिशिवस्य गणानां त्वेतिगणपतेः उदुत्यमितिसूर्यस्य जातवेदसेइतिदुर्गायाः विष्णोर्नुकमितिनारायणस्य हिरण्यवर्णामितिलक्ष्म्याः अथवावि ष्णवेनमःस्वाहाइत्यादिनामभिर्वाहोमः ॥ ततोविश्वेदेवोद्देशेनअग्निर्यजुर्भिरित्यनुवाकांतेस्वाहेति १० आहुतयः ॥ ततःपिंडि काहोमः ह्रीश्चते० इतिविष्णुपिंडिकायाः गौरीमिमायेतिशिवपिंडिकायाः चित्रंदेवानामितिसूर्यपिंडिकायाः गणेशशक्तिपिंडि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कानांगौरीमिमायेतिहनुमदादीनांशिवपिंडिकामंत्राःशिष्टैर्गृह्यंते ॥ ततःपरिवारदेवताहोमःतत्तल्लिंगनिर्दिष्टवेदमंत्रैःनाममंत्रैर्वा
कार्यः ॥ एवंप्रथमपर्यायहोमांतेदेवस्यपादौस्पृशेत् द्वितीयांतेनाभिं तृतीयांतेमध्यं चतुर्थांतेउरः पंचमांतेशिरइति ॥ पर्यायत्र
यपक्षेतु प्रथमांतेपादौ द्वितीयांतेनाभिं तृतीयांतेशिरः ॥ ततोर्चांशोधयेत् ॥ देवंनत्वा ॥ स्वागतंदेवदेवेशविश्वरूपनमोस्तुते ॥
शुद्धेपित्वदधिष्ठानेशुद्धिंकुर्मःसहस्वतां ॥ इतिसंप्रार्थ्य ॥ ॐउत्तिष्ठब्रह्मण० इतिदेवमुत्थाप्य अभ्युत्तारणंकुर्यात् ॥ यथाअ
श्मन्नूर्जमित्यनुवाकं १०८ वा २८ संख्ययापठन्जलंपातयेत् ॥ ततोर्चांद्वादशवारंमृदाजलेनचप्रक्षाल्यमंत्रवत्कृतपंचगव्येन
स्नापयेत् ॥ तत्रमंत्रौ ॥ ॐ पयःपृथिव्यांपयओषधीषुपयोदिव्यैतरिक्षेपयोधां ॥ पयस्वतीःप्रदिशःसंतुमह्यं ॥ ॐ आवोरा
जान० ॥ ततःपंचामृतस्नानं आप्याय० दधिक्राव्णो० शुक्रमसि० मधुवाता० आयंगौः० ॥ लिंगंचेन्नमस्तेरुद्रमन्यवइत्यार
भ्यमृडयातिनइत्यंताष्टमंत्रैःसंस्नाप्यघृतेनाभ्यंगंचंदनोद्वर्तनंउष्णोदकेनक्षालनंचकृत्वागंधंदत्वासंपातोदकैरभिषिच्यसपल्लवद
लैश्चतुर्भिःकुंभैःक्रमेण आपोहिष्ठा० योवःशिवत० तस्माअरंग० आकलशेषु० इति मंत्रैःसंस्नाप्यतैरेवैकीकृतकुंभोदकैः समुद्र
ज्येष्ठाः० ४ आकलशेषु० इतिसंस्नाप्य ॥ पूर्ववेदिकायांऔदुंबरादिपीठेर्चामुपवेश्यपरितोष्टदिक्षुसजलकुंभेषुगंधपुष्पदूर्वाः
क्षिप्त्वा ॥ आद्यकुंभेसप्तमृदः ॥ द्वितीयेपुष्करपर्णशमीविकंकताश्मंतकत्वचःपल्लवांश्च ॥ तृतीयेसप्तधान्यं ॥ चतुर्थेपंचरत्नानि ॥
पंचमेफलपुष्पाणि ॥ षष्ठेदूर्वारोचनाः ॥ सप्तमेसंपातोदकं ॥ अष्टमेसर्वौषधीःक्षिप्त्वा क्रमेण आपोहिष्ठेतितिसृभिःहिरण्यवर्णाः
शुचयःपावकाइतिचतुर्भिःपवमानःसुवर्जनइत्यनुवाकेनप्रागादिकलशेनाभिषिच्य ॥ एककुंभेशमीपलाशवटखदिरबिल्वाश्वत्थ
विकंकतपनसाम्रशिरीषोदुंबराणांपल्लवान्कषायांश्चक्षिप्त्वातेनअश्वत्थेवइतिमंत्रेणाभिषिच्य पंचरत्नोदकेनहिरण्यवर्णाःशुचयः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पावकाइतिसंस्राप्य अहतेवाससीदत्वाउपरिवितानंवद्ध्वायज्ञोपवीतादिदीपांतोपचारान्समर्प्य ॥ ॐ हिरण्यगर्भःसम० यःप्रा
णतो० ब्रह्मजज्ञानं० महीद्यौः० उपश्वासय० अग्नेनय० यातेअग्ने० इमंयम० इत्यष्टमंत्रैरष्टौपिष्टदीपान्दत्वासुवर्णशलाकया
तैजसपात्रस्थंमधुघृतंचगृहीत्वा० ॐ चित्रंदेवानां० ॥ ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवानामनाधृष्टंदेवयजन
मसि ॥ इतिमंत्राभ्यां ॥ ॐ नमोभगवतेतुभ्यंशिवायहरयेनमः ॥ हिरण्यरेतसेविष्णोविश्वरूपायतेनमः ॥ इतिचदक्षिणस
व्येदेवनेत्रेमंत्रावृत्त्यालिखेत् ॥ ततः ॐ अंजंतित्वा० इतिअंजनेनमधुनाचाङ्त्वा ॐ देवस्यत्वा० द्रियेणानज्मिइतिमध्वाज्य
शर्कराभिश्चांक्त्वा तेनैवमंत्रेणांजनेनपुनरंजयेत् ॥ ततआदर्शभक्ष्यादिदर्शयेत् ॥ ततःकर्ताचार्यायगामृत्विग्भ्यश्चदक्षिणांद
द्यात् ॥ अथाचार्यःप्रत्यृचमादौप्रणवंवदन् पुरुषसूक्तेनदेवंस्तुत्वा वंशपात्रस्थपंचवर्णौदनेनदेवस्यनीराजनंकारयित्वारुद्रायच
तुष्पथादौदद्यात् ॥ मंत्रस्तु ॥ ॐ नमोरुद्रायसर्वभूताधिपतयेदीप्तशूलधरायोमादयितायविश्वाधिपतयेरुद्रायवैनमोनमः शिव
मगर्हितंकर्मास्तुस्वाहेतिअश्वत्थपर्णेभूतेभ्योनमइतिभूतेभ्यश्चबलिंदद्यात् ॥ अथाचार्योमध्यवेद्युपरिकृतसर्वतोभद्रेदेवानावाह
येत् ॥ मध्येब्रह्माणमित्यादिवैनायक्यंतादेवतानामभिरावाह्यसंपूज्याचार्योदेवंतत्रतन्मंत्रेणावाह्यमंडलमध्येस्थाप्यदेवतां ॥
ॐ सुप्रतिष्ठोभवेतिनिवेश्यसंपूज्यप्रतिदैवतंदशदशतिलाहुतीर्जुहुयात् ॥ ततोदेवेपुष्पांजलिंसमर्प्य ॐ नमोमहद्भ्योनमइतिन
त्वावेद्युपरिपूर्वभागेस्वस्तिकेउत्तरतोवासोपस्करांशय्यांकृत्वाउत्तिष्ठेतिदेवमुत्थाप्यमंगलघोषैःशय्यायांदेवमारोप्य पुरुषसूक्तोत्त
रनारायणाभ्यांस्तुत्वाऽनंतरंदेवेन्यासान्कुर्यात् ॥ पुरुषात्मनेनमः प्राणात्मने० प्रकृतितत्वाय० बुद्धितत्वाय० अहंकारत
त्वाय० मनस्तत्वाय० इतिसर्वांगे ॥ प्रकृति० बुद्धितत्वा० हृदये ॥ शब्दतत्वाय० शिरसि ॥ स्पर्शतत्वाय० त्वचि ॥ रूपत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्वाय० हृदि ॥ रसतत्वाय० मुखे ॥ गंधतत्वाय० नासिकायां ॥ श्रोत्रतत्वाय० श्रोत्रयोः ॥ त्वक्तत्वाय० त्वचि ॥ चक्षुस्त
त्वाय० चक्षुषोः ॥ जिह्वातत्त्वाय० जिह्वायां ॥ घ्राणतत्वाय० घ्राणे ॥ वाक्तत्वाय० वाचि ॥ पाणितत्वाय० हस्तयोः ॥ पाद
तत्वाय० पादयोः ॥ पायुत० पायौ ॥ उपस्थत० उपस्थे ॥ पृथ्वीत० पादादिजानुपर्यंतं ॥ अप्तत्वाय० जान्वादिनाभि
पर्यंतं ॥ तेजस्त० नाभ्यादिहृदयांतं ॥ वायुत० हृदयादिभ्रूमध्यांतं ॥ आकाशत० भ्रूमध्यादिशिरोंतं ॥ सत्वतत्वाय रजस्त०
तमस्त० सर्वांगे ॥ ततःपुरुषसूक्तन्यासोनित्यपूजावत् ॥ ततःसुखशायीभवेतिशय्यायांदेवंस्वापयित्वा मंडलशय्ययोरंतरान
गंतव्यंइतिप्रैषंदत्वाअंगहोमादिहोमशेषंसमाप्य मंडलदेवताभ्योनामभिःपायसेनबलीन्दद्यात् ॥ नीवारचरुशेषेणदिग्बलीन्
अग्नेःपरितोदत्वाधामंतइतिपूर्णाहुतिंहुत्वाततःपिंडिकांपरिवारदेवांश्चप्रतिमासमीपे यथावकाशदेशेवावस्त्राच्छादितपीठेनिधा
यमधुघृतेनाभ्यज्यशुद्धवारिणाप्रक्षाल्यपूर्वस्नानावशिष्टकलशवारिणातत्तन्मंत्रैःस्नापयित्वागंधादिभिरभ्यर्च्य वस्त्रैराच्छाद्यन्या
सान्कुर्यात् ॥ तत्रपिंडिकायां ॐ घंनमःहृदयायनमः ॥ पंनमःशिरसेस्वाहा ॥ भंनमःशिखायै० ॥ फंनमःकवचायहुं ॥ ळंन
मोनेत्र० ॥ क्षंनमअस्त्रायफट् ॥ ततःमहीमूषु० इतिमंत्रेणावाह्य अदितिर्द्यौरजनिष्ट० इतिस्तुत्वा ह्रींनमइतिसंपूज्य ॥ ॐ ह्रींन
मःस्वाहेतिपूर्णाहुतिंहुत्वा ॥ ॐ ह्रींश्रींह्रींक्षःपरब्रह्मणेसर्वाधारायनमः ॥ ॐ ह्रींश्रींह्रींदिव्यतेजोधारिणिसुभगेनमइतिमंत्राभ्या
मधिवासयेत् ॥ ततःपरिवारदेवेषुतत्तन्मंत्रेणषडंगन्यासंकृत्वातत्तन्मंत्रेणाधिवासयेत् ॥ ततोदेवस्यशिरोभागेविधिवत्कलशंसं
स्थाप्यतत्र ॥ वासुदेवंनमस्कृत्यनिद्रामावाहयाम्यहं ॥ मोहिनींसर्वभूतानांमनोविभ्रमकारिणीं ॥ एहिसावित्रिमूर्तिस्त्वंचक्षुर्भ्यां
ज्ञानगोचरे ॥ विशनासापुटेदेविकंठेचोत्कंठिताभवइतिनिद्रामावाह्यसंपूज्ययजमानःअधिवासनांगत्वेनाचार्यायगामृत्विग्भ्यश्च

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दक्षिणांदद्यात् ॥ इत्यधिवासनं ॥ ततःपरेद्युःसद्योवा उत्तिष्ठब्रह्म० इतिदेवमुत्थाप्यपुरुषसूक्तोत्तरनारायणाभ्यांस्तुत्वाततः कुंडांतिकमागत्यदेशकालौस्मृत्वाप्रतिष्ठांगहोमंकरिष्येइतिसंकल्प्यान्वाधानंकुर्यात् ॥ चक्षुषीआज्येनेत्यंते स्थाप्यदेवंतन्मंत्रेण घृतपक्वचरुणादशाहुतिभिः अग्निंसोमंधन्वंतरिंकुहूंअनुमतिंप्रजापतिंपरमेष्ठिनंब्रह्माणंअग्निंसोमंअग्निमन्नादंअग्निमन्नपतिंप्रजाप तिंविश्वान्देवान्सर्वान्देवान्प्रजापतिंअग्निंस्विष्टकृतं ॥ पूजांगहोमेविष्णुःस्थाप्यश्चेत्संकर्षणादिस्थाप्यदेवताः शार्ङ्गिणंश्रियंस रस्वतींपुष्टिंविष्णुंचकृसरेणैकैकयाहुत्यानाममंत्रेण ॥ पुनर्विष्णुंविष्णोर्नुकमितिषण्मंत्रैःकृसरेण ॥ पुनःसंकर्षणादि १२ देवताः कृसरेण ॥ स्थाप्यःशिवश्चेत् भवंदेवंशर्वंईशानंपशुपतिंरुद्रंउग्रंभीमंमहांतंदेवंप्रत्येकंकृसरेण ॥ भवस्यदेवस्यपत्न्याद्यष्टदेवताः गुडौदनेन ॥ भवस्यदेवस्यसुतमित्याद्यष्टौदेवताःहरिद्रौदनेन ॥ रुद्रंसप्तदशवारंमानोमहांतमित्यादिसप्तदशमंत्रैःप्रतिमंत्रंकृ सरेण॥ शिवंशंकरंसहमानंशितिकंठंकपर्दिनंताम्रंअरुणंअपगुरमाणंहिरण्यबाहुंसस्पिंजरंवभ्लुशंहिरण्यंप्रत्येकंकृसरेण ॥ अंगहो मेवरुणंद्विरित्यादिव्याहृत्यंतेस्थाप्यदेवंमूलेनकृसराहुतीः १० अग्नयेस्वाहेत्यादिनान्नासर्वेभ्योदेवेभ्यःस्वाहेति १५ ॥ अंते ॐ भूर्भुवःस्वःस्वाहा १६ अग्नयेस्विष्टकृते० १७ ॥ विष्णुश्चेत्संकर्षणादिदेवताः ॥ शिवश्चेद्रुद्रादिदेवताः ॥ ततःपूर्णाहुतिंसप्त तेअ० पुनस्त्वादित्या० मंत्राभ्यांहुत्वा आचार्यः याओषधीःपूर्वा० इतिदेवायपुष्पफलसर्वौषधीःसमर्प्यसंपातोदकंताम्रपात्रेआ दायदेवमंत्रेणशतवारमभिमंत्र्यतेनदेवशिरसिसिंचेत् ॥ ततउत्तिष्ठब्रह्म० इतिदेवमुत्थाप्य विश्वतश्चक्षु० इत्युपतिष्ठेत् ॥ ततो देवंध्यात्वाजपेत् ॥ ॐ ब्रह्मणेनमः विष्णवे० रुद्राय० इंद्राय० अग्नये० यमाय० वरुणाय० वायवे० सोमाय० ईशानाय० वसुभ्यः० रुद्रेभ्यः० अश्विभ्यां० मरुद्भ्यः० कुबेराय० गंगादिनदीभ्यो० अग्नीषोमाभ्यां० इंद्राग्निभ्यां० द्यावापृथिवीभ्यां०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धन्वंतरये० सर्वेशाय० विश्वेभ्योदेवेभ्यः ब्रह्मणेनमःइति ॥ ततःसंपातवास्तुकलशजलेनसामात्यंयजमानमभिषिंचेत्सर्त्विगा
चार्यः ॥ ततोदेवंध्यात्वा ॥ ॐ प्रतितिष्ठपरमेश्वरेतिपुष्पांजलिंनिवेद्य ॥ सच्चिदानंदंब्रह्मैवभक्तानुग्रहायगृहीतविग्रहंकरचरणा
द्यवयविनंशंखचक्राद्यायुधवंतंनिजवाहनाद्युपेतंनिजहृत्कमलेवस्थितंसर्वलोकसाक्षिणमणीयांसं परमेष्ठ्यसिपरमांश्रियंगमयेति
मंत्रेणपुष्पांजलावागतंविभाव्यअर्चायांविन्यस्यप्राणप्रतिष्ठांकुर्यात् ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयःऋग्यजुः
सामानिछंदांसि क्रियामयवपुःप्राणाख्यादेवता आंबीजं ह्रींशक्तिःक्रोंकीलकं प्राणप्रतिष्ठायांवि० ॥ ब्रह्मविष्णुरुद्रऋषिभ्योनमः
शिरसि ॥ ऋग्यजुःसामछंदोभ्योनमोमुखे ॥ प्राणाख्यदेवतायैनमोहृदि ॥ आंबीजायनमोगुह्ये ॥ क्रोंशक्त्यैनमःपादयोः ॥
ॐ अंकंखंगंघंङंपृथिव्यप्तेजोवाय्वाकाशात्मनेआंहृदयायनमः ॥ ॐ इंचंछंजंझंञंशब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा ॥
ॐ उंटंठंडंढंणंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेऊंशिखायैवषट् ॥ ॐ एंतंथंदंधंनंवाक्पाणिपादपायूपस्थात्मनेऐंकवचायहुं ॥ ॐ ओं
पंफंबंभंमंवचनादानविहरणोत्सर्गानंदात्मनेऔंनेत्रत्रयायवौषट् ॥ ॐ अंयंरंलंवंशंषंसंहंळंक्षंमनोबुद्ध्यहंकारचित्तविज्ञानात्मनेअः
अस्त्रायफट् ॥ एवमात्मनिदेवेचकृत्वादेवंस्पृष्ट्वाजपेत् ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहंसःदेवस्यप्राणाइहप्राणाः ॥ ॐ आंह्रीं० हंसः
देवस्यजीवइहस्थितः ॥ ॐ आंह्रींक्रों० हंसःदेवस्यसर्वेंद्रियाणि ॥ ॐ आंह्रीं० हंसःदेवस्यवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइ
हागत्यस्वस्तयेसुखेनचिरंतिष्ठंतुस्वाहा ॥ ततअर्चांहृद्यंगुष्ठंदत्वा ॥ ॐ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यैदेवत्वम
र्चायैमामहेतिचकश्चन ॥ इतिजपेत् ॥ ततः ॐ इतिसंरुध्यसजीवंध्यात्वाध्रुवाद्यौरितितृचंजप्त्वादेवकर्णेदेवगायत्रींदेवमंत्रंच
जप्त्वापुरुषसूक्तेनोपस्थायदेवस्यपादनाभिशिरःसुस्पृष्ट्वा इहैवैधिमाप० इतिमंत्रंत्रिर्जपेत् ॥ ततःकर्ता ॥ स्वागतंदेवदेवेशमद्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ग्यात्त्वमिहागतः ॥ प्राकृतंत्वमदृष्ट्वामांमातृवत्परिपालय ॥ धर्मार्थकामसिद्ध्यर्थंस्थिरोभवशिवायनः ॥ सान्निध्यंतुसदादेवस्वा
र्चायांपरिकल्पय ॥ यावच्चंद्रावनीसूर्यास्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्रदेवेशस्थेयंभक्तानुकंपया ॥ भगवन्देवदेवेशत्वंपि
तासर्वदेहिनां ॥ येनरूपेणभगवन्त्वयाव्याप्तंचराचरं ॥ तेनरूपेणदेवेशस्वार्चायांसन्निधोभव ॥ इतिनमेत् ॥ अथाचार्यःकर्ता
वालिंगंअर्चांवा ॐ भूःपुरुषमावाहयामि ॥ ॐ भुवःपुरुषमावाहयामि ॥ ॐ स्वःपुरुषमावाहयामि ॥ ॐ भूर्भुवःस्वःपुरुषमावा
हयामि ॥ ॐ मित्यासनंदत्वा तेनैवदूर्वाश्यामाकविष्णुक्रांतापद्ममिश्रंपाद्यं ॥ ॐ इमाआपःशिवतमाःपूताःपूततमामेध्यामेध्य
तमाअमृताअमृतरसाःपाद्यास्ताजुषतांप्रतिगृह्यतांप्रतिगृह्णातुभगवान्महाविष्णुर्विष्णवेनमइतिपाद्यं ॥ भगवान्महादेवोरुद्राय
नमइतिरुद्रे ॥ एवंदेवतांतरेषूह्यं ॥ इमाआपःशिवतमा० आचमनीयास्ताजुषतांप्रति० ॥ इमाआपः० अर्घ्यास्ताजुषतांप्रति०
पंचामृतैःस्नानं ॥ देवमंत्रैःसंस्नाप्य ॥ इदंविष्णुरितिविष्णौ नमोअस्तुनीलग्रीवायेतिलिंगेकंकणंविसृज्यवस्त्रंयज्ञोपवीतंचदत्वा ॥
इमेगंधाःशुभादिव्याःसर्वगंधैरलंकृताः ॥ पूताब्रह्मपवित्रेणपूताःसूर्यस्यरश्मिभिः ॥ इतिगंधाः ॥ इमेमाल्याःशुभादिव्याःसर्व
माल्यैरलंकृताः ॥ पूताब्र० ॥ इतिमालाः ॥ इमेपुष्पा० इतिपुष्पं ॥ वनस्पतिरितिधूपं ॥ ज्योतिःशुक्रंचतेजश्चदेवानांसततं
प्रियं ॥ प्रभाकरंतुभूतानांदीपोयंप्रतिगृह्यतां ॥ इतिदीपं ॥ विष्णौसंकर्षणादिद्वादशनामभिःपुष्पाणिसमर्प्य तैरेवतर्पणंकृत्वा
पायसगुडौदनचित्रौदनानिपवित्रंतेवितताभितिनिवेद्यसंकर्षणादिद्वादशनामभिर्गृहसिद्धान्नकृसराहुतीर्हुत्वा ॥ कृसरेणैव शार्ङ्गि
णेश्रियैसरस्वत्यैपुष्ट्यैविष्णवेविष्णोर्नुकं० तदस्यप्रिय० प्रतद्विष्णु० परोमात्रया० विचक्रमे० त्रिर्देव० इतिजुहुयात् ॥ लिंगे
तुदीपांतंकृत्वा भवायदेवाय० शर्वायदे० ईशानायदे० पशुपतयेदे० रुद्रायदे० उग्रायदे० भीमायदे० महतेदे० इतिपुष्पा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णिदत्वातैरेवतर्पणंकृत्वा पवित्रंतेइतिपायसंगुडौदनंचनिवेद्यतैरेवनामभिःकृसरंजुहुयात् ॥ ततोभवस्यदेवस्यपद्म्यैइत्याद्यष्टभि
र्गुडौदनंहुत्वा भवस्यदेवस्यसुतायइत्याद्यष्टभिर्हरिद्रौदनंहुत्वात्र्यंबकं० मानोम० मानस्तोके० आरात्तेगोघ्न० विकिरिद० सहस्रा
णिसहस्रशो० इत्यादिद्वादशर्ग्भिःकृसरंहुत्वा शिवायशंकरायसहमानायशितिकंठायकपर्दिनेताम्रायअरुणायअपगुरमाणायहि
रण्यबाहवेसर्प्पिजरायबभ्लुशायहिरण्यायइतिचकृसरंहुत्वा ॥ अंगहोमादिहोमशेषंसमाप्यपूर्वोक्तसर्वहविर्भिर्विष्णवेलिंगायबा
बलिंदद्यात् ॥ मंत्रस्तु ॥ त्वामेकमाद्यंपुरुषंपुरातनंनारायणंविश्वसृजंयजामहे ॥ त्वमेवयज्ञोविहितोविधेयस्त्वमात्मनात्मन्प्रति
गृह्णीष्वहव्यं ॥ लिंगेतुनारायणपदेरुद्रंशिवमित्यूहः ॥ ततोश्वत्थपर्णे ॥ ॐ भूर्भुवःस्वरोमितिहुतशेषंनिधाय अग्निसहितंदेवं
चतुर्वारंप्रदक्षिणीकृत्य विश्वभुजेनमः सर्वभुजे० आत्मने० इतिनत्वास्थापितदेवतानामुत्तरपूजांविधायाचार्यायगांदत्वाऋत्वि
ग्भ्योदक्षिणांदत्वा स्थापितदेवतापीठमाचार्यहस्तेप्रतिपाद्यशतंद्वादशयथाशक्तिवाविप्रान्परमान्नेनभोजयेदिति ॥ इतिप्रतिष्ठें
दौनिर्णयसिंधूक्तःसर्वदेवचलार्चाप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २८४ ॥ एकाध्वरचलप्रतिष्ठा ॥

श्रीः ॥ यजमानःआचम्यप्राणानायम्यदेशकालाद्युच्चार्यपूर्वोक्तचलार्चावत्संकल्पादिनांदीश्राद्धांतंप्राग्वत्कृत्वा एकमाचार्यंवृणु
यात् ॥ आचार्योमुकदेवप्रतिष्ठाकर्मकरिष्यइत्यादिसर्षपविकिरणांतंकृत्वा ॥ सर्वतोभद्रमंडलेप्राग्वन्नामभिर्ब्रह्मादिमंडलदेवता
आवाह्यसंपूज्य यथागृह्यमग्निंप्रतिष्ठाप्यान्वादध्यात् ॥ आज्यभागांतेस्थाप्यदेवतांसहस्रमष्टोत्तरशतंवासमिदाज्यचरुतिलद्रव्यै
र्ब्रह्मादिमंडलदेवताःप्रत्येकंदशदशघृताक्ततिलाहुतिभिःशेषेणेत्यादि ॥ तूष्णींनिर्वापप्रोक्षणे ॥ आज्यभागांते तडागनदीतीर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गोष्ठचत्वरपर्वतगजाश्वह्रदवल्मीकसंगमेतिदशमृद्भिरष्टवारंदेवंसंस्नाप्याभ्युत्तारणंकुर्यात् ॥ सर्वतोभद्रस्थपीठेदेवमुपवेश्यनाम्ना वस्त्रगंधधूपादिदत्वाष्टदिक्षुपल्लवादियुतोदकुंभानष्टौदीपांश्च संस्थाप्यप्राग्वन्नेत्रोन्मीलनंचित्रान्नेनबलिंदत्वापुरुषसूक्तेनस्तुत्वोक्त द्रव्यचतुष्टयंस्थाप्यदेवमंत्रेणहुत्वाएकैकद्रव्यहोमांतेदेवंस्पृशेत् ॥ आज्यहोमेकुंभेसंपातान्क्षिपेत् ॥ मंडलदेवताभ्योहुत्वाहोमशे षंसमाप्यपूर्णाहुतिंजुहुयात् ॥ ततःपूर्वोक्तरीत्यासूक्तन्यासावाहनप्राणप्रतिष्ठांतंकृत्वा इहैवैधीत्यृचंपुरुषसूक्तंचजप्त्वा ॥ मूलमं त्रादिनावाहनादिपंचामृतस्नानांतेसंपातोदकैरिमाआपःशिवतमाइत्यादिनाभिषेकः ॥ वस्त्रादिनैवेद्यांतंप्राग्वत् ॥ तांवूलफलद क्षिणानीराजननमस्कारप्रदक्षिणादिविधाय पुष्पांजलिंदत्वा ॥ साचार्यःकर्तादेवंनत्वाक्षमाप्याचार्यदक्षिणांतेऽष्टकुंभोदकैर्यज मानाभिषेकः ॥ विष्णुंस्मृत्वाकर्मेश्वरेर्पयेदितिसंक्षेपः ॥ इतिएकाध्वरचलप्रतिष्ठा ॥ ॥ छ ॥ ॥ छ ॥

॥ २८५ ॥ जीर्णोद्धारेअघोरहोमः ॥

श्रीः ॥ कर्ताअमुकदेवस्यजीर्णोद्धारंकरिष्ये इतिसंकल्प्यगणपतिंसंपूज्यपुण्याहंवाचयित्वा लिंगाद्युद्धारार्थंआचार्यादीनष्टौचतु रोवावृणुयात् ॥ (नांदीश्राद्धंकर्तव्यमितित्रिविक्रमः) ॥ ततआचार्यःअघोरेभ्यइत्यघोरमंत्रंअष्टोत्तरशतंजप्त्वाअग्निंप्रतिष्ठाप्य सर्वतोभद्रंनिर्मायवास्तुब्रह्मादिदेवताआवाह्य अघोरेणसर्षपैःसहस्रंहुत्वाइंद्रादिभ्योनाम्नामाषभक्तबलीन्दत्वाजीर्णदेवंप्रणवेनसं पूज्यब्रह्मादिसर्वतोभद्रमंडलदेवतानांहोमंकृत्वाअंगहोमादिहोमसमाप्तिंकृत्वादेवंप्रार्थयेत् ॥ जीर्णभग्नमिदंचैवसर्वदोषावहंनृ णां ॥ अस्योद्धारेकृतेशांतिःशास्त्रेस्मिन्कथितात्वया ॥ जीर्णोद्धारविधानंचपुरराष्ट्रसुखावहं ॥ अधितिष्ठाथमांदेवप्रोद्धरामित वाज्ञयेति ॥ ततःस्थंडिलांतरेअग्निंप्रतिष्ठाप्यक्षीराज्यमधुदूर्वाभिःऔदुंबरीभिःसमिद्भिश्चप्रत्येकमष्टोत्तरशतसंख्ययादेवमंत्रेणहु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्वालिंगादिचालनार्थंदेवमंत्रेणैवक्षीरादिभिःप्रत्येकंसहस्रंहुत्वा तन्मंत्रेणैवपायसेनशतंहुत्वाप्रणवेनलिंगंसंपूज्यप्रार्थयेत् ॥ लिंग
रूपंसमागत्ययेनेदंसमधिष्ठितं ॥ यायात्समाहितंस्थानंसंत्यज्यैवशिवाज्ञया ॥ अत्रस्थानेचयाविद्यासर्वविघ्नेश्वरैर्युता ॥ शिवेन
सहसंतिष्ठेतिमंत्रितजलेनाभिषिच्यसर्षपैःसंताड्यअर्घ्यदानेनविसर्जयेत् ॥ अघोरेणमंत्रेणयजमानहस्तेहेममयंकंकणंबद्ध्वा ॐ व्या
पकेश्वरायनमः अस्त्रायफट् ॥ अस्त्रमंत्रितेनहैमखनित्रेणईशानदिशिसमंतात्भ्रमन् अपसव्येनखनित्वाहेमपाशयुक्तयागोवा
लरज्ज्वाशिवादिकं ॐ व्यापकेश्वरशिखायैवषट्इतिशिखामंत्रेणबद्ध्वाआचार्यऋत्विग्भिःसहउद्धरेत् ॥ ततःलिंगांगशिलान्वितां
प्रतिमांपिंडिकांतत्स्थंनिर्माल्यमादायचंडायनिवेद्यरथमारोप्यतरुच्छायायांपर्वतदेशेवावृक्षमूलेवाऽगाधनदीषुवादेवं वामदेवाय
नमोज्येष्ठायइतिवामदेवेननिवेशयेत् ॥ प्रतिमांप्रणवेननिक्षिपेत् ॥ दारुजाचेत्ग्रामादुत्तरतोमनोरमेस्थानेनीत्वामधुनाभ्यज्या
घोरेणमंत्रेणदहेत् ॥ हेमरत्नादिमयंदग्धंचलितंवापुनस्तथैवस्थापयेत् ॥ अनेनैवविधिनाध्वजादिकंविसर्जयेत् ॥ ततःशांत्यैअ
घोरेणमंत्रेणतिलैःसहस्रंहुत्वाफलपुष्पाक्षतहस्तःनूतनंदेवंप्रार्थयेत् ॥ भगवन्भूतभव्येशलोकनाथजगत्पते ॥ जीर्णलिंगसमुद्धारः
कृतस्तवाज्ञयामया ॥ अग्निनादारुजंदग्धंक्षिप्तंशैलादिकंजले ॥ प्रायश्चित्तायदेवेशअघोरास्त्रेणतर्पितं ॥ ज्ञानतोज्ञानतोवापिय
थोक्तंनकृतंचयत् ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वर ॥ गोविप्रशिल्पिभूतानामाचार्यस्यचयज्वनः ॥ शांतिर्भवतुदेवेश
अच्छिद्रंजायतामिदं ॥ मूर्तौतुविशेषः ॥ त्वत्प्रसादेननिर्विघ्नंदेहंनिर्मापयत्यसौ ॥ वासंकुरुसुरश्रेष्ठतावत्त्वंचाल्पकेगृहे ॥ वसक्ले
शंसहित्वैवमूर्तैवैतवपूर्ववत् ॥ यावत्कारयतेभक्तःकुरुतस्यचवांछितमिति ॥ ततोहोमशेषंसमाप्याचार्यादीन्विशेषतोर्चयेत् ॥
यजमानमभिषिच्याशिषोदद्यात् ॥ ततोनवांमूर्तिंलिंगंवाकृत्वाप्रतिष्ठारंभपूर्वंपंचरात्रमध्येउक्तविधिनास्थापयेत् ॥ असुरैर्मुनि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भिर्देवैस्तत्त्वविद्भिःप्रतिष्ठितं ॥ जीर्णंवात्वथवाभग्नंविधिनापिनचालयेत् ॥ इतित्रिविक्रमः ॥ इतिदेवपिंडिकाप्रासादध्वजवा०

॥ २८६ ॥ प्रासादप्रतिमयोर्जीर्णोद्धारः ॥

श्रीः ॥ यजमानःदेशकालौस्मृत्वाश्रीपरमेश्वरप्रीत्यर्थंप्रासादस्यपिंडिकायावागर्भागारस्यवाभूमेर्वाजीर्णोद्धारणंकरिष्ये ॥ तथाचा त्रस्थितानांदेवतानांसंकोचत्वादुद्धृत्यस्थलांतरनयनार्थंचालनविधिंकरिष्ये ॥ इतिप्रासादादन्यतमसंकल्पः ॥ निर्विघ्नार्थंगण पतिपूजनंपुण्याहवाचनंआचार्यादिवरणंचकरिष्ये ॥ इतिसंकल्प्यगणेशपूजनादिकृत्वाआचार्यादीन्वृणुयात् ॥ अस्मिन्कर्मणि आचार्यत्वामहंवृणइत्याचार्यवृत्वा ॥ ब्रह्माद्यृत्विजःपंचब्राह्मणान्वृणुयात् ॥ आचार्यःपूर्वकल्पितगृहंपंचगव्येनाभ्युक्ष्यतोरणा दिनाअलंकृत्ययथास्थानंपादशिलांविन्यस्यउक्तरीत्यारत्नान्याधायासनंपरिकल्प्य गर्भगृहंप्रविश्यबहुभिरुदकैःप्रक्षाल्यप्रतिमा मभ्यर्च्यहोमंकुर्यात् ॥ तत्प्रकारः ॥ आचार्यःस्थंडिलादिविरच्यदेशकालौस्मृत्वाप्रासादस्यवागर्भगृहस्यवाजीर्णोद्धारेविहितहो मंकरिष्ये ॥ अथवापिंडिकाप्रतिमयोश्चालनविधौविहितहोमंकरिष्ये ॥ अग्निस्थापनादिकृत्वासमिद्व्यमादायास्मिन्नन्वाहितेग्ना वित्यादि० ॥ अत्रप्रधानं ॥ देवेआवाहितप्रणवादिषोडशन्यासांतर्गततत्वानिप्रत्येकंदशदशसंख्ययातिलद्रव्येणयक्ष्ये ॥ तथाच पिंडिकातत्वानि ॐ यंथंभंइत्यादीनिप्रत्येकंदशदशसंख्ययातिलद्रव्येणयक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसद्योयक्ष्येइत्यन्वाधा यप्रधानहोमंकुर्यात् ॥ प्रासादेतुप्रधानहोमेविशेषः ॥ प्रासादेपृथिव्यादितत्वानिप्रत्येकंदशदशसंख्ययातिलद्रव्येणयक्ष्येअंगहो मेवरुणंद्विरित्यादिपूर्ववत् ॥ प्रधानहोमस्तुपूर्वंदेवाधिवासनोत्तरंषोडशन्यासहोमउक्तःसएवात्रग्राह्यः ॥ सचैवं ॐ अकाराय नमःस्वाहा ॥ ॐ उकारायनमःस्वाहा ॥ इत्यादिप्रणवन्यासहोमः ॥ एवंप्रकारेणषोडशन्यासांतर्गततत्वेभ्यःषोडशन्यासहो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मविधिनाप्रतितत्वंदशाहुतीस्तिलैर्जुहुयात् ॥ प्रासादेतुजीर्णप्रासादेआवाहितपृथिव्यादितत्वेभ्योजुहुयात् ॥ तानितुप्रासादत
त्वानिप्रासादोद्यापनप्रयोगेमयोक्तानित्रिविक्रमेणहेमाद्रावुक्तानिग्राह्याणि ॥ तत्प्रकारः ॥ ॐ पृथिवीतत्वायनमःस्वाहा ॥ एवं
प्रकारेणहोमःकार्यः ॥ तत्वानिविस्तरादिहनोच्यंते ॥ प्रासादतत्वानांहोमःकृताकृतः ॥ ततः[1]प्रासादेपूर्वस्थितानिपृथिव्यादित
त्वानिखड्गेछूरिकायांवाविन्यस्यतंखड्गंदेवपार्श्वेनिधायप्रासादनिष्पत्तिपर्यंतंखड्गंदेववत्पूजयेत् ॥ खड्गेन्यासप्रकारस्त्वेवं ॥ ध्याने
नप्रासादस्थितंपृथिवीतत्वंखड्गेन्यसामीति ॥ एवंप्रतितत्वमूहःकार्यः ॥ निष्पन्नेप्रासादेप्रासादप्रतिष्ठाविधिंसर्वंहोमादिविधाय
तत्वन्याससमयेदेवनिकटस्थंपूर्वस्थापितंखड्गमानीयखड्गस्थितानितत्वानिमनसिध्यानेनप्रासादेयथास्थानंविन्यसेत् ॥ खड्गस्थि
तंपृथिवीतत्वंप्रासादेयथास्थानंन्यसामीत्यूहःकार्यः ॥ तंखड्गंआचार्यायदद्यात् ॥ इति ॥ ॥ छ ॥ ॥ छ ॥

॥ २८७ ॥ जीर्णप्रतिमापिंडिकाप्रतिष्ठाविधिः ॥

श्रीः ॥ गर्भागारस्यजीर्णोद्धारेगर्भागारभूमेर्वापिंडिकायावाजीर्णोद्धारेक्रियमाणेतत्रसंकोचत्वात्पूर्वस्थितदेवानांतत्रावस्थानंनसं
भवतितदापूर्वकल्पितमंदिरांतरेनेतुंदेवानुद्धरेत् ॥ तत्प्रकारस्त्वेवं ॥ सुवर्णरजतताम्रान्यतमपात्रंगंधवारिणापूर्यगंधादिनाभ्य
र्च्य मनोध्यानेनदेवेपिंडिकायांचपूर्वंआवाहितप्रणवादिषोडशन्यासतत्वानितानिसर्वाणिजलपूरितताम्रादिपात्रेविन्यसेत् ॥
तत्रप्रयोगः ॥ देवस्थंअकारंपात्रजलेन्यसामि उकारंपात्रजले० मकारंपात्रजलेन्यसामि ॥ इतिप्रणवन्यासःप्रथमः ॥ अनेनप्र

१ पूर्वनिहिततत्वाऽज्ञानेतुअस्मिन्प्रासादेमूर्तौवापूर्वनिहितानियानियानितत्वानितानिसर्वाणिछूरिकायांकुंभस्थोदकेवान्यसामिइतितत्कुंभवारिणा
प्रतिष्ठाकालेनूत्नमूर्तौस्नानंविधेयम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कारेणपूर्वोक्तषोडशन्यासप्रकारेणपूर्वोक्तषोडशन्यासतत्त्वानिपात्रेआवाहयेत् ॥ ततःपिंडिकातत्वानि ॐ तंथंमंभंइत्यादीनिपा
त्रजलेन्यसामि ॥ एवंप्रकारेणदेवतत्वानिपिंडिकातत्वानिचपात्रजलेआवाहयेत् ॥ ततःसमस्तेंद्रियसंयुक्तंसूक्ष्मदेहान्वितंमूलसं
ज्ञकंजीवंनियोज्यफलपुष्पाक्षतयुक्तहस्तःदेवंविज्ञापयेत् ॥ तद्यथा ॥ त्वत्प्रसादेननिर्विघ्नंगेहंनिर्मापयत्यसौ ॥ वासंकुरुसुरश्रेष्ठ
तावत्त्वंचाल्पकेगृहे ॥ वसक्लेशंसहित्वैवमूर्तिंवातवपूर्ववत् ॥ यावत्कारयतेभक्तःकुरुतस्यचवांछितं ॥ अनेनमंत्रेणदेवंप्रार्थयेत् ॥
ततःकुद्दालादिशस्त्राणिपीठादौनिधायतत्र ॥ ॐ विश्वकर्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्यां ॥ मुह्यंत्वन्येअभितो
जनासइहास्माकंमघवासूरिरस्तु ॥ इतिमंत्रेणशस्त्रेविश्वकर्माणंसंपूज्यशस्त्रेणपिंडिकांखनित्वादेवमुद्धृत्यमंगलवाद्यघोषेणपूर्वक
ल्पितंमंदिरंनीत्वायथास्थानावस्थितपीठादौदेवंस्थापयित्वाताम्रादिपात्रस्थितंजलंदेवशिरसिनिषिंचेत् ॥ तत्पात्रंप्रासादनिष्पत्ति
पर्यंतंदेवनिकटेरक्षेत् अथवामुकुटवत्देवशिरसिनिदध्यात् ॥ ततःदिग्बलिंदत्वादेवंसंपूज्य अग्निंब्राह्मणांश्चसंपूज्यदक्षिणांद
त्वाऽशिषोगृहीत्वानूतनंगर्भगृहादिकुर्यात् ॥ गर्भगृहादौनिष्पन्नेगर्भागारमध्येयथास्थानंजीर्णांनूतनांवापिंडिकांस्थापयेत् ॥ नूत
नाचेत्पिंडिकाक्रियते तदाजीर्णोद्धारविधिनाजीर्णांपिंडिकांविसर्जयित्वाजलादौतस्याःप्रतिपत्तिंकृत्वानूतनांपिंडिकांपूर्वोक्तपिंडि
कास्थापनप्रकारेणस्थापयित्वा तत्ररत्नन्यासादिकृत्वा तत्रदेवंशलाकांतरितवज्रलेपादिनादृढीकृत्यवाससामूर्त्याच्छादनप्रकारे
णपुनरर्चाशुद्धिंकुर्यात् ॥ जीर्णैवचेत्पिंडिकास्थाप्यतेतर्हितत्रदेवंस्थापयित्वार्चाशुद्धिंकुर्यात् ॥ वास्तुयागग्रहमखादिकृत्वामंगल
वाद्यघोषेणसुमुहूर्तेशलाकांनिष्काश्यदेवंस्थिरीकृत्यमहापूजांकुर्यात् ॥ ततःदेवाभिषेकजलपूरितांपूर्वोक्तांताम्रादिपात्रीमादाय
तत्रमनोध्यानेनप्रणवादिषोडशन्यासमनोगतानिअकारादितत्वानिआदायस्वस्थानस्थितदेवेनियोजयेत् ॥ तत्प्रकारस्तु ॥ पात्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जलस्थमकारंदेवस्ययथास्थानंन्यसामिइति प्रणवादिषोडशन्यासांतर्गतानितत्वानिदेवस्ययथास्थानंविन्यस्यपिंडिकातत्वानि
पिंडिकायांविन्यस्यतज्जलंदेवस्यचरणयोर्निषिच्यपुनर्महापूजांमहानैवेद्यादिमहोत्साहंबलिप्रदानंकृत्वाब्राह्मणान्संपूज्याभिषेका
द्याशिषोगृहीत्वाब्राह्मणान्भोजयेत् ॥ इतिजीर्णप्रतिमादिप्रतिष्ठा ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २८८ ॥ प्रोक्षणविधिः ॥

श्रीः ॥ कर्ताआचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्यदेवस्यप्रासादस्यवाअमुकास्पृश्यस्पर्श-बहुकालपर्यंतंपूजालोप-अमेध्यव
स्तुस्पर्श-चोरहरणादिजनिताशुचित्वनिवृत्त्यर्थंपुनःपूर्ववच्छुचित्वेनव्यवहारसिद्ध्येप्रोक्षणविधिंकरिष्ये ॥ इतिसंकल्प्य ॥ देवमु
द्वास्यपंचवारंमृज्जलैःप्रक्षाल्यब्रह्मकूर्चसंस्कृतपंचगव्यैर्देवंस्नापयित्वाकुशैर्विशोध्य पंचगव्यादिभिःप्रासादंचसंप्रोक्ष्यमूलेनाष्टोत्त
रशतवारंदेवंप्रोक्ष्य पुनर्मूलेनदेवमूर्धादिपीठांतंसंस्पृश्यतत्वन्यासलिपिन्यासमंत्रन्यासपूर्वकंस्थिरप्रतिष्ठोक्तविधिनाप्राणप्रतिष्ठां
कृत्वा महापूजांकुर्यात् ॥ महद्दोषादौतदनुगुणमहापूजाविधिः ॥ रजस्वलादिस्पर्शेतुपुनःप्रतिष्ठाकार्या ॥ ॥ ७ ॥

॥ २८९ ॥ वापीकूपतडागाद्युत्सर्गः ॥

श्रीः ॥ कर्तासपत्नीकोवस्त्राभरणगंधमाल्याद्यलंकृतोदेशकालौसंकीर्त्यअमुकशर्मणोममसर्वपापक्षयपूर्वकरुद्रालयगमनानेककल्प
व्यापिस्वर्गलोकहर्षपरार्धद्वयकालव्यापिमहत्तपःप्रभृतिलोकांगनासहितनागपूर्वकांगनासहितपरमविष्णुपदप्राप्तिकामश्चामुकज

---

१ तत्रपूर्वदिने सौवर्णीकूर्ममकरौराजतौमत्स्यदुंदुभौ ॥ ताम्रौकुलीरमंडूकावायसंशिंशुमारकं॥ वासोनवघटंसक्तून्लाजादधिपयोघृतं॥एवमुपकल्प्यमंड
लवास्तुपूजाग्रहयज्ञपक्षेतदुपयोगिसामग्रीमुपकल्पयेत्द्वयोर्वहूनांवाप्रतिष्ठानांयुगपच्चिकीर्षायांकूपारामप्रतिष्ठांगत्वेनवापीकूपप्रतिष्ठांगत्वेनेतिसंकल्पः॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

लाशयोत्सर्गंकरिष्ये वा स्वकृततडागस्यसर्वभोगार्हत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंशौनकोक्तविधिनोत्सर्गंकरिष्येइतिसंकल्प
येत् ॥ कूपस्यारामस्यचकूपारामयोरितिवासंकल्पऊह्यः ॥ तदंगत्वेनगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंगांदीश्राद्धमाचा
र्यवरणंचकरिष्येइतिसंकल्प्यक्रमेणतानिकृत्वा गंधाद्यलंकृतमुदकुंभंपुरस्कृत्यसपत्नीकःसबांधवःस्वस्तिनोमिमीतामितिवेदघोषे
णभेर्यादिनादेनचतडागदेशंगत्वातंप्रदक्षिणीकृत्यपश्चिमद्वारेणमंडपंप्रविशेत् ॥ तदभावेतडागादिपश्चिमतटेप्राच्यैशान्युदीच्य
न्यतरदिक्प्रवणांमार्जनोपलेपनवितानबंधनकदलीस्तंभाम्रपल्लवाद्यलंकृतांभुवंप्रविशेत् ॥ तत्राचार्यःयदत्रसंस्थितमितिसर्षपा
न्विकीर्यशुचीवइतिपंचगव्येनभुवंप्रोक्ष्यापोहिष्ठेनाद्भिःप्रोक्ष्यभद्रंकर्णेस्वस्तिनइतिप्रार्थ्य संस्कृतभुवोमध्येकुंडंस्थंडिलंवाहस्तमात्रं
कृत्वा तत्पूर्वभागेहस्तोच्छ्रायांचतुरस्रांकूर्मपृष्ठोन्नतांवेदिंकृत्वाकुंडस्थंडिलान्यतरैशानभागेग्रहवेदिंनैर्ऋत्यांवास्तुवेदिंकृत्वामंडप
पक्षेग्निमीळइत्यादितोरणाभिमंत्रणपूर्वकं पर्जन्यादिदेवतापूजनप्रभृतिप्रागादिशाखामूलेषुकुंभस्थापनांतंकुर्यात् ॥ ततोवास्तु
पूजनपक्षेपूर्वकृतनैर्ऋतवेद्यांचतुःषष्टिसंख्यपदकंवास्तुमंडलंकृत्वातत्रदेवताआवाह्यपूजयेत् ॥ अत्रवास्तुमंडलंषण्णवत्यधिकश
तसंख्यपदकंकार्यमित्युक्तंकौस्तुभे ॥ केचित्तुतडागादौसैकविंशच्छतपदंकूपेषुचतुश्चत्वारिंशच्छतपदमित्याहुः ॥ प्राग्वेद्यांसर्वतो
भद्रेब्रह्मादिमंडलदेवताश्चावाह्यसंपूज्य ततःमंडपाद्यभावपक्षेतुप्रार्थनानंतरमेवोपविश्यमंडूकादीनामभ्युत्तारणंकृत्वातेष्वावाह
नादिपूजांमंडूकादिदेवताभ्योनमइतिकुर्यात् ॥ स्थंडिलोपलेपनादिपूर्वकमग्निंप्रतिष्ठाप्यचत्वारिशृंगेत्यादिध्यानांते ग्रहयज्ञप
क्षेग्रहाणामावाहनादिपूजांतंकृत्वातदीशान्यांकलशस्थापनादिवरुणपूजांतंकृत्वाग्नेःपश्चिमतउपविश्य ॥ समित्रयमादायान्वा

१ ततोवेद्युपरिमहीद्यौरित्यादिविधिनाकुंभंसंस्थाप्यतीर्थेनापूर्यवाससावेष्टयगंधादिभिरभ्यर्च्यतस्मिन्कूर्मादीन्निक्षिपेदित्यन्यत्रविशेषः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धानंकुर्यात् ॥ व्याहृत्यंतेग्रहयज्ञवास्तुपक्षेतद्देवतान्वाधानपूर्वकंतदभावेवक्ष्यमाणदेवतान्वाधानमेवकुर्यात् ॥ अपःपंचविंशति
वारमाज्येन अपःनववारंसक्तुभिः पुनरपःनववारंघृताक्तलाजद्रव्येण वरुणमेकत्रिंशद्वारमाज्येन पुनर्वरुणमष्टवारंचरुणा तथा
भद्रदेवताःप्रत्येकंदशदशघृताक्ततिलाहुतिभिरेकैकाज्याहुत्यावा ॥ अंगहोमेवरुणंद्विरित्यादिपात्रासादनेचरुस्थाल्यासहसक्तुला
जस्थाल्योरप्यासादनं ॥ प्रणीताप्रणयनांतेअग्नेरीशानदेशेमहीद्यौरितिभूमिंस्पृष्ट्वाओषधयःसमितिधान्यंप्रक्षिप्यतत्रप्रागग्रान्कु
शान्निधाय कलशंइमंमेगंगेइतिगंगादिमहानदीजलेनापूर्ययुवंवस्त्राणीतिवासोवेष्टितंगंधद्वारामितिगंधपुष्पार्चितंचकृत्वा पंचप
ल्लवदूर्वायवपंचरत्नहिरण्यफलानिअश्वत्थेवइत्यादितत्तन्मंत्रैःप्रक्षिप्यमंडूकादिरूपाणितूष्णींप्रक्षिपेत् ॥ ततःपूर्णादर्वीतिपू
र्णपात्रपिहितानतंकलशमाजिघ्रकलशमितिमंत्रेणतेषुकुशेषुनिधाय तस्मिन्कलशेनिहितप्रतिमायांवरुणंसंपूज्य कलशस्यमुखे
विष्णुरित्यभिमंत्र्य देवदानवसंवादइतिप्रार्थ्यपवित्रांतर्हितेशूर्पेतूष्णींद्वात्रिंशद्वारंनिरुप्य तावद्वारंप्रोक्ष्यपयसिश्रपयेत् ॥ ततः
पयोदधिभ्यामालोडितसक्तूनेकस्यांस्थाल्यामन्यस्थाल्यामाज्यमिश्रितलाजांश्चप्रक्षिप्याज्यनिर्वापादिकालेआज्येनसहचरुसक्तु
लाजानांपर्यग्निकरणं संमार्गांतेसक्तून्लाजांश्चाग्नावधिश्रित्याभिघारणादिबर्हिरासादनमाज्यदक्षिणतःसांतरमुदक्संस्थंकृत्वाच
रुमभिघार्यांतर्बर्हिषिसादयेत् ॥ ततःसामान्यप्रधानांतेकृतेग्रहवास्त्वादिपक्षेतद्धोमांतेप्रधानाहुतीर्जुहुयात् ॥ आपोहि० चक्षसे
स्वाहा १ योवः २ तस्माअ० ३ शंनोदेवी० ४ ईशानावा० ५ अप्सुमेसोमो० ६ आपःपृणीत० ७ इदमापः० ८ आपोअद्या०
वर्चसास्वाहा ९ ॥ आपोअस्मान्मा० एमिस्वाहा १ द्रप्सश्चस्कंदप्रथमाँअनुद्यूनिमंचयोनिमनुयश्चपूर्वः ॥ समानंयोनिमनुसं
चरंतंद्रप्संजुहोम्यनुसप्तहोत्राःस्वाहा २ यस्तेद्रप्सःस्कंदतियस्तेअंशुर्बाहुच्युतोधिषणायाउपस्थात् ॥ अध्वर्योर्वापरिवायःपवित्रा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्तंतेंजुहोमिमनसावषट्कृतंस्वा० ३ यस्तेद्रप्सःस्कन्नोयस्तेंअंशुरवश्चयःपरस्तुचा ॥ अयंदेवोबृहस्पतिःसंतंसिंचंतुराधसेस्वा० ४ पर्यस्वतीरोषधयःपर्यस्वान्मामकंवचः ॥ अपांपर्यस्वदित्पयस्तेनमासहशुंधतस्वाहा ५ ॥ समुद्रादूर्मिर्मधुमाँउदारदुपांशुनास म० १ वयंनाम० २ चत्वारिशृंगा० ३ त्रिधाहितं० ४ एताअर्षति० ५ सम्यक्स्रवंति० ६ सिंधोरिव० ७ अभिप्रवंत० ८ कन्याइव० ९ अभ्यर्षत० १० धामंतेविश्वं० ११ ततोदर्व्यामाज्येनोपस्तीर्यसक्तुभ्योद्धिरवदायहविरभिघार्यावत्तमभिघा रयेत् एवंपुनःपुनरवदायनवाहुतीर्जुहुयात् ॥ प्रसुवआपो० १ प्रतेरद० २ दिविस्वनो० ३ अभित्वासिंधो० ४ इममेगंगे० ५ तृष्टामया० ६ ऋजीत्येनी० ७ स्वश्वासिंधुः० ८ सुखंरथं० ९॥ ततोदक्षिणेनतडागंसयजमानआचार्योलाजानादायप्राग्भा गेगत्वातत्रोपविश्यभुवंप्रक्षाल्यतस्यांहस्तेनादायलाजानांनवाहुतीर्जुहुयात्॥ अंबयोयं० १ अमूर्या० २ आपोदेवी० ३ अप्स्वां १ तर० ४ अप्सुमे० ५ आपःपृणी० ६ इदमापः० ७ आपोअद्या० ८ संमाग्ने० ९ ॥ एवमुत्तरपश्चिमदक्षिणदिक्षुनवला जाहुतीर्जुहुयात् ॥ क्रमेणउक्तेष्वाज्यसक्तुलाजहोमेषुसर्वत्रअन्वइदंनममेतित्यागः ॥ (अयंलाजहोमोनवाग्भिःसकृदग्नावेवोक्तो बालकृष्णपद्धतौ)॥ अथाग्नेःपश्चिमतउपविश्यैकत्रिंशदाज्याहुतीर्जुहुयात् ॥ नहितेक्षत्रं० १ अवुध्ने० २ उरुंहिराजा० ३ शतं तेरा० ४ अमीयऋक्षा० ५ तत्त्वायामि० ६ तदिन्नक्तं० ७ शुनःशेपोह्य० ८ अवतेहेळो० ९ उदुत्तमं० १० यच्चिद्धितेः ११ मानोवधा० १२ विमृळीका० १३ पराहिमे० १४ कदाक्षत्र० १५ तदित्समा० १६ वेदायो० १७ वेदमासो० १८ वेदवातस्य० १९ निषसाद० २० अतोविश्वा० २१ सनोविश्वाहा० २२ बिभ्रद्रापिं० २३ नयंदिप्संति० २४ उतयोमा० २५ परामेयं० २६ संनुवोचा० २७ दर्शन्नु० २८ इममेवरुण० २९ त्वंविश्वस्य० ३० उदुत्तमं० ३१ ॥ सर्वत्रवरुणायेदं

॥३१७॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नममेतित्यागः ॥ ततश्चरोरवदानसंपदाष्टावाहुतीर्जुहुयात् ॥ प्रसम्राजे० १ वनेषुव्यं० २ नीचीनबारं० ३ उनत्तिभू० ४ इमामूष्वा० ५ इमामूनु० ६ अर्यम्यंवरुण० ७ कितवासो० ८ ॥ सर्वत्रवरुणायेदंन० मंडलदेवतानामन्वाधानानुसारेण जुहुयात् ॥ अंगहोमादिप्रायश्चित्तहोमांतेकृते ग्रहमखादिसत्वेमाषभक्तबलिदानादिशिख्यादिभ्यःपायसबल्यादिदत्वापूर्णाहुत्यंतंकृत्वाततःप्रणीतानिनयनसंस्थाजपपरिस्तरणविसर्जनपरिसमूहनादि ॥ ततःस्थापितकलशोदकैकदेशेनाचार्योदूर्वापल्लवैरुदङ्मुखस्तिष्ठन्सबांधवस्यप्राङ्मुखस्ययजमानस्याभिषेकंकुर्यात्समुद्रज्येष्ठासुरास्त्वेत्यादिभिरभिषेकमंत्रैः ॥ तत्रपत्नीवामतउपविशेत् ॥ ततोधृतश्वेतवस्त्राणांसर्वेषांश्वेतचंदनपुष्पमालाभिराचार्यार्चनंकुर्यात् ॥ ततआचार्यःसयजमानबांधवस्तडागंप्रदक्षिणीकृत्यजलाश्योःपरितआज्यधारांरक्षोहणमितिसूक्तेनकुर्वंतोऽग्निंप्रदक्षिणीकुर्युः ॥ ततःस्थापितकुंभात्कूर्मादिरूपाण्युद्धृत्यतडागमध्येसाचार्योयजमनःकुंभंनिदध्यात् ॥ तथाकूपादावपि ॥ सतोस्मैतडागायकूपायवास्वस्तिभवंतोब्रुवंत्वितिब्राह्मणान्वाचयेत् ॥ तेचास्मैतडागायस्वस्तीतिवदेयुःकूपादावप्येवमूह्यं ॥ ततःपश्चिमतीरएवसर्वतीरेषुवाशतंयथाशक्तिब्राह्मणान्भोजयित्वायथाशक्तितेभ्योदक्षिणांदत्वोभयमपिसंकल्प्यवावाहितब्रह्मादीनामन्येषांग्रहादीनांचोत्तरपूजनपूर्वकंविसृष्टानामाचार्याय निवेदनंकृत्वाजलमध्येपश्चिमतीरमारभ्यैशानदिक्पर्यंतंपुच्छाग्रान्वारब्धोगांनयेत् ॥ इमांधियंशिक्षमाणस्यदेवाक्रतुंदक्षंवरुणसंशिशाधि ॥ ययातिविश्वादुरितातरेमसुतर्माणमधिनावंरुहेम ॥ इतिमंत्रेण (इरावतीतिमंत्रेणेत्यन्यत्र) ॥ अवतीर्यमाणांतांगामनुमंत्रयीत ॥ इदंसलिलंपवित्रंकुरुष्वशुद्धाःपूताअमृताःसंतुनित्यं ॥ मांतारयंतीकुरुतीर्थाभिषेकंलोकाल्लोकंतरतेतीर्यतेचेति॥ गोरुत्तरणंवापीकूपयोर्नेतिकेचित् ॥ ततईशान्यांपरपारेगत्वाजानुदघ्नजलेउदङ्मुख्यागोःपुच्छमादायगुरुणान्वितोयजमानःस

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कुशैर्यवतिलैःस्वशाखोक्तरीत्या देवर्षिपितृणांतर्पणंकुर्यात् ॥ तत्रप्राङ्मुखोदेवानुदङ्मुखऋषीन्दक्षिणामुखःपितॄंस्तर्पयेत् ॥ तत आपोअस्मान्मातरइत्युत्तीर्य सूयवसाद्भगवतीहिभूयाइतिगामैशान्यांदिशिस्थापयेत् ॥ यदिगौर्हिंकुर्याद्धिंकृण्वतीवसुपत्नीत्यनुमंत्रयेत् ॥ ततोवस्त्रवेष्टितकंठांहेमशृंगींरौप्यखुरांताम्रपृष्ठांकांस्यदोहांवृषप्रजांतांगामाचार्यायदद्यात् ॥ यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ यदिगोरुत्तारणकालेछंदोगद्वाराप्लवाख्यसामगानंकार्यतेतदासा

---

१ अत्रपौराणमंत्रैरपितर्पणंकेचिदाहुर्यथा ॥ पितापितामहश्चैवतथैवप्रपितामहः । स्वस्वपत्नीसमेतास्तेप्रीयंतांजलतर्पणात् ॥ अजातदंतायेकेचिद्येचगर्भेव्यवस्थिताः । तेषामुद्धरणार्थायकूपस्योदकतर्पणं ॥ पितृव्यकाश्चयेस्माकंभ्रातरश्चसहोदराः । गुरवोमातुलाःपुत्राआचार्याःसखिबांधवाः ॥ एतेषांप्रीणनार्थायतडागोदकतर्पणं ॥ बंधुवर्गाश्चयेकेचिद्गोत्रनामविवर्जिताः । स्वगोत्राःपरगोत्रावातेभ्यश्चेदंतिलोदकं ॥ अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे । विद्युत्पातहतायेचतेभ्योपीदंतिलोदकं ॥ अप्सरादेवपत्न्यश्चमातरश्चंडिकास्तथा । दिक्पालालोकपालाश्चग्रहदेवाधिदेवताः । तेषांवैप्रीणनार्थायतडागोदकतर्पणं ॥ रौरवेचांधतामिस्रेकुंभीपाकेचयेगताः । अनेकयातनासंस्थाःप्रेतलोकेचयेगताः । पच्यंतेसंयमिन्यांयेयेनीतायमकिंकरैः । असिपत्रवनेघोरेतेभ्योदद्यांतिलोदकं ॥ विश्वेदेवास्तथासाध्याआदित्याश्चमरुद्गणाः । क्षेत्रपीठोपपीठानिनद्यश्चैवससागराः । पातालेनागपत्न्यश्चनागाश्चैवसपर्वताः । पिशाचागुह्यकाःप्रेतागणगंधर्वराक्षसाः । पृथिव्यापश्चतेजश्चवायुराकाशमेवच । तेसर्वेतृप्तिमायांतुतडागोदकतर्पणात् ॥ पितृवंशेमृतायेचमातृवंशेतथैवच ॥ गुरुश्वशुरबंधूनांयेचान्येवांधवामृताः ॥ येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः ॥ क्रियालोपगताश्चैवजात्यंधाःपंगवस्तथा ॥ विरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेमम ॥ तेभ्योदत्तंतडागस्यजलमेतत्सुतृप्तये ॥ आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीयाः ॥ वंशद्वयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसेवकाश्च ॥ मित्राणिसख्यःपशवश्चवृक्षाद्दष्टाश्चस्पृष्टाश्चकृतोपकाराः ॥ जन्मांतरेयंममसंगताश्चतेभ्यश्चकूपोदकमेतदस्तु ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं ॥ वापीकूपादौतत्तदूहःकार्यः । नीलकंठस्त्वस्यनिर्मूलतामाह ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मगायैतद्गोदानमाचार्यायान्यापयस्विनीदेया ॥ ततोयजमानःसकुशतिलोदकंअंजलावादायोत्सर्गंकुर्यात् ॥ एतत्तडागस्थितं
जलममुकगोत्रोऽमुष्यप्रपौत्रोऽमुष्यपौत्रोमुष्यपुत्रोमुकशर्माहंपरमेश्वरप्रीतिकामोनानाभूतेभ्यःसाधारणमुत्सृजामि देवपितृमनु
ष्याःप्रीयंतामिति ॥ आचार्योपिदेवपितृमनुष्याःप्रीयंतामितिवदेत् ॥ ततोयजमानः ॥ सर्वसत्वेभ्यउत्सृष्टंमयैतज्जलमूर्जितं ॥
सेवंतांसर्वभूतानिदानपानावगाहनैः ॥ सामान्यंसर्वभूतेभ्योमयादत्तमिदंजलं ॥ धर्मार्थकाममोक्षेषुसाधनंस्यादहर्निशमिति ॥
ततोजलांतिकदेशादग्नेःपश्चिमदेशमागत्यतत्रोपविश्यरजतरूपामन्यांवाभूयसींदक्षिणांब्राह्मणेभ्योदत्वाशिल्पिनोवस्त्रादिनासंपू
ज्यविष्णुंस्मृत्वाभगवदर्पणंकुर्यात् ॥ इत्यनंतदेवीयेतडागकूपारामाद्युत्सर्गविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ २९० ॥ कूपतडागादौमृतदोषशांतिः ॥

श्रीः ॥ तत्रादौसूतकोत्तरंमृतदुष्टजलाशयात्सहस्रशतादिकलशान्विप्रादिवर्णगवादिपशुतारतम्येनबहिर्निष्काश्याचमनादिदे
शकालकीर्तनांतेऽस्मिन्कूपेनृगवादिमरणजन्यदोषनिबर्हणद्वारास्यसर्वेषांजलपानावगाहादौजलशुद्धयेशांतिंकरिष्ये ॥ इतिसं
कल्प्यगणेशपूजनाद्याचार्यवरणांतंकुर्यात् ॥ आचार्यःप्रादेशकरणांतेस्थंडिलात्पूर्वतःसर्वतोभद्रेमहीद्यौरित्यादिविधिवत्स्थापि
तकलशेसुवर्णप्रतिमायांतत्त्वायामीतिवरुणमावाह्यसंपूज्याग्निंप्रतिष्ठाप्यग्रहान्संपूज्यान्वादध्यात् ॥ व्याहृत्यंतेग्रहानुत्कीर्त्यप्रधा
नंवरुणंतिलसर्पिर्भ्यांप्रतिद्रव्यं १००८ वा १०८ आहुतिभिःशेषेणेत्यादिद्रव्यत्यागांतेकर्मणिकृतेन्वाधानानुसारेणहुत्वाजल
शुद्धिंकुर्यात् ॥ ब्रह्मकूर्चविधिनासाधितंपंचगव्यंसप्तमृदःगंगादिपुण्यनदीजलानिजीर्णकूपप्रस्रवणोदकानिवातत्तन्मंत्रैःकूपेप्र
क्षिप्य कुंडभस्मतिलामलकशंखोदकविष्णुपादोदकानिचक्षिप्त्वाप्रायश्चित्तसूक्तानिपुरुषसूक्तपवमाननतमंहोइतिवाइतिअस्यवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मीयंकस्यनूनमित्यादीनिवारुणसूक्तानिजप्त्वावगाह्यशांतिंपठेत् ॥ अस्यकर्मणःपुण्याहंभवंतोब्रुवंत्वित्यादिपुण्याहंवाचयित्वाहो
मशेषंसमाप्ययजमानाभिषेकआचार्यपूजनादिकृत्वातस्मैगामन्येभ्योदक्षिणांदत्वा ब्राह्मणभोजनंसंकल्प्यकर्मेश्वरार्पणंकुर्यात् ॥

॥ २९१ ॥ वनोपवनवृक्षोत्सर्गः ॥

श्रीः ॥ अथाशक्तस्यश्रद्धायुक्तस्यआरामोत्सर्गांतरेनानादेववृक्षकल्पवृक्षाणांमध्येअश्वत्थोदुंबरपलाशवटानांमध्येन्यतमस्योत्स
र्गेक्रियमाणेउत्सर्गदिनात्पूर्वंयथाशक्तिपाषाणचूर्णमृत्तिकांयवानालवालंचतुरस्रंवृत्तंवासंपाद्यमध्येऽवटेसुवर्णपंचरत्नानिनिक्षि
प्य ॥ ॐवनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयꣳरुहेम ॥ यंत्वायꣳस्वधितिस्तेतिजानःप्रणिनायमहतेसौभगाय ॥ इतिमंत्रेण
रोपणंभावयित्वा नर्यप्रजांगृहावैप्रतिष्ठेतिमंत्राभ्यां ध्रुवप्रतिष्ठांविधायआरामोक्तशुभदिवसेभूशुद्ध्यादिनात्मानंपावयित्वाजितें
द्रियः यथोक्तमंडपेरंगवल्ल्याद्यलंकृतेपीठेवृक्षस्यपूर्वपश्चिमोत्तरदिक्छायायांवासपत्नीकःप्राङ्मुखउपविश्याचम्यप्राणानायम्यदे
शकालावुत्कीर्त्यममेहजन्मनिजन्मांतरेचपुत्रपौत्रकुलाभिवृद्धिसल्लोकावाप्त्यादैहिकामुष्मिकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसि
द्धिद्वारामामाभीष्टेश्वरप्रीत्यर्थंअमुकवृक्षस्योद्यापनंश्वःसद्योवाकरिष्ये॥ तत्रादौगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्रा
द्धमाचार्यादिवरणंचकरिष्ये इतिसंकल्प्यपंचगव्यपंचामृतपंचफलपंचखाद्यपंचपल्लवपंचरत्नपंचरंगपंचपिष्टानिपंचसूत्राणिपंच
मंगलद्रव्याणिपंचधान्यसप्तधान्याष्टादशधान्यानिमधुपर्कंसाहित्यसुवर्णादिप्रतिमाताम्रमयपूर्णपात्रकलश १२ वस्त्राणिसुवर्ण
शलाकासुवर्णफलानिसप्तअधिवासनार्थहोमसामग्रींनवग्रहसमिधश्चवर्ज्यतिलन्यग्रोधोदुंबराश्वत्थपलाशापामार्गसमित्पंचकह
वनसंख्याअष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशतिर्वाप्रतिद्रव्यंयथोक्तंआचार्यब्रह्मसदस्यादिब्राह्मणसुवासिनीकुमारीकुमारान्गीत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाद्यादिसर्वसंपाद्यप्रारभेत् ॥ आचार्यःकर्मसंकल्प्यशरीरशुद्ध्यर्थंपुरुषसूक्तादिजप्त्वायदत्रेतिसर्षपान्विकीर्य पंचगव्यं० शुचीवो० अग्निःशुचि० आपो० ३ हिरण्य० पवमानः० इतिप्रोक्ष्य भद्रंकर्णे० स्वस्तिन० इत्यादिप्रादेशांतंकुर्यात् ॥ संभवेमंडपपूजांवि धायस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्य देवयजनस्थेशान्यांसग्रहपक्षेग्रहपूजांकलशंचसंपूज्यकलशस्यमुखे० देवदानवसंवादे० इ त्यादिप्रार्थ्यमध्यवेद्यांब्रह्मादिमंडलदेवताआवाहनपूर्वकंसंपूज्यतदुपरिमहीद्यौरित्यादिविधिनाकलशप्रतिष्ठांपूजांचविधायपूर्ण पात्रेप्रतिमासु गणानांत्वा० इतिगणेशं १ ब्रह्मजज्ञानं० इतिब्रह्माणं २ इदंविष्णु० इतिविष्णुं ३ त्र्यंबक० इतिरुद्रं ४ विश्वा निनोदुर्गहा० इतिदत्तात्रेयं ५ चावाह्य आवाहनमंत्रैः पुरुषसूक्तेनवासंपूज्यप्रणवेननमेत् ॥ मंडलादुत्तरेरंगवल्यादिपद्मेधा न्यराशौसुवर्णादिपात्रेदुग्धाज्यमधुपूरितेयस्यवृक्षस्योद्यापनंतत्फलाकाराणिफलानिसप्ताष्टवा याःफलिनीरितिप्रतिष्ठाप्यसंपूज्य वस्त्रेणाच्छाद्यअधिवासयेत् ॥ वृक्षस्यालवालंपंचगव्येनशुद्धोदकेनचसंप्रोक्ष्यचित्रयेत् ॥ गंधाद्यैरलंकृत्यत्रिसूत्र्यावेष्ट्यवृक्षेसर्व देवान्भावयेत् ॥ सर्वौषधिकलशेनवृक्षमूलमासिच्य हरिद्रादिनामंगलस्नानंचकुर्यात् क्षीरतीर्थोदककलशाभ्यां आपोहिष्ठा० ३ हिरण्यवर्णाः ४ पावमानीभिः मंगलसूक्तेनचत्रिःप्रदक्षिणंपरिषिंचेत् ॥ वाससासंवेष्ट्यगंधादिनासंपूज्यवनस्पनेशतवल्श० इति वनस्पतेवीड्वंगोहीति समिद्धस्यश्रयमाणइतिप्रार्थयेत् ॥ ततःपुष्पमालांसमर्प्यनमस्कुर्यात् ॥ हेमसूच्यास्कंधेपत्रादौकर्णौप्रक ल्प्यवेधंकुर्यात् ॥ तदुपरिचक्षुषीप्रकल्प्य हैमशलाकयांजनं अंजंतित्वेतिअंजयित्वागुग्गुलादिनाधूपयित्वा ॥ एवंप्रतिवृक्षंअश क्तौवृक्षांकेवामूलसमीपेप्रकल्पयेत् ॥ मूलसमीपेपीठादौमहीद्यौरित्यादिविधिनासप्तधान्यराशौयवगोधूमव्रीहितिलकंगुश्यामा कचणक ७ संभवेअष्टादशमिश्रितधान्यराशौकलशंप्रतिष्ठाप्यसंपूज्यपूर्णपात्रेरोपितवृक्षप्रतिमांतदाकारांप्रतिष्ठाप्य वनस्पतेश

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तवल्श० इतिमंत्रेणवनस्पतिंसंपूज्य ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ यशःप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इति प्रार्थयेत् ॥ ततोग्निसमीपमागत्यान्वादध्यात् ॥ समित्रयमादाय श्रद्धएहीत्यादिप्राणायामांतं सामान्यप्रधानांतमुक्त्वा वैशेषिकप्रधानहोमे गणपतिब्रह्मविष्णुरुद्रदत्तात्रेयान् तिलाज्यन्यग्रोधोदुंबराश्वत्थपलाशापामार्गसमिद्भिःप्रत्येकंप्रतिद्रव्यंतत्तल्लिंगोक्तपूजामंत्रैर्नाममंत्रैर्नमोंतैर्वा १०८।२८ वा वेदानांहोमे अग्निमीळे० १ इषेत्वोर्जेत्वा० कर्मणे २ अग्नआयाहि० ३ शंनोदेवीरभिष्टये ४ इतिप्रत्यृचंप्रतिवेदंतिलाज्याहुति लाजाभ्यांप्रतिद्रव्यमष्टाष्टसंख्याकाभिः तथैवतैर्मंत्रैर्नमोंतैर्नाममंत्रैर्द्रव्यलिंगमंत्रैर्वा क्षीरदधिघृतमधुद्रव्यैः ऋग्वेदादीनामेकैकेनद्रव्येणप्रत्येकं २८ वा ८॥ द्रव्यलिंगकामंत्राः पयस्वती० १ दधिक्राव्णो० २ घृतं मिमि० ३ मधुवाता० ४ वनस्पतिहोमेवनस्पतेशतवल्श० इतिमंत्रेणपूर्वोक्तसमिद्भिःप्रतिसमिधं ८ ब्रह्मादिमंडलदेवताएकैकाहुत्याआज्येनयक्ष्ये अंगहोमेवरुणंद्विरित्याद्यन्वाधानक्रमेणहोमंसंपाद्यपूर्णाहुत्यंतंअधिवासनपक्षेपूर्वेह्निसद्यःपक्षेसद्योवाकृत्वाततोलंकृतांगांवनमध्येप्राङ्मुखीमुत्सृजेत् ॥ ईशान्यांनिर्गमयेत् ततस्तांप्रार्थयेत् ॥ वनेतु ॥ इदंवनंपवित्रंकुरुष्वशुद्धंपूतममृतमस्तुनित्यं ॥ मांतारयंतीसर्वफलाभितृप्तंलोकाल्लोकानंदलोकंप्रजातुं ॥ वृक्षेतु इमंवृक्षमित्याद्यूहःकार्यः ॥ ततोधिवासितफलैरुदकुंभैश्चवनंवृक्षंवासेचयेत् ॥ ततोयजमानस्याभिषेकः ॥ ततआचार्यसंपूज्यतस्मैसवत्सांगांमूल्यंवादत्वातद्धस्तेसोपस्करप्रतिमादिप्रतिपाद्यान्यानृत्विजोदक्षिणादिभिःसंतोष्ययथाशक्तिब्राह्मणसुवासिनीभोजनंसंकल्प्यभूयसींदक्षिणांदत्वाकर्मेश्वरार्पयेत् ॥ इतिपूर्तानुसारिवनोपवनवृक्षाणामुद्यापनोत्सर्गः ॥

॥ छ ॥

॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २९२ ॥ रुद्रविधिः ॥

श्रीगणेशायनमः ॥ तत्रतावद्यद्यप्यनेकासुयजुःशाखासुरुद्रःपठ्यतेतथापितैत्तिरीयशाखानुसारेणरुद्रप्रयोगउच्यते ॥ स्मार्तरु द्रप्रयोगस्यबौधायनसूत्रमूलकत्वेनबह्वृचादीनांचतत्रबौधायनंग्राह्यंबह्वृचादिभिरादरादितिवाक्यानुसारेणबौधायनीयानुरोधि त्वादिति ॥ इहचरुद्रानुष्ठानेत्रैवर्णिकानामेवाधिकारोनस्त्रीशूद्रानुपनीतानां ॥ तेषांवैदिकमंत्रयुक्तकर्मण्यध्ययनाद्यभावेनसाक्षा द्वचनाभावेनानधिकारादिति ॥ अन्यत्रचैतद्विस्तरेणनिर्णीतं ॥ तत्ररुद्रःपंचधा ॥ रूपंरुद्रीरुद्रोमहारुद्रोतिरुद्रश्चेत्येकादश गुणवृद्ध्या ॥ सर्वश्चत्रेधा ॥ जपरुद्रोहोमरुद्रोभिषेकरुद्रश्चेति ॥ जपरुद्रोपिद्वेधा ॥ केवलजपात्मकोहोमांगश्चेति ॥ होमाभिषेकयो स्तुकेवलतदात्मकत्वमेव ॥ तत्रतावत्पापक्षयकामःश्रीरुद्रप्रीतिकामोवा उत्तरायणादौगुरुशुक्रास्तबाल्यवार्धकादिरहितेशुभेका लेशुक्लपक्षादौरिक्ताभौमव्यतीपातविष्ट्यादिदोषरहितायांद्वितीयादिस्वाध्यायशुभतिथौचंद्रानुकूल्येकृतमांगलिकस्नानःशुचिःशु क्लवासाःसपत्नीकोयजमानःपूजितेष्टदेवतोगोमयलिप्तेशुचौदेशेप्राङ्मुखउपविश्यप्राणानायम्यदेशकालौसंकीर्त्य ममकायिका दिसर्वपापक्षयार्थंश्रीरुद्रप्रीत्यर्थंवाअमुकरुद्रमहंकरिष्यइतिसंकल्पयेत् ॥ पुत्रकामस्तुदीर्घायुःसुपुत्रसिद्ध्यर्थंमहारुद्रमहंकरिष्य इतिमहारुद्रमेवसंकल्पयेत् ॥ सनवग्रहरुद्रकरणेतुसनवग्रहमखरुद्रंकरिष्यइतिविशेषः ॥ एवंप्रधानसंकल्पंविधायअस्मिन्कर्म णिनिर्विघ्नसमाप्तिसिद्ध्यर्थंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धमाचार्यादिवरणंचकरिष्यइतिसंकल्पयेत् ॥ प्रत्ये कंवासंकल्पः ॥ ततःषोडशभिःपंचभिर्वोपचारैर्गणेशंपूजयित्वा कलशपूजापूर्वकंउक्तविधिनापुण्याहंवाचयित्वागौर्यादिषो डशब्राह्म्यादिसप्तमातृश्चपदार्थानुसमयेनपूजयेत् ॥ सर्वत्रचाक्षतपुंजादौपूजनमावाहनादिविसर्जनांतंकुर्यात् ॥ प्रतिमापूजने

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्वावाहनविसर्जनेनस्तः ॥ ततोनांदीश्राद्धंकुर्यात् ॥ ततःशांतंसुव्रतंवेदविदंकुडुंबिनमाचार्यममुकप्रवरोपेतोमुकगोत्रोमुकश
र्माहं अमुकप्रवरोपेतममुकगोत्रममुकशर्माणंब्राह्मणमाचार्यत्वांवृणइतिवृणुयात् ॥ क्षत्रियेत्वमुकवर्मेति वैश्येत्वमुकगुप्तेति ॥
ततःप्रार्थयेत् ॥ आचार्यस्तुयथा० ॥ एवमेवब्रह्माणंवृत्वायथाचतुर्मुखइतिप्रार्थयेत् ॥ जपहोमादिकंतुस्वंयमेवकुर्यात् ॥ स्वस्या
शक्तौस्वप्रतिनिधित्वेनजपाद्यर्थंब्राह्मणान्वृणुयात् ॥ पुत्रकामस्तुऋत्विजोवृत्वाप्रत्येकंप्रार्थयेत् ॥ भगवन्सर्वधर्मज्ञसर्वधर्मभृ
तांवर ॥ विततेममयज्ञेस्मिन्नृत्विक्त्वंभवसुव्रतेति ॥ ततःसदस्यंवृणुयात्प्रार्थयेच्च ॥ सर्वकर्मणामुपद्रष्टाभवेतिप्रार्थयेच्च ॥ तत्र
रूपेरुद्रीपक्षेचएकएव ॥ रुद्रमहारुद्रेष्वेकएकादशवा ॥ अतिरुद्रेएकादशएकविंशत्युत्तरंशतंवेतिऋत्विक्संख्या उपद्रष्टारंवृ
त्वा ॥ प्रतिनिधिपक्षेत्वनियमइतिसांप्रदायिकाः ॥ सग्रहपक्षेग्रहरुद्रजपार्थत्वेनैषांवरणंकार्यं ॥ यद्वारुद्रजपार्थब्राह्मणवरणा
त्पूर्वंग्रहजपार्थमनियमेनैकंद्वौत्रीन्वाविप्रान्वृणुयात् ॥ ततआचार्यादीन्मधुपर्केणार्हयित्वावस्त्रालंकारादिभिःपूजयेत् ॥ स्मार्ते
मधुपर्केकेचिन्नेच्छंति ॥ प्रतिनिधित्वेनजपार्थवरणेवस्त्रादिपूजैवनमधुपर्कः ॥ अथाचार्यादयःशिवायतनादौपुण्यनद्यादितीर्थ
तीरेगोष्ठादिपुण्यदेशेब्राह्मणगृहेयजमानगृहेतदीशानदिग्भागेवाशुचौदेशेन्यासपुरःसरंजपादिकुर्युः ॥ सग्रहपक्षेपूर्वोक्तक्रमेणग्र
हमंत्रजपपुरःसरंरुद्रजपःकार्यः ॥ तत्रग्रहाणांप्रत्येकमयुतंसहस्रंशतंवाकर्तृतारतम्येनसंख्याज्ञेया ॥ ॥ छ ॥

॥ २९३ ॥ रुद्रजपादौन्यासविधिः ॥

श्रीः ॥ तत्रबौधायनमतेपंचांगन्यासाः ॥ तत्रशिखाद्यस्त्रांतमेकत्रिंशदंगन्यासःप्रथमः ॥ मूर्धादिपादांतंदशांगन्यासोद्वितीयः ॥
पादादिमूर्धांतंपंचांगन्यासस्तृतीयः ॥ गुह्यादिमस्तकांतंपंचांगन्यासश्चतुर्थः ॥ हृदयाद्यस्त्रांतंपंचांगन्यासःपंचमः ॥ शातातप

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मतेतुप्रजननादिसर्वांगपर्यंतंषोडशांगन्यासःषष्ठःसर्वत्रजपादौ ॥ अभिषेकएवायंषष्ठोनान्यत्रेतिबौधायनः ॥ तेषांप्रकारः ॥
यातेरुद्रेतिशिखायां अस्मिन्महतीतिशिरसि सहस्राणीतिललाटे हꣳसःशुचिषदितिभ्रुवोर्मध्ये त्र्यंबकमितिनेत्रयोः नमःस्रुत्या
येतिकर्णयोः मानस्तोकइतिनासिकायां अवतत्येतिमुखे नीलग्रीवाद्धौकंठे नमस्तेअस्त्वायुधायेतिबाह्वोः यातेहेतिरित्युपबाह्वोः
येतिर्थानीतिहस्तयोः सद्योजातमितिपंचानुवाकान्पंचस्वंगुलीषु नमोवःकिरिकेभ्यइतिहृदये नमोगणेभ्यइतिपृष्ठे नमोहिरण्य
बाहवइतिपार्श्वयोः विज्यंधनुरितिजठरे हिरण्यगर्भइतिनाभौ मीढुष्टमेतिकट्यां येभूतानामधिपतयइतिगुह्ये सशिराजातवेदा
इत्यपाने मानोमहांतमित्यूर्वोः एषतइतिजान्वोः सꣳसृष्टजिदितिजंघयोः विश्वंभूतमितिगुल्फयोः येपथामितिपादयोः अध्य
वोचदितिकवचं नमोबिल्मिनइत्युपकवचं नमोअस्तुनीलग्रीवायेतितृतीयनेत्रं प्रमुंचेत्यस्त्रं यएतावंतइतिदिग्बंधंकुर्यात् ॥
इतिप्रथमः ॥ ॥ ॐ कारंमूर्ध्निविन्यस्यनकारंनासिकाग्रतः ॥ मोकारंतुललाटेवैभकारंमुखमध्यतः ॥ गकारंकंठदेशेतुवकारं
हृदिविन्यसेत् ॥ तेकारंदक्षिणेहस्तेरुकारंवामतोन्यसेत् ॥ द्राकारंनाभिदेशेतुयकारंपादयोर्न्यसेत् ॥ ॐ मूर्ध्नेनमइत्येतान्यक्षरा
णिनमोंतानिन्यसेदितिद्वितीयः ॥ ॥ सद्यंतुपादयोर्न्यस्यवामंन्यस्योरुमध्यतः ॥ अघोरंहृदिविन्यस्यमुखेतत्पुरुषंन्यसेत् ॥
ईशानंमूर्ध्निविन्यस्येतिसदाशिवात्मतांभावयित्वाकरसंपुटंकृत्वा त्रातारमिंद्रंत्वंनोअग्नेसुगंनःपंथाअसुन्वंतंतत्त्वायाम्यानोनियु
द्भिर्वयꣳसोमतमीशानमस्मेरुद्रास्योनापृथिवीतींद्रादीन्नमस्कृत्वात्मरक्षाकार्येति ॥ अस्मेरुद्रास्योनापृथिवीत्येताभ्यांत्रातारमिंद्र
मित्याद्यष्टौमंत्रान्प्रत्येकंसंपुटीकृत्यपठेदितिवासंपुटइतिकेचित् ॥ इतितृतीयः ॥ ॥ मनोज्योतिरबोध्यग्निर्मूर्धानंमर्माणितेजा
तवेदाइतिगुह्यजठरहृदयमुखशिरःसुविन्यस्यात्मरक्षाकर्तव्येतिचतुर्थः ॥ ॥ शिवसंकल्पंहृदयंपुरुषसूक्तंशिरःउत्तरनारायणंशि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

खाअप्रतिरथंकवचंशतरुद्रियमस्त्रं इतिपंचमः ॥ ॥ प्रजननेब्रह्मातिष्ठतु पादयोर्विष्णुस्तिष्ठतु हस्तयोर्हरस्तिष्ठतु बाह्वोरिंद्रस्ति० जठरेअग्निस्ति० हृदयेशिवस्ति० कंठेवसवस्तिष्ठंतु वक्त्रेसरस्वतीति० नासिकयोर्वायुस्ति० नयनयोःसूर्याचंद्रमसौतिष्ठतां कर्ण योरश्विनौदेवौतिष्ठतां ललाटेरुद्रास्तिष्ठंतु मूर्ध्न्यादित्यास्ति० शिरसिमहादेवस्ति० शिखायांचामुंडाति० पृष्ठेपिनाकीति० पुरतः शूलीति० पार्श्वयोःशिवाशंकरौतिष्ठतां सर्वतोवायुस्ति० ततोबहिःसर्वतोग्निर्ज्वालामालापरिवृतस्ति० सर्वेष्वंगेषुसर्वादेवताय थायथास्थानंति० माऽरक्षंतु इतिषष्ठः ॥ ॥ एवंसर्वत्रशातातपमते ॥ अभिषेकेएवबौधायनमतइत्युक्तं ॥ एषुन्यासेषुशाखां तरेविशेषउक्तः ॥ यथा ॥ प्रथमन्यासेहृदयानंतरंनमोगणेभ्यइतिपृष्ठेइतिपार्श्वानंतरंविज्यंधनुरितिजठरइतिजान्वनंतरंसंसृष्ट जिदितिजंघयोर्विश्वंभूतमितिगुल्फयोरिति ॥ प्रजननादिन्यासेचमूर्ध्न्यादित्यास्तिष्ठंत्वित्यनंतरंशिरसिमहापुरुषस्तिष्ठतु शिखा यांचामुंडातिष्ठत्वितिन्यासानंतरंहिरण्यगर्भोयःप्राणतोब्रह्मजज्ञानंमहीद्यौरुपश्वासयाग्नेनययातेअग्नइमंयमेत्यष्टौमंत्रान्जपेत् ॥ अथात्मानमित्यादिभिर्ध्यायेत् ॥ ततऋषिदैवतच्छंदांसिस्मरेत् ॥ तदभावेजपादेवैंयर्थ्यस्मरणात् ॥ तत्रसग्रहपक्षेमंत्राणामृ ष्यादीनिपूर्वोक्तग्रहस्थापनप्रकारेणज्ञेयानिविस्तरभियानात्रपुनःसंगृहीतानि ॥ ॥ छ ॥ ॥ छ ॥

॥ २९४ ॥ रुद्रस्यछंदर्ष्यादि ॥

श्रीः ॥ ततोरुद्रस्यर्ष्यादिस्मरेत् ॥ अथनमकानांप्रथमानुवाकेआद्यायाःकश्यपोद्वितीयायाआत्रेयस्तृतीयायाःकश्यपस्ततोद्वयो र्गौतमस्ततएकस्याःकण्वस्ततोद्वयोर्मरुत्वांस्ततएकस्याभगवांस्ततस्तिसृणांनारदस्ततस्तिसृणांभगवान् द्वितीयानुवाकस्यमंडूक स्तृतीयानुवाकस्यभगवांश्चतुर्थानुवाकस्यदुर्वासाः पंचमषष्ठानुवाकयोर्भगवान्सप्तमानुवाकस्यहेमकोशोष्टमानुवाकस्यनवमानुवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

केचनमोवःकिरिकांतंभगवानवशिष्टस्याग्निर्देशमानुवाकेप्रथमस्यपुलहोद्वितीयस्यस्कंदस्ततोद्वयोर्मांडव्यस्ततएकस्यदेवराट्तत
एकस्यभगवांस्ततएकस्यात्रिस्ततएकस्यवैयाघ्रस्ततएकस्यभगवांस्ततएकस्यवैराजस्ततएकस्यपुलहस्ततएकस्यनारदस्ततएकादशा
नुवाके आद्यानांचतुर्णांदुर्वासास्ततआसमाग्निदेवलइत्यृषयः ॥ प्रथमानुवाकेआद्यस्यरुद्रस्ततएकस्यशंभुस्ततएकस्यस्कंदात्मारु
द्रस्ततोद्वयोरुद्रस्ततएकस्यशंभुस्ततोद्वयोरादित्यात्मारुद्रस्ततएकस्यशंभुस्ततस्तिसृणांरुद्रस्ततस्तिसृणांभगवांस्ततोद्वितीयतृती
यानुवाकयोरुद्रश्चतुर्थपंचमषष्ठानुवाकानांशंभुःसप्तमानुवाकस्यरुद्रोष्टमानुवाकस्य नमोवःकिरिकेभ्यइत्यंतस्यनवमस्यभगवान
वशिष्टस्यरुद्रो दशमानुवाकेचतुर्णांरुद्रस्ततएकस्यनंदीश्वरात्मारुद्रस्ततएकस्यभगवांस्ततएकस्यशंभुस्ततएकस्यरुद्रस्ततएकस्यभ
गवांस्ततोद्वयोःशंभुस्ततोवशिष्टानांरुद्रइतिदेवताः ॥ प्रथमानुवाकेआद्येअनुष्टुभौततएकास्वराडनुष्टुप्ततएकानिचृदनुष्टुप्तत
एकानुष्टुप्ततएकाबृहदनुष्टुप्ततएकास्तारपंक्तिस्ततएकाषट्पदाजगती ततःसप्तानुष्टुभस्ततोष्टानुवाकयजूंषिततएकाप्रस्तारपंक्तिः
पंचपदापंक्तिर्वाततएकानुष्टुप्ततश्चतस्रोजगत्यस्ततस्तिस्रस्त्रिष्टुभस्ततएकापंचपदात्रिष्टुप्महाबृहतीवा ततोद्वादशानुष्टुभस्ततस्त्री
णियजूंषिततस्तिस्रोनुष्टुभस्ततएकस्ययजुरितिच्छंदांसि ॥ अथचमकानामग्निःकांडऋषिःआद्याग्नावैष्णवीगायत्रीशिष्टानांवाजा
दयोन्नादिविशेषादेवतायजुश्छंदःजपेविनियोगइति ॥ एतदंतंविधाययजमानाचार्यब्रह्मसन्निधावृत्विग्भिःसावधानैःसंलापांत
रमकुर्वद्भिःश्रीरुद्रंध्यायद्भिर्यजमानस्यकामःसिध्यतामितिचिंतयद्भिश्च स्वरवर्णविवेकपूर्वकंजपःकार्यः ॥ होमरुद्रेप्येवमेवहोमः
कार्यः ॥ अभिषेकरुद्रेतुषष्ठन्यासानंतरंअग्निर्मेवाचिश्रितइत्यादियथालिंगमंगानिसंस्पृश्यात्मानंमहेश्वररूपंगंधपुष्पाक्षतधूपदी
पैःप्रत्यक्षैर्मानसैर्वाआराध्य आराधितोमनुष्यैस्त्वमितित्र्यंबकंयजामहइतिआत्वावहंतुहरयःसचेतसइतिसद्योजातंप्रपद्यामीतिच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शिवमावाह्य सद्योजातायवैनमोनमइत्यासनंदत्वा भवेभवेनातिभवेभवस्वमामितिपाद्यंदत्वा भवोद्भवायनमइत्यापोहिष्ठतिति
सृभिश्चस्नानंदत्वा भवंदेवंतर्पयामि शर्वंदेवंईशानंदेवंपशुपतिंदेवंरुद्रंदेवंउग्रंदेवंभीमंदेवंमहांतंदेवंतर्पयामीतितर्पयित्वाज्येष्टाय
नमइत्याचमनीयंदत्वाश्रेष्ठायनमइतिमधुपर्ककालायनमइतिगंधंकलविकरणायनमइतिपुष्पंसर्वभूतदमनायनमइतिधूपंमनो
न्मनायनमइतिदीपं भवोद्भवायनमइतिनैवेद्यंदत्वातूष्णीमाचमनीयंदत्वाअष्टौपुष्पाणिभवादिनामभिर्भवायदेवायनमइत्येव
मादिप्रयोगेणसमर्प्यअघोरेभ्योथघोरेभ्यइतिमंत्रेणोपस्थाय हिरण्यरजतताम्रादिपात्रेणसंततधारयादुग्धादिनोदकेनवाभिषि
च्यपुनःपूजयेदिति ॥ इतिरुद्रजपादौचसर्वसाधारणएषविधिः ॥ रुद्रस्यनमकाध्यायात्मकस्यरूपमात्रजपादौचमकाध्यायोपिस
कृदावर्तनीयः ॥ रुद्रीजपादौतुप्रत्यावृत्त्यैकैकश्चमकानुवाकोयोजनीयः ॥ एतादृश्याश्चरुद्र्याएकादशावृत्तौलघुरुद्रः ॥ तदेका
दशावृत्तौमहारुद्रः ॥ तदेकादशावृत्तौअतिरुद्रःसंपद्यते ॥ तत्रजपेभिषेकेचनमोवःकिरिकेभ्यइति सहस्राणिसहस्रशइति नमो
रुद्रेभ्योयेपृथिव्यामितिचैतेयथाध्ययनमेवपठनीयाः ॥ होमेतुविशेषोवक्ष्यते ॥ रुद्रस्यसंकल्पादिब्राह्मणभोजनपर्यंतंयजमाना
चार्यब्रह्मर्त्विजांनियमाः हविष्यभोजनंब्रह्मचर्यंभूशय्यापतिताद्यसंभाषणमक्रोधःशुचितेत्यादयोद्रष्टव्याः ॥ एवंजपंसमाप्यहृ
दयादिप्रागुक्तंपंचांगन्यासंकृत्वारुद्रायजपंनिवेदयेत् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २९५ ॥ मंडपकुंडस्थंडिलादिप्रमाणं ॥

श्रीः ॥ तदंगहोमार्थंहोमरुद्रेचप्रधानहोमार्थंमंडपंकुंडंचकुर्यात् ॥ इदंचद्वयंहोमांगमेवअनावश्यकंच ॥ करणेफलाधिक्यं ॥
तत्रमंडपोष्टहस्तोदशहस्तश्चकनिष्ठः द्वादशहस्तचतुर्दशहस्तश्चमध्यमः षोडशहस्तोष्टादशहस्तश्चोत्तमः ॥ सर्वेचतुरस्राश्चतुर्द्वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

राःकार्याः ॥ तत्राष्टहस्तादिमंडपांस्तावन्मानसूत्रेणप्राच्यादिसाधनपुरःसरंसमचतुरस्रान्साधयित्वा तत्सूत्रंत्रेधाविभागेनपात
यित्वाबाह्येषुद्वादशसूत्रसंपातेषुद्वादशस्तंभान्निखनेत् ॥ चतसृषुदिक्षुद्विहस्तचतुरंगुलाधिकद्विहस्ताष्टांगुलाधिकद्विहस्तविस्तृता
निद्वाराणिकर्तुंद्वारशाखाख्यंस्तंभद्वयंनिखेयं ॥ एतेचविंशतिस्तंभाःपंचहस्ताःकार्याः ॥ तेषामुपरिचूडासुसरंध्रकाष्ठानितिर्यग्दं
यानि ॥ द्वारसंमुखतयाचहस्तमात्राद्बहिःपूर्वादिप्रादक्षिण्यक्रमेणाश्वत्थोदुंबरप्लक्षवटशाखाकृतानिपंचषट्सप्तहस्तोच्छ्रायाणि
अधममध्यमोत्तममंडपेषुहस्तद्वयसपादहस्तद्वयसार्धहस्तद्वयविस्तृतानितोरणानिकार्याणि ॥ तोरणानांचोपरितिर्यक्फलकेषुशै
वकर्मत्वात्त्रिशूलाकाराःपंचसप्तनवांगुलाःकनिष्ठमध्यमोत्तममंडपेषुमध्येकीलानिखेयाः ॥ मध्यसूत्रसंपातचतुष्टयेचाष्टहस्ताश्च
त्वारःस्तंभाश्चूडासुतिर्यक्सरंध्रकाष्ठसहितानिखेयाः ॥ मध्यत्रिभागेचसौंदर्यार्थंउच्छ्रितंसृजेत् ॥ सर्वेचस्तंभाःपंचमांशेनसूत्रसंपा
तस्थानाद्बहिर्निखेयाः ॥ मंडपश्चोपरिपरितश्चद्वारवर्जंयज्ञियतृणादिनिर्मितकटादिभिश्छादनीयइति ॥ मंडपेचमध्यमभागेकुंडं[1]
कुर्यात् ॥ मध्यभागएवकुंडमितिसाधितमन्यत्र ॥ तत्रवक्ष्यमाणग्रहरुद्रहोमाहुतिसंख्याविशेषेणकुंडपरिमाणविशेषाउच्यंते ॥ त
त्रएकोनपंचाशदाहुतिपर्यंतंस्थंडिलमेव ॥ तच्चअष्टादशांगुलादिपरिमाणंतत्रैकोनपंचाशदंगुलादाहस्तांतंचतुरस्रमंगुलोत्सेधंचतु
रंगुलोत्सेधंवा ॥ पंचाशदादिनवनवत्याहुतिपर्यंतंमुष्टिमात्रं ॥ कुंडंतुशताद्येकोनसहस्रपर्यंतंअरत्निमात्रं ॥ सहस्राद्येकोनायुतपर्यं

---

१ कुंडदीपेहस्तादिकुंडानांपृथगंगुलमानं ॥ सिद्धा २४ वेदाग्नयो ३४ भूचतुर ४१ इभयुगा ४८ रामबाणा ५३ गजाक्षाः ५८ त्र्यंगाः ६३ शै
लर्तवो ६७ द्र्यद्रय ७२ इषुगिरयो ७५ हस्ततोमानमत्र । अंगुल्योऽधोयवाःस्युःख० ख० शर ५ ख० शरां ५ गा ६ द्वि ४ शैला ७ भ्र० शैला
७ अध्यस्रेकुंडसिद्ध्यैहरिपदविधु १० हस्तांतमेवंबुधोक्ताः ॥ इति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तंहस्तमात्रं अयुताद्येकोनलक्षपर्यंतंद्विहस्तं लक्षाद्येकोनदशलक्षपर्यंतंचतुर्हस्तं दशलक्षाद्येकोनकोटिपर्यंतंषड्हस्तं कोटिमारभ्याधि
कहोमेष्टहस्तं ॥ तत्रैवाधिकतरहोमेदशहस्तमितिकेचित् ॥ कुंडानिचब्राह्मणक्षत्रियविशांचतुरस्रवृत्तचंद्रार्धाभानिकार्याणि ॥
सर्वकार्यसिद्धिपुत्रसुखावाप्तिवैरिनाशशांतिमारणच्छेदनवृष्टिरोगनाशाभिचारिकशांतिभूतोत्सादनादिदशविधकामनायांचतु
रस्रयोन्यर्धचंद्रत्र्यस्रवृत्तषडस्रपद्माष्टास्रसप्तास्रपंचास्राणिसर्वेषांकार्याणि ॥ काम्यस्यनित्यनैमित्तिकबाधकत्वात् ॥ एतेषांचक
रणप्रकारोन्यतोऽवगंतव्यःगौरवभयान्नेहोच्यते ॥ कुंडानांचखननंसूक्ष्मद्रव्यहोमेपंचदशचतुर्विंशांशैःकार्यं ॥ स्थूलद्रव्येतुवि
स्तारसमंकार्यं ॥ ततश्चतुर्विंशांशंकंठंत्यक्त्वानवभिश्चतुर्विंशांशैर्मेखलात्रयंकुर्यात् ॥ तत्रबहिर्मेखलाद्व्यंगुलोत्सेधविस्तारा द्विती
यातदुपरित्र्यंगुलोत्सेधविस्तारा तृतीयातदुपरिचतुरंगुलोत्सेधविस्तारा ततःपश्चिमेमेखलोपरिकुंडविस्तारार्धदीर्घांकुंडविस्तार
तृतीयांशविस्तृतामश्वत्थदलाकारांकुंडचतुर्विंशांशकृतमेखलापश्चिमतःप्रविष्टनालाग्रामुभयतोमृत्पिंडद्वययुतांकुंडमध्यप्रविष्टा
ग्रांचतुर्विंशांशोत्सेधांपश्चादुन्नतांयोनिंभूमितोरचयेत् ॥ तत्रद्वितीयमेखलायांपरिधिपरिस्तरणार्थमंतरंरक्षेत् ॥ ततःकुंडमध्ये
कुंडचतुर्विंशांशद्वयोच्चमंशचतुष्टयविस्तृतंतत्तत्कुंडाकारंपद्माकारंवानाभिंकुर्यात् ॥ तत्रचयोनिकुंडेयोनिंपद्मकुंडेचनाभिंनकु
र्यात् ॥ इहकुंडमेखलायोन्यादौपक्षांतराणिगौरवभयान्नोक्तानि ॥ कुंडाशक्तौतुएकहस्तादिप्रमाणंचतुरस्रंतत्तद्धोमेस्थंडिलंकार्यं ॥
स्थंडिलेचमेखलादिवर्तुलाद्याकारताचनभवति ॥ अंगुलोत्सेधचतुरस्रत्वादिनानैराकांक्ष्याद्विरोधाच्चेतिसंक्षेपः ॥ ततोमंडपांत
रीशानदिग्भागेरुद्रवेदिकांसग्रहपक्षेग्रहवेदिकांचकुर्यात् ॥ तत्रचदक्षिणतोग्रहवेदिकाउत्तरतोरुद्रवेदिका ॥ ग्रहाणांपूर्वांगत्वेन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्राक्पूजनीयत्वेनपश्चात्यरुद्रपूजायाउदक्संस्थत्वापेक्षणात् ॥ वेदिश्चद्व्यंगुलन्यंगुलोच्छ्रायद्व्यंगुलविस्तारवप्रद्वययुता वप्रोपरिस
प्तांगुलोत्सेधहस्तविस्तृताचसुश्लक्ष्णाकार्या सर्वशांतिकपौष्टिकानांग्रहमखविकृतित्वात् ॥ ॥ छ ॥ ॥ छ ॥

॥ २९६ ॥ अथप्रयोगः ॥

श्रीः ॥ एवंमंडपकुंडादिनिर्मायजपरुद्रेजपांतेशुभेहनिहोमरुद्रेतुआचार्यादिपूजांतेशुभेकालेमंडपपूजाद्युपयुक्तसंभारान्संभृत्यत
तःशुक्लांबरधरःशुक्लमाल्यानुलेपनःसपत्नीकःसाचार्यर्त्विक्कोयजमानोमंगलघोषेण संपूर्णकलशहस्तोभद्रंकर्णेभिरितिमंत्रघोषेणमं
डपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविशेत् ॥ ततोमंडपांतःपश्चिमदेशेउपविश्याचम्यदेशकालौस्मृत्वास्वयंब्राह्मणद्वारावाकृतस्यामु
करुद्रस्यजपांगत्वेन समग्रपक्षेणदशांशेनशतांशेनवावक्ष्यमाणद्रव्येष्वमुकद्रव्येणाहंब्राह्मणद्वारावायथाशक्तिहोमंकरिष्यइतिज
परुद्रेसंकल्पयेत् ॥ ततोजपरुद्रेहोमरुद्रेचगणेशपूजनंमंडपदेवतास्थापनादिचकरिष्यइतिसंकल्प्यषोडशोपचारैर्गणपतिंसंपूज्य
ततोगौरसर्षपैःसर्वतोमंडपांतरवकिरेत् ॥ तत्रमंत्राः ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंत
त्रगच्छतु ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभे ॥ इति ॥ ततःपंचगव्येनकुशैःसर्वत्र
प्रोक्षणंकार्यं ॥ शुचीवोहव्येतिआपोहिष्ठेतितृचेनच ॥ ततःकृतांजलिःस्वस्त्ययनंतार्क्ष्यमितिमंत्रद्वयंजपेत् ॥ ततोवास्तुपूजनं ॥
आचार्योवास्तुहोमार्थंमंडपनैर्ऋत्येस्थंडिलंविधायतदीशानभागेहस्तमात्रांमृदावेदिंविधायईशानादिकोणचतुष्के ॥ विशंतुभूतले
नागा० इत्यादिशंकुरोपणबलिदानवास्तुदेवतावाहनादिदेवप्रतिष्ठायामुक्तवत्कुर्यात् ॥ ततआचार्योग्निस्थापनादिसामान्यप्रधा
नांतंकृत्वोदुंबरादियज्ञियसमित्तिलाज्यचरून्प्रत्येकमष्टशतमष्टाविंशतिमष्टौवा प्रणवादिनमोंततत्तन्नाममंत्रैर्जुहुयात् ॥ द्रव्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णांविकल्पइतिपदार्थादर्शे ॥ ततोवास्तुंवास्तोष्पतेप्रतिजानीह्यस्मानितिचतुर्भिस्तैरेवद्रव्यैःप्रतिद्रव्यं २८ पुनस्तैरेवचतुर्भिर्मंत्रै
र्वास्तोष्पतेध्रुवास्थूणामितिच ॐ वास्तोष्पतयेनमइतिवापंचबिल्वफलानितद्बीजानिवाजुहुयात् ॥ ततःअंगहोमादिपूर्णाहुत्यंतं
कृत्वाब्रह्मादिभ्यःपायसेननाममंत्रैर्बलिंदत्वापावमानेनराक्षोघ्नेनचसूक्तेनमंडपंत्रिसूत्र्यावेष्टयित्वाशांतिकलशोदकेन यजमानम
भिषिच्यस्नापयेत् ॥ ततोयजमानउत्तरपूजांविधायदेवताविसृज्यब्राह्मणान्भोजयेदिति ॥ एतावत्यशक्तौबलिमात्रंदद्यात् ॥
अतएवशारदातिलकेपायसान्नैर्बलिंहरेदित्येवोक्तंनहोमादीतिसांप्रदायिकाः ॥ तस्मिन्पक्षेमंडलदेवतापूजनंबलिदानंसूत्रवेष्टनं
चेत्यनुष्ठानमिति ॥ (मंडपप्रतिष्ठापूर्वंपंचकुंडीदेवप्रतिष्ठाप्रयोगेयथावदुक्तेतिनात्रपुनःसंगृहीता) ॥ ततोयजमानोऽभ्यायतना
दक्षिणतउपविशेत् ॥ आचार्यस्तुमंडपेकुंडपश्चिमतउपविश्याचम्यप्राणानायम्यामुककर्मण्यग्निप्रतिष्ठांकरिष्ये ॥ तदंगतयाकुं
डसंमार्जनमेखलायोनिदेवतास्थापनपूजनादिकरिष्येइतिसंकल्प्याभ्यायतनंसंमृज्यकुशोदकेनसंप्रोक्ष्यइदंविष्णुरितिमंत्रेणोपरि
मेखलायांश्वेतवर्णालंकृतायांविष्णुमावाह्यपूजयेत् मध्यमेखलायांरक्तवर्णालंकृतायांब्रह्मजज्ञानमितिब्रह्माणं अधोमेखलायांकृ
ष्णवर्णालंकृतायांमृडानोरुद्रइतिरुद्रं योन्यांरक्तवर्णालंकृतायांगौरीमिमायेतिगौरीं ॥ ततःस्वशाखोक्तमार्गेणाग्निंप्रतिष्ठाप्यग्रहवे
दिकायांसर्वतोभद्रंविरच्यब्रह्मादींस्थापयेत्॥ तत्तन्मंत्रैरेवक्रमेणपूजयित्वातत्तन्मंत्रैर्वानाममंत्रैर्वाप्रत्येकंदशदशाज्याहुतीर्हुत्वाउ
पहारंनिवेदयेत् ॥ क्षीरोदनंब्रह्मणे घृतान्नमुदकाभिमंत्रितमिंद्राय आज्यौदनमग्नये माषान्नंयमाय कृष्णव्रीह्यन्नंपुराणघृताक्तं
निर्ऋतये नवनीतौदनंवरुणाय यवौदनंवायवे प्रैयंगवौदनंसोमाय गावोधुकमीशानाय अन्येभ्योयथालाभंसर्वेभ्योवानैवेद्यशे
षान्नेनदिग्बलिःकार्यइति ॥ ततोवेद्यांनवंवस्त्रंनिधायतत्रकर्णिकामध्येष्टदलंविधायतत्रग्रहमंडलानिविलिख्यनवग्रहदेवतास्था

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पनंपूर्वोक्तग्रहयज्ञक्रमेणकृत्वाइंद्रादिलोकपालावाहनांतेऽत्रविशेषः ॥ रवेःपूर्वेशेषं सोमस्याग्रेवासुकिं भौमस्याग्रेतक्षकं बुधोत्तरे
कर्कोटकं बृहस्पतेरग्रेपद्मं शुक्रोत्तरेमहापद्मं शनिपश्चिमेशंखपालं राहोःपुरःकंबलं केतोःपुरःकुलिकंचनाममंत्रेणस्थापयेत् ॥
ततोबहिर्भूगृहे अश्विन्यादिसप्तनक्षत्राणिविष्कंभादिसप्तयोगाःबवबालवकरणेसप्तद्वीपानिऋग्वेदश्च ॥ दक्षिणेपुष्यादिसप्तन
क्षत्राणिधृत्यादिसप्तयोगाःकौलवतैतिलकरणेसप्तसागराःयजुर्वेदश्च ॥ पश्चिमेस्वात्यादिसप्तनक्षत्राणिवज्रादिसप्तयोगाः गरव
णिजकरणेसप्तपातालानिसामवेदश्च ॥ उत्तरेअभिजिदादिसप्तनक्षत्राणिसाध्यादिषड्योगाःविष्टिकरणंभूराद्याःसप्तलोकाःअथर्व
वेदश्च ॥ वायव्येध्रुवःसप्तर्षयश्च ॥ ततोयथावकाशंगंगाद्याःसप्तसरितःसप्तकुलाचलाः अष्टौवसवः एकादशरुद्राः द्वादशादित्याः
एकोनपंचाशन्मरुतःषोडशमातरः षड्ऋतवः द्वादशमासाः द्वेअयने पंचदशतिथयः षष्टिसंवत्सराः सुपर्णाः नागाः सर्पाः यक्षाः
गंधर्वाः विद्याधराः अप्सरसः रक्षांसि भूतानि मनुष्याः इत्येतेस्थाप्याः ॥ अत्रकेवलनवग्रहाःस्थाप्याइत्येकःपक्षः ॥ विनाय
कादिपंचलोकपालांताद्वात्रिंशद्देवताइत्यन्यः ॥ अष्टौदिक्पालसहिताइत्यन्यः ॥ शेषादिमनुष्यांतैःसहिताइतिवा एतेषुपक्षेषुब
हुत्वाल्पत्वेनतारतम्यंद्रष्टव्यं ॥ ततःपौरुषसूक्तन्यासपंचांगन्यासपूर्वकंषोडशोपचारैःपूजनंकुर्यात् ॥ अशक्तौ ॐ आदित्याय
नमइदमासनमित्याद्यावाहनक्रमेणप्रणवादिनमोंतैर्नाममंत्रैस्तत्तद्दैवत्यैर्वाप्रत्येकंपूजयेत् ॥ एतावत्यशक्तावावाहितादित्यादिदे
वताभ्योनमइतिमंत्रेणवासर्वान्पूजयेत् ॥ ततोग्रहवेदीशानभागेअव्रणमकालकंबहिर्दध्यक्षतविभूषितंचंदनमालाविभूषितंक
लशंमहीद्यौरित्यादिग्रहयज्ञवत्संस्थाप्यसंपूज्यप्रार्थयेच्च ॥ ततोरुद्रपीठेचतुर्विंशतिरेखात्मकमष्टलिंगतोभद्रंविरचयेत् ॥ अत्रा
पिप्रागुक्ताब्रह्माद्यामंडलदेवताःस्थापयेत् ॥ तदुपरिपीठादौरुद्रयंत्रंरचयेत् ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २९७ ॥ रुद्रयंत्रंस्कांदोक्तम् ॥

प्रणम्यजगतामीशमुमादेहार्धधारिणं ॥ यंत्रोद्धारमहंवक्ष्येरुद्रकल्पानुसारतः ॥ मध्येवृत्तंसमालिख्यतन्मध्येचदशास्रकं ॥ बहि
रष्टदलंपद्मंततःषोडशपत्रकं ॥ चतुर्विंशतिपत्राढ्यंद्वात्रिंशत्पत्रकंतथा ॥ चत्वारिंशत्पत्रकंतुवृत्तंसूर्यसमप्रभं ॥ पंचपद्मात्मकं
वृत्तंचतुरस्रंचभूगृहं ॥ सत्वंरजस्तमइतित्रिगुणैःपरितोवृतं ॥ चतुर्द्वारंद्वारदेशेबहिर्नागसमावृतं ॥ रुद्रपीठमितिख्यातंदेवता
स्तत्रविन्यसेत् ॥ चत्वारिंशच्छतंचैकंदेवतानामुदाहृतं ॥ कर्णिकामध्यदेशेतुरुद्रंपंचास्यमालिखेत् ॥ नमोभगवतेरुद्रायेतितारा
दिकंन्यसेत् ॥ सोयंदशाक्षरोमंत्रःसर्वकामार्थसिद्धिदः ॥ प्रणवादिनमोंतानिपंचास्यानिततःपरं ॥ सद्योजातंवामदेवमघोरंत
दनंतरं ॥ ततस्तत्पुरुषंप्रोक्तमीशानंपंचमंक्रमात् ॥ प्रधानमिदमाख्यातंप्रथमावरणेततः ॥ दलेष्वष्टसुनंद्यादीन्पूर्वादिक्रमतो
न्यसेत् ॥ पूज्यपूजकयोर्मध्येप्राचीस्याद्यंत्रलेखने ॥ आदौनंदीमहाकालगणेशवृषभान्क्रमात् ॥ अनंतरंभृंगिरिटीस्कंदोमाचं
डसंज्ञकाः ॥ षोडशारेततःपद्मेद्वितीयावरणेयजेत् ॥ अनंतंचतथासूक्ष्मंशिवंचैकपदंतथा ॥ एकरुद्रंत्रिमूर्तिंचश्रीकंठंवामदे
वकं ॥ ज्येष्ठंश्रेष्ठंतथारुद्रंकालंकलविकरणं ॥ बलंबलविकरणंचबलप्रमथनंतथा ॥ तृतीयावरणेपद्मेचतुर्विंशदलेतथा ॥ अणि
मामहिमाचैवगरिमालघिमातथा ॥ प्राप्तिःप्राकाम्यमीशित्वंवशित्वंचाष्टसिद्धयः ॥ ततःपरंक्रमेणैवन्यसेद्ब्राह्म्यादिदेवताः ॥
ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराह्यैंद्रीचचामुंडाचंडिकाचेतिताःक्रमात् ॥ ततोष्टस्वसितांगादीन्भैरवान्विन्यसे
त्पुनः ॥ असितांगोरुरुश्चंडःक्रोधउन्मत्तभैरवः ॥ कालभीषणसंहारभैरवाश्चाष्टकीर्तिताः ॥ द्वात्रिंशत्पत्रकेपूर्वंभवाष्टकमुदाहृतं ॥
भवःशर्वश्चईशानस्ततःपशुपतिःपरं ॥ रुद्रश्चोग्रश्चभीमश्चमहांश्चैवततःपरं ॥ शेषोनंतोवासुकिश्चतक्षकश्चकुलीरकः ॥ कर्कोटकः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शंखपालःकंबलाश्वतरस्तथा ॥ ततोष्टसुन्यसेद्वैन्यंपृथुंहैहयमर्जुनं ॥ शाकुंतलेयंभरतंनलंराममितिक्रमात् ॥ ततःकुलाचलानष्टौ
दलेष्वष्टसुविन्यसेत् ॥ हिमवान्निषधोविंध्योमाल्यवान्पारियात्रकः ॥ मलयोहेमकूटश्चगंधमादनसंज्ञकः ॥ चत्वार्यावरणान्ये
वंपंचमावरणंततः ॥ चत्वारिंशद्दलेपद्मेपंचमावरणेन्यसेत् ॥ इंद्राद्यष्टौलोकपालानष्टसुक्रमतोलिखेत् ॥ इंद्रमग्नियमंचैवनिर्ऋतिं
वरुणंतथा ॥ वायुंकुबेरमीशानंदलेष्वष्टसुविन्यसेत् ॥ इंद्रादिलोकपालानामष्टौशक्तीस्ततोन्यसेत् ॥ शचीस्वाहाचवाराहीखड्गि
नीवारुणीतथा ॥ मृगारूढाचकौबेरीशूलिनीचाष्टमीतथा ॥ ततोष्टानामायुधानिवज्रादीन्यष्टसुन्यसेत् ॥ वज्रंशक्तिर्दंडखड्गौपा
शांकुशगदाअपि ॥ त्रिशूलंलोकपालानामायुधानिक्रमान्न्यसेत् ॥ ततोष्टौवाहनान्येषामष्टसुक्रमतोन्यसेत् ॥ ऐरावतंतथामेषं
महिषंश्वेतसंज्ञकं ॥ मकरंचमृगंचैवनरंचवृषभंतथा ॥ ऐरावतादयोप्यष्टदिग्गजास्तदनंतरं ॥ ऐरावतःपुंडरीकोवामनःकुमुदों
जनः ॥ पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः ॥ भूगृहांतःपुनर्लेख्याःपंचपद्मात्मकाद्बहिः ॥ इंद्रंविन्यस्यपूर्वस्यामाग्नेय्यामग्नि
मेवच ॥ दक्षिणस्यांयमंचैवनैर्ऋत्यांनिर्ऋतिंतथा ॥ प्रतीच्यांवरुणंवायुंवायव्यांविन्यसेत्ततः ॥ कुबेरंचैवकौबेर्यामीशान्यामीश
मालिखेत् ॥ विरूपाक्षंतुविन्यस्येदाग्नेय्यामग्नियोगतः ॥ नैर्ऋत्यांनिर्ऋतेर्योगेविश्वरूपंचविन्यसेत् ॥ वायव्यांवायुयोगेचलिखे
त्पशुपतिंतथा ॥ ईशान्यामूर्ध्वलिंगंचविन्यसेदीशयोगतः ॥ प्रागादिक्रमतोलेख्याःशेषाद्याभूगृहाद्बहिः ॥ विप्रवर्णंश्वेतरूपंस
हस्रफणमंडितं ॥ शेषंविन्यस्यपूर्वस्यांपूजयेदुपचारकैः ॥ तक्षकंवैश्यवर्णंचनीलंपंचशतैःफणैः ॥ युक्तमुत्तुंगकायंचआग्नेय्यांदि
शिविन्यसेत् ॥ अनंतंविप्रवर्णंचतथाकुंकुमवर्णकं ॥ सहस्रफणसंयुक्तंदक्षिणस्यांप्रपूजयेत् ॥ वासुकिंक्षत्रियंपीतवर्णंसप्तशतैः
फणैः ॥ युक्तमुत्तुंगकायंचनैर्ऋत्यांदिशिविन्यसेत् ॥ शंखपालंक्षत्रियंचपीतंसप्तशतैःफणैः ॥ युक्तमावाह्यवारुण्यांपूजयेद्गंधधू

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पकैः ॥ महापद्मंवैश्यवर्णंयुक्तंपंचशतैःफणैः॥ युक्तमुत्तुंगकायंचवायव्यांदिशिपूजयेत् ॥ कंबलंशूद्रवर्णंचकृष्णंत्रिंशत्फणैर्युतं॥ कौबेर्यांदिशिविन्यस्यपूजयेच्चविधानतः ॥ कर्कोटकंशूद्रवर्णंश्वेतंत्रिंशत्फणैर्युतं ॥ ईशान्यांदिशिविन्यस्यपूजयेद्विधिवत्ततः ॥ रुद्रपीठमिदंसर्वरुद्रकल्पेषुविश्रुतं ॥ शंभुनास्वयमाख्यातंभक्तानुग्रहकाम्यया ॥ कुंकुमागरुकर्पूरैर्भूर्जपत्रेथवापटे ॥ लिखितं पूजयेद्भक्त्यासर्वकामार्थसिद्धये ॥ यंत्रंमंत्रमयंप्रोक्तमाख्यातादेवतेतिच ॥ पूजनीयंप्रयत्नेनतेनेदंदेवतामयं ॥ अग्निचोरभयंत त्रनचराजभयंक्वचित् ॥ यत्रेदंलिखितंयंत्रंपूज्यतेविधिवत्सदा ॥ इतिस्कंदपुराणेरुद्रयंत्रं॥ तद्यथा ॥ कर्णिकायां॥ ॐ नमोभग वतेरुद्रायेतिदशाक्षरः ॥ ततःप्रथमकोष्ठएवप्रागादिक्रमेणमध्येच ॐ सद्योजातायनमः वामदेवाय अघोराय तत्पुरुषाय ईशा नाय ८ ॥ ततःप्रागादिक्रमेणनंदी महाकालः गणेश्वरः वृषभः भृंगिरिटिः स्कंदः उमा चंडीश्वरः ८ इतिप्रथमावरणं ॥ अनंतः सूक्ष्मः शिवः एकपात् एकरुद्रः त्रिमूर्तिः श्रीकंठः वामदेवः ज्येष्ठः श्रेष्ठः रुद्रः कालः कलविकरणः वलविकरणः बलः बल प्रमथनः १६ इतिद्वितीयं ॥ अणिमा महिमा लघिमा गरिमा प्राप्तिः प्राकाम्यं ईशिता वशिता ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही ऐंद्री चामुंडा चंडिका असितांगभैरवः रुरुभैरवः चंडभैरवः क्रोधभैरवः उन्मत्तभैरवः कपालभैरवः भीषण भैरवः संहारभैरवः २४ इतितृतीयावरणं ॥ भवः शर्वः ईशानः पशुपतिः रुद्रः उग्रः भीमः महान् शेषः अनंतः वासुकिः तक्षकः कुलीरः कर्कोटकः शंखपालः कंबलाश्वतरः वैन्यः पृथुः हैहयः अर्जुनः शाकुंतलेयः भरतः नलः रामः हिमवान् निषधः विंध्यः माल्यवान् पारियात्रकः मलयः हेमकूटः गंधमादनः ३२ इतिचतुर्थं ॥ इंद्रः अग्निः यमः निर्ऋतिः वरुणः वायुः कुबेरः ईशानः शची स्वाहा वाराही खड्गिनी वारुणी वायवी कौबेरी ईशानी वज्रं शक्तिः दंडः खड्गः पाशः अंकुशः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गदा त्रिशूलः ऐरावतः मेषः महिषः प्रेतः मकरः हरिणः नरः वृषभः ऐरावतः पुंडरीकः वामनः कुमुदः अंजनः पुष्पदंतः सार्वभौमः सुप्रतीकः ४० इतिपंचमं ॥ एवंपंचपद्मानिकृत्वा बहिश्चतुष्कोणंभूगृहं ॥ तत्रपूर्वेइंद्रः आग्नेय्यामग्निःविरूपाक्षश्च दक्षिणेयमः नैर्ऋत्यांनैर्ऋतिःविश्वरूपश्च पश्चिमेवरुणः वायव्यांवायुःपशुपतिश्च उत्तरेकुबेरः ईशान्यामीशानःऊर्ध्वलिंगंच ॥ ततोभूगृहाद्बहिः पूर्वेविप्रवर्णंश्वेतंसहस्रफणंशेषंपूजयेत् ॥ वैश्यवर्णनीलंपंचशतफणभूषितंतक्षकंआग्नेय्यां ॥ विप्रवर्णंकुंकुमाभंसहस्रफणमनंतंदक्षिणे ॥ क्षत्रियवर्णंपीतंसप्तशतफणयुतंवासुकिंनिर्ऋत्यां ॥ क्षत्रियवर्णंपीतंसप्तशतफणयुतंशंखपालंपश्चिमे॥ वैश्यवर्णनीलंपंचशतफणयुतंमहापद्मंवायव्यां ॥ शूद्रवर्णंकृष्णांत्रिंशत्फणयुतंकंबलमुत्तरे ॥ शूद्रवर्णंश्वेतंत्रिंशत्फणयुतंककोंटकमीशान्यां ॥ एताःदेवताःप्रणवादिनमोंतैर्नामभिरावाह्यपूज्याः ॥ इतिस्कांदानुसारेणरुद्रपीठदेवताः ॥ ॥ ततोरुद्रपीठादीशानदिग्भागेपूर्ववत्कलशंसंस्थाप्यरुद्रजपार्थत्वेनब्राह्मणंवृणुयात् ॥ ततआचार्योग्निसमीपमेत्याग्नेःपश्चिमतउपविश्यतिस्रःसमिधआदायान्वाधानंकुर्यात् ॥ श्रद्धएहीत्यादिप्राणायामांतेऽस्मिन्रुद्रहोमेयायक्ष्यमाणादेवतास्तासर्वाःपरिग्रहीष्यामि जातवेदसमग्निमिध्मेनेत्यादिव्याहृत्यंते सग्रहपक्षेग्रहानमुकसंख्याभिरर्कादिसमिद्भिःचरुपक्षेऽमुकसंख्याभिश्चर्वाहुतिभिःकृतस्यजपस्यदशांशेनामुकद्रव्येणेत्युक्त्वा अधिदेवताद्यंगकत्वपक्षेअधिदेवतादीनमुकद्रव्येणामुकसंख्ययेत्युक्त्वा ॥ रुद्रममुकहोमपक्षेणैको नसप्तत्युत्तरशतधामंत्रविभागपक्षाश्रयेणामुकद्रव्येणेत्युक्त्वारुद्रपीठदेवताएकैकाज्याहुत्या अंगहोमेवरुणंद्विरित्यादि एताःदेवताअद्यप्रभृतियक्ष्यइत्यंतमुक्त्वा व्याहृतिभिःसमिधोजुहुयात् ॥ द्रव्याण्याहुतिसंख्यामंत्रविभागाश्चवक्ष्यंते ॥ ततःपरिसमुह्यपरिस्तरणंकुर्यात् ॥ तच्चद्वितीयमेखलायांपश्चिमेचयोनिरंध्रेकार्यं ॥ परिधिनिधानमप्यत्रैव ॥ ततःप्रणीतापूरणांतेकृतेआ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चार्योब्रह्माणंपूर्ववृतमेवासनेदक्षिणतउपवेशयेत् पूर्वंयजमानवृतस्यैवब्रह्मणःपुनर्वरणस्यवैयर्थ्यात्॥ ततःप्रणीताप्रणयनादिस
मान्यप्रधानांतेयजमानोग्नेर्दक्षिणतोब्रह्मणःपश्चिमतउपविश्यसावधानउद्देशत्यागौकुर्यात् ॥ तत्रस्वयमेवचेद्धोमंकरोतितदाप्रा
त्याहुतिसूर्यायेदंनममेत्यादितत्तद्देवताभ्यस्त्यागंकुर्यात् नोत्सृजइति॥ श्रद्धावत्कर्तृत्वात् ॥ यदाऋत्विजःप्रतिनिधयोवाहोमंकु
र्युस्तदायजमानसामान्यप्रधानानंतरंयक्ष्यमाणाःसर्वादेवताउद्दिश्यहोष्यमाणानिचसर्वाणिद्रव्याणिनिर्दिश्यएताभ्योदेवताभ्य
इदंद्रव्यमहमुत्सृज्येइतित्यजेत् बह्वृत्विगादिकर्तृकेहोमेप्रत्याहुतित्यागस्यकर्तुमशक्यत्वात् त्यागपूर्वकत्वाच्चहोमस्य ॥ सर्वहोमा
नंतरंत्यागस्यायुक्तत्वादिदानीमेवत्यागःकार्यइतिशिष्टाः॥ ततआचार्यादयःसावधानायजमानाभीष्टसिद्धिंप्रार्थयंतोहोमंकुर्युः ॥

॥ २९८ ॥ हविर्द्रव्याणांनियमः ॥

श्रीः ॥ तत्रसग्रहपक्षेग्रहाणांसमिधः॥ अर्कःपलाशःखदिरअपामार्गोथपिप्पलः ॥ औदुंबरःशमीदूर्वाकुशाश्चसमिधःक्रमादिति॥
तत्संख्याचाष्टोत्तरशतमष्टाविंशतिरष्टौवैकैकस्य समिधश्चमधुसर्पिर्दधिरूपत्रिमध्वक्ताःकार्याः दधिस्थानेदुग्धंवा चरुस्तुकृताकृ
तः करणपक्षेपिप्रत्येकमेकैकाष्टाष्टाविंशत्यष्टोत्तरशताहुतिपक्षाः तत्रएकाहुतिपक्षेस्रुचावदानधर्मेणाचार्योग्नौजुहुयात् अष्टाद्याहु
तिपक्षेचतुर्मुष्टिनिर्वापानंतरमनिर्वापेनवाचरुंबहुंनिर्मायाचार्यादयःसर्वेहस्तेनैवजुहुयुः । ततऋत्विजःकृतस्यग्रहजपस्यदशांशेन
तिलैर्यवैर्मिश्रितैर्व्रीहिभिर्वाजुहुयुः । स्वतंत्रब्राह्मणपक्षेसएववाजुहुयात् । अधिदेवताद्यंगकत्वपक्षेत्रयोविंशतिदेवतानांसमिच्चरु
तिलादिनासमानसंख्येनजुहुयात् । तत्रसमिधःपालाश्यःनिर्वापेचैतेभ्योनिर्वापः अधिदेवतादीनांचसमिच्चरुहोमसंख्याग्रहसं
ख्यातोन्यूनाकार्येतिशिष्टाः । चर्वेकाहुतिपक्षस्त्वत्रापिसाधारणः । एषांसमिधःकनिष्ठपक्षेप्रत्येकंचतस्रश्चतस्रइतिशिष्टाः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

समिच्चरुसंख्यासमानैवचैषांतिलादिद्रव्याहुतिसंख्याबोद्धव्या। इंद्राद्यष्टाधिकांगत्वेपिअधिदेवतादिदेवताभ्योपिहोमःकार्यः । ग्रहादीनांचमंत्रास्तच्छंदोदेवतादिचग्रहपीठपूजायामुक्तं । अत्राहुतिप्रमाणं ॥ तत्रसर्वाःसमिधःप्रादेशमात्राःऋज्व्योनातिशुष्कार्द्राः तत्रदूर्वाणांतिसृणांतिसृणामेकैकाहुतिः कुशस्यतुन्यादिवहुपत्रस्यैव अर्काद्यभावेपालाश्यःप्रतिनिधयः । चरोस्त्वेकाहुतिपक्षेंगुष्ठपर्वमात्रमवदानं अन्यपक्षेषुग्रासमात्रत्वं । तिलादीनांतुप्रसृतिमात्राद्वादशपर्वपूरिकाचेतिप्रमाणेउत्तमे अष्टसहस्रमष्टशतंवेतिमध्यमे चतुरशीतिश्चतुःषष्टिर्वेतिकनिष्ठे ॥ अत्राहुतिसंख्या । तत्रनवग्रहसमिधांनवशतीद्विसप्ततिश्च यद्वाद्विशतं द्विपंचाशच्च अथवाद्विसप्ततिरेव । तेषामेवचरुपक्षेएकाहुतिपक्षेनव अन्यपक्षत्रयेसमित्समानैवसंख्यातिलादीनां जपदशांश स्तुसहस्राणिनवनवशतानिनवतिर्वेति । अधिदेवतादिपक्षेतत्समिधांषट्शतीचतुश्चत्वारिंशच्च एकशतंचतुरशीतिश्चवाद्वानवतिर्वा । चरुपक्षेतस्यषट्शतीचतुश्चत्वारिंशच्चशतंचतुरशीतिश्चवात्रयोविंशतिर्वा। तिलादेस्तुविकल्पेनसमिच्चरुसमैवसंख्येति । इंद्रादिपक्षेतत्समिधांद्विशतीचतुर्विंशतिश्चचतुःषष्टिर्वाद्वात्रिंशद्वा । चरुपक्षेतस्यद्विशतीचतुर्विंशतिश्चचतुःषष्टिर्वाअष्टौवा । तिलादेस्तुसमिच्चरुसंख्यैवेति तत्तत्पक्षेसर्वाःसंख्याएकीकृत्यमहासंख्याबोद्धव्या । अत्रचकनिष्ठपक्षाश्रयणेपिसांगतैव मध्यमोत्तमपक्षाश्रयणेतुतत्तत्फलेतारतम्यंद्रष्टव्यं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २९९ ॥ रुद्रमंत्रविभागः ॥

श्रीः ॥ एवंग्रहहोमंविधाय ततःप्रागुक्तन्यासपूर्वकंप्रागुक्तार्षेयादिस्मरणपूर्वकंचश्रीरुद्रंध्यायन्स्वयंजुहुयात् । अशक्तावेवंप्रतिनिधयोजुहुयुः । पुत्राद्यर्थेमहारुद्रेत्वेवमृत्विजोजुहुयुः । तत्रद्रव्याणिकृष्णतिलाः यवाः मिश्रिताउभये व्रीहयः आज्यंचेति ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पुत्रार्थमहारुद्रेत्वाज्यपरिप्लुतादूर्वाः । अयंचहोमःप्रधानभूतेहोमरुद्रेजपरुद्रांगहोमेवारूपादिपंचस्वपिहोमेषु ॥ अथजपरुद्रस्यां गभूतोहोमस्त्रेधासमग्रहोमोदशांशहोमःशतांशहोमश्चेति । होमरुद्रेतुपंचस्वपिसमग्रहोमएव । तत्रैतेषुत्रिष्वपिपक्षेषुषड्भिःप्रकारै र्मंत्रविभागः । एकधा१त्रेधा२षोढा३षोडशधा४अष्टाचत्वारिंशद्धा५एकोनसप्तत्युत्तरशतधा६चेति । अयंचनमकविभागएव । चमकेषुतुएतत्पक्षप्रदर्शनएवविशेषःस्पष्टीभविष्यति । एतत्पक्षप्रदर्शनएवचमकानांसंख्याप्युच्यते । तत्रैकधाविभागस्तावद्रूपे समस्तनमकाध्यायेनैकाहुतिःचमकेष्वग्नाविष्णूइत्यृचाएकाहुतिंहुत्वा वाजश्चमइत्यादिसमग्राध्यायेनापराआहुतिरिति । यद्वाअ ग्नाविष्णूइत्येकाएकादशचमकानुवाकैरेकादशेति ततश्चरूपेसमग्रहोमेएकधाविभागपक्षेतिस्रस्त्रयोदशवाहुतयोभवंति १ ॥ त्रेधाविभागेपिरूपेआद्यैश्चतुर्भिरनुवाकैरेकाहुतिः अपरैश्चतुर्भिर्द्वितीया शेषैस्तिसृभिस्तृतीया । यद्वानमस्तइत्यारभ्यसभापतिभ्य श्चवोनमइत्यंतेनैका नमोअश्वेभ्यइत्यारभ्यनमःपार्यायचावार्यायचेत्यंतेनापरा नमःप्रतरणायचेत्यारभ्यसमाप्तिपर्यंतेनतृतीयेति चमकेपक्षद्वयंप्राग्वत् । ततश्चरूपेसमग्रहोमेत्रेधाविभागपक्षेपंचपंचदशवाआहुतयः २ ॥ षोढाविभागेरूपेत्रेधाविभागवदेवाद्य विभागाभ्यामाहुतिद्वयं तृतीयविभागेयएतावंतइत्यृगंतेनतृतीयाआहुतिः नमोरुद्रेभ्योयेपृथिव्यांयेषामन्नमिति नमोरुद्रेभ्योयें तरिक्षेयेषांवातइति नमोरुद्रेभ्योयेदिवियेषांवर्षमिषवइत्यादिवाक्यशेषसहितैस्त्रिभिर्यजुर्भिराहुतित्रयमिति चमकेपूर्ववत्पक्ष द्वयं । ततश्चरूपेसमग्रहोमेषोढाविभागपक्षेअष्टावष्टादशवाआहुतयः ३ ॥ षोडशधाविभागेरूपेनमस्तइत्यारभ्यनमस्तक्षभ्यइत्यं तेनप्रथमाहुतिः रथकारेभ्यश्चवइत्यतोनमःस्वायुधायचेत्यंतेनद्वितीया सुधन्वनेचेत्यतःसहस्राणिसहस्रधेत्येतदंतेनतृतीया सह स्राणिसहस्रशइत्यतःतेषांसहस्रयोजनेइत्यर्धर्चप्रत्येकसंबंधेनदशमंत्रैर्दशाहुतयःनमोरुद्रेभ्यइतिचप्राग्वत्त्रिभिर्यजुर्भिस्तिस्रइ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तिचमकेपक्षद्वयमुक्तं । ततश्चरूपेसमग्रहोमेषोडशधाविभागपक्षेअष्टादशाष्टाविंशतिर्वाआहुतयः ४ ॥ अष्टचत्वारिंशद्धाविभागे
पिरूपे नमस्तइतिप्रथमानुवाकऋग्भिःपंचदशाहुतयः तत्राष्टमोमंत्रःषट्पादःततोष्टभिरनुवाकैरष्टौ दशमेनुवाकेद्वादशऋग्भिर्द्वा
दश एकादशानुवाकेप्राग्वद्दशभिर्दश नमोरुद्रेभ्यइतिपूर्ववत्त्रिभिर्यजुर्भिस्तिस्रइति चमकेप्राचीनंपक्षद्वयं । ततश्चरूपेसमग्रहो
मेपंचाशत्षष्टिर्वाहुतयः ५ ॥ एकोनसप्तत्युत्तरशतधाविभागेपिरूपे तत्रप्रथमानुवाकेपंचदशर्ग्भिःपंचदशाहुतयः द्वितीयतृ
तीयचतुर्थानुवाकेषूभयतोनमस्कारैःसप्तचत्वारिंशद्भिर्यजुर्भिःसप्तचत्वारिंशत्पंचमषष्ठसप्तमाष्टमनवमानुवाकेषुपुरस्तान्नमस्का
रैर्द्व्यशीतिभिर्यजुर्भिर्द्व्यशीतिः । एष्वपियजुःषुउभयतोनमस्कारत्वंकेचिदिच्छंति तत्रनमोभवायचरुद्रायचनमइतिपठित्वातमेव
नमःशब्दंपुनरावर्त्यनमःशर्वायचपशुपतयेचनमइतिपठेदित्यादिज्ञेयं । तत्रपक्षद्वयेपिनमोवःकिरिकेभ्यइत्यादिमंत्रचतुष्टयेदेवा
नाᳬहृदयेभ्यइतिप्रत्येकमावर्तनीयं । अयंचनमोवःकिरिकेभ्यइत्यत्रसहस्राणिसहस्रशइत्यत्रनमोरुद्रेभ्योयेपृथिव्यामित्यत्रचयो
नुषंगउक्तःसयदाएतैर्मंत्रैःप्रत्येकंहोमस्तदैव । यदातुनैभिःप्रत्येकंहोमस्तदाजपेएकधाहोमादावभिषेकेपारायणेचयथाध्ययनमेव
पाठः । ततोदशमानुवाकेद्वादशर्ग्भिर्द्वादशाहुतयः एकादशानुवाकेप्राग्वद्दशभिर्दश नमोरुद्रेभ्यइतिचत्रिभिर्यजुर्भिस्तिस्रइति
चमकेचपक्षद्वयंप्रागुक्तं । ततश्चरूपेसमग्रहोमेएकोनसप्तत्युत्तरशतधाविभागपक्षेएकोनसप्तत्युत्तरंशतंएकाशीत्यधिकशतंवा ६॥
रूपेदशांशशतांशहोमोनभवति । एवंवक्ष्यमाणदशांशशतांशहोमेऽवशिष्टदशांशशतांशहोमोनेतिकेचित् ॥ सर्वत्ररूपेआद्यवि
भागत्रयेदशांशाद्यसंभवेपिउत्तरविभागत्रयेदशांशादिप्राप्तिरस्तीत्यन्ये । अयमेवचशिष्टैरादृतःपक्षः । तत्ररूपेदशांशहोमेषोडश
धाविभागपक्षेआहुतिद्वयंदशांशः । अर्धाधिकेअल्पांतरत्वेनसमस्ताहुतिग्रहणात् । तच्चाद्याभ्यांमंत्राभ्यां । यद्वाआद्येनांत्येन

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चमंत्रेणेतियाज्ञिकाः । तत्रैवाष्टाचत्वारिंशत्पक्षेपंचाहुतयोदशांशः । तत्राद्यैरेवपंचभिर्यद्वाद्याभ्यांद्वाभ्यांअंत्यैस्त्रिभिरितिपक्ष द्वयं । तत्रैवैकोनसप्तत्युत्तरशतमंत्रपक्षेसप्तदशाहुतयोदशांशः । तत्राप्याद्याएवसप्तदश आद्यानवअंत्याअष्टौवेतिपक्षद्वयं । रूपे एवषष्ठेपक्षेशतांशाहुतिद्वयंप्राग्वन्मंत्राभ्यांज्ञेयं । यत्रसमग्रेणनमकरूपेणहोमस्तत्रैवचमकाहुतिर्नान्यत्र । तेनैषुत्रिष्वपिपक्षेषुनच मकाहुतिः ॥ ॥ रुद्र्यांतुसमग्रहोमेएकधाविभागेएकादशनमकाहुतयः चमकेतुअग्नाविष्णूइत्येका एकादशभिश्चमकानुवाकैर्न मकप्रतिरूपकयोजितैरेकैकरूपांतेएकैकेतिद्वादशसर्वास्त्रयोविंशतिराहुतयः । तत्रैवत्रेधाविभागेनमकानांत्रयस्त्रिंशत् चमकानां प्राग्वद्वादशेतिसर्वाःपंचचत्वारिंशत् । तत्रैवषोढाविभागेनमकानांषडधिकाषष्टिःचमकाहुतिभिःसहाष्टासप्ततिः । तत्रैवषोडश धाविभागेनमकानांषट्सप्तत्युत्तरंशतं चमकाहुतिभिःसहाष्टाशीत्यधिकंशतं । तत्रैवाष्टाचत्वारिंशत्पक्षेनमकानामष्टाविंशत्यधि कापंचाशत् चमकैःसहचत्वारिंशदधिका । तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमकानामष्टादशशतान्येकोनषष्टिश्च चमकैः सहैकसप्ततिरिति ॥ रुद्र्यांदशांशहोमेरूपेसमग्रहोमेएकधाविभागादिषट्पक्षेषुयासंख्योक्तासैवात्रवोद्धव्या ॥ तत्रषोडशधाविभागादिपक्षेअवशिष्टरूपस्यदशांशरूपाद्विःपंचसप्तदशसहिताक्रमेणप्रागुक्तैवसंख्यावोद्धव्या ॥ तद्यथा । विंशतित्रिंशद्वा पंच पंचाशत्पंचषष्टिर्वा एकोननवतिर्नवनवतिर्वेति रुद्र्यांशतांशहोमःषोडशधाविभागादिपक्षत्रयएवसंभाव्यते । तत्रनमकेप्राग्व दाहुतिद्वयं चमकेचोक्तंपक्षद्वयमितिचतस्रश्चतुर्दशवाषोडशधाविभागेआहुतयः । अष्टचत्वारिंशद्धाविभागेतुनमकेप्राग्वत्पंच चमकेद्वौपक्षाविंतिसप्तसप्तदशवाहुतयोभवंति । एकोनसप्तत्युत्तरशतधाविभागेतुनमकेसप्तदश चमकेचपक्षद्वयमितिविंशति स्त्रिंशद्वेति ॥ ॥ लघुरुद्रेसमग्रहोमेएकधापक्षेएकविंशत्युत्तरशतनमकानांतावत्यआहुतयः चमकानांद्वात्रिंशदुत्तरंशतमिति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

चमकैःसहत्रिपंचाशदधिकंशतद्वयमाहुतयः । तत्रैवत्रेधाविभागेनमकानांत्रिषष्ट्यधिकंशतत्रयं चमकानामनंतरोक्ताएवेतिचतुः
शतानिपंचनवतिश्च । तत्रैवषोढाविभागपक्षेनमकानांसप्तशतानिषड्विंशतिश्च चमकानांतावत्यएवेतिसर्वाअष्टशतानिअष्टपंचा
शच्च । तत्रैवषोडशधाविभागपक्षेनमकानांसहस्रमेकंनवशतानिषड्विंशतिश्च चमकानांतावत्यएवेतिसर्वाःसहस्रद्वयमष्टषष्टिश्च ।
तत्रैवाष्टाचत्वारिंशत्पक्षेनमकानांपंचसहस्राणिअष्टशतान्यष्टौच चमकानामुक्ताएवेति चमकैःसहसर्वाःपंचसहस्राणिनवशतानि
चत्वारिंशच्च । तत्रैकोनसप्तत्युत्तरशतधाविभागपक्षेनमकानांविंशतिसहस्राणिचत्वारिंशतान्येकोनपंचाशच्च चमकानांतावत्य
एवेतिसर्वाविंशतिसहस्राणिपंचशतानिएकाशीतिश्चेति । लघुरुद्रएवदशांशहोमेएकधापक्षेद्वादशरूपकाणिदशांशइतिनमकानां
द्वादशाहुतयः चमकानांचरूपकेषुक्रमेणद्वादशेतिसर्वाश्चतुर्विंशतिः । तत्रैवत्रेधाविभागेनमकानांषट्त्रिंशत् चमकाहुतिभिःस
हाष्टाचत्वारिंशत् । तत्रैवषोढाविभागेनमकानांद्विसप्ततिः चमकाहुतिभिःसहचतुरशीतिः । तत्रैवषोडशधाविभागेनमकानामे
कंशतंत्रिनवतिःअवशिष्टरूपस्यचप्राग्वद्वे चमकैःसहद्वेशतेषट्च । तत्रैवाष्टाचत्वारिंशद्धाविभागेनमकानांपंचशतानिषट्सप्ततिः
अवशिष्टरूपस्यप्राग्वत्पंच चमकैःसहपंचशतानित्रिनवतिश्च । तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमकानांद्वेसहस्रेअष्टाविंशतिः
अवशिष्टरूपस्यप्राग्वत्सप्तदश चमकैःसहद्वेसहस्रेसप्तपंचाशदाहुतयइति ॥ ॥ लघुरुद्रएवशतांशहोमेएकधापक्षेनमकाध्याये
नैका चमकैःसहतिस्रस्त्रयोदशवाहुतयः । अत्रास्मिन्नेवपक्षेऽवशिष्टरूपाणांसंख्याभावः । तत्रैवत्रेधाविभागक्षेरूपपकस्यतिस्रः
अवशिष्टैकविंशतिरूपाणामेकाचमकैःसहषट्षोडशवा ॥ तत्रैवषोढापक्षेरूपस्यषट्अन्याचैका चमकैःसहनवएकोनविंशतिर्वा ।
तत्रैवषोडशधापक्षेरूपस्यषोडशअन्यास्तिस्रः चमकैःसहएकविंशतिरेकत्रिंशद्वा । तत्रैवाष्टाचत्वारिंशद्धापक्षेरूपस्याष्टाचत्वारिंश

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्अन्यादश चमकैःसहषष्टिःसप्ततिर्वा । तत्रैवैकोनसप्तत्युत्तरशतधापक्षेरूपस्यतावत्यःअन्याःपंचत्रिंशत् चमकैःसहपडुत्तरंषो
डशाधिकंवाशतद्वयमिति । अवशिष्टरूपेरूपकमंत्रविभागःप्रागुक्तः ॥ ॥ महारुद्रेसमग्रहोमेएकधापक्षेनमकानांसहस्रमेकंत्री
णिशतानिएकत्रिंशच्चाहुतयः चमकानामेकंसहस्रंचतुःशतंद्विपंचाशच्चेतिसर्वाःद्वेसहस्रेसप्तशतानिन्यशीतिश्च । तत्रैवत्रेधाविं
भागेनमकानांत्रिसहस्राणिनवशतानित्रिनवतिश्च चमकैःसहपंचसहस्राणिचत्वारिंशतानिपंचचत्वारिंशश्च । तत्रैवषोढाविभा
गेनमकानांसप्तसहस्राणिनवशतानिषडशीतिश्च चमकैःसहनवसहस्राणिचत्वारिंशतानिअष्टत्रिंशच्च । तत्रैवषोडशधाविभागेन
मकानामेकविंशतिसहस्राणिद्वेशतेषण्णवतिश्च चमकैःसहद्वाविंशतिसहस्राणिसप्तशतानिअष्टाचत्वारिंशच्च । तत्रैवाष्टाचत्वारिं
शद्धाविभागेनमकानांत्रिषष्टिसहस्राणिअष्टौशतानिअष्टाशीतिश्च चमकैःसहपंचषष्टिसहस्राणित्रिंशतानिचत्वारिंशच्च । तत्रैवैको
नसप्तत्युत्तरशतधाविभागंनमकानांद्वेलक्षेचतुर्विंशतिसहस्राणिनवशतानिएकोनचत्वारिंशच्च चमकैःसहद्वेलक्षेषड्विंशतिसहस्रा
णित्रिंशतान्येकनवतिश्च ॥ ॥ महारुद्रेदशांशहोमेएकधाविभागेनमकानामेकंशतंत्रयस्त्रिंशच्चरूपाणीतितावत्यआहुतयः चम
कानांद्वादश रुद्रियावृत्त्यात्रयस्त्रिंशच्छतंचमकरूपयोजनेद्वेद्वादशवेतिसर्वाद्वेशतेएकोनाशीतिरेकोननवतिर्वा । तत्रैवत्रेधाविं
भागेनमकानांत्रीणिशतानिनवनवतिश्च चमकैःसहपंचशतानिपंचचत्वारिंशत्पंचपंचाशद्वा । तत्रैवषोढाविभागेनमकानांसप्त
शतानिअष्टनवतिश्च चमकैःसहनवशतानिचतुश्चत्वारिंशच्चतुःपंचाशद्वा । एषुत्रिष्वपिपक्षेष्ववशिष्टरूपाणांदशांशोनास्ति । तत्रै
वषोडशधाविभागेनमकानांद्वेसहस्रेएकंशतंअष्टाविंशतिश्च अवशिष्टरूपस्यद्वे चमकैःसहद्वेसहस्रेद्वेशतेषट्सप्ततिःषडशीतिर्वा ।
तत्रैवाष्टाचत्वारिंशद्धाविभागेनमकानांषट्सहस्राणित्रीणिशतानिचतुरशीतिश्च अवशिष्टरूपेपंच चमकैःसहषट्सहस्राणिपंचश

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तानिपंचत्रिंशत्पंचचत्वारिंशद्धा। तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमकानांद्वाविंशतिसहस्राणिचत्वारिंशतानिसप्तसप्ततिश्च अवशिष्टरूपेसप्तदश चमकैःसहद्वाविंशतिसहस्राणिषट्शतानिचत्वारिंशत्पंचाशद्धेति ॥ ॥ महारुद्रेशतांशहोमेएकधाविभागेत्रयोदशरूपाणिशतांशइतितावत्यआहुतयः चमकानांत्वेकादशिन्यांद्वादशरूपद्वयेच चमकानांप्रत्येकंद्वेद्वादशवेतिचतस्रश्चतुर्विंशतिर्वासर्वाएकोनत्रिंशदेकोनपंचाशद्धा । अत्रास्मिन्नेवपक्षेअवशिष्टरूपाणांशतांशोनास्ति । तत्रैवत्रेधाविभागेनमकानामेकोनचत्वारिंशत्अवशिष्टैकत्रिंशद्रूपाणांचैका चमकैःसहषट्पंचाशत्षट्सप्ततिर्वा । तत्रैवषोढाविभागेनमकानामष्टसप्ततिःअवशिष्टरूपाणांद्वे चमकैःसहषण्णवतिःषोडशाधिकंशतंवा । तत्रैवषोडशधाविभागेद्वेशतेअष्टौचअवशिष्टरूपाणांपंच चमकैःसहद्वेशतेएकोनत्रिंशदेकोनपंचाशद्धा । तत्रैवाष्टाचत्वारिंशद्धाविभागेनमकानांषट्शतानिचतुर्विंशतिश्च अवशिष्टरूपाणांपंचदश चमकैःसहषट्शतानिपंचपंचाशत्पंचसप्ततिर्वा । तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमकानांद्वेसहस्रेएकंशतंसप्तनवतिश्चअवशिष्टरूपाणांद्विपंचाशत् चमकैःसहद्वेसहस्रेद्वेशतेपंचषष्टिःपंचाशीतिर्वेति॥ ॥ अतिरुद्रेसमग्रहोमेएकधापक्षेचतुर्दशसहस्राणिषट्शतानिएकचत्वारिंशच्चरूपकाइतितेषांतावत्यआहुतयः चमकानांतुप्रत्येकंरुद्र्यांद्वादशेतिपंचदशसहस्राणिनवशतातिद्वासप्ततिश्च सर्वास्त्रिंशत्सहस्राणिषट्शतानित्रयोदशचाहुतयः । तत्रैवत्रेधाविभागेरूपाणांत्रिचत्वारिंशतसहस्राणिनवशतानित्रयोविंशतिश्च चमकैःसहएकोनषष्टिसहस्राणिअष्टौशतानिपंचनवतिश्च । तत्रैवषोढाविभागेरूपाणांसप्ताशीतिसहस्राणिअष्टौशतानिषट्चत्वारिंशच्चचमकैःसहलक्षमेकंत्रीणिसहस्राणिअष्टौशतान्यष्टादशच । तत्रैवषोडशधापक्षेरूपाणांद्वेलक्षेचतुस्त्रिंशत्सहस्राणिद्वेशतेषट्पंचाशच्च चमकैःसहद्वेलक्षेपंचाशत्सहस्राणिद्वेशतेअष्टाविंशतिश्च । तत्रैवाष्टाचत्वारिंशद्धापक्षेरूपाणांसप्तलक्षाणिद्वेसहस्रेसप्त

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शतान्यष्टषष्टिश्च चमकैःसहसप्तलक्षाणिअष्टादशसहस्राणिसप्तशतानिचत्वारिंशच्च । तत्रैवएकोनसप्तत्युत्तरशतधाविभागेच तुर्विंशतिर्लक्षाणिचतुःसप्ततिसहस्राणित्रीणिशतान्येकोनत्रिंशच्च चमकैःसहचतुर्विंशतिलक्षाणिनवतिसहस्राणित्रीणिशतान्ये काचेति ॥ अतिरुद्रेदशांशहोमेएकधापक्षेनमकानामेकंसहस्रंचत्वारिंशतानिचतुःषष्टिश्चाहुतयः चमकानुवाकानांप्रतिरूपयो जने एकंसहस्रंपंचशतानिषण्णवतिःअवशिष्टरूपेचद्वेद्वादशवेतिसर्वाख्रिणिसहस्राणिद्विषष्टिर्द्वासप्ततिर्वा । तत्रैवत्रेधापक्षेनम कानांचत्वारिसहस्राणित्रीणिशतानिद्वानवतिश्च चमकैःसहपंचसहस्राणिनवशतानिनवतिःशतंवा । तत्रैवषोढापक्षेनमकाना मष्टौसहस्राणिसप्तशतानिचतुरशीतिश्च चमकैःसहदशसहस्राणित्रिशतानिद्व्यशीतिर्द्वानवतिर्वा । एषुत्रिष्वपिपक्षेषुमूलावशि ष्टरूपदशांशाभावः । तत्रैवषोडशधापक्षेनमकानांत्रयोविंशतिसहस्राणिचत्वारिंशतानिचतुर्विंशतिश्च मूलावशिष्टरूपस्यद्वे चम कैःसहपंचविंशतिसहस्राणिचतुर्विंशतिश्चतुस्त्रिंशद्वा । तत्रैवाष्टाचत्वारिंशद्धापक्षेनमकानांसप्ततिसहस्राणिद्वेशतेद्विसप्ततिश्च मूलावशिष्टरूपस्यचपंच चमकैःसहएकसप्ततिसहस्राणिअष्टौशतानिपंचसप्ततिःपंचाशीतिर्वा । तत्रैवैकोनसप्तत्युत्तरशतधाप क्षेनमकानांद्वेलक्षेसप्तचत्वारिंशत्सहस्राणिचत्वारिंशतानिषोडशच मूलावशिष्टरूपस्यचसप्तदश चमकैःसहद्वेलक्षेएकोनपंचा शत्सहस्राणिएकत्रिंशदेकचत्वारिंशद्वा ॥ ॥ अतिरुद्रेशतांशहोमेएकधाविभागेनमकानांएकशतंषट्चत्वारिंशच्चेतितेषांतावत्य आहुतयः अवशिष्टैकचत्वारिंशद्रूपाणांशतांशोनसंभवति । चमकानांत्रयोदशरुद्रीष्वेकंशतंषट्पंचाशच्च रूपकत्रयेद्वेद्वादशवे तिषट्त्रिंशद्वा सर्वास्त्रीणिशतानिअष्टावष्टत्रिंशद्वा । तत्रैवत्रेधाविभागेनमकानांचत्वारिंशतान्यष्टाविंशच्च अवशिष्टरूपाणामेका चमकैःसहषट्शतानिएकएकत्रिंशद्वा । तत्रैवषोढाविभागेनमकानांअष्टौशतानिषट्सप्ततिश्चअवशिष्टरूपाणांद्वे चमकैःसहएकं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सहस्रंचत्वारिंशत्सप्ततिर्वा । तत्रैवषोडशधाविभागेनमकानांद्वेसहस्रेत्रीणिशतानिषट्त्रिंशच्चअवशिष्टरूपाणांसप्त चमकैःसहद्वे
सहस्रेपंचशतानिपंचपंचत्रिंशद्वा । तत्रैवाष्टाचत्वारिंशद्धाविभागेनमकानांसप्तसहस्राणिअष्टौचअवशिष्टरूपाणांविंशतिः चमकैः
सहसप्तसहस्राणिएकंशतंनवतिश्च शतद्वयंविंशतिश्चवा । तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमकानांचतुर्विंशतिसहस्राणिषट्
शतानिचतुःसप्ततिश्चअवशिष्टरूपाणामेकोनसप्ततिः चमकैःसहचतुर्विंशतिसहस्राणिनवशतानिपंचपंचत्रिंशद्वेति ॥ एवंकैश्चि
द्रुद्रहोमसंख्याभिहिता । अन्यैस्तुयत्रप्रागुक्तसंख्यातोधिकंरूपकमवशिष्यतेतत्रसमग्ररूपकेणहोमः । यत्रत्वाहुतयोवशिष्यंते
तत्रषडाहुतिपर्यंतमाद्यैस्त्रिभिर्मंत्रैस्तिस्रआहुतयःअंत्यैस्त्रिभिस्तिस्रः । यत्ररूपादधिकाअवशिष्यंतेतत्ररूपकेणहोमः । रूपकेच
द्वेद्वादशवाचमकाहुतयः । एवंचकिंचिदधिकमात्रंहोमेसंपद्यतेनतुप्रागुक्तपक्षवत्प्रधानभूतकियद्धोमलोपोभवतीत्युक्तं । अस्मिं
श्चपक्षेप्रागुक्तसंख्ययैषांसंख्याएकीकृत्ययोज्या । इहचरुद्रहोमेउक्तेष्वनेकप्रकारेषुयत्रयत्राहुतिसंख्याधिक्यमाहुतिपरिमाणा
धिक्यंवातत्रतत्रफलतारतम्यंद्रष्टव्यं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३०० ॥ रुद्रस्वाहाकारः ॥

श्रीः॥ हरिःॐ नमस्तेरुद्रमन्यवउतोतइषवेनमः॥ नमस्तेअस्तुधन्वनेबाहुभ्यामुततेनमःस्वाहा ॥ ॐ यातइषुःशिवतमाशिवंबभू
वतेधनुः ॥ शिवाशरव्यायातवतयानोरुद्रमृडयस्वाहा ॥ ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तनुवाशंतमया
गिरिंशंताभिचाकशीहिस्वाहा ॥ ॐ यामिषुंगिरिशंतहस्तेबिभर्ष्यस्तवे ॥ शिवांगिरित्रतांकुरुमाहिꣳसीःपुरुषंजगत्स्वाहा ॥
ॐ शिवेनवचसात्वागिरिशाच्छावदामसि ॥ यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाअसत्स्वाहा ॥ ॐ अध्यवोचदधिवक्ताप्रथमोदै

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

व्योभिषक् ॥ अहीꣳश्चसर्वान्जंभयन्त्सर्वाꣳश्चयातुधान्यः स्वाहा ॥ ॐ असौयस्ताम्रोअरुणउतबभ्रुः सुमंगलः ॥ येचेमाꣳरुद्राअभितोदिक्षुश्रिताः सहस्रशोवैषाꣳहेडईमहेस्वाहा ॥ ॐ असौयोवसर्पतिनीलग्रीवोविलोहितः ॥ उतैनंगोपाअदृश्रन्नदृशन्नुदहार्यः ॥ उतैनंविश्वाभूतानिसदृष्टोमृडयातिनः स्वाहा ॥ ॐ नमोअस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेअस्यसत्वानोहंतेभ्योकरं नमः स्वाहा ॥ ॐ प्रमुंचधन्वंनस्त्वमुभयोरार्त्न्योर्ज्याँ ॥ याश्चतेहस्तइषवः पराताभगवोवपस्वाहा ॥ ॐ अवतत्यधनुस्त्वꣳसहस्राक्षशतेषुधे ॥ निशीर्यशल्यानांमुखाशिवोनः सुमनाभवस्वाहा ॥ ॐविज्यंधनुःकपर्दिनोविशल्योबाणवाꣳउत ॥ अनेशन्नस्येषव आभुरस्यनिषंगथिः स्वाहा ॥ ॐ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिब्भुजस्वाहा ॥ ॐ नमस्तेअस्त्वायुधायानाततायधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यांतवधन्वनेस्वाहा ॥ ॐ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ॥ अथोयइषुधिस्तवारेअस्मन्निधेहितꣳस्वाहा १५ ॥ १ ॥ ॐ नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमः स्वाहा ॥ ॐ नमोवृक्षेभ्यो हरिकेशेभ्यःपशूनांपतयेनमः स्वाहा ॥ ॐ नमःसस्पिंजरायत्विषीमतेपथीनांपतयेनमः स्वाहा ॥ ॐ नमोबभ्लुशायविव्याधिनेऽन्नानांपतयेनमः स्वाहा ॥ ॐ नमोहरिकेशायोपवीतिनेपुष्टानांपतयेनमः स्वाहा ॥ ॐ नमोभवस्यहेत्यैजगतांपतयेनमः स्वाहा ॥ ॐ नमोरुद्रायातताविनेक्षेत्राणांपतयेनमः स्वाहा ॥ ॐ नमःसूतायाहंत्यायवनानांपतयेनमः स्वाहा ॥ ॐ नमोरोहितायस्थपतयेवृक्षाणांपतयेनमः स्वाहा ॥ ॐ नमोमंत्रिणेवाणिजायकक्षाणांपतयेनमः स्वाहा ॥ ॐ नमोभुवंतयेवारिवस्कृतायौषधीनांपतयेनमः स्वाहा ॥ ॐ नमउच्चैर्घोषायाक्रंदयतेपत्तीनांपतयेनमः स्वाहा ॥ ॐ नमःकृत्स्नवीतायधावतेसत्वनांपतयेनमः स्वाहा १३॥२॥ ॐ नमः सहमानायनिव्याधिनऽआव्याधिनीनांपतयेनमः स्वाहा ॥ ॐ नमःककुभायनिषंगिणेस्तेनानांपतयेनमः स्वाहा ॥ ॐ नमो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

निषंगिणऽइषुधिमतेतस्कराणांपतयेनमःस्वाहा॥ ॐ नमोवंचतेपरिवंचतेस्तायूनांपतयेनमःस्वाहा॥ ॐ नमोनिचेरवेपरिचरायारण्यानांपतयेनमःस्वाहा॥ ॐ नमःसृकाविभ्योजिघांसद्भ्योमुष्णतांपतयेनमःस्वाहा॥ ॐनमोऽसिमद्भ्योनक्तंचरद्भ्यःप्रकृंतानांपतयेनमःस्वाहा॥ ॐ नमउष्णीषिणेगिरिचरायकुलुंचानांपतयेनमःस्वाहा॥ ॐ नमइषुमद्भ्योधन्वाविभ्यश्चवोनमःस्वाहा॥ ॐ नमआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमःस्वाहा॥ ॐनमआयच्छद्भ्योविसृजद्भ्यश्चवोनमःस्वाहा॥ ॐनमोऽस्यद्भ्योविध्यद्भ्यश्चवोनमःस्वाहा॥ ॐ नमआसीनेभ्यःशयानेभ्यश्चवोनमःस्वाहा॥ ॐनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमःस्वाहा॥ ॐ नमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमःस्वाहा॥ ॐ नमःसभाभ्यःसभापतिभ्यश्चवोनमःस्वाहा॥ ॐनमोअश्वेभ्योश्वपतिभ्यश्चवोनमःस्वाहा १७॥३॥ ॐनमआव्याधिनीभ्योविविध्यंतीभ्यश्चवोनमःस्वाहा॥ ॐ नमउगणाभ्यस्तृंहतीभ्यश्चवोनमःस्वाहा॥ ॐ नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमःस्वाहा॥ ॐनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमःस्वाहा॥ ॐ नमोगणेभ्योगणपतिभ्यश्चवोनमःस्वाहा॥ ॐ नमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमःस्वाहा॥ ॐ नमोमहद्भ्यःक्षुल्लकेभ्यश्चवोनमःस्वाहा॥ ॐ नमोरथिभ्योरथेभ्यश्चवोनमःस्वाहा॥ ॐ नमोरथेभ्योरथपतिभ्यश्चवोनमःस्वाहा॥ ॐनमःसेनाभ्यःसेनानिभ्यश्चवोनमःस्वाहा॥ॐनमःक्षत्तृभ्यःसंगृहीतृभ्यश्चवोनमःस्वाहा॥ ॐनमस्तक्षभ्योरथकारेभ्यश्चवोनमःस्वाहा॥ ॐ नमःकुलालेभ्यःकर्मारेभ्यश्चवोनमःस्वाहा॥ ॐ नमःपुंजिष्टेभ्योनिषादेभ्यश्चवोनमःस्वाहा॥ ॐ नमऽइषुकृद्भ्योधन्वकृद्भ्यश्चवोनमःस्वाहा॥ ॐ नमोमृगयुभ्यःश्वनिभ्यश्चवोनमःस्वाहा॥ ॐ नमःश्वभ्यःश्वपतिभ्यश्चवोनमःस्वाहा १७॥४॥ ॐ नमोभवायचरुद्रायचस्वाहा॥ ॐ नमःशर्वायचपशुपतयेचस्वाहा॥ ॐ नमोनीलग्रीवायचशितिकंठायचस्वाहा॥ ॐ नमःकपर्दिनेचव्युप्तकेशायचस्वाहा॥ ॐ नमःसहस्राक्षायचशतधन्वनेचस्वाहा॥ ॐ नमोगिरिशा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यंचशिपिविष्टायंचस्वाहा ॥ ॐ नमोमीढुष्टमायचेषुमतेचस्वाहा ॥ ॐ नमोह्रस्वायंचवामनायंचस्वाहा ॥ ॐ नमोबृहतेचवर्षीयसेचस्वाहा ॥ ॐ नमोवृद्धायंचसंवृध्वनेचस्वाहा ॥ ॐ नमोअग्रियायचप्रथमायंचस्वाहा ॥ ॐ नमआशवेचाजिरायंचस्वाहा ॥ ॐ नमःशीघ्रियायचशीभ्यायचस्वाहा ॥ ॐ नमऊर्म्यायचावस्वन्यायचस्वाहा ॥ ॐ नमःस्रोतस्यायचद्वीप्यायचस्वाहा १५ ॥ ५ ॥ ॐ नमोज्येष्ठायंचकनिष्ठायंचस्वाहा ॥ ॐ नमःपूर्वजायंचापरजायंचस्वाहा ॥ ॐ नमोमध्यमायंचापगल्भायंचस्वाहा ॥ ॐनमोजघन्यायचबुध्नियायचस्वाहा ॥ ॐ नमःसोभ्यायचप्रतिसर्यायचस्वाहा ॥ ॐ नमोयाम्यायचक्षेम्यायचस्वाहा ॥ ॐ नमउर्वर्यायचखल्यायचस्वाहा ॥ ॐ नमःश्लोक्यायचावसान्यायचस्वाहा ॥ ॐनमोवन्यायचकक्ष्यायचस्वाहा ॥ ॐ नमःश्रवायचप्रतिश्रवायंचस्वाहा ॥ ॐ नमआशुषेणायचाशुरथायचस्वाहा ॥ ॐनमःशूरायचावभिंदतेचस्वाहा ॥ ॐ नमोवर्मिणेचवरूथिनेचस्वाहा ॥ ॐ नमोबिल्मिनेचकवचिनेचस्वाहा ॥ ॐ नमःश्रुतायचश्रुतसेनायचस्वाहा १५ ॥ ६ ॥ ॐ नमोदुंदुभ्यायचाहनन्यायचस्वाहा ॥ ॐ नमोधृष्णवेचप्रमृशायंचस्वाहा ॥ ॐ नमोदूतायंचप्रहितायचस्वाहा ॥ ॐ नमोनिषंगिणेचेषुधिमतेचस्वाहा ॥ ॐ नमस्तीक्ष्णेषवेचायुधिनेचस्वाहा ॥ ॐ नमःस्वायुधायचसुधन्वनेचस्वाहा ॥ ॐ नमःस्रुत्यायचपथ्यायचस्वाहा ॥ ॐ नमःकाट्यायचनीप्यायचस्वाहा ॥ ॐ नमःसूद्यायचसरस्यायचस्वाहा ॥ ॐ नमोनाद्यायचवैशंतायचस्वाहा ॥ ॐ नमःकूप्यायचावट्यायचस्वाहा ॥ ॐ नमोवर्ष्यायचावर्ष्यायचस्वाहा ॥ ॐ नमोमेघ्यायचविद्युत्यायचस्वाहा ॥ ॐ नमईध्रियायचातप्यायचस्वाहा ॥ ॐ नमोवात्यायचरेष्मियायचस्वाहा ॥ ॐ नमोवास्तव्यायचवास्तुपायंचस्वाहा १६ ॥ ७ ॥ ॐ नमःसोमायचरुद्रायंचस्वाहा ॥ ॐ नमस्ताम्रायंचारुणायंचस्वाहा ॥ ॐ नमःशंगायंचपशुपतयेचस्वाहा ॥ ॐ नमउग्रायंचभीमायंचस्वाहा ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ॐ नमोऽग्रेवधायचदूरेवधायचस्वाहा ॥ ॐ नमोहन्त्रेचहनीयसेचस्वाहा ॥ ॐ नमोवृक्षेभ्योहरिकेशेभ्यःस्वाहा ॥ ॐ नमस्ता
रायस्वाहा ॥ ॐ नमःशंभवेचमयोभवेचस्वाहा ॥ ॐ नमःशंकरायचमयस्करायचस्वाहा ॥ ॐ नमःशिवायचशिवतरायच
स्वाहा ॥ ॐ नमस्तीर्थ्यायचकूल्यायचस्वाहा ॥ ॐ नमःपार्यायचावार्यायचस्वाहा ॥ ॐ नमःप्रतरणायचोत्तरणायचस्वाहा ॥
ॐ नमआतार्यायचालाद्यायचस्वाहा ॥ ॐ नमःशष्प्यायचफेन्यायचस्वाहा ॥ ॐ नमःसिकत्यायचप्रवाह्यायचस्वाहा १७॥८॥
ॐ नमइरिण्यायचप्रपथ्यायचस्वाहा ॥ ॐ नमःकिंशिलायचक्षयणायचस्वाहा ॥ ॐ नमःकपर्दिनेचपुलस्तयेचस्वाहा ॥
ॐ नमोगोष्ठ्यायचगृह्यायचस्वाहा ॥ ॐ नमस्तल्प्यायचगेह्यायचस्वाहा ॥ ॐ नमःकाट्यायचगह्वरेष्ठायचस्वाहा ॥ ॐ नमोह्र
द्यायचनिवेष्प्यायचस्वाहा ॥ ॐ नमःपांसव्यायचरजस्यायचस्वाहा ॥ ॐ नमःशुष्क्यायचहरित्यायचस्वाहा ॥ ॐ नमो
लोप्यायचोलप्यायचस्वाहा ॥ ॐ नमऊर्व्यायचसूम्र्यायचस्वाहा ॥ ॐ नमःपर्ण्यायचपर्णशद्यायचस्वाहा ॥ ॐ नमोपगुरमा
णायचाभिघ्नतेचस्वाहा ॥ ॐ नमऽआखिदतेचप्रखिदतेचस्वाहा ॥ ॐ नमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्यःस्वाहा ॥ ॐ नमो
विक्षीणकेभ्योदेवानाꣳहृदयेभ्यःस्वाहा ॥ ॐ नमोविचिन्वत्केभ्योदेवानाꣳहृदयेभ्यःस्वाहा ॥ ॐ नमआनिर्हतेभ्योदेवानाꣳ
हृदयेभ्यःस्वाहा ॥ ॐ नमआमीवत्केभ्योदेवानाꣳहृदयेभ्यःस्वाहा १८॥ ९॥ ॐद्रापेअंधसस्पतेदरिद्रंनीललोहित ॥ एषांपुरुषा
णामेषांपशूनांमाभेर्मारोमोएषांकिंचनाममत्स्वाहा ॥ ॐ यातेरुद्रशिवातनूःशिवाविश्वाहभेषजी ॥ शिवारुद्रस्यभेषजीतयानो
मृडजीवसेस्वाहा ॥ ॐइमाꣳरुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतिं ॥ यथानःशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्न
नातुरꣳस्वाहा ॥ ॐ मृडानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधेमते ॥ यच्छंचयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीतौ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्वाहा ॥ ॐ मानोमहांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं ॥ मानोवधीःपितरंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषःस्वाहा ॥ ॐमानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमतेस्वाहा ॥ ॐ आरात्तेगोघ्नउतपूरुषघ्नेक्षयद्वीरायसुम्नमस्मेतेअस्तु ॥ रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयच्छद्विबर्हाःस्वाहा ॥ स्तुहिश्रुतं गर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं ॥ मृडाजरित्रेरुद्रस्तवानोअन्यंतेअस्मन्निवपंतुसेनाःस्वाहा ॥ ॐ परिणोरुद्रस्यहेतिर्वृणक्तु परित्वेषस्यदुर्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृडयस्वाहा ॥ ॐ मीढुष्टमशिवतमशिवोनःसुमनाभव ॥ परमेवृक्षआयुधंनिधायकृत्तिंवसानआचरपिनाकंबिभ्रदागहिस्वाहा ॥ ॐ विकिरिद्विलोहितनमस्तेअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्यमस्मन्निवपंतुताःस्वाहा ॥ ॐ सहस्राणिसहस्रधाबाहुवोस्तवहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधिस्वाहा १२ ॥ १० ॥ ॐ सहस्राणिसहस्रशोयेरुद्राअधिभूम्यां ॥ तेषांऽसहस्रयोजनेवधन्वानितन्मसिस्वाहा ॥ ॐ अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐनीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐनीलग्रीवाःशितिकंठादिवंरुद्राउपश्रिताः ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐयेवृक्षेषुसस्पिंजरानीलग्रीवाविलोहिताः ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐयेभूतानामधिपतयोविशिखासःकपर्दिनः ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐयेअन्नेषुविविध्यंतिपात्रेषुपिबतोजनान् ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐयेपथांपथिरक्षयऐलबृदायव्युधः ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐयेतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः ॥ तेषांऽसह० तन्मसिस्वाहा यएतावंतश्चभूयांऽसश्चदिशोरुद्रावितस्थिरे ॥ तेषांऽसह० तन्मसिस्वाहा ॥ ॐ नमोरुद्रेभ्योयेपृथिव्यांयेषामन्नमिषवस्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामिस्वाहा ॥ ॐ नमोरुद्रेभ्योयेंतरिक्षेयेषांवातइषवस्तेभ्योदशप्राचीर्दश० दधामिस्वाहा ॥ ॐ नमोरुद्रेभ्योयेदिवियेषांवर्षमिषवस्तेभ्योदशप्राचीर्दश० दधामिस्वाहा ॥ ११ ॥ ॐ शांतिः ३ ॥ ॐ अग्नाविष्णूसजोषसेमावर्धंतुवांगिरः ॥ द्युम्नैर्वाजेभिरागतꣳस्वाहा ॥ ॐ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमे क्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रावश्चमेश्रुतिश्चमेज्योतिश्चमेसुवश्चमेप्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तंचमआधीतंचमेवाक्च मेमनश्चमेचक्षुश्चमेश्रोत्रंचमेदक्षश्चमेबलंचमओजश्चमेसहश्चमआयुश्चमेजरांचमआत्मांचमेतनूश्चमेशर्मचमेवर्मचमेऽगानिचमे स्थानिंचमेपरूꣳषिचमेशरीराणिचमेस्वाहा ॥ १ ॥ ॐ ज्यैष्ठ्यंचमआधिपत्यंचमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमांचमे महिमांचमेवरिमांचमेप्रथिमांचमेवर्ष्मांचमेद्राघुयांचमेवृद्धंचमेवृद्धिश्चमेसत्यंचमेश्रद्धांचमेजगच्चमेधनंचमेवशश्चमेत्विषिश्चमेक्री डांचमेमोदश्चमेजातंचमेजनिष्यमाणंचमेसूक्तंचमेसुकृतंचमेवित्तंचमेवेद्यंचमेभूतंचमेभविष्यच्चमेसुगंचमेसुपथंचमऋद्धंचमऋद्धि श्चमेक्लृप्तंचमेक्लृप्तिश्चमेमतिश्चमेसुमतिश्चमेस्वाहा ॥ २ ॥ ॐ शंचमेमयश्चमेप्रियंचमेनुकामश्चमेकामश्चमेसौमनसश्चमेभद्रं चमेश्रेयश्चमेवस्यश्चमेयशश्चमेभगश्चमेद्रविणंचमेयंताचमेधर्ताचमेक्षेमश्चमेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्र सूश्चमेसीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंचमेऽनामयच्चमेजीवातुश्चमेदीर्घायुत्वंचमेऽनमित्रंचमेभयंचमेसुगंचमेशयनंचमेसू षाचमेसुदिनंचमेस्वाहा ॥ ३ ॥ ॐ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतंचमेमधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रं चमऔद्भिद्यंचमेरयिश्चमेरायश्चमेपुष्टंचमेपुष्टिश्चमेविभुचमेप्रभुचमेबहुचमेभूयश्चमेपूर्णंचमेपूर्णतरंचमेक्षितिश्चमेकूयवाश्चमेन्नंच मेक्षुच्चमेव्रीहयश्चमेयवाश्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेगोधूमाश्चमेमसुराश्चमेप्रियंगवश्चमेऽणवश्चमेश्यामाकाश्चमेनी

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाराश्चमेस्वाहा ॥ ४ ॥ ॐ अश्माचमेमृत्तिकाचमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिरण्यंचमेयश्चमेसीसंचमेत्रपु
श्चमेश्यामंचमेलोहंचमेग्निश्चमआपश्चमेवीरुधश्चमओषधयश्चमेकृष्टपच्यंचमेकृष्टपच्यंचमेग्राम्याश्चमेपशवआरण्याश्चयज्ञेनकल्पं
तांवित्तंचमेवित्तिश्चमेभूतंचमेभूतिश्चमेवसुचमेवसतिश्चमेकर्मचमेशक्तिश्चमेर्थश्चमएमश्चमइतिश्चमेगतिश्चमेस्वाहा ॥ ५॥ ॐ अग्नि
श्चमइंद्रश्चमेसोमश्चमइंद्रश्चमेसविताचमइंद्रश्चमेसरस्वतीचमइंद्रश्चमेपूषाचमइंद्रश्चमेबृहस्पतिश्चमइंद्रश्चमेमित्रश्चमइंद्रश्चमेवरुण
श्चमइंद्रश्चमेत्वष्टाचमइंद्रश्चमेधाताचमइंद्रश्चमेविष्णुश्चमइंद्रश्चमेऽश्विनौचमइंद्रश्चमेमरुतश्चमइंद्रश्चमेविश्वेचमेदेवाइंद्रश्चमेपृथि
वीचमइंद्रश्चमेंऽतरिक्षंचमइंद्रश्चमेद्यौश्चमइंद्रश्चमेदिशश्चमइंद्रश्चमेमूर्धाचमइंद्रश्चमेप्रजापतिश्चमइंद्रश्चमेस्वाहा ॥ ६ ॥ ॐ अंशु
श्चमेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमउपाꣳशुश्चमेंतर्यामश्चमऐंद्रवायवश्चमेमैत्रावरुणश्चमआश्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमं
थीचमआग्रयणश्चमेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमऋतुग्रहाश्चमेतिग्राह्याश्चमऐंद्राग्नश्चमेवैश्वदेवश्चमेमरुत्वतीयाश्चमेमाहेंद्रश्च
मआदित्यश्चमेसावित्रश्चमेसारस्वतश्चमेपौष्णश्चमेपात्नीवतश्चमेहारियोजनश्चमेस्वाहा ॥ ७ ॥ ॐ इध्मश्चमेवर्हिश्चमेवेदिश्चमेधि
ष्णियाश्चमेस्रुचश्चमेचमसाश्चमेग्रावाणश्चमेस्वरवश्चमऊपरवाश्चमेधिषवणेचमेद्रोणकलशश्चमेवायव्यानिचमेपूतभृच्चमआधवनी
यश्चमआग्नीध्रंचमेहविर्धानंचमेगृहाश्चमेसदश्चमेपुरोडाशाश्चमेपचताश्चमेऽवभृथश्चमेस्वगाकारश्चमेस्वाहा ॥ ८॥ ॐ अग्निश्चमेघर्म
श्चमेऽर्कश्चमेसूर्यश्चमेप्राणश्चमेश्वमेधश्चमेपृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेशक्करीरंगुलयोदिशश्चमेयज्ञेनकल्पंतामृक्चमेसाम
चमेस्तोमश्चमेयजुश्चमेदीक्षाचमेतपश्चमऋतुश्चमेव्रतंचमेहोरात्रयोर्वृष्ट्याबृहद्रथंतरेचमेयज्ञेनकल्पेतांस्वाहा ॥ ९ ॥ ॐ गर्भाश्च
मेवत्साश्चमेन्यर्विश्चमेन्यवीचमेदित्यवाट्चमेदित्यौहीचमेपंचाविंशमेपंचावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्यवाट्चमेतुर्यौहीचमे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पष्ठवाच्चमेपष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमेवेहच्चमेऽनड्वान्चमेधेनुश्चमआयुर्यज्ञेनकल्पतांप्राणोयज्ञेनकल्पतामपानोय
ज्ञेनकल्पतांव्यानोयज्ञेनकल्पतांचक्षुर्यज्ञेनकल्पताꣳश्रोत्रंयज्ञेनकल्पतांमनोयज्ञेनकल्पतांवाग्यज्ञेनकल्पतामात्मायज्ञेनकल्पतांय
ज्ञोयज्ञेनकल्पताꣳस्वाहा ॥ १० ॥ ॐ एकाचमेतिस्रश्चमेपंचचमेसप्तचमेनवचमएकादशचमेत्रयोदशचमेपंचदशचमेसप्तदशच
मेनवदशचमएकविꣳशतिश्चमेत्रयोविꣳशतिश्चमेपंचविꣳशतिश्चमेसप्तविꣳशतिश्चमेनवविꣳशतिश्चमएकत्रिꣳशच्चमेत्रयस्त्रिꣳश
च्चमेचतस्रश्चमेष्टौचमेद्वादशचमेषोडशचमेविꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेचत्वारिꣳ
शच्चमेचतुश्चत्वारिꣳशच्चमेष्टाचत्वारिꣳशच्चमेवाजश्चप्रसवश्चापिजश्चक्रतुश्चसुवश्चमूर्धाचव्यश्नियश्चांत्यायनश्चांत्यश्चभौवनश्चभु
वनश्चाधिपतिश्चस्वाहा ॥ ११ ॥ ॐ शांतिः ३ इडादेवहूर्मनु० ॥ सहनाववतुइत्यादि ॥ इतिरुद्राध्यायःसमाप्तः ॥ छ ॥
एवंरुद्रहोमंविधायहृदयाद्यस्त्रांतंप्रागुक्तंपंचांगन्यासंकुर्यात् ॥ ऋत्विगादिपक्षेतुसर्वेप्येवमेवकुर्युः ॥ ततआचार्योयजमानोवा
प्रागुक्तरुद्रपीठदेवताभ्यस्तत्तन्नाममंत्रैराज्यंस्रुवेणजुहुयात् ॥ इहचहौम्यद्रव्यमधोमेखलायांभूमौवापतितमग्नौनक्षिपेत् मध्यमो
परिमेखलयोःपतितस्यपरिधिपरिस्तरणांतर्गतत्वेनाग्निप्रक्षेपार्हत्वात्तद्बहिर्गतस्यांतःप्रक्षेपनिषेधाच्चेतिहोमप्रकारसंक्षेपः ॥ एवंहो
मंपरिसमाप्यचंदनाद्युपचारैरग्नेयेतिमंत्रेणसंकल्पपूर्वकंस्वाहास्वधायुतमग्निंपूजयेत् ॥ अग्नयेगंधादिबहिरेवदद्यात् । ततोग्रह
पीठदेवतानांरुद्रपीठदेवतानांचोत्तरपूजांकेचिदाहुः ॥ पूजासंपूर्णतांवाचयित्वायस्यस्मृत्याआवाहनंनजानामीत्युक्त्वाअंगहो
मादिप्रायश्चित्तहोमांतेबलिदानंइंद्रादिलोकपालेभ्योग्रहेभ्यश्चकृत्वारुद्रपीठस्याग्रेकद्रुद्रायेतिरुद्रायबलिंदत्वापूर्णाहुतिंवसोर्धारां
चजुहुयात् (बलिदानपूर्णाहुतिवसोर्धारादिपूर्वोक्तंद्रष्टव्यं) ॥ एवंवसोर्धारांविधाययथाशाखंपूर्णपात्रविमोकादिकर्मशेषंसमा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पयेदाचार्यः । तदनंतरंवरणक्रमेणऋत्विजःप्रतिनिधयश्चोदङ्मुखाःप्राङ्मुखयजमानहस्तेश्रेयःसंपादनंकुर्वंति ॥ तच्चैवं ॥ शिवा आपःसंत्वितियजमानहस्तेजलंक्षिपेत् सौमनस्यमस्त्वितिपुष्पं अक्षतंचारिष्टंचास्त्वित्यक्षतान् दीर्घमायुःशांतिःपुष्टिस्तुष्टिश्चास्त्वितिपुनर्जलं । मयाभवन्नियोगेन महारुद्रमध्येयथांशेनयःकृतोजपस्तदंशांशेनामुकपक्षेणचयःकृतोहोमस्तस्माज्जपाद्धोमाच्च यदुत्पन्नंश्रेयस्तत्तुभ्यमहंसंप्रददइति ॥ इदंनिर्मूलत्वाद्यजमानप्रतारणामात्रमेव ॥ तदनंतरमग्नेःपश्चिमभागेप्राङ्मुखोपविष्टोयजमानउदङ्मुखानाचार्यादीन्पूजयिष्यइतिसंकल्प्य श्रीमहारुद्रस्वरूपिणेआचार्यायेदंपाद्यंइदंबार्हस्त्यंवासोयुगुलमित्यादिगंधपुष्पधूपदीपतांबूलानिदत्वा पूर्वोक्तविशेषणवतिकालेदेशेचकृतस्यमहारुद्रादिकर्मणःप्रतिष्ठासिद्ध्यर्थममुकगोत्रायामुकवेदांतर्गतामुकशाखाध्यायिनेमुकशर्मणेआचार्यायययथाशक्त्यलंकृतामिमांसवत्सांगांरुद्रदैवत्यां इदंचहिरण्यमग्निदैवतंतुभ्यमहंसंप्रददइतिकुशाक्षतसहितजलंविप्रहस्तेनिक्षिप्य नममेतिवदेत् विप्रःस्वस्तीत्युक्त्वाकामस्तुतिंकइदंकस्माअदादित्यादिकांस्वशाखास्थांपठेत् एवमेवब्रह्मपूजांविधायदक्षिणांदत्वा अनंतरंग्रहजापकेभ्यःपूजापूर्वकंग्रहदक्षिणादेया अनंतरमृत्विजोपिपूजयित्वासंकल्पपूर्वकंदक्षिणांदद्यात् प्रतिनिधिपक्षेपारितोषिकंदद्यात् यथाशक्त्याऽचार्यादिभ्योऽलंकारमुद्रिकोदकपात्रोपानद्व्यजनच्छत्रचामरादीन्युपकरणानिदद्यात् गोरभावेतन्निष्क्रयत्वेननिष्कंतदर्धंवासुवर्णंशक्त्यादद्यात् ततोद्वारजापकेभ्योदक्षिणादेया ततोनानावेदांतर्गतनानाशाखाध्यायिभ्योनानागोत्रेभ्योनानाशर्मभ्योब्राह्मणेभ्योदीनानाथेभ्यश्चयथाशक्तिभूयसींदक्षिणांदातुमुत्सृजेत् नममेतिसकुशाक्षतजलंक्षिप्त्वाॐतत्सदितिवदेत् तदनंतरंग्रहवेदिसमीपस्थकलशोदकेनरुद्रकलशोदकेनद्वारकलशोदकेनचदूर्वापंचपल्लवैरुदङ्मुखाआचार्यर्त्विजस्तिष्ठंतःप्राङ्मुखंसकुटुंबमुपविष्टंयजमानमभिषिंचेयुः अभिषेकेपत्नीवामभागे अभि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षेकसमयेगीतवाद्यादिमंगलघोषःकार्यः ॐ समुद्रज्येष्ठाः० ४ त्रायंतामिहदेवाइत्यादि अक्षीभ्यामित्यादिचअन्येपिस्वशाखो
क्तमंत्राग्राह्याः पौराणास्तुसुरास्त्वामभिषिंचंत्वित्यादयः एवमभिषेकानंतरंसर्वौषधीभिरनुलिप्यशुद्धोदकेनस्नात्वा शुक्लमाल्यां
बरानुलेपनःसपत्नीकोयजमानोग्रहरुद्रपीठदेवतानांगंधाद्युपचारैरुत्तरपूजांदक्षिणाप्रदक्षिणानमस्कारांतांनिर्वर्त्यपुष्पांजलिंदत्वा
आवाहनंनजानामि अपराधसहस्राणि यस्यस्मृत्या मंत्रहीनं इतिपीठद्वयेक्षमाप्यउत्तिष्ठब्रह्मणस्पते अभ्यारमिदद्रयः यांतुदे
वगणाइतिपुष्पाक्षतप्रक्षेपेणग्रहपीठदेवताविसर्ज्य एवमेवरुद्रपीठदेवताविसर्जयेत् ग्रहपीठंपूजोपस्करयुतं रुद्रपीठमपिसोपस्करं
रुद्रप्रतिमांचाचार्यायदद्यात् ॥ तत्रप्रतिमादानमंत्राः ॥ श्रीरुद्रप्रतिमांस्वर्णमयींवस्त्रयुगान्वितां ॥ श्रीरुद्रप्रीतयेचापिप्राप्तानि
ष्टनिवृत्तये ॥ प्रार्थितभीष्टसंसिद्ध्यैतुभ्यंश्रीरुद्ररूपिणे ॥ संप्रदद्यांविधानेनयथोक्तफलमस्तुमे ॥ यदातुमारकतंलिंगंतदादान
मंत्रः ॥ इदंमारकतंलिंगंरौप्यपीठान्वितंशुभं ॥ नंदिनाराजतेनापिश्वेतवस्त्रयुगान्वितम् ॥ धान्यैर्द्वादशभिर्युक्तमेकादशफला
न्वितं ॥ संप्रदद्यांविधानेनयथोक्तफलमस्तुमे ॥ काश्मीरलिंगपक्षेतुइदंमारकतमित्यत्रइदंकाश्मीरजमितिप्रयोज्यं ॥ द्वादश
धान्यानितुव्रीहियवमाषतिलमुद्गखल्वगोधूममसूरप्रियंग्वणुश्यामाकनीवाराः ॥ तेषांमानंतुप्रस्थाधिकंद्रोणावधियथाशक्तिग्रा
ह्यं । उक्तधान्याभावेयथासंभवंग्राह्याणि । ततोग्निंसंपूज्य गच्छगच्छसुरश्रेष्ठेतिविसृज्य सर्वामंडपदेवताद्वारदेवताश्चयांतुदेव
गणाइतिविसृज्य ध्वजपताकाद्युपस्करयुतंमंडपमाचार्यायदद्यात् । अमुंमंडपंध्वजपताकाद्युपस्करयुतंतुभ्यमहंसंप्रददेनममेति ।
स्वस्तीतिसप्रतिब्रूयात् । ततःकृतस्यमहारुद्रादिकर्मणःसंपूर्णतासिद्ध्येयथोपपन्नेनान्नेनयथाकालंनानागोत्रान्नानाशर्मणोमुकसं
ख्यान्ब्राह्मणान्भोजयिष्येइतिसंकल्प्ययथाकालंब्राह्मणान्भोजयेत् भूरिदक्षिणासंकल्पानंतरंवाब्राह्मणभोजनसंकल्पः । रूपे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एकः रुद्र्यांत्रयः लघुरुद्रेएकादश महारुद्रेएकविंशत्युत्तरशतं अतिरुद्रेत्रयोदशशतान्येकविंशचेति ततोब्रह्मार्पणंब्रह्महविः चतुर्भिश्चचतुर्भिश्चेत्युक्त्वा मयायत्कृतंयथाकालंयथादेशंयथाज्ञानंयथाशक्तिचमहारुद्रादिकर्मतेनश्रीपरमेश्वरःप्रीयतां ॐ तत्स द्ब्रह्मार्पणमस्त्वितिसकुशजलंक्षिपेत् । ततःसदस्यंचंदनाक्षतपुष्पवस्त्रतांवूलदक्षिणादिभिःपूजयित्वांजलिंबद्ध्वा मयायत्कृतंमहा रुद्रादिकर्मतत्कालहीनंभक्तिहीनंशक्तिहीनंश्रद्धाहीनंभवतांब्राह्मणानांवचनात्सर्वसंपूर्णमच्छिद्रंचास्तुइतिप्रार्थयेत् ततःसंपूर्ण मच्छिद्रमस्त्वितिसर्वेवदेयुः ॥ ततस्तेषांमंत्राशिषोगृहीत्वातान्सानुनयंविसृज्यदीनानाथादीनन्नादिभिःसंतोष्यस्वयंसुहृन्मित्रा दियुतःसोत्साहःसंतुष्टोहविष्यंभुंजीतेति ॥ ग्रंथाननेकानालोड्यविचार्यसहसज्जनैः ॥ कृतःश्रमोनेनविभुःशंकरःप्रीयतांमम ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

इतिश्रीरुद्रानुष्ठानपद्धतिःसमाप्ता ॥

॥ ३०१ ॥ तृचाकल्पपद्धतिः ॥

श्रीः ॥ सूतउवाच ॥ भक्त्याकृष्णंनमस्कृत्यपांडवःपर्यपृच्छत ॥ तृचामंत्रस्यमाहात्म्यंश्रोतुमिच्छाम्यहंप्रभो ॥ १ ॥ श्रीकृष्णउ वाच ॥ परंव्रतंप्रवक्ष्यामिशृणुपार्थह्यनन्यधीः ॥ सौरवैदिकमंत्रस्यविधिंसर्वरुजापहं ॥२॥ प्रत्यहंपूजनंतस्यमंत्रस्यसकलार्थदं ॥ अर्घ्यंचैवनमस्कारंसर्वयद्यच्छ्रृणुष्वतत् ॥ ३ ॥ तवप्रीत्याप्रवक्ष्यामिसर्वलोकहितायवै ॥ सौरमंत्रस्यमाहात्म्यंप्रवक्ष्यामिसमासतः ॥ ४ ॥ उद्यन्नद्येतिमंत्रोयंसौरःपापप्रणाशनः ॥ रोगघ्नश्चद्विषघ्नश्चभुक्तिमुक्तिप्रदायकः ॥५॥ कण्वेनतुपुरादृष्टंगुह्यंपरमसिद्धिदं ॥ पुत्रस्यरोगनाशायख्यातंलोकहितायच ॥ ६ ॥ तेनचाराधितोदेवःस्तुत्वामंत्रेणभास्करः ॥ तत्प्रवक्ष्यामितेसर्वंन्यासपूजाविधिंक मात् ॥७॥ उद्यन्नद्येत्यृचादित्यमुपतिष्ठेद्दिनेदिने ॥ हृद्रोगंनाशयेत्तस्यपरमारोग्यदायकं ॥ ८ ॥ रोगीचजपतेरोगैर्मुक्तोभास्कर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तुष्टितः ॥ आरोग्यमेतत्परमंजपेन्नित्यमतंद्रितः ॥ ९॥ द्विषंतमितिचार्धर्चयद्विषंतंजपेत्स्मरन् ॥ अष्टावृत्त्याजपेन्नित्यंद्विषंनाश
यतेध्रुवं ॥ १०॥ उत्तमस्तस्यसार्धचद्विषिद्वेषइतिश्रुतं ॥ हृद्रोगोनाशमाप्नोतिमंत्रस्यास्यप्रभावतः ॥ ११ ॥ साधकोविधिनानित्यं
स्नात्वाह्यनुदितेरवौ ॥ धौतशुक्लांबरधरःकृत्वासंध्यादिकाःक्रियाः ॥ १२ ॥ गोमयेनोपलिप्तेचशुचिःस्वासनमाविशेत् ॥ प्राणा
न्निरुध्यसंकल्प्यपूजाद्रव्याणिशोधयेत् ॥ १३ ॥ सकेसराणिपद्मानिकरवीराणिचार्जुन ॥ रक्तचंदनमिश्राणिगंधाक्षतकुशानिच
॥ १४ ॥ मंडलंरक्तवर्णेनआत्माग्रेचतुरस्रकं ॥ विरच्यतत्रपद्मानिगंधपंकेनवालिखेत् ॥ १५ ॥ ताम्रपात्रस्थितंयंत्रंविधायपंक
जोपरि ॥ अर्घ्यपात्रंतथाताम्रंगर्भपद्मंतुलास्थितं ॥ १६ ॥ अर्घ्योदकेनसंपूर्यकलशंस्थापयेत्ततः ॥ गंगांचावाहयेत्तत्रमुद्रामंकु
शयाजपन् ॥ १७ ॥ घृणीतिमूलमंत्रेणप्रणवाष्टकमंत्रितं ॥ गंधाद्यैरर्चितंतच्चअर्घ्यतोयेनपूरयेत् ॥ १८ ॥ अर्चयेत्पूर्ववत्तेन
अभिमंत्र्यततोजलं ॥ प्रोक्षणीकरणैस्त्वेवमात्मानंसेचयेत्ततः ॥ १९ ॥ न्यासंकृत्वाततःपश्चाद्विधिरेषउदाहृतः ॥ उद्यन्नद्येत्यृ
चांतासामृषिःप्रस्कण्वईरितः ॥ २० ॥ छंदोनुष्टुप्तथादेवःसूर्यनारायणःस्मृतः ॥ विनियोगस्तथाकार्योन्यासकर्मत्विदंशृणु
॥ २१ ॥ अनेनैवविधानेनन्यासंकृत्वायथाविधि ॥ उद्येत्यर्धर्चप्रणवमायादीर्घस्वरैर्युतं ॥ २२ ॥ अंगुष्ठादिकरन्यासंदेहांगंच
ततःपरं ॥ हस्तयोर्हृदयेमूर्ध्निपादेनाभौमुखेतथा ॥ २३ ॥ चक्षुषोःकवचंशस्त्रंपादशःक्रमतोन्यसेत् ॥ अनेनैवविधानेनन्यासं
कुर्याद्यथाविधि ॥ २४ ॥ षडंगंकवचंकृत्वासौरमंत्रविधिक्रमात् ॥ एवंयःकुरुतेन्यासंद्वादशांगेपदानिच ॥ २५ ॥ ससर्वरोग
निर्मुक्तःसर्वोपद्रववर्जितः ॥ एवंन्यस्तमुनिर्विप्रःकर्णिकायामधःक्रमात् ॥ २६ ॥ आधारपीठपूजांचक्रमेणैवसमर्चयेत् ॥ कर्णि
कायांन्यसेत्सूर्यसांगावरणभूषितं ॥ २७ ॥ पत्रसंधिस्थिताष्टारदैवतैःसहपूजयेत् ॥ पाद्यार्घ्याचमनंचैवमधुपर्कंनिवेदयेत्

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ २८ ॥ ततस्त्वाचमनंस्नानंवस्त्रमाचमनंतथा ॥ गंधंपुष्पंतथाधूपंदीपंनैवेद्यमेवच ॥ २९ ॥ ततश्चफलतांबूलंदक्षिणाचसम
र्पयेत् ॥ अथार्घ्यपात्रमादायपूरयेत्तीर्थवारिणा ॥ ३० ॥ सकेसराणिपद्मानिकरवीराणिचार्जुन ॥ तिलतंडुलसंयुक्तंकुशैर्गंधो
दकेनच ॥ ३१ ॥ रक्तचंदनमिश्राणिकृत्वावैताम्रभाजने ॥ धृत्वाशिरसितत्पात्रंजानुभ्यांधरणीतले ॥ ३२ ॥ मंत्रपूतंगुडाकेश
अर्घ्यंदद्याद्भभस्तये ॥ पादार्धंचतृचेनैवत्रिधावृत्तंत्रिधापुनः ॥ ३३॥ दद्यादर्घ्यंसमंत्रेणअनुलोम्यैःपुनःपुनः ॥ नित्यात्तुद्विगुणं
कुर्याद्रविवारेप्रयत्नतः ॥ ३४॥ दंडवत्प्रणमेद्भूमावर्घ्यदानक्रमेणतु ॥ पुनश्चगंधपुष्पादीनुपचारान्प्रकल्पयेत् ॥ ३५ ॥ मित्रा
दिदेवताःसर्वास्तर्पयेन्मार्जयेत्ततः ॥ तीर्थस्यग्रहणंकुर्यान्मत्रेणानेनवापुनः ॥ ३६ ॥ विप्रान्द्वादशशक्त्यावाभोजयेद्रविवासरे॥
नमस्कृतिशतांशेनततोब्राह्मणभोजनं ॥ ३७ ॥ इतिश्रीभविष्योत्तरपुराणेतृचाकल्पविधानं ॥ ॥ अथप्रयोगः ॥ आचम्य
प्राणानायम्य ॥ आदौशुभेमुहूर्तेनदीतीरेशुद्धभूमौषोडशद्वादशहस्तान्यतमहस्तंमंडपंचतुर्द्वारंकृत्वातन्मध्येहस्तमात्रांवेदींकृत्वा
सूर्योदयात्पूर्वस्नात्वा परिहितशुक्लशुचिवासाःपूजासंभारान्संभृत्य मंडपमेत्यवेद्याःपश्चिमतःप्राङ्मुखउपविश्यप्राणानायम्यदेश
कालौसंकीर्त्यममामुकव्याधिनिरसनेनशरीरपुष्टिद्वाराश्रीसवितृसूर्यनारायणदेवताप्रीत्यर्थं अमुकसंख्ययातृचाकल्पविधिनार्घ्य
दानानिनमस्कारांश्चकरिष्ये ॥ इतिसंकल्प्य ॥ गणेशपूजनंस्वस्तिवाचनंचकृत्वाआचार्यंऋत्विजश्चयथाविभवंवृणुयात् ॥ तत
आचार्योवेद्यांरक्तचंदनेनकुंकुमेनवाषट्कोणंवृत्तं अष्टकोणंद्वादशकोणंभूगृहंचतुर्द्वारयुतंचतुष्कोणंयंत्रंनिर्मायअर्घ्यपात्रासादना
र्थंपुरतःअष्टदलंचतुरस्रंचनिर्मायअर्घ्यपात्रेअष्टदलंचनिर्मायसंकल्पपूर्वकंभूतशुद्ध्यादिकंकुर्यात् ॥ निर्मितंयंत्रंकेवलवेद्यांताम्र
पात्रेवास्थापयेत् ॥ रविचक्रलक्षणं ॥ अथातःसंप्रवक्ष्यामिरवेश्चक्रमनुत्तमं ॥ बिंदुस्त्रिकोणंवृत्तंचषट्कोणंवृत्तयुग्मकं ॥ पश्चाद

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्टदलंप्रोक्तंद्वादशारंसकर्णिकं ॥ भूपुरत्रितयंपश्चाच्चतुर्द्वारंरवेःक्रमात् ॥ इतिरविचक्रलक्षणं ॥ रवेर्मतांतरेणचक्रं ॥ आद्यंतृती
येतृतीयादिभूतंभूताद्वितीयाच्चद्वितीया (?) ॥ चतुर्थमाद्यंहिपुनःक्रमेणएवंलिखेदष्टदलेषुपद्मं ॥ ततःन्यासंकुर्यात् ॥ तत्रमं
डपदेवताभ्योनमइतिमंडपंसंपूज्यवास्तोष्पतयेब्रह्मणेनमइतिवास्तोष्पतिंपूजयित्वा ॥ ॐ उद्यन्नद्य० इतितृचेनसूक्तेनोदकेनपा
णिनांगान्यभिमृश्य ॥ गुरुभ्योनमः ॥ परमगुरुभ्योनमः ॥ परात्परगुरुभ्योनमः ॥ कण्वपुत्रप्रस्कण्वऋषयेनमःशिरसि ॥
अनुष्टुप्छंदसेनमःमुखे ॥ सर्वरोगापहर्ताजगदात्माश्रीसूर्योदेवताहृदयायनमः ॥ ज्ञाननेत्रेश्रींबीजंनाभ्यैनमः ॥ ह्रींकीलकंआधा
रायनमः ॥ द्वादशांगन्यासेविनियोगः ॥ ॐ उद्यन्नद्यमित्रमहः ॥ ॐ ह्रांदक्षिणहस्तायनमः कुकृतान्मित्रोरक्षतुमां ॥ ॐ आरो
हन्नुत्तरांदिवं ॐ ह्रींवामहस्ताय० विहिताकरणाद्रवीरक्षतु० ॥ ॐ हृद्रोगंममसूर्य ॐ ह्रूंहृदयाय० सूर्योऽज्ञानाद्रक्षत्वनामयंक
रोतुमां ॥ ॐ हरिमाणंचनाशय ॐ ह्रैंमूर्ध्नेनमः शिरोवनमनाद्भानूरक्षतु० ॥ ॐ शुकेषुमेहरिमाणं ॐ ह्रौंदक्षिणपादाय० प्रति
षिद्धगमनात्खगोरक्ष० ॥ ॐ रोपणाकासुदध्मसि ॐ ह्रःवामपादा० विहितागमनात्पूषारक्ष० ॥ ॐ अथोहारिद्रवेषुमे ॐ ह्रां
नाभ्यै० तमोजाड्याद्धिरण्यगर्भोरक्ष० ॥ ॐ हरिमाणंनिदध्मसि ॐ ह्रींमुखाय० प्रतिषिद्धजिह्वाव्यापारात्सर्वतोमरीचीरक्ष० ॥
ॐ उदगादयमादित्यः ॐ ह्रूंदक्षिणनेत्राय० आंध्याद्विहितादर्शनाच्चादित्योरक्ष० ॥ ॐ विश्वेनसहसासह ॐ ह्रैंवामनेत्राय०
प्रतिषिद्धदर्शनात्सवितारक्षतुमां ॥ ॐ द्विषंतंमह्यंरंधयन् ॐ ह्रौंकवचायहुं सर्वरोगेभ्योरिष्टेभ्यश्चाऽर्कोरक्षतुमां ॥ ॐ मोअहं
द्विषतेरधं ॐ ह्रःअस्त्रायफट् सर्वशत्रुकृत्याभ्योऽनिष्टेभ्यश्चभास्करोरक्षतुमां ॥ अथषडंगन्यासः ॥ ॐ उद्यन्नद्यमित्रमह० ह्रांमि
त्ररविभ्यामंगुष्ठाभ्यांनमः ॥ ॐ हृद्रोगंममसूर्यहरिमाणंचनाशय ह्रींसूर्यभानुभ्यां तर्जनीभ्यांनमः ॥ ॐ शुकेषुमे० ध्मसि ह्रूं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

खगपूषभ्यां मध्यमाभ्यां० ॥ ॐ अथोहारिद्र० ध्मसि हैंहिरण्यगर्भमरीचिभ्यां अनामिकाभ्यां० ॥ ॐ उदगादय० सह हौंआ दित्यसवितृभ्यां कनिष्ठिकाभ्यां० ॥ ॐ द्विषंतंमह्यं० रधं हृःअर्कभास्कराभ्यां करतलकरपृष्ठाभ्यां० एवंहृदयादि० ॥ ॐ उद्य न्नद्यमित्रमहआरोहन् ३ ऋचःकवचत्वेनसर्वांगेविन्यसामि इतिव्यापकं ॥ अथपीठपूजा ॥ यंत्राधःकल्पितपीठे ॐ मंडूकाय० एवंसर्वत्रादौप्रणवः ॐ कालाग्निरुद्राय० कच्छपाय० आधारशक्त्यै० महासागराय० सूर्यलोकाय० सूर्यलोकस्थसुरेशेभ्यो० रत्नमंडपाय० रत्नद्वीपाय० कल्पवृक्षेभ्यो० रत्नवेदिकायै० रत्नसिंहासनाय० धर्माय० ज्ञानाय० वैराग्याय० ऐश्वर्याय० अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० अनंताय० आनंदमयकंदाय० संविन्नालाय० कालसरोजाय० प्रकृति पत्रेभ्यो० विकारमयकेसरेभ्यो० पंचाशद्वर्णकर्णिकायै० अर्कमंडलाय० चंद्रमंडलाय० वह्निमंडलाय० सत्त्वाय० रजसे० तमसे० आत्मने० अंतरात्मने० परमात्मने० ज्ञानात्मने० ज्ञानतत्त्वाय० मायातत्त्वाय० कालतत्त्वाय० विद्यातत्त्वाय० परतत्त्वाय० विमलायै० उत्कर्षिण्यै० ज्ञानायै० क्रियायै० योगायैनमः प्रह्वायैनमः सत्यायैनमः ईशान्यैनमः अनुग्रहायै नमः ॐ ह्रीं सर्वादिशक्तिकमलायनमः इतिपीठमंत्राः ॥ एताःपीठदेवताआवाह्यपंचोपचारैःसंपूज्यअंतर्यागंकुर्यात् ॥ अथां तर्यागः ॥ उदास्वरज्ञानक्षेत्रस्वरूपश्रीसूर्यचरणकमलभक्तिसिद्ध्यर्थपरमात्मस्वरूपसिद्ध्यर्थंचअंतर्यागंकरिष्येइतिसंकल्प्यवदेत्॥ सहस्रपुरुषादित्यःसहस्रकिरणोरविः ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ योसावादित्येपुरुषःसोसावहंसूर्योहंविश्वरूप परमात्मनेनमइति ॥ अथात्मपूजा ॥ गंधद्वारामानंदकर्दमःश्रीरनुष्टुप् ॥ आत्मपूजनेवि० ॥ गंधद्वारामितिललाटेगंधाक्षता दिन्यस्य ॥ माल्यादीनीतिपुष्पाणिस्वशिरसिन्यस्य ॥ नमोस्त्वनंतायेत्युक्त्वा सूर्यात्मनेनमइतिकरपुटेनहृद्यात्मानंनमस्कु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्यात् ॥ अथाष्टावरणदेवतापूजा तत्राष्टदलमध्येप्रागादिक्रमेणपूज्याः ॥ मार्तंडायनमः भानवेनमः आदित्याय० हंसाय० सूर्याय० दिवाकराय० तपनाय० भास्कराय० मध्येमंडलाधिपतिर्वर्तमानमासाधिपतिःपूज्यः ॥ मासाधिपाश्चैत्रादिषु ॥ अरुणाय० वेदांगाय० भानवे० इंद्राय० रवये० गभस्तये० यमाय० सुवर्णरेतसे० दिवाकराय० मित्राय० विष्णवे० सूर्याय० इतिप्रथमावरणं ॥ दीप्तायै० सूक्ष्मायै० जयायै० भद्रायै० विभूत्यै० विमलायै० अमोघायै० विद्युतायै० मध्येसर्वतोमुख्यै श्रियै० ॥ इतिद्वितीयं ॥ ततोष्टौमातरः ॥ ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० महालक्ष्म्यै० ॥ इतितृतीयं ॥ आराध्याय० कपिलाय० साराय० प्रभूताय० दंडिने० पिंगलाय० धात्रे० विधात्रे० ॥ इतिच तुर्थ ॥ ऐरावताय० पुंडरीकाय० वामनाय० कुमुदाय० अंजनाय० पुष्पदंताय० सार्वभौमाय० सुप्रतीकाय० ॥ इतिपंच मावरणं ॥ ततोष्टदलाग्रेषुसायुधान्लोकपालान् ॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० कुबेराय० ईशानाय० पद्मस्याधःशेषाय० ऊर्ध्वहिरण्यगर्भाय० ॥ इतिषष्ठं ॥ वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० चक्राय० पद्माय० इतिदशायुधानि ॥ इतिसप्तमं ॥ सोमाय० भौमाय० बुधाय० बृहस्पतये० शुक्राय० शनैश्चराय० राहवे० केतवे० ॥ दलांतरेषुरविंमध्येप्रकल्पयेत् ॥ इत्यष्टमं ॥ असितांगभैरवाय० रुरुभैरवाय० चंडभैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपालभैरवाय० भीषणभैरवाय० संहारभैरवाय० ॥ इतिनवमं ॥ ततोमासाधिपान्पश्चिमतः ॥ गणपतये० दुर्गायै० क्षेत्रपालाय० सारथये० अरुणाय० स्वप्नाय० इच्छायै० पिंगलाय० हराय० साराय० आराध्याय० सप्ततुरंगा० इतिदशमं ॥ चतुर्द्वारेषु॥ दंडिने० पिंगलाय० मासाधिपाय० श्रियोर्मध्येपरमसुखाय० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इत्येकादशं ॥ अथद्वादशदलेषु ॥ मित्राय० रवये० सूर्याय० भानवे० खगाय० पूष्णे० हिरण्यगर्भाय० मरीचये० आदि
त्याय० सवित्रे० अर्काय० भास्कराय० ॥ ततोरुणादि ॥ अरुणाय० सूर्याय० वेदांगाय० भानवे० इंद्राय० रवयेन० गभ
स्तये० यमाय० सुवर्णरेतसेन० दिवाकराय० मित्राय० विष्णवे० ॥ ॐ नमोभगवतेसर्वावरणसंपन्नायत्रिगुणात्मधारिणेसू
र्यायसांगायसपरिवारायनमइतिनमस्कुर्वीत ॥ एहिसूर्येतिपठित्वा ॥ सर्वावरणपीठदेवतासहितश्रीसूर्यइहागच्छइहतिष्ठभूर्भु
वःस्वरोम् ॥ सूर्यमंडलादागत्यहृदयस्थत्वेनभावितंसूर्यआवाहनीमुद्रयापीठमध्येपुष्पांजलिन्यासेनावाहयेत् ॥ ततोदेवस्यदेहे
स्वदेहेचपुरुषसूक्तन्यासंकुर्यात् ॥ अथध्यानं ॥ ध्येयःसदेतिध्यानं ॥ आवाहनीमुद्रयावाहयामि ॥ स्थापनीं ॥ संनिधापनी॥
संरोधिनी ॥ संमुखीकरणी ॥ प्रार्थनीमुद्रयाप्रार्थयामि॥ इतिषण्मुद्राःप्रदर्शयेत्॥ अथपुरुषसूक्तेनषोडशोपचारैःपूजांकुर्यात्॥
षोडशोपचारपूजनेनभगवान्श्रीसूर्यनारायणःप्रीयतांनममप्रीतोभवतुयथाशक्तिसूर्यगायत्रींजपेत् ॥ ॐ भास्करायविद्महेमह
द्द्युतिकरायधीमहि ॥ तन्नआदित्यःप्रचोदयात् ॥ अथार्घ्यदानं ॥ ताम्रमयमष्टदलान्वितमर्घ्यपात्रमादायजानुभ्यामवनिंग
त्वारक्तचंदनरक्तपुष्परक्ततंदुलदूर्वायवान्अर्घ्यपात्रेनिक्षिप्य नासिकाग्रमवलोकयन् ॥ ॐ ह्रांउद्यन्नद्यमित्रमहः ह्रीं ॐ मित्रा
यनमः ॥ ॐ ह्रींआरोहन्नुत्तरांदिवंह्रीं ॐ रवयेनमः ॐ ह्रूंहृद्रोगंममसूर्यहूं ॐ सूर्यायनमः ॥ ॐ ह्रैंहरिमाणंचनाशयह्रैं ॐ भान
वेनमः ॥ ॐ ह्रौंशुकेषुमेहरिमाणंह्रौं ॐ खगायनमः ॥ ॐ ह्रःरोपणाकासुदध्मसिह्रः ॐ पूष्णेनमः ॥ ॐ ह्रांअथोहारिद्रवेषुमेह्रां
ॐ हिरण्यगर्भायनमः ॥ ॐ ह्रींहरिमाणंनिदध्मसिह्रीं ॐ मरीचयेनमः ॥ ॐ ह्रूंउदगादयमादित्यःह्रूं ॐ आदित्यायनमः ॥
ॐ ह्रैंविश्वेनसहसासहह्रैं ॐ सवित्रेनमः ॥ ॐ ह्रौंद्विषंतंमह्यंरंधयन्ह्रौं ॐ अर्कायनमः ॥ ॐ ह्रःमोअहंद्विषतेरधंह्रः ॐ भास्क

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रायनमः ॥ ॐ ह्रांह्रीं उद्यन्० दिवं ह्रांह्रीं ॐ मित्रविभ्यांनमः ॥ ॐ ह्रूंह्रैंहृद्रोगं० शय ह्रूंह्रैं ॐ सूर्यभानुभ्यांन० ॥ ॐ ह्रौंह्रः
शुकेषुमे० धमसि ह्रौंह्रःखगपूषभ्यांन० ॥ ॐ ह्रांह्रीं अथोहारि० निदध्मसि ह्रांह्रीं ॐ हिरण्यगर्भमरीचिभ्यां० ॥ ॐ ह्रूंह्रैं उद
गाद० सह ह्रूंह्रैं ॐ आदित्यसवितृभ्यां० ॥ ॐ ह्रौंह्रःद्विषंतं० रधं ह्रौंह्रः अर्कभास्कराभ्यांन० ॥ ॐ ह्रांह्रींह्रूंह्रैंउद्यन्नद्यऋक्
ह्रांह्रींह्रूंह्रैं० ॐ मित्रविसूर्यभानुभ्यो० ॥ ह्रौंह्रःह्रांह्रींशुकेषुमेऋक् ह्रौंह्रःह्रांह्रीं ॐ खगपूषहिरण्यगर्भमरीचिभ्यो० ॥ ॐ ह्रूंह्रैं
ह्रौंह्रः उदगा० ऋक् ह्रूंह्रैंह्रौंह्रः ॐ आदित्यसवित्रर्कभास्करेभ्योनमः ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः ह्रांह्रींह्रूंह्रैंह्रौंह्रः उद्यन्नद्य०शुकेषु०
उदगा० ह्रांह्रींह्रूंह्रैंह्रौंह्रःह्रांह्रींह्रूंह्रैंह्रौंह्रः ॐ मित्रविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्योनमः ॥ ३ ॥
विनतातनयोदेवःसर्वसाक्षीजगत्पतिः ॥ सप्ताश्वःसप्तरज्जुश्चअरुणोमेप्रसीदतु ॥ इतिमंत्रेणारुणायार्घ्यंदद्यात् ॥ एवंप्रत्यहंद्वा
दशावृत्तयउत्तमःपक्षः ॥ षण्मध्यमः ॥ चतस्रोऽधमः ॥ यथाशक्तिवा ॥प्रत्यहाद्विगुणंरविवारे॥ एवमर्घ्यक्रमेणनमस्काराः॥
नमस्कारांतेपुनःपंचोपचारैःपूजयेत् ॥ ततस्तूचेनषडंगन्यासंकुर्यात् ॥ नमोमित्रस्येतिद्वादशऋग्भिः प्रत्यृचंमित्रादीनांन
मस्कारप्रदक्षिणांकुर्यात् ॥ ततःआवाहन्यादिमुद्राःप्रदर्श्य ॥ नमःसवित्रइतिपुष्पांजलिंदद्यात् ॥ आकृष्णेनेतिस्तुत्वा ॥ सवि
तापश्चातादितिप्रार्थ्य ॥ उद्यन्नद्येतितूचेनश्रीसूर्यसांगंविसर्जयामीतिपुष्पांजल्यर्पणेनविसर्जयेत्॥ अभ्यारमित्यनेनेतिकेचित्॥
यन्मंडलंदीप्तिकरंविशालंरत्नप्रभंतीव्रजनादिरूपं ॥ दारिद्र्यदुःखक्षयकारणंचपुनातुमांतत्सवितुर्वरेण्यं॥ इत्यर्घ्योदकप्रार्थना ॥
अकालमृत्युशमनंसर्वव्याधिविनाशनं ॥ सूर्यस्यार्घ्योदकंतीर्थंजठरेधारयाम्यहं ॥ ततोमहासौरैरुपतिष्ठेत् ॥ अथसौराणांमंत्रा
णांऋक्संख्यामृषिदैवतछंदांसिपुनर्वक्ष्यामोमहाव्याधिदुष्टापस्मारादिहृद्रोगोन्मादोदरगुल्मशूलशांतये गुदापशोणितार्शोभगं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दरजलोदरपांडुरोगादिविस्फोटकाजीर्णरोगप्रमेहादिसर्वव्याधिनाशायममसमस्तपापक्षयार्थंसवितृसूर्यनारायणप्रीत्यर्थं महासौ
रजपेविनियोगः ॥ षष्टिऋचोर्धर्चएतासांसूर्योदेवताकेचिदंतिमाभिःस्तवंमन्यंतेसोहमितिध्यातव्यंयेनसूर्येणाहरहरुपासितेनध
नधान्यवंतोबहुरत्नवंतआदित्यवंतआयुष्यवंतआरोग्यवंतोरयिमंतोधनवंतोबलवंतोबहुपुत्रवंतोभवंति श्रीकामःशांतिकामःश्र
द्धाकामोमेधाकामःप्रज्ञाकामएवंभास्करस्याराधनंकुर्यात्सदागृहीपापक्षयार्थींव्याधिनाशार्थींनमःशौनकाय नमःपरमऋषिभ्यो
नमःपरमऋषिभ्योनमःपरमऋषिभ्यइतिसौरशांतिः ॥ अथमहार्घ्यसंख्या ॥ चतुर्विंशत्यर्घ्यदानैरेकावर्तनकंस्मृतं ॥ आवर्तनै
श्चतुर्विंशैरर्घिणीचप्रकीर्तिता ॥ चतुर्विंशत्यार्घिणीभिर्लघ्वर्घ्यश्चप्रकीर्तितः ॥ चतुर्विंशतिलघ्वर्घ्यैर्महार्घ्यश्चप्रकीर्तितः ॥ लक्षत्र
येणविधिवदेक ३३१७७६ त्रिंशत्सहस्रकैः ॥ षट्सप्तत्यधिकैःसप्तशतैरर्घ्यप्रदानतः ॥ सुप्रसन्नोभवेत्सूर्यःशश्वद्रोगप्रशांतये ॥
तस्मात्सर्वप्रयत्नेनमहार्घ्यंचसमाचरेत् ॥ एवमर्घ्यविधिंकृत्वाततोहोमंसमाचरेत् ॥ शतंवाथसहस्रंवाअयुतंलक्षमेववा ॥ जुहुया
त्पायसाज्येनखाद्यैर्नानाविधैरपि ॥ अर्कपुष्पैःसमिद्भिश्चकरवीरैस्तथापरे ॥ रक्तचंदनमिश्राभिरक्षताभिस्तथापुनः ॥ साग्रैर्दूर्वा
कुरैश्चेतितिलैरपियवैःशुभैः ॥ गायत्र्यासौरमंत्रैर्वातृचामंत्रैर्विशेषतः ॥ व्याहृत्यावाथहोतव्यंसूर्यस्यप्रीतयेपुनः ॥ ब्राह्मणेभ्यः
प्रदातव्यंवस्त्रधेनुहिरण्यकं ॥ एवमाराधितःसूर्यःसर्वान्कामान्विधास्यति ॥ इतितृचार्घ्यपद्धतिः ॥ अथषण्मुद्रालक्षणं ॥ हस्ता
भ्यामंजलिंकृत्वानामिकामूलपर्वणोः ॥ अंगुष्ठौनिक्षिपेत्सेयंमुद्रात्वावाहनीस्मृता ॥ १ ॥ अधोमुखीत्वियंचेत्स्यात्स्थापनीमुद्रिका
स्मृता ॥ उत्थितांगुष्ठमुष्ट्योस्तुसंयोगात्संनिधापनी ॥ २ ॥ अंतःप्रवेशितांगुष्ठासैवसंरोधिनीमता ॥ मुष्टिद्वयस्थितांगुष्ठौसुमु
खौचपरस्परं ॥ ३ ॥ संश्लिष्टांगुलिकौकुर्यात्सेयंसंमुखमुद्रिका ॥ प्रसृतांगुलिकौहस्तौमिथःश्लिष्टौचसंमुखौ ॥ ४ ॥ कुर्यात्स्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हृदयेसेयंमुद्राप्रार्थनसंज्ञिका ॥ ५ ॥ इतिषण्मुद्राः ॥ इतिसंक्षेपः ॥ विशेषविस्तरस्तृचाभास्करादवगंतव्यः ॥ ॥ ७ ॥

॥ ३०२ ॥ अपामार्जनम् ॥

श्रीः ॥ दाल्भ्यउवाच ॥ भगवन्प्राणिनःसर्वेविषरोगाद्युपद्रवैः ॥ दुष्टग्रहोपघातैश्चसर्वकालमुपद्रुताः ॥ १ ॥ आभिचारिककृत्याभिःस्पर्शरोगैश्चदारुणैः ॥ सदासंपीड्यमानास्तेतिष्ठंतिमुनिसत्तम ॥ २ ॥ येनकर्मविपाकेनग्रहरोगाद्युपद्रवाः ॥ नभवंतिनृणांतन्मेयथावद्वक्तुमर्हसि ॥ ३ ॥ पुलस्त्यउवाच ॥ जनार्दनंभूतपतिंजगद्गुरुंस्मरन्मनुष्यःसततंमहामुने ॥ दुष्टान्यशेषाण्यपहंतिसद्योनिःशेषकार्याणिचसाधुसाधयेत् ॥ ४ ॥ व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनितोषितः ॥ तेनरामुनिशार्दूलग्रहरोगादिभागिनः ॥ ५ ॥ यैर्नतत्प्रवणंचित्तंसर्वदैवनरैःकृतं ॥ विषग्रहज्वराणांतेमनुष्यादाल्भ्यभागिनः ॥ ६ ॥ आरोग्यंपरमामृद्धिंमनसायद्यदिच्छति ॥ तत्तदाप्नोत्यसंदिग्धंपरत्राच्युततोषकृत् ॥ ७ ॥ नाधीन्प्राप्नोतिनव्याधीन्नविषग्रहबंधनं ॥ कृत्यास्पर्शभयंवापितोषितेमधुसूदने ॥ ८ ॥ सर्वदुष्टशमस्तस्यसौम्यास्तस्यसदाग्रहाः ॥ देवानामप्यधृष्योसौतुष्टोयस्यजनार्दनः ॥ ९ ॥ यःसमःसर्वभूतेषुयथात्मनितथापरे ॥ उपवासादिनायेनतोषितोमधुसूदनः ॥ १० ॥ तोषितेतत्रजायंतेनराःपूर्णमनोरथाः ॥ अरोगाःसुखिनोभोगान्भोक्तारोमुनिसत्तम ॥ ११ ॥ नतेषांशत्रवोनैवस्पर्शरोगाभिचारिकं ॥ ग्रहरोगादिकंवापिपापकार्यंनविद्यते ॥ १२ ॥ अव्याहतानिकृष्णस्यचक्रादीन्यायुधानिच ॥ रक्षंतिसकलापद्भ्योयेनविष्णुरुपासितः ॥ १३ ॥ दाल्भ्यउवाच ॥ अनाराधितगोविंदायेनरादुःखभागिनः ॥ तेषांदुःखाभिभूतानांयत्कर्तव्यंदयालुभिः ॥ १४ ॥ पश्यद्भिःसर्वभूतस्थंवासुदेवंमहामुने ॥ समदृष्ट्याहृषीकेशंतन्मेब्रूह्यविशेषतः ॥ १५ ॥ पुलस्त्यउवाच ॥ तद्वक्ष्यामिमुनिश्रेष्ठसमाहितमनाःशृणु ॥ रोगदोष

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हरंनृणामुरुपापप्रणाशनं ॥ १६ ॥ सौवर्णंराजतंताम्रंमृन्मयंवानवंदृढं ॥ अव्रणंकलशंशुद्धंस्थापयेत्तंडुलोपरि ॥ १७ ॥ तत्रो
दकंसमानीयशुद्धंनिर्मलमेवच ॥ एकंशतंकुशान्साग्रान्स्थापयेत्कलशोपरि ॥ १८ ॥ विरिंचिनासहोत्पन्नपरमेष्ठीनिसर्गज ॥
नुदसर्वाणिपापानिदर्भस्वस्तिकरोभव ॥ १९ ॥ कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः ॥ कुशाग्रेशंकरंविद्यात्रयोदेवाःकुशे
स्थिताः ॥ २० ॥ गृहीत्वातुसमूलाग्रान्कुशाञ्छुद्धानुपस्पृशेत् ॥ मार्जयेत्सर्वगात्राणिकुशाग्रैर्दाल्भ्यशांतिकृत् ॥ २१ ॥ शरी
रेयस्यतिष्ठंतिकुशोत्थाजलबिंदवः ॥ नश्यंतितस्यपापानिगरुडेनेवपन्नगाः ॥ २२ ॥ विष्णुभक्तोविशेषेणशुचिस्तद्गतमानसः ॥
रोगग्रहविषार्तानांकुर्याच्छांतिमिमांशुभां ॥ २३ ॥ वराहंनारसिंहंचवामनंविष्णुमेवच ॥ ध्यात्वासमाहितोभूत्वादिक्षुनामानि
विन्यसेत् ॥ २४ ॥ नारसिंहंसमभ्यर्च्यशुचौदेशेकुशासने ॥ दिग्रक्षांचततःकुर्याद्विष्णुभक्तःसमाहितः ॥ २५ ॥ मंत्रैरेतैर्यथा
लिंगंकुर्याद्दिग्बंधमादितः ॥ पूर्वेनारायणःपातुवारिजाक्षस्तुदक्षिणे ॥ २६ ॥ प्रद्युम्नःपश्चिमेपातुवामदेवतस्तथोत्तरे ॥ ईशान्यां
वामनश्चैवतथाग्नेय्यांजनार्दनः ॥२७॥ नैर्ऋत्यांपद्मनाभश्चवायव्यांचैवमाधवः ॥ ऊर्ध्वंगोवर्धनोदेवोह्यधरायांत्रिविक्रमः ॥ २८॥
एताभ्योदशदिग्भ्यस्तुसर्वतःपातुकेशवः ॥ जलेरक्षतुवाराहःस्थलेरक्षतुवामनः ॥ २९ ॥ अटव्यांनारसिंहश्चसर्वतःपातुकेशवः ॥
एवंकृत्वातुदिग्बंधंविष्णुंसर्वत्रसंस्मरेत् ॥ ३० ॥ अव्यग्रचित्तःकुर्वीतन्यासकर्मयथाविधि ॥ अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरं
॥ ३१ ॥ मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं ॥ कनिष्ठिक्यांन्यसेद्विष्णुंकरमध्येतुमाधवं ॥ ३२ ॥ हृन्मध्येचिंतयेद्देवंपर
मात्मानमीश्वरं ॥ नृसिंहंमणिबंधेचकरपृष्ठेजनार्दनं ॥ ३३ ॥ कृतेचवैष्णवेन्यासेसर्वपापैःप्रमुच्यते ॥ एवंन्यासंकरेकृत्वापश्चादं
गेषुविन्यसेत् ॥ ३४ ॥ शिखायांकेशवंन्यस्यमूर्ध्निनारायणंन्यसेत् ॥ ललाटेमाधवंन्यस्यगोविंदंतुभ्रुवोर्न्यसेत् ॥ ३५ ॥ चक्षुर्म

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ध्येन्यसेद्विष्णुंश्रवणेमधुसूदनं ॥ त्रिविक्रमंकपोलेतुवामनंकर्णमूलयोः ॥ ३६ ॥ नासारंध्रद्वयेचैवश्रीधरंकल्पयेद्बुधः ॥ उत्तरोष्ठेहृषीकेशंपद्मनाभंतथाधरे ॥ ३७ ॥ दामोदरंदंतपंक्तौवाराहंचुबुकेतथा ॥ जिह्वायांवासुदेवंचतालौतुगरुडध्वजं ॥ ३८ ॥ वैकुंठंकंठमध्येतुह्यनंतंनासिकोपरि ॥ दक्षिणेतुभुजेविप्रविन्यसेत्पुरुषोत्तमं ॥ ३९ ॥ वामेभुजेमहाभागंराघवंहृदिविन्यसेत् ॥ हरिंनाभौतुविन्यस्यस्तनयोःपीतवाससं ॥ ४० ॥ पीतांबरंसर्वतनौहरिंनाभ्यांतुविन्यसेत् ॥ करेतुदक्षिणेविप्रततःसंकर्षणंन्यसेत् ॥ ४१ ॥ वामेरिपुहरंविद्यात्कटिमध्येऽपराजितं ॥ पृष्ठेक्षितिधरंविद्यादच्युतंस्कंधयोर्द्वयोः ॥ ४२ ॥ वक्षस्थलेमाधवंतुकुक्ष्योश्चयोगशायिनं ॥ योगीशंदक्षिणेपार्श्वेवामपार्श्वेश्रियःपतिं ॥ ४३ ॥ आंत्रेषुवासुदेवंचगुदमध्येऽव्ययंन्यसेत् ॥ स्वयंभुवं मेढ्रमध्येह्यूर्वोश्चैवगदाधरं ॥ ४४ ॥ जानुमध्येचक्रधरंजंघयोरच्युतंन्यसेत् ॥ पादयोःपुष्कराक्षंचसर्वतोविश्वरूपिणं ॥ ४५ ॥ गुल्फयोर्नारसिंहंचपादपृष्ठेमितौजसं ॥ अंगुल्यांश्रीधरंन्यस्यपद्माक्षंसर्वसंधिषु ॥४६॥ नखेषुमाधवंन्यस्यन्यसेत्पादतलेऽच्युतं॥ रोमकूपेगुडाकेशंकृष्णंरक्तास्थिमज्जसु ॥ ४७ ॥ मनोबुद्धिरहंकारचित्तेन्यस्यजनार्दनं ॥ आपादमस्तकंचैवप्रद्युम्नंकल्पयेद्बुधः ॥ ४८ ॥ पूजाकालेतुदेवस्यस्नानकालेतथैवच ॥ होमारंभेचकर्तव्यंत्रिसंध्यासुचनित्यशः ॥ ४९ ॥ एवंन्यासविधिंकृत्वास्वयं नारायणोभवेत् ॥ तनुर्विष्णुमयीतस्यायावत्किंचिन्नभाषते ॥ ५० ॥ एवंन्यासविधिंकृत्वायत्कार्यंशृणुतद्विज ॥ पादमूलेतुदेवस्यशंखंविन्यस्यनिर्मलं ॥ ५१ ॥ वनमालांहृदिन्यस्यसर्वदेवाभिपूजितां ॥ गदांवक्षस्थलेन्यस्यचक्रंविन्यस्यपृष्ठतः ॥ ५२ ॥ श्रीवत्सांकंन्यसेन्मूर्ध्निपंचांगंकवचंन्यसेत् ॥ ५३ ॥ ॐ नमोभगवतेविष्णवेकेशवायसर्वक्लेशापहर्त्रेहृदयायनमः ॥ ॐ नमोभगवतेविष्णवेकेशवायसर्वक्लेशापहर्त्रेशिरसेस्वाहा ॥ एवमेवशिखायैवषट् ॥ कवचायहुं ॥ नेत्रत्रयायवौषट् ॥ अस्त्रायफट् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इतिदिग्बंधः ॥ विष्णुरूर्ध्वमधःपातुवैकुंठोवैदिशोदश ॥ पातुमांसर्वतोरामोधन्वीचक्रीचकेशवः ॥ ५४ ॥ अपामार्जनकोन्या
सःसर्वव्याधिविनाशनः ॥ आत्मनश्चपरस्यापिविधिरेषउदाहृतः ॥ ५५ ॥ वैष्णवेनतुकर्तव्यःसर्वसिद्धिप्रदायकः ॥ जपप्रारंभ
कालेतुह्यपामार्जनकंपरं ॥ ५६ ॥ ततोजपेदिदंदाल्भ्यसर्वरोगविनाशनं ॥ आयुरारोग्यमैश्वर्यज्ञानविद्वत्फलंलभेत् ॥ ५७ ॥
यद्यच्छुभकरंलोकेतत्सर्वंप्राप्नुयान्नरः ॥ अभयंसर्वभूतेभ्योविष्णुलोकंसगच्छति ॥ ५८ ॥ ॥ अस्यश्रीअपामार्जनस्तोत्रमं
त्रस्य ॥ पुलस्त्योभगवान्ऋषिः ॥ अनुष्टुप्त्रिष्टुप्बृहत्यश्छंदांसि ॥ श्रीवराहोनृसिंहोवामनोविष्णुर्देवता ॥ हरअमुकस्यदुरित
मितिबीजं ॥ अच्युतानंतगोविंदेतिशक्तिः ॥ तप्तहाटककेशांतेतिकीलकं ॥ ज्वलत्पावकलोचनेतिकवचं ॥ वज्रायुधनखस्पर्शे
तिव्यापकं ॥ हांहांहुंहुंफट्इत्यस्त्रं ॥ ममामुकस्यवाज्वरसन्निपातादिपीडाशमनार्थमपामार्जनस्तोत्रजपेविनियोगः ॥ अथध्यानं ॥
नीलोत्पलदलश्यामंपीतांबरधरंहरिं ॥ शंखचक्रगदापाणिंध्यात्वापामार्जनंजपेत् ॥ ५९ ॥ बृहत्तनुंबृहद्गात्रंबृहदंष्ट्रंसुशोभनं ॥
समस्तवेदवेदांगयुक्तांगैर्भूषणैर्युतं ॥ ६० ॥ उद्धृत्यभूमिंपातालाद्धस्ताभ्यामुपगृह्यच ॥ आलिंग्यभूमिंशिरसामूर्ध्निजिघ्रंतम
च्युतं ॥ ६१ ॥ रत्नवैडूर्यमुक्ताभिर्भूषणैरुपशोभितं ॥ पीतांबरधरंदेवंशुक्लमाल्यानुलेपनं ॥ ६२ ॥ त्रयस्त्रिंशत्कोटिदेवैःस्तूय
मानंमुदान्वितं ॥ ऋषिभिःसनकाद्यैश्चस्तूयमानंदिवानिशं ॥ ६३ ॥ नृत्यद्भिरप्सरोभिश्चगीयमानंचकिन्नरैः ॥ इत्थंध्यात्वा
तथात्मानंजपेन्नित्यमतंद्रितः ॥ ६४ ॥ सुवर्णमंडपांतःस्थंपद्मंध्यायेत्सकेसरं ॥ सकर्णिकैर्दलैश्चैवह्यष्टाभिःपरिशोभितं ॥ ६५ ॥
कलंकरहितंदेवंपूर्णचंद्रार्बुदप्रभं ॥ तडित्समानशोभावत्कंठनालेनशोभितं ॥ ६६ ॥ श्रीवत्सांकितवक्षस्थंतीक्ष्णदंष्ट्रंसुलोचनं ॥
जपाकुसुमसंकाशंरक्तहस्ततलान्वितं ॥ ६७ ॥ पद्मासनसमारूढंयोगपद्मसमन्वितं ॥ पीतवस्त्रपरीधानंशुक्लवस्त्रोत्तरीयकं ॥६८॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कटिसूत्रेणहैमेननूपुरेणविराजितं ॥ वनमालादिशोभाढ्यंमुक्ताहारोपशोभितं ॥ ६९ ॥ सपंकजंचतुर्हस्तंतत्पत्रायतलोचनं ॥
प्रातःसूर्यसमाभ्यांवैकुंडलाभ्यांविराजितं ॥ ७० ॥ अनेकसूर्यसंकाशंमुकुटाटोपमस्तकं ॥ शंखचक्रगृहीताभ्यामुद्वाहुभ्याम
थान्ययोः ॥ ७१ ॥ केयूरकांतिसंस्पर्धिमुद्रिकारत्नशोभितं ॥ जानूपरिन्यस्तकरद्वंद्वंरत्ननखांकितं ॥ ७२ ॥ जंघाभरणसंस्प
र्धिविस्फूर्जत्कंकणत्विषं ॥ चतुर्थींचंद्रसंकाशंसुदंष्ट्रमुखपंकजं ॥ ७३ ॥ मुक्ताफलाभसुमहद्दंतावलिविराजितं ॥ चंपकाकुसु
माभंचसुनासामुखपंकजं ॥ ७४ ॥ अतिरक्तोष्ठवदनंव्यात्तास्यमतिभीषणं ॥ वामांकस्थश्रियायुक्तंशांतिदांतुंगरोहिणीं ॥ ७५ ॥
अर्हणींचक्रपादांचसुनासांशुभलक्षणां ॥ सुभ्रूंसुकेशींसुश्रोणींसुभुजांद्विभुजाननां ॥ ७६ ॥ सुप्रतिष्ठांशुभ्रदंतींचतुर्हस्तांवि
चिंतयेत् ॥ दुकूलांचैवचार्वंगींहरिणींसर्वकामदां ॥ ७७ ॥ तप्तकांचनसंकाशांसर्वाभरणभूषितां ॥ सुवर्णकलशप्रख्यपीनो
न्नतपयोधरां ॥ ७८ ॥ गृहीतमातुलिंगाभ्यामुद्वाहुभ्यामथान्ययोः ॥ गृहीतपद्मयुगुलजांवूनदकरान्वितां ॥ ७९ ॥ एवंदेवीं
नृसिंहस्यवामांकोपरिसंस्मरेत् ॥ देवंचकर्णिकामध्येकाम्येनित्येचकर्मणि ॥ ८० ॥ आत्मानंचनृसिंहस्यशरीरंसंस्मरेदपि ॥
हेमाद्रिशिखराकारंशुद्धस्फटिकसन्निभं ॥ ८१ ॥ पूर्णचंद्रनिभंदेवंद्विभुजंवामनंस्मरेत् ॥ सूर्यकोटिप्रतीकाशंचंद्रकोटिसुशी
तलं ॥ ८२ ॥ ज्वलत्कालानलप्रख्यंतडित्कोटिसमप्रभं ॥ सुंदरंपुंडरीकाक्षंकिरीटेनविराजितं ॥ ८३ ॥ षोडशस्त्रीसहस्रैश्चगंध
र्वाप्सरसांगणैः ॥ चतुर्मुखाद्यैर्देवेशैःस्तोत्राराधनतोषितैः ॥ ८४ ॥ त्र्यंबकोवैमहादेवोनृत्यतेसन्निधौहरेः ॥ ८५ ॥ अजिन
दंडकमंडलुमेखलारुचिरपावनवामनमूर्तये ॥ मितजगत्त्रितयायजितारयेनिगमवाक्पटवेवटवेनमः ॥ ८६ ॥ शांतंपद्मासनस्थं
सकलशशिनिभंश्रीपतिंकोमलांगंहस्तेपीयूषकुंभंदधियुतकवलंहस्तपद्मेदधानं ॥ पीतंवस्त्रंदधानंकटकमुकुटयोर्हारकेयूरमालांना

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नालंकारयुक्तंस्फटिकमणिनिभंवामनंनौमिनित्यं ॥ ८७ ॥ अभ्रश्यामःशुभ्रयज्ञोपवीतीसत्कौपीनःपीतकृष्णाजिनश्रीः ॥ छत्री
दंडीपुंडरीकायताक्षःपायादेवोवामनोब्रह्मचारी ॥ ८८ ॥ अतिसुविमलगात्ररुक्मपात्रस्थमन्नंसुललितदधिखंडंपाणिनादक्षिणेन ॥
कलशममृतपूर्णंवामहस्तेदधानंतरतिसकलदुःखंवामनंभावयेद्यः ॥ ८९ ॥ क्षीरसागरकल्लोलसितरक्ततनुंशुभं ॥ मणिमुक्तामये
रम्येसकांतंसंस्थितंशुभं ॥ ९० ॥ शुभ्रमेघविनिर्मुक्तंसुधासिक्तंसुसुंदरं ॥ एकनामानमात्मानंकृत्वापामार्जनंजपेत् ॥ ९१ ॥
ॐ नमःपरमार्थायपुरुषायमहात्मने ॥ नमस्कृत्वाप्रवक्ष्यामियत्तत्सिध्यतुमेवचः ॥ ९२ ॥ अरूपबहुरूपायव्यापिनेपरमात्मने ॥
नमस्कृत्वाप्रवक्ष्यामि० ॥ ९३ ॥ निष्कल्मषायशुद्धायध्यातृपापहरायच ॥ नम० ॥ ९४ ॥ नारायणायदेवायविश्वेशायेश्वरा
यच ॥ नम० ॥ ९५ ॥ सच्चिदानंदरूपायय़ोगिनेपरमात्मने ॥ नम० ॥ ९६ ॥ वराहायनृसिंहायवामनायमहात्मने ॥ नम०
॥ ९७ ॥ गोविंदपद्मनाभायवासुदेवायविष्णवे ॥ नम० ॥ ९८ ॥ दामोदरायदेवायअनंतायमहात्मने ॥ नम० ॥ ९९ ॥ जना
र्दनायकृष्णायउपेंद्रश्रीधरायच ॥ नम० ॥ १०० ॥ त्रिविक्रमायरामायवैकुंठायनरायच ॥ नम० ॥ १०१ ॥ हिरण्यगर्भपतये
हिरण्यकशिपुच्छिदे ॥ नम० ॥ २ ॥ भक्तप्रियायविभवेविष्वक्सेनायशार्ङ्गिणे ॥ नम० ॥ ३ ॥ चक्रहस्तायशूरायतार्क्ष्यपत्रायधी
मते ॥ नम० ॥ ४ ॥ अधोक्षजायदक्षायमत्स्यायमधुसूदिने ॥ नम० ॥ ५ ॥ दैत्यारयउपेंद्रायभूतानांजीवनायच ॥ नम०
॥ ६ ॥ विष्टरश्रवसेतस्मैक्षीरांभोनिधिशायिने ॥ नमस्कृत्वाप्रवक्ष्यामियत्तत्सिध्यतुमेवचः ॥ ७ ॥ नारसिंहमहोग्रेशतस्मैतुभ्यं
नमोनमः ॥ वराहेशनृसिंहेशवामनेशत्रिविक्रम ॥ ८ ॥ हयग्रीवेशसर्वेशहृषीकेशहराशुभं ॥ अपराजितचक्राद्यैश्चतुर्भिःपरमा
युधैः ॥ ९ ॥ अखंडितानुभावैश्चसर्वदुःखहरोभव ॥ हरामुकस्यदुरितंदुष्कृतंदुरुपासितं ॥ १० ॥ मृत्युबाधार्तिभयदंदुरिष्ट

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्यचयत्फलं ॥ परापध्यानसंस्थानप्रयुक्तंचाभिचारिकं ॥ ११ ॥ गरस्पर्शमहारोगप्रयुक्तंजरयत्वरं ॥ कृष्णायवासुदेवायहरये परमात्मने ॥ १२ ॥ प्रणतक्लेशनाशायगोविंदायनमोनमः ॥ हरयेवासुदेवायनमःकृष्णायशार्ङ्गिणे ॥ १३ ॥ नमःपुष्करनेत्राय केशवायादिचक्रिणे ॥ नमःकमलकिंजल्कपीतनिर्मलवाससे ॥ १४ ॥ महाहवरिपुस्कंधधृष्टरूपायचक्रिणे ॥ दंष्ट्रोद्धृतक्षितिधृ तेत्रिमूर्तिपतयेनमः ॥ १५ ॥ महायज्ञवराहायशेषभोगोरुशायिने ॥ तप्तहाटककेशांतज्वलत्पावकलोचन ॥ १६ ॥ वज्रायुध नखस्पर्शदिव्यसिंहनमोस्तुते ॥ आधिव्याधिमहाभीतिमहादुःखनिवारण ॥ १७ ॥ अपारनरसिंहेशदिव्यसिंहनमोस्तुते ॥ श्री नृसिंहोदिव्यसिंहःसर्वारिष्टार्तिदुःखहा ॥ १८ ॥ एकवीरोद्भुतबलोमंत्रयंत्रैकभंजनः ॥ सर्वत्ररक्षमांनाथभयेभ्यश्चाग्निलोचन ॥ १९ ॥ प्रसादात्तवदेवेशनमांहिंसंतुहिंसकाः ॥ तीक्ष्णैर्नखाग्रैर्यमुरौविदार्यत्रातासुरंदैत्यपतिंजघान ॥ सुदर्शनंपद्मगदांचशं खंबिभ्रन्नृसिंहोस्तुममाभयाय ॥ १२० ॥ काश्यपायातिह्रस्वायऋग्यजुःसामरूपिणे ॥ तुभ्यंवामनरूपायक्रमतेगांनमोनमः ॥ २१ ॥ वराहाशेषदुष्टानिसर्वपापफलानिवै ॥ मर्दमर्दमहादंष्ट्रमर्दमर्दमहीधर ॥ २२ ॥ नारसिंहकरालास्यदंतप्रांतनखोज्ज्व ल ॥ भंजभंजनिनादेनदुष्टान्यस्यार्तिनाशन ॥ २३ ॥ ऋग्यजुःसामगर्भाभिर्वाग्भिर्वामनरूपधृक् ॥ प्रशमंसर्वदुःखानिनयत्वा शुजनार्दनः ॥ २४ ॥ अस्यश्रीज्वरमंत्रस्य ॥ कालाग्निर्ऋषिः ॥ अनुष्टुप्छंदः ॥ महादेवोदेवता ॥ सकलज्वरोपशांत्यर्थेजपेवि नियोगः ॥ भस्मायुधायविद्महेएकदंष्ट्रायधीमहि ॥ तन्नोज्वरःप्रचोदयात् ॥ त्रिपाद्भस्मप्रहरणस्त्रिशिरारक्तलोचनः ॥ समेप्री तःसुखंदद्यात्सर्वामयपतिर्ज्वरः ॥ २५ ॥ आद्यंतवंतःकवयःपुराणाःसूक्ष्माबृहंतोह्यनुशासितारः ॥ सर्वान्ज्वरान्ध्वंतुममानिरु द्धप्रद्युम्नसंकर्षणवासुदेवाः ॥ २६ ॥ कुबेरतेमुखंरौद्रंनंदिन्नानंदमावह ॥ ज्वरमृत्युभयंघोरंविशनाशयमेज्वरं ॥ २७ ॥ अंगवंग

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कलिंगेषुसौराष्ट्रमगधेषुच ॥ वाराणस्यांचयद्दत्तंकिंनस्मरसिरेज्वर ॥ २८ ॥ श्रीकंठक्रोधसंभूतसुरासुरनमस्कृत ॥ नित्यंक्रतु रिपुःशीघ्रंसुखंवितरमेज्वर ॥ २९ ॥ एषांचतुर्णांमंत्राणामयुतोजपईरितः ॥ योसौसरस्वतीतीरेव्यपुत्रोब्राह्मणोमृतः ॥ १३० ॥ यवादिकृतपद्मेषुसमाह्वयामिपूज्यच ॥ त्रिरात्रज्वरनाशायददाम्येतत्तिलोदकं ॥ ३१ ॥ येषुमंत्रेषुयाःप्रोक्तादेवतास्तास्तुतर्पयेत् ॥ ताम्रपात्रेतिलान्कृत्वागंधपुष्पाक्षतादिभिः ॥ ३२ ॥ शुद्धोदकेनशुद्धात्मासहस्रपरिसंख्यया ॥ आवाह्यपूजयित्वातुस्थंडिलेचो पकल्पिते ॥ ३३ ॥ होमंचाथप्रकुर्वीतक्षीराज्येनाम्रपल्लवैः ॥ आद्यंतमंत्रैःस्वाहांतैर्दशमंत्रैश्चमंत्रवित् ॥ ३४ ॥ एवंकृतेज्वराः सर्वेप्रशमंयांत्यशेषतः ॥ नबाधंतेपुनस्तानिदुष्टादीनांपरिग्रहात् ॥ ३५ ॥ आयुरारोग्यमैश्वर्यंज्ञानंवित्तंफलंलभेत् ॥ यद्यच्छु भरतंलोकेतत्सर्वंप्राप्नुयान्नरः ॥ ३६ ॥ ऐकाहिकंद्व्याहिकंचतथात्रिदिवसज्वरं ॥ चातुर्थिकंतथात्युग्रंतथैवसततज्वरं ॥ ३७ ॥ दोषोत्थंसन्निपातोत्थंतथैवागंतुकज्वरं ॥ शमंनयाशुगोविंदछिंधिछिंध्याशुवेदनां ॥ ३८ ॥ नेत्रदुःखंशिरोदुःखंदुःखंचोदरसं भवं ॥ अतिकासमतिश्वासमतितापंसवेपथुं ॥ ३९ ॥ नुदघ्राणांघ्रिरोगांश्चकुष्ठरोगंतथाक्षयं ॥ कामलादींस्तथारोगान्प्रमेहांश्चा तिदारुणान् ॥ १४० ॥ भगंदरातिसारांश्चमुखरोगांश्चवल्गुलीन् ॥ चित्रादीन्नखरोगांश्चत्वगस्थ्यंतर्वहिःस्थितान् ॥ ४१ ॥ अश्मरींमूत्रकृच्छ्रांश्चरोगानन्यांश्चदारुणान् ॥ येवातप्रभवारोगायेचपित्तसमुद्भवाः ॥ ४२ ॥ कफोद्भवाश्चयेरोगायेचान्येसा न्निपातिकाः ॥ आगंतुकाश्चयेरोगालूताविस्फोटकादयः ॥ ४३ ॥ तेसर्वेप्रशमंयांतुवासुदेवापमार्जिताः ॥ विलयंयांतुतेसर्वेवि ष्णोरुच्चारणेनतु ॥ ४४ ॥ क्षयंगच्छंत्वशेषास्तेचक्रेणाभिहताहरेः ॥ अच्युतानंतगोविंदनामोच्चारणभेषजात् ॥ ४५ ॥ नश्यंति सकलारोगाःसत्यंसत्यंवदाम्यहं ॥ ४६ ॥ अच्युतेतिमनःपूतमनंतेतिवचस्तथा ॥ गोविंदेतितनुःपूतात्वज्ञाताज्ञानपातकैः ॥४७॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अच्युतानंतगोविंदपरमानंदमाधव ॥ ॐनमःसंपुटीकृत्यजपन्नेवमधोक्षजं ॥ ४८ ॥ सत्यंसत्यंपुनःसत्यमुत्क्षिप्यभुजमुच्यते ॥
वेदशास्त्रात्परंनास्तिनदेवःकेशवात्परः ॥ ४९ ॥ स्थावरंजंगमंवापिकृत्रिमंचापियद्विषं ॥ दंतोद्भूतंनखोद्भूतमाकाशप्रभवंविषं
॥ १५० ॥ लूतादिप्रभवंयच्चविषमत्यंतदुःखदं ॥ शमंनयाशुतत्सर्वंकीर्तितोसिजनार्दन ॥ ५१ ॥ ग्रहान्प्रेतग्रहांश्चैवतथावैडा
किनीग्रहान् ॥ मुखमंडलिकान्घोरान्रेवतींवृद्धरेवतीं ॥ ५२ ॥ वृद्धाख्यांश्चग्रहांश्चोग्रांस्तथामातृग्रहानपि ॥ बालस्यविष्णोश्चरि
तंहंतुबालग्रहानिमान् ॥ ५३ ॥ नारसिंहस्यतेदृष्ट्यादग्धायेचापियौवने ॥ सटाकरालवदनोनारसिंहोमहाबलः ॥ ५४ ॥ ग्रहान
शेषान्त्सर्वेषांखादखादाग्निलोचन ॥ वृद्धानांयेग्रहाःकेचिद्येचबालग्रहाःक्वचित् ॥ ५५ ॥ नारसिंहमहासिंहज्वालामालोज्वला
नन ॥ अमीषांदेवदेवेशधनुर्ग्रहणमोक्षणात् ॥ ५६ ॥ येरोगायेमहोत्पातायद्विषंयेमहाग्रहाः ॥ अत्यंतपातसंभूतायेकौटिल्यसमु
द्भवाः ॥ ५७ ॥ यानिचक्रूरभूतानिग्रहपीडाश्चदारुणाः ॥ शस्त्रक्षतेषुयेदोषाज्वालागर्दभकादयः ॥ ५८ ॥ यानिचान्यानिभू
तानिप्राणिपीडाकराणिवै ॥ तानिसर्वाणिसर्वात्मन्परमात्मन्जनार्दन ॥ ५९ ॥ किंचिद्रूपंसमास्थायवासुदेवाशुनाशय ॥ क्षि
प्त्वासुदर्शनंचक्रंज्वालामालातिभीषणं ॥ १६० ॥ सर्वदुःखोपशमनंकुरुदेववराच्युत ॥ सुदर्शनमहाज्वालछिंधिछिंध्याशुवेदनां
॥ ६१ ॥ सुदर्शनमहाचक्रगोविंदस्यवरायुध ॥ सुदर्शनमहावेगकोटिसूर्यसमप्रभ ॥ ६२ ॥ त्रैलोक्यरक्षाकर्तात्वंदुष्टदानवम
र्दन ॥ तीक्ष्णधारमहावेगछिंधिछिंधिमहाज्वरं ॥ ६३ ॥ छिंधिछिंधिमहाव्याधिंछिंधिछिंधिमहाज्वरं ॥ छिंधिवातंचलूतांचछिंधि
घोरंमहद्विषं ॥ ६४ ॥ रुजंदाहंचशूलंचनिमिषज्वालगर्दभं ॥ सुदर्शनस्यमंत्रेणग्रहायांतुदिशोदश ॥ ६५ ॥ ॐ नमोभगवतेभो
भोसुदर्शनदुष्टंदारयदारयदुरितंहनहनपापंमथमथआरोग्यंकुरुकुरुहांहांहुंहुंफट्ठःठःहननोद्विषः ॥ त्रैलोक्यरक्षाकर्तात्वमाज्ञा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पयजनार्दन ॥ ॐ नमोभगवतेभोभोसुदर्शनचक्रायुधायमहाशस्त्रास्त्रराजायभूतेभ्योभयंनाशयनाशयछिंधिछिंधिपरमंत्रान्परयं
त्रान्परतंत्रान्जारणमारणादिछेदयछेदयहुंफट्स्वाहा ॥ ॐ नमोभगवतेगरुडध्वजायएह्येहिसर्वज्वरभयंचक्रेणछिंधिछिंधिभिं
धिभिंधिमुद्गरशंखचक्रगदापद्मखड्गैः सर्वज्वरभयंहरहरनाशयनाशयमामामरणमचिरेणरक्षरक्षाकर्तात्वंआज्ञापयजनार्दनहुंफट्
स्वाहा ॥ ॐ त्रौंह्रौंसुदर्शनमहायंत्रराजधगधगनितांतभयंकरान्छिंधिछिंधिभिंधिभिंधिविदारयविदारयपरमंत्रान्परतंत्रान्अभि
चारान्ग्रासयग्रासयपरमंत्राणिदुष्टचेटककरणमारीमहामारीग्रहवेतालपिशाचभूतप्रेतादीन्भक्षयभक्षयसर्वभूतानित्रासयत्रास
यस्वाहा ॥ ॐ अचक्रायविचक्रायसुचक्रायअसुरांतकचक्रायसर्वलोकरक्षणायचक्रायसुदर्शनायास्त्रराजायहुंफट्स्वाहा ॥ इति
सुदर्शनविद्या ॥ सर्वदुष्टानिरक्षांसिक्षयंयांतुविभीषया ॥ प्राच्यांरक्षप्रतीच्यांचदक्षिणोत्तरयोस्तथा ॥ ६६ ॥ ईशान्येचतथा
ग्नेय्यांनैर्ऋत्यांचमहादिशं ॥ वायव्यांसर्वभूतेभ्यःसदारक्षांकरोत्वसौ ॥ ६७ ॥ रक्षांकरोतुसर्वत्रश्रीनृसिंहःस्वगर्जितैः ॥ भुवि
दिव्यंतरिक्षेचपार्श्वतःपृष्ठतोऽग्रतः ॥ ६८ ॥ व्याघ्रसिंहवराहेषुअग्निचोरभयेषुच ॥ रक्षांकरोतुभगवान्बहुरूपीजनार्दनः ॥ ६९ ॥
यथाविष्णुर्जगत्सर्वंसदेवासुरमानुषं ॥ तेनसत्येनसकलंदुष्टमस्यप्रशाम्यतु ॥ १७० ॥ यथाविष्णौस्मृतेसद्यःक्षयंयातीहपातकं ॥
तेनसत्येन० ॥ ७१ ॥ यथायज्ञेश्वरोविष्णुर्वेदांतेष्वपिगीयते ॥ तेनसत्येन० ॥ ७२ ॥ परमात्मायथाविष्णुर्वेदांतेष्वपिगीयते ॥
तेनसत्येन० ॥ ७३ ॥ यथायोगेश्वरोविष्णुर्वेदांतेष्वपिगीयते ॥ तेनसत्येन० ॥७४॥ शांतिरस्तुशुभंचास्तुप्रणश्यत्वसुखंचयत् ॥
वासुदेवशरीरोत्थैःकुशैःसंमार्जितोमया ॥ ७५ ॥ अपामार्जनगोविंदोनरनारायणःसदा ॥ ममास्तुसर्वदुःखानांप्रशमोवचना
द्धरेः ॥ ७६ ॥ शांताःसमस्तरोगास्तेग्रहाःसर्वेविषाणिच ॥ भूतानिप्रशमंयांतुसंस्मृतेमधुसूदने ॥ ७७ ॥ एतत्समस्तरोगेषुभूत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ग्रहभयेषुच ॥ अपामार्जनकंशस्त्रंविष्णोर्नामाभिमंत्रितं ॥ ७८ ॥ यथाचक्रायुधंविष्णोर्यथाशूलंहरस्यच ॥ यथावज्रंसुरेन्द्रस्य तथाविप्रकरेकुशाः ॥ ७९ ॥ एतेकुशाविष्णुशरीरसंभवाजनार्दनाग्रेस्वयमेवचागताः ॥ हतंमयादुष्टमशेषमस्यस्वस्थोभवत्वेष वचोयथाहरेः ॥ १८० ॥ शांतिरस्तुशिवंचास्तुदुष्टमस्यप्रशाम्यतु ॥ यदस्यदुरितंकिंचित्तत्क्षिप्तंलवणार्णवे ॥ ८१ ॥ स्वास्थ्य मस्यसदैवास्तुहृषीकेशस्यकीर्तनात् ॥ यतएवागतंपापंतत्रैवप्रतिगच्छतु ॥ ८२ ॥ एतद्रोगादिपीडासुजंतूनांहितकाम्यया ॥ त्रिसंध्यंजपतेयस्तुसर्वरोगैःप्रमुच्यते ॥ ८३ ॥ विष्णुभक्तेनकर्तव्यमपामार्जनकंपरं ॥ अनेनसर्वदुःखानिप्रशमंयांत्यसंशयं ॥८४॥ सर्वभूतहितार्थायकुर्यात्तस्मात्सदैवहि ॥ कुर्यात्तस्मात्सदैवह्यैंनमइतिशक्तिबीजं ॥ ८५ ॥ यइदंधारयेद्विद्वान्श्रद्धाभक्तिसम न्वितः ॥ ग्रहास्तंनोपसर्पतिनरोगानचराक्षसाः ॥ ८६ ॥ धन्योयशस्वीशत्रुघ्नःस्तवोयंमुनिसत्तम ॥ पठतांशृण्वतांचापिददा तिपरमांगतिं ॥ ८७ ॥ स्तोत्रराजमिदंनामअपामार्जनकंहरेः ॥ विष्णुभक्तेनकर्तव्यंब्रह्महत्याविनाशनं ॥ ८८ ॥ विष्णोःप्रीति करंस्तोत्रंयःपठेन्नियमेनतु ॥ तस्यतुष्यतिगोविंदोमनसाचिंतितंलभेत् ॥ ८९ ॥ जन्मकोटिकृतंपापंपठनादेवनश्यति ॥ गोसह स्रफलंतस्यपरंपदमवाप्नुयात् ॥ १९० ॥ दाल्भ्योनाममहाभागःपुलस्त्योब्रह्मनंदनः ॥ तयोःसंवादसंभूतमपामार्जनकंपरं ॥ ९१ ॥ इतिश्रीविष्णुधर्मोत्तरपुराणेदाल्भ्यपुलस्त्यसंवादेअपामार्जनस्तोत्रंसंपूर्णं ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥

॥ ३०३ ॥ शीतलाष्टकस्तोत्रम् ॥

श्रीः ॥ आचमनादिदेशकालनिर्देशांतेमुकगोत्रस्यामुकशर्मणःशरीरेउत्पन्नोत्पत्स्यमानविस्फोटकजनितदाहादिसर्वोपद्रवस्यजी वच्छरीराविरोधेनपरिहारार्थंशीतलाष्टकस्यनवावृत्तिजपंक० ॥ आसनादि० जपकर्मसमारभे ॥ अस्यश्रीशीतलाष्टकस्तोत्रमंत्रस्य

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

श्रीरुद्रऋषिःश्रीशीतलादेवताअनुष्टुप्छंदःलक्ष्मीर्बीजंभवानीशक्तिःविस्फोटकपीडापरिहारार्थेजपेविनियोगः ॥ रुद्रर्षयेनमःशि
रसि अनुष्टुप्छंदसेनमोमुखे शीतलांबादेवतायैहृदये ॐ ह्रींनमःशीतलेदेविविस्फोटकान्नाशयनाशयतंतून्छेदय २ दाहंशमय
२ ॐ ऐंह्रींश्रींशीतलादेव्यैस्वाहा ह्रींनमःशीतलेअंगुष्ठाभ्यांनमःएवंतर्जन्यादिषडंगंविधायध्यात्वामूलमंत्रमष्टवारंजप्त्वाध्याये
त् ॥ भूतेशंभूतसैन्यैःपरिवृतमनिशंकृष्णवेतालपीठेहाहाहीहीतिवादैरशनिभरसहैरट्टहासैरुपेतं ॥ हस्तैःसाहस्रसंख्यैरनलगण
सखैःसाध्यदेहाधिरूढान्स्फोटान्दंदह्यमानंमुहुरहमनिशंघंटकर्णनमामि ॥ १ ॥ घंटकर्णमहाप्राज्ञसर्वोपद्रवनाशन ॥ मसूरि
काभयंप्राश्यरक्षरक्षमहाबल ॥ २ ॥ अथशीतलाध्यानं ॥ सजलांबुदवच्छ्यामांरक्तमाल्यानुलेपनां ॥ तुंगस्तनांविशालाक्षींना
नालंकारभूषितां ॥ लसन्नितंबबिंबाढ्यांखरारूढांसुशोभनां ॥ हस्ताभ्यांमार्जनींशूर्पंदधानांनग्निकांस्मरेत् ॥ मार्जन्यामार्जय
न्स्फोटान्रोगानन्यांश्चदारुणान् ॥ शूर्पेकृत्वांभसिक्षारेप्रक्षिपंतींमुहुर्मुहुः ॥ इति ॥ स्कंदउवाच ॥ नमस्तेदेवदेवेशशीतलायाः
स्तवंशुभं ॥ वक्तुमर्हस्यशेषेणविस्फोटकभयापहं ॥ १ ॥ ईश्वरउवाच ॥ नमामिशीतलांदेवींरासभस्थांदिगंबरां ॥ मार्जनीकल
शोपेतांशूर्पालंकृतमस्तकां ॥ २ ॥ वंदेहंशीतलांदेवींसर्वरोगभयापहां ॥ यामासाद्यनिवर्तेतविस्फोटकभयंमहत् ॥ ३ ॥ शीतले
शीतलेचेतियोब्रूयादाहपीडितः ॥ विस्फोटकभवोदाहःक्षिप्रंतस्यविनश्यति ॥ ४ ॥ यस्त्वामुदकमध्येतुध्यात्वासंपूजयेन्नरः ॥
विस्फोटकभयंघोरंगृहेतस्यनजायते ॥ ५ ॥ शीतलेज्वरदग्धस्यपूतिगंधहतस्यच ॥ प्रनष्टचक्षुषांपुंसांत्वामाहुर्जीवनौषधं ॥ ६ ॥
शीतलेतनुजान्रोगान्नृणांहरसिदुस्त्यजान् ॥ विस्फोटकविशीर्णानांत्वमेकामृतवर्षिणी ॥ ७ ॥ गलगंडग्रहारोगायेचान्येदारुणा
नृणां ॥ तेतवस्मरणादेवशीतलेयांतिसंक्षयं ॥ ८ ॥ नमंत्रोनौषधंकिंचित्पापरोगस्यविद्यते ॥ त्वमेकाशीतलेत्रात्रीनान्यांपश्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मिदेवतां ॥ ९ ॥ मृणालतंतुसदृशींनाभिहृन्मध्यसंस्थितां ॥ यस्त्वांविचिंतयेद्देवींतस्यमृत्युर्नजायते ॥ १० ॥ इतिशीतलाष्टकं ॥
अष्टकंशीतलादेव्यायःपठेन्मानवःसदा ॥ विस्फोटकभयंघोरंकुलेतस्यनजायते ॥ श्रोतव्यंपठितव्यंचश्रद्धाभक्तिसमन्वितैः ॥
उपसर्गविनाशायपरंस्वस्त्ययनंमहत् ॥ शीतलाष्टकमेवेदंनदेयंयस्यकस्यचित् ॥ दातव्यंचसदातस्मैश्रद्धाभक्तियुतायच ॥ रास
भोगर्दभश्चैवखरोवैशाखनंदनः ॥ शीतलावाहनश्चैवदूर्वाक्रंदनक्रंदनः ॥ एतानिखरनामानिशीतलाग्रेतुयःपठेत् ॥ तस्यदेहेच
गेहेचशीतलानैववाध्यते ॥ इतिश्रीस्कंदपुराणेशीतलाष्टकंसंपूर्णं ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ३०४ ॥ नवचंडीशतचंडीप्रयोगः ॥

श्रीगणेशायनमः ॥ यजमानःशुभदिनेसपत्नीकस्तिलतैलेनकृताभ्यंगःस्नात्वासपूर्णकलशहस्तोमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेण
प्रविश्योपविश्यदेशकालौस्मृत्वा ममेहजन्मनिदुर्गाप्रीतिद्वारासर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यनवच्छिन्नसं
ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं ममामुककार्यसिद्ध्यर्थंवासनवग्रहमखांनवचंडींशतचंडींसहस्रचंडीं
वास्वयंब्राह्मणद्वारावाकरिष्ये ॥ तदंगतयागणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धमाचार्यादिवरणंचकरिष्ये इतिसंक
ल्प्यतानिकृत्वाआचार्यादीन्वृत्वातान्यथाविभवंवस्त्रादिनामधुपर्केणचसंपूज्यप्रार्थयेच्च॥ तेचशतचंड्यांदश॥सहस्रचंड्यांशतं॥
केचिदत्रग्रहजपार्थमेकमृत्विजंवरयंति ॥ अथाचार्यआचम्यदेशकालौसंकीर्त्ययजमानेनवृतोहमाचार्यकर्मकरिष्येइतिसंकल्प्य
यदत्रेतिगौरसर्षपान्विकीर्यपंचगव्येनकुशोदकेनवामंडपंप्रोक्षेत् ॥ शुचीवोहव्या० आपोहिष्ठा० अपवित्रः० ॥ पृथिवित्वया०
इत्युपविश्य ॥ अनंतासनायनमः विमलासनाय० पद्मासनाय० ॥ अपक्रामंतु० इतिभूमौवामपादघातत्रयंकृत्वायथोपदेशंवि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

बलिपूजांगृहाणत्वमष्टाभिःशक्तिभिःसह ॥ इतिमंत्रौपठित्वादक्षिणनासारंध्रेणपुष्पांजलावानीयमूलेनमूर्तावावाह्यावाहनादिमु द्राःयोनिमुद्रांचप्रदर्श्यमूर्तेःषडंगंकृत्वामूलमंत्रेणजयंतीमंगलाकालीत्यनेनासनपाद्यार्घ्याचमनमधुपर्कान्निवेदयेत् ॥ तत्रपात्रच तुष्टयमस्त्रेणप्रक्षाल्यगंधादिनिक्षिपेत् ॥ तत्रपाद्येदूर्वाविष्णुक्रांताश्यामाकपत्राणि ॥ अर्घ्येगंधपुष्पाक्षतकुशाग्रसर्षपयवदूर्वाः ॥ आचमनीयेजातीफलकंकोललवंगानि ॥ मधुपर्केदधिमधुच ॥ ततःसुगंधितैलपंचामृतोष्णोदकतीर्थोदकैः श्रीसूक्तदेवीसूक्तसरस्व तीसूक्तैरभिषिच्यपुनराचमनंदत्वा पट्टदुकूलयुगकंचुकाभरणाष्टगंधबिल्वपत्रनानापुष्पहरिद्राकुंकुमसिंदूरालक्तकपरिमलद्रव्या णिसमर्प्यसहस्रंपुष्पाणिसमर्पयेत् ॥ अथांगपूजा ॥ दुर्गायै० पादौ० ॥ गिरिजायै० गुल्फौ० ॥ अपर्णायै० जानुनी० ॥ हरि प्रियायै० ऊरू० ॥ पार्वत्यै० कटिं० ॥ आर्यायै० नाभिं० ॥ जगन्मात्रे० उदरं० ॥ मंगलायै० कुक्षिं० ॥ शिवायै० हृदयं० ॥ माहेश्वर्यै० कंठं० ॥ विश्ववंद्यायै० स्कंधौ० ॥ काल्यै० बाहू० ॥ आद्यायै० हस्तौ० ॥ वरदायै० मुखं० ॥ सुवाण्यै० नासि कां० ॥ कमलाक्ष्यै० नेत्रे० ॥ अंबिकायै० शिरः० ॥ देव्यै० सर्वांगं० ॥ ॥ अथाष्टोत्तरशतनामानि ॥ माहेश्वर्यैनमः० महा देव्यै० जयंत्यै० सर्वमंगलायै० लज्जायै० भगवत्यै० वंद्यायै० भवान्यै० पापनाशिन्यै० चंडिकायै० कालरात्र्यै० भद्रका ल्यै० अपराजितायै० महाविद्यायै० महामेधायै० महामायायै० महाबलायै० कात्यायन्यै० जयायै० दुर्गायै० मंदारवनवा सिन्यै० आर्यायै० गिरिसुतायै० धात्र्यै० महिषासुरघातिन्यै० सिद्धिदायै० बुद्धिदायै० नित्यायै० वरदायै० वरवर्णिन्यै० अंबिकायै० सुखदायै० सोम्यायै० जगन्मात्रे० शिवप्रियायै० भक्तसंतापसंहर्त्र्यै० सर्वकामप्रपूरिण्यै० जगत्कर्त्र्यै० जग द्धात्र्यै० जगत्पालनतत्परायै० अव्यक्तायै० व्यक्तरूपायै० भीमायै० त्रिपुरसुंदर्यै० अपर्णायै० ललितायै० वेद्यायै० पूर्णचंद्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

निभाननायै० चामुंडायै० चतुरायै० चंद्रायै० गुणत्रयविभाविन्यै० हेरंबजनन्यै० काल्यै० त्रिगुणायै० यशोधारिण्यै० उमायै० कलशहस्तायै० दैत्यदर्पनिषूदन्यै० बुद्ध्यै० कांत्यै० क्षमायै० शांत्यै० पुष्ट्यै० तुष्ट्यै० धृत्यै० सत्यै० वरायुधधरायै० धीरायै० गौर्यै० शाकंभर्यै० शिवायै० अष्टसिद्धिप्रदायै वामायै० शिववामांगवासिन्यै० धर्मदायै० धनदायै० श्रीदायै० कामदायै० मोक्षदायै० अपरायै० चित्स्वरूपायै० चिदानंदायै० जयश्रियै० जयदायिन्यै० सर्वमंगलमंगल्यायै० जगत्रय हितैषिण्यै० शर्वाण्यै० पार्वत्यै० धन्यायै० स्कंदमात्रे० अखिलेश्वर्यै० प्रपन्नार्तिहरायै० देव्यै० सुभगायै० कामरूपिण्यै० निराकारायै० साकारायै० महाकाल्यै० सुरेश्वर्यै० शर्वायै० श्रद्धायै० ध्रुवायै० कृत्यायै० मृडान्यै० भक्तवत्सलायै० सर्व शक्तिसमायुक्तायै० शरण्यायै० सर्वकामदायै० ॥ इत्यष्टोत्तरशतनामानि ॥ अथावरणपूजा ॥ देव्यादक्षिणे ऐंमहाकाल्यैवि च्चेनमः ॥ मध्ये ह्रींमहालक्ष्म्यैविच्चेनमः ॥ वामे क्लींमहासरस्वत्यैविच्चेनमः ॥ अभीष्टसिद्धिंमेदेहिशरणागतवत्सले ॥ भक्त्या समर्पयेतुभ्यंप्रथमावरणार्चनं ॥ १ ॥ एवमग्रेपिद्वितीयाद्यावरणादौयथायथमूह्यं ॥ वामे ह्रूंमहिषायनमः दक्षिणे क्ष्रौंसिंहाय नमः पुरतः गंगणपतयेनमः ह्रूं कालायनमः पश्चात् ह्रूंमृत्यवेनमः ॥ २ ॥ षड्दलेषु ह्रैं रुद्रायनमः ह्रौं गौर्यैनमः श्रींविष्ण वेनमः श्रींलक्ष्म्यैनमः ऐं ब्रह्मणेनमः ऐं सरस्वत्यैनमः ॥ ३ ॥ तत्रैव ह्रां हृदयायनमः ह्रीं शिरसेस्वाहा ह्रू शिखायैवषट् ह्रैं कवचायहुं ह्रौं नेत्रत्रयायवौषट् ह्रः अस्त्रायफट् ॥ ४ ॥ तत्रैव गुं गुरुभ्यो० पं परमगुरुभ्यो० पं परमेष्ठीगुरुभ्यो० हरये० हराय० गणेशाय० ॥ ५ ॥ अष्टदलेषु नंनंदजायै० रंरक्तदंतिकायै० शांशाकंभर्यै० दुंदुर्गायै० भींभीमायै० भ्रांभ्रामर्यै० लौंइं द्राण्यै० क्ष्रौंनारसिंह्यै० रःप्रौंचामुंडायै० ॥ ६ ॥ पूर्वादिदिक्षु अंअसितांगभैरवाय० रुं रुरुभैरवाय चंचंडभैरवाय० क्रोंक्रो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धभैरवाय० उं उन्मत्तभैरवाय० कंकपालभैरवाय० भींभीषणभैरवाय० संसंहारभैरवाय० ॥ ७ ॥ पुनःपूर्वादिषु लंइंद्राय० रंअग्नये० मंयमाय० क्षंनिर्ऋतये० वंवरुणाय० यंवायवे० संसोमाय० हंईशानाय० ॥ ८ ॥ तद्बहिः पूर्वादिषु वज्राय० शक्त्यै० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० ॥ ९ ॥ इत्यावरणपूजा ॥ ततोमूलेनधूपदीपौद त्वानैवेद्यमस्त्रेणाभिमंत्र्यमूलेनप्रोक्ष्यकवचेनावगुंठ्यपुष्पंदत्त्वाधेनुमुद्रयामृतीकृत्यमूलेननिवेद्यग्रासमुद्रांप्रदर्श्यमध्येपानीयमुत्त राचमनंचदत्त्वाकरोद्वर्तनफलतांबूलदक्षिणानीराजनपुष्पांजल्यंते यथासंभवंछत्रचामरगीतनृत्यवाद्यादिसमर्प्यकूष्मांडनारीके लकदलीफलादिबलिंदत्वामाषभक्तकूष्मांडबलिंदत्वापूजांसमापयेत् ॥ ॥ ततःकुमारीपूजा ॥ देशकालौसंकीर्त्यशतचंडीज पांगत्वेनकुमारीपूजांकरिष्ये इतिसंकल्प्यमूलेनषडंगंकृत्वामूलमंत्रमुच्चार्य ॥ मंत्राक्षरमयींदेवींमातृणांरूपधारिणीं ॥ नवदुर्गा त्मिकांसाक्षात्कन्यामावाहयाम्यहं ॥ इतिकुमारीमावाह्ययथासंभवंपूजयेत् ॥ कुमार्यश्चप्रत्यहंशतंनवएकावायथाशक्तिवापू ज्याः ॥ प्रत्यहमेकवृद्ध्यावापूजयेत् ॥ ततोब्राह्मणसुवासिनीपूजा ॥ एवंदेवीकुमार्यादिपूजाप्रत्यहंकार्या ॥ ततःसर्वेविप्राःकृ तांगन्यासाःशतंनवार्णमंत्रंजप्त्वाकवचार्गलकीलकानिसकृज्जप्त्वासप्तशतींजप्त्वांतेरहस्यानिनवार्णशतंचजपेयुः ॥ एकस्मिन्दि नेअनेकावृत्तौतुकवचादीनांप्रत्यावृत्तिनावृत्तिः ॥ एवमृत्विजःप्रथमदिनेएकंद्वितीयेद्वेतृतीयेत्रीणिचतुर्थेचत्वारिरूपाणीत्येवंज पंकुर्यात् ॥ ऋत्विजांयजमानस्यचप्रत्यहंक्षीरमात्राशनंअशक्तौहविष्यान्नंवा ॥ प्रत्यहंसहस्रंशतंदशवाब्राह्मणान्भोजयेत् पंच मेह्निहोमः ॥ नवरात्रेतुनवम्यामेवहोमः ॥ केचित्तुअष्टम्यामारभ्यनवम्यांसमापयंति ॥ ॥ अथहोमः ॥ देशकालौस्मृ त्वामयाब्राह्मणद्वाराकृतस्यशतचंडीजपस्यसंपूर्णतासिद्ध्यर्थंजपदशांशेनतिलादिमिश्रपायसद्रव्येणहोमंकरिष्यइतिसंकल्प्य ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अत्रकेचित्पुण्याहवाचनमपिकुर्वंति ॥ तथापूर्वोक्तकलशस्थापनंदेवतास्थापनंपूजनंचात्रैवकुर्वंति ॥ ततःसनवग्रहशतचंडीजप
दशांशहोमंकर्तुस्थंडिलादिकरिष्ये इतिसंकल्प्यस्थंडिलमुपलिप्योल्लिख्यतत्र(शत)मंगलनामानमग्निंप्रतिष्ठाप्यसमिध्यध्यायेत् ॥
ततःप्रागकृतंचेदिदानीमीशान्यांदिशिनवग्रहस्थापनंकृत्वातत्पूर्वतःकलशंस्थापयेत् ॥ ततोग्निसमीपमागत्यान्वाधानंकुर्यात् ॥
समित्त्रयमादाय श्रद्धएहीत्यादिप्राणायामांतेअस्मिन्चंडीहोमेयायक्ष्यमाणादेवताइत्यादिसामान्यप्रधानांतमुक्त्वा आदित्या
दिनवग्रहान् प्रतिद्रव्यमष्टाविंशतिअष्टौवासंख्याकाभिःसमित्तिलाज्याहुतिभिः अधिदेवताःप्रत्यधिदेवताश्चचतुःसंख्याकाभिः
तैरेवद्रव्यैः गणपत्यादिदेवताइंद्राद्यष्टौलोकपालांश्चैकैकयासमित्तिलाज्याहुत्यायक्ष्ये ॥ महाकालीमहालक्ष्मीमहासरस्वतीःमूल
मंत्रेणशतवारंसप्तशतीमंत्रैःजपदशांशसंख्ययापायसतिलपलाशपुष्पसर्षपपूगीफललाजादूर्वांकुरयवबिल्वफलरक्तचंदनगुग्गुल
द्रव्यैर्यथालाभद्रव्यैर्वा तिलमिश्रपायसेनवापुनर्मूलमंत्रेणशतवारंतैरेवद्रव्यैः आधारशक्त्यादिपीठदेवताःमहाकाल्याद्यावरण
देवताश्चएकैकाहुत्यापायसाज्येनयक्ष्ये ॥ अंगहोमेवरुणंद्विरित्यादिसामान्यप्रधानहोमांतंकृत्वायजमानःइदंहवनीयद्रव्यंयथा
दैवतमस्तुनममेतित्यजेत् ॥ नवग्रहादिभ्यःसमित्तिलाज्यानिहुत्वाउक्तद्रव्याणिमूलमंत्रेणशतवारंहुत्वासप्तशतीमंत्रैर्जपदशांशे
नहुत्वापुनर्मूलमंत्रेणशतवारंजुहुयात् ॥ मूलमंत्रोनवार्णमंत्रः ॥ नवार्णमंत्रस्यकेवलाज्येनैववाहोमः ॥ अत्राध्यायसमाप्तौउवा
चस्थलेचपत्रपुष्पफलैर्होमः ॥ एवंप्रधानहोमंकृत्वाआधारशक्त्यादिपीठदेवताभ्योनामभिराज्यंपायसंचजुहुयात् तथाऐंमहाका
ल्यैविच्चेइत्याद्यावरणदेवताभ्योपितथैवाज्यपायसौहोतव्यौ ॥ एवंहोमंकृत्वा अंगहोमादिप्रायश्चित्तहोमांतंकृत्वा इंद्रादिनवग्र
हक्षेत्रपालादिभ्यो माषभक्तबलींस्तत्तन्मंत्रैर्दद्यात् ॥ तत्रमंत्राः ॥ इंद्रंवो० इंद्रःसुरपतिश्चैववज्रहस्तोमहाबलः ॥ शतयागाधि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पोदेवस्तस्मैनित्यंनमोनमः ॥ इंद्रायसांगायसपरिवारायसशक्तिकायसायुधायइमंमाषभक्तबलिंसमर्पयामि भोइंद्रइमंबलिंभक्ष
दिशंरक्षममयजमानस्यआयुःकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्ताकल्याणकर्तावरदोभव ॥ अनेनबलिदानेनइंद्रःप्रीयतां ॥ १ ॥
अग्निंदूतं० आग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः ॥ धूमकेतुरनाधृष्यस्तस्मैनित्यंनमोनमः ॥ अग्नये० इत्यादि० ॥ २ ॥ यमा
यसोम२० यमश्चोत्पलपत्राक्षःकिरीटीदंडधृक्सदा ॥ लोकसाक्षीविशुद्धात्मातस्मैनित्यंनमोनमः ॥ यमायसांगायेत्यादि० ॥३॥
असुन्वंत० निर्ऋतिस्तुपुमान्कृष्णःसर्वरक्षोधिपोमहान् ॥ खड्गहस्तोमहासत्वस्तस्मैनित्यं० निर्ऋतयेसांगायेत्यादि० ॥ ४ ॥
तत्त्वायामि० वरुणःसर्वलोकेषुपुरुषोनिम्नगाधिपः ॥ पाशहस्तोमहाबाहुस्तस्मैनित्यं० वरुणायसांगायेत्यादि० ॥ ५ ॥ वायो
शत२० सर्वप्राणात्मकोवायुःसर्वजंतुष्ववस्थितः ॥ ध्वजहस्तोमहाप्राणस्तस्मैनित्यं० वायवेसांगायेत्यादि० ॥ ६ ॥ आप्या
यस्व० गौरोयस्तुपुमान्सौम्यःसर्वौषधिसमन्वितः ॥ नक्षत्राधिपतिःसोमस्तस्मैनित्यं० सोमायसांगायेत्यादि० ॥ अभित्वादे०
ईशानःपुरुषःशुक्लःसर्वदेवाधिपोमहान् ॥ शूलहस्तोविरूपाक्षस्तस्मैनित्यं० ईशानायसांगायेत्यादि० ॥ ८ ॥ आयंगौःपृश्नि०
योसावनंतरूपेणब्रह्मांडंसचराचरं ॥ पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यं० अनंतायसांगायेत्यादि० ॥ ९ ॥ ब्रह्मजज्ञानं० पद्मयोनि
श्चतुर्मूर्तिर्वेदावासःपितामहः ॥ कमंडलुधरोदेवस्तस्मै० ॥ ब्रह्मणेसांगायेत्यादि० ॥ १० ॥ नवग्रहेभ्यःसांगेभ्यइत्यादिनाग्रहे
भ्योबलिंदत्वाक्षेत्रपालायदद्यात् ॥ क्षेत्रस्यपतिना० सर्वभूताधिपायक्षेत्राधिपतयेशाकिनीडाकिनीभूतप्रेतपिशाचादिपरिवारस
हितायइमंबलिंसमर्पयामि ॥ भोक्षेत्रपालइमंबलिंभक्षदिशोरक्षममयजमानस्यवाआयुःकर्तेत्यादि० ॥ बलिंगृह्णंत्विमंदेवाआदि
त्यावसवस्तथा ॥ मरुतश्चाश्विनौरुद्राःसुपर्णाःपन्नगाःखगाः ॥ असुरायातुधानाश्चपिशाचोरगराक्षसाः ॥ डाकिन्योयक्षवेताला

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

योगिन्यःपूतनाःशिवाः ॥ जृंभकाःसिद्धगंधर्वानागाविद्याधरानगाः ॥ दिक्पालालोकपालाश्चयेचविघ्नविनायकाः ॥ जगतांशां
तिकर्तारोब्रह्माद्याश्चमहर्षयः ॥ माविघ्नंमाचमेप्रापंमासंतुपरिपंथिनः ॥ सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः ॥ इतिमंत्रान्
पठेत् ॥ अयंबलिःशूद्रेणदुर्ब्राह्मणेनवानेयः ॥ ततोहस्तौपादौप्रक्षाल्याचम्य पूर्णाहुतिंजुहुयात् ॥ स्रुचिस्रुवेणद्वादशवारमाज्यं
गृहीत्वानारिकेलादिचगृहीत्वा ॥ समुद्रादूर्मि० ३ मूर्धानं० १ पुनस्त्वा० पूर्णादर्वि० सप्ततेअग्ने० मूलमंत्रः नमोदेव्यैइत्यादि
मंत्राश्च ॥ ततोवसोर्धारांहुत्वाप्रणीताविमोकादिकर्मशेषंसमाप्य मूलमंत्रेणहोमदशांशेनदुग्धेनजलेनवातर्पणंकृत्वातेनैवमंत्रेण
तद्दशांशेनमार्जयेत् ॥ ततोयजमानआचार्यादीन्वस्त्राद्यैःसंपूज्यतेभ्योगोमिथुनानिहिरण्यंचदद्यात् ॥ ततआचार्यादिभ्योन्ये
भ्योवाकपिलागोनीलमणिश्वेताश्वछत्रचामरभूमिशय्यासप्तधान्यानियथासंभवंवादद्यात् ॥ ततआचार्यादयःकलशोदकेनसप
ह्लीकंसकुटुंबंयजमानं समुद्रज्येष्ठाइत्यादिभिःसुरास्त्वेत्यादिभिर्ग्रहमंत्रैश्चाभिषिंचेयुः ॥ ततोयजमानोग्रहाणामुत्तरपूजांकृत्वा
चार्येणविसर्जनेकृतेग्रहपीठदानंकृत्वादेवींपंचोपचारैःसंपूज्यमहाबलिंदद्यात् ॥ तत्रक्षत्रियादिनाश्वमेषछागमहिषाणामन्यतरो
देयः ॥ विप्रेणतुकूष्मांडबिल्वेक्ष्वन्यतमोदेयः ॥ सचेत्थं ॥ देवींद्रोणपुष्पबिल्वाम्रदलजातीचंपकैःसंपूज्यकर्ताउदङ्मुखःपूर्वमुखं
देवीमुखंवाबलिंगंधादिनाभ्यर्च्य ॥ पशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः ॥ प्रणमामिततःसर्वरूपिणंबलिरूपिणं ॥ चंडिका
प्रीतिदानेनदातुरापद्विनाशनं ॥ चामुंडाबलिरूपायबलेतुभ्यंनमोस्तुते ॥ यज्ञार्थेबलयःसृष्टाःस्वयमेवस्वयंभुवा ॥ अतस्त्वांघा
तयाम्यद्यतस्माद्यज्ञेवधोऽवधः ॥ इतिबलिमभिमंत्र्य ऐंह्रींश्रीं इतितत्रपुष्पंक्षिप्त्वा ॥ रसनात्वंचंडिकायाःसुरलोकप्रसाधकः ॥
ह्रांह्रींखड्गआंहुंफट् इतिखड्गमन्यद्वाशस्त्रंसंपूज्य ॐ कालिकालियज्ञेश्वरिलोहदंडायैनमः इतिबलिंछेदयित्वा ॐ ह्रींऐंह्रींकौशि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

किरुधिरेणाप्यायतांइतिदेव्यैनिवेद्यशेषंगृहीत्वापूतनायै चरक्यै विदार्यै पापराक्षस्यैचनिवेद्यततोमाषपिष्टमयंशत्रुंकृत्वाखड्गेन छेदयित्वास्कंदायविशिखायचदत्वाबलिशेषंरक्षोभ्योहरेत् ॥ मंत्रस्तु ॐ ह्रींस्फुरस्फुरकुंभ २ सुनु २ गुलु २ धनु २ मारय २ विद्रावय २ विदारय २ कंपय २ कंपातय २ कृंतय २ पूरय २ ॐ ह्रीं ॐ हुं फट् २ हुं मर्दय २ हुं इति ॥ ततःशेषंबहिर्दद्यात् ॥ तत्रमंत्राः बलिंगृह्णंत्विमंदेवाइत्यादयःपूर्वोक्ताएव ॥ ततःस्नात्वातिलकंधृत्वादेवींप्रार्थयेत् ॥ तत्रमंत्राः ॥ खड्गिनीशूलिनी घोरा० १ शूलेनपाहिनोदेवि० ४ नमोदेव्यैमहादेव्यै० ५ रूपंदेहियशोदेहिभगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे ॥ महिषघ्निमहामायेचामुंडेमुंडमालिनि ॥ आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते ॥ इतिदेवींसंप्रार्थ्य गुह्यातिगुह्य गोप्त्रीत्वंगृहाणास्मत्कृतंजपं ॥ सिद्धिर्भवतुमेदेविप्रसादात्तवसुंदरि ॥ इतिदेव्यैजपंनिवेद्य ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंकुमारीब्राह्मणसुवासिनीःपूजापूर्वकंसंभोज्यसंकल्प्यवा न्यूनातिरिक्तदोषपरिहारार्थंब्राह्मणेभ्योभूयसींदक्षिणांदत्वाग्निंसंपूज्यविभूतिंधृत्वागच्छगच्छेत्यग्निंविसृज्यमूलमंत्रेणपुष्पेणदेवीमुद्वास्यनासयाहृदिप्रतिष्ठांविभाव्यषडंगंकृत्वा उत्तिष्ठब्रह्मण० अभ्यार० इतिमंत्रैर्विसृज्याचार्यायदत्वामंत्रंपठेत् ॥ त्रैलोक्यमातर्देवित्वंसर्वभूतदयान्विते ॥ दानेनानेनसंतुष्टासुप्रीतावरदाभव ॥ उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच ॥ कुरुष्वममकल्याणमष्टाभिःशक्तिभिःसह ॥ ततोग्निंसंपूज्यविभूतिंधृत्वागच्छगच्छेतितंविसृज्य शतंयथाशक्तिवाविप्रान्संभोज्यततः यस्यस्मृत्या० प्रमादात्कुर्वतांकर्म० इत्यादिजपित्वाकर्मेश्वरार्पणंकृत्वासुहृद्युक्तोभुंजीत ॥ इदमेवपूजाहोमबल्यादिविधानंनवरात्रेपिज्ञेयं ॥ तत्रविशेषस्तुदशम्यांप्रातर्देवीविसर्जनं ॥ अन्यच्चमहानिबंधेभ्योवगंतव्यं ॥ इतिसंक्षेपेणनवचंडीशतचंडीसहस्रचंडीप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३०५ ॥ गोप्रदानप्रयोगः ॥

श्रीः ॥ देशकालाद्युल्लिख्यममनिखिलदुरितदौर्भाग्यदुःस्वप्नमरुनिर्मितबाधाशांतिपूर्वकमायुरारोग्यधनधान्यद्विपदचतुष्पदशां तिपूर्वकंगोरोमतुल्यवत्सरावधिसकलभोगपरिपूर्णस्वर्गलोकप्राप्तिकामःश्रीपर० गोप्रदानमहंकरिष्ये तदंगंगणपतिपूजनपूर्वकंब्रा ह्मणपूजनंगोःपूजनंचक० ॥ गोत्रोच्चारपूर्वकंगोप्रतिग्रहीतारंब्राह्मणंवृत्वा ॥ तवपादोदकंतीर्थमुखेवेदाःप्रतिष्ठिताः ॥ पाद्यंगृहा णविप्रेंद्रभूमिदेवनमोस्तुते ॥ पाद्यं ॥ भूमिदेवाग्रजन्मासित्वंविप्रपुरुषोत्तम ॥ प्रत्यक्षयज्ञपुरुषअर्घोयंप्रतिगृह्यतां ॥ अर्घ्यंआच मनीयंवस्त्रयज्ञोपवीतगंधालंकारपुष्पधूपदीपान्इदमामंभोजनपर्याप्तंयथाशक्तिदक्षिणातांबूलसहितममृतरूपेणसंपद्यतां ॥ यद र्चनंकृतंविप्रतवविष्णुस्वरूपिणः ॥ तत्सर्वंममदानस्यविष्णवेस्तुसमर्पणं ॥ इतिसंप्रार्थ्यगांपूजयेत् ॥ तत्रादौन्यासः ॥ शृंग मूलयोःब्रह्मविष्णून्यसामि शृंगाग्रयोःसर्वतीर्थानि० ललाटेमहादेवंन्य० ललाटाग्रेमहादेवीं० नासावंशेषण्मुखं० कर्णयोरश्वि नौ० चक्षुषोःशशिभास्करौ० दंतेषुवायुं० जिह्वायांवरुणं० हुंकारेसरस्वतीं० गंडयोःयमधर्मौ० ओष्ठयोःसंध्याद्वयं० ग्रीवायां इंद्रं० कुक्षिदेशेरक्षांसि० उरसिसाध्यान्० चतुष्पादेषुधर्मं० खुरमध्येगंधर्वान्० खुराग्रेपन्नगान्० खुरपार्श्वेष्वप्सरसोन्य० पृष्ठे एकादशरुद्रान्० सर्वसंधिषुवसून् श्रोणीतटेपितॄन् लांगूलेसोमं० वालेषुआदित्यरश्मीन्० गोमूत्रेगंगां० क्षीरेसरस्वतीं० दध्नि र्मदां० सर्पिंषिहुताशनं० रोमसुत्रयस्त्रिंशत्कोटिदेवान्० उदरेपृथिवीं० पयोधरेषुचतुःसागरान्न्यसामिइतिन्यस्य उपह्वयेसुदु घां० गौरीमिमाय० हिंकृण्वती० ब्राह्मणोस्य० आयंगौः० उच्चुष्माओषधीनां० इत्यादिमंत्रैःपूजाकार्या ॥ सौरभेयिसर्वहितेप वित्रेपापनाशिनि ॥ गृह्णीष्वैतन्मयादत्तंपाद्यंत्रैलोक्यवंदिते ॥ भूर्भुवःस्वःरुद्ररूपिण्यैगवेनमःपाद्यं ॥ सर्वदेवमयेदेविसर्वतीर्थमये

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शुभे॥ गृहाणार्घ्यमयादत्तंसौरभेयिनमोस्तुते ॥ अर्घ्यं ॥ देहस्थितासिरुद्राणीशंकरस्यसदाप्रिया ॥ धेनुरूपेणसादेवीममपापंव्य
पोहतु ॥ आचमनीयं ॥ यालक्ष्मीःसर्वलोकेषुयाचदेवेष्ववस्थिता॥ धेनुरूपेण० ॥ स्नानं ॥ आच्छादनंगवेदद्यांसम्यक्शुद्धंसुशो
भनं ॥ सुरभिर्वस्त्रदानेनप्रीयतांपरमेश्वरी ॥ वस्त्रं॥ सर्वदेवमयेदेविचंदनंचंद्रसंनिभं॥ कस्तूरीकुंकुमाढ्यंचसुगंधिप्रतिगृह्यतां ॥
चंदनं ॥ गोःअग्रपादाभ्यांनमः आस्याय० नासावंशाय० नेत्राभ्यां० कर्णाभ्यां० ककुदे० पृष्ठाय० पश्चिमपादाभ्यां० सर्वांगे
भ्योनमः ॥ (अत्रापिकेचनपूर्वनिर्दिष्टमंगेषुदेवतान्यासंशृंगमूलयोर्ब्रह्मविष्णुभ्यांनमःइत्यादितत्तद्देवतांचतुर्थ्यानिर्दिश्यकुर्व
ति) ॥ ततोगवेऽलंकारान्दद्यात् ॥ शृंगभूषार्थंसुवर्णंचरणभूषणार्थंरजतं भालभूषार्थमादर्शंनेत्रयोःकज्जलंकंठेघंटांपुष्पस्रजंच
सर्वावयवभूषार्थंपट्टकूलंपृष्ठेताम्रंपुच्छेमुक्तास्रजंकुंकुमकस्तूरिकागंधान्सप्तधान्यानिघृतपूर्णकुंभंचपरितःकल्पयेत् ॥ माल्यादी
नीतिपुष्पाणि ॥ देवद्रुमरसोद्भूतोगोघृतेनसमन्वितः ॥ प्रयच्छामिमहाभागेधूपोयंप्रतिगृह्यतां ॥ धूपं ॥ आनंदकृत्सर्वलोके
देवानांचसदाप्रियः ॥ गौस्त्वमादिजगन्नाथोदीपोयंप्रति० ॥ दीपं ॥ सुरभिस्त्वंजगन्मातर्देविविष्णुपदेस्थिता ॥ सर्वदेवमये
ग्रासंमयादत्तमिमंग्रस ॥ सौरभेय्यःसर्वहिताःपवित्राःपुण्यराशयः ॥ प्रतिगृह्णंत्विमंग्रासंगावस्त्रैलोक्यमातरः ॥ गोग्रासनैवे
द्यं फलतांबूलदक्षिणाःसमर्प्य ॥ पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ ॥ तासांमध्येतुयानंदातस्यैदेव्यैनमोनमः ॥ नम
स्कारः ॥ गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः ॥ गावोमेहृदयेनित्यंगवांमध्येवसाम्यहं ॥ प्रदक्षिणाः ॥ हिंकृण्वतीवसुपत्नी० ॥
इतिपुष्पांजलिः ॥ गावोममाग्रतइतिसंप्रार्थ्यकुशाक्षतान्गृहीत्वागोपुच्छोदकेनतर्पयेत् ॥ गोदानांगत्वेनदेवर्षिपितृतर्पणंकरिष्ये ॥ ॥३५४॥
ब्रह्मातृप्यतु विष्णुस्तृ० रुद्रस्तृ० शक्राद्यादेवतास्तृप्यंतु० ऋषयस्तृ० मनवस्तृ० विश्वेदेवास्तृ० दिक्पालास्तृ० मरुतस्तृ०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वसवस्तृ० रुद्रास्तृ० दितिपुत्रास्तृ० साध्यास्तृ० मरुद्गणास्तृ० ग्रहास्तृ० नक्षत्राणितृ० योगास्तृ० राशयस्तृ० अश्विनौतृप्यतां० यक्षास्तृप्यंतु० रक्षांसि० मातरः० नागास्तृ० सरितः० द्रुमाः० तीर्थानि० जलदाः० नदाः० मनुष्याः० पिशाचाः० पशवः० दिव्यदानवाः० दिव्यादित्याः० योगिन्यः० विद्याधराः० देवयोनयः० ओषधयः० दिग्गजाः० दिक्पालाः० अनिरुद्धाः० चलाः० जंतवः० स्थावराः० जंगमास्तृप्यंतु ॥ अथोत्तरीयेणसनकादींस्तर्पयेत् ॥ सनकस्तृप्यतु सनंदनः० सनातनः० सनत्कुमारः० कपिलः० आसुरिः० पंचशिखाः० बर्हिषदः० ॥ यमंतर्पयामि धर्मराजं० अंतकं० वैवस्वतं० कालं० नीलं० परमेष्ठिनं० औदुंबरं० दध्नं० सर्वभूतक्षयं० वृकोदरं० चित्रगुप्तंतर्पयामि ॥ अथप्राचीनावीतीस्वपितॄंस्तर्पयेत् ॥ ततःआयुर्मे तर्पयामि प्राणंमेइतियथालिंगमंगानिस्पृशेत् ॥ इमांगांरुद्रदैवत्यांदोग्ध्रींसवत्सामव्यंगांसर्वाभरणभूषितांगंधाद्युपचारैःपूजितां कृतसंकल्पसिद्ध्यर्थंमहाविष्णुप्रीत्यर्थंतुभ्यमहंसंप्रददे ॥ गौस्तारयतुपुण्यंवर्धतांशांतिरस्तुपुष्टिरस्तुतुष्टिरस्तुवृद्धिरस्तुअविघ्नमस्तुआरोग्यमस्तुशिवंकर्मास्तुकर्मसमृद्धिरस्तुधर्मसमृद्धिरस्तु अहरहरभिवृद्धिरस्तुकल्याणाभ्युदयोस्तु ॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ अनेनरुद्रस्वरूपिणीगोप्रदानेनमहाविष्णुःप्रीयतां ॥ आगावोअग्मन्नितिवर्गंपठन्प्रदक्षिणांकुर्यात् ॥ स्वस्त्यस्तुदीर्घ० शिवाआपःसंतुसौमनस्यमस्तुअक्षतंचारिष्टंचास्तु ॥ दानस्यप्रतिष्ठासिद्ध्यर्थमिदंयथाशक्तिसुवर्णंरुद्रदैवत्यंविष्णुस्वरूपिणेगोप्रतिग्रहीत्रेब्राह्मणायतुभ्यमहंसंप्रददे नमम ॥ विप्रोदेवस्यत्वेतिप्रतिगृह्य कइदंकस्माअदादितिकामस्तुतिंपठेत् ॥ ततोविप्रंप्रार्थयेत् ॥ त्वंसर्वदेवगणमंदिरसर्वभूतविश्वेश्वरत्रिपथगोदधिपर्वतानां ॥ तद्दानशक्तिशलटीकृतपापकोटिःप्राप्तोस्मिनिर्वृतिमतीवपरांनतोस्मि ॥ ततोभूरिदक्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इतिगोप्रदानं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३०६ ॥ वृषभदानप्रयोगः ॥

श्रीः ॥ आचम्यदेशकालौनिर्दिश्यामुकगोत्रस्यामुकशर्मणोममसकलारिष्टनिरसनपूर्वकामुकफलसिद्ध्यर्थंवृषभदानंकरिष्ये तदंगतयाब्राह्मणपूजनंवृषपूजनंचक० ॥ प्रतिग्रहीतारंब्राह्मणंवृत्वाश्रीविष्णुस्वरूपिणेब्राह्मणायनमइदंपाद्यमित्यादिसंपूज्यततोवृषभंपूजयेत् ॥ तत्रादौवृषांगेन्यासः ॥ शिरोमध्येमहादेवंन्यसामि ललाटेमहादेवीं दक्षिणशृंगमूलेविष्णुं वामशृंगमूलेब्रह्माणं शृंगाग्रेसर्वतीर्थानि नासाग्रेषण्मुखं दंतेषुसर्ववायून् जिह्वायांवरुणं हुंकारेसरस्वतीं गंडयोर्यमं ओष्ठयोःसंध्याद्वयं ग्रीवायामिंद्रं कुक्षिदेशेरक्षांसि उरसिसाध्यान् चतुःपादेषुधर्मं खुरमध्येगंधर्वान् खुराग्रेषुपन्नगान् खुरपार्श्वेष्वप्सरसः पृष्ठेएकादशरुद्रान् सर्वसंधिषुवसून् श्रोणीतटेपितॄन् लांगूलेसोमं वालेष्वादित्यरश्मीन् गोमूत्रेगंगां उदरेपृथ्वीं रोमसुत्रयस्त्रिंशत्कोटिदेवान् इति देवतान्यासंकृत्वातस्यैवांगेषुमंत्रन्यासंकुर्यात् ॥ इषेत्वोर्जेत्वामूर्ध्नेनमः इमारुद्रायस्थिरधन्वनेशशांकाय नमस्तेरुद्रमन्यवेचक्रां गाय सहस्राणिसहस्रधाललाटाय विभ्राड्बृहत्सिबतुदक्षिणनेत्राय त्र्यंबकंयजामहेवामनेत्राय मानस्तोकेनासिकायै अवतत्यधनुःमुखाय नीलग्रीवद्वयंकंठाय मर्माणितेबाहुमूलाभ्यां समिधाग्निंबाहुभ्यां नमोवःकिरिकेभ्योहृदयाय हिरण्यगर्भःसमनाभ्यै मीढुष्टमकट्यै मानोमहांतंऊरुभ्यां उदुत्यंजातजंघाभ्यां इमारुद्रायजानुभ्यां रक्षोहणंगुदाय वृष्णस्तेवृष्ण्यंलिंगाय ऋषभंमापुच्छाय त्रिपादूर्ध्वखुरेभ्यः ॥ ॐ शिवस्त्वष्टरिहागंहिविभुःपोषउतत्मना ॥ यज्ञेयज्ञेनउदव ॥ वृषभोधुर्यएवस्यान्महादेवप्रियःसदा ॥ संप्रदानेनचैवास्यममशांतिकरोभवेत् ॥ भूर्भुवःस्वःरुद्रदैवत्यायवृषभायेदंपाद्यं ॥ शिवस्त्वष्टरितिमंत्रःसर्वत्र ॥ गवामंगेषु तिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ अर्घ्यं ॥ धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ अष्टमूर्तेर

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धिष्ठानमतःशांतिंप्रयच्छमे ॥ आचमनीयं ॥ गावःसुरभयोनित्यंगावोगुग्गुलुसंनिभाः ॥ गावःप्रतिष्ठाभूतानांगावःशरणमुत्तमं ॥ स्नानं ॥ आच्छादनंगवेदद्यांसम्यक्शुद्धंसुशोभनं ॥ वृषभोवस्त्रदानेनप्रीयतांशंकरप्रियः ॥ वस्त्रं ॥ श्रीखंडंशीतलंदिव्यंसर्वसंतापहारकं ॥ कस्तूरीकुंकुमाढ्यंचचंदनंप्रतिगृह्यतां ॥ चंदनं ॥ अक्षताश्चसुरश्रेष्ठइत्यक्षतान् ॥ ततोलंकारान् शृंगयोःसुवर्णचरणेषुरजतंभालेआदर्शंसुवर्णवानेत्रयोरलङ्कृयंकंठेघंटांचामरंचपृष्ठेताम्रंपुच्छेमौक्तिकंविलेपनार्थंकुंकुमकस्तूर्यादिप्रावरणार्थंपट्टकूलंइतिशक्त्यायथासंभवमर्पयेत् ॥ सर्वाभावेहिरण्यं ॥ मालतीचंपकादीनिमाल्यानिवृषभेश्वर ॥ मयाहृतानिपूजार्थमंगीकुरुनमोस्तुते ॥ पुष्पाणि ॥ देवद्रुमरसोद्भूतंगोघृतेनसमन्वितं ॥ भक्त्यासमर्पयेतुभ्यंधूपंवृषभसत्तम ॥ धूपं ॥ आनंदकृत्सर्वलोकेदेवानांचसदाप्रियः ॥ सर्वांधकारनाशायदीपोयंप्रतिगृह्यतां ॥ दीपं ॥ आहारेणाखिलालोकाजीवंतिप्रभवंतिच ॥ अतःसमर्पयेतुभ्यमाहारंवृषसत्तम ॥ नैवेद्यं ॥ तांबूलंदक्षिणांचसमर्प्य ॥ वर्षणाद्धर्मकामानांवृषोलोकेनुमीयते ॥ तस्मात्पूरयमेकामान्धर्मांश्चवृषसत्तम ॥ मंत्रपुष्पं ॥ वृषोसिभगवान्धर्मश्चतुष्पादःप्रकीर्तितः ॥ नमामितमहंभक्त्यासमांरक्षतुसर्वतः ॥ नमस्कारं ॥ आगावोअग्मन्नितिप्रदक्षिणां ॥ ऋषभंमेतिपंचर्चस्यवृषभोनुष्टुबंत्यामहापंक्तिःउपस्थानेवि० ॥ इत्युपस्थाय ॥ धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ अष्टमूर्तेरधिष्ठानमतःपाहिसनातन ॥ इतिप्रार्थ्यस्वयंप्राङ्मुखःप्रतिग्रहीतारमुदङ्मुखमुपवेश्यवृषस्यदक्षिणखुरंस्पृष्ट्वा ॥ स्वस्त्यस्तुदीर्घमायुःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ धर्मस्त्वंवृषरूपेण० ॥ इमंवृषंरुद्रदैवतंयथाशक्त्यलंकृतंममामुकफलसिद्ध्यर्थममुकगोत्रायामुकशर्मणेमुकशाखिनेब्राह्मणायतुभ्यमहंसंप्रददेनमम इतिसकुशाक्षतोदकंतद्धस्तेक्षिपेत् ॥ ब्राह्मणोदेवस्यत्वेतितंप्रतिगृह्यदक्षिणखुरंस्पृष्ट्वाकइदंकस्माअदादितिमंत्रंपठेत् ॥ ततोदातासुवर्णंरजतंवायथाशक्तिदक्षिणात्वेनदत्वा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ऋषभंमेतिपंचर्चेनवृषभंप्रदक्षिणीकृत्यब्राह्मणेननीयमानेवृषेशतपदानितमनुव्रज्यपुनःस्वस्थानमागत्य कर्मसंपूर्णतावाप्तयेब्राह्मणेभ्योदक्षिणांदद्यात् ॥ इतिवृषभदानविधिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३०७ ॥ महिषीदानप्रयोगः ॥

श्रीः ॥ देशकालोत्कीर्तनांतेऽमुकशर्मणोममापमृत्युनाशपूर्वकंपित्तज्वरादिपीडानिरासेनसद्यआरोग्यावाप्तिद्वारायमात्मकश्रीविष्णुप्रीतिकामोहंयमदैवत्यंमहिषीदानंकरिष्ये ॥ गणेशंसंपूज्याचार्यंवृणुयात् ॥ आचार्यःस्थंडिलकरणाद्यग्निप्रतिष्ठांतेग्नेरीशान्यांगणानांत्वेतिगणपतिं यमायसोममितियमं परंमृत्योइतिमृत्युंचसंस्थाप्यषोडशोपचारैःसंपूज्यतदीशान्यांमहीद्यौरित्यादिविधिनाकलशंसंस्थाप्यान्वादध्यात् ॥ व्याहृत्यंतेत्रवैशेषिकहोमेगणपतिंयमंमृत्युंचतत्तन्मंत्रैःप्रत्येकमष्टोत्तरशतसंख्याकाभिराज्यप्लुततिलाहुतिभिःअंगहोमेवरुणंद्विरित्यादिहोमशेषंसमाप्यकर्तातिलतैलेनयमंतर्पयेत् ॥ महिषीदानांगत्वेनापमृत्युपरिहारार्थंयमतर्पणंकरिष्ये ॥ यमंतर्पयामि धर्मराजं मृत्युं अंतकं वैवस्वतं कालं सर्वभूतक्षयं औदुंबरं दध्नं नीलं परमेष्ठिनं वृकोदरं चित्रं चित्रगुप्तंतर्पयामीति ॥ ततस्तैलोद्वर्तनपूर्वकंमहिषीमद्भिःप्रक्षाल्यदक्षिणाभिमुखींसंस्थाप्यालंकुर्यात् ॥ शृंगयोर्गौरमृदं कंठेसिंदूरं उदरेहरिद्रां शृंगयोःसुवर्णखुरेषुरौप्यंकंठेघंटांकृष्णवस्त्रंचपृष्ठेरक्तवस्त्रंलांगूलेरौप्यंललाटेसुवर्णतिलकंकंठेपुष्पमालामित्यादि ततोमहिष्याःसमंतादष्टदिक्ष्वष्टौदीपान्संस्थाप्य पूर्वेलवणंआग्नेय्यांगुडंयाम्यांकार्पासंनैर्ऋत्यांनवनीतंपश्चिमेसप्तधान्यानिवायव्यांतंदुलान्उत्तरेकांचनंईशान्यांगमनार्थंचद्वारमितियथासंभवंस्थापयेत् ॥ ततोगोत्रोच्चारपूर्वंप्रतिग्रहीतारंवृत्वातदंगेयमं ध्यायेत् ॥ महिषारूढंनृकपालहस्तंदंडायुधंभस्मसितांगयष्टिं ॥ उलूकचिह्नंनरमुंडमालंनिर्मांसदेहंरुधिरंपिबंतं ॥ असृग्वसाच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्चितकृष्णकायंकपींद्रपंचाननचर्मवस्त्रं ॥ बिभीतकस्थंत्वतिभीमरूपंकालंतवांगेविनियोजयिष्ये ॥ महाकालत्वमृषिरसिप्राणो
त्क्रांतिशक्तिमानसिअतस्त्वांप्रतापिनंबहुमानयेएवंभूतस्त्वमिहागच्छेहतिष्ठपूजांगृहाणसुप्रसन्नोवरदोममापद्विनाशकोभवेतिब्रा
ह्मणशरीरेयमंभावयित्वा ॥ भोभोकालजगद्भूतयममहिषवाहन ॥ दिगीशप्राणराजेंद्रदंडहस्तधनुर्धर ॥ ब्रह्माच्युतमहेशानांसे
नाधीश्वरवल्लभ ॥ यज्ञभुग्दक्षिणेयस्त्वंसर्वभोगसुखावह ॥ गृह्णीष्वमहिषीदानंजीवनायममप्रभो ॥ पंचभूतात्मकेदेहेसप्तधातु
समन्विते ॥ विप्रस्यागत्यतिष्ठेहसंमुखोभवमेसदा ॥ ध्यानं ॥ यमायसोममित्यासनं ॥ तेनैवपाद्यं ॥ सुगंनःपंथामित्यर्घ्यं ॥
यमायमधुमत्तममित्याचमनीयं ॥ यस्मात्त्वंसर्वधर्माणांमंगलानांचमंगलं ॥ महाकालजगद्भूतधर्मराजनमोस्तुते ॥ स्नानं ॥
कामरूपकरालास्यकृतांतकरुणानिधे ॥ प्रेतराजशिरोरत्नसुखंदेहिनमोस्तुते ॥ इतिवस्त्रं ॥ देवदानवगंधर्वदक्षिणःसरितांपते ॥
सूर्यादिखेचराणांचजीवितेशनमोस्तुते ॥ इत्युपवीतं ॥ कालरूपकरालास्यमहादंष्ट्रसुरप्रिय ॥ शबलाशमयित्रेंद्रजीवितेशनमो
स्तुते ॥ गंधं ॥ कृतांतधर्मराजेंद्रमृत्योंतकविमर्दन ॥ प्रलयाग्निसमाभासदक्षिणेशनमोस्तुते ॥ रक्तचंदनं ॥ धर्मराजकरालास्य
पुण्यपापविमर्दन ॥ याम्येशमहिषारूढस्रजंचप्रतिगृह्यतां ॥ पुष्पमालां ॥ विद्युत्कपिशकेशाग्रकोकिलांजनसंनिभ ॥ दक्षिणे
शसुरश्रेष्ठधूपोयंप्रतिगृह्यतां ॥ धूपं ॥ तप्तहाटककेशाग्रजटिलारक्तलोचन ॥ नंद्यावर्तकवद्वर्णश्राद्धदेवनमोस्तुते ॥ दीपं ॥
महाकालमहाबाहोजगत्प्राणविनाशन ॥ धर्मालयतपोराशेनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यंमाषान्नमामान्नंवा ॥ विप्रवर्यजगद्धस्त
कालांतकशरीरग ॥ कालरूपमहादेवधर्मराजनमोस्तुते ॥ इत्याच्छादनं ॥ शश्वदेतित्वयाज्ञप्तोधातादेवत्वदाज्ञया ॥ ब्रह्माच्यु
तमहेशैंद्रैःस्थीयतेचतवाज्ञया ॥ सर्वालंकारान् ॥ दिगंतरमहाराजसर्वभूतक्षयांतक ॥ शवारूढशवाधीशमांसशोणितभक्षक ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

दंडहस्तपरंमृत्योधर्मराजनमोस्तुते ॥ नमस्कारः ॥ ब्राह्मणप्रार्थना ॥ प्रेतास्थिचीवसंभारंदधच्चैवतुमस्तके ॥ पवित्रपुरुषांत्राणां
शिरसांकृतभूषण ॥ विष्टपत्रयसंस्थानांजीवानांनाशकृत्प्रभो ॥ अलक्ष्यंसर्वभूतानांब्रह्माच्युतपिनाकिनां ॥ कश्यपात्रिवसिष्ठा
दित्रतिनांपरमर्षिणां ॥ वराहगर्गसत्वानामलक्ष्योगणितैरपि ॥ अरूपस्त्वव्ययोनादिर्विदानंमोक्षवस्तुनः ॥ मदीयंजीवितंका
लत्वमेवत्रातुमर्हसि ॥ अतोदानंकरिष्येहंमहिष्याःकरुणानिधे ॥ अनेनयमःप्रीयतां ॥ अथमहिषीपूजा ॥ नाममंत्रेणव्याहृति
भिश्चॐप्रेहिप्रेहिपथिभिरितिमंत्रेणमहिषींषोडशोपचारैःपूजयेत् ॥ अर्घ्येविशेषः ॥ अपमृत्युहरेदेविकालरात्रिस्वरूपिणि ॥ मांतु
त्रायस्वमहिषिगृहाणार्घ्यं न० इत्यर्घ्यं ॥ महिष्यामुखेकार्पासबीजानिपिण्याकंचदत्वाप्रार्थयेत् ॥ शृंगतःकालरूपेत्वंमुखतोमृत्यु
रूपिणि ॥ गाधिपुत्रकृतेदेविअकालमरणापहे ॥ धर्मराजप्रियेदेविमहिषासुरमातृके ॥ यत्पुत्रोधर्मराजेनद्रष्टुंदानवराक्षसान् ॥
एकःशक्तमोवीक्ष्यकृतंवाहनमात्मनः ॥ सात्वंप्रसीदकल्याणिमृत्योर्हृदयनंदिनि ॥ विश्वामित्रकृतेदेविलोकोपकृतयेक्षितौ ॥
यज्ञसंसिद्धयेचात्रतस्यैमहिषितेनमः ॥ जननीमहिषस्यत्वंकालरूपेममप्रिये ॥ संदेहंहरदानान्मेमोक्षयस्वार्तिमागतं ॥ रक्तपुष्प
स्रजारक्तवासोभिःकृतभूषणां ॥ लवणाद्युपहारस्थांसप्तधान्ययुतांतथा ॥ पिण्याकराशिसंभक्ष्यांयथाशक्त्याह्यलंकृतां ॥ महिषीं
धर्मराजायदास्यामिप्रीतिहेतवे ॥ ततोयमंप्रार्थयेत् ॥ राजात्वंसर्वधर्माणांजगत्संहारकारकः ॥ स्वदानपरिसंतुष्टःप्रयच्छाद्रक्षऋ
त्विजं ॥ प्राणदापानदाहेतिवर्चोदाव्यानदापरा ॥ आभिस्तुहेतिभिर्धर्मजीवितंतोषणंपरं ॥ ऋत्विजंरक्षराजेंद्रधर्मोस्माकंप्रगृ
ह्यतां ॥ ततोदाताप्राङ्मुखः ब्राह्मणमुदङ्मुखमवस्थाप्यकांस्यपात्रंकरेधृत्वामहिष्याःपृष्ठदेशेदानंकुर्यात् ॥ अमुकगोत्रोमुकश
र्माहं ॥ इंद्रादिलोकपालानांयाराज्यमहिषीशुभा ॥ महिषीदानमाहात्म्यात्सास्तुमेसर्वकामदा ॥ यमराजस्यमाहात्म्येयस्यायुः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सुप्रतिष्ठितं ॥ महिषासुरस्यजननीसास्तुमेसर्वकामदा ॥ इमौमंत्रावुच्चार्य ॥ (दानेमंत्रविशेषोयथा ॥ यद्वाहिष्ठंतदग्नयेबृहदि
तिमंत्रः ॥ तंमृत्युभयभीतंमांमरणात्त्वंसमुद्धर ॥ विप्रेंद्रवेदवेदांगपवित्रकरुणाकर ॥ गृहाणमहिषींगृष्टिंसवस्त्रांस्वर्णभूषितां ॥
श्यामांसुनेत्रांसुश्रृंगीमंगैःसंपूर्णविग्रहां ॥ पयस्विनींसुशीलांचदरिद्रतिमिरापहां ॥ हेमश्रृंगींरौप्यखुरांकांस्यघंटासमन्वितां ॥
रौप्यलांगूलसंयुक्तांताम्रदोहनसंयुतां ॥ समंतादीपसंयुक्तांसप्तधान्यसमन्वितां ॥ महिषींवत्ससंयुक्तांसुशीलांचपयस्विनीं ॥
नीलवस्त्रावृतांचाहंदास्येमृत्युहरायच ॥ यमवाहनंमहिषीमृत्युरूपेणसंस्थिता ॥ सर्वव्याधिहरानित्यमतःशांतिंप्रयच्छमे ॥ सरलं
सजलंश्रृंगंधृत्वाविप्रकरेर्पयेत् ॥ कांस्यपात्रस्थितेपाणौदद्याद्दानंसदक्षिणं ॥ मृत्युरूपांगृहाणेमांमहिषींद्विजसत्तम ॥ मृत्योःसं
त्राहिमांघोराद्गच्छत्वंयत्रकुत्रचित् ॥) अमुकप्रवरगोत्रायामुकशाखिनेमुकशर्मणेब्राह्मणायइमांमहिषींसवत्सांस्वर्णश्रृंगींरौप्य
खुरांताम्रपात्रदोहनयुतांघंटाभरणोपेतांअष्टौदिक्षुदीपयुतांलवणादिसप्तधान्योपेतांयमदैवत्यांतुभ्यमहंसंप्रददेनममेतिवदेत् ॥
देवस्यत्वा० ब्राह्मणःकइदंकस्माअदादितिपठेत् ॥ दानस्यप्रतिष्ठार्थंदक्षिणांदत्वातंप्रार्थयेत् ॥ स्वामिन्जगद्गुरोब्रह्मन्मदीयंय
दुपार्जितं ॥ दुष्कृतंदुरितंमृत्युबंधनंचार्जितंमया ॥ शत्रुजंविषजंरोगंशोकजंविरहादियत् ॥ पीडापमृत्युविघ्नानिगृहीत्वागम्य
तांद्विज ॥ मृत्युरूपगृहाणेमांमहिषींद्विजसत्तम ॥ मृत्योश्चत्राहिमांघोराद्गच्छत्वंचस्वमाश्रमं ॥ ततोबहिर्द्विजंगमयित्वाशांता
पृथिवीतिपथिजलंसिंचेत् ॥ पुनःपूर्ववत्तैलेनयमतर्पणंकुर्यात् ॥ ततःकांस्यपात्रस्थंनिरीक्षिताज्यंदत्वा ॥ गोभूतिलहिरण्याज्यवा
सोधान्यगुडानिच ॥ रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमादितिदशदानानिदत्वाआचार्यायदक्षिणामन्येभ्यश्चभूयसींदत्वा ॥
अनेनयथाशक्त्यनुष्ठितेनमहिषीदानाख्येनकर्मणाश्रीपरमेश्वरःप्रीयतां ॥ इतिमहिषीदानप्रयोगः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

लून् ॥ मधूकंदेवदारुंचविष्णुक्रांतांशतावरीं ॥ बलांचसहदेवींचनिशाद्वितयमेवच ॥ एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरा
न् ॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुयजमानस्यदुरितक्षयकारकाः ॥ गंगेचयमुनेचैवेति ॥ योसौवज्रधरोदे
वआदित्यानांप्रभुर्मतः ॥ सहस्रनयनश्चेंद्रोग्रहपीडांव्यपोहतु ॥ मुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः ॥ चंद्रोपरागसंभूतामग्निः
पीडां० ॥ कर्मसाक्षीतुलोकानांधर्मोमहिषवाहनः ॥ यमश्चंद्रोपरागोत्थांग्रहपीडां० ॥ रक्षोगणाधिपःसाक्षान्नीलांजनसमप्रभः ॥
खड्गहस्तोतिभीमश्चग्रह० ॥ नागपाशधरोदेवःसदामकरवाहनः ॥ चंद्रोपरागकलुषंवरुणोमेव्यपोहतु ॥ प्राणरूपोहिलोकानांस
दाकृष्णमृगप्रियः ॥ वायुश्चंद्रोपरागोत्थांग्रह० ॥ योसौनिधिपतिर्देवःखड्गशूलगदाधरः ॥ चंद्रोपरागदुरितंधनदोमेव्यपोहतु ॥
योसाविंदुधरोदेवःपिनाकीवृषवाहनः ॥ चंद्रोपरागपापानिनिवारयतुशंकरः ॥ त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ॥ ब्रह्म
विष्ण्वर्करुद्राश्चदहंतुममपातकं ॥ एवमावाहयेत्कुंभान्मंत्रैरेभिश्चवारुणैः ॥ एतानेवतथामंत्रान्स्वर्णपट्टेविलेखयेत् ॥ ताम्रपट्टेथ
वालिख्यनववस्त्रेतथैवच ॥ मस्तकेयजमानस्यनिदध्युस्तेद्विजोत्तमाः ॥ कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान् ॥ गृहीत्वा
स्थापयेद्गूढंभद्रपीठोपरिस्थिते ॥ पूर्वोक्तैरेवमंत्रैश्चयजमानेद्विजोत्तमाः ॥ अभिषेकंततःकुर्युर्मंत्रैर्वारुणसूक्तकैः ॥ ततःशुक्लांवर
धरःशुक्लमाल्यानुलेपनः ॥ आचार्यंवरयेत्पश्चात्स्वर्णपट्टंनिवेदयेत् ॥ आचार्येदक्षिणांदद्याद्गोदानंचस्वशक्तितः ॥ होमंचैवप्रकु
र्वीततिलैर्व्याहृतिभिस्तथा ॥ निवृत्तेग्रहणेसर्वंब्राह्मणेभ्योविशेषतः ॥ दानंचशक्तितोदद्याद्यदीच्छेदात्मनोहितं ॥ सूर्यग्रहेसूर्य
नामयुक्तान्मंत्रांश्चकीर्तयेत् ॥ अनेनविधिनायस्तुग्रहणेस्नानमाचरेत् ॥ नतस्यग्रहणेदोषःकदाचिदपिजायते ॥ इतिग्रहणशांतिः ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३१० ॥ ग्रहणेदानादि ॥

श्रीः ॥ तत्रग्रहस्पर्शकालेस्नानंमध्येहोमःसुरार्चनंश्राद्धंचमुच्यमानेदानंमुक्तेस्नानमितिक्रमः ॥ तत्रस्नानविधिर्होमश्चोपरिष्टा न्निर्दिष्टएव ॥ पूजाश्राद्धादिनित्यवत् ॥ ग्रहणमध्येपिकालेसंध्योपासनंकार्यं ॥ अत्रगोभूहिरण्यधान्यादिदानंमहाफलं ॥ अनि ष्टेग्रहणेगर्गाद्युक्ताशांतिःकार्याअथवाबिंबदानंकार्यतद्यथा ॥ चंद्रग्रहेरजतमयंचंद्रबिंबंसुवर्णमयंनागबिंबंचकृत्वा सूर्यग्रहेसौवर्णं सूर्यबिंबंनागबिंबंचकृत्वाघृतपूर्णेताम्रपात्रेकांस्यपात्रेवानिधायतिलवस्त्रदक्षिणासाहित्यंसंपाद्य ॥ अमुकगोत्रस्यअमुकशर्मणोम मजन्मराशिजन्मनक्षत्रस्थितामुकग्रहणसूचितसर्वानिष्टप्रशांतिपूर्वकमेकादशस्थानस्थितग्रहणसूचितशुभफलावाप्तये बिंबदानं करिष्यइतिसंकल्प्यसूर्यंचंद्रंराहुंचध्यात्वानमस्कृत्य ॥ तमोमयमहाभीमसोमसूर्यविमर्दन ॥ हेमताराप्रदानेनममशांतिप्रदोभव ॥ विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत ॥ दानेनानेननागस्यरक्षमांवेधजाद्भयादितिमंत्रमुच्चार्य इदंसौवर्णंराहुबिंबंनागंसौवर्णंर विबिंबंराजतंचंद्रबिंबंवाघृतपूर्णकांस्यपात्रनिहितं यथाशक्तितिलवस्त्रदक्षिणासहितंग्रहणसूचितारिष्टविनाशार्थंशुभफलप्राप्त्यर्थं चतुभ्यमहंसंप्रददेइतिदानवाक्येनपूजितब्राह्मणायदद्यात् ॥ पूर्वसंकल्पितस्यद्रव्यस्यग्रहणोत्तरंदानेतद्द्विगुणंदेयंभवति ॥ ॥

॥ ३११ ॥ ग्रहणेपुरश्चरणविधिः ॥

श्रीः ॥ स्पर्शकालात्पूर्वंस्नात्वाअमुकगोत्रोमुकशर्माहंराहुग्रस्तेदिवाकरेनिशाकरेवामुकदेवतायाअमुकमंत्रसिद्धिकामोग्रासादिमु क्तिपर्यंतममुकमंत्रस्यजपरूपंपुरश्चरणंकरिष्ये इतिसंकल्पंकृत्वाआसनबंधन्यासादिकंचस्पर्शात्पूर्वमेवविधायस्पर्शादिमोक्षपर्यंतं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मूलमंत्रजपंकुर्यात् ॥ ततःपरदिनेस्नानादिनित्यकृत्यंविधायअमुकमंत्रस्यकृतैतद्ग्रहणकालिकामुकसंख्याकपुरश्चरणजपसांगतार्थंतद्दशांशहोमतद्दशांशतर्पणतद्दशांशमार्जनतद्दशांशब्राह्मणभोजनानिकरिष्येइतिसंकल्प्य होमादिकंतत्तच्चतुर्गुणद्विगुणान्यतरजपंवाकुर्यात् ॥ होमांतेतर्पणंतु मूलमंत्रमुच्चार्यतदंतेद्वितीयांतंमंत्रदेवतानामोच्चार्यअमुकांदेवतामहंतर्पयामिनमःइतियवादियुक्तजलांजलिभिस्तर्पणंहोमदशांशेनकार्यं ॥ एवंनमोंतंमूलमंत्रमुक्त्वाअमुकांदेवतामभिषिंचाम्यनेनेत्युच्चार्यजलेनस्वमूर्ध्निअभिषिंचेदितिमार्जनंतर्पणदशांशेनकार्यं ॥ मार्जनदशांशेनब्राह्मणभोजनं ॥ एवंजपहोमतर्पणमार्जनविप्रभोजनात्मकपंचप्रकारंपुरश्चरणं ॥ तर्पणाद्यसंभवेतत्तत्संख्याद्विगुणोजपएवकार्यः ॥ ग्रहणकालेचतत्प्रेरितःपुत्रादिरमुकशर्मणोमुकगोत्रस्यामुकग्रहणस्पर्शस्नानजनितश्रेयःप्राप्त्यर्थंस्पर्शस्नानंकरिष्यइत्यादिसंकल्पपूर्वकंतदीयस्नानदानादिकंकुर्यात् ॥ पुरश्चरणमकुर्वद्भिरपि गुरूपदिष्टस्वस्वेष्टदेवतामंत्रजपोगायत्रीजपश्चावश्यंग्रहणेकार्योन्यथामंत्रमालिन्यं ॥ अयंचग्रहणेपुरश्चरणप्रकारोग्रस्तोदयेग्रस्तास्तेचनसंभवति ॥ इतिधर्मसिंधूक्तःपुरश्चरणविधिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३१२ ॥ गायत्रीपुरश्चरणप्रयोगः ॥

श्रीः ॥ देशकालौसंकीर्त्यकरिष्यमाणगायत्रीपुरश्चरणेधिकारसिद्ध्यर्थंकृच्छ्रत्रयममुकप्रत्याम्नायेनाहमाचरिष्यइतिसंकल्प्यहोमादिप्रत्याम्नायविधिनाकृच्छ्राण्यनुष्ठायअमुकशर्मणोममगायत्रीपुरश्चरणेकृच्छ्रत्रयानुष्ठानेनाधिकारसिद्धिरस्त्वितिविप्रान्वदेत् ॥ विप्राअधिकारसिद्धिरस्त्वितिब्रूयुः ॥ ततःकरिष्यमाणपुरश्चरणांगत्वेनविहितंगायत्रीजपादिकरिष्येइतिसंकल्प्यस्वयंविप्रद्वारावाकुर्यात् ॥ तद्यथा ॥ सप्रणवव्याहृतिगायत्र्याअयुतंजप्त्वा आपोहिष्ठेतिसूक्तंएतोन्विंद्रमितितिस्रःऋतंचेतिसूक्तंस्वस्तिनइत्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्याःस्वस्तिमतीः स्वादिष्ठयेत्याद्याःपावमानीश्चसर्वाः प्रत्येकंदशवारंस्वयमन्यद्वारावाजप्त्वा तत्सवितुरित्यस्याचार्यमृषिंविश्वा
मित्रंतर्पयामि गायत्रीछंदस्तर्प० सवितारंदेवतांतर्प० इतितर्पणंकृत्वारुद्रंनमस्कृत्यकद्रुद्रायेत्यादीनिरुद्रसूक्तानिजपेत्॥ ततोदि
नांतरेदेशकालौसंकीर्त्यममसकलपापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंचतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणंस्वयंविप्रद्वारावाकरिष्ये
तदंगत्वेनस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंजपकर्तृवरणंचकरिष्यइतिसंकल्पः ॥ संकल्पस्यापिऋत्विक्कर्तृत्वेमुकशर्मणोयज
मानस्यसकलपापक्षयेत्यादियजमानानुज्ञयाकरिष्ये ॥ एवंपूर्वत्रापिसंकल्पऊह्यः ॥ नांदीश्राद्धांतेसवितापीयतामिति ॥ गायत्री
पुरश्चरणेजपकर्तारंत्वांवृणेइतिविप्रमेकैकंवृत्वावस्त्रादिभिःपूजयेत् ॥ अथनित्यकर्म ॥ एकैकोविप्रःस्वयंवाकुशाद्यासनोपवि
ष्टआचम्यपवित्रपाणिःप्राणानायम्यदेवताःप्रार्थयेत् ॥ सूर्यःसोमोयमःकालःसंध्येभूतान्यहःक्षपाः ॥ पवमानोदिक्पतिर्भूराका
शंखेचरामराः ॥ ब्रह्मशासनमास्थायकल्पध्वमिहसंनिधिमिति ॥ ततोदेशकालौसंकीर्त्यप्रात्यहिकजपंसंकल्प्य गुरवेनमः गण
पतये० दुर्गायै० मातृभ्यो० इतिनत्वा त्रिःप्राणानायम्य तत्सवितुरितिगायत्र्याविश्वामित्रऋषिःसवितादेवतागायत्रीछंदः
जपेवि० ॥ विश्वामित्रऋषयेनमःशिरसि गायत्रीछंदसेनमोमुखे सवितृदेवतायैनमोहृदि इतिन्यस्य तत्सवितुरंगुष्ठाभ्यां० वरे
ण्यंतर्जनी० ॥ भर्गोदेवस्यमध्यमा० धीमह्यनामिका० धियोयोनःकनिष्ठिकाभ्यां० प्रचोदयात्करतलकरपृष्ठाभ्यांनमइतिकर
न्यासंकृत्वैवंहृदयादिषडंगन्यासंकुर्यात् पूर्वोक्तरीत्यासंस्कृतांजपमालांपात्रेनिधायसंप्रोक्ष्य ॐ महामायेमहामालेसर्वशक्तिस्वरू
पिणि ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मांसिद्धिदाभवेतिप्रार्थ्य ॐ अविघ्नंकुरुमालेत्वंइतितामादायमंत्रदेवतांसवितारंध्यायन्हृ
दयेमालांधारयन्मंत्रार्थंस्मरन्मध्यंदिनावधिजपेत् ॥ अतित्वरायांसार्धत्रिप्रहरावधि॥ जपांतेपुनःप्रणवमुक्त्वा त्वंमालेसर्वदेवा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मंत्राणामिष्टसिद्धिकरीभव ॥ एकाक्षरगणपतिमंत्रं १०८ जप्त्वापुनःपूर्ववन्न्यासादिकृत्वा गुह्यातिगुह्य० इतिजपंनिवेद्य त्वंमा लेसर्वदेवानामितिमालांशिरसिनिधायअथर्वशीर्षंशतवारंविवक्षितसंख्ययावाजप्त्वांतेजपंनिवेद्यपुनःपूर्ववन्मानसैःपंचोपचारैः पूजयेत् ॥ जपादौएतदथर्वशीर्षमित्यादिफलश्रुतेःप्रत्यावृत्तिनावृत्तिःकिंत्वंतेसकृदेव ॥ इतिजपविधिः ॥ ॥ छ ॥

॥ ३१४ ॥ गणपत्यथर्वशीर्षहवनविधिः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालोत्कीर्तनांतेश्रीगणपतिप्रसादसिद्ध्यामुकफलावाप्तयइत्यादियथोद्दिष्टंजपदशांशेनहवनं तद्दशांशेनतर्पणंतद्दशांशेनमार्जनंचकरिष्यइतिसंकल्प्यगणपतिपूजनाद्याचार्यवरणांतंकुर्यात् ॥ आचार्यःकर्मसंकल्प्यप्रादेशक रणांतेग्न्युत्तारणप्राणप्रतिष्ठादिनागणपतिप्रतिमांसंस्कृत्यमहीद्यौरित्यादिविधिनास्थापितकलशोपरिसंस्थाप्यसंपूज्य तत्पश्चिम तःस्थंडिलेग्निंप्रतिष्ठाप्यध्यात्वान्वादध्यात् ॥ (सग्रहपक्षेग्रहोत्कीर्तनांते) गणपतिंअथर्वशीर्षामुकावृत्तिभिः प्रतिखंडममुक द्रव्येणशेषेणेत्याज्यभागांतेद्रव्यंत्यक्त्वावदानधर्मेणजुहुयात् ॥ तत्रखंडमंत्रविभागः ॥ ॐ नमस्तेगणपतये–त्वंसाक्षादात्मासि नित्यंस्वाहा १ ऋतंवच्मि सत्यंवच्मि० २ अवत्वंमां–सर्वतोमांपाहिपाहि० ३ त्वंवाङ्मयः–त्वंज्ञानमयो० ४ सर्वंजगदिदं त्वत्तो–त्वंचत्वारिवाक्० ५ त्वंगुणत्रया–त्वंब्रह्मात्वंविष्णु० ६ गणादिंपूर्व–गंगणपतयेनमः ७ एकदंताय–प्रचोदयात् ८ एकदंतंचतुर्हस्तं–एवंध्यायतियो० ९ नमोव्रातपतये०– वरदमूर्तयेनमःस्वाहा १० एवंहुत्वास्विष्टकृदादिहोमशेषंसमाप्य स्थापितकलशोदकेनसकुटुंबंयजमानमभिषिच्यदेवतापूजनविसर्जनांतेपीठमाचार्यहस्तेप्रतिपाद्य ब्राह्मणभोजनंसंकल्प्यभूयसीं दत्वाशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इत्यथर्वशीर्षविधानम् ॥ ॥ छ ॥ ॥ छ ॥

॥३६२॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३१५ ॥ संतानगोपालविधानम् ॥

श्रीः ॥ कर्तासपत्नीकःसुस्नातःकृतनित्यक्रियःआदौशरीरशुद्ध्यर्थमेनसोगुरुलाघवानुसारेणसर्वप्रायश्चित्तंविधायनिर्विघ्नतासिद्ध्यर्थंविनायकशांतिंग्रहानुकूल्यार्थंग्रहयज्ञंमंत्रसिद्ध्यर्थंअयुतत्रयंगायत्रीजपंचकृत्वाशुभेदिनेशुचीन्मंत्रवतोविप्रानाहूयतैरनुज्ञातोदेशकालौसंकीर्त्यश्रीसंतानप्रदगोपालकृष्णप्रीतिपूर्वकमंत्रसिद्ध्यर्थंपुरश्चरणमहंकरिष्येअथवाश्रीसंतानप्रदगोपालकृष्णदेवतामंत्रसिद्धिद्वारासंतानप्रदगोपालकृष्णदेवताप्रीत्यर्थंपुरश्चरणमहंकरिष्यइत्येवंवासंकल्प्य निर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंचोक्तरीत्याकुर्यात् ॥ ततआचम्यप्राणानायम्यशुचौदेशेनवधाताधारांकृत्वेत्यादिविधिनाकल्पितेस्थलेआसनार्थंकुशाअजिनंचैलमितिक्रमादुपर्युपर्यास्तीर्यगायत्र्यामूलमंत्रेणचाभ्युक्ष्य पृथ्वित्वयेत्यादिपूर्वमाह्निकप्रकरणोक्तक्रमेणभूशुद्धिभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकान्यासान्विधायततःआचक्रायहृदयायनमः विचक्रायशिरसेस्वाहा सुचक्रायशिखायैवषट् त्रैलोक्यरक्षणचक्रायकवचायहुं असुरांतचक्रायअस्त्रायफट् ॥ अंगषट्कपक्षे असुरांतचक्रायनेत्रत्रयायवौषट् सुदर्शनचक्रायअस्त्रायफट्इतिप्रयोगः ॥ अथमूलमंत्रन्यासः ॥ ॐ देवकीसुतगोविंदवासुदेवजगत्पते ॥ देहिमेतनयंकृष्णत्वामहंशरणंगतः॥ इत्यनेनमूलमंत्रेणप्राणायामंकृत्वा॥ अस्यश्रीसुतप्रदगोपालकृष्णमंत्रस्यनारदऋषिःअनुष्टुप्छंदः सुतप्रदोगोपालकृष्णोदेवता पूजाजपादौविनियोगः॥ ॐ क्लींदेवकीसुतगोविंदअंगुष्ठाभ्यां०॥ ॐ वासुदेवजगत्पतेतर्जनीभ्यां०॥ ॐ देहिमेतनयंकृष्णमध्यमाभ्यां० ॐ त्वामहंशरणंगतःअनामिकाभ्यां० ॥ ॐ क्लींदेवकीसुतगोविंद० शरणंगतःकनिष्ठिकाभ्यां० ॥ ॐ देवकीसुतगोविंदहृदयाय० ॥ ॐ क्लींवासुदेवजगत्पतेशिरसे० ॥ ॐ देहिमेतनयंकृष्णशिखायैवषट्॥ ॐ त्वामहंशरणंगतः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कवचायहुं ॥ ॐ क्लींदेवकीसुतगोविंद० शरणंगतःअस्त्रायफट् ॥ अस्यश्रीसुतप्रदगोपालकृष्णमंत्रस्यनारदायऋषयेनमःशिरसि॥ अनुष्टुभेछंदसेनमःमुखे ॥ सुतप्रदायगोपालकृष्णायदेवतायैनमःहृदये ॥ पूजाजपादौविनियोगायनमःसर्वांगेइतितत्तन्मुद्राभि र्विन्यस्यमूलेनत्रिर्व्यापकंकृत्वा ॥ विजयेनयुतोरथस्थितःप्रसमानीयसमुद्रमध्यतः ॥ अददत्तनयान्द्विजन्मनेस्मरणीयोवसुदेव नंदनः ॥ इतिध्यायेत् ॥ तंत्रांतरेतुप्रकारांतरेणध्यानमुक्तं ॥ स्तनंधयंतंजननीमुखाब्जंविलोक्यमंदस्मितमुज्वलांगं ॥ स्पृशंत मन्यंस्तनमंगुलीभ्यांवंदेयशोदांकगतंमुकुंदं ॥ इति ॥ शंखचक्रगदापद्मधरंश्यामंचतुर्भुजं ॥ देवकीतनयंकृष्णंपीतवाससम च्युतं ॥ समर्पयंतंविप्रायनष्टानानीयबालकान् ॥ मयूरबर्हिशिरसंध्यायेसौदामिनीनिभं ॥ इत्यप्यन्यत्र ॥ एतेषामन्यतमेनय थाकामंध्यात्वामानसोपचारैःसंपूज्यकलशाराधनंकुर्यात् ॥ शुद्धजलपूरितंकलशंस्ववामभागेसंस्थाप्यकलशस्यमुखेविष्णुरित्या दिनातस्मिन्कुंभेअंकुशमुद्रयातीर्थान्यावाह्यकलशंगंधपुष्पाक्षतैःसंपूज्यतद्दक्षिणतःप्रक्षालितंशंखमाधारपात्रेसंस्थाप्यकलशोदके नशंखंपूरयित्वाशंखमुद्रांप्रदर्श्यपांचजन्यायविद्महेपावमानायधीमहि ॥ तन्नःशंखःप्रचोदयात् ॥ इतिशंखगायत्र्यातंगंधपुष्पा क्षतैःसंपूज्यतदुदकंकिंचित्कलशेप्रक्षिप्यशंखात्किंचिदुदकंपात्रांतरेगृहीत्वातेनजलेनपूजाद्रव्याणिभूमिमात्मानंचप्रोक्ष्यजगद्ध निमंत्रमातःस्वाहेतिघंटांसंपूज्य ॥ आगमार्थंतुदेवानांगमनार्थंतुरक्षसां ॥ कुरुघंटेशुभंनादंदेवताह्वानलांछनमितिवादयेत् ॥ ततोमहीद्यौरित्यादिविधिनाकलशंसंस्थाप्यशुद्धजलेनपूरणादिपूर्णपात्रनिधानांतंकृत्वातत्रवरुणमावाह्यसंपूजयेत् ॥ ततस्तदुप रिपीतंवस्त्रमास्तीर्यउशीरवालकचंदनकेशरकुष्ठागुरुमुस्ताजटामांस्यात्मकेनाष्टगंधेनकस्तूरीचंदनकेशरागुरुमांसीमुक्ताकर्पूरकु ष्ठात्मकेनाष्टगंधेनसकर्णिकमष्टदलंविलिख्यदेवताआवाहयेत् ॥ तत्रावाहनप्रकारोयथा ॥ पद्माधःआधाररूपिण्यैशक्तयेनमःकू

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्माय० शेषाय० वराहाय० मंडूकाय० कालाग्निरुद्राय० धरण्यै० वृंदावनाय० इतिपद्माधः ॥ अथमंचकेआग्नेय्यादिचतुर्दि
क्षु धर्माय० ज्ञानाय० वैराग्याय० ऐश्वर्याय ॥ ततःपूर्वादिचतुर्दिक्षु अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० ॥
तदुपरिपद्मदेवताः कंदाय० नालाय० कर्णिकायै० पत्रेभ्यो० ॥ ततःकर्णिकायां सूर्याय० सोमाय० द्वयोर्मध्येअग्नयेपत्रेषुपू
र्वादिक्रमेण विमलायै० उत्कर्षिण्यै० ज्ञानायै० क्रियायै० योगायै० प्रह्वयै० सत्यायै० ईशानायै० ॥ देवस्यपुरतःअनुग्रहायै
इतिपीठदेवताआवाह्यमध्येवह्निमंडलेश्रीगोपालकृष्णमावाहयेत् ॥ तद्यथाध्यानोक्तलक्षणोपेतांयथाशक्तिसुवर्णादिधातुनिर्मि
तांगोपालकृष्णप्रतिमांविधायमूर्तेःसंततदुग्धोदकधाराभ्यांयथाशाखमभ्युत्तारणंकृत्वापूर्वोक्तरीत्याप्राणप्रतिष्ठांविधायप्रतिमा
यादक्षिणपार्श्वेस्थित्वादेवस्यपुरतोनानोपहारबलिंसंस्थाप्यतैजसेपात्रेगव्यंघृतंनिक्षिप्यसुवर्णशलाकाभ्यांतच्चक्षुर्देवहितमित्यनेन
चित्रंदेवानामित्यनेनवादेवस्यनेत्रेउन्मील्य अंजंतित्वामंध्वरे० उपस्थेइत्यनेनद्वाभ्यांमध्यमांगुलिभ्यांउभेसहैवमधुनाभ्यज्य
पंचामृतैःशुद्धोदकेनचस्नापयित्वास्वाभिमुखींप्रतिमांवह्निमंडलेसंस्थाप्यअधोमुखहृत्पद्मंवायुबीजेनोन्मुखंज्ञानार्केणविकसितंच
भावयित्वाहंसःसोहमितिहृत्पद्मस्थंश्रीकृष्णमात्मानंवहन्नासारंध्रमार्गेणस्वांजलिस्थपुष्पेसमागतंविभाव्यमूलमंत्रमुच्चार्यतत्पुष्पंप्र
तिमायांविनिक्षिप्यआवाहनीस्थापनीसंनिधापनीसंनिरोधिनीसंमुखीकरणीसकलीकरणीअवगुंठनीपरमीकरणीअमृतीकरणीति
नवमुद्राःप्रदर्शयेत् ॥ ततोनर्यप्रजामितिप्रतिष्ठाप्यनमस्कुर्यात् ॥ अथावरणदेवताःआग्नेयादिकोणेषुप्रादक्षिण्येनआचक्रायन
मःआचक्रमावाहयामि ॥ विचक्रायविचक्रं ॥ सुचक्रायसुचक्रं ॥ त्रैलोक्यरक्षणचक्रायत्रैलोक्यरक्षणचक्रं ॥ ततःपूर्वादिचतु
र्दिक्षुप्रादक्षिण्येनअसुरांतकचक्रायअसुरांतकचक्रं ॥ षट्पक्षेअसुरांतकचक्रानंतरंसुदर्शनचक्रायसुदर्शनचक्रंइतिसर्वदिक्षुइति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विशेषः ॥ ततःपत्रेषुपूर्वादिप्रादक्षिण्येनरुक्मिण्यै० रुक्मिणीं० सत्यभामायै० सत्यभामां० नाग्नजित्यै० नाग्नजितीं० अर्कजायै० अर्कजां० मित्रविन्दायै० मित्रविंदां० लक्ष्मणायै० लक्ष्मणां० जांबवत्यै० जांबवतीं० सुशीलायै० सुशीलां० ॥ ततोदलाग्रेषु पूर्वादिक्रमेणप्रदक्षिणं ॥ वसुदेवाय० वसुदेवं० देवैक्यै० देवकीं० नंदगोपतये० नंदगोपतिं० यशोदायै० यशोदां० बलभद्राय० बलभद्रं० सुभद्रायै० सुभद्रां० गोपेभ्यो० गोपान्० गोपिकाभ्यो० गोपिकाः० ॥ ततःप्रागादिक्रमेणस्वस्वदिक्षु ॥ इंद्राय० इंद्रं० अग्नये० अग्निं० यमाय० यमं० निर्ऋतये० निर्ऋतिं० वरुणाय० वरुणं० वायवे० वायुं० कुबेराय० कुबेरं० ईशानाय० ईशानं० ॥ इत्यावाह्यततस्तत्सन्निधौ ॥ वज्राय० वज्रं० शक्तये० शक्तिं० दंडाय० दंडं० खड्गाय० खड्गं० पाशाय० पाशं० अंकुशाय० अंकुशं० गदायै० गदां० त्रिशूलाय० त्रिशूलं ॥ इत्यावरणदेवताआवाह्यनर्यप्रजामितिप्रतिष्ठाप्यमूलमंत्रेणपीठावरणदेवतासहितंषोडशोपचारैर्भक्त्यापूजयित्वामालासंस्कारंकुर्यात् ॥ अयंप्रागाह्निकप्रकरणेगतइतिनात्र०

॥ ३१६ ॥ होमविधिः ॥

श्रीः ॥ आचम्यप्राणानायम्यस्थंडिलकरणादिकृत्वाबलवर्धननामानंलौकिकाग्निंस्थंडिलेप्रतिष्ठाप्यप्रज्वाल्यध्यात्वासमित्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वामालासंस्कारहोमकर्मणियायक्ष्यमाणादेवतातांपरिग्रहीष्यामि ॥ मूलमंत्रेणमंत्रदेवतामष्टोत्तरसंख्याभिराज्याहुतिभिर्यक्ष्ये अग्निंस्विष्टकृतंहुतशेषाज्याहुत्यायक्ष्यइत्युक्त्वान्वाधानसमिदभ्याधानादिआपूर्विकतंत्रेणप्रधानहोमात्पूर्वतंत्रंकर्मकुर्यात् ॥ ॐ क्लींदेवकीसुत० गतःस्वाहेतिमूलमंत्रेणअष्टोत्तरशतमाज्याहुतींर्जुहुयात् ॥ प्रत्याहुतिसंपाताज्यंमालायांनिक्षिपेत् ॥ अग्नयेस्विष्टकृतेस्वाहेतिएकांहुतशेषाज्याहुतिंहुत्वोत्तरपरिषेकादिआपूर्विकतंत्रेणोत्तरांगानिकुर्यात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

होमाशक्तौहोमसंख्याद्विगुणसंख्ययामूलेनमालाभिमंत्रणं ॥ ततःह्रींसिद्ध्यैनमःइतिमंत्रेणमालांदेवताभावनयासंपूजयेदिति मालासंस्कारः ॥ ततः ॐ मांमालेमहामायेसर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव ॥ ॐ ह्रींसिद्ध्यै नमःइतिमालांनमस्कृत्यह्रींसिद्ध्यैनमःइतिदक्षिणकरेगृहीत्वागणपतिबीजमुच्चार्यअविघ्नंकुरुमालेत्वमितिसंप्रार्थ्यवस्त्रादिनाच्छा दितांमालांस्वहृदयसमीपेधृत्वाअंगुष्ठमध्यमाभ्यांमणीनावर्तयन्यथोक्तब्रह्मचर्यादिनियमवानुन्नतगात्रःमनसाउपांशुवामध्याह्न पर्यंतंयथाशक्तिजपंकुर्यात् ॥ आरंभदिवसेयावत्संख्यंजपःकृतस्तावत्संख्यएवप्रत्यहंकार्यःउपद्रवसंभावनायांदिवसचतुर्थभाग पर्यंतमपिजपःकर्तव्यःनतत्रसंख्यातिक्रमदोषःजपमालादौतांमालांह्रींसिद्ध्यैनमइतिनमस्कृत्य ॥ त्वंमालेसर्वदेवानांप्रीतिदाशु भदामम ॥ शिवंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा ॥ ह्रींसिद्ध्यैनमःइतिमालांशिरसिनिधायसुगुप्तस्थलेनिदध्यात् ॥ ततोमूले नप्राणानायम्यपूर्ववत्करन्यासांगन्यासान्कृत्वापूर्ववद्ध्यात्वादेवंपंचोपचारैःसंपूज्य ॥ गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंज पं ॥ सिद्धिर्भवतुदेवेशत्वत्प्रसादान्मयिस्थिरा ॥ इतिजलधारयादेवस्यदक्षिणहस्तेजपंनिवेदयेत् ॥ यदिअन्यदीयंजपंकरो तितदामयीत्यत्रयजमानइत्यूहः ॥ एवंपुरश्चरणसमाप्तिपर्यंतंप्रत्यहंदेवंसंपूज्यआसनविध्यादिमूर्तिसंस्कारावाहनमालासंस्का रवर्जंजपनिवेदनांतंकर्मकुर्यात् ॥ समाप्तेपुरश्चरणेहोमंकुर्यात् ॥ सयथा ॥ आचम्यप्राणानायम्यगणेशंसंपूज्यब्रह्मादीन्वृत्वा पूजयेत् ॥ अत्रपुण्याहवाचनमपिकेचित्कुर्वंति ॥ ततोदेवस्यपूजांविधायकुंडकरणोल्लेपनाद्यग्निस्थापनांतंकुर्यात् ॥ अत्रबलव र्धननामाग्निः ॥ ततोन्वाधानं समित्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वासुतप्रदगोपालकृष्णमंत्रजपदशांशहोमकर्मणिया इत्यादिप्रसाधनीदेव्यंतंव्याहृत्यंतंवोक्त्वाप्रधानहोमेसुतप्रदगोपालकृष्णंमूलमंत्रेणजपदशांशसंख्याभिःआज्यक्षीरमध्वक्ततिला

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हुतिभिर्यक्ष्ये ॥ पीठदेवताआवरणदेवताश्चैकैकयाआज्यक्षीरमध्वक्ततिलाहुत्याज्याहुत्यावायक्ष्ये ॥ अग्निंस्विष्टकृतंहुतशेषद्रव्या
हुत्यायक्ष्येइत्यादिअंगहोमेवरुणंद्वाभ्यामित्यादिवापात्रासादनेआज्येनसहमधुतिलानासादयेत् ॥ ततोब्रह्मोपवेशनादिआज्य
पर्यग्निकरणकालेतिलानाज्यक्षीरमधुभिरभ्यक्तान्कृत्वातेषामप्याज्येनसहपर्यग्निकरणंकुर्यात् ॥ ततःपरिधिपरिधानादिअन्वा
धानोत्कीर्तनानुसारेणप्रसाधनीदेवीहोमांतंव्याहृतिहोमांतंवाकृत्वाप्रधानहोममृत्विग्भिःकारयेत् ॥ ऋत्विजोद्विराचम्यकृतन्य
ग्जानुकाःकृतप्राणायामासनविधिभूतशुद्ध्याद्यृष्यादिन्यासाःप्राङ्मुखाउदङ्मुखावामृगीमुद्रयासावधानमनसोहोमंकुर्युः ॥ तिला
श्चुलुकमिताःशतसंख्यावा आज्यंकर्षप्रमाणं कर्षस्तुदशगुंजामितमाषषोडशकप्रमाणः अन्नंग्रासमितंअनेकदिनसाध्येहोमेतु
प्रतिदिवसंकयाचित्संख्ययासंस्थाप्यवह्निरक्षणपूर्वकंशुभदिनेसमाप्तिंकुर्यात् ॥ प्रतिदिनंहोमाद्यंतयोःप्रधानदेवतांगदेवताःपूज
येत् ॥ आरंभेसमाप्तिदिनेऽग्निंमूलमंत्रेणस्वाहास्वधासहितंपूजयेत् ॥ समाप्तेप्रधानहोमेस्वयमेवपीठदेवताभ्यआवरणदेवताभ्य
श्चैकैकांआज्यक्षीरमध्वक्ततिलाहुतिंआज्याहुतिंवान्वाधानोत्कीर्तितपक्षानुसारेणहुत्वाहुतशेषेणस्विष्टकृदादिअंगहोमादिवान्वा
धानोत्कीर्तनानुरेणकुर्यात् ॥ प्रायश्चित्तहोमाकरणपक्षेस्विष्टकृदंतेतत्करणपक्षेतदंतेवापूर्णाहुतिंहुत्वाहोमशेषंसमाप्यदेवस्योत्तर
पूजांकुर्यात् ॥ ततऋत्विजःसपत्नीकंयजमानंकलशोदकेनापोहिष्ठाद्यैर्मंत्रैरभिषिंचेयुः ॥ ततोयजमानऋत्विग्भ्योहिरण्यंतन्नि
ष्क्रयंवायथाविभवंदक्षिणांदत्वागुरवेपीठसहितांप्रतिमांदत्वाहोमकर्मेश्वरायार्पयेत् ॥ ततोमूलमंत्रमुक्त्वासुतप्रदंगोपालकृष्णंत
र्पयामिनमइतिजपदशांशेनदुग्धेनजलेनवातर्पणंकृत्वामूलमंत्रांतेसुतप्रदंगोपालकृष्णमभिषिंचामिनमइतितर्पणदशांशेनमार्जनं
विधायमार्जनदशांशेनब्राह्मणान्भोजयेत् ॥ स्वस्त्यपुरश्चरणाशक्तौएतत्प्रयोगाभिज्ञेनाचार्येणकारयेत्तस्माएवप्रतिमांदद्यात् ॥

CC-0. In Public Domain Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यत्रहोमएवप्रयोगविशेषेफलप्रदत्वात्प्रधानंननुनर्जपांगंतत्रब्राह्मणभोजनसंख्यातंत्रविशेषानुक्तास्मृत्युक्ताग्राह्या ॥ तत्रलक्षहोमे षष्ट्यधिकानवशतीमुख्यःपक्षः विंशत्यधिकापंचशतीमध्यमःदशाधिकात्रिशत्यधमः ॥ यत्रप्रधानदेवतांगत्वेनस्मृतितंत्रोक्तयोर विरोधेसमुच्चयपक्षमाश्रित्यग्रहाअपिपूज्यंतेतत्रतदंगब्राह्मणभोजनमपिकार्यविशेषोन्यतोज्ञेयः ॥ इति ॥ ॥ ७ ॥

॥ ३१७ ॥ ज्वरशांतिप्रयोगः ॥

श्रीः ॥ आचमनादिदेशकालस्मरणांतेममश्रीज्वरस्वरूपीरुद्रप्रसादसिद्धिद्वाराशरीरेउत्पन्नोत्पत्स्यमानसमस्तामयनिदानभूतवा तपित्तश्लेष्मप्रक्षोभजन्यविविधज्वरोत्थनिखिलपीडापरिहारपूर्वकक्षिप्रारोग्यावाप्त्यर्थंसग्रहमखांज्वरशांतिंकरिष्ये इतिसंकल्प्य गणेशपूजनादिऋत्विग्वरणांतंकुर्यात् ॥ ततआचार्यःप्रादेशकरणांतेस्थंडिलात्पूर्वेमहीद्यौरित्यादिविधिनाकलशंसंस्थाप्यपूर्णपा त्रोपरिश्वेतवस्त्रंप्रसार्यतत्राक्षतैरष्टदलंकमलंविलिख्य तत्कर्णिकायांसुवर्णप्रतिमांनिधायतत्र ॥ कुबेरतेमुखंरौद्रंनंदिन्नानंदमा वह ॥ ज्वरमृत्युभयंघोरंविशनाशयमेज्वरम् ॥ इतिमंत्रेणज्वरस्वरूपिणंरुद्रमावाह्य पूर्वादिदलेषुदेवताआवाहयेत् ॥ ज्वराय नमःज्वरमावाहयामि ॥ एवमग्रेपि ॥ वातज्वराय० । पित्तज्वराय० । श्लेष्मज्वराय० । शीतज्वराय० । उष्णज्वराय० । द्वंद्वजज्व० । संनिपातज्व० ॥ तद्बाह्ये ॥ उग्रज्वराय० । गंभीरज्व० । सततज्व० । संततज्व० । ऐकाहिकज्व० । द्व्याहि कज्व० । त्र्याहिकज्व० । चातुर्थिकज्व० ॥ तद्बाह्ये ॥ प्राकृतज्व० । वैकृतज्व० । आमज्व० । निरामज्व० । अभिघातज्व० । अभिचारज्व० । अभिषंगज्व० । अभिशापज्वरायनमः ॥ इत्यावाह्यसर्वान्संपूज्याग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् ॥ ग्रहादि कीर्तनांतेज्वरस्वरूपिणंरुद्रंक्षीराप्लुताम्रदलैरष्टोत्तरसहस्रसंख्याकाहुतिभिः ज्वराद्यंगदेवताएकैकयाज्याहुत्याशेषेणेत्याज्यभा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

गांतेकुंभंस्पृष्ट्वा ॥ आरुद्रासःश्यावाश्वोरुद्रोजगती कुंभाभिमंत्रणेवि० ॥ ॐ आरुद्रास० इतिमंत्रमष्टोत्तरशतवारंजपेत् ॥ ततो यजमानेनत्यागेकृतेग्रहादिहोमंकृत्वाकुबेरतेइतिमंत्रेण १००८ संख्ययाक्षीराप्लुताम्रदलानिहुत्वा ज्वराद्यंगदेवताभ्योनाममं त्रेणैकामाज्याहुतिंजुहुयात् ॥ ततःपूर्ववत्कुंभमभिमंत्र्यअंगहोमादिप्रायश्चित्तहोमांतेबलिदानपूर्णाहुतीकृत्वासंस्रावहोमादिशेषं समाप्यस्थापितकलशोदकेनसमुद्रज्येष्ठाइत्यादिमंत्रैरभिषेकंकुर्यात् ॥ ततःकर्ताधृतशुक्लांबरोविभूतिंधृत्वादेवतोत्तरपूजांविधाय कुबेरइतिमंत्रांते ज्वरस्वरूपिणंरुद्रंतर्पयामि इतिपयसातर्पणंकृत्वानाममंत्रेणज्वराद्यंगदेवतास्तर्पयेत् ॥ ततःकृतांजलिः ॥ त्रिपाद्धस्मग्रहरणस्त्रिशिरारक्तलोचनः ॥ समेप्रीतःसुखंदद्यात्सर्वामयपतिर्ज्वरः ॥ सततंसंततंचैवज्वरमुग्रंतथैवच ॥ ऐकाहिकं द्व्याहिकंचतृतीयादिमथापिवा ॥ ज्वरोरोगपतीराजामृत्युरोगःसनातनः ॥ क्रुद्धोरोगान्ज्वरोहन्याद्रुद्रोभुवनशोभनः ॥ इतिसं प्रार्थ्यआचार्यादिभ्योदक्षिणादानांतेविसर्जितदेवतापीठंआचार्यायदद्यात् ॥ तत्ररुद्रप्रतिमादानेमंत्रः ॥ ज्वरस्वरूपीयोरुद्रःसु वर्णेनविनिर्मितः ॥ सोपस्करोमयादत्तस्तेनरुद्रःप्रसीदतु ॥ ततआज्यावलोकनंतद्दानंचकृत्वाविप्रान्संभोज्यभूयसींदत्वाशिषो गृहीत्वाकर्मसमापयेत् ॥ इतिशांतिकमलाकरोक्ताज्वरशांतिः ॥

॥ छ ॥ ॥ छ ॥

१ अन्यस्मिन्प्रयोगेप्रधानहोमोत्तरंआरुद्रासइत्यष्टोत्तरशतजपः ततस्तर्पणंतत्रप्रत्येकमादौ त्रिपाद्धस्म० ज्वरोरोगपती० इतिश्लोकद्वयोत्तरंभूःभु वःस्वः भूर्भुवःस्वःपित्तज्वरंतर्पयामि ॥ एवंसर्वत्र वातज्वरंकफज्वरंशीतज्वरंउष्णज्वरंश्लेष्मज्वरंविषमज्वरंसंनिपातज्वरंअतिसारज्वरंदोषोत्थज्वरंसंत तज्वरंउग्रज्वरंऐकाहिकज्वरंद्व्याहिकज्वरंत्रिदिवसज्वरंचातुर्थिकज्वरंअत्युग्रज्वरंआमज्वरंअतिवातज्वरंशीतोष्णज्वरंमारींप्रमारींकालींमहाकालींईश्वरीं कौमारींचामुंडांवास्तोष्पतिंज्वरपतिरुद्रंतर्पयामीति ततःस्विष्टकृदाद्यस्ति तत्रसदसत्सद्भिर्विचारणीयं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३१८ ॥ मृत्युंजयजपविधिः ॥

श्रीः ॥ ॐ अस्यश्रीमृत्युंजयमंत्रस्यवसिष्ठऋषिः अनुष्टुप्छंदः महामृत्युंजयत्र्यंबकरुद्रोदेवता प्रणवोबीजं स्वराःशक्तिः बिंदवः कीलकं ममयजमानस्यवासर्वापमृत्युविनाशार्थंसर्वाभीष्टकामनासिद्ध्यर्थंमहामृत्युंजयमंत्रजपेविनियोगः ॥ अथन्यासः ॥ ॐ हौं जूंसःअंगुष्ठाभ्यांनमः ॐ भूर्भुवःस्वः तर्जनीभ्यांस्वाहा ॐ त्र्यंबकंयजामहे० वर्धनं मध्यमाभ्यांवषट् ॐ उर्वारुकमिवबंधनात् अनामिकाभ्यांहुं ॐ मृत्योर्मुक्षीयमामृतात् कनिष्ठिकाभ्यांवौषट् ॐ स्वःभुवःभूः ॐ सःजूंहौं ॐ त्र्यंबकंयजामहे० उर्वारुकमिवबं धनात् करतलकरपृष्ठाभ्यांफट् ॥ ॐ हौंजूंसःहृदयायनमः ॐ भूर्भुवःस्वःशिरसेस्वाहा ॐ त्र्यंबकंयजामहे० वर्धनं शिखायैवषट् ॐ उर्वारुकमिवबंधनात् कवचायहुं ॐ मृत्योर्मुक्षीयमामृतात् नेत्रत्रयायवौषट् ॐ स्वःभुवःभूः ॐ सःजूंहौं ॐ त्र्यंबकंयजा महे० उर्वारुकमिवबंधनात्० अस्त्रायफट् ॐ भूर्भुवःस्वरोमितिदिग्बंधः ॥ अथध्यानं ॥ अरुणकमलकांतिस्वर्धुनीराजमानंकर कलितकपालंस्वक्षमालांदधानं ॥ कलशममृतपूर्णंशूलहस्तंज्वलंतंत्रिनयनमभिवंदेमृत्युमृत्युंमहेशं ॥ अथमूलमंत्रः ॐ हौंजूंसः ॐ भूर्भुवःस्वः ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ स्वःभुवःभूः ॐ सःजूंहौं ॐ इतिषट्प्रणवमृत्युंजयमंत्रः ॥ ॥ अथचतुर्दशप्रणवमृत्युंजयमंत्रजपविधिः ॥ संकल्पंकृत्वाप्रारभेत् ॥ ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॐ ॥ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ इतिचतुर्दशप्रणवविधिः ॥ विधिवत्कलशेरुद्रंसंपूज्यजपदशांशेनतिलाज्याभ्यांहोमःकार्यः ॥ इति० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३१९ ॥ सर्वरोगनाशकानि ॥

श्रीः ॥ रोगानुसारेणलघुरुद्रमहारुद्रातिरुद्राणांजपोभिषेकोवा विष्णुसहस्रनामस्तोत्रस्यशतंसहस्रमयुतंवाजपः सौरंजपःसूर्य नमस्कारार्घ्यदानानिमुंचामित्वेतिसूक्तजपोऽच्युतानंतगोविंदेतिनामत्रयजपोमृत्युंजयजपश्चरोगानुसारेणेति सर्वरोगहराणि ॥

॥ ३२० ॥ अच्युतानंतगोविंदनामत्रयीजपः ॥

श्रीः ॥ आचमनादिदेशकालोत्कीर्तनांतेऽमुकगोत्रस्यामुकशर्मणोममेहजन्मजन्मांतरीयशरीरवाङ्मनःसंभूतनानाविधदुरितो दर्ककर्मविपाकनिदानभूतवातपित्तकफाद्यन्यतमप्रकोपजन्यव्याध्युपशमपूर्वंजीवच्छरीराविरोधेनसद्यःशरीरेआरोग्यावाप्त्यर्थं समस्तदुस्तरव्याधिसंघध्वंसक्षमस्याच्युतानंतगोविंदेतिभगवतोनामत्रयस्याद्यप्रभृतिब्राह्मणद्वारायथाशक्तिलक्षाऽयुताष्टाधिकस हस्राद्यन्यतमसंख्याकजपाख्यंकर्मकरिष्ये॥ गणेशमभ्यर्च्यस्मृत्वावागोत्रोच्चारपूर्वंब्राह्मणंवृणुयात् ॥ सचशुचिराचांतःकर्मसंक ल्प्यासनादिविध्युत्तरं ॥ अस्यश्रीनामत्रयीमहामंत्रस्य कश्यपात्रिभरद्वाजाऋषयः श्रीमहाविष्णुर्देवताअनुष्टुप्छंदः सांकल्पिक हेतुसिद्ध्यर्थेन्यासेजपादौविनि० ॥ तत्रादौन्यासः ॥ कश्यपात्रिभरद्वाजऋषिभ्योनमःशिरसि ॥ अनुष्टुप्छंदसेनमोमुखे श्रीमहा विष्णुदेवतायैनमोहृदये श्रीमहाविष्णुप्रीत्यर्थेजपेविनियोगः ॥ अच्युतायनमः अंगुष्ठाभ्यांनमः हृदयायनमः ॥ अनंतायनमः तर्जनीभ्यांनमः शिरसेस्वाहा ॥ गोविंदायनमः मध्यमाभ्यांनमः शिखायैवषट् ॥ अच्युतायनमः अनामिकाभ्यांनमः कवचा यहुं ॥ अनंतायनमःकनिष्ठिकाभ्यांनमःनेत्रत्रयायवौषट् ॥ गोविंदायनमः करतलकरपृष्ठाभ्यांनमःअस्त्रायफट् ॥ अथध्यानं ॥

॥३६७॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

समस्तदुरितव्याधिसंघध्वंसपटीयसे ॥ अच्युतानंतगोविंदनाम्नेधान्नेनमोनमः ॥ इतिध्यात्वा ॥ ॐ अच्युतायनमोनंतायनमो गोविंदायनमः ॐ ॥ इतिमंत्रमुक्तसंख्ययाजपेत् ॥ अच्युतानंतगोविंदनामोच्चारणभेषजात् ॥ नश्यंतिसकलारोगाःसत्यंसत्यं वदाम्यहं ॥ इतिवा ॥ अनेनामुकसंख्यजपाख्येनकर्मणाश्रीमहाविष्णुःप्रीयतां ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ छ ॥

॥ ३२१ ॥ षड्ग्रहादियोगशांतिः ॥

श्रीः ॥ कर्तागृहस्येशानभागेआचमनादिदेशकालकीर्तनांतेममश्रीपरमेश्वरप्रीतिद्वाराजन्मनक्षत्रेजन्मराशौवाजन्मराशेरमु कस्थानेवात्र्यादिग्रहयोगसूचितसकलानिष्टनिरासपूर्वकैहिकपुत्रलाभसुखवृद्धिचिरायुरैश्वर्यसंपत्तिपारलौकिकशिवपुरव्रजनसि द्ध्यर्थंब्रह्मयामलोक्तांग्रहयोगशांतिंकरिष्ये ॥ (षडादिग्रहयोगेतथोहःकार्यः) ॥ तदंगंगणेशपूजनंस्वस्तिवाचनमाचार्यादिवरणंच करिष्येइतिसंकल्प्य वरणांतेआचार्यःग्रादेशांतंकृत्वाकुंडात्स्थंडिलाद्वाऐशान्यांचतुरस्रंहस्तमात्रंस्थंडिलंतंडुलैर्निर्मायतत्रयोगक र्तृणांग्रहाणांसंख्ययाकलशान्प्राक्संस्थानुदक्संस्थान्वामहीद्यौरित्यादिसंस्थाप्यतत्रनिहितेषुपूर्णपात्रेषुतत्तद्ग्रहमंडलानिलिखेत् ॥ यद्वाएकमेवकुंभंसंस्थाप्यमहतिपूर्णपात्रेग्रहमंडलानिलिखेत् ॥ तेषुसुवर्णेनतदर्धेनतदर्धेनवामितेनयथाशक्तिसुवर्णेनवाकृतास्त त्तद्ग्रहप्रतिमास्तदधिप्रत्यधिदेवताप्रतिमाश्चनिधायतासुग्रहादींस्तत्तन्मंत्रैरावाह्यग्रहयज्ञोक्तप्रकारेणनैवेद्यांतंपूजयेत् ॥ ततःस्थं डिलेग्निंप्रतिष्ठाप्यध्यात्वान्वादध्यात् ॥ समित्त्रयमादायश्रद्धएहीत्यादिसामान्यप्रधानांतेस्थापितग्रहांस्तत्तत्समिच्चर्वाज्यतिलैः प्रत्येकंप्रतिद्रव्यं १००८।१०८।२८ वाआहुतिभिः अधिदेवताःप्रत्यधिदेवताश्चतैरेवद्रव्यैःप्रत्येकंप्रतिद्रव्यं १०८।२८।८ वा वरुणंद्विरित्यादिसामान्यप्रधानहोमांतेग्रहोत्तरतोभिषेकार्थंकलशंमहीद्यौरित्यादिविधिनासंस्थाप्य आपोहिष्ठेत्यादितिसृभिर्न

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

हितेक्षत्रमितितिसृभिर्वाजलेनापूर्यतत्रपंचामृतंपंचगव्यंपंचत्वचःपंचपल्लवान्सर्वौषधीस्तिस्रोवाऱ्यवराणियज्ञियतरुमूलानिगंधादिचतत्तन्मंत्रैःप्रक्षिप्यतत्रवरुणंसंपूज्यान्वाधानानुसारेणहोमंकृत्वावारुणादिप्रायश्चित्तहोमांतेपूर्णाहुतिंहुत्वा ॥ होमशेषंसमाप्यभद्रासनोपविष्टंयजमानंसर्वकलशजलैरभिषिंचेत् ॥ तत्रमंत्राः योगकारकाणांतत्तदधिदेवतानांचवैदिकमंत्रांतेग्रहाणामादिरादित्यो०९ जातवेदसे० त्र्यंबकं० क्षेत्रस्यपतिना० यतइंद्र० त्वंहिराधस्पते० इंद्रंवोविश्वतस्परीत्यादयोष्टलोकपालमंत्राः सुरास्त्वामभिषिंचंतु० येनदेवाःपवित्रेणेत्यादि ३ आपोहिष्ठेति ९ स्वादिष्ठयेति० ॥ समुद्रज्येष्ठाइत्यादिपुण्यसूक्तैश्चाभिषिक्तोयजमानोधृतशुक्लांबरःस्नानवस्त्रमाचार्यायदत्त्वाज्यावलोकनंतद्दानंचकृत्वाचार्यादिभ्योदक्षिणांदद्यात् ॥ ततोयथाशक्तिब्राह्मणान्संभोज्यभूयसींदत्वाशिषोगृहीत्वाकर्मसमापयेत् ॥ इतिग्रहयोगशांतिः ॥ ॥ ७ ॥

॥ ३२२ ॥ जनमारशांतिः ॥

श्रीः ॥ शुभकालेराजाग्रामाधिपतिर्वाशिवालयेआचमनादिदेशकालस्मरणांतेश्रीरुद्रप्रसादसिद्धिद्वाराएतन्नगरग्रामनिवासिसकलप्राणिशरीरेषुउत्पन्नोत्पत्स्यमानजनमाराख्यप्रबलरोगोपसर्गस्यशीघ्रोपशमपूर्वकंसर्वेषामायुरारोग्याद्यवाप्तयेसग्रहमखांजनमारशांतिंक० गणेशपूजनादिऋत्विग्वरणांतंकुर्यात् ॥ ततआचार्यःप्रादेशकरणांतेरुद्रस्यमहापूजांविधायरुद्रसूक्तानिशतरुद्रियानुवाकंरुद्राथर्वशीर्षंविष्णुसूक्तंचजप्त्वाग्निंग्रहांश्चप्रतिष्ठाप्यान्वाधद्यात् ॥ ग्रहाद्युत्कीर्तनांतेरुद्रंपलाशसमिद्धृताक्तपायसबिल्वदलक्षीरवृक्षसमिद्धृताक्ततिलैःप्रतिद्रव्यंसहस्रसंख्याभिराहुतिभिःअंगहोमेवरुणंद्विरित्यादिग्रहादिहोमांतेत्र्यंबकमंत्रेणप्रधानंहुत्वांगहोमादिप्रायश्चित्तहोमांतेबलीन्दत्वाशांतिसूक्तजपांतेपूर्णाहुतिंहुत्वासंस्रावादिहोमशेषंसमाप्य स्थापितकलशोदकेनसर्वप्राणिना

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मभिषेकंकुर्यात्॥ततःकर्ताविभूतिंधृत्वाग्रहादीनामुत्तरपूजांतेआचार्यायगांदद्यात्॥ धेनुस्त्वंपृथिवीरूपासर्वपापक्षयंकरी॥ जन
स्यास्यचसर्वस्यमृत्युंनाशयशोभनेइति॥ब्रह्मादिभ्योयथाशक्तिसुवर्णमन्येभ्यश्चसप्तधान्यादिभूम्यश्वशकटादियथासंभवंतत्तन्मं
त्रैर्दत्वा शिवस्यगर्भागारंगंधादिनोपलिप्यदशांगधूपेनधूपयित्वाशिवंसकर्पूरश्वेतचंदनेनविलिप्यशतपत्रपुष्पैःसंपूज्यधूपादितां
बूलदक्षिणासमर्पणांतेसर्वैःसहकृतांजलिस्तंप्रार्थयेत्॥ देवदेवमहादेवमहापापविनाशन॥ जनमारकृतांपीडांसद्योनाशयशंकर॥
ततोदेवंप्रदक्षिणीकृत्यशिवस्तुतिंपठित्वासहस्रंशतंवाविप्रान्संभोज्यभूयसींदत्वाशांतिंवाचयित्वाकर्मसमापयेत् ॥ इतिजन०॥

॥ ३२३ ॥ सर्वाद्भुतशांतिः ॥

श्रीः ॥ अद्भुतकारणानिहिरण्यकेशीयशांतिसंस्कारप्रकाशेतोरोकृतग्रंथे ॥ सउदीचींदिशमन्वावर्ततेथयदास्यकनकरजतवस्त्र
वैडूर्यमणिमौक्तिकवियोगोभवत्यारंभोवाविपद्यते मधूनिवानिलीयंते काकमैथुनंवापश्येतारिष्टानिवावयांसिचगृहमध्येवल्मीकं
छत्राकंवाजायतेवायसकपोतावावन्यविहंगशशमृगप्रवेशोगोमृगःशशकोगृहमारोहेच्छुष्कवृक्षःप्ररोहते गृहमध्येदूर्वाःप्ररोहंतेमं
डूकोग्निंप्रविशतिसरठोमूर्ध्निनिपततिचुल्लिर्निपततिप्रज्वलन्दीपः(दीपिकासहितः) पततिसर्पोवाद्वारेणप्रविशेन्निष्क्रमतेचेत्येव
मादीनितान्येतानिसर्वाणिवैश्रवणदैवत्यान्यद्भुतप्रायश्चित्तानिभवंत्यभित्यंदेवंसवितारमूण्योरिति स्थालीपाकमष्टोत्तरशतंहु
त्वा पंचभिराज्याहुतिभिर्जुहोतिवैश्रवणाययक्षाधिपतयेहिरण्यपाणयईश्वरायसर्वोत्पातशमनायस्वाहेति महाव्याहृतिभिश्चशं
तातीयंजपेत् ॥ इति ॥ अत्रप्रयोगः॥ कर्ताचमम्यप्राणनायम्यदेशकालौनिर्दिश्यममामुकाद्भुतजनितभाव्यरिष्टनिरसनेनायुरारो
ग्यावाप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थममुकाद्भुतशांतिंकरिष्येइतिसंकल्प्य ॥ गणपतिपूजनंस्वस्तिवाचनंविभवेग्रहानाचार्यवरणंच

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संकल्प्यकुर्यात् ॥ आचार्यःस्वकर्मनिर्वर्त्यपूर्वस्यांविधिवत्स्थापितकलशेवैश्रवणं ॥ ॐ अभित्यंदेवसवितारमूण्योःकविक्रतुमर्चामि सत्यसवंरत्नधामभिप्रियं ॥ ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपास्वः ॥ इतिमंत्रेणावाह्यसंपूज्य अग्निंग्रहांश्चप्रतिष्ठाप्यान्वाद्ध्यात् ॥ ग्रहोत्कीर्तनांतेप्रधानंवैश्रवणमष्टोत्तरशतसंख्याकाभिश्चर्वाहुतिभिः ॥ वैश्रवणं १ यक्षाधिपतिं २ हिरण्यपाणिं ३ ईश्वरं ४ सर्वोत्पातशमनं ५ अग्निंपृथिवींमहांतं ६ वायुमंतरिक्षंमहांतं ७ आदित्यंदिवंमहांतं ८ प्रजापतिंचंद्रमसंनक्षत्राणिदिशोमहांतं ९ चैतादेवताएकैकयाज्याहुत्या अंगहोमेवरुणंद्विरित्यादिप्रणीतास्थापनांतेतूष्णीमष्टोत्तरशताहुतिपर्याप्तांस्तंडुलान्मुष्टिभिर्निरुप्यतूष्णींचतुःप्रोक्ष्य चरुश्रपणादिग्रहादिहोमांतेऽवदानधर्मेणअशक्तौपाणिनावाचरुमवदायपूजामंत्रेण १०८ हुत्वास्रुवेणाज्यंवैश्रवणादिभ्यस्तत्तन्नाम्नाहुत्वा ॐ भूरग्नयेचपृथिव्यैचमहतेचस्वाहा अग्नयेपृथिव्यैमहतेचेदं ॥ ॐ भुवोवायवेचांतरिक्षाय० वायवेंतरिक्षायमहते० ॥ ॐ सुवरादित्यायचदिवे० आदित्यायदिवेमहतेचेदं ॥ ॐ भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्योदिग्भ्यश्चमहु० चंद्रमसेनक्षत्रेभ्योदिग्भ्योमहतइदंइति ॥ ततःप्रायश्चित्तादिहोमांतेबलिदानपूर्णाहुतीहुत्वाहोमशेषंसमाप्य स्थापितकलशोदकेनयजमानमभिषिंचेत् ॥ ततोयजमानोविभूतिंधृत्वादेवतोत्तरपूजांविधायाचार्यायगांविसर्जितदेवतापीठंचदत्वाशंतातीयंजपेत् ॥ उतदेवाइत्यादिसप्तर्चंसूक्तंजपेत् ॥ केचिच्छंनइंद्राग्नीतिसूक्तंपठंति ॥ ततःशक्त्याब्राह्मणान्भोजयित्वाभूयसींदत्वाआशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यात् ॥ ॥ छ ॥ ॥ छ ॥

॥ ३२४ ॥ दीपपतनशांतिः ॥

श्रीः ॥ यजमानःआचम्यप्राणानायम्यतिथ्यादिस्मृत्वाममगृहेप्रज्वलद्दीपपतनाद्भुतसूचितसर्वारिष्टनिरसनेनआयुरारोग्यश्रि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

योभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंदीपपतनाद्भुतशांतिंकरिष्ये ॥ तत्रादौनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनंआचार्यवरणंच करिष्ये ॥ (अत्रग्रहयज्ञआचार्यवरणंकृताकृतं) ततआचार्योस्मिन्नद्भुतशांतिकर्मणिआचार्यकर्मकरिष्येइतिसंकल्प्यसर्षपवि किरणादिपंचगव्यशुद्धोदकप्रोक्षणांतेदीपपतनस्थलेघृतेनपयसाचाभ्युक्ष्यलाजैःसर्षपैश्चावकीर्यपुनःपंचगव्यशुद्धोदकाभ्यामभ्यु क्ष्याग्निप्रतिष्ठांतंकुर्यात् ॥ ततोग्नेःपूर्वतस्तंदुलपुंजेष्वष्टदलंमंडलंविरच्यतत्रपूर्वादिदलेषुइंद्रादीनावाह्यमध्येविधिवत्स्थापितकुंभो परिहैमींराजतींवावैश्रवणप्रतिमांपृथक्पंचामृतस्नापितांवस्त्रयुगसंवेष्टितां अभित्यंदेवं० इतिस्थापयित्वातस्मात्पूर्वादिदिक्षुयक्षा धिपतिं सर्वोत्पातशमनं हिरण्यपाणिं ईश्वरंच आवाह्यतंत्रेणपूजयेत् ॥ ग्रहपक्षेग्रहानावाह्यवैश्रवणपूजनं ॥ ततोग्नेःपश्चादुपवि श्यान्वाधानंकुर्यात् ॥ समित्त्रयमादायश्रद्धएहीत्यादिसामान्यप्रधानांतमुक्त्वा सग्रहपक्षेग्रहानमुकसंख्ययासमित्तिलाज्यद्रव्यैः वैश्रवणंतिलाज्याभ्यांपृथगष्टोत्तरशतसंख्यया यक्षाधिपतिं सर्वोत्पातशमनं हिरण्यपाणिं ईश्वरंचतैरेवद्रव्यैः २८ तत्तन्नाम मंत्रैर्यक्ष्येअंगहोमेवरुणंद्विरित्यादिसर्वमपिसामान्यप्रधानांतंकृत्वोक्तदेवताभ्यःक्रमेणयथोक्तद्रव्याणिजुहुयात् ॥ ततोंगहो मादिहोमशेषंसमाप्य इंद्रादिदिक्पतिबलिदानांतेवैश्रवणायसदीपबलिंदत्वाद्वारदेवताभ्यः सदीपपायसबलीन्दद्यात् ॥ ततः क्षेत्रपालबलिंदत्वापूर्णाहुतिंहुत्वापूर्णमसीतिमार्जनांतेआचार्यादीन्संपूज्यआचार्यायगांदत्वार्चितदेवताःसंपूज्यआचार्यायमंडल मूर्तिदानंकुर्यात् ऋत्विग्भ्योयथाशक्तिदक्षिणांदत्वाअग्निंसंपूज्यविभूतिंधृत्वाग्निमुपतिष्ठेत् ॥ ततःकलशोदकेनाभिषिक्तोयजमा नोब्राह्मणान्संभोज्यंआशिषोगृहीत्वायस्यस्मृत्येतिकर्मेश्वरार्पणंकृत्वासुहृद्युक्तोभुंजीत ॥ इतिदीपपतनशांतिः ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३२५ ॥ पल्लीसरठशांतिः ॥

श्रीः ॥ पल्याःसरठस्यवास्पर्शमात्रेसचैलंस्नात्वाविधिवत्पंचगव्यंप्राश्यआज्यपूर्णेकांस्यपात्रेस्वप्रतिबिंबमवलोक्यसदक्षिणंतद्ब्राह्म
णायदत्वाशांतिंकुर्यात् ॥ कर्ताआचमनाददेशकालस्मरणांतेममशरीरेपल्लीपतनसूचितसकलारिष्टपरिहारद्वाराश्रीप० सग्रहम
खांवृद्धगर्गोक्तांशांतिंकरिष्यइतिसंकल्प्य (सरठप्ररोहणेतुतत्पदोहःकार्यः) गणेशपूजनादिऋत्विग्वरणांतंकुर्यात् ॥ ततआचा
र्यःप्रादेशकरणांतेस्थंडिलात्पूर्वे महीद्यौरित्यादिविधिनाकलशस्थापनादिपूर्णपात्रनिधानांते पल्याःसरठस्यवायथाशक्तिहेमनि
र्मितप्रतिमांतत्रनिधायरक्तवस्त्रेणसंवेष्ट्यगंधादिभिःसंपूज्याग्निंग्रहांश्चप्रतिष्ठाप्यान्वादध्यात् ॥ ग्रहादिकीर्तनांते प्रधानं मृत्युंज
यंखदिरसमिद्भिः १०८ प्रजापतिंतिलैः १०८ अग्निंपृथिवींमहांतं वायुमंतरिक्षंमहांतं आदित्यंदिवंमहांतं प्रजापतिंचंद्रमसं
नक्षत्राणिदिशोमहांतं चैतादेवताःघृतमिश्रक्षीरेणैकैकयाहुत्या वरुणंद्विरित्यादिग्रहहोमांते त्र्यंबकमंत्रेणोक्तसंख्ययासमिद्धोमो
त्तरंसमस्तव्याहृतिभिस्तिलान्हुत्वा भूरग्नये० भुवोवायवे० सुवरादित्याय० भूर्भुवःसुवश्चंद्रमसे० एतैर्मंत्रैर्घृतमिश्रंक्षीरंजुहुयात् ॥
ततोंगहोमादिप्रायश्चित्तहोमांतेबलिदानपूर्णाहुतीहुत्वासंस्रावहोमादिशेषंसमाप्यस्थापितकलशोदकेनयजमानमभिषिंचेत् ॥
तत्रमंत्राः ॥ नहितेक्षत्रमितिदशर्चः ॥ ततःसमुद्रज्येष्ठइत्यादिपुण्यसूक्तैर्द्यौःशांतेत्यादिमंत्रैः पौराणमंत्रैश्चाभिषिक्तोयजमा
नोविभूतिंधृत्वादेवतोत्तरपूजांविधाय आचार्यायधेनुंवस्त्रयुगंऋत्विग्भ्योदक्षिणांचदत्वासोपस्करं विसर्जितदेवतापीठमाचार्य
हस्तेप्रतिपाद्यशक्त्याविप्रान्संभोज्य भूयसींदत्वाशिषोगृहीत्वाकर्मसमापयेत् ॥ इतिपल्लीसरठशांति ॥ ॥ छ ॥ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३२६ ॥ काकमैथुनदर्शनादिशांतयः ॥

श्रीः ॥ कर्ताआचमनादिदेशकालस्मरणांतेममकाकमैथुनदर्शनसूचितसकलारिष्टपरिहारद्वाराश्रीपरमे० सग्रहमखांगगोक्तांशां तिंकरिष्यइतिसंकल्प्य (शिरसिवायसारोहण–शिरस्युरसिवाकाकपक्षाघात–वायसकृतनखविदारण–शयानस्यकाकस्पर्श– मध्यरात्रेअनिमित्तवायसाक्रंदनसूचितेत्यादिनिमित्तांतरेषूह्यं) गणेशपूजनादिऋत्विग्वरणांतंकुर्यात् ॥ ततआचार्यः प्रादेश करणांते अरत्निमात्रेस्थंडिलेग्निंप्रतिष्ठाप्यध्यात्वातदैशान्यांमहीद्यौरित्यादिविधिनाकुंभंसंस्थाप्यपूर्णपात्रोपर्यष्टदलेयथाशक्तिसु वर्णनिर्मितप्रतिमायां यतइंद्रभयामहेततोनोअभयं० इतींद्रं परितोलोकपालांश्चावाह्यषोडशोपचारैःपूजयेत् ॥ ततस्तदुत्त रतोग्रहस्थापनादिकलशप्रार्थनांतंकृत्वान्वादध्यात् ॥ ग्रहाद्युत्कीर्तनांतेत्रप्रधानं इंद्रंपलाशसमिद्भीहिचर्वाज्यैःप्रतिद्रव्यं १००८ वा १०८ लोकपालांश्चतैरेवद्रव्यैः प्रतिद्रव्यं ८ शेषेणेत्यादिप्रणीतास्थापनांतेतूष्णींनिर्वापादिविधिनाचरुंश्रपयित्वाज्यसंस्का रादिग्रहहोमांतेप्रधानहोमंकृत्वाअंगहोमादिप्रायश्चित्तहोमांतेबलिदानोत्तरंहुतशेषाच्चरुमादाय ॥ ऐंद्रवारुणवायव्यायाम्यावै नैर्ऋताश्चये ॥ तेकाकाःप्रतिगृह्णंतुभूम्यांपिंडंसमर्पितं ॥ इतींद्रस्यपुरतोवायसेभ्योबलिंदत्वापूर्णाहुतिसंस्रावहोमादिशेषंसमा प्यस्थापितकलशोदकेनसपरिवारंयजमानंसमुद्रज्येष्ठाइत्यादिमंत्रैरभिषिंचेत् ॥ ततःकर्ताधृतवस्त्रोविभूतिंधृत्वादेवतोत्तरपूजां तेआचार्यसंपूज्यतस्मैसोपस्करामिंद्रप्रतिमांदत्वाऋत्विग्भ्योदक्षिणांदत्वाविप्रान्संभोज्यभूयसींदत्वातैःशांतिंपाठयित्वाशिषोगृ हीत्वाकर्मसमापयेत् ॥ इतिशांतिरत्नेकाकमैथुनदर्शनादिशांतयः ॥

॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३२७ ॥ षष्टितमाब्दशांतिः ॥

श्रीः ॥ कर्तापष्टितमवर्षारंभदिनेतद्वर्षांतर्गतजन्मर्क्षेवाशुभेकालेचंद्रताराबलान्वितेमंगलस्नानंविधायकृतनित्यक्रियोविप्रानामं त्र्यतेभ्योनुज्ञांप्राप्य द्विराचमनादिदेशकालनिर्देशांतेममजन्मनःसकाशात्षष्टितमवर्षप्राप्त्याभविष्यत्त्वेनसूचितानांअपमृत्युदुः स्वप्नदर्शनमातापितृमृतिभार्यापुत्रवियोगग्रहपीडाराजभयविविधरोगच्छायाविकृतिस्फुटनक्षत्रध्रुवाद्यदर्शनयक्षरक्षोभूतप्रेतपि शाचादिविविधदर्शनानामन्येषांचमहोत्पातानांअरिष्टरूपाणांसद्यःपरिहारपूर्वकंसर्वारिष्टविनाशदीर्घायुरारोग्यसर्वसंपद्भवन द्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांउग्ररथशांतिंकरिष्येइतिसंकल्प्य गणेशपूजनादिनांदीश्राद्धांतेआचार्यब्रह्माणमृ त्विजश्चवृणुयात् ॥ ततआचार्यआचमनादिप्रादेशकरणांतेग्रहस्थापनादिकलशप्रार्थनांतंकृत्वातन्नैर्ऋत्यांस्थंडिलेग्निंप्रतिष्ठाप्य ध्यात्वान्वादध्यात् ॥ ग्रहकीर्तनांते मार्कंडेयंप्रधानदेवंसमिदाज्यचरुदूर्वापायसैःप्रतिद्रव्यं १००८ वा १०८ आहुतिभिःमृत्युं जयंदूर्वातिलैःप्रतिद्रव्यं २५००।१५००।५०० यद्वातिलमिश्रदूर्वाभिरुक्तसंख्यातोद्विगुणाभिः अश्वत्थामानं, बलिं, व्यासं, हनुमंतं, बिभीषणं, कृपं, परशुरामं ७ चएतान्लाजद्रव्येण प्रत्येकं २८ वा ८ शेषेणेत्यादिसमिदाधानांतेग्रहाणामुत्तरतःमही द्यौरित्यादिविधिनाकलशंसंस्थाप्यपूर्णपात्रनिधानांते पलेनतदर्धार्धेनवासुवर्णप्रतिमायांमार्कंडेयंनाममंत्रेणावाह्यवस्त्रयुग्मेनावे ष्टयषोडशोपचारैःसंपूज्येध्माबर्हिषोःसंनहनाद्याज्यभागांतंकृत्वायजमानेनत्यागेकृतेग्रहादिहोमोत्तरं ॥ मार्कंडेयमहाभागसप्तक ल्पांतजीवन॥ आयुरारोग्यमैश्वर्यंदेहिमेमुनिपुंगवस्वाहा इतिमंत्रेणसमिदाज्यचरुदूर्वापायसान् त्र्यंबकमितिमंत्रेणदूर्वातिलान् तिलमिश्रदूर्वावाहुत्वा अश्वत्थाम्नेस्वाहा बलये० व्यासाय० हनुमते० बिभीषणाय० कृपाय० परशुरामायस्वाहेतिमंत्रैःप्रत्येकं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

२८।८ वालाजान्जुहुयात् ॥ ततःश्रीसूक्तंरुद्राध्यायंचजप्त्वायुष्यमंत्रान्जपेत् ॥ तच ॥ एषवांदेवावितिद्वौ ॥ परावतोयइति
सप्तदशर्चं सूक्तजप० ॥ आनोभद्राइतिवायुष्यसूक्तं ॥ ततःपुरुषसूक्तंजप्त्वावेदपारायणंकार्यं तदसंभवेग्निमीळइतिसूक्तज
पः ॥ ततःअंगहोमादिप्रायश्चित्तहोमांतेबलिदानंपूर्णाहुतिंच कृत्वासंस्रावहोमादिशेषंसमाप्यस्थापितकलशोदकैःसकुटुंबंबंधुव
र्गयुतंयजमानमभिषिंचेत् ॥ तत्रमंत्राः ॥ शंनइंद्राग्नीतिपंचदशर्चं ॥ सहस्रशीर्षेतिषोडशर्चं ॥ परंमृत्योइतिचतुर्दशर्चं ॥ एष
वांदेवावितिद्वौ ॥ परावतोयइतिसप्तदशर्चं ॥ स्वादिष्ठयेतिदशर्चं ॥ यज्ञाग्रतइतिषट् ततोग्रहमंत्रैः सुरास्त्वेत्यादिभिस्तच्छंयोरि
त्यनेनचाभिषिक्तोयजमानोधृतशुक्लांबरगंधमाल्योभिषेकवस्त्रमाचार्यायदत्त्वाविभूतिंधृत्वाआचार्येणआनोभद्राइत्यादिमहाशां
तिमंत्रजपपूर्वकंदेवतोत्तरपूजनेकृतेमार्कंडेयादीन्प्रार्थयेत् ॥ मार्कंडेयमहाभाग० ॥ द्रौणेयत्वंमहाभागरुद्रतेजःसमुद्भव ॥
आयुर्बलंयशोदेहिअश्वत्थामन्नमोस्तुते ॥ दैत्येंद्रकुलसंभूतयज्ञदानक्रियारत ॥ बलेत्वांशरणंयामिदीर्घमायुःप्रयच्छमे ॥
वसिष्ठकुलसंभूतवेदशास्त्रविशारद ॥ नारायणांशसंभूतवेदव्यासनमोस्तुते ॥ अंजनागर्भसंभूतकपींद्रसचिवोत्तम ॥ राम
प्रियनमस्तुभ्यंहनुमन्नक्षमांसदा ॥ बिभीषणनमस्तुभ्यंरामपादाब्जपूजक ॥ आयुरारोग्यमैश्वर्यंदेहिपौलस्त्यनंदन ॥ द्विजें
द्रभरताचार्यसर्वविद्याविशारद ॥ शरणंत्वांप्रपन्नोस्मिकृपमांरक्षसर्वदा ॥ रेणुकेयमहावीर्यकार्तवीर्यकृतांतक ॥ आयुःप्रयच्छ
मेरामजामदग्न्यनमोस्तुते ॥ ततआचार्यादीन्संपूज्यआचार्यायमार्कंडेयप्रतिमासहितंकलशंगांचदत्वाब्रह्मादिभ्योगवादिदशदा
नानिशतगुंजापरिमितंसुवर्णंचविभज्यदद्यात् ॥ अशक्तौशतसर्षपतोलितंवा ॥ गवादीनांप्रत्यक्षदानासंभवेतन्मूल्यंदेयं ॥ त
तोविसर्जितग्रहपीठदानांतेकांस्यपात्रेआज्यंविलोक्यसदक्षिणंतत्पात्रंब्राह्मणायदत्वातिलदानंचकृत्वाआशिषोगृहीत्वानववस्त्रं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

धृत्वापुरंध्रीभिर्नीराजितोदेवानभिवाद्यशतंविप्रान्संभोज्यभूयसींदत्वाकर्मसमाप्यसुहृद्युतोभुंजीत ॥ ॥ छ ॥ ॥

॥ ३२८ ॥ रोगोत्पत्तौनक्षत्रफलं ॥

श्रीः ॥ अश्विन्यांरोगोत्पत्तौएकाहंनवदिनानिवापंचविंशतिदिनानिवापीडा ॥१॥ भरण्यामेकादशैकविंशतिर्वामासंवामृत्युर्वा ॥ २ ॥ कृत्तिकायांदशनवैकविंशतिर्वा ॥ ३ ॥ रोहिण्यांदशवानववासप्तवात्रीणिवाहानि ॥ ४ ॥ मृगेपंचनववात्रिंशद्वा ॥ ५ ॥ आर्द्रायांमृत्युर्वादशाहंवामासंवा ॥ ६ ॥ पुनर्वसौसप्तनववामृत्युर्वा ॥ ७ ॥ पुष्येसप्तवामृत्युर्वा ॥ ८ ॥ आश्लेषायांमृत्युर्विंश तिस्त्रिंशद्धानववादिनानिपीडा ॥ ९ ॥ मघायांमृत्युर्वासार्धमासंवामासंवाविंशतिदिनानिवापीडा ॥ १० ॥ पूर्वाफल्गुन्यांमृ त्युर्वाब्दंमासंवापीडापंचदशवाषष्टिर्वादिनानि ॥ ११ ॥ उत्तरायांसप्तविंशतिःपंचदशसप्तवादिनानि ॥ १२ ॥ हस्तेमृत्युरष्ट वानववासप्तवापंचदशवाहानि ॥ १३ ॥ चित्रायांपक्षमष्टवादशवाएकादशवाहानि ॥ १४ ॥ स्वात्यांमृत्युर्वैकद्वित्रिचतुःपंच मासैर्वादशदिनैर्वारोगनाशः ॥ १५ ॥ विशाखायांमासंवापक्षंवाष्टदिनंविंशतिदिनंवापीडा ॥ १६ ॥ अनुराधायांदशरात्रमष्टा विंशतिरात्रंवा ॥ १७ ॥ ज्येष्ठायांमृत्युर्वापक्षंवामासंवैकविंशतिरात्रंवापीडा ॥ १८ ॥ मूलेमृत्युःपक्षंनवरात्रंविंशतिरात्रंवा पीडा ॥ १९ ॥ पूर्वाषाढायांमृत्युर्वाद्वित्रिषडादिमासैर्विंशतिदिनैःपक्षेणवारोगनाशः ॥ २० ॥ उत्तराषाढायांसार्धमासंविंशति रात्रंवामासंवा ॥ २१ ॥ श्रवणेपंचविंशतिर्दशवाएकादशवाषष्टिर्वाहानि ॥ २२ ॥ धनिष्ठायांदशरात्रंपक्षंमासंत्रयोदशरात्रंवा ॥ २३ ॥ शततारकायांद्वादशैकादशवा ॥ २४ ॥ पूर्वाभाद्रायांमृत्युर्वाद्वित्र्यादिमासंवादशरात्रंवा ॥ २५ ॥ उत्तराभाद्रायां सार्धमासंपक्षंसप्ताहंदशाहंवा ॥ २६ ॥ रेवत्यांज्वराद्युत्पत्तौदशाहमष्टाविंशतिरात्रंवापीडा ॥ २७ ॥ जन्मनक्षत्रेजन्मराशौ

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अष्टमचंद्रेरोगोत्पत्तौमृत्युः ॥ २८ ॥ अर्कादिवारेक्रमेणमघाद्वादश्योविशाखैकादश्या पंचम्यार्द्रे तृतीयोत्तराषाढे शततारा ष
ष्ठ्यौ अष्टम्यश्विन्यौ पूर्वाषाढानवम्यौ चेतित्रयाणांयोगेमृत्युः एवमर्कादौअनुराधाभरण्यौआर्द्रोत्तराषाढेमघाशततारेविशा
खाश्विन्यौज्येष्ठामृगौश्रवणाश्लेषेपूर्वाभाद्रपदाहस्तौचेन्मृत्युयोगः अत्रोक्तास्तिथिवारनक्षत्रशांतयोविस्तृताःकार्याः येषुनक्षत्रेषु
मरणमुक्तंतत्रशांतिरावश्यकीअन्यत्रकृताकृता ॥ इतिरोगोत्पत्तौनक्षत्रफलं ॥ ॥ छ ॥ ॥ छ ॥

॥ ३२९ ॥ सर्वनक्षत्रसाधारणःशांतिप्रयोगः ॥

श्रीः ॥ देशकालौसंकीर्त्यममोत्पन्नव्याधेर्जीवच्छरीराविरोधेनसमूलनाशार्थममुकनक्षत्रशांतिंकरिष्यइतिसंकल्प्य गणेशपूजादि
आचार्यंवृत्वाकुंभोपरिपूर्णपात्रेद्वादशदलेनक्षत्रदेवताप्रतिमांसौवर्णींसंपूज्य द्वादशदलेषुसंकर्षणादिद्वादशमूर्तींर्द्वादशादित्या
न्वासंपूज्यदूर्वासमित्तिलक्षीराज्यैर्गायत्र्यातत्तद्देवतायै अष्टोत्तरशतंहुत्वामरणादिपीडाधिक्योक्तौसहस्रंहुत्वादध्योदनबलिंदत्वा
चार्यायगांप्रतिमांचदद्यादितिसंक्षेपः ॥ शांतिमयूखादौनक्षत्रभेदेनहविर्मंत्रबलिधूपादिभेदस्तिथिवारदेवतामंत्रादिभेदविस्ता
रोद्रष्टव्यः ॥ कर्मविपाके जातवेदसइत्यृचोयुतंलक्षंवाजपोरुद्रेनमकानुवाकैःसहस्रकलशस्नानंवाविष्णौसहस्रावृत्तपुरुषसूक्तेन
सहस्रघटस्नानंवाज्वरनाशकं ॥ यद्वाश्रीभागवतस्थज्वरस्तोत्रजपः ॥ इतिसर्वनक्षत्रसाधारणःशांतिप्रयोगः ॥ ॥ छ ॥

॥ ३३० ॥ द्वादशाब्दोत्तरमवलोकनविधिः ॥

श्रीः ॥ उभौस्नात्वादेशकालौसंकीर्त्य ममअमुकस्यावलोकनेविदेशगमनेनद्वादशवत्सरात्ययसूचितसर्वारिष्टपरिहारद्वाराश्रीप०

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यथाविध्यवलोकनंकरिष्यइतिसंकल्प्य गणेशपूजांतेशिवालयेतीर्थेवागत्वादीपौप्रज्वाल्यपटांतर्हितौभूत्वाशिवस्योभयतउपवि
श्योभौशिवंसंपूज्यब्राह्मणैःसहशांतिमंत्रपाठांते रत्नसहितेजलपूर्णेकांस्यपात्रेन्योन्यमवलोक्यशिवंनमेतां ॥ ततोब्राह्मणाभ्यांस
दक्षिणेकांस्यपात्रेदत्वान्येभ्यश्चयथाशक्तिदक्षिणांदत्वापुनरुभौशिवंद्विजान्सूर्यंचनत्वा स्वगृहमागत्यपृथग्घोमंकुर्यातां ॥ सचे
त्थं ॥ आचमनादिदेशकालस्मरणांतेमयाकृतामुकावलोकनविध्यंगभूतंहोमंकरिष्यइतिसंकल्प्यस्थंडिलेपावकसंज्ञमग्निंप्रतिष्ठाप्य
ध्यात्वान्वादध्यात् ॥ सामान्यप्रधानोत्कीर्तनांतेअग्निंवायुंसूर्यंप्रजापतिंचतिलैःप्रत्येकं २७ अंगहोमेवरुणंद्विरित्याद्याज्यभाग
होमांतव्यस्तसमस्तव्याहृतिभिस्तिलान्हुत्वाहोमशेषंसमाप्यशक्त्याविप्रान्संभोज्यकर्मसमाप्यबांधवैःसहभुंजीत ॥ इतिशांतिः ॥

॥ ३३१ ॥ जीवतोमृतिवार्ताश्रवणेविधानम् ॥

" श्रीः ॥ वि० मा० गर्गसंहितायां ॥ दुष्टस्थानेयदापुंसोभवेत्कूरोनभश्चरः ॥ प्रकोपोवादैवतस्यतदाविघ्नोभिजायते ॥ मृतए
वेतिवार्तास्यात्सर्वदेशेदुरत्यया ॥ विधानंतत्रकर्तव्यंनरेणहितमिच्छता ॥ आहूयब्राह्मणान्भक्त्याचतुर्वेदपरायणान् ॥ स्नात्वा
तैलेनशुद्धेनपूजयेत्कुलदेवतां ॥ पितॄन्संतर्प्यविधिवत्स्वस्तिवाच्याद्विजोत्तमाः॥ जुहुयाद्विधिवद्धुत्वाविंद्रप्रीत्यैसमाहितः॥स्वा
दिष्टयेतिमंत्रेणजुहुयादयुतंसुधीः ॥ पायसंसर्पिषायुक्तंप्रधानंद्रव्यमुत्तमं ॥ मूर्तिमिंद्रस्यहेम्नस्तुपीठेदेवतरोःशुभे ॥ पूजितांवि
धिवद्भक्त्याआचार्यायनिवेदयेत् ॥ हुत्वास्विष्टकृतंविद्वान्गांचदद्यात्पयस्विनीं ॥ तैलंदद्याद्विजातिभ्योविघ्ननाशायभूरिशः ॥
ब्राह्मणान्भोजयेत्पश्चाच्छतंवाशक्त्यपेक्षया ॥ आत्मनस्त्वायसींमूर्तिंपलैस्तुदशभिःकृतां ॥ तैलाभ्यक्तांततोदद्याद्ब्राह्मणायसद
क्षिणां ॥ तत्रमंत्रौ ॥ सहस्राक्षमहाबाहोसर्वविघ्नविनाशन ॥ अनेनमूर्तिदानेनसुप्रीतोभवमेसदा ॥ अपमृत्युविनाशायमूर्तिमे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तांददाम्यहं ॥ तुष्टेनमृत्युनानेनपातकंमेव्यपोहतु ॥ ततःपुण्यस्त्रियोवृद्धाविप्राश्चगुरवस्तथा ॥ नीराजनंतुदुर्वार्ताहरणायपुनः पुनः ॥ ततोभिषेचनंकुर्युर्दुर्वार्तापीडितस्यतु ॥ वृद्धान्प्रणमतस्तस्यदद्युराशीर्वचोद्विजाः ॥ शतंजीवेत्यादयआशीर्मंत्राः ॥ ग्रहं तुपूजयेद्दुष्टंप्रणमेत्कुलदेवतां ॥ एवंकृतेविधानेचविघ्नःकोपिनजायते'' ॥ योजीवन्नेवस्वस्यमृतवार्तांश्रृणुयात्सआहिताग्निश्चेद ग्नयेसुरभिमतेवाष्टाकपालेनेष्टिंकुर्यात् ॥ तत्रममस्वमृतिवार्ताश्रवणसूचितसकलानिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं सौरभि मतेष्ट्यायक्ष्यइतिसंकल्पः ॥ गृह्याग्निमांस्तुलौकिकेग्नौस्थालीपाकंकुर्यात् ॥ इतिजीवतोमृतिवार्ताश्रवणेविधानम् ॥ ॥ छ ॥

॥ ३३२ ॥ कृतौर्ध्वदेहिकस्यसंग्रहविधिः ॥

श्रीः ॥ यस्यमृतिवार्ताश्रवणेनौर्ध्वदेहिकमपिकृतंतस्यपुनरागमनेसंग्रहप्रकारउच्यते ॥ संग्राह्यापेक्षयावयोधिकःपित्रादिर्देशका लौस्मृत्वाअमुकगोत्रस्यामुकशर्मणःपैतृमेधिककरणोत्तरंपुनरागतस्यसंग्रहसिद्धिद्वाराश्रीपरमे० संग्रहविधिंकरिष्यइतिसंकल्प्य घृतकुंडेमज्जयित्वासुलग्नेउत्थाप्यपुनर्देशकालौस्मृत्वाअमुकगोत्रस्यामुक० जातकर्मादिसंस्कारान्करिष्येइतिसंकल्प्यगणेशपूजा दिनांदीश्राद्धांतेजातकर्मादिचौलांतान्संस्कारांस्तल्लोपप्रायश्चित्तंवाकृत्वापुनरुपनयनंविधाय त्रिरात्रंव्रतचर्याकारयित्वाबह्वृचश्चे न्मेधाजननमपिकुर्यात् ॥ संस्कार्यस्तुवेदव्रतलोपप्रायश्चित्तंसमावर्तनंचविधायपूर्वपद्व्यासहविवाहहोमंगृहप्रवेशहोमंचकुर्यात्॥ अयंविधिरनाहिताग्नेः ॥ आहिताग्नेस्तुश्रौताग्न्याधानाद्यधिकमस्ति ॥ स्त्रीणांतुप्रथमस्थालीपाकोब्राह्मणद्वाराकार्यः ॥ उपनय नादिसमावर्तनांतंनास्ति ॥ सुवासिनीचेत्पतिनासहविवाहहोमादीतिविशेषः ॥ शूद्राणामप्येवं ॥ एवंकृतेकर्माधिकारः ॥ इति ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इत्थंक्रमेणविविधाअनवाःप्रयोगाःसंयोजितामुखजकर्मसमुच्चयेस्मिन् ॥ सर्वांतरस्थजगदीशकृपाकटाक्षान्यूनातिरिक्तमखि
लंपरिपूर्णमस्तु ॥ जगदीशप्रेरणयाकियतांकृतिनामपि ॥ कृत्स्नेसमुच्चयेतार्तीयीकोभागोभृतोऽभवत् ॥ ॥ छ ॥

॥ समाप्तमिदंतृतीयंव्रतोद्यापनादिमिश्रप्रकरणम् ॥ ३ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

और्ध्वदेहिकाद्यंतिमप्रकरणम्।

॥ ३३३ ॥ हिरण्यकेशीअंत्येष्टिपद्धतिः ॥

श्रीः॥आदौसर्वप्रायश्चित्तं॥ इंद्रियचापल्यरहितःब्राह्मणानामनुज्ञामादायस्वयमुपोष्यअन्नत्यागेननियतात्माप्रायश्चित्तं कुर्यात्॥ तथाचस्मृत्युक्तमपिकृच्छ्रचांद्रायणप्राजापत्यादिकंयावदात्मशुद्धिंचमन्यतेतावद्यथाशक्तिप्रत्याम्नायेनकुर्यात् ॥ तथाचज्ञाता ज्ञातसर्वपातकोपपातकनिबर्हणार्थंसर्वप्रायश्चित्तंषडब्दंत्र्यब्दंसार्धाब्दंवाकुर्यात् तत्रप्रत्याम्नायकल्पंनशक्त्यनुसारेण ॥ सत्यां शक्तौहीनप्रत्याम्नायकल्पनंनकर्तव्यं ॥ चांद्रायणप्रत्याम्नायस्तुप्राजापत्यत्रयं ॥ तत्रप्राजापत्यप्रत्याम्नायस्तुअयुतंगायत्रीजपः, द्वादशब्राह्मणभोजनं, गोदानं, तदशक्तौगोनिष्क्रयद्रव्यदानं, गायत्र्याव्याहृतीभिःप्रणवेनवासहस्रंतिलहोमः, तीर्थयात्रोद्देशे नपद्म्यांयोजनमात्रगमनं, शुष्ककेशस्यद्वादशस्नानानि, केषांचिन्मतेतुरुद्रैकादशिनी ॥ त्रिंशत्प्राजापत्यात्मकंएकंअब्दं ॥ ॥

---

१ सुवर्णरूप्यनिष्कतदर्धतदर्धानांगोमूल्यानांशक्त्यादानमुक्तंतत्रनिष्कश्चलोकशास्त्रयोरेकवाक्यतायांमाषाः ४० तदर्धं २० तदर्धं १० वामुख्यं सुवर्णं तदशक्तौरजतंग्राह्यं ॥ त्रिंशत् ३० प्राजापत्यात्मकमेकमब्दं ॥ कचित्ताम्रकार्षापणोपिप्राजापत्यप्रत्याम्नायत्वेननिर्दिष्टोस्ति ॥

२ गोरेकाहोदवासोप्ययुतपरिमितोवेदमातुर्जपोवाधान्याज्येध्मैस्तिलैर्वादशशतहवनंयोजनंतीर्थयात्रा ॥ स्नानानिद्वादशाथस्वशनवितरणंतावतां ब्राह्मणानांप्रत्याम्नायास्तुकृच्छ्रेअसुयुगलशतंरुद्रिकायाजपोपि ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३३४ ॥ सर्वप्रायश्चित्तप्रयोगः ॥

शुभदिवसेपर्षदंपरिकल्प्यकृतस्नानःक्लिन्नवासाआचम्यपवित्रपाणिःप्राणानायम्यहस्तेकुशान्गोवृषनिष्क्रयंगृहीत्वात्रिवारंपर्षदं प्रदक्षिणीकृत्य समस्तसंपदितिश्लोकचतुष्टयंपठन्साष्टांगंप्रणमेत् ॥ पर्षल्लक्षणमाहयाज्ञवल्क्यः ॥ चत्वारोवेदधर्मज्ञाःपर्षत्त्रै विद्यमेववा ॥ साब्रूतेयंसधर्मःस्यादेकोवाध्यात्मवित्तमः ॥ इति ॥ ततःसभ्यैःकिंतेकार्यमितिपृष्टेउत्थाय ॥ आचम्यप्राणानायम्य तिथ्यादिसंकीर्त्यकरिष्यमाणसर्वप्रायश्चित्तांगत्वेन इदंयथाशक्तिगोवृषनिष्क्रयद्रव्यंसभ्येभ्योदातुमहमुत्सृजेइत्युत्सृज्यगोवृषनि ष्क्रयद्रव्यंपर्षदग्रेनिधाय करद्वयंसंपुटीकृत्यतिष्ठन्वदेत् ॥ अमुकगोत्रोत्पन्नस्यामुकशर्मणःममजन्मप्रभृत्यद्ययावत्ज्ञानाज्ञानका माकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपा तकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानांमध्येसंभावितपातकानांमहापातकव्यतिरिक्तानांनिरा सार्थंअस्मिन्कालेशरीरशुद्ध्यर्थंचानुग्रहंकृत्वाप्रायश्चित्तमुपदिशंतुभवंतःइति ॥ ततस्तान्प्रार्थयेत् ॥ सर्वेधर्मविवेक्तारोगोप्तारः सकलाद्विजाः ॥ ममदेहस्यसंशुद्धिंकुर्वंतुद्विजसत्तमाः ॥ मयाकृतंमहाघोरंज्ञातमज्ञातकिल्बिषं ॥ प्रसादःक्रियतांमह्यंशुभा नुज्ञांप्रयच्छथ ॥ पूज्यैःकृतःपवित्रोहंभवेयंद्विजसत्तमैः ॥ इतिश्लोकान्पठित्वामामनुगृह्णंतुभवंतःइतिपर्षदंसाष्टांगंप्रणमेत् ॥ तत

---

१ किंतेकार्यंवदास्माकंकिंवामृगयसेद्विज ॥ तत्त्वतोब्रूहिसकलंसत्यंहिगतिरात्मनः ॥ अस्माकंब्राह्मणानांतुसत्यमेवपरंबलं ॥ यदिचेद्वक्ष्यसेसत्यंनि यतंप्राप्स्यसेशुभं ॥ यद्यागतोस्यसत्वेनतत्त्वंशुद्ध्यसिकर्हिचित् ॥ एवंतैःसमनुज्ञाप्यसर्वंब्रूयादशेषतः ॥ पापीविख्यापयेत्पापंदत्वाधेनुंतथावृषं ॥

२ तथाअग्न्याधानाधिकारदिवसप्रभृतिनिश्चिताधानदिनपर्यंतं[illegible]दोषनिबर्हणार्थं(मरणकालेशुद्ध्यर्थं)इत्यादियथानिमित्तमूहःकार्यः

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तेतमुत्सार्यतस्यशरीरद्रव्यादिशक्तिं उत्तममध्यमादिपक्षांश्चविचार्य अस्मिन्पक्षेअयंशक्तइतिनिश्चित्यतैःतथेत्युक्ते उत्थाय (म
माद्यकरिष्यमाणसर्वप्रायश्चित्तांगत्वेनसरस्वतीपूजनंअनुवादकपूजनंचकरिष्यइतिसंकल्प्य प्रणोदेवीसरस्वतीति चंदनपुष्पा
दिभिःपुस्तकपूजांविधायनिबंधपूजांगत्वेनकिंचिद्रव्यंनिबंधाग्रेस्थापयित्वा॥ सभ्यपूजनंकृत्वा अनुवादकपूजनं ॥ महाविष्णुस्व
रूपिणेअनुवादकायब्राह्मणायेदमासनंपाद्यमर्घ्यंगंधाद्युपचारैःपूजांकृत्वापापानुसारेणभृतिरूपांदक्षिणांतस्मैदत्वाकृतांजलिपुट
स्तिष्ठेत् ॥ ततःसभ्यास्तस्यपापानुरोधेनयथाशास्त्रंप्रायश्चित्तंसर्वसभ्यसंमतंअमुकप्राजापत्यात्मकंनिश्चित्यानुवादकंश्रावयेयुः ॥
ततोनुवादकः प्रायश्चित्तिनःसभ्योपदिष्टंप्रायश्चित्तमुपदिशति ॥ अमुकगोत्रोत्पन्नस्यामुकशर्मणःतवजन्मप्रभृतिअद्ययाव
त्ज्ञानाज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपात
कातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानांमध्येसंभावितपातकानांम
हापातकव्यतिरिक्तानांपातकानांक्षयोनेनसभ्यैरुपदिष्टेनसर्वप्रायश्चित्तेनअमुकप्राजापत्यप्रत्याम्नायात्मकेनप्राच्योदीच्यांगसहि
तेनाचीर्णेनतवशुद्धिर्भविष्यति तेनत्वंकृतार्थोभविष्यसि इत्युपदिशेत् ॥ कर्ताततोनिवेदितंप्रायश्चित्तं ॐ भवदनुग्रहःइत्यंगी
कुर्यात् ॥ स्त्रियाचेत्तथेत्यंगीकारः ॥ एवंत्रिरुपदिशेत् ॥ त्रिरंगीकुर्यात् ॥ ततःपर्षदंप्रणिपत्यविसर्जयेत् ॥ तस्मिन्दिनेउपवा
सःकार्यः ॥ ततःकस्यांचिद्रिक्तायांतिथौकृतमाध्याह्निकःदंतधावनकाष्ठंमृद्दूर्वाभस्मपंचगव्यद्रव्यंकुशान्गांआज्यंसमिधःवाससी
पलाशपर्णानिपालाशादिपात्रंविष्णुश्राद्धोपस्करद्रव्याणिहिरण्यंगंधाक्षतपुष्पादिपूजासामग्रींशालिग्रामंतुलसीत्येतान्प्राच्यांगसं
भारान्संभृत्यसायाह्नेग्रामाद्बहिःगंगादितीर्थसमीपंगत्वाशुचिर्भूत्वा ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअमुकगोत्रोत्प

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

न्नस्यामुकशर्मणःममजन्मप्रभृत्यद्ययावत्ज्ञाताज्ञातकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभु
क्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातका
नांनिरासेनअस्मिन्कालेशरीरशुद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं अमुकप्राजापत्यात्मकप्रायश्चित्तंअमुकप्रत्याम्नायेनप्राच्योदीच्यांग
सहितंयथाशक्तिआचरिष्ये॥ इतिसंकल्प्य॥ यानिकानिचपापानिब्रह्महत्यासमानिच ॥ केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपा
म्यहं ॥ इतिशिखाकक्षोपस्थवर्जंनखरोमाणिवापयित्वाशुद्ध्यर्थंस्नात्वाद्वादशांगुलकाष्ठेनदंतान्शोधयेत्॥ वनस्पतिग्रहणमंत्रः॥
आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इतिकाष्ठमादाय ॥ मुखदुर्गंधिनाशायदंतानां
चविशुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं ॥ इतिदंतान्संशोध्यद्वादशगंडूषान्कृत्वाशुद्ध्यर्थंस्नानंकृत्वादशविधस्नाना
निकुर्यात् ॥ देशकालावुत्कीर्त्यशरीरशुद्ध्यर्थंदशविधस्नानानिकरिष्ये ॥ तत्रादौभस्मस्नानं॥ भस्मआदाय ईशानायनमइतिशि
रसि ॥ तत्पुरुषायनमइतिमुखे ॥ अघोरायनमइतिहृदये ॥ वामदेवायनमइतिगुह्ये ॥ सद्योजातायनमइतिपादयोः ॥ प्रणवे
नसर्वांगे ॥ अग्निरितिभस्म ॥ वायुरितिभस्म ॥ जलमितिभस्म ॥ स्थलमितिभस्म ॥ व्योमेतिभस्म ॥ सर्वंह्वाइदंभस्म ॥
मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ सर्वांगेभ
स्मविलिप्य ॥ आपोहिष्ठामयोभुवः० चनः ॥ इतिजलस्नानं॥ आचम्य ॥ अथगोमयस्नानं ॥ ॐ तत्सवितुर्वरेण्यंभर्गो० यात्॥ ॥३७६॥
गंधद्वारांइतिगोमयमादाय ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशो
कांश्चनुदगोमयसर्वदा ॥ इतिशिरःप्रभृत्यंगानिविलिप्यस्नात्वाआचम्य ॥ अथमृत्तिकास्नानं ॥ ॐ अश्वक्रांतेरथक्रांतेविष्णु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

क्रांतेवसुंधरा ॥ शिरसाधारयिष्यामिरक्षस्वमांपदेपदे ॥ भूमिमभिमंत्र्य ॥ भूमिर्धेनुर्धरणीलोकधारिणी ॥ उद्धृतासिवराहेण
कृष्णेनशतबाहुना ॥ लोष्टमादाय ॥ सहस्रपरमादेवीशतमूलाशतांकुरा ॥ सर्वंमेहरतुमेपापंदूर्वेदुःस्वप्ननाशिनी ॥ इतिदूर्वा
मभिमंत्र्य ॥ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ दूर्वामादाय ॥ याशतेनप्रतनोषिस
हस्रेणविरोहसि ॥ तस्यास्तेदेवीष्टकेविधेमहविषावयं ॥ दूर्वामृदिप्रतिष्ठाप्य ॥ मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं ॥ मृत्तिके
ब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता ॥ मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं ॥ मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णुदमृत्तिके ॥ तयाहत
तेनपापेनगच्छामिपरमांगतिं ॥ मृदमभिमंत्र्य ॥ यतइंद्रभयामहेततोनोअभयंकृधि ॥ मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधो
जहि ॥ पूर्वेकिंचिल्लोष्टमुत्सृजति ॥ स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः ॥ दक्षिणे ॥
स्वस्तिनइंद्रोवृद्धःश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ पश्चिमे ॥ आपांतमन्यु
स्तृपलप्रभर्माधुनिःशिमीवाँछरुमाँऋजीषी ॥ सोमोविश्वान्यतसावनानिनार्वागिंद्रंप्रतिमानानिदेभुः ॥ उत्तरे ॥ ब्रह्मजज्ञानं
प्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ऊर्ध्वे ॥ स्योनापृथिविभवा
नृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ भूमौ ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वये
श्रियं ॥ आदित्यायदर्शयित्वा ॥ श्रीर्मेभजतु ॥ ललाटमालिप्य ॥ अलक्ष्मीर्मेनश्यतु ॥ प्रदक्षिणंशिरोविलिप्य ॥ विष्णुमुखा
वैदेवाश्छंदोभिरिमाल्लोकाननपजय्यमभ्यजयन् ॥ मुखे ॥ ओजोग्रीवाभिर्निर्ऋतिमस्थभिः ॥ ग्रीवायां ॥ महाँइंद्रोवज्रबा
हुःषोडशीशर्मयच्छतु ॥ स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वेष्टि ॥ बाह्वोः ॥ सोमानंस्वरणंकृणुहिब्रह्मणस्पते ॥ कक्षी

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वैतंयऔशिजं ॥ कक्ष्योः ॥ शरीरंयज्ञशमलंकुसीदंतास्मिन्त्सीदतुयोस्मान्द्वेष्टि ॥ शरीरं ॥ नाभिर्मेचित्तंविज्ञानं ॥ पायुर्मेपचिति भसत् ॥ नाभौ ॥ आनंदनंदावांडौमे ॥ भगःसौभाग्यंपसः ॥ आंडौ ॥ ऊरुवोरोजः ॥ अरिष्टाविश्वान्यंगानितनूः ॥ ऊर्वोः ॥ जंघाभ्यांपद्भ्यांधर्मोस्मि ॥ विशिराजाप्रतिष्ठितः ॥ जंघयोः ॥ चरणंपवित्रंवितंतंपुराणंयेनपूतस्तरतिदुष्कृतानि ॥ तेनपवित्रेण शुद्धेनपूताः ॥ अतिपाप्मानमरातिंतरेम ॥ चरणौविलिप्य ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपाꣳसुरे ॥ त्रीणि पदाविचक्रमेविष्णुर्गोपाअदाभ्यः ॥ ततोधर्माणिधारयन् ॥ द्वाभ्यामधस्तलपादौ ॥ सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्र हन्छूरविद्वान् ॥ जहिशत्रूꣳरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥ दूर्वासहितंमूर्च्छेषंशिरसिनिधाय ॥ सुमित्रानआपओ षधयःसंतु ॥ इत्यद्भिरात्मानमासिच्य ॥ उदकमादायतांदिशंक्षिपंति ॥ दुर्मित्रास्तस्मैभूयासुः ॥ प्रथमं ॥ योस्मान्द्वेष्टि ॥ द्वितीयं ॥ यंचवयंद्विष्मः ॥ तृतीयंनिक्षिप्य ॥ ततःस्नात्वाचम्य ॥ इतिमृत्तिकास्नानं ॥ ॥ अथगोमूत्रस्नानं ॥ ॐ तत्सवितुर्व रेण्यं० दयात् ॥ शिरःप्रभृतिगोमूत्रमालिंपति ॥ स्नात्वा ॥ ततोगोमयस्नानं ॥ गंधद्वारांदुराधर्षां० श्रियं ॥ सर्वांगेगोमय मालिप्य ॥ स्नात्वा ॥ अथपयःस्नानं ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्यसंगथे ॥ सर्वांगेदुग्धमालिप्य ॥ स्नात्वा ॥ अथदधिस्नानं ॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूꣳषितारिषत् ॥ सर्वांगे दध्यालिप्य ॥ स्नात्वा ॥ अथघृतस्नानं ॥ शुक्रमसिज्योतिरसितेजोसि ॥ सर्वांगेघृतमालिप्य ॥ स्नात्वा ॥ अथकुशोदकस्नानं ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां ॥ कुशमिश्रोदकेनसर्वांगमालिप्य ॥ स्नात्वाचम्य ॥ अथवारुणस्नानं ॥ जलसमीपंगत्वा ॥ ॐ हिरण्यशृंगंवरुणंप्रपद्येतीर्थमेदेहियाचितः ॥ [illegible] ॥ यन्मेमनसा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाचाकर्मणावादुष्कृतंकृतं ॥ तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः ॥ नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवा
रुण्यैनमोद्व्यः ॥ यदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतात् ॥ अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्रहात् ॥ तन्नोवरुणोराजापा
णिनाह्यवमर्शतु ॥ सोहमपापोविरजोनिर्मुक्तोमुक्तकिल्बिषः ॥ नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां ॥ यश्चाप्सुवरुणःसपुनात्वघ
मर्षणः ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ सागरस्यतुनिश्वासोदंडहस्तोसुरां
तकः ॥ जगत्स्रष्टाजगन्मर्दीनमामित्वांसुरेश्वर ॥ इमंमंत्रंसमुच्चार्यतीर्थेस्नानंसमाचरेत् ॥ अन्यथातत्फलस्यार्धंतीर्थेशोहरति
ध्रुवं ॥ ततःनाभिमात्रजलेगत्वा ॥ इममेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्णिया ॥ असिक्न्यामरुद्वृधेवितस्तयार्जी
कीयेशृणुह्यासुषोमया ॥ इतिपाणिनोदकमावर्त्य ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्रिरजायततःसमुद्रोअ
र्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिमिद्यद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्प
यत् ॥ दिवंचपृथिवींचांतरिक्षमथोसुवः ॥ इतिन्यावृतातृचेनाघमर्षणेनत्रीन्प्राणायामान्कृत्वा ॥ सपवित्रैःपाणिभिःआपोहि
ष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइतिचैतेनानुवाकेनप्रत्यृचंमार्जयित्वा ॥ स्ना
त्वा (स्त्रीशूद्राणाममंत्रकस्नानानि) स्नानांगतर्पणंकुर्यात् ॥ ब्रह्मादयोयेदेवाः ॥ तान्देवाꣳस्तर्पयामि ॥ भूर्देवाꣳस्तर्पयामि ॥
भुवोदेवाꣳस्तर्पयामि ॥ सुवर्देवाꣳस्तर्पयामि ॥ भूर्भुवःसुवर्देवाꣳस्तर्पयामि ॥ ततोनिवीति ॥ विश्वामित्रादयोयऋषयः ॥
तानृषीꣳस्तर्पयामि ॥ भूर्ऋषीꣳस्तर्पयामि ॥ भुवर्ऋषीꣳस्तर्पयामि ॥ सुवर्ऋषीꣳस्तर्पयामि ॥ भूर्भुवःसुवर्ऋषीꣳस्तर्पयामि ॥ प्राची
नावीती ॥ वैशंपायनादयोयेपितरः ॥ तान्पितॄꣳस्तर्पयामि ॥ भूःपितॄꣳस्तर्पयामि ॥ भुवःपितॄꣳस्तर्पयामि ॥ सुवःपितॄꣳस्तर्प

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

यामि ॥ भूर्भुवःसुवःपितॄंस्तर्पयामि ॥ यज्ञोपवीती ॥ यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्प
याम्यहं ॥ इतिजलाद्बहिर्भूमावुदकंनिनयति ॥ उत्तीर्याहतेवाससीपरिधाय ॥ शुचींवोहव्यामरुतःशुचींनां ॥ शुचिꣳहिनोम्य
ध्वरꣳशुचिभ्यः ॥ ऋतेनसत्यमृतसापआयन् ॥ शुचिजन्मानःशुचयःपावकाः ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः ॥
शुचींरोचतआहुतः ॥ उदग्नेशुचयस्तवशुक्राभ्राजंतईरते ॥ तवज्योतींष्यर्चयः ॥ इतिवाससीअद्भिःप्रोक्ष्य ॥ देवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददे ॥ इतिवाससीआदाय ॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतं
जीवेमशरदःशतंनंदामशरदःशतंमोदामशरदःशतंभवामशरदःशतꣳशृणवामशरदःशतंप्रब्रवामशरदःशतमजीतास्यामशर
दःशतंज्योक्चसूर्यंदृशे ॥ इत्यादित्यायदर्शयित्वा ॥ आवहंतीवितन्वाना ॥ कुर्वाणाचीरमात्मनः ॥ वासांसिममगावश्च ॥
अन्नपानेचसर्वदा ॥ ततोमेश्रियमावह ॥ इतिवासःपरिधाय ॥ द्विराचम्यभस्मधारणंकृत्वा शुचिःपूतोभवतीतिविज्ञायते ॥
इतिदशविधस्नानानि ॥ ॥ अथविष्णुश्राद्धं ॥ गोमयेनोपलिप्तायांभूमौप्राङ्मुखउपविश्यदर्भासनोदर्भपाणिः आचम्यप्राणा
नायम्यकरिष्यमाणसर्वप्रायश्चित्तप्राच्यांगविहितंविष्णुश्राद्धंकरिष्ये इतिसंकल्प्य ॥ तत्रपंचोपचारैःषोडशोपचारैर्वामहाविष्णुं
संपूज्य ॥ चतुरोब्राह्मणानाहूयप्राङ्मुखानुपवेश्य ॥ भवद्भिः अस्मिन्विष्णुश्राद्धेक्षणःक्रियतां ॥ ॐ तथेतिप्रतिवचनं ॥ एवंप्र
तिब्राह्मणंक्षणंदत्वा ॥ विष्णुश्राद्धेब्राह्मणायेदमासनं इतिसर्वेषां ॥ विष्णुश्राद्धेब्राह्मणायेदंपाद्यं विष्णुश्राद्धेब्राह्मणायेदंअ
र्घ्यस्वाहानमः विष्णुश्राद्धेब्राह्मणायएषगंधः पूजार्थेतुलसीपत्रं एषधूपः एषदीपः पवित्रार्थेइमौकुशौ फलार्थेपूगफलं अलंकारा

१ अत्रतदंगंश्रीमहाविष्णुपूजनंकरिष्यइतिविष्णोर्नुकमित्यनेनश्रीमहाविष्णवेइतिवापूजनाचारः ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्थंकिंचिद्धिरण्यंआच्छादनार्थंतुलसीपत्रमाच्छादनं ॥ युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ उन्नयंतिस्वाधियोमनसादेवयंतः ॥ विष्णुरूपद्विजेभ्यःएतेआसनाद्यत्रगंधपुष्पधूपदीपाच्छादनांताःपंचोपचाराःसर्वेपरिपूर्णाभवंतुइतिसंप्रार्थ्य ॥ ततोब्राह्मणाग्रेआमान्नानिप्रतिष्ठाप्य प्रोक्ष्यतूष्णींपरिषिच्यब्राह्मणहस्तमादाय इदंआमंयथासोपस्करं निष्क्रयद्रव्यंवा परिविष्टंश्रीमहाविष्णुप्रीत्यर्थंअस्यब्राह्मणस्यआतृप्तेःस्वाहानमः॥ एवंप्रतिब्राह्मणंआमंनिवेद्य ॥ ततःअंजलिनोदकमादायतिष्ठन्तसन् ॥ एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः ॥ अनेनविष्णुश्राद्धेआमसमर्पणेनभगवान्सकलपापापहमहाविष्णुःप्रीयतांइतिजलमुत्सिंचति ॥ ततःअस्यश्राद्धस्यप्रतिष्ठाफलसिध्यर्थंब्राह्मणेभ्योदक्षिणाप्रदानंकरिष्येइतिसंकल्प्य दक्षिणांदत्वाकर्मसाद्गुण्यायविष्णुंस्मरेत् ॥ अनेनविष्णुश्राद्धेनपापापहमहाविष्णुःप्रीयतांनमम॥ इतिविष्णुश्राद्धं ॥ अथगोदानं ॥ ब्राह्मणंगांचउक्तविधिनासंपूज्य ॥ गोपुच्छंब्राह्मणहस्तेदत्वा ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच॥ इतिमंत्रमुच्चार्य ॥ अमुकगोत्रोत्पन्नायअमुकशर्मणेब्राह्मणायइमांगांरुद्रदैवत्यांपापापहमहाविष्णुप्रीत्यर्थंसर्वप्रायश्चित्तपूर्वांगत्वेनतुभ्यमहंसंप्रददेनममेतिवदेत् ॥ ततोब्राह्मणः ॥ देवस्यत्वास० प्रतिगृह्णामीतिप्रतिग्रहः॥ कृतगोदानसांगतासिद्ध्यर्थंकिंचिद्द्रव्यंदक्षिणात्वेनदद्यात् ॥ अथवागोनिष्क्रयद्रव्यंवा तेनैवमंत्रेणदद्यात्॥ इतिआद्यगोदानं॥ (स्त्रीशूद्राणांहोमोनास्ति॥ पुत्रेणब्राह्मणद्वारावाहोमःकार्यइतिकेचित्) अथाद्यहोमः ॥ सर्वप्रायश्चित्तपूर्वांगविहितहोमंकरिष्ये ॥ इतिसंकल्प्य ॥ तदंगउद्धननादिविट्नामानमग्निंप्रतिष्ठापयामीतिप्रतिष्ठाप्य प्रोक्षितेधनानिनिक्षिप्यवेणुधमन्याप्रबोध्यध्यायेत्॥ ॐ चत्वारिशृंगात्र० वरदोभव ॥ समित्रयमादाय ॐ श्रद्धएहीत्यादिप्राणायामांतं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृत्वा ॥ सर्वप्रायश्चित्तप्राच्यांगहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामि ॥ तूष्णीमिध्मेनयक्ष्ये ॥ प्रधानहोमेमहा विष्णुंसमस्तव्याहृतिमंत्रेण अष्टाविंशत्याज्याहुतिभिर्यक्ष्ये ॥ प्रायश्चित्तहोमे अग्निंवायुंसूर्यंप्रजापतिंचप्रत्येकमाज्येनैतादेवताःस द्योयक्ष्ये ॥ ॐभूर्भुवःसुवःस्वाहा ॥ इत्यन्वाधानसमिधोऽग्नावाधाय ॥ प्रजापतयइदं ॥ एषहिदेवःप्र० मुखः ॥ यथाहतद्वस० आयुः ॥ परिस्तीर्य ॥ मयिगृह्णाम्यग्रे० परागात् ॥ उत्तरेणाग्निंदर्भानास्तीर्यपात्राण्यासादयेत् ॥ दर्वीआज्यस्थालींप्रोक्षणींअष्टाविंशतिस मित्कमिध्मंबर्हिःउपवेषंसंमार्गदर्भान्अवज्वलनदर्भान्आज्यंचासादयामि ॥ पवित्रकरणादिप्रोक्षणीःसंस्कृत्य ॥ पात्राणि प्रोक्ष्य ॥ दर्वीनिष्टपनादिपवित्रेण्यावाधाय ॥ अदितेनुमन्यस्व अनुमतेनु० देवसवितःप्रसुव ॥ आज्येनेध्ममभिघार्य हस्ते नेध्मंजुहोति ॥ प्रजापतयेस्वाहा ॥ प्रजापतयइदं० ॥ अथदर्व्याजुहोति ॥ ॐ भूर्भुवःसुवःस्वाहा ॥ विष्णवइदं० ॥ इत्यष्टा विंशतिवारंहुत्वा ॥ यथाहत०युः ॥ अथप्रायश्चित्तहोमः ॥ ॐ भूःस्वाहा ॥ अग्नयइदं० ॥ भुवःस्वाहा ॥ वायवइदं० ॥ सुवः स्वाहा ॥ सूर्यायेदं० ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ परिस्तरणान्युत्तरेविसृजेत् ॥ अदितेन्वमंस्थाः ॥ अनुमतेन्व मं० ॥ सरस्वतेन्व० ॥ देवसवितःप्रासावीः ॥ यज्ञनमस्ते० उपतेनमः ॥ सर्वमंत्रेषुतिष्ठति ॥ मेधावीतेजस्वीवर्चस्वीब्रह्मवर्चस्वी आयुष्मान्भूयासं ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन ॥ प्रमादा त्कुर्वतांकर्म० श्रुतिः ॥ इतिसंप्रार्थ्यअग्निंसंपूज्य ॥ अनेनसर्वप्रायश्चित्तप्राच्यांगविहितहोमाख्येनकर्मणाभगवान्सकलपापाप हमहाविष्णुःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ वषट्तेविष्णवास० सदानः ॥ विष्णवेनमः ३ ॥ *गच्छगच्छसुरश्रेष्ठस्व स्थानेपरमेश्वर ॥ यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन* ॥ इतिप्राच्यांगविधिः ॥ ॥ छ ॥

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३३५ ॥ ब्रह्मकूर्चविधिः ॥

तत्रप्रयोगः ॥ आधारवत्तंत्रंआपूर्विंकंवा ॥ आचम्यदेशकालौसंकीर्त्यममशरीरगतसकलकल्मषनाशार्थंब्रह्मकूर्चविधिनापंच
गव्याशनंकरिष्ये ॥ तदंगंविहितहोमंकर्तुंस्थंडिलादिसकलंकर्मकरिष्ये ॥ विट्नामानमग्निंप्रतिष्ठाप्य ॥ प्रज्वाल्य ॥ चत्वा
रिशृंगेतिध्यात्वासमित्त्रयमादाय ॥ श्रद्धएहीत्यादिप्राणायामांतंकृत्वा ब्रह्मकूर्चहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्र
हीष्यामि ॥ तूष्णीमिध्मेन ॥ वैशेषिकप्रधानहोमे ॥ अग्निंपंचगव्येन सोमंपंच० विष्णुंत्रिःपंच० रुद्रंपंच० सवितारंपं०
ब्रह्माणंपंच० परमात्मानंपंचगव्येनयक्ष्ये ॥ प्रायश्चित्तहोमे ॥ अग्निंवायुंसूर्यंप्रजापतिंचप्रत्येकमाज्येनएतादेवताःसद्योयक्ष्ये ॥
ॐ भूर्भुवःसुवःस्वाहा इत्यन्वाधानसमिधोग्नावाधाय ॥ प्रजापतयइदं ॥ ततःएषहिदेवःप्र०मुखः॥यथाहुतद्ध० आयुः ॥ परि
स्तीर्य ॥ मयिगृह्णा० परागात् ॥ उत्तरेणाग्निंदर्भानास्तीर्यपात्राण्यासादयेत् ॥ दर्वींप्रोक्षणींआज्यस्थालींपालाशादिपंचगव्यक
रणपात्रं ॥ इध्मंबर्हिःनीलायागोर्मूत्रं कृष्णायाःगोमयं ताम्रायाःपयः श्वेतायाःदधि कपिलायाःघृतं कुशमिश्रंउदकं सप्तद
र्भमयंकूर्चं यज्ञियकाष्ठनिर्मितमंथां उपवेषं संमार्गदर्भान् अवज्वलनदर्भान् आज्यंचासादयामि ॥ पवित्रकरणादिपात्रप्रोक्ष
णांतेपालाशादिपात्रेपवित्रेनिधाय तस्मिन्पवित्रांतर्हितेपंचगव्यपात्रेपंचगव्यानिवक्ष्यमाणमंत्रैर्निर्वपति ॥ ॐ तत्सवितुर्वरे०
यात् ॥ इतिपलमात्रंगोमूत्रंनिर्वपति ॥ गंधद्वारां० श्रियं ॥ अंगुष्ठार्धमात्रंगोमयंनि० ॥ आप्यायस्वसमे० गृथे ॥ सप्तपलमि
तंक्षीरंनिर्व० ॥ दधिक्राव्णो० रिषत् ॥ पलत्रयमितंदधिनि० ॥ शुक्रमसिज्योतिरसितेजोसि ॥ पलमात्रंघृतंनि० ॥ देवस्य
त्वासवितुःप्रसवे० हस्ताभ्यां ॥ पलमात्रंकुशोदकंनिर्वपति ॥ मंथामादत्तेसव्यकृता ॥ पंचगव्यपात्रस्थपवित्रमादायआज्यस्था

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ल्यांनिधाय ॥ आपोहिष्ठामं० चनः ॥ इतिपंचगव्यंमश्नाति ॥ दर्वीनिष्टपनादिआज्येनसहपंचगव्यस्योल्मुकेनत्रिःपर्यग्निकरणं ॥
उल्मुकनिरसनादिपवित्रेण्नावाधाय ॥ पंचगव्यपात्रंबर्हिषिआज्यस्थाल्याउत्तरतोनिधाय ॥ अदितेनुमन्यस्व ॥ अनुमते० ॥
सरस्वते० ॥ देवसवितःप्रसुव ॥ आज्येनेध्ममभिघार्यनवसमित्कमिध्ममादायजुहोति ॥ प्रजापतयेस्वाहाप्रजापतयइदं० ॥
आसादितकूर्चमादायतेनैवोद्धृत्यपंचगव्यहोमंकरोति ॥ ॐ अग्नयेस्वाहा अग्नयइदं० ॥ सोमायस्वाहा सोमायेदं० ॥ इरावती
धेनुमतीहिभूतꣳसूं० ॥ मयूखैःस्वाहा ॥ विष्णवइदं० ॥ इदंविष्णुर्विचक्रमे० सुरेस्वाहा ॥ विष्णवदं० ॥ विष्णोर्नुकंवीर्याणि० ॥
गायःस्वाहा ॥ विष्णवइदं० ॥ मानस्तोकेतनये० विधेमतेस्वाहा ॥ रुद्रायेदं० ॥ तत्सवितुर्व० यात्स्वाहा ॥ सवित्रइदं० ॥
ब्रह्मजज्ञानंप्र० विवः्स्वाहा ॥ ब्रह्मणइदं० ॥ ॐ स्वाहा ॥ परमात्मनइदं० ॥ एतैर्मंत्रैःप्रणवावृत्त्याचपंचगव्यस्यचतुर्थभागꣳ
हुत्वा ॥ आघारपक्षेतुवारुण्यादिकर्मशेषंसमाप्य ॥ स्वीकृतपक्षे यथाहुतद्वं० आयुः ॥ इतिपरिसमुह्य ॥ अथदर्व्याआज्यहोमः ॥
कृतस्यपंचगव्यहोमकर्मणःसाद्गुण्यार्थंप्रायश्चित्तहोमंकरिष्ये ॥ ॐभूःस्वाहा अग्नयइदं० ॥ भुवःस्वाहा वायवइदं० ॥ सुवः
स्वाहा सूर्यायेदं० ॥ भूर्भुवःसुवःस्वाहा प्रजापतयइदं० ॥ परिस्तरणान्युत्तरेविसृजेत् ॥ अदितेन्वंमꣳस्थाः० प्रासावीः ॥
अग्निंसंपूज्य ॥ संस्थाजपेनोपतिष्ठते ॥ यज्ञनमस्ते० देहिमेहव्यवाहन ॥ प्रमादात्कुर्वतांकर्म० संपूर्णस्यादितिश्रुतिः ॥ अनेन
पंचगव्यहोमाख्येनकर्मणाभगवान्यज्ञरूपीपापापहमहाविष्णुःप्रीयतांनमम ॥ पंचगव्यहुतशेषंदर्भशकलेनप्रणवेनालोड्य ॥
प्रणवेनाभिमंत्र्यपात्रांतरेकृत्वाब्राह्मणैरनुज्ञातःप्रणवेनसर्वमपिपिबेत् ॥ स्त्रीचेत् ॥ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके ॥
प्राशनंपंचगव्यस्यदहत्यग्निरिवेंधनं ॥ इतिपंचगव्यंप्राश्य ॥ तस्मिन्दिवसेपंचगव्याशनः ॥ अशक्तौहविष्यान्नंवाकुर्यात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इदंसर्वंनक्षत्रदर्शनेकर्तव्यं ॥ गृहमागत्यविष्णुंस्मरन्मौनीनिशामतिवाह्य ॥ अनेनविधिनापूर्वागकृत्वासकल्पानुसारेणकृच्छ्रा
चरणंकुर्यात् ॥ तन्मूलं ॥ त्र्यहंप्रातरुपहंसायंत्र्यहमद्यादयाचितं ॥ त्र्यहंपरंचनाश्नीयात्प्राजापत्यःसउच्यते ॥ एवंकृच्छ्राच
रणंकृत्वा ॥ अथवाकृच्छ्रप्रत्याम्नायेनकृच्छ्रमाचरेत् ॥ प्रत्याम्नायसंक्षेपःप्रायश्चित्तारंभेद्रष्टव्यः ॥ ७ ॥ ॥ ७ ॥

॥ ३३६ ॥ प्रायश्चित्तोत्तरांगम् ॥

श्रीः॥ ततःप्रायश्चित्तांतेउत्तरांगानिकुर्यात् ॥ तिथ्यादिसंकीर्त्यमयाकृतस्यसर्वप्रायश्चित्तस्यउत्तरांगानिकरिष्ये इतिसंकल्प्य ॥
व्याहृभिराज्यहोमः विष्णुश्राद्धंगोदानंचपूर्वोक्तविधिनाकुर्यात् ॥ एवंप्रायश्चित्तंकृत्वा ॥ अनेनमयाकृतेनसर्वप्रायश्चित्ताख्येन
कर्मणाभगवान्सकलपापापहमहाविष्णुःप्रीयतां ॥ इतिसर्वप्रायश्चित्तप्रयोगः ॥ शक्तौसत्यांदशदानानिकुर्यात् ॥ तत्रक्रमः ॥
गोभूतिलहिरण्याज्यंवासोधान्यंगुडानिच ॥ रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमात् ॥ दशदानादिमंत्राअग्रेएकादशाहप्रसंगे
द्रष्टव्याः ॥ अत्रपापधेनुदानमप्यावश्यकं ॥ एतानिदशदानानिसभ्येभ्यएवदद्यात्तदसंभवेन्येभ्योपि ॥ ततो यन्मयाकृतम
मुकप्रायश्चित्तंतदच्छिद्रमस्त्वितिभवंतोब्रुवंतुइतिकर्त्राउक्तेअच्छिद्रमस्त्वितिब्राह्मणाःप्रतिब्रूयुः ॥ एतत्प्रायश्चित्तमकृत्वैवयदि
पित्रादिर्मृतस्तदापातकनिश्चयेपुत्रादिनेदमवश्यंकार्यअनिश्चयेनावश्यकं ॥ पुत्रादिनाकरणेपंचगव्यप्राशनाभावः ॥ इति ॥

॥ ३३७ ॥ मुमूर्षौमृतेचकृत्यं ॥

श्रीः ॥ गोमयेनोपलिप्तायांतिलकृष्णाजिनतुलसीसहितायांदक्षिणाग्रकुशास्तृतायांभूमावुपविष्टस्यमुमूर्षोःपुत्रोत्संगेधारितशिर

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्तिष्ठेत् ॥ अमुकशर्मणोऽमुकगोत्रस्यपितुःअमृतत्वप्राप्तयेउपनिषदादीनिश्रावयिष्ये इतिसंकल्प्य ॥ ब्रह्मविदाप्नोतिपरं ॥ भृगुर्वैवारुणिः ॥ अंभस्यपारे ॥ इत्यादीनिनारायणनामानिअन्यानिपुण्यसूक्तानिगीतासहस्रनामादीनिचश्रावयेत् ॥ स्त्रीचेत् ॥ आयुषःप्राणस्संतनु ॥ इत्यनुवाकंश्रावयेयुः नारायणनामानिच ॥ ततोव्यसुंज्ञात्वापुत्रादिःकर्तासचैलंस्नात्वाआचम्यतूष्णींप्राणानायम्य ॥ सर्वंप्रेतकृत्यंप्राचीनावीतिनाकार्यंदक्षिणापवर्गंच ॥ अकृतप्रायश्चित्तेमृतेदेशकालौसंकीर्त्यपित्रादेर्जन्मप्रभृत्यद्ययावत्सकृदसकृत्कृतकायिकवाचिकमानसिकज्ञाताज्ञातस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानांमध्येसंभावितपापानांनिरासार्थंयथाशक्तिअब्दान्यतमसंख्यप्राजापत्यप्रायश्चित्तंप्रतिप्राजापत्यंअमुकप्रत्याम्नायेनसूतकांतेआचरिष्ये ॥ तथापित्रादेर्मरणकालेसंभावितानांऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टास्पृश्यस्पृष्टअंतरालमरणअस्नातमरणकर्ममंत्ररहितमरणखट्वोपरिमरणबंधनमरणादिनिमित्तानांप्रत्यवायपरिहारार्थंकृच्छ्रत्रय (षट्द्वादशपंचदशवानिमित्तानुसारेण)प्रायश्चित्तंअमुकप्रत्याम्नायेनसद्यःसूतकांतेवाकरिष्येइतिसंकल्प्य॥ एतावदेव॥ ततःकर्तापि आत्मशुद्ध्यर्थं देशकालौसंकीर्त्यअमुकगोत्रस्यामुकशर्मणःपित्रादेःऔर्ध्वदेहिककर्माधिकारार्थंकृच्छ्रत्रयप्रायश्चित्तंप्रतिकृच्छ्रंतत्प्रत्याम्नायगोनिष्क्रयद्रव्यदानेनसूतकांतेअहमाचरिष्ये ॥ शक्तौतदैवद्रव्यादिनाअशक्तौसूतकांतेवाकुर्यात् ॥ (तथापित्रादेरंत्यकर्माधिकारार्थं वपनंकरिष्ये ॥ कर्तृभिन्नैस्तुपित्रादिमरणनिमित्तंवपनंकरिष्यइतिसंकल्प्य॥ यानिकानिचपापानिब्रह्महत्यासमानिच ॥ केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं ॥ इतिकक्षोपस्थवर्जंकेशश्मश्रुलोमनखानिदक्षिणसंस्थानिवापयित्वास्नायात् ॥) एवंवि

१ हिरण्यकेशीयौर्ध्वदेहिकप्रयोगेवपनमभेदहनोत्तरंलिखितमस्तिवपनंकृत्वाकुशतोयेसंगृह्णीतं ।

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रानुज्ञयाशुद्धिंसंपाद्यप्रेतंसंस्नाप्यचंदनादिनालंकृत्यनलदमालामाबध्यदीपैरुद्दीप्यनयनार्थंकटंनिबध्यात् ॥ अहतेनवाससात्रि
भिर्भागैःप्रेतमाच्छाद्यतस्यचतुर्थभागंच्छित्वातेनोत्तरीयंकुर्यात् ॥ द्वादशाहांतंप्रेतकृत्येषुतदेवधार्यं ॥ ॥ ॥ ७ ॥

॥ ३३८ ॥ प्रेतोत्थापननिमित्तंहिरण्यश्राद्धं ॥

देशकालौसंकीर्त्य ॥ अमुकगोत्रस्यामुकप्रेतस्यप्रेतोत्थापननिमित्तंहिरण्यश्राद्धंकरिष्ये इतिसंकल्प्य ॥ एकोद्दिष्टविधिना
पिष्टेनपिंडदानविसर्जनांतंकृत्वा ॥ (तूष्णींतिलोदकंकृत्वा) प्रेतोत्थापननिमित्तश्राद्धेक्षणउपतिष्ठतु ॥ प्रत्युपचारंनामगोत्रो
च्चारणंकार्यं ॥ आसनंपाद्यमर्घ्यमाचमनीयंस्नानंवस्त्रार्थतिलाःगंधतुलसीपत्रंधूपदीपार्थेतिलाः ॥ इदमामान्नंतन्निष्क्रयद्रव्यंवातां
बूलदक्षिणासहितंसूतकांतेदास्यमानमुपतिष्ठतु ॥ गायत्र्यामनसोपस्थानं ॥ ततःपिंडार्थंदर्भासनंतदुपरितिलोदकंनामगोत्राद्युच्चा
र्यप्रेतोत्थापननिमित्तश्राद्धेएषसक्तुपिंडस्तवोपतिष्ठतुऊष्मानुमंत्रणं० अंजनंअभ्यंजनं पाद्यार्घ्यादिपूर्ववत् नैवेद्यार्थेसक्तुउपतिष्ठतु
हस्तप्रक्षालनादितांबूलदक्षिणादिसूतकांते० उत्तरीयवासोदकलेपोदकमु० सर्वोपचरार्थेतिलाःउप० प्रेतपिंडपुष्टिद्वाराप्यायन
मस्त्वितिभवंतोब्रुवंतु ॥ गायत्र्योपस्थानंचालनंप्रवाहणंच ॥ अनादिनिधनोदेवःशंखचक्रगदाधरः ॥ अक्षय्यःपुंडरीकाक्षःप्रेतमु
क्तिप्रदोभव ॥ इहलोकंपरित्यज्यगतोसिपरमांगतिं ॥ मनसावायुरूपेणपिंडेत्वांयोजयाम्यहं ॥ अभिरम्यतां ॥ अभिरतोसि ॥
नमोभगवतेवासुदेवाय ॥ हिरण्यश्राद्धांगंपिंडंवामकुक्षौक्षिपति ॥ पिंडमात्रंवादत्वास्वज्ञातयःप्रेतंनयेयुः ॥ त्रिपाद्यांस्मार्तान्न्य
भावेलौकिकाग्निः ॥ प्रेताग्न्योर्मध्येऽन्येननगंतव्यं ॥ दहनभूमिंगत्वातस्थाःपश्चिमतःप्रेतमुत्तीर्योदीचींदिशंनिष्क्रामंति ॥

---

१ दिवामृतौरात्रिदाहेरात्रिमरणेदिवादाहप्राप्तौचप्रेतस्यपर्युषितत्वंप्राप्नोतीतितदापंचगव्यादिनास्नापनमुक्तमन्यत्र ।

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३३९ ॥ दहनविधिः ॥

यजमानःसमारोपिताग्निश्चेन्नष्टाग्निर्वाम्रियेततदातत्रोक्तविधिनाऔपासनसिद्धिंविधायदहेत् ॥ आत्मसमारोपिताग्निर्मृतश्चेत्कर्ता विधिवल्लौकिकाग्निंप्रतिष्ठाप्यप्रेतस्यदक्षिणपार्णिंलौकिकाग्निसमीपेनिधायसमिद्धस्तेनप्रेतपाणिमन्वारभ्यजुहोति ॥ उपावरोहजा तवेदइमंत ऽस्वर्गायलोकायप्रजानन् ॥ आयुःप्रजा ऽरयिमस्मासुधेहिप्रेताहुतिंचास्यजुषस्वस्वाहेतिलौकिकाग्नौसमिधमाधायतेना ग्निनादहनंकुर्यात् ॥ यदिनष्टाग्निर्म्रियेतकर्तापूर्ववदुपावरोह्यकालव्यवधानोचितंकृच्छ्रादिकुर्यात् ॥ अद्येत्यादि० गोत्रस्यपितुःमु र्षुकालपर्यंतंप्रमादादिनागृह्याग्नित्यागजन्यदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रत्यब्दंएकैकप्राजापत्यंप्रतिप्राजापत्यंरजतनि ष्कपादगोःप्रत्याम्नायेनआचरिष्ये ॥ तथाचाग्निलोपेनलुप्तानांसायंप्रातर्होमानांदर्शपूर्णमासस्थालीपाकानांचव्रीह्याज्यादिनिष्क यद्रव्यंब्राह्मणायदातुमहमुत्सृज्ये ॥ अद्येत्यादि०प्राचीनावीतीपितुःगोत्रस्यशर्मणःप्रेतस्यविच्छिन्नाग्निंसंधास्येइतिसंकल्प्य ॥ पितृमेधवदग्नींधनादिस्थंडिलेलौकिकाग्निंप्रतिष्ठाप्यतूष्णींपरिसमुह्यपरिस्तीर्यपात्रचतुष्टयसादनादिस्रुक्स्रुवमाज्यस्थालींप्रोक्षणीं चप्रोक्षणाद्याज्यसंस्कारांतेग्निंपरिषिच्यद्वादशगृहीतेनस्रुचंपूरयित्वाअन्वारब्धेप्रेतेप्रजापतिंमनसाध्यायन् ॥ प्रजापतयेस्वा हा ॥ प्रजापतयइदं० ॥ पुनःसकृद्गृहीत्वा ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ ततोनित्यहोमंकृत्वा ॥ कृष्णपक्षेप्रातर्हो माकृताहर्मरणेप्रातराहुतिमारभ्यसायंहोमाकृतरात्रिमरणेसायमाहुतिमारभ्यपक्षहोमवन्मरणदिनादिदर्शांतंदिनसंख्ययाचतस्र श्चतस्रआहुतीर्जुहुयात् ॥ दर्शस्थालीपाकंचकुर्यात् ॥ तद्यथा ॥ अमुकगोत्रस्यामुकप्रेतस्यद्वितीयाप्रातःकालादारभ्यसायंकाला दारभ्यवायथास्यात्तथोहेनआगामिप्रतिपत्प्रातःकालपर्यंतान्शेषहोमान्अनेनप्रातरौपासनेनसहसायमौपासनेनसहवात्रीहिभि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्होष्यामि ॥ प्रातर्होमोकृतश्चेत्प्रातर्होमाहुतिद्वयंहुत्वा पश्चाद्दिनाहुतिसंख्ययापात्रचतुष्टयेआहुतिद्वयंसंपाद्यचतस्रआहुतीर्जुहु
यात् ॥ अमुकशर्मणःदर्शस्थालीपाकस्थानेपूर्णाहुतिंहोष्यामि ॥ द्वादशाष्टचतुर्गृहीतेनवाअशक्तौपूर्णस्रुवेणवाआज्यंगृहीत्वा ॥
अग्नयेस्वाहा ॥ अग्नयइदं० ॥ पुनराज्यमादायसर्वप्रायश्चित्ताहुतिंजुहुयात् ॥ पत्नीमरणेप्येवं ॥ निरग्निकस्यब्रह्मचार्यादेःनिर
ग्निकायावाकपालाग्निः ॥ अग्नित्वर्णकपालंतुकृत्वातत्रविनिक्षिपेत् ॥ करीषाददततोयस्तुजातःसतुकपालजः ॥ अनुपनीताऽविवा
हितयोरप्येवं ॥ विधवाविधुरयोरुत्तपनीयकः कपालाग्निरेववा ॥ दर्भैरग्निंतुप्रज्वाल्यपुनर्दर्भैस्तुसंयुतः ॥ पुनर्दर्भैस्तृतीयो
ग्निरेषउत्तपनीयकः ॥ कपालाग्निरेववा ॥ लौकिकाग्निनावासर्वेषांदाहः ॥ आहिताग्नेर्वैतानाग्निभिः ॥ ततःअग्निमुदकुंभंतिलाना
ज्यंकुशान्हिरण्यशकलानिशमीशाखादिगृहीत्वा ॥ देशकालौसंकीर्त्य ॥ अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंपितृत्वप्रा
प्त्यर्थंहौत्रविधानेनदहनक्रियांकरिष्ये ॥ इतिसंकल्प्य ॥ हिरण्यपलाशशाखयाशमीशाखयावाअपेतवीतविचसर्पतातेतिभूमिंसंमृ
ज्यात् ॥ अपेतवीतविचसर्पतातोयेत्रस्थपुराणायेचनूतनाः ॥ अहोभिरद्भिरक्तुभिर्व्यक्तंयमोददात्ववसानमस्मै ॥ दक्षिणतःशा
खांनिरस्यापउपस्पृश्याद्भिरवोक्ष्य दहनदेशेहिरण्यंनिधायदक्षिणांप्राचींदारुचितिंरचयित्वा ॥ त्रिःप्रसव्यंपरिषिच्यदर्भैरग्निंदा
रुचितिंचपरिस्तीर्य सर्वौषधीमिश्राभिरद्भिःकुंभंपूरयित्वा तेनउदकेन ॥ चित्तिस्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतंबर्हिः ॥
केतोअग्निः ॥ विज्ञातमग्निः ॥ वाक्पतिर्होता ॥ मनउपवक्ता ॥ प्राणोहविः ॥ सामाध्वर्युः ॥ वाचस्पतेविधेनामन् ॥ विधेम
तेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्पतिःसोमंपिबतु ॥ आस्मासुनृम्णंधात्स्वाहा ॥ इतिप्रेतंस्नापयेत् ॥ ततःप्रेतंचितिमा
रोप्य ॥ अथास्यप्राणायतनेषुहिरण्यशकलान्याज्यबिंदून्वानिदध्यात् ॥ तत्रमंत्राः ॥ चित्तिःस्रुगासीत् ॥ चित्तमाज्यमासीत् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वाग्वेदिरासीत् ॥ आधीतंबर्हिरासीत् ॥ केतोंअग्निरासीत् ॥ विज्ञातमग्नीदासीत् ॥ वाक्पतिर्होतासीत् ॥ मनउपवक्तासीत् ॥ प्राणोहविरासीत् ॥ सामाध्वर्युरासीत् ॥ इतिद्विरावृत्यानासिकाच्छिद्रयोर्हिरण्यशकलेनिदध्यात् ॥ आज्यबिंदून्वा ॥ एवंसर्वत्रमंत्रावृत्तिः ॥ पृथिवीहोतासीत् ॥ द्यौरध्वर्युरासीत् ॥ रुद्रोग्नीदासीत् ॥ बृहस्पतिरुपवक्तासीत् ॥ इतिमुखे ॥ अग्निर्होतासीत् ॥ अश्विनाध्वर्युरास्तां ॥ त्वष्टाग्नीदासीत् ॥ मित्रउपवक्तासीत् ॥ इतिद्विरक्ष्णोः ॥ सूर्यस्तेचक्षुः ॥ वातंप्राणः ॥ द्यांपृष्ठं ॥ अंतरिक्षमात्मा ॥ अंगैर्यज्ञं ॥ पृथिवीश्शरीरैः ॥ इतिद्विःकर्णयोः ॥ महाहविर्होतासीत् ॥ सत्यहविरध्वर्युरासीत् ॥ अच्युतपाजाअग्नीदासीत् ॥ अच्युतमनाउपवक्तासीत् ॥ अनाधृष्यश्चाप्रतिधृष्यश्चयज्ञस्याभिगरावास्तां ॥ अयास्यउद्गातासीत् ॥ इतिद्विः कुक्ष्योः ॥ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ इतिनाभ्यां—

॥ ३४० ॥ पंचकपुत्तलविधिः ॥

पंचके ॥ अमुकगोत्रस्यामुकप्रेतस्यधनिष्ठापंचकमरणसूचितवंशारिष्टपरिहारार्थंपंचकविधिंकरिष्यइतिसंकल्प्यदर्भमय्यःपंचप्रतिमाःकृत्वाऊर्णासूत्रेणसंवेष्टयवपिष्टेनानुलिप्यगंधादिनालंकृत्यदाहसमयेप्रेतोपरिन्यसेत् ॥ प्रथमांप्रेतवाहायेतिशिरसि ॥ द्वितीयांप्रेतसखायेतिनेत्रयोः ॥ तृतीयांप्रेतपायेतिकुक्षौ ॥ चतुर्थींप्रेतभूमिपायेतिनाभौ ॥ पंचमींप्रेतहर्त्रेइतिपादयोःइतिनिधायोदकधारांदत्वा ॥ ततस्तदुपरियमायसोमं० त्र्यंबकं० इतिमंत्राभ्यांघृताहुतीर्जुहोति ॥ शिरसिप्रेतवाहायस्वाहा ॥ नेत्रयोःप्रेतसखायस्वाहा ॥ कुक्षौप्रेतपायस्वाहा ॥ नाभौप्रेतभूमिपायस्वाहा ॥ पादयोःप्रेतहर्त्रेस्वाहाइति ॥ ततोविधिनाप्रेतंदहेत् ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३४१ ॥ त्रिपादपुत्तलविधिः ॥

त्रिपादक्षेअमुकगोत्रस्यामुकप्रेतस्यत्रिपादमरणसूचितवंशारिष्टनिरसनार्थंत्रिपादविधिंकरिष्ये ॥ दर्भप्रतिमात्रयंकृत्वाऊर्णासू त्रेणसंवेष्टयवपिष्टेनानुलिप्यगंधादिनालंकृत्यप्रेतोपरिविन्यसेत् ॥ प्रथमांप्रेतवाहायेतिशिरसि ॥ द्वितीयांप्रेतसखायेतिहृदये ॥ तृतीयांप्रेतपायेतिनाभौइतिविन्यस्यक्रमेणउदकधारांदत्वातदुपरिघृताहुतीर्जुहुयात् ॥ शिरसि प्रेतवाहायस्वाहा ॥ हृदये प्रेतसखायस्वाहा ॥ नाभौ प्रेतपायस्वाहा ॥ इतिहुत्वाताभिःसहशवंदहेत् ॥ प्रेतोत्थापनश्राद्धपिंडंदर्वींचवामकुक्षौनिक्षिपति ॥)

॥ ३४२ ॥ अग्निप्रज्वालनादि ॥

—ततःअग्निंप्रज्वालयेत् ॥ पुंसःशिरोदेशेस्त्रियाःपाददेशे ॥ अग्निर्यजुर्भिः ॥ सवितास्तोमैः ॥ इंद्रउक्थामदैः ॥ मित्रावरु णावाशिषा ॥ अंगिरसोधिष्ण्यैरग्निभिः ॥ मरुतःसदोहविर्धानाभ्यां ॥ आपःप्रोक्षणीभिः ॥ ओषधयोबर्हिषा ॥ अदितिर्वे द्या ॥ सोमोदीक्षया ॥ त्वष्टेध्मेन ॥ विष्णुर्यज्ञेन ॥ वसवआज्येन ॥ आदित्यादक्षिणाभिः ॥ विश्वेदेवाऊर्जा ॥ पूषास्वगाकारेण ॥ बृहस्पतिःपुरोधया ॥ प्रजापतिरुद्गीथेन ॥ अंतरिक्षंपवित्रेण ॥ वायुःपात्रैः ॥ अहश्श्रद्धया ॥ १ ॥ सेनेंद्रस्य ॥ धेना बृहस्पतेः ॥ पथ्यापूष्णः ॥ वाग्वायोः ॥ दीक्षासोमस्य ॥ पृथिव्यग्नेः ॥ वसूनांगायत्री ॥ रुद्राणांत्रिष्टुक् ॥ आदित्यानांजगती ॥ विष्णोरनुष्टुक् ॥ वरुणस्यविराट् ॥ यज्ञस्यपंक्तिः ॥ प्रजापतेरनुमतिः ॥ मित्रस्यश्रद्धा ॥ सवितुःप्रसूतिः ॥ सूर्यस्यमरीचिः ॥ चंद्रमसोरोहिणी ॥ ऋषीणामरुन्धती ॥ पर्जन्यस्यविद्युत् ॥ चतस्रोदिशः ॥ चतस्रोवांतरदिशाः ॥ अहश्चरात्रिश्च ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

कृषिश्चवृष्टिश्च ॥ त्विषिश्चापचतिश्च ॥ आपश्चौषधयश्च ॥ ऊर्कसूनृताचदेवानांपल्वयः ॥ इतिद्वाभ्यामग्निंप्रज्वालयेत् ॥ ततः उपतिष्ठेत ॥ वाचस्पतेविधेनामन् ॥ विधेमतेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्पतिःसोमंपिबतु ॥ आस्मासुनृम्णंधात्स्वाहा ॥ वाचस्पतेवाचोवीर्येण ॥ संभृततमेनायक्ष्यसे ॥ यजमानायवार्यं ॥ आसुवस्करस्मै ॥ वाचस्पतिःसोमंपिबति ॥ जजनदिंद्रमिंद्रियायस्वाहा ॥ सोमःसोमस्यपुरोगाः ॥ शुक्रःशुक्रस्यपुरोगाः ॥ श्रातास्तइंद्रसोमाः ॥ वातापेहवनश्रुतःस्वाहा ॥ वाचस्पतेच्छिद्रयावाचा ॥ अच्छिद्रयाजुह्वा ॥ दिविदेवावृधश्चोत्रामेरयस्वस्वाहा ॥ वाचस्पतेहद्विधेनामन् ॥ विधेमतेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्पतिःसोममपात् ॥ मादैव्यस्तंतुश्छेदिमामनुष्यः ॥ नमोदिवे ॥ नमःपृथिव्यैस्वाहा ॥ वाग्घोता ॥ दीक्षापत्नी ॥ वातोध्वर्युः ॥ आपोभिगरः ॥ मनोहविः ॥ तपसिजुहोमि ॥ भूर्भुवःसुवः ॥ ब्रह्मस्वयंभु ॥ ब्रह्मणेस्वयंभुवे स्वाहा ॥ ब्राह्मणएकहोता ॥ सयज्ञः ॥ समेददातुप्रजांपशून्पुष्टिंयशः ॥ यज्ञश्चमेभूयात् ॥ अग्निर्द्विहोता ॥ सभर्ता ॥ समेददातुप्रजां०यशः ॥ भर्ताचमेभूयात् ॥ पृथिवीत्रिहोता ॥ सप्रतिष्ठा ॥ समेददातुप्रजां०यशः ॥ प्रतिष्ठाचमेभूयात् ॥ अंतरिक्षंचतुर्होता ॥ सविष्ठाः ॥ समेददातुप्रजां०यशः ॥ विष्ठाश्चमेभूयात् ॥ वायुःपंचहोता ॥ सप्राणः ॥ समेददातुप्रजां०यशः ॥ प्राणश्चमेभूयात् ॥ चंद्रमाःषड्होता ॥ सऋतून्कल्पयाति ॥ समेददातुप्रजां०यशः ॥ ऋतवश्चमेकल्पन्तां ॥ अन्नंसप्तहोता ॥ सप्राणस्यप्राणः ॥ समेददातुप्रजां०यशः ॥ प्राणस्यचमेप्राणोभूयात् ॥ द्यौरष्टहोता ॥ सोनाधृष्यः ॥ समेददातुप्रजां०यशः ॥ अनाधृष्यश्चभूयासं ॥ आदित्योनवहोता ॥ सतेजस्वी ॥ समेददातुप्रजां०यशः ॥ तेजस्वीचभूयासं ॥ प्रजापतिर्दशहोता ॥ सइदꣳसर्वं ॥ समेददा० यशः ॥ सर्वंचमेभूयात् ॥ एतैर्मंत्रैरग्निमुपतिष्ठते ॥ वातास्तेवांतुपथिपुण्यगंधामनःसुखागात्रसुखानुलोमाः ॥ त्वचःसुखामां

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ससुखाअस्थिसौख्यावहंतुत्वांमरुतःसुकृतांयत्रलोकाः ॥ इतिसर्वबांधवाःस्ववस्त्राणाआद्रःप्रांते
चिद्दहनकालेग्निनाशेदग्धकाष्ठैरग्निंमथित्वातेनदहेत् ॥ अथवाभूर्भुवःसुवःस्वाहेत्याज्याहुतिंहुत्वालौकिकेनवादहेत् ॥ अत्याप
दिगंगादिमहाजलेवाक्षिपेत्) ॥ वामस्कंधारोपितस्योदकुंभस्यपरशुनाच्छिद्रंकृत्वापाददेशतएवतेनोदकधारांनिषिंचन्चितिमप्र
दक्षिणंकरोति ॥ इमाआपोमधुमत्योस्मिंल्लोकउपदुह्यंतामिमां ॥ इतिप्रथमं ॥ इमाआपोमधुमत्योंतरिक्षेलोकउपदुह्यंतामिमां ॥
इतिद्वितीयं ॥ इमाआपोमधुमत्योमुष्मिंल्लोकउपदुह्यंतामिमां ॥ इतितृतीयं ॥ ततोमवतारिषन्नपुनरवतारिषावहैइतिकुंभंप्रेतशि
रोदेशेभिनत्तियथाआपोनतिष्ठंतितथाविधेयं ॥ ततः ॥ उद्वयंतमंसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥
उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ इतिद्वाभ्यामादित्यमुपतिष्ठते ॥ ततश्चितिमप्रेक्ष्यमाणाबालपुरःसराः
पुत्रादयोयत्रआपस्तत्रगच्छंति ॥ ततोवपनंकुर्यात् ॥ अद्येत्यादि० गोत्रस्यशर्मणः प्रेतस्यमरणनिमित्तंवपनंकरिष्ये ॥ पत्नीअ
लंकारान्त्यक्त्वावपनंकुर्यात् ॥ रात्रौदग्ध्वातुपिंडांतंकृत्वावपनवर्जितं ॥ वपनंस्मृतिचोदितंतत्रमंत्रः ॥ यानिकानिचपापानि
ब्रह्महत्यासमानिच ॥ केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं ॥ इतिमंत्रेण ॥ कर्ताअन्येचपुत्राःशिखाकक्षोपस्थवर्जंकेश
श्मश्रुलोमनखानिवापयंति ॥ ततःस्नात्वा ॥ धातापुनातुसवितापुनातु ॥ अग्नेस्तेजसासूर्यस्यवर्चसा ॥ इतिदक्षिणामुखाबांधवा
उदकमुत्सृजंति ॥ ततःपर्वतमालोक्यग्रामंप्रविश्यगृहद्वारेनिंबपत्राणिभक्षयित्वाश्मनिपदंदत्वाबालपुरःसरंगृहंप्रविशेयुः ॥
ततोगोमयोपलिप्तायांभूमावुष्णोदकयुक्तांस्तंडुलान्प्रकीर्यगृहस्थानांमनुष्यगवादीनांशुभंभवतु ॥ ज्योतिष्मत्यंगारंकुर्वंति ॥ प्रथ
मदिनादारभ्यदशमदिनपर्यंतंआकाशेशिक्यादौउदकंक्षीरंचपृथक्प्रतिष्ठाप्यामुकगोत्रामुकप्रेतात्रस्नाहिइदंक्षीरंपिबेतिब्रूयात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३४३ ॥ अस्थिसंचयनं ॥

तत्रादावस्थिसंचयनदिनविचारः ॥ अपरेद्युस्तृतीयस्यांपंचम्यांसप्तम्यांवाअस्थीनिसंचिन्वंति ॥ स्मृत्यंतरेपि ॥ चतुर्थेनवमेचैवषष्ठेवाचाष्टमेतथा ॥ अस्थिसंचयनंकुर्यादेषामन्यतमेदिने ॥ त्रिपादंवैधृतिंचैवमृत्युयोगंतथैवच ॥ दिनक्षयंचवृद्धिंचनंदाद्यास्तिथयस्तथा ॥ रवौभौमेतथाशुक्रेनकर्तव्यंकदाचन ॥ कृष्णपक्षेदशम्याऊर्ध्वमयुग्मतिथिषुएकादश्यांत्रयोदश्यांपंचदश्यांवा ॥ कृष्णपक्षोर्ध्वेसपिंडीकरणात्पूर्वंस्मृत्युक्तेकालेफल्गुनीद्वयाषाढाद्वयप्रोष्ठपदाद्वयत्रिजन्मपुष्यनक्षत्रेषुनंदातिथौचनकर्तव्यं ॥ अस्थांचश्वसूकरशूद्रादिस्पर्शेशालग्रामतुलस्युदकेनप्रोक्ष्यकुर्यात् ॥ ततःस्नात्वाअन्नंफलानिघृतंक्षीरंगोमूत्रंगोमयंबृहतीफलंकुशतिलान्औदुंबरशाखाऊर्णासूत्रंकलशांश्चादायदहनभूमिंगत्वा ॥ शवाग्निर्नष्टश्चेत्प्रायश्चित्तंकुर्यात् ॥ तद्यथा ॥ ततःकर्ताप्राणानायम्यदेशकालौसंकीर्त्यप्राचीनावीतीअमुकगोत्रस्यामुकशर्मणःप्रेतस्यशवाग्निनाशप्रायश्चित्तंकरिष्येइतिसंकल्प्य ॥ शंनोदेवीतिभस्मावोक्ष्यसमिधमादाय अयंतेयोनिरित्यनेनभस्मनासमिधंस्पृष्ट्वाविधिवल्लौकिकाग्निंप्रतिष्ठाप्य ॥ आजुह्वानःसुप्रतीकःपुरस्ताद ग्नेस्वांयोनिमासींदसाध्या ॥ अस्मिन्त्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॥ उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसꣳसृजेथामयंच ॥ पुनःकृण्वꣳस्त्वापितरंयुवानमन्वातांꣳसीत्वयितंतुमेतं ॥ इतिद्वाभ्यांसमिधमग्नौप्रहृत्यकांचनंब्राह्मणायदद्यात् ॥ ततोदक्षिणाग्रैर्दर्भैरग्निंपरिस्तीर्यपात्रप्रोक्षणकालेप्रोक्षणीपात्रमाज्यस्थालींस्रुवंचप्रत्युज्यस्रुवसंमार्जनांतंकृत्वाग्निंपरिषिच्यस्रुवेणाज्याहुतीर्जुहुयात् ॥ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि ॥ अयंसामनसाधृतोयसाहव्यमूहिषेयानोधेहिभेषजꣳस्वाहा ॥ अयसेग्नयइदं० ॥ अग्निर्होता ॥ अश्विनाध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्रउपवक्ता ॥ सोमःसोमस्यपुरोगाः ॥ शुक्रःशुक्र

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

स्यपुरोगाः ॥ श्रातास्तइंद्रसोमाः ॥ वातापेहवनश्रुतःस्वाहा ॥ अग्नयेपंचहोत्रइदं० ॥ ब्राह्मणएकहोता ॥ सयज्ञः ॥ समेददातु प्रजांपशून्पुष्टिंयशः॥ यज्ञश्चमेभूयात्स्वाहा ॥ ब्राह्मणएकहोत्रइदं० ॥ अग्निर्द्विहोता ॥ सभर्ता ॥ समे० ॥ भर्ताचमेभूयात्स्वाहा ॥ अग्नयेद्विहोत्रइदं० ॥ पृथिवीत्रिहोता ॥ सप्रतिष्ठा ॥ समे० ॥ प्रतिष्ठाचमेभूयात्स्वाहा ॥ पृथिव्यैत्रिहोत्रइदं० ॥ अंतरिक्षंच तुर्होता ॥ सविष्ठाः ॥ समे० ॥ विष्ठाश्चमेभूयात्स्वाहा ॥ अंतरिक्षायचतुर्होत्रइदं० ॥ वायुःपंचहोता ॥ सप्राणः ॥ समे० ॥ प्राणश्चमेभूयात्स्वाहा ॥ वायवेपंचहोत्रइदं० ॥ चंद्रमाःषड्होता ॥ सऋतून्कल्पयाति ॥ समे० ॥ ऋतवश्चमेकल्पन्ताःस्वाहा ॥ चंद्रमसेषड्होत्रइदं० ॥ अन्नꣳसप्तहोता ॥ सप्राणस्यप्राणः ॥ समे० ॥ प्राणस्यचमेप्राणोभूयात्स्वाहा ॥ अन्नायसप्तहोत्रइदं० ॥ द्यौरष्टहोता ॥ सोनाधृष्यः ॥ समे० ॥ अनाधृष्यश्चभूयासꣳस्वाहा ॥ दिवेऽष्टहोत्रइदं० ॥ आदित्योनवहोता ॥ सतेजस्वी ॥ समे० ॥ तेजस्वीचभूयासꣳस्वाहा ॥ आदित्यायनवहोत्रइदं० ॥ प्रजापतिर्दशहोता ॥ सइदꣳसर्वं ॥ समे० ॥ सर्वंचमेभूयात्स्वाहा ॥ प्रजापतयेदशहोत्रइदं० ॥ मनोज्योतिर्जु० घृतेनस्वाहा ॥ मनसेज्योतिषइदं० ॥ यन्मआत्मनोमिंदा० स्वाहा ॥ मिंदवतेग्नय इदं० ॥ पुनरग्निश्चक्षु० क्ष्योःस्वाहा ॥ मिंदवतेग्नयइदं० ॥ भूरग्नयेंचपृथिव्यैचमहतेचस्वाहा ॥ अग्नयेपृथिव्यैमहतइदं०॥ भुवो वायवेंचांतरिक्षायचमहतेचस्वाहा ॥ वायवेंऽतरिक्षायमहतइदं० ॥ सुवरादित्यायचदिवेचमहतेचस्वाहा ॥ आदित्यायदि वेमहतइदं० ॥ भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा ॥ चंद्रमसेनक्षत्रेभ्योदिग्भ्योमहतइदं० ॥ अनाज्ञातं यदा० तथꣳस्वाहा ॥ अग्नयइदं० ॥ पुरुषसंमितो० तथꣳस्वाहा ॥ अग्नयइदं० ॥ यत्पाकत्रा० तिस्वाहा ॥ अग्नयइदं० ॥ भूःस्वाहा ॥ अग्नयइदं० ॥ भुवःस्वाहा ॥ वायवइदं० ॥ सुवःस्वाहा ॥ सूर्यायेदं० ॥ भूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इ॒मंमे॑वरुण० के॒स्वाहा॑ ॥ वरुणायेदं० ॥ तत्त्वा॑यामि॒० षी॒ःस्वाहा॑ ॥ वरुणायेदं० ॥ त्वंनो॑अग्ने॒वरु॑० स्मत्स्वाहा॑ ॥ अग्नीवरुणा
भ्यामिदं० ॥ सत्वंनो॑अग्ने० धि॒स्वाहा॑ ॥ अग्नीवरुणाभ्यामिदं० ॥ त्वम॑ग्नेअ॒या० जꣳस्वाहा॑ ॥ अयसेग्नयइदं० ॥ तंतुं॑त॒न्वन्र
ज॑सो० न॒ꣳस्वाहा॑ ॥ तंतुमतेऽग्नयइदं० ॥ इत्येताद्वात्रिंशदाहुतीर्हुत्वा ॥ स्रुवमग्नौप्रहृत्यनोत्तरपरिषेचनं ॥ एवमग्निसिद्धिः ॥
ततःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंपितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थंसंचयनाख्यं
कर्मकरिष्ये ॥ ततः ॥ यंते॑अ॒ग्निममं॑थामवृष॒भाये॑व॒पक्त॑वे ॥ इ॒मंतꣳश॑मयामसिक्षी॒रेण॑चोद॒केन॑च ॥ यंत्वम॑ग्नेस॒मद॑ह॒स्त्वमु॒निर्वा॑
पया॒पुनः॑ ॥ क्या॒ंबूरत्र॑जायतांपाकदू॒र्वाव्य॑ल्कशा ॥ शीति॑के॒शीति॑कावति॒ह्लादु॑के॒ह्लादु॑कावति ॥ मं॒डू॒क्या॑सुसंग॒मये॒मꣳस्व॑ग्निꣳश॒
मय॑ ॥ शंते॑धन्व॒न्याआप॒ःशमु॑तेसंत्वनू॒क्याः॑ ॥ शंते॑समु॒द्रिया॒आप॒ःशमु॑तेसंतु॒वर्ष्याः॑ ॥ शंते॒स्रवं॑तीस्त॒नुवे॒शमु॑तेसंतु॒कूप्याः॑ ॥
शंते॑नीहा॒रोव॑र्षतु॒शमु॒पृष्वाव॑शीयतां॥ एतैःपंचभिर्मंत्रैरुदुंबरशाखाभिःक्षीरमिश्रेणोदकेनदग्धान्यस्थीन्यवोक्षति ॥ ततोदहनदे
शात्दक्षिणतोंगारान्निरुह्यतस्मिंस्तिस्रआहुतीर्जुहोतिएतैर्मंत्रैः ॥ अव॑सृज॒पुन॑रग्नेपि॒तृभ्यो॒यस्त॒आहु॑त॒श्चर॑तिस्व॒धाभिः॑ ॥ आयु॒र्व
सा॑न॒उप॑यातु॒शेष॒ꣳसंग॑च्छतांत॒नुवा॑जातवेद॒ःस्वाहा॑ ॥ अग्नयेजातवेसइदं० ॥ संग॑च्छस्वपि॒तृभि॒ःसꣳस्व॒धाभि॒ःसमि॑ष्टापू॒र्तेन॑पर॒मे
व्यो॑मन् ॥ यत्र॒भूम्यै॑वृ॒णसे॒तत्र॑गच्छ॒तत्र॑त्वादे॒वःस॑वि॒ताद॑धातु॒स्वाहा॑ ॥ देवायसवित्रइदं० ॥ यत्ते॑कृ॒ष्णःश॑कु॒नआ॑तु॒तोद॑पिपी॒लः
स॒र्पउ॒तवा॒श्वाप॑दः ॥ अ॒ग्निष्टद्विश्वा॑दनृ॒णंकृ॑णोतु॒सोम॑श्च॒योब्रा॑ह्म॒णमा॑वि॒वेश॒स्वाहा॑ ॥ अग्नीषोमाभ्यामिदं० ॥ इतिहुत्वा ॥ ततो
विषमैरुदकुंभैःसम्यगवोक्ष्य ॥ वामहस्तेनीललोहितेसूत्रेबृहतीफलमाबध्याश्मनिवामपदंनिधायावलोकयेत् ॥ वक्ष्यमाणेभ्यः
स्थानेभ्योवक्ष्यमाणैर्मंत्रैरस्थीन्यादत्ते ॥ उत्ति॒ष्ठात॑स्त॒नुव॒ꣳसंभ॑रस्व॒मेहगात्र॒मव॑हा॒माशरी॑रं ॥ यत्र॒भूम्यै॑वृ॒णसे॒तत्र॑गच्छ॒तत्र॑त्वादे॒वः

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सवि॒तादधातु॥ इतिदंतेभ्यःशिरसोवाउद्धृतान्यस्थीनिवाससिकुंभेवानिदधाति ॥ इदंतएकमित्यनेनबाहुभ्यांस्कंधाभ्यां ॥ परऊ
तएकंइतिपार्श्वाभ्यांश्रोणिभ्यां ॥ तृतीयेनज्योतिषासंविशस्वेतिचतुर्थमंत्रेणऊरुभ्यांजंघाभ्यां ॥ संवेशनस्तनुवैचारुरेधिप्रिये
देवानांपरमेसधस्थे ॥ इतिपंचमेनपद्भ्यांसुसंचितमुपसंचित्यभस्मापङ्क्तिशिष्टाचारात् ॥ ततस्तदुपरिशीतलांछायांविधायगो
मयेनोपलिप्य संचयनांगभूतंवेदिकाश्राद्धंकुर्यात्॥ पिंडचतुष्टयंकृत्वा पूर्वेएकंश्मशानवासिनेरुद्रायायंपिंडउपतिष्ठतां ॥ उत्तरे
श्मशानवासिभ्यःप्रेतेभ्यःअयंपिंडउपतिष्ठतां ॥ मध्येएकंअमुकगोत्रायामुकप्रेतायअयंपिंडउपतिष्ठतां ॥ पश्चिमेवायसेभ्यः
अयंपिंडउपतिष्ठतां ॥ प्रत्येकंपादुकाद्वेद्वेएवंषट्॥ छत्रत्रयं ॥ ध्वजत्रयं ॥ पादुकाध्वजपोलिकायुतःसोदकुंभोभोजनार्थंअयंपिंड
उपतिष्ठतां ॥ इतिसर्वत्र ॥ गोमूत्रेणहस्तौप्रक्षाल्यवायसपिंडंवायसोयावद्भक्षयेत्तावत्तिष्ठेत् ॥ बलीनामुपरितिलकल्काद्यवकीर्य
प्रार्थयेत् ॥ येत्रश्मशानदेवाःस्युर्भगवंतःसनातनाः ॥ तेस्मत्सख्यायगृह्णंतुबलिमष्टांगमक्षयं ॥ प्रेतस्यास्यशुभाँल्लोकान्प्रयच्छं
तुचशाश्वतान् ॥ अस्माकमायुरारोग्यंसुखंददतुवैचिरात् ॥ इतिसंप्रार्थ्य ॥ उत्तिष्ठ॒प्रेहि॒प्रद्र॒वौक॑ःकृणुष्वपर॒मेव्यो॑मन् ॥ य॒मेन॒
त्वंय॒म्यासंविद॒ानोत्त॒मंना॒कमधिरोहेमं ॥ इत्युपतिष्ठेत् ॥ ततःपृथिव्यास्तांप्रक्षिप्य ॥ अ॒पामोष॑धीना॒ꣳरसेनास्वर्गेलोकेभिवपा
मिअमुकप्रेतेतिअरण्येशम्याःपलाशस्यवाप्रत्यगधोदेशेस्थिकुंभंपिहितमुखंनिदधाति ॥ संचयनदिनेप्रेतशरीराच्छादनार्थंवस्त्रं
दद्यात् ॥ संचयनश्राद्धंकुर्यात् ॥ नामगोत्राद्युच्चार्यअस्थिसंचयनश्राद्धंकरिष्ये ॥ प्रेतस्थानेकुशासनमुपतिष्ठतु ॥ पिष्ट
पिंडंकृत्वाअमुकस्यास्थिसंचयनश्राद्धेसक्तुपिंडउपतिष्ठतु ॥ पाद्यादिअर्चनं॥ पिंडंगंगादौप्रक्षिप्यस्नायात् ॥ अंतर्दशाहेयस्यास्थि
गंगायांयदिमज्जति ॥ गंगायांमरणंयद्वत्तद्वत्पुण्यंलभेद्ध्रुवं ॥ इतिअस्थिसंचयनविधिः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३४४ ॥ उदकक्रियापिंडक्रिया ॥

श्रीः ॥ नदीतडागादौगत्वातूष्णींस्नात्वाअंगादिघषर्णंनकुर्यात् ॥ देशकालौसंकीर्त्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंपि
तृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थंमरणदिनात्प्रथमेहनिउदकक्रियांकरिष्ये इतिसंकल्प्य ॥ अव्रणमेकंपाषाणमादाय तस्योपरि
एकंकुशपत्रंस्थापयित्वाततःस्नात्वा ॥ देशकालौसंकीर्त्यनामगोत्राद्युच्चार्यदाहजनितपीडोपशमनार्थंमृत्तिकास्नानमहंकरिष्ये ॥
मृदमादायसूर्यायदर्शयित्वाशिरःप्रभृत्यंगानिविलिप्य ॥ धातापुनातुसवितापुनातु ॥ अग्नेस्तेजसासूर्यस्यवर्चसा ॥ इतिस्नात्वा
चम्य ॥ एवंप्रतिदिनंदशाहांतं ॥ ततःकुशोपर्यश्मानंप्रतिष्ठाप्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्तिपितृत्वप्राप्त्योत्तमलोक
प्राप्त्यर्थंदाहजनिततापोपशमनार्थंअश्मोपरितिलतोयांजलिरुपतिष्ठतु ॥ एवंप्रतिदिनंपितृतीर्थेनांजलिंदद्यात् ॥ एवंप्रतिदिनं
दशदशएवंशतंभवंति ॥ अथवाप्रतिदिनंत्रींस्त्रीन्दद्यात् ॥ तत्पक्षेत्रिंशद्भवंति ॥ प्रतिदिनमेकैकंवाएवंदशभवंति ॥ अथवाप्रथ
मेएकंद्वितीयेद्वौएवमेवोत्तरवृद्ध्यादशदिनंदद्यात् ॥ एवंपंचपंचाशद्भवंति ॥ एषुपक्षेषुअन्यतमंकुर्यात् ॥ प्रत्यंजलिस्नानंकुर्यात् ॥
एतदंजलिदानंप्रथमदिनादशमदिनपर्यंतंएकस्मिन्नेवस्थानेविधेयं ॥ पाषाणकूर्चौप्रज्ञातौस्थाप्यौ ॥ एतच्चज्ञातयोबांधवाश्च
यथाचारंकुर्युः ॥ ततःस्नात्वोत्तरीयोदकंपाषाणोपरिनिष्पीडयेत् ॥ ततःस्वगृहेगोष्ठेनदीतीरेवाताम्रपात्रेचरुंश्रपयित्वापिंडक्रि
यांकुर्यात् ॥ देशकालौसंकीर्त्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंपितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थंपिंडक्रियांकरिष्ये ॥ एवं
चरुमभिघार्योद्वास्यपिंडपितृयज्ञकल्पेनतूष्णींभूमिमुल्लिख्यावोक्ष्यबर्हिरास्तीर्यामुकगोत्रामुकप्रेतप्रथमेहनिमूर्धावयवनिष्पत्त्यर्थं
अयंतेपिंडउपतिष्ठतामितिचरोःसुदृढंपिंडंकृत्वाबर्हिषिनिदधात् ॥ एतामनुमंत्रणमंजनाभ्यंजनदशादानतिलोदकलेपोदकोपस्था

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नभृंगराजतुलसीदलचालनप्रवाहणानिप्रेतमुद्दिश्यपिंडोपरिपितृतीर्थनोपतिष्ठताइतितूष्णींदद्यात् ॥ अनादिनिधनोदेवःशंख चक्रगदाधरः ॥ अक्षय्यःपुंडरीकाक्षःप्रेतमुक्तिप्रदोभवेतिवदेत् ॥ इदंपिंडदानंसतिलोदकंप्रेताप्यायनमस्त्वितिभवंतोब्रुवंतुप्रे ताप्यायनमस्त्वितिब्राह्मणाब्रूयुः ॥ अभिरम्यतामितिविसर्जयेत् ॥ अभिरतास्मः ॥ इतिप्रतिवचनं ॥ अप्सुपिंडंनिक्षिपेत् ॥ ततःस्नात्वागृहमागच्छेत् ॥ उत्तरीयशिलाकूर्चपात्रकर्तृवक्तृचरुद्रव्यस्थानविपर्ययंनकुर्यात् ॥ ॥ छ ॥ ॥ छ ॥

॥ ३४५ ॥ नग्नप्रच्छादनश्राद्धं ॥

तंडुलवस्त्रोदकुंभसदीपलोहपात्रकांचनलवणघृततिलमुद्गकार्पासदक्षिणाभूषणानिउपानहौचाग्रेनिधायमनुष्यलोकात्प्रेतलोकं गच्छतःपथिपरिव्ययार्थंतंडुलादिद्रव्याणिसर्वाण्युपतिष्ठंतु ॥ ततःपिंडंदत्वास्नानंकुर्यात् ॥ पिंडसमीपेअमुकगोत्रस्यामुकप्रे तस्याच्छादनार्थंवस्त्रमुपतिष्ठतां ॥ इतिवस्त्रंदत्वातद्ब्राह्मणायदद्यात् ॥ इतिनग्नप्रच्छादनश्राद्धं ॥ ॥ छ ॥

॥ ३४६ ॥ नवश्राद्धानि ॥

तानिप्रथमतृतीयपंचमसप्तमनवमैकादशसुदिनेषुभवंतितानिद्विजाभावेपाकेनामेनवाकार्याणि ॥ देशकालौसंकीर्त्यामुकगोत्रस्या मुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंविषमश्राद्धंकरिष्ये ॥ पाकपक्षेचरुंश्रपयित्वाभिघार्योद्वास्यपिंडार्थंपृथक्कृत्वाशेषंपात्रेपरिविष्या मुकगोत्रस्यामुकप्रेतस्यनवश्राद्धेएतदासनमुपतिष्ठतु ॥ वाराहे ॥ गतोसिदिव्यलोकंत्वंकृतांतविहितार्थतः ॥ मनसावायु भूतेनप्रेतेत्वाहंनियोजये ॥ पूजयिष्यामिभोगैस्त्वामेवंविप्रंनिमंत्रयेत् ॥ आवाहनेपितत्रैव ॥ इहलोकंपरित्यज्यगतोसिपरमां गतिं ॥ मनसावायुरूपेणपिंडेत्वांयोजयाम्यहं ॥ इत्येकत्रासनंविधायतूष्णींतिलैरभ्यर्च्यएकपवित्रेणार्घ्यंदद्यात् ॥ अमुकगोत्र

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रेतेदमर्घ्यमुपतिष्ठतां ॥ गंधादिनातिलैरभ्यर्चयित्वामुकगोत्रायप्रेतायेदमन्नंसोपस्करमुपतिष्ठतु ॥ आचमनीयतांवूलेदद्यात् ॥ ततस्तूष्णींशुद्धभूमाववयवपिंडवदुल्लेखनादिविधायामुकगोत्रामुकप्रेतविषमश्राद्धेयंतेपिंडउपतिष्ठतु ॥ ऊष्मावलोकनादितूष्णीं दद्यात् ॥ चालनप्रवाहणादिपिंडदानविध्यनुसारेणतूष्णींकुर्यात् ॥ किंचिद्दक्षिणांदद्यात् ॥ आमपक्षेपिष्टेनपिंडः ॥ ततःस्ना यात् ॥ एतानिनवश्राद्धानिएकद्रव्येणैवकर्तव्यानि ॥ यदापूर्वदिनेमरणंतदाद्वितीयदिनेप्रथमदिनस्थांउदकक्रियांपिंडक्रियां चकृत्वातद्दिनस्थांकुर्यात् ॥ एकेनैवपाकेनपिंडद्वयंभवति ॥ दशसुदिनेषुभुज्यमानमन्नतांवूलादिप्रेतमुद्दिश्यसमर्पयेत् ॥ कर्ता भोजनकालेपात्रस्थंसघृतंकिंचिदन्नमादायामुकप्रेतायेदमन्नमुपतिष्ठतां ॥ भोजनपात्रसमीपेदशाहंदद्यात् ॥ दशसुदिनेषुभोज नस्थानविपर्ययोनकार्यःहविष्यान्नमेवभुंजीरन् ॥ दशदिनपर्यंतंपुनर्भोजनगंधतांवूलकज्जलैकशय्यांज्ञातयःपुरुषाःस्त्रियश्चवर्ज येयुः ॥ भूमावेवपृथक्पृथक्शयीरन् ॥ कर्त्रातुपतितादिसंभाषणंनकर्तव्यं ॥ इतिप्रथमदिनकृत्यं ॥ ॥

॥ ३४७ ॥ द्वितीयदिनादिविधिः ॥

पूर्वदिनस्वीकृतदेशंगत्वादेशकालौस्मृत्वामुकगोत्रस्यामुकप्रेतस्येत्यंतमुक्त्वाप्रेतत्वनिवृत्त्यर्थं० हनिद्वितीयदिनविधिंकरिष्ये ॥ पूर्ववदश्मोपरितिलतोयांजलिंदद्यात् ॥ ततश्चरुंश्रपयित्वा ॥ अद्येत्यादिअमुकगोत्रस्य० चक्षुःश्रोत्रनासावयवनिष्पत्त्यर्थंअव यवपिंडमुपतिष्ठतामितिदर्भोपरिपिंडंदत्वाऊष्मानुमंत्रणादितिलोदकभृंगराजतुलसीदलदानांतंपूर्ववत् ॥ अनादिनिधनोदेवः० भव ॥ पिंडंप्रवाह्यस्नायात् ॥ अथतृतीयदिनकृत्यं ॥ आचम्यसंकल्प्यतृतीयदिनविधिंकरिष्ये ॥ तिलांजलिदानांतंपूर्ववत् कृत्वा ॥ स्नात्वा ॥ अद्येत्यादि० तृतीयेहनिप्रेतत्वनिवृत्त्यर्थंअयंपिंडउपतिष्ठतामितिपिंडंदत्वाऊष्मा

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नुमंत्रणादिपिंडप्रवाहणस्नानांतंपूर्ववत् ॥ ततःस्नात्वा ॥ विषमश्राद्धंप्रथमदिनवत्कुर्यात् ॥ अथचतुर्थदिनकृत्यं ॥ संक
ल्पांजलिदानस्नानांतंपूर्ववत् ॥ अद्येत्यादि० अमुकगोत्रस्यामुकप्रेतस्यपार्ष्णिकुक्षिकटिनाभिगुदलिंगावयवनिष्पत्त्यर्थंअयंपिंड
उपतिष्ठतां० इतिपिंडंदत्वाऊष्मानुमंत्रणादिपिंडप्रवाहणस्नानांतंपूर्ववत् ॥ अथपंचमदिनकृत्यं ॥ संकल्पांजलिदानस्नानां
तंपूर्ववत् ॥ अद्येत्या० अमुकगोत्रस्यामुकप्रेतस्यऊरुजानुजंघावयवनिष्पत्त्यर्थंअयंपिंड० मितिदत्वा ॥ ऊष्मानुमंत्रणादिपिंड
प्रवाहणस्नानांतंपूर्ववत् ॥ पंचमदिनेविषमश्राद्धंपूर्ववत् ॥ अथषष्ठदिनकृत्यं ॥ संकल्पांजलिदानस्नानांतंपूर्ववत् ॥ अद्येत्या
दिअमुकगोत्रस्यामुकप्रेतस्यगुल्फपादांगुलिमर्माद्यवयवनिष्पत्त्यर्थं ॥ अयंपिंड० मितिपिंडंदत्वा ॥ ऊष्मानुमंत्रणादिपिंडप्रवा
हणस्नानांतंपूर्ववत् ॥ अथसप्तमदिनकृत्यं ॥ संकल्पादिअंजलिदानस्नानांतंपूर्ववत् ॥ अद्येत्यादिअमुकगोत्रस्यामुकप्रेतस्य
अस्थिमज्जाशिरावयवनिष्पत्त्यर्थंअयंपिंड० मितिपिंडंदत्वाऊष्मानुमंत्रणादिपिंडप्रवाहणस्नानांतंपूर्ववत् ॥ पूर्ववद्विषमश्राद्धं
कुर्यात् ॥ अथाष्टमदिनकृत्यं ॥ संकल्पादिअंजलिदानस्नानांतंपूर्ववत् ॥ अद्येत्याद्यमुकगोत्रस्यामुकप्रेतस्यनखरोमाद्यवयव
निष्पत्त्यर्थंअयंपिंड० मितिपिंडंदत्वाऊष्मानुमंत्रणपिंडप्रवाहणस्नानांतंपूर्ववत् ॥ अथनवमदिनकृत्यं ॥ संकल्पांजलिदानांतं
पूर्ववत्॥ अद्येत्यादि०सर्वावयवसंपत्त्यैअयंपिंडउपतिष्ठतामितिपिंडदानोष्मानुमंत्रणपिंडप्रवाहणस्नानांतंविषमश्राद्धंचपूर्ववत्॥

॥ ३४८ ॥ दशमदिनविधिः ॥

पूर्वदिनस्थानेगत्वानित्यवत्संकल्पादिअंजलिदानस्नानांतंकृत्वाचरुंश्रपयित्वा ॥ अद्येत्यादिसंकल्प्यअमुकगोत्रस्यप्रेतस्यक्षु
त्पिपासानिवृत्त्यर्थंअयंपिंडउपतिष्ठतामितिपिंडदानोष्मानुमंत्रणादिपिंडप्रवाहणादिकुर्यात् ॥ ततःकर्त्रासर्वेबांधवाःप्रार्थिताःसं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

बंधिनश्चत्रींस्त्रीन्धर्मोदकांजलीनेकैकंवाजलतीरेप्रेतोद्देशेनदद्युः ॥ ततःपुत्रादयोयथाचारंकेशश्मश्रुवपननखच्छेदादिकृत्वास्नानं कुर्युः ॥ अथेदंकेषांचिन्मतेनदशमदिनकृत्यं ॥ ततोदशमदिनेमृदात्रिकोणांदक्षिणप्रवणांवेदिंकृत्वागोमयेनसंमृज्यहरिद्रादिनालं कृत्यतत्रकुंभपंचकंजलपूर्णंस्थापयेत् ॥ तदुपर्योदनपिंडान्पंचदद्यात् ॥ अमुकगोत्रायामुकप्रेतायक्षुत्पिपासानिवृत्त्यर्थंअयंपिंडः सोदकुंभउपतिष्ठतामितिमध्येप्रेताय ॥ पूर्वेप्रेतसखिभ्यः ॥ दक्षिणेवैवस्वतायययमाय ॥ पश्चिमेवायसेभ्यः ॥ उत्तरेप्रेताधिप तयेरुद्रायइतिपिंडंदत्वापिंडोपरितिलोदकंदत्वापादुकाछत्रपोलिकापताकादिप्रत्येकंतेभ्यस्तेभ्यःपृथगुपतिष्ठतामितिदद्यात् ॥ ततःपश्चिमस्थंपिंडंवायसोयावद्भक्षयतितावत्तिष्ठेत् ॥ अश्मानंतैलेनाभ्यज्यजलेक्षिपेत् ॥ ततःसर्वेसगोत्रायथादेशाचारंति लामलकादिनास्नात्वाशुक्लवाससोगृहंगत्वातत्रैवभुंजीरन्नितिदेशाचारः ॥ इतिदशमदिनकृत्यं ॥ ॥ छ ॥

॥ ३४९ ॥ एकादशाहेवृषोत्सर्गः ॥

प्रातःस्पृष्टानांमृद्भांडानांत्यागः स्पृष्टसर्ववस्त्रप्रक्षालनंगृहानुलेपनंचकृत्वास्नात्वाविधिवत्पंचगव्यंकृत्वाप्राश्नीयात् ॥ ततोवि षमश्राद्धंपूर्ववत्कृत्वास्नात्वावृषोत्सर्गंकुर्यात् ॥ (कार्तिक्यांमाघ्यांवैशाख्यांपौर्णिमास्यांस्मृत्युक्तपुण्यंकालेषुवा पूर्वेद्युरुपोष्यतद्दि नेनांदीश्राद्धंविधायवृषोत्सर्गंकुर्यात्)[1] ॥ एकादशेह्निप्रेतस्ययस्यनोत्सृज्यतेवृषः ॥ प्रेतत्वंसुस्थिरंतस्यदत्तैःश्राद्धशतैरपि ॥ प्रेतार्थ वृषोत्सर्गेतुएकोद्दिष्टविधिनाष्टौब्राह्मणान्भोजयेत् ॥ अत्रनाचार्यवरणंकिंतुस्वयमेवकुर्यात् ॥ अथप्रयोगः ॥ कर्तायज्ञोपवीती प्राङ्मुखउपविश्यप्राणानायम्यदेशकालौसंकीर्त्यपितुर्गोत्रस्यशर्मणःप्रेतस्यैकादशेहनिप्रेतत्वनिवृत्तिपितृत्वप्राप्त्योत्तमलोकप्राप्त्य

१ अत्रत्यधनुश्चिह्नान्तःपतितवाक्यस्थंकार्तिक्यादिकथनंनांदीश्राद्धोद्देशादिदंचकाम्यवृषोत्सर्गपरंज्ञेयं ।

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्थंवृषोत्सर्गंकरिष्येइतिसंकल्प्य ॥ स्थंडिलेऽध्वरनामानमग्निंप्रतिष्ठाप्यचरुंश्रपयित्वाग्निंप्रज्वाल्यसमित्रयमादायश्रद्धएहीत्यादि
वृषोत्सर्गहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामिजातवेदसमग्निमिध्मेनयक्ष्येआघारहोमेत्यादि० प्रधानांतमु
क्त्वावैशेषिकप्रधानहोमेरुद्रमृडंचरुणापर्जन्यंचरुणाइंद्रंचरुणाप्रजापतिंचरुणाइहधृतिंचरुणाइहविधृतिंचरुणाइहरतिंचरुणाइ
हरमतिंचरुणाअदितिंद्विश्चरुणाअग्निꣳस्विष्टकृतंचरुणायक्ष्ये ॥ वरुणंद्विरित्यादिजयादीन्कृत्वादर्व्याज्यस्थाल्यौषट्पात्राणिप्रयु
ज्याग्निमुखांतेस्रुच्युपस्तीर्यचरुंद्विरवदायाभिघार्यैवंचतुरवदाय ॥ मयोभूर्वातोअभिवातूस्राऊर्जस्वतीरोषधीरारिशंतां ॥ पीवस्वती
र्जीवधन्याःपिबंत्ववसायपद्वतेरुद्रमृडस्वाहा ॥ रुद्रमृडायेदं० ॥ याःसरूपाविरूपाएकरूपायासामग्निरिष्ठानामानिवेद ॥ याअं
गिरसस्तपसेहचक्रुस्ताभ्यःपर्जन्यमहिशर्मयच्छस्वाहा ॥ पर्जन्यायेदं० ॥ यादेवेषुतनुवमैरयंतयासाꣳसोमोविश्वारूपाणिवेद ॥
ताअस्मभ्यंपयसापिन्वमानाःप्रजावतीरिंद्रगोष्ठारीरिहिस्वाहा ॥ इंद्रायेदं० ॥ प्रजापतिर्मह्यमेतारराणोविश्वैर्देवैःपितृभिःसंवि
दानः ॥ शिवाःसतीरुपनोगोष्ठमाकस्तासांवयंप्रजयासꣳसदेमस्वाहा ॥ प्रजापतयइदं० ॥ इहधृतिःस्वाहा ॥ धृत्याइदं० ॥ इह
विधृतिःस्वाहा ॥ विधृत्याइदं० ॥ इहरंतिःस्वाहा ॥ रंत्याइदं० ॥ इहरमतिःस्वाहा ॥ रमत्याइदं० ॥ महीमूषुमातरꣳसुव्रतानां
मृतस्यपत्नीमवसेहुवेम ॥ तुविक्षत्रामजरंतीमुरूचीꣳसुशर्माणमदितिꣳसुप्रणीतिꣳस्वाहा ॥ अदित्याइदं० ॥ सुत्रामाणंपृथिवींद्यामं
नेहसꣳसुशर्माणमदितिꣳसुप्रणीतिं ॥ दैवींनावꣳस्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तयेस्वाहा ॥ अदित्याइदं० ॥ अग्नयेस्वि
ष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ जयादीन्हुत्वा ॥ परिधिप्रहरणांतंकृत्वापरिषिच्य ॥ वृषवत्सतरींवस्त्रादिभिरलंकृत्य ॥
अथवायोरेकादशपुरुषस्यैकादशस्त्रीकस्य ॥ प्रभ्राजमानानाꣳरुद्राणाꣳस्थानेस्वतेजसाभानि ॥ व्यवदातानाꣳरुद्राणाꣳस्थानेस्वते

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जसाभानि ॥ वासुकिवैद्युतानाꣳरुद्राणाꣳस्थाने० ॥ रजतानाꣳरुद्राणाꣳस्थाने० ॥ पुरुषाणाꣳरुद्राणाꣳस्थाने० ॥ श्यामाना ꣳरुद्राणाꣳस्था० ॥ कपिलानाꣳरुद्राणाꣳस्था० ॥ अतिलोहितानाꣳरुद्राणाꣳस्था० ॥ ऊर्ध्वाणाꣳरुद्राणाꣳस्था० ॥ अवपतं तानाꣳरुद्राणाꣳस्था० ॥ वैद्युतानाꣳरुद्राणाꣳस्था०॥ प्रभ्राजमानीनाꣳरुद्राणीनाꣳस्था० ॥ व्यवदातीनाꣳरुद्राणीनाꣳस्था० ॥ वासुकिवैद्युतीनाꣳरुद्राणीनाꣳस्था० ॥ रजतीनाꣳरुद्राणीनाꣳस्था० ॥ पुरुषाणाꣳरुद्राणीनाꣳस्था० ॥ श्यामानाꣳरुद्राणीनाꣳ स्था० ॥ कपिलानाꣳरुद्राणीनाꣳस्था० ॥ अतिलोहितीनाꣳरुद्राणीनाꣳस्था० ॥ ऊर्ध्वानाꣳरुद्राणीनाꣳस्था० ॥ अवपतंतीनाꣳ रुद्राणीनाꣳस्था० ॥ वैद्युतीनाꣳरुद्राणीनाꣳस्था० ॥ ॐभूर्भुवःसुवः ॥ रूपाणिवोमिथुनंमानोमिथुनꣳरीढ्वं ॥ इत्येकमनुवाकंप ठित्वा ॥ एतंयुवानंपरिवोददामितेनक्रीडंतीश्चरतप्रियेण ॥ मानःशाप्तजनुषांसुभागारायस्पोषेणसमिषामदेम ॥ नमोमहिम्न उतचक्षुषेतेमरुतांपितस्तदहंगृणामि ॥ अनुमन्यस्वसुयजायजामजुष्टदेवानामिदमस्तुहव्यं ॥ देवानामेषउपनाहआसीदपांगर्भ्ओ षधीषुन्यक्तः ॥ सोमस्यद्रप्समंवृणीतपूषा १ बृहन्नद्रिरभवत्तदेषां ॥ पितावत्सानांपतिरघ्न्यानामथोपितामहतांगर्गराणां ॥ वत्सो जरायुप्रतिधुक्पीयूषआमिक्षामस्तुघृतमस्यरेतः ॥ त्वांगावोवृणतराज्यायत्वाꣳहवंतमरुतःस्वर्काः ॥ वर्ष्मन्क्षत्रस्यककुभिःशिश्रि याणस्ततोनउग्रोविभजावसूनि ॥ व्यृद्धेनवाएषपशुनायजतेयस्यैतानिनक्रियंतएष २ हत्वैसमृद्धेनयजतेयस्यैतानिक्रियन्ते ॥ इत्यंतंपंचमंत्रान्पठेत् ॥ पितुःगोत्रस्यप्रेतस्यप्रेतत्वनिवृत्तिपितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थंयथेष्टंविहर्तुमयाएषवृषउत्सृष्टइत्युक्त्वा त्रिशूलचक्रादिलांछनंकृत्वा ॥ दक्षिणपार्श्वेत्रिशूलं ॥ वामेजघनेचक्राकारं ॥ सव्यस्फिचिलिखेच्चक्रंशूलंबाहौतुदक्षिणे ॥ प्रत्यङ्मुखं वृषंउत्सृजेत् ॥ कल्पकारिकायां ॥ शूलंचक्रंतथान्यद्वालांछनंकारयेत्तथा ॥ यस्यदेवस्ययोभक्तस्तत्तच्चिह्नंसमालिखेत् ॥ ततोद्विहाय

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नमेकहायनंवाजीववत्सायाःपयस्विन्याःपुत्रंनीलादिवर्णं ॥ लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडु[illegible]
वृषउच्यते ॥ अत्यंताशक्तविषयेग्रंथांतरं ॥ वृषोत्सर्जनवेलायांवृषाभावेकथंचन ॥ मृद्भिःपिष्टैश्चदर्भैर्वावृषंकृत्वाविमोचयेत् ॥ न
शक्यतेवृषोत्सर्गोहोमंवातत्रकारयेत् ॥ ईप्सितंयथालाभंवाआनीयचतस्रोद्वावेकांवाएकवर्षाधिकांवत्सतरीमानीयवत्सतरीसहि
तस्यवृषस्यमंत्रैरभिषेकःकार्यः ॥ आपोहिष्ठेतितिसृभिः ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ कस्त्वा
सत्योमदानांमꣳहिष्ठोमत्सदंधसः ॥ दृढाचिदारुजेवसु ॥ अभीषुणःसखीनामविताजरितॄणां ॥ शतंभवास्यूतिभिः ॥ वृषवत्स
तरिकंगंधपुष्पवस्त्रभूषणादिभिर्यथाशक्त्यलंकृत्य ॥ ऋषभंमासमानानांसपत्नानांविषासहिं ॥ हंतारंशत्रूणांकृधिविराजंगोपतिं
गवां ॥ इतिकृतांजलिपुटोजपेत् ॥ ततःप्रांचमुत्सृजेत् ॥ व्रजंतमनुमंत्रयीत ॥ ततोग्निमलंकृत्याथाग्नेरष्टपुरुषस्यपुरस्तात्प्रभृतिः ॥
अथाग्नेरष्टपुरुषस्य ॥ अग्नेःपूर्वदिश्यस्यस्थानेस्वतेजसाभानि ॥ जातवेदसउपदिश्यस्यस्थाने० ॥ सहोजसोदक्षिणदिश्यस्यस्थाने० ॥
अजिराग्रभवउपदिश्यस्यस्थाने० ॥ वैश्वानरस्यापरदिश्यस्यस्था० ॥ नर्यापसउपदिश्यस्यस्था० ॥ पंक्तिराधसउदग्दिश्यस्यस्था० ॥
विसर्पिणउपदिश्यस्यस्था० ॥ ॐभूर्भुवःसुवः ॥ दिशोवोमिथुनंमानोमिथुनꣳरीढ्वं ॥ इत्यग्निमुपस्थाय ॥ भोभोवृषसुखंगच्छ
जलंपिबतृणंभक्षगवांपृष्ठतःसन्विचरअस्मत्कुलंपुनीहिइत्यादिपठित्वा ॥ ब्राह्मणेभ्योदक्षिणांदद्यात् ॥ सभर्तृकस्त्रीविषयेतुनवृ
षोत्सर्गः ॥ पतिपुत्रवतीनारीभर्तुरग्रेमृतायदि ॥ वृषंनैवोत्सृजेत्पुत्रोयावत्पितरिजीवति ॥ ततोवृषपुच्छेप्रेतनामगोत्राद्युच्चार्यत
र्पणंकुर्यात् ॥ इतिकेचित् ॥ वृषोत्सर्गसांगतासिध्यर्थंतिलानुदकुंभंगांवासोहिरण्यंचब्राह्मणेभ्योदद्यात् ॥ दक्षिणांचदद्यात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३५० ॥ आद्यश्राद्धं ॥

श्रीः ॥ आद्यश्राद्धमशुद्धोपिकुर्यादेकादशेहनि ॥ कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरेवसइति ॥ तत्रब्राह्मणाभावेनूतनभांडेन्ना दिकंवाचयित्वाविधिवद्धोमः ॥ कुंडंकृत्वाकर्ताप्राणानायम्य ॥ प्राचीनावीतीअमुकगोत्रस्यामुकशर्मणःपित्रादेःप्रेतस्यमृताहादेका दशेहनिप्रेतत्वविमुक्त्यर्थंपितृत्वप्राप्त्यर्थंअग्नावेकोद्दिष्टविधिनाद्यश्राद्धंकरिष्येइतिसंकल्प्य ॥ कुंडमध्ये ॥ अपेत वीतविचसर्पतातोयेत्रस्थपुराणायेचनूतनाः ॥ अदादिदंयमोवसानंपृथिव्याअकैनिमंपितरोलोकमस्मै ॥ इतिमंत्रेणसम्यक्प्रमृ ज्याभ्युक्ष्यपात्रेणवह्निमादायकुंडसमीपेनिधायाद्यैकोद्दिष्टश्राद्धेभवद्भिःक्षणःप्रसादनीयः ॥ इत्यग्निंप्रतिष्ठाप्यपाद्याद्यर्चनांतमग्नेरे वकृत्वान्नमादायपित्रेगोत्रायशर्मणेप्रेतायस्वाहेतिप्रेताहुतिंहुत्वाकुंडस्योत्तरतएकस्मिन्पात्रेन्नादिकंपरिविष्यकुंडंपात्रंचपरिस्तीर्य परिषिच्यपृथिवीतेपात्रंद्यौरपिधानंअग्नेस्त्वामुखेप्राणापानयोर्जुहोम्यक्षितमसिमामेक्षेष्ठाअमुत्रामुष्मिन्लोकेइदंविष्णुरित्यन्ननिवे दनंकृत्वापोशनंदत्वाप्राणाहुतीर्जुहुयात् ॥ यत्तेकृष्णःशकुनआतुतोदपिपीलःसर्पउतवाश्वापदः ॥ अग्निष्टद्विश्वादनृणंकृणोतुसो मश्चयोब्राह्मणमाविवेशस्वाहा ॥ अग्नीषोमाभ्यामिदं० ॥ केचित्सोमायेतिवदंति ॥ ततस्तृप्तिरित्युक्त्वापोशनंदद्यात् ॥ ततः पित्रेगोत्रायशर्मणेप्रेतायायंपिंडउपतिष्ठताम् ॥ इतिपिंडंदत्वा ॥ ब्राह्मणायदक्षिणांदद्यात् ॥ ततःशेषमन्नंपिंडंचाग्नौश्रपयेत् ॥ अप्सुवानिक्षिपेत् ॥ ततःस्नात्वानेनैवविधिनामहैकोद्दिष्टंकुर्यात् ॥ ततःस्नात्वा ॥ ॥ छ ॥ ॥ छ ॥

॥ ३५१ ॥ रुद्रगणश्राद्धं ॥

देशकालौसंकीर्त्यप्राचीनावीतीअमुकगोत्रस्यप्रेतस्यएकादशेहनिरुद्रगणश्राद्धंकरिष्ये ॥ तिलोदकादिकृत्वा अजैकपदेअहिर्बु

CC-0. In Public Domain.Funding by MoE-IKS

॥३९१॥

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ध्यायकपालिनेहरायबहुरूपायत्र्यंबकायअपराजितायवृषाकपयेशंभवेकपर्दिनेरैवतायएभिर्नामपदैरेकादशसुब्राह्मणेषुदैवेनवि
धिनान्नसमर्पणंकुर्यात् ॥ प्रेतोद्देशपक्षेअजैकपादरूपिणेप्रेतायेदमासनमित्यादिज्ञेयं ॥ पिंडदानार्घ्याग्नौकरणविकिरादिनास्ति ॥
भोजनांतेदक्षिणांदत्वाविसर्जयेत् ॥ इतिरुद्रगणश्राद्धं ॥ ॥ छ ॥ ॥ छ ॥

॥ ३५२ ॥ वसुगणश्राद्धं ॥

वसुगणनामानि ॥ ध्रुवोध्वरश्चसोमश्चआपश्चैवानिलोनलः ॥ प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः ॥ अष्टसुब्राह्मणेषुवसूनावा
ह्यभोजनंआमान्नंवादद्यात् ॥ पिंडाद्यभावः ॥ इतिवसुगणश्राद्धं ॥ इदंतुकृताकृतं ॥ ॥ छ ॥ ॥ छ ॥

॥ ३५३ ॥ पंचदशश्राद्धानि ॥

इमानिसपिंडीकरणाधिकारार्थंएकादशेद्वादशेहनिवा ॥ ऊनमासिकाद्यूनाब्दिकांतानिपंचदशश्राद्धान्यपकृष्यैकतंत्रेणकरिष्ये ॥
अमुकगोत्रस्यामुकप्रेतस्यऊनमासिकश्राद्धेआसनमुपतिष्ठतु ॥ इत्यादिसर्वत्रयोज्यं ॥ द्वितीयमासिके० ॥ त्रैपक्षिके० ॥ तृतीय
मासिके० ॥ चतुर्थमासिके० ॥ पंचममासिके० ॥ षष्ठमासिके० ॥ ऊनषष्ठमासिके० ॥ सप्तममासिके० ॥ अष्टममासिके० ॥
नवममासिके० ॥ दशममासिके० ॥ एकादशमासिके० ॥ द्वादशमासिके० ॥ ऊनाब्दिके० ॥ एतदासनमुपतिष्ठतु ॥ उप
चारेषुगायत्रींमनसास्मरेत् ॥ पंचदशार्घ्यपात्राणिएकदर्भपवित्रसहितान्यासनानांसमीपेआसाद्य ॥ अमुकगोत्रायामुकप्रेतायते
जुष्टंगृह्णामिइतिपंचदशपात्रेषूदकंनिधायगंधादिक्षिप्त्वागायत्र्यानुमंत्र्यअमुकगोत्रामुकप्रेतऊनमासिकश्राद्धेइदंतेअर्घ्यमुपतिष्ठ
तां॥द्वितीयादावेवमूह्यं॥ इदमन्नंसोपस्करमामान्नंवामल(१)पात्रविवर्जितंसोपस्करंसदक्षिणमुपतिष्ठतां॥ तांबूलादिदत्वापिंडपि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तृयज्ञकल्पेनपिंडदानंकुर्यात् ॥ एकोद्दिष्टविधिनासर्वंसमापयेत् ॥ यदिवर्षांतमलमासआपतेत्तदातस्मिन्कृतमपिशुद्धेपुनःकार्यं ॥

॥ ३५४ ॥ दशदानानि ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालौनिर्दिश्यअमुकगोत्रस्यपित्रादेःपरलोकोपकारकाणिपूर्वसंकल्पितानिदशदानानिकरिष्ये ॥ गोभूतिलहिरण्याज्यवासोधान्यगुडानिच ॥ रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमात् ॥ विप्रंसंपूज्य ॥ ॥ गोप्रदानं ॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ भूमिदानं ॥ सर्वेषामाश्रयाभूमिर्वराहेण समुद्धृता ॥ अनंतस्यफलदाअतःशांतिंप्रयच्छमे ॥ तिलदानं ॥ महर्षेर्गोत्रसंभूताःकाश्यपस्यतिलाःस्मृताः ॥ तस्मादेषांप्र दानेनपितृपापंव्यपोहतु ॥ हिरण्यदानं ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ आज्यदानं ॥ कामधेनोःसमुद्भूतंसर्वक्रतुषुसंस्थितं ॥ देवानामाज्यमाहारअतःशांतिंप्रयच्छमे ॥ वस्त्रदानं ॥ शरण्यंसर्वलोका नांलज्जायारक्षणंपरं ॥ देहालंकरणंवस्त्रमतःशांतिंप्रयच्छमे ॥ धान्यदानं ॥ सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत् ॥ प्राणिनां जीवनोपायस्ततःशांतिंप्रयच्छमे ॥ गुडदानं ॥ गुडमिक्षुरसोद्भूतंमंत्राणांप्रणवोयथा ॥ दानेनानेनचैतस्यपरालक्ष्मीःस्थिरा गृहे ॥ रौप्यदानं ॥ प्रीतिर्यतःपितृणांचविष्णुशंकरयोःसदा ॥ शिवनेत्रोद्भवंरूप्यमतःशांतिंप्रयच्छमे ॥ लवणदानं ॥ यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना ॥ शंभोःप्रीतिकरंयस्मादतःशांतिंप्रयच्छमे ॥ अनेनदशदानाख्येनकर्मणाप्रेतोद्धर्तामहा विष्णुःप्रीयतां ॥ इतिदशदानानि ॥ ततोष्टदानान्युपदानानिचयथाशक्तिकार्याणि ॥ ॥ छ ॥ ॥ छ ॥

१ पुत्रकर्तृके 'शांतिंप्रयच्छमे' 'ममयच्छतु' इतिदानवाक्यस्थलेतत्रतत्र 'पितुःशांतिंप्रयच्छतु' 'पितुःपापंव्यपोहतु' इत्यादूहःकार्यः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३५५ ॥ अष्टदानानि ॥

श्रीः ॥ तानिचआमान्नोदकुंभगोवस्त्रभूम्यास्तरणछत्रासनानि ॥ अमुकशर्मणःपित्रादेःपरलोकेतत्तद्दानकल्पोक्तफलावाप्तयेष्ट दानानिकरिष्ये ॥ विप्रंसंपूज्य आमान्नदानं ॥ अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः ॥ अन्नंब्रह्माखिलत्राणमस्तुजन्मनिजन्म नि ॥ उदकुंभदानं ॥ वारिपूर्णोघटश्चायंदेवत्रयमयोयतः ॥ प्रीयतांधर्मराजस्तुदानेनानेनपुण्यदः ॥ गोप्रदानं ॥ यज्ञसाध नभूताया० ॥ वस्त्रदानं ॥ शरण्यंसर्वलोकानांलज्जायारक्षणंपरं ॥ देहालंकरणंवस्त्रमतःशांतिं० ॥ भूमिदानं ॥ सर्वेषामा श्रयाभूमिर्वराहेणसमुद्धृता ॥ अनंतसस्यफलदा० ॥ शय्या (डाळी) ॥ यथानकृष्णशयनंशून्यंसागरजातया ॥ शय्यैतस्या प्यशून्यास्तुतथाजन्मनिजन्मनि ॥ छत्रदानं ॥ इहामुत्रातपत्राणंकुरुमेकेशवप्रभो ॥ छत्रंत्वत्प्रीतयेदत्तंतस्यास्तुचसदाशुभं ॥ आसनं (पाट) ॥ त्रिलोकीनाथदेवेशसर्वभूतकृपानिधे ॥ आसनेनचतुष्यस्वप्रयच्छतस्यवांछितं ॥ इत्यष्टदानानि ॥ वृषोत्स र्गांगाष्टदानानितु आमान्नत्रयंतिलानुदकुंभंगांवासोहिरण्यंचेति ८ तत्रतिलदानं ॥ महर्षेर्गोत्रसंभूताःकाश्यपस्यतिलाः स्मृताः ॥ तस्मादेषांप्रदानेनतस्यपापंव्यपोहतु ॥ हिरण्यगर्भेतिहिरण्यदानं ॥ अन्येआमान्नोदकुंभगोवस्त्रदानादिमंत्रादशाष्ट दानांतर्गतास्तत्तदुक्ताज्ञेयाःविस्तरभियानपुनःसंगृहीताः ॥ एवमग्रेपिउपदानादौज्ञेयं ॥ ॥ छ ॥ ॥ छ ॥

॥ ३५६ ॥ उपदानानि ॥

श्रीः ॥ अन्नंचैवोदकुंभंचोपानहौचकमंडलुः ॥ छत्रंवस्त्रंतथायष्टिंलोहदंडंचदापयेत् ॥ अग्निष्टिकांप्रदीपंचतिलांस्तांबूलमेवच ॥ चंदनंपुष्पमालांचोपदानानिचतुर्दश ॥ पित्रादेःप्रेतस्योत्तमलोकप्राप्त्यर्थंपरलोकेतत्तद्दानकल्पोक्तफलावाप्तयेचतुर्दशोपदानानि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

क० ॥ आमान्नं ॥ अन्नमेवयतो० ॥ उदकुंभः ॥ वारिपूर्णोघटः० ॥ उपानहदानं ॥ उपानहौप्रदास्यामिकंटकादिनिवारणे ॥ सर्वमार्गेषुसुखदेअतःशांतिंप्रयच्छमे ॥ कमंडलुः ॥ त्रिलोकीनाथ० उदपात्रेणसंतुष्टःप्रयच्छ० ॥ छत्रं ॥ इहामुत्रातप० ॥ वस्त्रं ॥ शीतवातोष्णसं० ॥ यष्टिदानं ॥ त्रिलोकीनाथ० अनेनयष्टिदानेनप्र० ॥ लोहदंडः ॥ ज्ञानाज्ञानकृतंपापंतथालोभात्कृतंचिरात् ॥ लोहदंडप्रदानेनसर्वपापंव्यपोहतु ॥ अग्निष्टिका ॥ त्रिलोकीनाथ० अग्निष्टिकाप्रदानेनप्र० ॥ दीपदानं ॥ दीपोज्ञानप्रदोनित्यंदेवतानांप्रियःसदा ॥ दानेनास्यभवेत्सौख्यंशांतिस्तद्वांछितंफलं ॥ तिलदानं ॥ महर्षेर्गोत्र० ॥ तांबूलदानं ॥ सोपस्करंचतांबूलंसर्वदामंगलप्रियं ॥ प्रियंचैवतुदेवानांसौगंध्यंवदनेस्तुवै ॥ चंदनं ॥ त्रिलोकीनाथ० चंदनस्यप्रदानेनप्रयच्छ० ॥ पुष्पमाला ॥ त्रिलोकीनाथ० पुष्पमालाप्रदानेनप्र० ॥ इतिचतुर्दशोपदानानि ॥ ॥ केचित्तिललोहहेमकार्पासलवणभूमिधेनुसप्तधान्येत्यष्टदानान्याहुः ॥ त्रिलोकीनाथ० कार्पासेनचसंतुष्टः—सप्तधान्येनसंतुष्टःइत्याद्यूहः ॥ सप्तधान्यानितुयवव्रीहिगोधूमतिलमाषमुद्गप्रियंगुसंज्ञानि ॥ अन्येमंत्राउपरिवज्ज्ञेयाः ॥ ॥ सिद्धस्थालीदानं ॥ इमांपायसपूर्णांयःस्थालींघृतजलादिभिः ॥ दद्यात्संपत्तिपात्रंस्यादतःपाहिमहेश्वर ॥ ॥ ऊर्णादानं ॥ ऊर्णावस्त्रंचारुचित्रंदेवानांप्रीतिवर्धनं ॥ सुखस्पर्शकरंयस्मादतःशांतिं० ॥ ॥ व्यजनदानं ॥ व्यजनंवायुदैवत्यंग्रीष्मकालेसुखप्रदं ॥ अस्यप्रदानात्सकलाःसंतुतस्यमनोरथाः ॥ इति ॥ ॥ तिलपात्रदानं ॥ पित्रादेःजन्मप्रभृतिमरणांतंकृतनानाविधपापप्रणाशार्थं० ॥ तिलाःपुण्याःपवित्राश्चतिलाःसर्वकराःस्मृताः ॥ शुक्लावायदिवाकृष्णाऋषिगोत्रसमुद्भवाः ॥ यानिकानिचपापानिब्रह्महत्यासमानिच ॥ तिलपात्रप्रदानेनतस्यपापंव्यपोहतु ॥ नग्नप्रच्छादनीयवस्त्रदानं ॥ मंत्रउपरिवत् ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३५७ ॥ प्रायश्चित्तगोदानप्रयोगः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअमुकगोत्रस्यामुकप्रेतस्यजन्मप्रभृत्यद्ययावदाचरितसमस्तपातकस्याकृतप्रायश्चित्तस्यामरणांतंपापापनोदनार्थंप्रायश्चित्तधेनुदानंक० ॥ गोःपूजनंकरिष्ये ॥ पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ ॥ तासांमध्येतुयानंदातस्यैधन्वैनमोनमः ॥ इतिमंत्रेणपूजयेत् ॥ शक्तौस्वर्णशृंगीमित्यादिदानवाक्येवक्ष्यमाणानलंकारांस्तत्रतत्रसंयोज्यान्यानप्यर्पयेत् ॥ कण्ठेपुष्पमालांघंटांचाबध्यगोग्रासंसमर्प्यततआगावोअग्मन्नितिसूक्तेनगांत्रिःप्रदक्षिणीकृत्यप्रार्थयेत् ॥ यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता ॥ धेनुरूपेणसादेवीपितुःपापंव्यपोहतु ॥ देहस्थायाचरुद्राणीशंकरस्यप्रियासदा ॥ धेनुरूपेणसादेवीतस्यपापंव्यपोहतु ॥ विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसोः ॥ चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तुसाप्रिये ॥ चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच ॥ लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे ॥ स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांतथा ॥ सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमे ॥ इतिगांप्रार्थ्यप्रतिग्रहीतारंब्राह्मणंयथाविभवंसंपूज्यगोपुच्छदेशेतमुदङ्मुखमवस्थाप्यस्वयंप्राङ्मुखः स्वर्णयुताज्यपूरितकांस्यपात्रेगोपुच्छंनिक्षिप्य ॥ प्रायश्चित्तेसमुत्पन्नेनिष्कृतिर्नकृताक्वचित् ॥ तस्यपापस्यशुद्ध्यर्थंधेनुमेतांददामिते ॥ मयामत्पित्रावाजन्मप्रभृतिअद्ययावदाचरितसमस्तपातकस्याकृतप्रायश्चित्तस्यामरणांतंपातकापनोदकामःप्रायश्चित्तत्वेनकल्पितांइमांकपिलांधेनुंरुद्रदैवत्यांसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठांघंटाग्रैवेयकांमुक्तालांगूलांकांस्यदोहनिकांवस्त्रद्वयाभरणाद्युपस्करयुतां अमुकगोत्रस्यामुकप्रेतस्यपरलोकेसुखसिद्धयेअमुकगोत्रायामुकशर्मणेतुभ्यमहंसंप्रददेनममेत्युक्त्वाविप्रकरेसकुशतिलोदकंगोपुच्छंदत्वा ॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ इति

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

पठेत् ॥ प्रतिग्रहीतातुदेवस्यत्वेतिमंत्रेणप्रतिगृह्य ॐ स्वस्तीत्युक्त्वाकइदंकस्माअदादितिकामस्तुतिंयथाशाखंपठेत् ॥ कर्तादान स्यप्रतिष्ठासिद्ध्यर्थंदक्षिणांदत्वायमोक्तांगोमतींविद्यांपठेत् ॥ गावःसुरभयोनित्यंगावोगुग्गुलुगंधिकाः ॥ गावःप्रतिष्ठाभूतानां गावःस्वस्त्ययनंमहत् ॥ अन्नमेवपरंगावोदेवानांहविरुत्तमं ॥ पावनंसर्वभूतानांरक्षंतिचवहंतिच ॥ हविषामंत्रपूतेनतर्पयंत्यम रान्दिवि ॥ ऋषीणामपिहोतृणांगावोहोमेप्रतिष्ठिताः ॥ सर्वेषामेवभूतानांगावःशरणमुत्तमं ॥ गावःपवित्रंपरमंगावोमंगलमु त्तमं ॥ गावःसर्वस्यभूतस्यगावोधन्याःसनातनाः ॥ नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच ॥ नमोब्रह्मसुताभ्यश्चपवित्रा भ्योनमोनमः ॥ ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं ॥ एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति ॥ इति ॥ ततोब्राह्मणेनसहगां प्रदक्षिणीकृत्यविष्णुंस्मृत्वाकर्मेश्वरार्पणंकृत्वाचामेत् ॥ इतिगोदानविधिः ॥ अयमेवविधिरग्रेप्रत्यक्षधेनुदानेतत्तद्दूहेनसर्व त्रोह्यः ॥ अत्रांगन्यासादिविशेषःपूर्वोक्तगोदानप्रयोगेआलोचनीयः ॥ ॥ ॥ ॥

॥ ३५८ ॥ पंचगोदानानि ॥

पापधेनुदानं ॥ पूर्ववत्पूजनांते आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः ॥ तत्सर्वंनाशमायातुपापधेनुप्रदानतः ॥ ममपितुःमनो वाक्कायकर्मभिराजन्मोपार्जितपापापनोदनकामोहंइमांकृष्णांपापापनोदधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांगोत्रायशर्मणेतुभ्यं संप्रददे ॥ ॥ उत्क्रांतिधेनुदानं ॥ असूत्क्रांतौप्रवृत्तस्यसुखोत्क्रमणसिद्धये ॥ तुभ्यमेनांप्रदास्यामिधेनुमुत्क्रांतिसंज्ञिकाम् ॥ ममपितुःसुखेनप्राणोत्क्रमणप्रतिबंधकोक्तनिष्कृत्यनुक्तनिष्कृतिजनितसकलपापक्षयद्वारासुखेनप्राणोत्क्रमणसिद्ध्यर्थमिमामु त्क्रांतिसंज्ञिकांधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांगोत्रायशर्मणेतुभ्यं संप्रददे मम ॥ ॥ वैतरणीधेनुदानं ॥ तत्रोपक

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ल्पनं ॥ पाटलांकृष्णांवाहेमशृंगाद्युपेतांकृष्णवस्त्रयुगच्छन्नांसप्तधान्यसयुक्तांछत्रोपानद्युगुलसंयुक्तांगांसंनिधाप्यद्रोणमितका
र्पासशिखरेताम्रपात्रंतत्रमहिषारूढंदक्षिणवामकरधृतलोहदंडपाशंहैमंयमंस्थापयित्वातदग्रेरक्तपट्टबंधेक्षुदंडनिर्मितनौकोपरितां
धेनुंस्थापयित्वातिथ्यादिसंकीर्त्यअमुकगोत्रस्यामुकप्रेतस्ययमद्वारस्थितवैतरणींतर्तुगोदानंकरिष्येतदंगंब्राह्मणवरणंपूजनंइक्षु
नौकापूजनंयमपूजनंविष्णुपूजनंगोःपूजनंचकरिष्यइतिसंकल्प्य द्विजंवृत्वासंपूज्यप्रार्थयेत् ॥ विष्णुरूपद्विजश्रेष्ठभूदेवपंक्तिपा
वन ॥ यज्ञरूपनमस्तेस्तुपात्ररूपनमोस्तुते ॥ तर्तुंवैतरणींमस्यकृष्णांगांप्रददाम्यहम् ॥ गवामंगेष्वितिगोःपूजनंजातवेदसेसुनवामे
तिनौकापूजनंनौकायांधान्यराश्युपरिसुवर्णप्रतिमायांइमंयमप्रस्तर० इतियमपूजनं तत्समीपएवसुवर्णप्रतिमायांइदंविष्णुरिति
विष्णुंसंपूज्य ॥ धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहापथे ॥ उत्तितीर्षुरयंदेविवैतरण्यैनमोस्तुते ॥ यमद्वारपथेघोरेघोरावैतरणीनदी ॥
तांतर्तुमस्ययच्छामिकृष्णांवैतरणींतुगाम् ॥ ममपितुःयमद्वारस्थितवैतरण्याख्यनद्युत्तरणार्थंइमांकृष्णांगांसवत्सांयमप्रतिमायु
क्तांकृष्णवस्त्रयुगच्छन्नांसप्तधान्ययुतांरक्तमाल्याद्यलंकृतांयथाशक्तिस्वर्णशृंगाद्युपस्करोपेतांकार्पासद्रोणशिखरांरुद्रदैवत्यांगो
त्रायशर्मणेतुभ्यमहंसंप्रददेइतितिलजलकुशयुतंगोपुच्छंविप्रहस्तेदद्यात् ॥ ॥ ऋणधेनुदानं ॥ ममपितुःऐहिकामुष्मिकसप्त
जन्मार्जितऋणपातकापाकरणार्थंगोदानंक० ॥ ऐहिकामुष्मिकंयच्चसप्तजन्मार्जितंऋणं ॥ तत्सर्वंशुद्धिमायातुगामेकांददतोमम ॥
संकल्पवाक्यमुक्त्वाइमांगांइत्यादिपूर्ववत् ॥ मोक्षधेनुदानंसपिंडीप्रयोगमध्येस्ति ॥ ॥ छ ॥ ॥ छ ॥

॥ ३५९ ॥ अश्वदानम् ॥

श्रीः ॥ अद्येत्यादि० ममपितुर्वासमस्तपापक्षयपूर्वकअश्वरोमसंख्याकाब्दसूर्यलोकनिवासाप्तिकामःयथाशक्तिसोपस्करंअश्वदा

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नंकरिष्ये ॥ अश्वकर्णधृत्वादद्यात् ॥ उच्चैःश्रवास्त्वमश्वानांराज्ञांविजयकारक ॥ सूर्यवाहनमस्तुभ्यमतःशांतिंप्रयच्छमे ॥ महार्णवसमुत्पन्नउच्चैःश्रवसपुत्रक ॥ मयात्वंविप्रमुख्यायदत्तोहयसुखीभव ॥ इमंविप्रनमस्तुभ्यमश्वंतेप्रतिपादितम् ॥ प्रतिगृह्णीष्वविप्रेंद्रमयादत्तंसुशोभनं ॥ इतिदानमंत्रमुच्चार्यइममश्वंसुवर्णतिलकालंकारयुतंललाटग्रैवेयकादियुतंचगंधपुष्पाद्यर्चितं सूर्ययमदैवतंममपितुःब्रह्महत्यादिसमस्तपापनाशकामोहयरोमसमसंख्याकाब्दसूर्यलोकनिवासकामश्चगोत्रायशर्मणेतुभ्यमहंसंप्रददेनमम ॥ सांगतासिद्ध्येदक्षिणांदद्यात् ॥ अनेनाश्वदानाख्येनकर्मणाप्रेतोद्धर्तामहाविष्णुःप्रीयतां ॥ ॥ छ ॥

॥ ३६० ॥ शय्यादानम् ॥

श्रीः ॥ अष्टदलेतिलप्रस्थंनिक्षिप्यतस्मिन्दारुमयींस्वास्तीर्णाद्युपस्करयुतांशय्यामास्तीर्यतस्याःसमंतादीशानादिकोणचतुष्टयेशिरोभागेचपंचकुंभान्क्रमात् घृतकुंकुमगोधूमजलपूर्णकुंभमुच्छीर्षेघृतपूर्णकलशंसप्तधन्यानिचसंस्थाप्य अद्येत्यादि० पित्रादेः समस्तपापक्षयपूर्वकाप्सरोगणसेवायुतविमानकरणकेंद्रपुरगमनोत्तरषष्टिसहस्रवर्षाधिकरणकक्रीडनस्त्रीसंघसमावृतसर्वलोकमहिमत्वतदुत्तरषष्टियोजनमंडलराज्यभोगानंतरशिवसायुज्यावाप्तिकामःशय्यादानमहंकरिष्ये इतिसंकल्प्य द्विजंसपत्नीकंवृत्वा यथाविभवंवस्त्रालंकारादिभिःसंपूज्य शय्यायांलक्ष्मीनारायणप्रतिमांस्वर्णमयींसंस्थाप्यसंपूज्यसपत्नीकविप्रेणसहशय्यांप्रदक्षिणीकृत्यनमःप्रमाण्यैदेव्यैइतिचतुर्दिक्षुक्रमेणप्रणम्य ॥ दानमंत्रस्तु॥ यथानकृष्णशयनंशून्यंसागरजातया ॥ तथैतस्याप्यशून्यास्तुशय्याजन्मनिजन्मनि ॥ इति ॥ तिथ्यादिसंकीर्त्यपितुःसर्वपापक्षयेत्यादिशिवसायुज्यावाप्तिकामोगोत्रायशर्मणेसुपूजिताय इमांशय्यांईशानादिकोणचतुष्टयस्थापनक्रमेण पू[illegible]तांहंसतूलीप्रच्छन्नांशुभ्रगंडोपधानिकांप्रच्छाद

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नपटास्तृतांसप्तधान्ययुतांसतांवूलायतनादशैलालवंगकपूरयुतां सुगंधपरिमलभोग्यवस्तुचंदनागरुदीपिकोपानच्छत्रचामरास
नयुतांभोजनभाजनजलपात्रपंचवर्णवितानकेशप्रसाधिन्यंजनशलाकापुष्पमालायुतां लक्ष्मीयुतनारायणप्रतिमासहितांयुक्तोप
स्करामंगिरोदैवत्यांगोत्रायशर्मणेसुपूजितायसालंकृतायसपत्नीकायतुभ्यमहंसंप्रददेनममेतिशय्योपवेशितविप्रहस्तेसाक्षतंकुशो
दकंक्षिपेत् ॥ तस्मैसुवर्णमेवदक्षिणांदद्यात् ॥ ततोब्राह्मणेभ्योभूयसींदद्यात् ॥ इतिशय्यादानम् ॥ ॥ ॥

॥ ३६१ ॥ भूमिदानम् ॥

श्रीः ॥ सागोचर्ममिताधिकावादेया ॥ दशहस्तेनदंडेनत्रिंशद्दंडानिवर्तनं ॥ त्रिभागहीनंगोचर्ममानमाहप्रजापतिः ॥ अद्येत्या
दिपितुःसर्वपापक्षयपूर्वकंषष्टिसहस्रवर्षस्वर्गनिवासोत्तरंशिवपुरनिवासार्थंभूदानंक० ॥ विप्रंवृत्वा ॥ सर्वेषामाश्रयाभूमिर्वराहेण
समुद्धृता ॥ अनंतसस्यफलदाअतःशांतिं० ॥ यस्यांरोहंतिबीजानिवर्षाकालेमहीतले ॥ भूमेःप्रदानात्सकलास्तस्यसंतुमनोरथाः ॥
इमांभूमिंवृक्षाद्युपेतांसस्योद्भवांविष्णुदैवत्यांसंकल्पेहेतवेसंप्रददे ॥ ॥ पददानम् ॥ आसनोपानहौछत्रंमुद्रिकाचकमंडलुः ॥
यज्ञोपवीताज्येवस्त्रंभोजनंचान्नभाजनं ॥ दशकंपदमेतत्स्यात्पदान्येवंत्रयोदश ॥ देयानिवायथाशक्तितेनासौप्रीणितोभवेत् ॥
पित्रादेःमार्गकष्टपरिहारपूर्वकमुत्तमलोकावाप्तयेतृप्त्यर्थंचपददानंक० ॥ त्रिलोकीनाथदेवेशसर्वभूतकृपानिधे ॥ पददानेनतुष्य
स्वप्रयच्छतस्यवांछितं ॥ संकल्पवाक्यांतेइदंयथाशक्तिआसनादिदशोपकरणसमूहात्मकंपदंतृतीयांशदक्षिणायुतंतुभ्यंसंप्रददे
॥ शालग्रामदानम् ॥ सशैलवनभूचक्रदानसमफलावाप्तयेशाल० ॥ महाकोशनिवासेनशक्राद्यैरुपशोभितः ॥ शालग्रामप्रदाने
नतस्यपापंव्यपोहतु ॥ ॥ रुद्राक्षमालादानम् ॥ अष्टाविंशतिसंख्याकैरुद्राक्षैर्योजितामया ॥ अर्पितातवहस्तेचगृहाणद्धि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जसत्तम ॥ ॥ पुस्तकदानं ॥ गोदानसमफलावाप्तिस्वर्गलोकनिवासविद्यादानादिकल्पोक्तफलावाप्तये० ॥ सर्वविद्याश्रया यज्ञाःकारणंलिखिताक्षरं ॥ पुस्तकस्यप्रदानेनतस्यप्रीणातुभारती ॥ संकल्पवाक्येनदद्यात् ॥ इतिभूम्यादिदानानि ॥ ॥

॥ ३६२ ॥ अथसपिंडीकरणं ॥

पूर्वेद्युः षट्ब्राह्मणान्निमंत्र्यततःस्नात्वामध्याह्नेआगतान्विप्रान्स्वागतेनार्चयित्वातदनुज्ञातआसनानिकल्पयित्वा ॥ भूशुद्ध्यादि विधायदेशकालौसंकीर्त्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंपितृत्वप्राप्त्यर्थंअमुकगोत्रैरमुकशर्मभिःस्वपितृ पितामहप्रपितामहैर्वसुरुद्रादित्यस्वरूपैःसहमृताहाद्द्वादशेहनिसपिंडीकरणश्राद्धंपार्वणैकोद्दिष्टेनविधिनाकरिष्ये ॥ मातुःसपिंडी करणेमुकगोत्रायामुकप्रेतायाअस्मत्पितामहीप्रपितामहीवृद्धप्रपितामहीभिरितिविशेषः ॥ पाद्यार्थंविश्वेषांदेवानांचतुरस्रंमंडलं कृत्वा ॥ तद्दक्षिणेप्रेतार्थंगोःपदंतद्दक्षिणतःपितामहादिमंडलंवर्तुलंकुर्यात् ॥ अत्रकामकालसंज्ञकाविश्वदेवाःविश्वेभ्योदेवेभ्यो भूर्भुवःसुवरिदंवःपाद्यं ॥ प्रेतायेदंवःपाद्यमुपतिष्ठतां ॥ पितामहादीनांप्रकृतिवत् ॥ प्रेतोपचारान्गायत्रींमनसोच्चार्यकुर्यात् ॥ एवंसर्वत्र ॥ एकमतिथिंचविदध्यात् ॥ विश्वेषांदेवानांआसनाद्यर्चनांतंविधायप्रेतायेदमासनमुपतिष्ठत्वितिसर्वोपचारेषुप्रे तस्थानेब्रूयात् ॥ ततःपितामहादिभ्यःप्रकृतिवत् ॥ आसनानिदत्वार्घ्यपात्रचतुष्टयंसपवित्रमासाद्यामुकगोत्रंप्रेतमावाहयिष्ये ॥ इत्युक्त्वागायत्रींमनसोच्चार्यामुकगोत्रंप्रेतमावाहयामीतिप्रेतब्राह्मणमस्तकेतिलान्प्रक्षिप्यतत्पात्रेक्षिपेत् ॥ गंधपुष्पादिक्षिप्त्वा ॥

१ अथपिंडप्रमाणं ॥ एकोद्दिष्टेसपिंड्यांचकपित्थंचविधीयते ॥ नारीकेलंप्रमाणंतुप्रत्यब्देमासिकेतथा ॥ तीर्थेदर्शेचसंप्राप्तेकुक्कुटांडप्रमाणतः ॥ महालयेगयाश्राद्धेकुर्यादामलकोपमं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ततःपितामहादीन्प्रकृतिवदावाह्य तत्पात्रेषुतिलान्प्रक्षिप्यप्रेतब्राह्मणहस्तेगंधादिक्षिप्त्वाप्रेतपात्रंहस्तेगृहीत्वागायत्रींमनसोच्चार्य अमुकगोत्रप्रेतेदंतेर्घ्यमुपतिष्ठतामितिचतुर्थांशमुदकंदत्वापात्रंभूमावासाद्यपात्रत्रयेपूर्वमेवोदकप्रक्षेपादिकृत्वामुकगोत्राणांप्रेतपितृपितामहप्रपितामहानांअमुकामुकशर्मणांवसुरुद्रादित्यस्वरूपाणांअर्घ्यपात्रोदकंप्रेतार्घ्यपात्रोदकेनसंयोजयिष्यइतिब्राह्मणाननुज्ञाप्य ॥ येसमानाःसमनसःपितरोयमराज्ये ॥ तेषांलोकःस्वधानमोयज्ञोदेवेषुकल्पतां ॥ इतिमंत्रमुच्चार्यप्रेतपात्रंहस्तेगृहीत्वा ॥ येसजाताःसमनसोजीवाजीवेषुमामकाः ॥ तेषाꣳश्रीर्मयिकल्पतामस्मिन्लोकेशतꣳसमाः ॥ गायत्रींस्मृत्वाअमुकगोत्रप्रेतअमुकगोत्रेणस्वपित्रामुकशर्मणाःवसुरूपेणोदकद्वारेणसहसायुज्यंगच्छेत्युक्त्वातृतीयांशमुदकंतत्पितृपात्रेनिक्षिप्यपवित्रमपितृतीयांशंक्षिपेत् ॥ एवमेवपितामहप्रपितामहाभ्यांसहोदकंसंयोजयेत् ॥ ततःपवित्रमपिसंयोजयेत् ॥ ततःपात्रेषुगंधपुष्पादिक्षिप्त्वाब्राह्मणहस्तानभ्यर्च्यप्रकृतिवदर्घ्याणिदत्वाप्रेतब्राह्मणायगंधाद्यर्चनंविधायपितामहादीनामपिपूजांविधाय ॥ ततःपात्राण्यासाद्यप्रेतब्राह्मणहस्तेप्रेतायायमायस्वाहेत्यन्नाहुतिंहुत्वातदन्नमग्नौक्षिपेत् ॥ शेषंपिंडार्थमवशेष्य ॥ पितामहादिस्थानेअग्नौकरणंप्रकृतिवत्कृत्वा ॥ विश्वेभ्योदेवेभ्योन्नंनिवेदयेत् ॥ प्रेतेदमन्नंसोपस्करंसोदकुंभंसदीपंपरिविष्टंपरिवेक्ष्यमाणंचातृप्तेरमृतरूपेणोपतिष्ठतां ॥ पितामहादिष्वन्ननिवेदनंपार्वणवत् ॥ तृप्तिप्रश्नादिकृत्वाभोजनांतेउच्छिष्टपिंडः ॥ आचांतेषुविकिरंदत्वातेभ्योनुज्ञांलब्ध्वापिंडस्थानेदक्षिणतोवेदीकरणंबर्हिरास्तरणंउदकनिनयनंचविदध्यात् ॥ पितामहादिपिंडस्थानेबर्हिरास्तरणादिप्रकृतिवत्कृत्वा ॥ ततःप्रेतस्थानस्थितायब्राह्मणायदक्षिणांदत्वाप्रेतपिंडहस्तेगृहीत्वा ॥ प्रेतनामगोत्राद्युच्चार्यपिंडंदत्वासंपूज्य ॥ ततःपितामहादिभ्यःपार्वणवत् पिंडत्रयंदत्वासंपूजयेत् ॥ ब्राह्मणाननुज्ञाप्यततोमुकगोत्रस्यामुकप्रेतस्यपिंडंपित्रादिपिंडैःसहसंयो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

जयिष्यइतिपृष्टैतैःसंयोजयेत्यनुज्ञाते ॥ ततःमोक्षधेनुंदद्यात् ॥ मोक्षधेनोर्मंत्रः॥ मोक्षंदेहिहृषीकेशमोक्षंदेहिजनार्दन ॥ मोक्षधे
नुप्रदानेनमुकुंदःप्रीयतांमम ॥ ततोदर्भमयींरज्जुंद्विगुणांगृहीत्वाप्रेतपिंडंत्रिधाविभजेत् ॥ येसमानाःसमनसइतिमंत्रमुच्चार्यप्रेत
पिंडंकुशेनत्रेधाविभज्यावयवत्रयंत्रिषुपिंडेषुसंयोजयेत् ॥ पिंडतृतीयांशंहस्तेगृहीत्वायेसजाताइत्युच्चार्यामुकगोत्रप्रेतामुकगो
त्रेणस्वपित्रामुकशर्मणावसुरूपेणसहपिंडद्वारेणसायुज्यंगच्छेत्युक्त्वातृतीयांशंतेनपितृपिंडेनदधिमधुभ्यांसम्यगेकीकुर्यात् ॥
द्वितीयांशंस्वपितामहपिंडेनतृतीयांशमेवमेवप्रपितामहपिंडेनसंयोजयेत् ॥ एवंमात्रादिसपिंडनेपिपितामह्यादिपिंडत्रयेणसंयो
जयेत् ॥ प्रतिपिंडसंयोजनेमंत्रावृत्तिः ॥अत्रांजनाभ्यंजनेवासश्चेत्यादिसर्वंपार्वणवत् ॥ प्रेतस्थानेतूष्णींजलंदत्वाअमुकप्रेतस्यय
दत्तंसपिंडीकरणश्राद्धीयमन्नमुदकादितदक्षय्यमुपतिष्ठतामित्युक्त्वाविशिष्टदक्षिणांदत्वाप्रेतब्राह्मणांपिंडसंयोजनात्प्रागेवविस
र्जयेत् सहैवांतेदक्षिणाविसर्जनेवा॥ केचित्तुप्रेतपिंडसंयोजितपिंडत्रयमिदानींतनमृतमारभ्यपुरुषत्रयायपार्वणवत्पुनरपिदद्यादि
त्याहुः ॥ एषवोनुगतःप्रेतःपितृसाम्यत्वमाप्तवान् ॥ शिवंभवतुशेषाणांजायंतांचिरजीविनः ॥ इतिबर्हिंषियोजयेत् ॥ द्वादशा
हांतंधारितमुत्तरीयवस्त्रंपिंडोपरिदद्यात् ॥ तच्चाचार्योगृह्णीयात् ॥ अवयवपिंडान्नंपाकस्थालींचाचार्यायदद्यात् ॥ ततःआपो
देवीरित्यादिसर्वानुपचारान्पार्वणवत्पिंडेषुदद्यात् ॥ आशिषःप्रार्थनंब्राह्मणैराशीर्दानंचनकर्तव्यं ॥ अभिरम्यतामितिप्रेतब्रा
ह्मणंविसर्जयेत् ॥ इतरत्पार्वणवत् ॥ अनुव्रजनंनकार्यं ॥ तत्पाकंसर्वंविसृज्यपाकांतरंविधायवैश्वदेवंकृत्वागृहस्थैर्मनुष्यैःस
हभुंजीत ॥ इतिसपिंडीकरणं॥ मातुःसपिंडीकरणंतुपितामह्यादिभिःसहकार्यं ॥ पत्न्याःमृतमातृकेणमात्रादिभिःसहअमृतमातृ
केणतुपितामह्यादिभिरित्यादिज्ञेयं ॥ पितुस्तुरीयस्यसुतःप्रदद्याद्विमुक्तपिंडस्यसपिंडनात्तु ॥ पाथेयसंज्ञेदधिमिश्रमन्नंत्रयोदशे

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ह्मिद्विजपुंगवेभ्यः ॥ अथश्राद्धभोक्तृणांमिथःस्पृष्टौतदन्नमत्यजन्भुक्त्वागायत्र्यष्टशतंजपेत् ॥ उच्छिष्टसिक्तेतत्प्रक्षाल्यतद न्नंभुक्त्वास्नात्वाद्विशतंजपेत् ॥ उच्छिष्टभोजनेद्विसहस्रंजपेत् ॥ ॥ ॥ ॥

॥ ३६३ ॥ पाथेयश्राद्धम् ॥

अथद्वादशेत्रयोदशेह्निप्रातःस्नात्वाप्राणानायम्यतिथ्यादिकमुच्चार्यामुकगोत्रस्यामुकशर्मणःप्रेतलोकात्पितृलोकगमनेसुखसिद्ध्य र्थममुकशर्मणाममुकगोत्राणामस्मत्पितृपितामहप्रपितामहानांवसुरुद्रादित्यस्वरूपाणांपाथेयश्राद्धंसदैवंसपिंडंआमेनहेम्नावाक रिष्ये ॥ इतिसंकल्प्यक्षणपाद्यादिसर्वंश्राद्धंपार्वणवत्पक्वान्नेनआमेनवाकुर्यात् ॥ (अत्रोदकुंभवस्त्रदीपछत्रोपानहादिदास्यंति) ॥

॥ ३६४ ॥ त्रयोदशाहकृत्यम् ॥

ततःकर्ताभ्यंगस्नानंकुर्यात् ॥ देशकालौसंकीर्त्यममसहपरिवारस्यपित्रादिनिधननिमित्तसकलारिष्टोपशांतयेक्षेमायुःसिद्ध्यर्थंच निधनशांतिं०गणेशपूजनपूर्वकंस्वस्तिवाचनंचकरिष्येइतिसंकल्प्ययथाशाखंस्वस्त्ययनंवाचयित्वाशांतिजपंकारयित्वाशिषोगृह्णी त्वास्वजनैःसहभुंजीत॥ अतऊर्ध्वंचंदनधारणंतांबूलभक्षणंकुर्यात् ॥ ॥ इतित्रयोदशाहकृत्यम् ॥ ॥

॥ ३६५ ॥ अथोदकुंभश्राद्धम् ॥

तत्रयाज्ञवल्क्यः ॥ अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत् ॥ तस्याप्यन्नंसोदकुंभंदद्यात्संवत्सरंद्विजे ॥ गौतमः ॥ अदैवंपार्व

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

णश्राद्धंसोदकुंभमधर्मकं ॥ कुर्यात्प्रत्याब्दिकंश्राद्धंसंकल्प्यविधिनान्वहं ॥ अधर्मकंपुनर्भोजनादिनियमरहितं ॥ एवंशक्तेनव
र्षपर्यंतंकार्यं ॥ अशक्तेनमासिमासिवा ॥ इत्युदकुंभश्राद्धं ॥ ॥ ॥ ॥

॥ ३६६ ॥ सहगमनविधिः ॥

अथान्वारोहणंस्त्रीणामात्मनोभर्तुरेवच ॥ सर्वपापक्षयकरंनिरयोत्तारणायच ॥ अनेकस्वर्गफलदंमुक्तिदंचतथैवच ॥ जन्मांतरे
चसौभाग्यधनपुत्रादिवृद्धिदं ॥ देशकालौसंकीर्त्यात्मनोभर्तुश्चजन्मजन्मांतरोपार्जितसर्वपापक्षयद्वारालक्ष्मीनारायणप्रीतयेश्रु
तिस्मृतिपुराणोक्तानेकफलप्राप्तयेपत्युरन्वारोहणंकरिष्ये ॥ दैवसंपादितोमह्यंपतित्वेसर्वदैवत ॥ त्वयासहगमिष्यामिभर्तात्वंचा
न्यजन्मनि ॥ इत्युक्त्वास्नात्वाकुंकुमकुसुमादिनास्वशरीरमलंकृत्यपुत्रादिभ्योबंधुभ्यश्चाशिषोदत्वा ॥ चितिस्थोभगवानग्निर्वि
ष्णुरूपीसनातनः ॥ पतिलोकसमावाप्त्यैगृहाणार्घ्यनमोस्तुते ॥ इतिविष्णुरूपिणेग्नयेर्घ्यंदत्वा ॥ एषतेर्घ्योमयादत्तःसूर्यसाक्षि
त्वमग्रतः ॥ प्रसादंकुरुमेदेवगृहाणार्घ्यं० ॥ इतिसूर्यायचदत्वा ॥ त्वंब्रह्मात्वंचवैरुद्रस्त्वंरविस्त्वंप्रजापतिः ॥ त्वमिंद्रोवसव
श्चाष्टौपरमात्मात्वमेवहि ॥ त्वमेवशरणंविष्णोशरणत्वंपतिर्मम ॥ स्वर्गेवानरकेवापियत्रयत्रगमिष्यसि ॥ तत्रतत्रह्यहंपृष्ठेगमि
ष्यामितवाशुवै ॥ ब्रह्महत्यादिभिःपापैस्त्वांमोक्ष्यामियमालयात् ॥ अहंब्रह्माह्यहंविष्णुरहंसूर्यश्चदिक्पतिः ॥ आदित्यचंद्राव
निलोनलश्चद्यौर्भूमिरापश्चअहर्निशाच ॥ एतेचसर्वेममसाहसेनतुष्यंतुतेदेवनराश्चसर्वे ॥ इतिपठित्वा ॥ तदंगतयाविहितंहरिद्रा
कुंकुमांजनादिसौभाग्ययुतवंशपात्रदानंकरिष्येइतिसंकल्प्यसोपस्कराणिशूर्पाणिदद्यात् ॥ तत्रमंत्रः ॥ लक्ष्मीनारायणोदेवोबल
सत्वगुणाश्रयः ॥ गाढंसत्वंचमेदद्याद्धायनैःपरितोषितः ॥ सोपस्कराणिशूर्पाणिवायनैःसंयुतानिच ॥ लक्ष्मीनारायणप्रीत्यै

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

सत्वकायाददाम्यहं ॥ अनेनसोपस्करशूर्पदानेनलक्ष्मीनारायणौप्रीयेतां ॥ अग्नेःसमीपमागत्यपंचरत्नानिपल्लवे ॥ नीलांजनंत
थाबध्वामुखेमुक्ताफलंन्यसेत् ॥ ततोग्निप्रार्थनंकृत्वामंत्रेणानेननिश्चितं ॥ स्वाहासंश्लेषनिर्विण्णसर्वगात्रहुताशन ॥ सत्वमार्गप्र
दानेननयमांपत्युरंतिकं ॥ इतिअग्निंसंप्रार्थ्यअग्नावाज्याहुतीर्जुहुयात् ॥ अग्नयेतेजोधिपतयेस्वाहा ॥ विष्णवेसत्वाधिपतये
स्वाहा ॥ कालायधर्माधिपतयेस्वाहा ॥ पृथिव्यैलोकाधिष्ठात्र्यैस्वाहा ॥ अद्भ्योरसाधिष्ठात्रीभ्यःस्वाहा ॥ वायवेबलाधिपतये०॥
आकाशायसर्वाधिपतये० ॥ कालायधर्माधिष्ठात्रे० ॥ अद्भ्यःसर्वसाक्षिणीभ्यः० ॥ ब्रह्मणेवेदाधिष्ठात्रे० ॥ रुद्रायश्मशाना
धिष्ठात्रेस्वाहेत्येकादशाहुतीर्हुत्वा ॥ कुर्यादग्नेःप्रदक्षिणां ॥ ततःशिलांसोपस्करांसंपूज्यतामारुह्यपुष्पांजलिंगृहीत्वाग्निंप्रा
र्थयेत् ॥ त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत् ॥ त्वमेवदेवजानीषेनविदुर्यानिमानुषाः ॥ अनुगच्छामिभर्तारंवैधव्यभयपी
डिता ॥ सत्वमार्गप्रदानेननयमांभर्तुरंतिकं ॥ इदंशरीरंसकलंमदीयंदग्ध्वाकृशानोकुरुदिव्यमाशु ॥ तथाचभर्तुःकुरुदिव्यदेहं
भर्तुःसमीपंभगवन्व्रजामि ॥ किंमयानकृतंसाधुभवेद्यदिचतेनघ ॥ इदंशरीरमालिंग्यप्रविशामिहुताशनं ॥ इमंमंत्रंसमुच्चार्यप्र
विशेच्चहुताशनं॥ तांप्रेतस्योत्तरतःसुप्तांदेवरःशिष्योवानमस्कृत्यकरेधृत्वोदीर्ष्वेतिद्वाभ्यांमंत्राभ्यांसत्वरहितामुत्थापयेत्॥ सत्वा
धिकातुसुहृदःसमाश्वास्यभर्तारंविष्णुरूपंस्मरंतीअग्निंप्रविशेत् ॥ अग्नौप्रविशंतींपतिव्रतांदृष्ट्वाविप्रामंत्रौपठेयुः ॥ इमाःपतिव्रताः
पुण्याःस्त्रियोऽपापाःसुशोभनाः ॥ सहभर्तृशरीरेणप्रविशंतुहुताशनं॥ इमानारींरविधवाःसुपत्नी० मृशंतां ॥ अनश्रयो० योनि
मग्ने ॥ अनुव्रजंतिभर्तारंगृहात्पितृवनंमुदा ॥ पदेपदेश्वमेधस्यफलंप्राप्नोत्यनुत्तममिति॥ मृतेभर्तरियानारीधर्मशीलादृढव्रता ॥
अनुगच्छतिभर्तारंशृणुतस्यास्तुयत्फलं ॥ तिस्रःकोट्योर्धकोटीचयावंत्यंगरुहाणिवै ॥ तावंत्यब्दसहस्राणिस्वर्गलोकेमहीयते ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

मातृकंपितृकंचैवयत्रकन्याप्रदीयते ॥ कुलत्रयंपुनात्येषाभर्तारंयानुगच्छति ॥ इत्यादिवाक्यपर्यालोचनयासंकल्पेतत्तत्फलमु
ल्लेख्यं ॥ अन्वारोहणेअवयवपिंडाद्यर्थपाकतंत्रेणपिंडंपृथगितिधौंडिपद्धतौ ॥ अन्यत्रतु ॥ अन्वारोहेतुनारीणांपत्युश्चैकोदक
क्रिया ॥ पिंडदानक्रियांतद्वच्छ्राद्धंप्रत्याब्दिकंतथा ॥ नवश्राद्धानिसर्वाणिसपिंडीकरणंपृथक् ॥ एकएववृषोत्सर्गोगौरेकातत्र
दीयते ॥ अन्वारोहणेएकचित्यारोहणेवास्त्रियाःपृथक्सपिंडनंनास्ति ॥ भर्तुःकृतेस्त्रियाःकृतंभवतीतिस्मृत्यर्थसारे ॥ भर्त्रैवैके
नेतिबहवः ॥ भर्त्रादित्रयेणेत्यन्ये ॥ अन्वारोहणंचगर्भिणीनांबालापत्यानांरजस्वलानांसूतिकानांचनिषिद्धं ॥ गर्भिणीनांतत्तज्जा
तिवधसमं ॥ ब्राह्मण्याएकचित्यारोहणं ॥ क्षत्रियस्त्रियाःपृथक्सहवाचितिः ॥ असवर्णायाःपृथक्चितिरेव ॥ मदनपारिजाते
अन्वारोहणेनवश्राद्धमात्रंपृथक् ॥ तत्रापिपितृमातामहपार्वणद्वयवत्सहैवावस्थानं ॥ आपस्तंबः ॥ चितिभ्रष्टातुयानारीमोहाद्वि
चलिताभवेत् ॥ प्राजापत्येनशुध्येततस्माद्वैपापकर्मणः ॥ भर्तुरनुगमनेचितिभ्रष्टाइत्यर्थः ॥ पद्व्यांरजस्वलायांतुयदाभर्तामृत
स्तदा ॥ देशकालवशात्तदैवानुगंतुमिच्छतिनपंचमादिदिनंप्रतीक्षते ॥ तत्रविधिः ॥ यदास्त्रियामुदक्यांतुपतिःप्राणान्समुत्सृ
जेत् ॥ द्रोणमेकंतंडुलानामवहन्याद्विशुद्धये ॥ मुसलाघातैस्तदसृक्स्रवतेयोनिमंडलात् ॥ विरजस्कामन्यमानास्वेचित्तेतद
सृक्क्षयं ॥ दृष्ट्वाशौचंप्रकुर्वीतपंचमृत्तिकयापृथक् ॥ त्रिंशद्विंशद्दशपंचगवांदत्वात्वहःक्रमात् ॥ विप्राणांवचनाच्छुद्धासमारो
हेद्धुताशनं ॥ नारीणांसरजस्काणामियंशुद्धिरुदाहृता ॥ ॥ इतिसहगमनविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ३६७ ॥ रजस्वलामरणविधिः ॥

[illegible] ॥ संनिधिसत्तायेचवह्नावप्यप्रमादतः ॥ उर्द्धकीयूसिकामारीचेत्तांदाहयेत्स्वयं ॥ संग्रहे ॥ पंचभिःस्नापयित्वातुगव्यैःप्रेतां

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रजस्वलां ॥ वस्त्रांतरावृतांकृत्वादाहयेद्विधिपूर्वकं ॥ शातातपः ॥ रजस्वलायाःप्रेतायाःसंस्कारादीनिनाचरेत् ॥ ऊर्ध्वंत्रिरात्रात्स्नातायाःशवधर्मेणदाहयेत् ॥ त्र्यहोत्तरंसंस्कारमाह ॥ देशकालौसंकीर्त्यामुकगोत्रायाअमुकप्रेतायारजस्वलायामरणनिमित्तप्रत्यवायपरिहारार्थंऔर्ध्वदेहिकयोग्यतार्थंचचांद्रायणत्रयप्रायश्चित्तपूर्वकंशूर्पेणाष्टोत्तरशतस्नानानिकारयिष्यइतिसंकल्प्य ॥ब्राह्मणवचनेनचांद्रायणत्रयंकृत्वायवपिष्टेनप्रेतमुपलिप्यस्वयंस्नात्वाशूर्पोदकेनाष्टोत्तरशतवारंस्नापयेत् ॥ प्रेतंप्रक्षाल्यभस्मगोमयमृत्तिकाकुशोदकपंचगव्यशुद्धोदकैःस्नापयेत् ॥ पावमानीःस्वस्त्ययनीर्यदंतियच्चदूरके ॥ आपोहिष्ठेतितिसृभिःकयानइतितिसृभिः संस्नाप्यपूर्ववस्त्रंपरित्यज्यविधिनादहेत् ॥ यद्वारजस्वलांसूतिकांचमलंप्रक्षाल्यस्नापयित्वाकाष्ठवदादौदग्ध्वास्थीनिविधिनादहेत् ॥ इतिरजस्वलामरणविधिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३६८ ॥ सूतिकामरणविधिः ॥

सूतिकामरणेप्राप्तेसर्वौषध्यनुलेपनं ॥ असूतिकाचसंस्पृष्टाशूर्पाणांतुशतंक्षिपेत् ॥ पूर्ववत्संकल्प्यब्राह्मणवचनाच्चांद्रायणत्रयंकृत्वापूर्ववच्छतस्नानानिकारयित्वाकुंभेजलमादायपंचगव्यंतत्रक्षिप्त्वा ॥ आपोहिष्ठीयवामदेव्यवारुणादिपुण्याभिर्ऋग्भिरभिमंत्र्यपूर्वोक्तमंत्रैःसंस्नाप्यविधिनादहेत् ॥ अथसूतिकामरणेदिनभेदेनविशेषप्रायश्चित्तं ॥ सूतिकातुयदासाध्वीविस्नातामरणंगता ॥ त्रिवर्षपूर्णपर्यंतंशुद्ध्येत्कृच्छ्रेणसर्वदा ॥ एतत्प्रथमत्र्यहविषयं ॥ सूतिकातुयदानारीरजसाचपरिप्लुता ॥ म्रियतेचेत्तुसानारीद्विवर्षं कृच्छ्रमाचरेत् ॥ एतद्द्वितीयत्र्यहविषयं ॥ सूतिकातुयदासाध्वीविस्नातामरणंगता ॥ त्रिषण्णवदिनादर्वागेकाब्देनविशुद्ध्यति ॥ दशाहेतु ॥ सूतिकातुयदानारीप्राणांश्चैवपरित्यजेत् ॥ मासमेकावधिर्यावत्त्रिभिःकृच्छ्रैर्विशुद्ध्यति ॥ तथा ॥ सूतिकायांमृतायां

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तुकथंकुर्वन्तियाज्ञिकाः ॥ कुंभेसलिलमादायपंचगव्यंक्षिपेत्ततः ॥ पुण्याभिर्ऋग्भिःसंमंत्र्यवाचाशुद्धिंलभेत्ततः ॥ तेनैवस्नाप
यित्वातुदाहंकुर्याद्यथाविधि ॥ अग्निगाभिर्मंत्रिताभिर्वामदेव्याभिरेवच ॥ अन्यैश्चवारुणैर्मंत्रैःसुस्नाप्यविधिनादहेत् ॥

॥ ३६९ ॥ गर्भिणीमरणविधिः ॥

यदागर्भवतीनारीसशल्यासंस्थिताभवेत् ॥ कुक्षिंभित्वाततःशल्यंनिर्हरेद्यदिजीवति ॥ प्रमीतंनिक्षिपेत्तंतुप्रायश्चित्तंततःपरं ॥
सात्रयस्त्रिंशतात्कृच्छ्रैःशुध्यतेशल्यदोषतः ॥ सगर्भदहनेतस्यावर्णजंवधपातकं ॥ प्रायश्चित्तंचरित्वातुशुद्ध्यंतेपापकारिणः ॥
दग्ध्वातुगर्भसंयुक्तांत्रिरब्दंकृच्छ्रमाचरेत् ॥ इतिगर्भिणीमरणविधिः ॥ ॥ ॥ ॥

॥ ३७० ॥ ब्रह्मचारिमरणविधिः ॥

विधानमालायांविशेषः ॥ येषांकुलेब्रह्मचारीनिधनंप्राप्नुयाद्यदि ॥ तत्कुलंक्षयमाप्नोतिसोपिदुर्गतिमाप्नुयात् ॥ ग्रहत्वंप्राप्नुयाद्वो
धिद्रुमेचसततंवसेत् ॥ तस्यापितस्यवंशस्यगतिमिच्छन्महीयसीं ॥ विधानंचविधायाशुऔर्ध्वदेहिकमाचरेत् ॥ मृतस्यम्रियमाण
स्यषडब्दंव्रतमादिशेत् ॥ त्रिंशद्भ्योब्रह्मचारिभ्योदद्यात्कौपीनकान्नवान् ॥ हस्तमात्राःकर्णमात्रादद्यात्कृष्णाजिनानिच ॥ पादु
काछत्रमाल्यानिगोपीचंदनमेवच ॥ मणिप्रवालमालाश्चब्रह्मसूत्राणिचार्पयेत् ॥ मंत्रैस्तत्तल्लिंगकैश्चब्रह्मसायुज्यसिद्धये ॥ अभा
वेव्रतिनांपूज्यागृहस्थाःसाधवःशुभाः ॥ एवंकृतेविधानेचविघ्नस्तस्यनजायते ॥ ॥ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३७१ ॥ ब्रह्मचारिमरणेअर्कविवाहः ॥

शौनकः ॥ ब्रह्मचारिमृतौरीतिंकथयामिसमासतः ॥ तत्रावकीर्णदोषस्यप्रायश्चित्तंप्रशांतये ॥ द्वादशाब्दंषडब्दंवात्र्यब्दंशक्त्या थवाचरेत् ॥ ततोव्रतविसर्गाख्यंविधिंसम्यक्समाचरेत् ॥ स्नातकोब्रह्मचारीचनिधनंप्राप्नुयाद्यदि ॥ संयोज्यचार्कविधिनासंयो ज्यौतौपरस्परं ॥ अथाग्निमुपसमाधाय ॥ एवंगुणेत्यादिअमुकगोत्रस्यामुकशर्मणोमृतस्यब्रह्मचारिणोव्रतविसर्गंकरिष्ये ॥ तदंगं हिरण्येननांदीश्राद्धंकरिष्ये ॥ इतिसंकल्प्य ॥ तत्कृत्वान्वाधानाद्याधारांतंकृत्वाज्यंजुहुयात् ॥ व्याहृतयश्चतस्रः ॥ अग्नयेव्र तपतये० ॥ अग्नयेव्रतानुष्ठानसंपादकाय० ॥ विश्वेभ्योदेवेभ्यः० ॥ ततःस्विष्टकृदादिसंपाद्यपश्चादर्कसमीपेगत्वाथवार्कशाखा मानीयार्कविवाहःकार्यः ॥ अर्कब्रह्मचारिणौहरिद्रयानुलिप्यपीतसूत्रेणवस्त्रयुग्मेनचावेष्ट्याग्निमुपसमाधाय ॥ एवंगुणेत्यादि अमुकगोत्रस्येत्यादिऔर्ध्वदेहिकाधिकारार्थमर्कविवाहंकरिष्येइतिसंकल्प्यतदंगंहिरण्येननांदीश्राद्धंकृत्वास्थंडिलेग्निंप्रतिष्ठाप्या ज्यभागांतंकृत्वाज्यहोमः ॥ अग्नयेस्वाहा ॥ बृहस्पतयेः० ॥ विवाहविधियोजकायस्वाहा ॥ ॐ यस्मैत्वाकामकामायवयंसम्रा ड्यजामहे ॥ तमस्मभ्यंकामंदत्वाथेदंत्वंघृतंपिबस्वाहा ॥ कामायेदं० ॥ चतस्रोव्याहृतयः ॥ ततःस्विष्टकृदादिअर्कशाखांब्र ह्मचारिशवंचतुषाग्निनाविधिवद्दहेत् ॥ शाखांप्रवाहयेदित्यन्ये ॥ इतिब्रह्मचारिमरणविधिः ॥ ॥ ॥

॥ ३७२ ॥ कुष्ठीमरणविधिः ॥

यमः ॥ मृतस्यकुष्ठिनोदेहंनिखनेद्गोष्ठभूमिषु ॥ वासरत्रितयंपश्चादुद्धृत्यान्यत्रतंदहेत् ॥ नगंगाप्लवनंकार्यंनिक्षेपविधिरुच्यते ॥ षडब्दव्रतपूर्णेनविधिनांत्यक्रतुंचरेत् ॥ ततोस्थिसंचयंतस्यगंगायांप्रक्षिपेत्सुधीः ॥ मासिमासिततःकुर्यान्मासिश्राद्धानिपार्वणात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

संकल्प्यविधिनाकेचित्प्रवदंतिमनीषिणः॥ इत्येतत्कुष्ठिनोह्यूर्ध्वंकथितंशास्त्रकोविदैः॥ स्मृतिविद्भिरनूचानैर्यमाद्यैःपूतविग्रहैः॥

॥ ३७३ ॥ पालाशप्रतिकृतिदाहविधिः ॥

तत्रदेशांतरमरणेपराकद्वयमष्टौकृच्छ्रान्वाकृत्वास्थीनिदहेत् ॥ यद्यस्थीनिचांडालश्वादिभिःस्पृष्टानिस्युस्तदापंचगव्यगंगोदकाभ्यांप्रक्षाल्यविधिनादहेत् ॥ यस्यास्थीनिनलभ्यंतेतस्यपर्णशरदाहः ॥ सचेत्थं ॥ शुचिभूमौकृष्णमृगचर्मास्तीर्यैकंशतंदक्षिणोत्तरायतंनिवेश्यतदुपरिपलाशत्रिवृतानिन्यसेत् ॥ शिरसिचत्वारिंशत् ४० ग्रीवायांदश १० बाह्वोःप्रत्येकंपंचाशत्एवं १०० करांगुलीषुसर्वासुदश १० उरसिविंशतिः २० जठरेत्रिंशत् ३० शिश्नेचत्वारि ४ अंडयोस्त्रयंत्रयं ६ ऊर्वोःप्रत्येकंपंचाशत् १०० जंघादिपादतलांतंयावत्पादयोःप्रत्येकंपंचदश ३० सर्वपादांगुलीषुदश १० एवंषष्ट्यधिकशतत्रयमितैःपर्णशरैःशरीरंनिर्मायोर्णासूत्रेणसहबध्वाजलालोडितयवपिष्टेनानुलिंपेत् ॥ ततःशक्तौसत्यांवक्ष्यमाणान्यपिकार्याणि ॥ मूर्धस्थानेकदलीफलं ॥ शिरसिनारिकेलं ॥ वर्तुलंतुंबंवा ॥ ललाटेकदलीपत्रं ॥ दंतेषुदाडिमीबीजानि कर्णेकंकणं नेत्रयोःकपर्दिकौ नासिकायांनीलपुष्पं नाभावास्त्रं स्तनयोर्जंबीरफलद्वयं वातेमनःशिलां पित्तेहरितालं कफेसमुद्रफेनं रुधिरेमधु पुरीषेगोमयं मूत्रेगोमूत्रं रेतसिपारदं वृषणयोर्वृंताकद्वयं शिश्नेगृंजरं केशेषुवनसूकरसटाः लोमसूर्णां मांसस्थानेयवपिष्टेनानुलिंपेत् ॥ ततःपंचगव्यमंत्रैःपंचगव्येनप्रोक्षयेत् ॥ पंचामृतमंत्रैःपंचामृतेनच ॥ पुनर्मआत्माइतिमंत्रेणप्राणप्रवेशनंभावयेत् ॥ यद्वायत्तेयममितिसूक्तेनप्राणानानीयशुक्रमसिज्योतिरसीतिमंत्रेणपारदंक्षिप्त्वाशिरोमेश्रीरित्यादिवाक्यादीनिपठेत् ॥ शिरोमेश्रीः ॥ यशोमुखं ॥ त्विषिःकेशाश्चश्मश्रूणि ॥ राजामेप्राणोमृतं ॥ सम्राट्चक्षुः ॥ विराट्श्रोत्रं ॥ [illegible] मनोन्युः ॥ स्वराड्धर्मः ॥ मोदाःप्रमोदाअंगुली

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

रंगा॑नि ॥ चि॒त्तंमे॒सहः॑ ॥ बा॒हूमे॒बल॑मिंद्रि॒यं ॥ हस्तौ॑मे॒कर्म॑वी॒र्यं॑ ॥ आ॒त्मा॑क्ष॒त्रमु॒रो॒मम॑ ॥ पृ॒ष्ठीमे॑रा॒ष्ट्रमु॒दर॒मꣳसौ॑ ॥ ग्री॒वाश्च॒श्रो ण्यौ॑ ॥ ऊ॒रूअ॑र॒त्नीजानु॑नी ॥ विशो॒मेंगा॑निस॒र्वतः॑ ॥ नाभि॑र्मेचि॒त्तंवि॒ज्ञानं॑ ॥ पा॒युर्मेप॑चितिर्भ॒सत् ॥ आ॒नं॒द॒नं॒दावां॒डौमे॑ ॥ भगः॒ सौभा॑ग्यं॒पसः॑ ॥ जंघा॑भ्यांप॒द्भ्यांधर्मो॑स्मि ॥ वि॒शिराजा॒प्रति॑ष्ठितः ॥ इतिशरीरंस्पृशेत् ॥ ततःशरीरंस्नापयित्वाचंदनेनानुलिप्य वस्त्रोपवीतेपरिधाप्यालंकृत्यअयंसदेवदत्तइतितमभिमृश्यइदमस्योपासनमित्यग्निंध्यात्वावैतरण्यादिदानपूर्वकमूर्णासूत्रेणवेष्ट यित्वाकृष्णाजिनेनाच्छाद्यपूर्वोक्तविधिनाशववद्दहेत् ॥ पलाशत्रिवृताभावेकुशैःप्रतिकृतिंकुर्यात् ॥ आहिताग्नेःप्रतिकृतिदाहे स्थिदाहेवादशाहमेवाशौचं ॥ अनाहिताग्नेस्तुत्र्यहं ॥ पर्णशरदाहेपुत्रपत्न्योरगृहीताशौचयोर्दशाहादिपूर्णमेव ॥ गृहीता शौचयोस्तुतयोरपित्र्यहाशौचं ॥ पत्नीपुनःसंस्कारेपत्युश्चैवमेवाशौचं ॥ आहिताग्नौविदेशस्थेमृतेयावद्विधिनानसंस्कारस्ताव त्पुत्रादीनांनाशौचं ॥ नचसंध्यादिकर्मलोपः ॥ इतिपालाशप्रतिकृतिदाहविधिः ॥ ॥ ॥

॥ ३७४ ॥ पुनःसंस्कारेकालशुद्धिः ॥

आशौचमध्येपुनःसंस्कारेयथासंभवंदिनंशोध्यं ॥ दशाहोत्तरंतुशोध्यमेव ॥ संवत्सरोर्ध्वंप्रेतकार्येउत्तरायणंश्रेयः ॥ तत्रापिकृ ष्णपक्षः ॥ तिथिषुनंदांत्रयोदशींदिनक्षयंचवर्जयेत् ॥ शुक्रशनिवारौवर्ज्यौ ॥ नक्षत्रेषुभरणीकृत्तिकाश्लेषार्द्रामघाधनिष्ठादिपंच कंत्रिपुष्कराणिचातिदुष्टानिसर्वथात्याज्यानि ॥ व्यतीपातेवैधृतौपरिघेचयोगेविष्टिकरणेचतुर्थाष्टमद्वादशस्थेचंद्रेचातिदोषः ॥ रो हिणीमृगपुनर्वसुपूर्वोत्तराचित्राविशाखानुराधापूर्वाषाढोत्तराषाढाद्विपुष्कराणिचेषद्दुष्टानिसंभवेवर्जानिशिष्टान्यदुष्टानि ॥ सर्वथा दिनशुद्ध्यसंभवेनातिदुष्टंबाह्यनक्षत्रंग्राह्यं ॥ पुनःसंस्कारेआंतरंग्राह्यं ॥ नंदायांशुक्रेचतुर्दश्यांत्रिजन्मनक्षत्रेषुएकोद्दिष्टमितिनिषि

CC-0. In Public Domain Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ङ्गं ॥ एकादशाहादौननिषेधः॥तत्रतिथ्यादिनैवशोध्यं॥ युगादिमन्वादिसंक्रांत्यमासुप्रेतकार्येपुनःसंस्कारेचकिंचिदपिनैवशोध्यं ॥

॥ ३७५ ॥ अधिकारिणः ॥

सर्वत्रदाहपिंडाद्यपतितादिर्ज्येष्ठपुत्रऔरसएवकुर्यात् ॥ तदसंनिधौकनिष्ठः ॥ सर्वेषांपुत्राणामसंनिधौपौत्रोज्येष्ठपुत्रादिक्रमेण तदभावेतत्पुत्रादयःपूर्ववत् ॥ उक्ताभावेपत्नी ॥ एवंपुत्राद्यभावेकनिष्ठभ्राता ॥ तदभावेपत्नी ॥ पत्न्यभावेभ्रातृपुत्रोभ्रातास्तु षादुहितादौहित्रःअन्यःसगोत्रःसपिंडःब्रह्मचारीमित्रंशिष्योगुरुर्बांधवोधनसंबंधीवादद्यात् ॥ नपुत्रस्यपितादद्यान्नानुजस्याग्रज स्तथा ॥ यदिस्नेहेनकुर्वीतसपिंडीकरणंविना ॥ इदंसतिसंभवे ॥ अदत्तकन्यायैपितरावेवदत्तः ॥ अन्याभावेदत्तानामपिपित रावेव ॥ दौहित्रमातामहौपरस्परं ॥ मातामह्याश्चदौहित्रोजामातृश्वसुरौमिथः ॥ श्वश्वादेःस्नुषा ॥ भ्रातरौचमिथोदत्तःगुरुशि ष्यौपरस्परं ॥ सर्वाभावेयःकश्चित्कुर्यात्तस्यसर्वसंपत्प्राप्तिः ॥ वर्षत्रयानंतरंचूडाभावेपिपित्रोरौर्ध्वदेहिकंमंत्रवत्कुर्यात् ॥ वर्षत्र यादर्वाक्कृतचूडोपिशक्तौसत्यांसर्वमंत्रवत्कुर्यात् ॥ अशक्तोकृतचूडोवातदाग्निदानमेवमंत्रवत्कुर्यात् ॥ शिष्टमन्येनकारयेत् ॥ एवंपत्न्याप्यग्निदानमात्रंसमंत्रकंकार्यंशिष्टमन्येनकारयेत् ॥ असंस्कृतेपत्न्याअग्निदानंसमंत्रकं ॥ कर्तव्यमितरत्सर्वंकारयेदन्य मेवहि ॥ अनुपेतोपिकुर्वीतमंत्रवत्पैतृमेधिकं ॥ यद्यसौकृतचूडःस्याद्यदिस्याच्चत्रिवत्सरः ॥ असगोत्रःसगोत्रोवायदिस्त्रीयदिवा पुमान् ॥ प्रथमेहनियोदद्यात्सदशाहंसमापयेत् ॥ ज्येष्ठेनवाकनिष्ठेनसपिंडीकरणेकृते ॥ देशांतरगतानांचपुत्राणांतुकथंभवेत् ॥ श्रुत्वातुवपनंकार्यंदशाहांतंतिलोदकं ॥ ततःसपिंडीकरणंकुर्यादेकादशेहनि ॥ द्वादशाहेनकर्तव्यमितिशातातपोब्रवीत् ॥ स्मृत्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्थमसपिंडेब्रह्मचारिणामनपत्यानांचसपिंडनंनास्तितेषांसद्मनिपिंडनेवा ॥ तत्तत्कुलदानांव्यवहितैःसपिंडनंकार्यंनवा ॥ केचित्सर्व

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

त्रसपिंडनमाहुरिति ॥ यतीनांप्रेतत्वंनास्त्यतस्तेषांनैकोद्दिष्टेनचसपिंडीकरणं किंत्वेकादशेहनिपार्वणंकार्यं ॥ दंडग्रहणात्पूर्वंमृतेतुदाहादिसपिंडनांतंसर्वंविधिनाकार्यमेव ॥ रात्रावेवसमुत्पन्नेमृतेरजसिसूतके ॥ पूर्वमेवदिनंग्राह्यंयावन्नाभ्युदितोरविरितिदेशाचारात् ॥ रात्रौवारात्रिशेषेवाम्रियंतेवाद्विजातयः ॥ दाहंकृत्वायथान्यायंद्व्यौपिंडौनिर्वपेत्सुतः ॥ संध्यायांवातथारात्रौदाहः पाथेयकर्मच ॥ नवश्राद्धंचनोकुर्यात्कृतंनिःफलतांव्रजेत् ॥ रात्रिमृतस्यतुरात्रावेवदाहः ॥ वपनंतुप्रातः ॥ शवंरात्र्युषितंचेत्रीन्कृच्छ्रान्कृत्वादहेत्सुतइति ॥ प्रवृत्ताशौचतंत्रस्तुयदिदर्शःप्रपद्यते ॥ समाप्यचोदकंपिंडान्स्नानमात्रंसमाचरेत् ॥ मातापितृविषयेतु ॥ अंतर्दशाहेदर्शश्चेत्तत्रसर्वंसमापयेत् ॥ पित्रोस्तुयावदाशौचंदद्यात्पिंडंतिलांजलिं ॥ पित्रोरित्येकशेषः ॥ गालवः ॥ पित्रोराशौचमध्येतुयदिदर्शःसमापतेत् ॥ तावदेवोत्तरंतंत्रंपर्यवस्येत्र्यहात्परमिति आपदादिविषयं ॥ त्र्यहानंतरंदर्शेमातापितृतंत्रस्यापिसमाप्तिर्नतुत्र्यहमध्येदर्शपातेमातापितृतंत्रसमाप्तिरिति ॥ सपिंडीकरणेव्युत्क्रममृतेतु ॥ मृतेपितरियस्याथविद्यतेचपितामहः ॥ तेनदेयास्त्रयःपिंडाःप्रपितामहपूर्वकाः ॥ तेभ्यश्चपैतृकःपिंडोनियोक्तव्यश्चपूर्ववत् ॥ मातर्यग्रेमृतायांतुविद्यतेचपितामही ॥ प्रपितामहीपूर्वंतुकार्यस्तत्राप्ययंविधिः ॥ व्युत्क्रमाच्चप्रमीतानांनैवकार्यासपिंडनेति ॥ मातापितृभर्तृव्यतिरिक्तविषय एषविधिःसंपिंडननिषेधरूपः ॥ यस्तुवृद्धादिरचिकित्स्योरुव्याधियुतःप्रत्याख्यातभिषक्क्रियोबुद्धिपूर्वकमप्यात्मानंघातयतिप्रयागादौवातस्यनदोषः ॥ शास्त्रानुज्ञातमरणत्वात् ॥ तस्यप्रायश्चित्तनारायणबलीनस्तः ॥ तत्तस्त्रिरात्रमेवाशौचंचतुर्थदिनेएकादशाहकृत्यंपंचमेसपिंडनं ॥ त्र्यहाशौचेपिपिंडास्त्रयःदशवा ॥ आद्यैत्येचाह्निपिंडत्रयं ॥ दशांजलिपक्षेत्रयोंजलयः ॥ शतांजलिपक्षेत्रिंशत् ॥ मध्येह्निपिंडचतुष्टयं ॥ चत्वारश्चत्वारिंशद्धांजलयः ॥ द्वितीयदिनेस्थिसंचयनं ॥ एवमन्यत्रापित्र्यहाशौचे॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एकाहाशौचेतुदशाहकृत्यंतस्मिन्नेवाहनि ॥द्वितीयेचैकादशाहं॥ इतिढौंढिपद्धतौ॥केचित्तुतत्रापिसद्यःशौचवदेकादशाहमाहुः ॥

॥ ३७६ ॥ अथातुरसंन्यासविधिः ॥

श्रीः ॥ उक्तंजाबालोपनिषदि ॥ यद्यातुरःस्यान्मनसावाचावासंन्यसेदेषपंथाब्राह्मणायानुवित्तस्तेनेतिसंन्यासीब्रह्मविदित्येवमे वतद्भवेदिति ॥ आतुरोपिद्विविधःरोगादिनामुमूर्षुःजलादिव्याघ्रादिभयाक्रांतश्च ॥ तत्रद्वितीयस्यत्वाहदत्तात्रेयः ॥ उत्पन्नेसं कटेघोरेचोरव्याघ्रादिगोचरे ॥ भयभीतस्यसंन्यासमंगिरामुनिरब्रवीत् ॥ भारते ॥ आतुराणांचसंन्यासेनविधिर्नैवचक्रिया ॥ प्रेषमात्रस्तुसंन्यासःसंन्यासंतत्रकारयेत् ॥ तथाच ॥ संन्यस्तमितियोब्रूयादित्यादिवाक्यैश्चप्रेषमात्रोच्चारणमेवतस्यसंन्यासः ॥ सचेज्जीवतियथाधिकारंयथाविधिदंडादिकंगृहीत्वायतिधर्मयुक्तोभवेत् ॥ रोगाद्यातुरस्यपुरुषसूक्तहोमविरजाहोमोपवासजागर णाद्यंगकलापस्यलोपः ॥ अन्यत्सर्वंभवत्येव ॥ ॥ तस्यायंप्रयोगः ॥ कात्यायनः ॥ कृच्छ्रांस्तुचतुरःकृत्वावापनार्थमनाश्रमी ॥ आश्रमीचेत्तप्तकृच्छ्रंतेनासौयोग्यतांव्रजेत् ॥ मिताक्षरायांचतुर्विंशतिमतेप्राजापत्येएकंसांतपनेद्वयंअतिकृच्छ्रेद्वयंगोदानमिति ॥ षट्त्रिंशन्मतेपिपराककृच्छ्रातिकृच्छ्रेचतिस्रोगाः ॥ पराककृच्छ्रतप्तकृच्छ्रातिकृच्छ्रस्थानेकृच्छ्रत्रयंचरेत् ॥ सांतपनस्यगोद्वयंअ शक्तौव्रतमाचरेत् ॥ तप्तकृच्छ्रेसार्धकायद्वयंस्मृतमितिस्मृत्यर्थसारे ॥ कायंनामप्राजापत्यमेव ॥ आतुरस्ततोद्रव्यवस्त्रगृहदेवपु स्तकादियथायथंविभज्यआचार्यार्थंसंन्यासविधिपर्याप्तंस्थापयित्वानिर्ममोभवेत् ॥ शोकाहंकारादिद्वंद्ववासनांत्यजेत् ॥ ततः नित्यक्रियादिसंपाद्यनदीतीरंगत्वोपविश्यपुत्रमुखंदृष्ट्वाजपेत् ॥ अशक्तश्चेच्छुचौदेशेसर्वंकुर्यात् ॥ त्वंब्रह्मत्वंयज्ञस्त्वंलोकइति ॥ [illegible] ॥ अहंब्रह्माहंयज्ञोहंलोकइति ॥ [illegible] ॥ [illegible]हंकस्यचित् ॥ ततःस्नात्वादेशकालौसंकीर्त्य

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

विष्णुंध्यात्वाअमुकगोत्रोत्पन्नस्यामुकशर्मणोममाशेषदुःखनिवृत्त्यतिशयानंदावाप्तिद्वारापरमपुरुषार्थप्राप्तयेपरमहंससंन्यासग्रहणंआतुरोक्तविधिनाकरिष्येइतिसंकल्प्यगृहस्थश्चेत्संकल्पात्पूर्वमेवप्रातरौपासनहोमंविधायात्मसमारोपणंकुर्यात् ॥ विच्छिन्नाग्निश्चेत्तद्विच्छिन्नकालातिक्रमप्रायश्चित्तंसद्यःपुनःसंधानंचकृत्वा ॥ यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानं ॥ अच्छावसूनिकृण्वन्नस्मेनर्यापुरूणि ॥ यज्ञोभूत्वायज्ञमासीदस्वांयोनिं ॥ जातवेदोभुवआजायमानःसक्षयएहि ॥ इतिमंत्रेणआत्मसमारोपणंकृत्वासंन्याससंकल्पंकुर्यात् ॥ ततःशक्तौसत्यांकक्षोपस्थवर्जकांश्चिच्छिखार्थंपंचसप्तकेशान्स्थापयित्वासशिखंवपनंकुर्यात् ॥ ततःस्वशक्त्यनुसारेणभस्मगोमयमृत्तिकास्नानानिकृत्वा वाससीपरिधायद्विराचम्यधर्मान्धारयमाणःपात्रेजलमुद्धृत्यतदेकदेशंहस्तेगृहीत्वाप्सुजुहुयात् ॥ एषवाअग्नेर्योनिःप्राणःप्राणंगच्छस्वाहा प्राणायेदं०॥ स्वांयोनिंगच्छस्वाहा प्राणायेदं०॥ आपोवैसर्वादेवताःसर्वाभ्योदेवताभ्योजुहोमिस्वाहा सर्वाभ्योदेवताभ्यइदं० ॥ इत्युद्धृतंजलंकिंचित्किंचित्गृहीत्वाआहुतित्रयमप्सुहुत्वापात्रहुतशेषंतोयंआशुःशिशानइत्यनुवाकेनाभिमंत्र्यकिंचिदुदकंगृहीत्वा पुत्रेषणावित्तेषणालोकेषणामयात्यक्ताःस्वाहा इतिमंत्रेणपीत्वापुनःकिंचिद्गृहीत्वाअभयंसर्वभूतेभ्योमत्तःस्वाहा इतिद्वितीयंपिबेत् ॥ ततोनिःशेषंगृहीत्वासंन्यस्तंमयास्वाहा इतितृतीयंपिबेत् ॥ ततःशक्तौसत्यांनाभिदघ्नेजलेस्थित्वाअशक्तश्चेज्जलसमीपेस्थित्वासावित्रीप्रवेशंकुर्यात् ॥ ॐ भूःसावित्रींप्रविशामि ॥ तत्सवितुर्वरेण्यं ॥ ॐ भुवःसावित्रींप्रविशामि ॥ भर्गोदेवस्यधीमहि ॥ ॐ स्वःसावित्रींप्रविशामि ॥ धियोयोनःप्रचोदयात् ॥ इतिपच्छः ॥ ॐ भूर्भुवःसावित्रींप्रविशामि ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ ॐ स्वःसावित्रींप्रविशामि ॥ धियोयोनःप्रचोदयात् ॥ इत्यर्धर्चशः ॥ ॐ भूर्भुवःस्वःसावित्रींप्रविशामि ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इतिसर्वां ॥ ॐ भूःप्रणवंप्र० ॥ ॐ भुवःप्रणवंप्र० ॥ ॐ स्वःप्रणवंप्र० ॥ ॐ भूर्भुवःस्वःप्रणवंप्र० इतिप्रणवप्रवेशः ॥ तरत्समंदीधा
वति० इतिसूक्तंजपित्वा ॥ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयायत्रिगुणात्मधारिणेविरिंचिनारायण
शंकरात्मने ॥ इतिआदित्यमुपस्थायपूर्वस्थापितशिखाकेशान्निकृत्ययज्ञोपवीतमंजलौगृहीत्वा भूःस्वाहेत्यप्सुहुत्वाप्राच्यांदिशिप्र
तिदिशंऊर्ध्वंअधस्ताच्चजलांजलीनुत्सिच्यपुत्रेषणायाश्चवित्तेषणायाश्चलोकेषणायाश्चव्युत्थितोहमित्युक्त्वाऊर्ध्वबाहुःसूर्याभिमु
खस्तिष्ठेत् ॥ देवान्साक्षिणःकृत्वाहरिंस्मरन्जलाद्बहिःस्थित्वा ॐ भूःसंन्यस्तंमया ॐ भुवःसंन्यस्तंमया ॐ स्वःसंन्यस्तंमया
ॐ भूर्भुवःस्वःसंन्यस्तंमया इतित्रिरुपांशुत्रिर्मध्यमस्वरेणत्रिरुच्चैर्वदेत् ॥ यद्वा ॐ भूर्भुवःस्वःसंन्यस्तंमयेतित्रिरुपांशुत्रिर्मध्यम
स्वरेणत्रिरुच्चैर्ब्रूयात् ॥ अर्थभावनैकचित्ताग्रःप्रेषोच्चारणंकुर्यात् ॥ ततोजलंप्रविश्याचम्यस्नात्वाचम्य ॥ अभयंसर्वभूतेभ्योन
मःस्वाहेतित्रीनंजलीन्जलेक्षिप्त्वाइदंपठेत् ॥ यत्किंचिद्वंधनंकर्मकृतमज्ञानतोमया ॥ प्रमादालस्यदोषाद्वातत्सर्वंसंत्यजाम्यहं ॥
एवंसंपूज्यभूतेभ्योदद्यादभयदक्षिणां ॥ पद्भ्यांकराभ्यांविहरन्नाहंवाक्कायमानसैः ॥ करिष्येप्राणिनांहिंसांप्राणिनःसंतुनिर्भयाः ॥
यमः ॥ दत्त्वातोयांजलिंविप्रोभक्त्यासंप्रार्थयेद्धरिं ॥ सर्वदेवात्मकेतोयेतोयाहुतिमहंहरे ॥ दत्वासर्वैषणांत्यक्त्वायुष्मच्छरण
मागतः ॥ त्राहिमांसर्वलोकेशगतिरन्यानविद्यते ॥ संन्यस्तंमेजगन्नाथपाहिमांमधुसूदन ॥ त्राहिमांसर्वदेवेशवासुदेवसनातन ॥
संन्यस्तंमेजगद्योनेपुंडरीकाक्षमोक्षद ॥ अहंसर्वाभयंदत्त्वाभूतानांपरमेश्वर ॥ युष्मच्छरणमापन्नस्त्राहिमांपुरुषोत्तम ॥ इतिपूर्वधृ
तवस्त्रंविसृज्यनग्नोभूत्वासप्तपदानिगच्छेत् ॥ ततोन्येनप्रार्थितःकाषायवस्त्रंकौपीनंप्रणवेनस्वीकृत्य ॥ युवासुवासाःपरिवीतआ
गात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासःकवयउन्नयंतिस्वाधियोमनसादेवयंतः ॥ इतिमंत्रेणपरिदध्यात् ॥ इंद्रस्यवज्रोसि

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वार्त्रघ्नःशर्ममेभव ॥ यत्पापंतन्निवारय ॥ सखामागोपायतेदंड ॥ प्रणवनसावित्र्याकमंडलुं ॥ एवमासनशिक्यादिकमपिमं त्रैर्गृहीत्वा ॥ महावाक्यब्रह्मोपदेशार्थमुपहारसहितंयथाविधिब्रह्मिष्ठंगुरुमुपसृज्यतस्मैसर्वस्वंदत्त्वोपतिष्ठेत ॥ योब्रह्माणंविदधा तिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै ॥ तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये ॥ ततोदक्षिणंजान्वाच्यपादावुपसंगृह्याधी हिभगवोब्रह्मेतिवदेत् ॥ ततोगुरुंस्वात्मानंब्रह्मरूपंध्यात्वासजलंशंखंद्वादशप्रणवैरभिमंत्र्यतेनशिष्यमभिषिच्यशंनोमित्रइतिशां तिंपठेत् ॥ ततस्तच्छिरसिहस्तंदत्वापुरुषसूक्तंजप्त्वा ॥ ममव्रतेहृदयंतेदधामिममचित्तमनुचित्तंतेअस्तु ॥ ममवाचमेकव्रतोजुष स्वबृहस्पतिष्ट्वानियुनक्तुमह्यं ॥ इतिजप्त्वोदङ्मुखःप्रणवार्थमनुसंदधन्दक्षिणकर्णेप्रणवमुपदिश्यतदर्थंपंचीकरणात्प्रबोध्य प्रज्ञानं ब्रह्म अयमात्माब्रह्म तत्त्वमसि अहंब्रह्मास्मि इत्याद्युपदिशेत् ॥ तदर्थंचवदेत् ॥ ततोनामापिदद्यात् ॥ ततोजीवतिचेद्योग पट्टंचगृहीत्वावेदांतवर्णनंयोगाभ्यासंचकुर्यात् ॥ यावज्जीवंयतिधर्मेणतिष्ठेत् ॥ आहिताग्निश्चेत्प्राजापत्यानिकृत्वाउत्सर्गेष्ट्याग्नी नुत्सृज्यात्मसमारोपंकृत्वासंन्यसेत् ॥ इत्यातुरसंन्यासविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ३७७ ॥ संन्यासग्रहणविधिः ॥

श्रीः ॥ तत्रोत्तरायणंप्रशस्तं ॥ आतुरस्यतुदक्षिणायनमपि ॥ तत्रादौगृह्याग्निमंतंतादृशविधुरंप्रतिचप्रयोगः ॥ तत्रशांत्यादिल क्षणंगुरुंसंशोध्यतन्निकटेत्रिमासंयतिधर्मान्संवीक्ष्यगायत्रीजपरुद्रजपकूष्मांडहोमादिभिःशुद्धिंलब्ध्वारिक्तातिथौ देशकालौस्मृ त्वामुकस्यममकरिष्यमाणसंन्यासेधिकारार्थंचतुःकृच्छ्रात्मकंप्रायश्चित्तं प्रतिकृच्छ्रंतत्प्रत्याम्नायैकैकंगोनिष्क्रयद्वाराहमाचरिष्ये ॥ कृच्छ्रप्रत्याम्नायगोनिष्क्रयंद्रव्यंविप्रेभ्योदातुमुत्सृज्येइतिसंकल्पपूर्वंकंरजतनिष्कतदर्धतदर्धान्यतमंप्रतिधेनुदद्यात् ॥ एकादश्या

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्वादश्यांवायथाब्रह्मरात्रिःस्यात्तथाश्राद्धान्यारभेत् ॥ अत्रानाश्रमिणश्चतुःकृच्छ्रमन्यस्यतप्तकृच्छ्रमितिसिंधुः ॥ स्वस्यनवश्राद्धस्यषोडशश्राद्धसपिंडीकरणानिसाग्निःपार्वणविधिनानिरग्निरेकोद्दिष्टविधिनाकुर्यादितिकेचित् ॥ नेत्यन्ये ॥ ॥ अथाष्टौश्राद्धानि ॥ तत्रापस्तंबहिरण्यकेशीयादीनामग्नौकरणपिंडादिरहितःसांकल्पिकप्रयोगः ॥ आश्वलायनादीनांसपिंडकःपार्वणप्रयोगः ॥ तत्रादौसव्येनसयवजलेनश्राद्धांगतर्पणं ॥ ब्रह्माणंतर्पयामि विष्णुंत० महेश्वरंत० देवर्षीन्० ब्रह्मर्षीन्० क्षत्रर्षीन्० वसून्० रुद्रान्० आदित्यान्० सनकं० सनंदनं० सनातनं० पंचमहाभूतानि० चक्षुरादिकरणानि० भूतग्रामं० पितरं० पितामहं० प्रपितामहं० मातरं० पितामहीं० प्रपितामहीं० आत्मानं० पितरं० पितामहं० इतिनद्यादौकृत्वागृहमागत्यदेशकालौस्मृत्वा करिष्यमाणसंन्यासांगत्वेनाष्टौश्राद्धानिपार्वणविधिनान्नेनामेनवाकरिष्येइतिसंकल्प्यक्षणंदद्यात् ॥ अत्रसर्वंनांदीश्राद्धवत् तेननापसव्यं तिलस्थानेयवाः युग्माविप्राः तथाचदेवस्थानेविप्रौद्वौश्राद्धाष्टकेषोडशेत्यष्टादशविप्राः ॥ तत्रसत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाःस्थानेक्षणःकर्तव्यःइत्येकंवृत्वाद्वितीयंवृणुयात् ॥ एवमग्रेपिप्रथमेदेवश्राद्धेब्रह्मविष्णुमहेश्वरा नांदीमुखाःस्थानेक्षणः १ द्वितीयेऋषिश्राद्धेदेवर्षिब्रह्मर्षिक्षत्रर्षयःनांदी० २ दिव्यश्राद्धेवसुरुद्रादित्या नांदी० ३ मनुष्यश्राद्धेसनकसनंदनसनातनाः नांदी० ४ पंचमेभूतश्राद्धेपृथिव्यादिपंचमहाभूतान्येकादशचतुरादिकरणादिचतुर्विधभूतग्रामाः नांदी० ५ षष्ठेपितृश्राद्धेपितृपितामहप्रपितामहा नांदी० ६ मातृश्राद्धेमातृपितामहीप्रपितामह्यो नांदी० ७ अष्टमेआत्मश्राद्धेआत्मपितृपितामहा नांदी० ८ आत्मांतरात्मापरमात्मेतिकेचित् इतिद्वौद्वौविप्रौवृणुयात् ॥ सर्वत्रनांदीमुखत्वंविशेषणं युग्माविप्राः सत्यवसुदक्षक्रतूवादेवौ ततःसर्वेषांपाद्यंदत्वाप्राङ्मुखामुदक्संस्थामुपवेश्य [illegible] ॥ संन्यासार्थमहंश्राद्धंकुर्वेब्रूतद्विजोत्तमाः ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

अनुज्ञांप्राप्ययुष्माकंसिद्धिंप्राप्स्यामिशाश्वतीं ॥ कुरुइतिप्रत्युक्तःसयवऋजुदूर्वादियुग्मेनाब्दानपूर्वकंसंबुद्ध्यंतेइदमासनमित्य
ष्टादशस्वासनंदद्यात् ॥ ततआश्वलायनानामर्घ्यपात्रासादनंआपस्तंबादीनांसांकल्पिकत्वान्नार्घ्यं ॥ देवार्थमेकंपार्वणाष्टकार्थमष्टा
वित्येवंनवपात्राणि ॥ सर्वत्रपवित्रद्वयांतर्हितेषुशन्नोदेवीरित्यपआसिच्यविश्वेदेवपात्रेयवोसीतियवाःअष्टपात्रेषुतिलोसीतिमंत्रस्यो
हेनयवानोप्यगंधादिपूजनं ॥ ऊहस्तु यवोसिसोमदेवत्योगोसवेदेवनिर्मितः ॥ प्रत्नवद्भिःप्रत्तःपुष्ट्यानांदीमुखान्देवान्प्रीणयाहिनः
स्वाहानमः इतिप्रथमपात्रे ॥ द्वितीयेनांदीमुखानृषीन्० तृतीयेनांदीमुखान्दिव्यान्प्रीण० चतुर्थेनांदीमुखान्मनुष्यान्प्रीण० पंच
मेनांदीमुखानिभूतानिप्रीण० षष्ठसप्तमाष्टमेषुनांदीमुखान्पितॄन्प्रीणयेत्यादि० एकैकंपात्रंद्विधाविभज्यसर्वत्रयादिव्याइतिमंत्रांते
विश्वेदेवानांदीमुखाइदंवोर्घ्यमितिदत्वा ब्रह्मविष्णुमहेश्वरानांदीमुखाइदंवोर्घ्यंस्वाहानमइत्यादिनायथायथंषोडशविप्रहस्तेषुद
द्यात् ॥ यादिव्याइतिस्रवदनुमंत्रणं पात्रंन्युब्जीकृत्यगंधाद्याच्छादनांतपूजा तत्रसर्वत्रसंबुद्ध्यंतोनांदीमुखविशेषणयुक्तउच्चारः ॥
भोजनपात्राण्यासाद्यब्रह्मादिषोडशविप्रकरेष्वग्नयेकव्यवाहनायस्वाहासोमायपितृमतेस्वाहेतिमंत्राभ्यामाहुतिद्वयंदद्यात् ॥ नेद
मापस्तंबादीनां ॥ उपस्तीर्यान्नंपरिविष्यान्नाभावेआमंतन्निष्क्रयंवाप्रोक्ष्यपृथ्वीतेपात्रमित्यादिनायथादैवतमन्नस्यामादेर्वात्यागः ॥
येदेवासो० प्रजापतेन० ब्रह्मार्पणंब्रह्म० ॥ अनेनाष्टश्राद्धेननांदीमुखादेवादयःप्रीयंतां ॥ आपोशनदानांतेबलिदानवर्ज्यंभुंजीयुः ॥
तृप्तेषूपास्मै० अक्षन्नमी० संपन्नमितिपृष्टेरुचिरमितिसर्वेब्रूयुःनेदमामान्ने ॥ आचांतेषुयवलाजदधिबदरीयुतान्नेनाष्टचत्वारिंशत्पिं
डान्कृत्वा प्रागायताउदक्संस्थाअष्टौरेखाःकृत्वाभ्युक्ष्यकुशान्दूर्वावास्तीर्यपिंडस्थानेषुचतुर्विंशतौजलंसिंचेत् ॥ तद्यथा शुंधंतांब्र
ह्माणोनांदीमुखाः शुंधंतांविष्णवोनांदी० शुंधंतांमहेश्वरानां० इतिप्रथमरेखायां ॥ तदुत्तररेखासुशुंधंतांदेवर्षयोनां० शुंधंतांब्रह्म

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

र्षयोनां० इत्याद्यूहोज्ञेयः ॥ ततोब्रह्मणेनांदीमुखायस्वाहेत्येकंपिंडंदत्वाद्वितीयएवमेवदेयस्तूष्णींवेतिप्रतिदैवतंपिंडद्वयं ॥ एवमग्रे पिविष्णवेनांदीमुखायस्वाहत्यादयःस्वाहांताःपिंडदानमंत्राऊह्याः ॥ अत्रपितरोमादयध्वमित्यादिपुनःशुंधंतांतंतंत्रमंजनमभ्यं जनंचकृताकृतं ॥ पिंडान्गंधादिनासंपूज्यनत्वोपसंपन्नमितिविसृज्यविप्रेभ्योदक्षिणादितंत्रं ॥ नेदंपिंडदानाद्यापस्तंबादीनां ॥ अष्टश्राद्धोत्तरंतदिनेद्वितीयेवाषट्शिखाकेशान्स्थापयित्वाकक्षोपस्थवर्जं केशश्मश्रुनखादिवापयित्वास्नात्वाकौपीनाच्छादनादि होमद्रव्यंचविनान्यद्धनादिविप्रादिभ्यःपुत्रादिभ्यश्चत्यजेत् ॥ कौपीनादिकंगैरिकरंजितंकृत्वावैणवंदंडंसत्वचंशिरोभ्रूललाटान्य तमप्रमाणंसमूलमंगुलिस्थूलंविप्रानीतमेकादशनवचतुःसप्तान्यतमपर्वकंपर्वग्रंथियुतंमुद्रायुतंसंपाद्यशंखोदकेनप्रणवपुरुषसूक्तके शवादिनामभिरभिषिच्यस्थापयेत् ॥ ततःकमंडलुकौपीनाच्छादनकंथापादुकाःस्थापयेत् शिक्यपात्रादिकमपीतिकेचित् ॥ ॥ देशकालौसंकीर्त्याशेषदुःखनिवृत्तिनिरतिशयानंदप्राप्तिपरमपुरुषार्थप्राप्तयेपरमहंसाख्यसंन्यासग्रहणंकरिष्येतदंगतयागणपति पूजनपुण्याहवाचननांदीश्राद्धानिकरिष्ये ॥ तानिकृत्वाजपेत् ब्रह्मणेनमः विष्णवे० रुद्राय० सूर्याय० सोमाय० आत्मने० अंतरात्मने० परमात्मने० अग्निमीळेऋक् इषेत्वोर्जेत्वा० अन्नआयाहिऋक् शन्नोदेवीऋक् जपित्वा सक्तुपिष्टंमुष्टित्रयंप्रणवेन त्रिःप्राश्यनाभिमालभेत ॥ आत्मनेस्वाहा अंतरात्मने० परमात्मनेस्वा० प्रजापतयेस्वाहेतिमंत्रैः ॥ ततःपयोदधिमिश्रमाज्यंजल मेववात्रिवृदसीतिप्रथमंप्राश्यप्रवृदसीतिद्वितीयंविवृदसीतितृतीयंप्राश्यापःपुनंत्वितिजलंप्राश्याचम्योपवासंकुर्यात् ॥ ॥

॥ ३७८ ॥ सावित्रीप्रवेशः ॥

श्रीः ॥ ॐ भूःसावित्रींप्रविशामि ॐ तत्सवितुर्वरेण्यं ॐ भर्गःसावित्रीं० भर्गोदेवस्य० ॐ स्वःसावित्रीं० धियोयो० ॥ ॐ

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भूर्भुवःस्वःसावित्रींप्र० तत्सवितुर्वरेण्यं० ॥ ऋक् ॥ ततोस्तात्प्राक्गृह्याग्निंसमिध्यविच्छिन्नश्चेत्पुनःसंधानविधिनानिरग्निर्वाविधुरा दिर्वापृष्टोदिविविधानेनाग्निंसंपादयेत् (पृष्टोदिविविधानंचकात्यायनवैश्वदेवप्रसंगेधर्मसिंधौद्रष्टव्यं)॥ ॥ अथास्तात्पूर्वंब्रह्मा न्वाधानं ॥ संन्यासंकर्तुंब्रह्मान्वाधानंकरिष्येइतिसंकल्प्याग्निध्यानाद्याज्यंसंस्कृत्यस्रुक्स्रुवौसंमृज्यस्रुचिचतुराज्यंगृहीत्वोंस्वाहे तिहुत्वापरमात्मनइदं० परिषेचनादि इतिब्रह्मान्वाधानं ॥ ततःसायंसंध्याहोमवैश्वदेवान्कृत्वाग्निसमीपेजागरंकुर्यात् ॥ ॥ प्रातर्नित्यहोमांतेवैश्वदेवादिकंकृत्वाग्नेयंवैश्वानरंवास्थालीपाकंकुर्यात् ॥ तत्रकरिष्यमाणसंन्यासपूर्वांगभूतमाग्नेयस्थालीपाकंक रिष्यइतिसंकल्पः ॥ ध्यात्वाचक्षुषीआज्येनेत्यंतेत्रप्रधानमग्निंचरुणाशेषेणेत्यादिअग्नयेत्वाजुष्टंनिर्वपामीत्यादिनान्नानिर्वापादिना म्नैवप्रधानहोमः एवंवैश्वानरपक्षेप्यूह्यम् ॥ ततस्तरत्समंदीतिजपित्वाकुशहेमरूप्यजलैःस्नात्वादेशादिस्मृत्वासंन्यासांगभूतंप्राणा दिहोमंपुरुषसूक्तहोमंविरजाहोमंचतंत्रेणकरिष्येइतिसंकल्प्यान्वाधानेआज्येनेत्यंतेप्राणादिपंचदेवताःसमिच्चर्वाज्यैःपुरुषंपुरुषसू क्तेनप्रत्यृचंषोडशवारंसमिच्चर्वाज्यैः प्राणाद्येकोनविंशतिदेवताविरजामंत्रैःप्रतिद्रव्यमेकैकसंख्यसमिच्चर्वाज्याहुतिभिःप्रजापतिं सकृदाज्येनशेषेणेत्यादिषष्टयुत्तरशतवारंतूष्णींनिरुप्यतथैवप्रोक्ष्यश्रपयित्वाज्यभागांतेप्राणायस्वाहेत्यादिपंचमंत्रैर्द्रव्यत्रयंसकृ द्धुत्वायथादैवंत्यक्त्वासहस्रशीर्षेतिषोडशर्चेनप्रत्यृचंपृथक्पृथक्द्रव्यत्रयंहुत्वापुरुषायेदंनममेतिसर्वत्रत्यजेत् ॥ ॥ ७ ॥

॥ ३७९ ॥ विरजाहोमः ॥

श्रीः ॥ प्राणापानव्यानोदानसमानामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंस्वाहाप्राणादिभ्यइदं० वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्रा णरेतोबुद्ध्याकूतिसंकल्पामेशुद्ध्यंतांज्योति० वागादिभ्यइदं० त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनिमेशुद्ध्यंतां० त्वगादि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

भ्यइदं० शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवोमेशुद्ध्यं० शिरआदिभ्यइदं० उत्तिष्ठपुरुषहरितपिंगललोहिताक्षदे
हिदेहिददापयितामेशुद्ध्यं० पुरुषादिभ्यइदं पृथिव्यापस्तेजोवायुराकाशोमेशुद्ध्यं० पृथिव्यादिभ्यइदं० शब्दस्पर्शरूपरसगंधामे
शुद्ध्यं० शब्दादिभ्य० मनोवाक्कायकर्माणिमेशुद्ध्यंतां० मनआदिकर्मभ्य० अव्यक्तभावैरहंकारैर्ज्योतिरहं० अव्यक्तादिभ्य० आ
त्मामे शुद्ध्यतांज्यो० आत्मन० अंतरात्मामे० अंतरात्मन० परमात्मामे० परमात्मन० क्षुधेस्वाहा क्षुधइदं क्षुत्पिपासायस्वाहा क्षु
त्पिपासायेदं० विविद्यैस्वाहा० विविद्यायाइदं० ऋग्विधानाय० कर्षोत्कायस्वा० क्षुत्पिपासामलाज्येष्ठामलक्ष्मींनाशयाम्यहं अभू
तिमसमृद्धिंचसर्वांनिर्णुदमेपाप्मानꣳस्वाहाअन्नयइदं० अन्नमयप्राणमयमनोमयमानंदमयमात्मामेशुद्ध्यंतां० अन्नमयादिभ्य०
एवंसमिच्चर्वाज्यैःप्रतिद्रव्यंचत्वारिंशदाहुतीर्हुत्वा यदिष्टंयच्चपूर्तंयच्चापद्यनापदि प्रजापतौतन्मनसिजुहोमि विमुक्तोहंदेवकि
ल्बिषात्स्वाहेत्याज्यंहुत्वाप्रजापतयइदमितित्यजेत् ॥ ततःपुरुषसूक्तंअग्निमिळेइत्यादिचतुर्वेदादींश्चजपित्वास्विष्टकृदादिहोमशे
षंसमाप्य ब्रह्मचार्यादिभ्योगोहिरण्यवस्त्रादिदत्वासमासिंचंतुमरुतइतिमंत्रेणगृह्याग्निमुपस्थायतत्रदारुपात्राणिदहेत्तैजसानिगुर
वेदद्यात् ॥ ततआत्मन्यग्निसमारोपंअयंतेयोनिरित्यृचा यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानमित्यादियजुषाचत्रिरुक्तेनाग्ने
र्ज्वालांप्राश्नन्कुर्यात् ॥ कृष्णाजिनमादायगृहान्निष्क्रम्य ॥ सर्वेभवंतुवेदाढ्याःसर्वेभवंतुसोमपाः ॥ सर्वेपुत्रमुखंदृष्ट्वासर्वेभवंतु
भिक्षुकाः॥ इतिपुत्रादिभ्यआशिषंदत्वा नमेकश्चिन्नाहंकस्यचित्इतिपुत्रादीनुक्त्वाविसृजेत्॥ जलाशयंगत्वांजलिनाजलमादाया
शुःशिशानइतिसूक्तेनाभिमंत्र्यसर्वाभ्योदेवताभ्यःस्वाहेतित्यजेत् ॥ तिथ्यादिस्मृत्वाऽपरोक्षब्रह्मावाप्तयेसंन्यासंकरोमीतिसंक
ल्प्यजलांजलिंगृहीत्वा ॐ एषहवाअग्निःसूर्यःप्राणंगच्छस्वाहा ॐ स्वांयोनिंगच्छस्वाहा ॐ आपोवैगच्छस्वाहेतिमंत्रत्रयेणजले

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ष्वंजलित्रयंदद्यात् ॥ पुत्रेषणावित्तेषणालोकेषणासर्वेषणामयापरित्यक्ताअभयंसर्वभूतेभ्योमत्तःस्वाहाइत्यंजलिंजलेक्षिपेत् ॥ पुन
रेवमभयंदत्वावदेत् ॥ यत्किंचिद्वंधनंकर्मकृतमज्ञानतोमया ॥ प्रमादालस्यदोषोत्थंतत्सर्वंसंत्यजाम्यहं ॥ त्यक्तसर्वोविशुद्धा
त्मागतस्नेहशुभाशुभः ॥ एषत्यजाम्यहंसर्वंकामभोगसुखादिकं ॥ रोषंतोषंविवादंचगंधमाल्यानुलेपनं ॥ भूषणंनर्तनंगेयंदानमा
दानमेवच ॥ नमस्कारंजपंहोमंयाश्चनित्याःक्रियामम ॥ नित्यंनैमित्तिकंकाम्यंवर्णधर्माश्रमाश्रये ॥ सर्वमेवपरित्यज्यददाम्यभय
दक्षिणां ॥ पद्भ्यांकराभ्यांविहरन्नाहंवाक्कायमानसैः ॥ करिष्येप्राणिनांपीडांप्राणिनःसंतुनिर्भयाः ॥ सूर्यादिदेवान्विप्रांश्चसाक्षित्वे
नध्यात्वानाभिमात्रेजलेप्राङ्मुखःसावित्रीप्रवेशंपूर्ववत्कृत्वा तरत्समंदीतिसूक्तंपठित्वा पुत्रेषणायावित्तेषणायालोकेषणायाश्चव्यु
त्थितोहंभिक्षाचर्यंचरामीतिजलेजलंजुहुयात् ॥ ॥ प्रेषोच्चारः ॥ ॐ भूःसंन्यस्तंमया ॐ भुवःसंन्यस्तंमया ॐ स्वःसंन्यस्तंमया
ॐ भूर्भुवःस्वःसंन्यस्तंमयेतित्रिर्मंदमध्योच्चस्वरेणोक्त्वाअभयंसर्वभूतेभ्योमत्तःस्वाहेतिजलंजलेक्षिपेत् ॥ शिखामुत्पाट्ययज्ञोपवी
तमुद्धृत्यकरेगृहीत्वा॥ आपोवैसर्वादेवताःसर्वाभ्योदेवताभ्योजुहोमिस्वाहा ॥ भूःस्वाहेतिजलेजलैःसहहुत्वाप्रार्थयेत् ॥ त्राहिमां
सर्वलोकेशवासुदेवसनातन ॥ संन्यस्तंमेजगद्योनेपुंडरीकाक्षमोक्षद ॥ युष्मच्छरणमापन्नंत्राहिमांपुरुषोत्तम ॥ ततोदिगंबरः
पंचपदान्युदङ्मुखोगच्छेत् ॥ विविदिषुश्चेत्तस्मैआचार्योनत्वाकाषायकौपीनाच्छादनेदत्वादंडंदद्यात् ॥ सचकौपीनंवासश्चपरि
धाय ॐ इंद्रस्यवज्रोसिसखेमांगोपायेतिदंडंगृह्णीयात् ॥ वार्त्रघ्नःशर्ममेभवयत्पापंतन्निवारय प्रणवेनगायत्र्यावाकमंडलुं॥ इदं
विष्णुरित्यासनं ॥ ततःसमित्पाणिर्गुरुंनत्वागरुडासनोपविष्टोगुरुंवदेत् ॥ त्रायस्वभोजगन्नाथगुरोसंसारवह्निना ॥ दग्धंमां
कालदष्टंचत्वामहंशरणंगतः ॥ योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै ॥ तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहं

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्रपद्ये ॥ इतिगुरुमुपस्थायदक्षिणंजान्वाच्यपादावुपसंगृह्यअधीहिभगवोब्रह्मेतिवदेत् ॥ गुरुरात्मानंब्रह्मरूपंध्यात्वाजलपूर्णशं
खंद्वादशप्रणवैरभिमंत्र्यतेनशिष्यमभिषिच्यशन्नोमित्रइतिशांतिंपठित्वा तच्छिरसिहस्तंदत्वापुरुषसूक्तंजपित्वाशिष्यहृदयेहस्तंकृ
त्वाममत्रतेहृदयंतेदधामीत्यादिमंत्रंजप्त्वादक्षिणकर्णेप्रणवमुपदिश्यतदर्थंचपंचीकरणाद्यवबोध्य प्रज्ञानंब्रह्मअयमात्माब्रह्मतत्त्व
मसिअहंब्रह्मास्मीतिऋग्वेदादिमहावाक्येष्वन्यतमंशिष्यशाखानुसारेणोपदिश्यतदर्थंबोधयेत् ॥ ततस्तीर्थाश्रमादिसंप्रदायानु
सारेणनामदद्यात् ॥ ततःपर्यंकशौचंकारयित्वायोगपट्टंदद्यात् ॥ ॥ छ ॥ ॥ छ ॥

॥ ३८० ॥ पर्यंकशौचप्रयोगः ॥

श्रीः ॥ कस्मिंश्चित्पुण्यदिनेकश्चिद्गृहस्थःस्वाग्रेपीठादौयतिमुपवेश्यगुर्वनुज्ञातोयतयेपर्यंकशौचंकरिष्येइतिसंकल्प्य वामभागेप्रा
क्संस्थान्पंचमृद्भागान्दक्षिणभागेपितथैवपंचसंस्थाप्योभयत्रशुद्धोदकंचसंस्थाप्य वामप्रथममृद्भागेनपंचवारंमृज्जलाभ्यांयतिजा
नुद्वयंकराभ्यांयुगपत्क्षालयेत् चरमक्षालनेमृद्भागसमाप्तिः एवमग्रेपि॥ ततोदक्षिणभागस्थप्रथमभागार्धेनस्ववामकरंमृज्जलाभ्यां
दशवारंप्रक्षाल्यापरार्धेनतेनैवजलेनोभौकरौसप्तवारंक्षालयेत् एवमग्रेपियोज्यं ॥ संख्यायांविशेषस्तूच्यते ॥ वामद्वितीयभागे
नचतुर्वारंजंघाद्वयंयुगपत्प्रक्षाल्यदक्षिणद्वितीयभागार्धेनसप्तवारंवामकरमर्धांतरेणचतुर्वारमुभौचकरौक्षालयेत् ॥ वामतृतीये
नयतिगुल्फौत्रिवारंदक्षिणभागार्धेनवामकरंषड्वारमुभौचतुर्वारंवामचतुर्थेन ॥ यतिपादपृष्ठौद्विवारंदक्षिणार्धेनस्ववामंकरंचतुर्वा
रंभूमौद्विवारमवशिष्टार्धेनवामपंचमेनयतिपादतलेसकृद्दक्षिणपंचमार्धेनवामस्यद्विवारमुभयोश्चापरार्धेनसकृत्क्षालनमिति ॥ ॥

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ ३८१ ॥ योगपट्टः ॥

श्रीः ॥ कारितपर्यंकशौचोयतिःकटिशौचंकृत्वाकटिसूत्रकौपीनेधृत्वावस्त्रेणावगुंठ्यगुर्वनुज्ञयोच्चासनेउपविश्यसभ्यैःसहवेदांते किंचिदुपन्यसेत् ॥ गुरुर्यतिःशिष्यंयतिंशिरसिशंखेनपुरुषसूक्तेनाभिषिच्यवस्त्रगंधपुष्पधूपदीपनैवेद्यैःसंपूज्यवस्त्रमुपरिधृत्वाय तिभिःसहविश्वरूपाध्यायं पश्यामिदेवानित्यारभ्यभुंक्ष्वराज्यंसमृद्धमित्यंतंपठित्वा पूर्वकल्पितंनामदद्यात् ॥ ततःशिष्यंवदेत् इतःपरंत्वयासंन्यासाधिकारिणेसंन्यासोदेयोदीक्षायोगपट्टादिकंचकार्यं ज्येष्ठयतयोनमस्कार्याः॥ ततोगुरुःकटिसूत्रंपंचमुद्रालंकृ तंपूर्वदंडंचशिष्यायदत्वाशिष्यंयथासंप्रदायंनमस्कुर्यात् अन्येयतयोगृहिणश्चनमस्कुर्युः॥ शिष्योनारायणेत्युक्त्वोच्चासनादुत्था यतत्रगुरुमुपवेश्ययथाविधिनत्वान्ययतीन्नमेत् ॥ इतिगृह्याग्निमतोविधुरादेश्चविविदिषासंन्यासप्रयोगः ॥ अथाग्निहोत्रिणोवि शेषः ॥ तत्रश्रौताग्नयोविच्छिन्नाश्चेत्पुनराधानंपावमानेष्ट्यंतंपूर्णाहुत्यंतंवाकृत्वाप्रायश्चित्तादिसावित्रीप्रवेशांतंपूर्ववत्कुर्यात् ॥ ॥

॥ ३८२ ॥ ब्रह्मान्वाधानम् ॥

श्रीः ॥ अग्नित्रयंसमिध्यसंस्कृतमाज्यंस्रुचिचतुर्वारंगृहीत्वाहवनीयेपूर्णाहुतिं ॐस्वाहापरमात्मनइदमितिकुर्यात् ॥ सायंसंध्या ग्निहोमांतेउत्तरेणगार्हपत्यंद्वंद्वशःपात्राण्यासाद्याहवनीयदक्षिणतःकौपीनदंडाद्यासादयेत् ॥ रात्रिजागरांतेप्रातर्होमादिकृत्वापौ र्णमास्यांब्रह्मान्वाधानंचेत्पौर्णमासेष्टिंकृत्वादर्शेष्टिमपिपक्षहोमापकर्षपूर्वकमपकृष्यतदैवकुर्यात् ॥ दर्शेचेद्दर्शेष्टिरेव ॥ ॥ अथ पूर्णमास्यांदर्शेवादेशकालौस्मृत्वासंन्यासपूर्वांगभूतयाप्राजापत्येष्ट्यावैश्वानर्येष्ट्याचसमानतंत्रयायक्ष्ये इतिसंकल्प्यसमुच्चयेनेष्टि

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्वयं ॥ अत्रवैश्वानरद्वादशकपालःपुरोडाशःप्राजापत्यश्चरुर्वैष्णवोनवकपालःपुरोडाशः अथवाकेवलप्राजापत्येष्टिः॥ अत्रप्रयोगः स्वस्वसूत्रानुसारेणोह्यः ॥ बौधायनसूत्रानुसारेणकिंचिदुच्यते ॥ पवनपावनपुण्याहवाचनादिपूर्वांगांतेकेवलवैश्वानरेष्ट्याःकेव लप्राजापत्यावासंकल्पः व्रीहिमयःपुरोडाशोद्रव्यं पंचप्रयाजाः अग्निर्वैश्वानरःप्रजापतिर्वादेवता पंचदशसामिधेन्यः व्रतग्रहणां तेध्वर्युराज्यंसंस्कृत्यस्रुचिचतुर्गृहीतंगृहीत्वापृथिवीहोतेत्यादिचतुर्होतृहोमंकूष्मांडहोमसारस्वतहोमौचकृत्वानिर्वापादिः वैश्वान रोद्वादशकपालःपुरोडाशःप्राजापत्यश्चरुः वैश्वानरायप्रतिवेदयामइतिपुरोनुवाक्यावैश्वानरःपवमानःपवित्रैरितियाज्याप्राजाप त्यायांप्रधानमुपांशुधर्मकं सुभूःस्वयंभूरित्याद्यनुवाक्या प्रजापतेनत्वदेतानितियाज्या ॥ अथस्रुवेणाष्टावुपहोमावुभयत्र वैश्वा नरोनऊतयआप्रयातुपरावतः अग्निरुक्थेनवाहसास्वाहा वैश्वानरायेदमितित्यागःसर्वत्र ॥ ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिं अजस्रंघर्ममीमहेस्वाहा २ वैश्वानरस्यदस० ३ पृष्टोदिविपृष्टोअग्निः० ४ जातोयदग्ने० ५ त्वमग्नेशोचिषा० ६ अस्माकमग्ने० ७ वैश्वानरस्यसुमतौ० ८ अथैनमुपतिष्ठेतसहस्रशीर्षेतिसूक्तेन ॥ ततःस्विष्टकृदादिशेषंसमापयेत् ॥ सर्वोवैरुद्रःविश्वंभूतमिति द्वाभ्यामग्न्युत्सर्गः ॥ आयुर्दाअग्नेइतिमंत्रेणदर्भस्तंबस्थयजमानभागात्किंचिदादायसहस्रशीर्षेत्यनुवाकेनप्राश्यओमितिब्रह्मओ मितीदंसर्वमित्यनुवाकेनहुतशेषमाहवनीयेप्रक्षिपेत् ॥ एवंवैश्वानर्याद्यन्यतरामिष्टिंकृत्वौपासनाग्नौसर्वाधानेदक्षिणाग्नौप्राणादि होमादिविरजाहोमांतंकार्यअन्यत्प्राग्वत् ॥ आहवनीयेअरणीमुसलोलूखलातिरिक्तदारुपात्राणांदाहः ॥ ततआत्मन्याहवनी याग्निसमारोपःपूर्ववत् अरणीद्वयंगार्हपत्येप्रक्षिप्यतत्समारोपंकृत्वादक्षिणाग्नौमुसलोलूखलेहुत्वादक्षिणाग्नेरपिसमारोपः तत

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

औपासनाग्नेःसमारोपइतिक्रमः ॥ अत्रविशेषोन्यत्रज्ञातव्यः ॥ इतिसाग्निकप्रयोगः ॥ स्नातकंप्रतिब्रह्मान्वाधानविरजाहोमादिरहितोवाप्रयोगोग्न्यभावात् ॥ इतिब्रह्मान्वाधानम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३८३ ॥ मृतयतिसंस्कारः ॥

श्रीः ॥ पुत्रःशिष्योवास्नात्वावपनंकृच्छ्रत्रयंचाधिकारार्थंकुर्यात् पुत्रातिरिक्तस्यवपनंकृताकृतं ॥ देशकालौस्मृत्वाब्रह्मीभूतस्य यतेःशौनकोक्तविधिनासंस्कारंकरिष्ये ॥ नवंकलशंतीर्थेनापूर्य गंगेचयमुने० नारायणःपरंब्रह्म० यच्चकिंचिज्जगत्सर्व० इतिमंत्रैरभिमंत्र्यरुद्रसूक्तविष्णुसूक्तापोहिष्टादिभिर्यतेःस्नानंविधाय चंदनादिभिःकलेवरंसंपूज्यमाल्यादिभिरलंकृत्यवाद्यघोषादिभिः शुद्धदेशंनयेत् जलेस्थलेवासमाहितंकुर्यात् स्थलपक्षेगर्तंव्याहृतिप्रोक्षितभुविदंडप्रमाणंकृत्वामध्येसूक्ष्मगर्तंसार्धहस्तंकृत्वासप्तव्याहृतिभिःपंचगव्येनत्रिःप्रोक्ष्य जलपक्षेनद्यांपंचगव्यंप्रक्षिप्यकुशानास्तीर्यसावित्र्यादेहंप्रोक्ष्यशंखोदकेनपुरुषसूक्तेनाष्टोत्तरशतावृत्तप्रणवैश्चसंस्नाप्याष्टाक्षरेणषोडशोपचारैःसंपूज्यतुलसीमालाद्यैरलंकृत्यविष्णोहव्यंरक्षस्वेतिदेहंगर्तेनद्यांवाक्षिपेत् ॥ इदंविष्णुरितिदंडंत्रेधाभग्नंदक्षिणहस्तेस्थापयेत् ॥ हंसःशुचिषदितिपरेणनाकंनिहितंगुहायांविभ्राजदेतद्यतयोविशंति ॥ वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्त्वाः ॥ इतिहृदयेजपेत् पुरुषसूक्तंभ्रुवोर्मध्येजपेत् ब्रह्मजज्ञानमितिमूर्धनिमूर्धानंभूर्भुवःस्वश्चेत्युक्त्वाशंखेनभेदयेत् ॥ अथवाभूमिर्भूमिमगान्मातामातरमप्यगात् ॥ भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसभिद्यतामितिमंत्रेणपरश्वादिनाभेदयेत् ॥ शिरोभेत्तुमशक्तःशिरस्थापितंगुडपिंडादिकंभिंद्यात् ॥ गर्तपुरुषसूक्तेनलवणेनप्रपूरयेत् ॥ सृगालश्वादिरक्षार्थंसिकतादिभिःप्रपूरयेत् ॥ नद्यादौशिरोभेदनोत्तरंदर्भैराच्छाद्यव्याहृतिभिरभिमंत्र्यपाषाणंबद्ध्वा ॐ स्वाहेतिह्रदेन्यसेत् ॥ ततो

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ग्निनाग्निःस० त्वंह्यग्नेअग्निना० तंमर्जयंतसुक्रतुं० यज्ञेनयज्ञं० इत्यृक्चतुष्टयेनचित्तिःस्रुगित्यादिभिर्दशहोत्रादिसंज्ञकयजुर्मंत्रै
श्चाभिमंत्रयेत् ॥ अतोदेवाइतिजपित्वापापैर्मुक्ताअश्वमेधादिफलभागिनोवयमितिभावयंतोऽवभृथवुद्ध्यासर्वेनुगामिनःस्नात्वा
गंधादिधृत्वासोत्सवागृहंगच्छेयुः ॥ अत्रपरमहंसस्यस्थलेसमाधिर्मुख्यःजलेमध्यमः ॥ कुटीचकंतुप्रदहेत्पूरयेच्चबहूदकं ॥ हंसोज
लेतुनिक्षेप्यःपरमहंसंप्रपूरयेदितिवचनात् ॥ अत्रपरमहंसंप्रकीरयेदितिक्वचित्पाठः ॥ एकोद्दिष्टंजलंपिंडमाशौचंप्रेतसत्क्रियां ॥
नकुर्याद्वार्षिकादन्यद्ब्रह्मीभूतायभिक्षवे ॥ कुटीचकातिरेकेणनदहेद्यतिनंक्वचित् ॥ ॥ ततःकर्तास्नात्वाचम्यसिद्धिंगतस्यब्र
ह्मीभूतभिक्षोस्तृप्त्यर्थंतर्पणंकरिष्येइतिसंकल्प्य सव्येनदेवतीर्थेनैवात्मानमंतरात्मानंपरमात्मानमितिचतुश्चतुस्तर्पयित्वा शुक्ल
पक्षेमृतस्यकेशवादिद्वादशनामभिः कृष्णपक्षेमृतस्यसंकर्षणादिद्वादशनामभिःकेशवंतर्पयामीत्येवंद्वितीयांतैःकुर्यात् ॥ इदंक्षी
रेणेतिकेचित् ॥ ततःसिद्धिंगतस्यभिक्षोस्तृप्त्यर्थंनारायणपूजनंबलिदानंघृतदीपदानंचकरिष्येइतिसंकल्प्यदेवयजनोपरितीरेवामृ
न्मयलिंगंकृत्वापुरुषसूक्तेनाष्टाक्षरेणचषोडशोपचारपूजांकृत्वाघृतमिश्रपायसबलिंदत्वाघृतदीपंचसमर्प्यपायसबलिंजलेक्षिपेत् ॥
ततः ॐ नमोब्रह्मणेनमइतिशंखेनाष्टार्घ्यान्दत्वागृहंव्रजेदितिप्रथमदिनकृत्यं ॥ एवंदशदिनांतंप्रत्यहंतर्पणंलिंगपूजनंपायसब
लिदीपदानानिकुर्यात् ॥ इतिमृतयतिसंस्कारः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३८४ ॥ एकादशेहनिपार्वणश्राद्धम् ॥

श्रीः ॥ तत्रमध्याह्नेनद्यादौश्राद्धांगतिलतर्पणंकृत्वादेशकालौस्मृत्वाप्राचीनावीतीअमुकगोत्रस्यामुकशर्मणोब्रह्मीभूतस्यासत्पितुः
करिष्यमाणदर्शादिसर्वश्राद्धाधिकारार्थमाद्यपार्वणश्राद्धंकरिष्येइतिपुत्रादिःसंकल्पयेत् ॥ शिष्यस्तुब्रह्मीभूतगुरोःप्रत्यब्दादिश्रा

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

द्धाधिकारार्थंतत्पितृसंबंधिनामगोत्रोद्देश्यतासिद्ध्यर्थंचपार्वणश्राद्धमितिसंकल्पयेत् ॥ अन्यत्समानं ॥ पुरूरवार्द्रवसंज्ञकाविश्वे देवाः ॥ पितृपितामहप्रपितामहानांनामगोत्रादिसहितानामुच्चारः ॥ सर्वत्रपितुर्ब्रह्मीभूतइतिविशेषणमात्रमधिकंशेषंप्रत्यब्दश्रा द्धवत् ॥ केचिच्छिष्यःकर्ताचेदात्मांतरात्मपरमात्मनउद्दिश्यसाधुरुसंज्ञकदेवयुतंसव्येनदेवधर्मकंनांदीश्राद्धवदेकादशाहेपार्व णश्राद्धंकुर्यादित्याहुः ॥ अत्रसर्वत्रविस्तरस्तोरोकृतसंन्यासपद्धतौद्रष्टव्यः ॥ इतिएकादशेहनिपार्वणश्राद्धम् ॥ ॥ ७ ॥

॥ ३८५ ॥ द्वादशाहेनारायणबलिः ॥

श्रीः ॥ देशादिस्मृत्वासिद्धिंगतस्यभिक्षोःसंभावितसर्वपापक्षयपूर्वकंविष्णुलोकावाप्तिद्वाराश्रीनारायणप्रीत्यर्थंनारायणबलिंकरि ष्येइतिसंकल्प्यत्रयोदशयतीन्विप्रान्वानिमंत्र्य शुक्लपक्षेकेशवरूपिगुर्वर्थेत्वयाक्षणःकर्तव्यइत्येवंकेशवादिदामोदरांतद्वादशनाम भिःक्षणोदेयः ॥ कृष्णेतुसंकर्षणादिद्वादशनामभिः॥ त्रयोदशंविप्रंविष्ण्वर्थंत्वयाक्षणःकर्तव्यइतिनिमंत्र्यपादान्प्रक्षाल्यप्राङ्मुखा नुपवेशयेत् ॥ विप्राग्रेस्थंडिलेग्निप्रतिष्ठापनादि ॥ अन्वाधानेसामान्यप्रधानांतेग्निंत्रायुंसूर्यंप्रजापतिंचव्यस्तसमस्तव्याहृतिभिरेकै कपायसाहुत्या विष्णुमतोदेवाइतिषड्भिःप्रत्यृचमेकैकपायसाहुत्या नारायणंपुरुषसूक्तेनप्रत्यृचमेकैकपायसाहुत्याशुक्लेकेशवादि द्वादशदेवताः कृष्णेसंकर्षणादिद्वादशदेवताः एकैकपायसाहुत्याशेषेणेत्यादिद्विपंचाशदधिकशतमुष्टीन्निरुप्यबलिपर्याप्ततंडुला नोप्याष्टत्रिंशदाहुतिपर्याप्तंपुरुषाहारमितविष्णुनैवेद्यपर्याप्तंचक्षीरेश्रपयित्वाज्यभागांतेग्निपूर्वतः शालग्रामेविष्णुसूक्तेनाष्टाक्षरेण चषोडशोपचारैःसंपूज्य स्रुचाहस्तेनवान्वाधानानुसारेणहोमत्यागौविदध्यात् ॥ एवंशुक्लकृष्णभेदेनकेशवादिद्वादशांताःसंकर्ष णाद्यंतावाष्टत्रिंशदाहुतीर्हुत्वास्विष्टकृदादिशेषंसमाप्य पुनःशालग्रामंसंपूज्यविष्णुगायत्र्याविष्णवेर्घ्यंदत्वाहुतशेषपायसेनविष्ण

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

वेबलिंदत्वा निमंत्रितत्रयोदशविप्रान्केशवादिक्रमेणकेशवरूपिगुरवेनमइदमासनमित्यादिनासनगंधपुष्पधूपदीपाच्छादनानि दत्वा त्रयोदशविप्रेपुरुषसूक्तेनप्रत्यृचांतेविष्णवेनमइत्येवमादिनाविष्णुंदीपांतोपचारैःपूजयेत् ॥ चतुरस्रमंडलेषुत्रयोदशभोजनपात्राण्यासाद्योपस्तीर्यान्नंपरिषिच्य पृथिवीतेपात्रमित्यादिनाकेशवादिद्वादशोद्देशेनविष्णूद्देशेनचान्नंत्यक्त्वा अतोदेवा० ॐ तद्ब्रह्म ॐ तद्वायुर्ब्रह्मार्पणमित्याद्यापोशनादिप्राणाहुत्यंतेनारायणाद्युपनिषद्भागान्पठेत् ॥ तृप्तिप्रश्नांतेआचांतेषुविप्रेषुप्रागग्रान्दर्भानास्तीर्याष्टाक्षरेणाक्षतोदकंदत्वा केशवरूपिणेगुरवेऽयंपिंडःस्वाहानममइत्येवंद्वादशपिंडान्दद्यात् ॥ कृष्णेतुसंकर्षणादिनामभिरितिसर्वत्र ॥ पिंडेषुविष्णुंसंपूज्यपुरुषसूक्तेनस्तुत्वाविसर्जयेत् ॥ विप्रेभ्यस्तांबूलदक्षिणादिदत्वात्रयोदशायविप्रायनाभ आसीदित्याद्यृक्त्रयेणफलतांबूलदक्षिणांदत्वानमस्कृत्यतांशालग्राममूर्तिमाचार्यायदद्यात् ॥ इतिनारायणबलिः ॥ अत्रद्वा शाहेत्रयोदशाहेवायथाचारमाराधनमपेक्षितंतत्प्रयोगःप्रथमेप्रकरणेश्राद्धकांडेसंगृहीतस्ततोवगंतव्यः ॥ ॥ छ ॥ ॥ छ

॥ ३८६ ॥ यतिधर्माः ॥

श्रीः ॥ प्रातरुत्थायब्रह्मणस्पतइतिजपित्वादंडादीनिमृदंचादायमूत्रपुरीषयोर्गृहस्थचतुर्गुणंशौचंकृत्वाचम्यपर्वद्वादशीवर्ज्यंप्रवेनदंतधावनंकृत्वामृदाबहिःकटिंप्रक्षाल्यजलतर्पणवर्ज्यंस्नात्वापुनर्जघेप्रक्षाल्यवस्त्रादीनिगृहीत्वा प्रणवेनप्राणायाममार्जनाकृत्वाकेशवादिनमोंतनामभिस्तर्पयित्वा भूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीतितर्पयेत् ॥ अत्रविशेषोधवादौविश्वेश्वर्यादौचज्ञेयः ॥ सूर्योपस्थानादिकंत्रिकालविष्णुपूजादिकंचसिंधौज्ञेयं ॥ *विधूमेसन्नमुसलेव्यंगारेभुक्तवज्जने* कालेपराह्णेभूयिष्ठेनित्यंभिक्षांयतिश्चरेत् ॥ अत्रभिक्षा[illegible] ॥ *अत्रविविदिषोर्दंडिनःमाधुकरीमुख्या ॥ दंडस्वार्था*

CC-0. In Public Domain. Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

परिग्रहणरहितस्यतुकरपात्रंमुख्यं ॥ अन्येपक्षाअशक्तविषयाः ॥ तत्रमाधुकरीपक्षेदंडादिगृहीत्वापंचभ्यःसप्तभ्योवागृहेभ्योभिक्षांयाचित्वान्नंप्रोक्ष्य भूःस्वधानमःइत्यादिव्यस्तसमस्तव्याहृतिभिःसूर्यादिदेवेभ्योभूतेभ्यश्चभूमौक्षिप्त्वाशेषमन्नंविष्णुनिवेदितं भुंजीत ॥ चंडीविनायकादिनैवेद्यंनभुंजीत ॥ भुक्त्वाचम्यषोडशप्राणायामान्कुर्यादितिसंक्षेपः ॥ ॥ छ ॥ ॥ छ ॥

॥ ३८७ ॥ यतिभोजनप्रकारः ॥

यतिहस्तेजलंदद्याद्भिक्षांदद्यात्पुनर्जलं ॥ भैक्ष्यंपर्वतमात्रंस्यात्तज्जलंसागरोपमं ॥ एकरात्रंवसेत्ग्रामेनगरेपंचरात्रकम् ॥ वर्षा न्यत्रवर्षासुमासांश्चचतुरोवसेत् ॥ अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनां ॥ महाक्षेत्रप्रविष्टानांविहारस्तुनविद्यते ॥ भिक्ष नंजपःस्नानंध्यानंशौचंसुरार्चनं ॥ कर्तव्यानिषडेतानिसर्वथानृपदंडवत् ॥ मंचकंशुक्लवस्त्रंचस्त्रीकथालौल्यमेवच ॥ दिवास्वाप श्रयानंचयतीनांपतनानिषट् ॥ वृथाजल्पंपात्रलोभंसंचयंशिष्यसंग्रहं ॥ हव्यंकव्यंतथान्नंचवर्जयेच्चसदायतिः ॥ यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच ॥ नतीर्थवासीनित्यंस्यान्नोपवासपरोयतिः ॥ नचाध्ययनशीलःस्यान्नव्याख्यानपरोभवेत् ॥ एतद्भेदार्थ भिन्नपरं ॥ एतेसंक्षेपतोयतिधर्माः ॥ अन्येपिमाधवीयमिताक्षरादौज्ञेयाः ॥ ॥ छ ॥ ॥ छ ॥

॥ ३८८ ॥ त्रिंशच्छ्लोकी(आशौचनिर्णयः) ॥

श्रीः ॥ षण्मासाभ्यंतरेषुस्वपुरुषनिहितेगर्भमात्रेविनष्टेमातातन्मासंख्यासमदिनमशुचिःस्नानशुद्धाःसपिंडाः ॥ अंत्येमासद्व येतुत्रिदिनमशुचयोतःपरंसूतिवत्स्याच्चातुर्वर्ण्यस्यतुल्यंभवतिवयसियत्प्रोच्यतेशौचमात्रं ॥ १ ॥ जन्माशौचांतरालेयदिशिशु

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

नशनंनालवृद्धचूर्ध्वकालेनिःप्राणोनिःपतेद्वाजननजनितमाशौचमस्त्येवकृत्स्नम् ॥ प्राङ्नालच्छेदनाच्चेन्निधनमुपगतस्तत्त्रयहेणै
वशुद्धिःसर्वेषांसूतिकायास्त्विहचसकलकंप्रेतशुद्धिस्तुसद्यः ॥ २ ॥ स्नानंप्राङ्नामतोर्वाग्दशनजननतोहःपरेतेग्निदग्धेऽदग्धे
त्वत्रापिसद्यस्तदुपरिदिनमाब्यब्दतश्चौलशून्ये ॥ सच्चौलेतुत्रिरात्रंत्रिदिनमितरथाप्यात्रताज्जात्यशौचंमातापित्रोस्तुपुत्रे
दशनेसन्निधौनष्टचेष्टे ॥ ३ ॥ ऊनब्द्यब्देत्वसंज्ञेजनिकरजननीसोदराणांदशाहंयद्वास्पृश्यत्वमेवाधिकमिहविषयेसूतक
त्रम् ॥ स्त्रीषुस्नानेनशुद्ध्येत्त्रिपुरुषविषयेज्ञातिराशौरकालादर्वाग्वाग्दानतोह्यांत्रिभिरुपयमनाद्भर्तृगोत्रंस्वकंच ॥ ४ ॥ ज
पेतमृत्यावपिचदशनिशाद्वादशाहानिपक्षंमासंवर्णाःक्रमेणाशुचयउचितकृच्छूद्रजातिस्तुपक्षम् ॥ वानप्रस्थेयतौचोपरम
जेषंढकेचाप्लवःस्याद्योषिद्गोविप्रमुक्त्यैमृतवतिचदिनंयुद्धविद्धेतुसद्यः ॥ ५ ॥ शावेतीतेदशाहात्प्रभृतिविषयकेप्राक्त्रि
रात्रंपक्षिण्यारुषष्ठमासादिनमिहनवमात्स्यात्ततःस्नानमात्रम् ॥ स्नानंदेशांतरस्थेत्वथपितृविषयेदेशकालाविशेषात्स्वंस्वंम
त्न्यास्त्रिदिनमिदमतिक्रांतशौचंसमानम् ॥ ६ ॥ पित्रोर्गेहेसमूढाप्रसवमरणयोरेकरात्रत्रिरात्रेस्यातांपित्रादिकानामथपि
व्यूढपुत्र्यास्त्रिरात्रम् ॥ प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्यस्वस्रीयेषुत्रिरात्रंत्रिदिवसमशुचिःसोदकस्त
॥ ७ ॥ पक्षिण्याशौचमृत्विक्दुहितृसुतसहाध्यायिबंधुत्रयांतेवासिश्वश्रूसुमित्रश्वशुरभगिनिकाभागिनेयप्रयाणे ॥ मात
चपित्रोःस्वसरिचविरतेमातुलेमातुलान्यांचाथोसज्योतिरेवस्वविषयनृपतौग्रामनाथेचनष्टे ॥ ८ ॥ शिष्योपाध्यायबंधुत्र
नयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषुस्वगृहपरमृतौमातुलेचैकरात्रम् ॥ रात्रिंसब्रह्मचारिण्यथतुकथमपिस्वल्पसंबंधयु
वासोयुतंस्यादिदमपिसकलंसर्ववर्णेषुतुल्यम् ॥ ९ ॥ वृद्धाशौचस्यमध्येत्वपरमपिसमंस्वल्पकंवासजातिप्रेतेजात्यंतरेवाय

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

तितदापूर्वशेषेणशुद्धिः ॥ द्वाभ्यांतद्रात्रिशेषेत्रिभिरपरदिनेयामिनीयामशेषेनैवाशौचेनपित्र्यंपितुरुपशमनेपक्षिणीमातृमृत्य
॥ १० ॥ सर्वंचाशौचमंतर्यदिविदितमिदंशेषमात्रेणशुद्धिर्दाहाहादाहिताग्नौमरणदिवसतोऽन्यत्रकुर्याद्दशाहम् ॥ पूर्णेस्
सचैलंविहितहितकृतावर्हकाःसूतिकातुत्रिंशद्रात्रंनयोग्यासुरपितृकरणेविंशतिःपुत्रसूस्तु ॥११॥ निर्हृत्यान्यंप्रमीतंदिव
कोऽथासवर्णंतदुक्ताशौचोथानाथमाद्यक्रतुशतफलभागाप्लवेनैवशुद्ध्येत् ॥ नीत्वोपाध्यायमातापितृपरमगुरून्ब्रह्म
तेभ्योन्यंनिर्हृतोऽस्यव्रतमपिविहितंभ्रश्यतेवश्यमेव ॥ १२ ॥ तुल्योत्कृष्टानुयानेवसनसहितकोंभस्यवाप्लुत्यवह्निंस
शुद्ध्येदथदिनमशुचिर्हीनवर्णानुयाने ॥ पक्षिण्येकांतरानुव्रजनइहभवेद्व्यंतरत्वेत्रिरात्रंकृत्वास्नात्वासुनद्यामसुयम
शंचकुर्युः ॥ १३ ॥ तातांबाचार्यकेभ्योनलजलतिलदोब्रह्मचारीतदीयाशौचोन्येभ्यस्तुतद्वत्पुनरुपनयनंचाधिकंक
अन्येत्वज्ञातिकेभ्योयदिददतितदातत्प्रयुक्ताःशुभाःस्युःकुर्युःकृच्छ्रत्रयंवाधमदहनविधौतंतमेवाप्नुवंति ॥ १४ ॥ पा
ताग्नेःप्रतिकृतिमथवास्थीनिदग्ध्वादशाहाद्याशौचाज्ञातयःस्युस्ततइतरनृणांत्रीण्यहान्येवकुर्युः ॥ अन्योविप्राद्यशौचेसकृद
मदंस्तावदाशौचकृत्स्याद्यावत्तेषांतदंतेव्रतमपिचचरेद्रोदनेत्वेकरात्रम् ॥ १५ ॥ जन्मन्यस्पृश्यतानोभवतिकुलभुवांमातृवर्जंप
तुस्तुस्नानादूर्ध्वंसचैलादथनिधनकृताशौचकेऽल्पेत्रिभागे ॥ पूर्वांशस्योपरीत्थंमहतिचयदिसंचायनंवृत्तमासीन्नोचेत्तस्योपरिष्टाद
थतुगृहजयोर्दासयोराप्लवोर्ध्वं ॥ १६ ॥ अन्नेनोपात्तयोस्तुत्रिरजनिचरणाद्दत्तदासादिकानांस्वाम्याशौचाहसंख्यासमदिनगमना
दूर्ध्वमन्यत्तुसूक्तं ॥ जातेऽपत्येतुतस्मिन्नहनिनिशिचतन्मंगलार्थेषुयोग्याःसर्वाशौचंसदानोभवतियतिवनिब्रह्मचर्यस्थितानाम्
॥ १७ ॥ तत्तत्कार्येषुसत्रिव्रतिनृपनृपवद्दीक्षितर्त्विक्स्वदेशभ्रंशापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्पातुराणां ॥ संप्रारब्धे

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

षुदानोपनयनयजनश्राद्धयुद्धप्रतिष्ठाचूडातीर्थार्थयात्राजपपरिणयनाद्युत्सवेष्वेतदर्थे ॥ १८ ॥ नाशौचाज्ञातयःस्युःपतितपति
सुतब्रह्मविट्घातिनीषुदोषात्पाखंडिचौराश्रमरहितसुरापेयहीनोपगासु ॥ संदर्पात्सर्पविप्रक्षितिपपशुदिवाकीर्तिकाद्यैर्हतेषुस्वेच्छा
पूर्वंचशस्त्रज्वलनजलविषानाशकाद्यैर्मृतेषु ॥ १९ ॥ नाशौचंशाककाष्ठाजिनलवणतृणक्षीरनीरामिषेषुपुष्पेमूलेफलेचौषधिदध्रि
मधुघुस्यात्तिलेक्ष्वामभोज्ये ॥ दद्यादद्यादिमानिस्वयमनुमननात्स्वामिनोयातिजाताशौचेवाकृत्रिमेवापणितमगर
चिस्यात् ॥ २० ॥ जातारण्याग्निनार्वाक्परिणयनविधेर्दग्धिराधानकालात्गृह्येणोर्ध्वंतुविध्याहितहुतवहनैर्लौकिवे
चांडालाग्निंचिताग्निंपतितहुतभुजंसूतिकामेध्यवह्नीन्जह्याच्छूद्राहृतेनेंधनदहनघृताद्येनदाहोप्यदाहः ॥ २१ ॥
ध्यादुपनयनविधेःप्राक्परंतुस्वशाखागृह्योक्तेस्तद्विधानैःसकलशवविधिंज्येष्ठपुत्रोऽवरोवा ॥ पुत्राभावेक्रमेणस्व
श्यशिष्यर्त्विजोवाचार्योवायत्रकुर्यात्प्रथमदिनविधिंसोपितत्सूतकांतं ॥ २२ ॥ आनाभ्नःखातमात्रंनजलहुतवहौ
कामंचोर्ध्वंतुनित्यौभवतउपरतेचौलकेचौलयुक्ते ॥ नित्यौकालाविशेषादथपितृमुखशःस्नापयित्वांवरस्रग्गंधाद्यैः
मथखननेयोग्यमाज्यैर्विलिप्य ॥२३॥ प्रत्यग्द्वारान्नगर्याबहिरवनिसुरंक्षत्रियंतूत्तरेणप्राग्द्वारेणैववैश्यंपितृदिशि
नुयायुः ॥ वर्षीयःपूर्वमूनद्विशरदुपरतौनानुयानेनियामःशूद्रैःस्पृष्टोथवोढोयदिभवतिमृतःप्रेतभावान्नमुक्तिः ॥
मातृपित्रोरपिपरमगुरोर्नित्यमंभोथमित्रप्रत्तास्वस्त्रीययाज्यश्वशुरगुरुसुहृद्याजकानांयथेच्छं ॥ नत्रात्यब्रह्मचारीत्रा
बपाखंडिचौरादद्युर्येत्वत्रपिंडानलजलकथनानर्हकास्तेतुसूक्ताः॥२५॥ संस्कृत्यानीक्ष्यमाणाःसकलकुलभुवोबाल
येवृद्धपूर्वंपयसिसवसनाएकवारंनिमज्य ॥ पाषाणेत्रिःसकृद्वाप्रतिदिनमुदकंब्राह्मणेदक्षिणास्याःक्षत्रेतूदङ्मुखावै

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

प्राङ्मुखास्तेददीरन्॥ २२॥ स्नायुर्भूयोपितत्रात्रिनिशमनशनाज्ञातयोहानिशवाक्रीतात्पन्नाशनावामिषलवणपयःक्ष
स्त्रीसंगंमंगलानिव्यसनहसनमुद्रोदनोच्चासनानितार्णास्तीर्णक्षितौतेपृथगतिनियताःसंविशेयुर्निशायाम् ॥ २७
जेसमधुदहनतःप्रत्यहंपिंडमेकंभूमावेवावपेतप्रथमदिनचरुद्रव्यमेवोपरिष्टात् ॥ दाहाह्नादेवगण्यंचयन
तुर्णामेकस्मिन्सप्तमेवाहनिनवमदिनेवानुपेतेतुनैतत् ॥ २८ ॥ वर्षीयस्युद्गतेतूपरिवपननखच्छेदनं
तूपरमगुरुष्वेववापादिनित्यम् ॥ अत्रस्मार्तशुभार्थेभणितमभणितंतत्स्वगृह्यैर्विदित्वाकृत्वादान
शुभार्थं ॥ २९ ॥ दत्वापिंडंसपिंडाःपरशवदहनस्नापकाश्चव्रजित्वातद्वेश्मद्वारिचास्यप्रश
म्याग्र्यंबुदूर्वांकुरवरवृषभानक्षतान्गोमयंचस्पृष्ट्वासिद्धार्थतैलान्यथदृषदिपदंन्यस्यसर्वे

॥ अथग्रंथप्रशस्तिः ॥

श्रीः ॥ गोमांतकेवरिवरीतिचपेडणेतिग्रामःफिरंगनरपालसुगुप्तऋद्धः ॥ श्रीमाउलीरवळनाथमुखैःसुरेशैर्विद्व
धनैर्धनाढ्यैः ॥ १ ॥ तत्पश्चिमेस्तिपणशीक्षितिदेवजन्मभूमिर्यदेकनिलयाःपणशीकराख्याः ॥ आसंश्चिरायय
र्मषट्टैकतानमनसोऽमलकीर्तिभाजः ॥ २ ॥ यत्कुलस्वामिनीसाक्षान्महालक्ष्मीर्हरिप्रिया ॥ ग्रामदेवीभगवती
तम् ॥ ३ ॥ तत्राभवत्सुमतिमान्श्रुतिशास्त्रसंपत्संमानितोपिविनयीखलुलक्ष्मणाख्यः ॥ नाश्चर्यमस्यजनकोऽ
चान्वगाद्भुतभुजंजननीयदीया ॥ ४ ॥ तत्सूनुषुजघन्येनवासुदेवेनयत्नतः ॥ विद्वत्साहाय्यतोऽकारिब्रह्मकर्मस
यःपरसापेक्षतयापरार्थमथपरपरिश्रमेणापि ॥ परमेशकृपालेशात्समुच्चयोऽयंजगामपरिपूर्तिम् ॥ ६ ॥ ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणतनुजनुषा वासुदेवशर्मणा विद्वत्साहाय्येन संपाद्य संस्कृतं तदिदं
मुंबय्यां निर्णयसागराख्यमुद्रणालयाधिपतिना तुकाराम जावजीनाम्ना स्वीयेऽकनालये
मुद्रयित्वा प्रकाशितम् । शाकः १८२६ सन १९०४

इदं १८६७ स्य २५ तमराजनियमानुसारेण लेखारूढं कृत्वा, अस्य पुनर्मुद्रणादयः सर्वेधिकारा अंकयित्र. ८

SPSPL

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ इतिहिरण्यकेशीयब्रह्मकर्मसम्

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ सप्तशतीमहायंत्रम् ॥



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ सप्तशतीमहायंत्रम् ॥



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

एकलिंगतोभद्रम् ॥



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

ब्रह्मार्पणम् ।

ब्राह्माचारैकलभ्यं फलमिति निगमोद्घोषितो डिंडि
आचारो वेदशास्त्रस्मृतिविविधपुराणादिजन्मेत्यृ
वेदादीनां द्विजौघादितरदनुगुणं नैव सद्वाजनं चेत्
तं मुक्त्वा ग्रंथमेनं क नु तदसदृशेऽपात्रभूतेऽर्पयेय
अतो हिरण्यकेशीयब्रह्मकर्मसमुच्चयम् ।
कृत्वा हिरण्यकेशिभ्यो निर्मातार्पयदादरात् ॥ २

CC-0. In Public Domain.Funding by MoE-IKS ,

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ सर्वतोभद्रम् ॥



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ द्वादशलिंगतोभद्रं हरिहरमंडलं ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ द्वादशलिंगतोभद्रं हरिहरमंडलं ॥



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ अष्टलिंगतोभद्रम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ अष्टलिंगतोभद्रम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ प्रासादवास्तुमंडलंचतुःषष्ठिपदम् ॥

पू



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ प्रासादवास्तुमंडलंचतुःषष्ठिपदम् ॥

पू



CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

॥ चतुर्लिंगतोभद्रम् ॥

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

CC-0. In Public Domain.Funding by MoE-IKS